अथमिताक्षराध्यायत्रयानुक्रमणिकाप्रारंभः

श्रीगणेशायनमः श्रीसरस्वत्यैनमः श्रीगुरुभ्योनमः अथयाज्ञवल्क्यस्मृतिमिताक्षरानुक्रमणिकाप्रारंभः अथआचाराध्यायानुक्रमणिकालिख्यते

१४

इतिमिताक्षराध्यायत्रयानुक्रमणिका समाप्ता.

अथयाज्ञवल्क्यस्मृतिमिताक्षराप्रारभ्यते.




श्रीगणेशायनमः श्रीसरस्वत्यैनमः श्रीगुरुभ्योनमः श्रीमद्ग्रंथकृद्भ्योनमः धर्माधर्मौतिहिकाशास्त्रयोपिक्लेशाः पंचप्राणिनामायतंते यस्मिन्नेतैर्नैपरात्म्ब
ईशोयस्तंवंदे विष्णुमोंकारवाच्यम् १ याज्ञवल्क्यमुनिभाषितंमुहुर्विश्वरूपविकटोक्तिविस्तृतम् धर्मशास्त्रमृजुभिर्मिताक्षरैर्बालबुद्धिविधयेविविच्यते
२ याज्ञवल्क्यशिष्यः कश्चित्प्रश्नोत्तररूपंयाज्ञवल्क्यप्रणीतंधर्मशास्त्रंसंक्षिप्यकथयामास यथामनुनोक्तंभृगुः तस्यचायमाद्यश्लोकः योगिनांसनकादी
नामीश्वरःश्रेष्ठस्तंयाज्ञवल्क्यसंज्ञंसंपूज्यमनोवाक्कायकर्मभिः पूजयित्वामुनयः सामश्रवःप्रभृतयः श्रवणधारणयोग्याअब्रुवन्उक्तवंतः धर्मान्नोस्मभ्यं-
ब्रूहीति कथंअशेषतः कार्त्स्न्येन केषांवर्णाश्रमेतराणां वर्णाब्राह्मणादयः आश्रमाब्रह्मचारिप्रभृतयः इतरे अनुलोमप्रतिलोमजातामूर्धावसिक्तादयः इ

श्रीगणेशायनमः योगीश्वरंयाज्ञवल्क्यंसंपूज्यमुनयोब्रुवन् वर्णाश्रमेतराणांनोब्रूहिधर्मानशेषतः १

तरशब्दस्यद्वंद्वेचेतिसर्वनामसंज्ञाप्रतिषेधः अत्रचधर्मशब्दःषड्विधस्मार्त्तधर्मविषयः तद्यथा वर्णधर्मः आश्रमधर्मः वर्णाश्रमधर्मः गुणधर्मः निमित्तधर्मः
साधारणधर्मश्चेति तत्रवर्णधर्मोनित्यंमद्यंब्राह्मणोवर्जयेदित्यादिः आश्रमधर्मअग्नींधनभैक्षचर्यादिः वर्णाश्रमधर्मः पालाशोदंडोब्राह्मणस्येत्येवमादिः
गुणधर्मः शास्त्रीयाभिषेकादिगुणयुक्तस्यराज्ञः प्रजापालनादिः निमित्तधर्मोविहिताकरणप्रतिषिद्धसेवननिमित्तंप्रायश्चित्तं साधारणोधर्मः अहिंसादिः
नहिंस्यात्सर्वभूतानीत्याचांडालंसाधारणोधर्मः श्रुत्युक्तः शौचाचारांश्चशिक्षयेदित्याचार्यकरणविधिप्रयुक्तत्वाद्धर्मशास्त्राध्ययनस्यप्रयोजनादिकथनं

नातीवोपयुज्यते तत्रचायंक्रमः प्रागुपनयनात्कामचारकामवादकामभक्षाः ऊर्ध्वमुपनयनात्प्राग्वेदाध्ययनोपक्रमाद्धर्मशास्त्राध्ययनं ततोधर्मशास्त्र
विहितयमनियमोपेतस्यवेदाध्ययनं ततस्तदर्थजिज्ञासाततस्तदनुष्ठानमिति तत्रयद्यपिधर्मार्थकाममोक्षाःशास्त्रेणानेनप्रतिपाद्यंतेतथापिधर्मस्यप्राधा
न्याद्धर्मग्रहणंप्राधान्यंचधर्ममूलत्वादितरेषां नचवक्तव्यंधर्ममूलोर्थोर्थमूलोधर्मइति अविशेषइति यतोर्थमंतरेणापिजपतपस्तीर्थयात्रादिनाधर्मनिष्प

मिथिलास्थःसयोगीद्रःक्षणंध्यात्वाब्रवीन्मुनीन् यस्मिन्देशेमृगःकृष्णस्तस्मिन्
धर्मान्निबोधत २

त्तिः अर्थलेशोपिनधर्ममंतरेणेति एवंकाममोक्षावपीति १ एवंपृष्टः मिथिलानामनगरीतत्रस्थितःसयाज्ञवल्क्यः योगीश्वरः क्षणंध्यात्वा किंचित्कालंमनःस
माधाय एतेश्रवणाधिकारिणोविनयेनपृच्छंतीतियुक्तमेतेभ्योवक्तुमित्युक्तवान्मुनीन् किंयस्मिन्देशेमृगः कृष्णस्तस्मिन्धर्मान्निबोधतेति कृष्णसारोमृगो १
यस्मिन्देशेस्वच्छंदंविहरतितस्मिन्देशेवक्ष्यमाणलक्षणाधर्माअनुष्ठेयानान्यत्रेत्यभिप्रायः शौचाचारांश्चशिक्षयेदित्याचार्यस्यधर्मशास्त्राध्यापनविधिः २

शिष्येणतदध्ययनंकर्तव्यमितिकुतोवगम्यतइत्यतआह पुराणंब्राह्मादि न्यायस्तर्कविद्या मीमांसावेदवाक्यविचारः धर्मशास्त्रंमानवादि अंगानिव्याकरणा
दीनिषट् एतैरुपेताश्चत्वारोवेदाः विद्याःपुरुषार्थसाधनज्ञानानितासांस्थानानिचचतुर्दश धर्मस्यचचतुर्दशस्थानानिहेतवः एतानिचत्रैवर्णिकैरध्येतव्यानि
तदंतर्भूतत्वाद्धर्मशास्त्रमप्यध्येतव्यं तत्रैतानिब्राह्मणेनविद्याप्राप्तयेधर्मानुष्ठानायचाधिगंतव्यानि क्षत्रियवैश्याभ्यांधर्मानुष्ठानाय तथाचशंखेनविद्यास्थाना
न्यनुक्रम्योक्तं एतानिब्राह्मणोधिकुरुतेसचवृत्तिंदर्शयतीतरेषामिति मनुरपिद्विजातीनांधर्मशास्त्राध्ययनेधिकारोब्राह्मणस्यप्रवचनेनान्यस्येतिदर्शयति निषे

पुराणन्यायमीमांसाधर्मशास्त्रांगमिश्रिताः वेदाःस्थानानिविद्यानांधर्मस्यचचतुर्दश ३ मन्वत्रिविष्णुहारीतयाज्ञवल्क्योशनोंगिराः
यमापस्तंबसंवर्ताःकात्यायनबृहस्पती ४ पराशरव्यासशंखलिखितादक्षगौतमौ शातातपोवसिष्ठश्चधर्मशास्त्रप्रयोजकाः ५

कादिश्मशानांतोमंत्रैर्यस्योदितोविधिः तस्यशास्त्रेधिकारोस्मिन्ज्ञेयोनान्यस्यकस्यचित् विदुषाब्राह्मणेनेदमध्येतव्यंप्रयत्नतः शिष्येभ्यश्चप्रवक्तव्यंसम्यङ्ना
न्येनकेनचिदिति ३ अस्तुधर्मशास्त्रमध्येतव्यंयाज्ञवल्क्यप्रणीतस्यास्यशास्त्रस्यकिमायातमित्यतआह उशनः शब्दपर्यंतोद्वंद्वैकवद्भावः याज्ञवल्क्यप्रणीत
मिदंधर्मशास्त्रमध्येतव्यमितिभावः नेयंपरिसंख्याकिंतुप्रदर्शनार्थमेतत् अतोबौधायनादेरपिधर्मशास्त्रत्वमविरुद्धम् एतेषांप्रत्येकंप्रामाण्येपिसाकां
क्षाणामाकांक्षापरिपूरणमन्यतः क्रियते विरोधेतुविकल्पः ४ ५ ७ ७ ७ ७ ७ ७

इदानींधर्मस्यकारकहेतूनाह देशोयस्मिन्देशेमृगः कृष्णइत्युक्तलक्षणः कालःसंक्रांत्यादिः उपायःशास्त्रोक्तेतिकर्त्तव्यताकलापः द्रव्यंप्रतिग्रहादिलब्धं गवादि श्रद्धा आस्तिक्यबुद्धिः तदन्वितंयथाभवतितथा पात्रंनविद्यतेत्येवमादिवक्ष्यमाणलक्षणं प्रदीयतेयथानप्रत्यावर्त्ततेतथापरस्वत्वापत्त्यवसानंत्यज्य तेएतद्धर्मस्योत्पादकं किमेतावदेवनेत्याह सकलमिति अन्यदपिशास्त्रोक्तंजातिगुणयागहोमादितत्सकलंधर्मस्यकारकं जातिगुणद्रव्यभावार्थात्मकंचतुर्विधंधर्मस्यकारकमित्युक्तंभवति तच्चसमस्तंव्यस्तंवायथाशास्त्रंद्रष्टव्यम् श्रद्धासर्वत्रानुवर्त्ततएव ६ इदानींधर्मस्यज्ञापकहेतूनाह श्रुतिर्वेदः स्मृतिर्धर्मशा-

देशेकालउपायेनद्रव्यंश्रद्धासमन्वितम् पात्रेप्रदीयतेयत्तत्सकलंधर्मलक्षणम् ६ श्रुतिःस्मृतिःसदाचारःस्वस्यचप्रियमात्मनः सम्यक्संकल्पजःकामोधर्ममूलमिदंस्मृतम् ७ ईज्याचारदमाहिंसादानस्वाध्यायकर्मणाम् अयंतुपरमोधर्मोयद्योगेनात्मदर्शनम् ८

स्त्रं तथाचमनुः श्रुतिस्तुवेदोविज्ञेयोधर्मशास्त्रंतुवैस्मृतिरिति सदाचारःसतांशिष्टानामाचारः अनुष्ठानंनाशिष्टानां स्वस्यचात्मनःप्रियं वैकल्पिकेविषये यथागर्भाष्टमेष्टमेवाब्देइत्यादिषात्मेच्छैवनियामिका सम्यक्संकल्पान्जातः शास्त्राविरुद्धःकामः यथामयाभोजनव्यतिरेकेणोदकंनपातव्यमिति एतेधर्मस्यमूलंप्रमाणं एतेषांविरोधेपूर्वपूर्वबलीयस्त्वं ७ देशादिकारकहेतूनामपवादमाह ईज्यादीनांकर्मणां अयमेवपरमोधर्मः यद्योगेनबाह्यचित्तवृत्तिनिरोधेनात्मनोदर्शनंयाथातथ्यज्ञानम् योगेनात्मज्ञानेदेशादिनियमोनास्तीत्यर्थः तदुक्तं यत्रैकाग्रतातत्राविशेषादिति ८ ७ ७ ७



कारकहेतुषुज्ञापकहेतुषुवासंदेहेनिर्णयहेतुमाह चत्वारोब्राह्मणाःवेदशास्त्रधर्मज्ञाःपर्षत् तिस्रोविद्याअधीयंतइतित्रैविद्याःतेषांसमूहस्त्रैविद्यं धर्मशास्त्रज्ञत्वमत्राप्यनुवर्त्ततेतद्वापर्षत् सापूर्वोक्तापर्षत्यंब्रूतेसधर्मः अध्यात्मज्ञानिषुनिपुणतमोवेदधर्मशास्त्रज्ञश्चएकोपियंब्रूतेसोऽपिधर्मः ९ इत्युपोद्घातप्रकरणं एतैर्नवभिःश्लोकैःसकलशास्त्रोपोद्घातमुक्त्वाइदानींवर्णादीनांधर्मान्वक्तुंप्रथमंतावद्वर्णानाह ब्राह्मणक्षत्रियवैश्यशूद्राश्चत्वारोवर्णाःवक्ष्यमाणलक्षणास्तेषामाद्यास्त्रयोब्राह्मणक्षत्रियवैश्याद्विजाःद्विर्जायंतइतिद्विजाः तेषांद्विजानांवैएवनशूद्रस्य निषेकाद्याःनिषेकोगर्भाधानमाद्योयासांतास्तथोक्ताःश्मशानंपितृवनंत-

चत्वारोवेदधर्मज्ञाःपर्षत्त्रैविद्यमेववा साब्रूतेयंसधर्मःस्यादेकोवाध्यात्मवित्तमः ९ ब्रह्मक्षत्रियविट्शूद्रावर्णास्त्वाद्यास्त्रयोद्विजाः निषेकाद्याःश्मशानांतास्तेषांवैमंत्रतःक्रियाः १० गर्भाधानमृतौपुंसःसवनंस्पंदनात्पुरा षष्ठेष्टमेवासीमंतोमास्येतेजातकर्मच ११ अहन्येकादशेनामचतुर्थेमासिनिष्क्रमः षष्ठेन्नप्राशनंमासिचूडाकार्यायथाकुलं १२

त्संबंधिकर्मअंतोयासांताःक्रियामंत्रैर्भवंति १० इदानींताःक्रियाअनुक्रामति गर्भाधानमित्यनुगतार्थकर्मनामधेयं एवंवक्ष्यमाणान्यपि तद्गर्भाधानमृतौऋतुकालेवक्ष्यमाणलक्षणे पुंसवनाख्यंकर्मगर्भचलनात्पूर्वं षष्ठेष्टमेवामासिसीमंतोन्नयनं एतेचद्वेपुंसवनसीमंतोन्नयनेक्षेत्रसंस्कारकर्मत्वात्सकृदेवकार्येनप्रतिगर्भं यथाहदेवलः सकृत्संस्कृतानारीसर्वगर्भेषुसंस्कृतेति एतेआइतेआगतेगर्भकोशात्कुमारेजातेजातकर्म एकादशेहनिनामकरणं तच्चपितामहमातामहादिसंबद्धंकुलदेवतासंबद्धंवा यथाहशंखः कुलदेवतासंबद्धंपितानामकुर्यादिति चतुर्थेमासिनिष्क्रमलक्षणंकर्म सूर्यावेक्षणंकर्म षष्ठेमास्यन्नप्राशनंकर्म चूडाकरणंतुयथाकुलंकार्यमितिप्रत्येकंसंबध्यते ११ १२

एतेषांनित्यत्वेप्यानुषंगिकंफलमाह एवमुक्तेनप्रकारेणगर्भाधानादिभिःसंस्कारकर्मभिः कृतैरेनःपापंशमंयाति किंभूतंबीजगर्भसमुद्भवंशुक्रशोणितसंब
द्धंगात्रव्याधिसंक्रांतिनिमित्तंनतुपतितोत्पन्नत्वादि स्त्रीणांविशेषमाह एताजातकर्मादिक्रियाःस्त्रीणांतूष्णींविनैवमंत्रैर्यथाकालंकार्याः विवाहःपुनःसमंत्र
कः १३ गर्भाधानमवधिंकृत्वाजन्मनोवाष्टमेवर्षेब्राह्मणस्योपनायनंउपनयनमेवोपनायनं स्वार्थेअण्वृत्तानुसारात् अत्रेच्छयाविकल्पः राज्ञामेकादशे वै
श्यस्यसैकेएकादशेद्वादशइत्यर्थः गर्भग्रहणंसर्वत्रानुवर्त्तते समासेगुणीभूतस्यापिगर्भशब्दस्यबुद्ध्याविभज्योभयत्राप्यनुवर्त्तनंकार्यं गर्भादेकादशेराज्ञो-

एवमेनःशमंयातिबीजगर्भसमुद्भवम् तूष्णीमेताःक्रियास्त्रीणांविवाहस्तुसमंत्रकः १३ गर्भाष्टमेष्टमेवाब्देब्राह्मणस्योपना
यनं राज्ञामेकादशेसैकेविशामेकेयथाकुलं १४ उपनीयगुरुःशिष्यंमहाव्याहृतिपूर्वकं वेदमध्यापयेदेनंशौचाचारांश्चशिक्ष
येत् १५

गर्भाद्विद्वादशेविशाइतिस्मृत्यंतरवच-
नात् यथा अथशब्दानुशासनं केषांशब्दानांलौकिकानांवैदिकानामिति अत्रापिकार्यमित्यनुवर्त्तते कुलस्थित्याकेचिदुपनयनमिच्छंति १४ स्वगृह्योक्तविधिना
उपनीयशिष्यंगुरुःमहाव्याहृतिपूर्वकंवेदमध्यापयेत् महाव्याहृतयश्च भूरादिसत्यांताः सप्तपंचवागौतमाभिप्रायेण किंचशौचाचारांश्चवक्ष्यमाणलक्षणान् शिक्षये ३
त् उपनीयशौचाचारांश्च शिक्षयेदित्यनेन प्रागुपनयनात्कामचारोदर्शितः वर्णधर्मान्वर्जयित्वास्त्रीणामप्येतत्समानं विवाहादर्वाक् उपनयनस्थानीयत्वाद्विवाह
स्य १५

शौचाचारानाह कर्णस्थंब्रह्मसूत्रंयस्यसतथोक्तः कर्णश्चदक्षिणः पवित्रंदक्षिणेकर्णेकृत्वाविण्मूत्रमुत्सृजेदितिलिंगात् असावहनिसंध्ययो
श्चउदङ्मुखोमूत्रपुरीषेकुर्यात् चकाराद्भस्मादिरहितेदेशे रात्रौतुदक्षिणामुखः १६ किंच अनंतरंशिश्नंगृहीत्वाउत्थायउद्धृताभिरद्भिर्वक्ष्यमाण
लक्षणाभिर्मृद्भिश्चगंधलेपयोःक्षयकरंशौचंकुर्यात् अतंद्रितःअनलसःउद्धृताभिरितिजलांतःशौचनिषेधः अत्रगंधलेपक्षयकरमितिसर्वाश्रमिणां
साधारणंशौचमिदं मृत्संख्यानियमस्त्वदृष्टार्थः १७ शुचौअशुचिद्रव्यासंस्पृष्टे देशेइत्यपादानादुपानच्छयनासनादिनिषेधः उपविष्टःनस्थितःनश

दिवासंध्यासुकर्णस्थब्रह्मसूत्रउदङ्मुखः कुर्यान्मूत्रपुरीषेचरात्रौचेद्दक्षिणामुखः १६ गृहीतशिश्नश्चोत्थायमृद्भिर
भ्युद्धृतैर्जलैः गंधलेपक्षयकरंशौचंकुर्यादतंद्रितः १७ अंतर्जानुःशुचौदेशउपविष्टउदङ्मुखः प्राग्वाब्राह्मेणतीर्थे
नद्विजोनित्यमुपस्पृशेत् १८ कनिष्ठादेशिन्यंगुष्ठमूलान्यग्रंकरस्यच प्रजापतिपितृब्रह्मदेवतीर्थान्यनुक्रमात् १९

यानःप्रह्वोगच्छन्वा उदङ्मुखःप्राङ्मुखोवेतिदिगंतरनिवृत्तिः शुचौदेशइत्येतस्मात्पादप्रक्षालनप्राप्तिःब्राह्मेणतीर्थेनवक्ष्यमाणलक्षणेन द्विजोनशू
द्रादिः नित्यंसर्वकालं आश्रमांतरगतोप्युपस्पृशेत् आचामेत् कथमंतर्जानुः जानुनोर्मध्येहस्तौकृत्वादक्षिणेनहस्तेनेति १८ तीर्थान्याह कनि
ष्ठायास्तर्जन्याअंगुष्ठस्यमूलानिकरस्याग्रंचप्रजापतिपितृब्रह्मदेवतीर्थानियथाक्रमंवेदितव्यानि १९ ७ ७ ७ ७

वारत्रयमपः पीत्वा मुखमंगुष्ठमूलेन द्विरुन्मृज्य खानि छिद्राणि ऊर्ध्वकायगतानि घ्राणादीनि अद्भिरुपस्पृशेत् अद्भिर्दव्यांतरासंसृष्टाभिः पुनरद्भिरि-
त्यब्ग्रहणं प्रतिच्छिद्रमुदकस्पर्शनार्थं पुनस्ता एव विशिनष्टि प्रकृतिस्थाभिः गंधरूपरसस्पर्शांतरमप्राप्ताभिः फेनबुद्बुदरहिताभिः तुशब्दादूर्षधा
रागतानां शूद्राद्यावर्जितानां च निषेधः २० हृत्कंठतालुगाभिरद्भिर्यथाक्रमेण द्विजातयः शुध्यंति स्त्री च शूद्रश्च अंततः अंतेन तालुनास्पृष्टाभिः सकृदि
ति वैश्याद्विशेषः चशब्दादनुपनीतोपि २१ प्रातः स्नानं यथाशास्त्रमब्दैवतैर्मंत्रैः आपोहिष्ठेत्येवमादिभिः मार्जनं प्राणसंयमः प्राणायामः वक्ष्यमा

त्रिः प्राश्यापो द्विरुन्मृज्य खान्यद्भिः समुपस्पृशेत् अद्भिस्तु प्रकृतिस्थाभिर्हीनाभिः फेनबुद्बुदैः २० हृत्कंठतालुगाभिस्तु
यथासंख्यं द्विजातयः शुध्येरन् स्त्री च शूद्रश्च सकृत्स्पृष्टाभिरंततः २१ स्नानमब्दैवतैर्मंत्रैर्मार्जनं प्राणसंयमः सूर्यस्य
चाप्युपस्थानं गायत्र्याः प्रत्यहं जपः २२ गायत्रीं शिरसा सार्द्धं जपेद्व्याहृतिपूर्विकाम् प्रतिप्रणवसंयुक्तां त्रिरयं प्राणसंय
मः २३

णलक्षणः ततः सूर्यस्य चाप्युपस्थानं सौरेण मंत्रेण गायत्र्यास्तत्सवितुर्वरेण्यमित्यादेः प्रतिदिवसं जपः कार्यः कार्यशब्दो यथालिं
गं प्रत्येकमभिसंबध्यते २२ गायत्रीं पूर्वोक्तां आपोज्योतिरित्यादिना शिरसा संयुक्तां उक्तव्याहृतिपूर्विकां प्रतिव्याहृतिप्रणवेन संयुक्तां ॐ भूः ॐ भु ४
वः ॐ स्वरिति त्रीन्वारान् मुखनासिकासंचारिवायुं निरुंधन्मनसा जपेदित्ययं सर्वत्र प्राणायामः २३ छ छ छ छ

प्राणायामं पूर्वोक्तं कृत्वा तृचेनाब्दैवतेन पूर्वोक्तेनात्मानमद्भिः प्रोक्ष्य सावित्रीं जपन् प्रत्यक्संध्यामासीत अर्थात्प्रत्यङ्मुख इति लभ्यते आतारकोदयात्
तारकोदयावधि प्राक्संध्यां प्रातःसमये एवं पूर्वोक्तविधिमाचरन् प्राङ्मुखः सूर्योदयावधि तिष्ठेत् अहोरात्रयोः संधौ याक्रिया विधीयते सा संध्या तत्र
अहः संपूर्णादित्यमंडलदर्शनयोग्यः कालः तद्विपरीता रात्रिः यस्मिन्काले खंडमंडलस्योपलब्धिः स संधिः २४ २५ ततः संध्योपासनानंतरं द्वयोः संध्य

प्राणानायम्य संप्रोक्ष्य तृचेनाब्दैवतेन तु जपन्नासीत सावित्रीं प्रत्यगातारकोदयात् २४ संध्यां प्राक्प्रातरेवं हि तिष्ठेदा
सूर्यदर्शनात् अग्निकार्यं ततः कुर्यात्संध्ययोरुभयोरपि २५ ततोभिवादयेद्वृद्धानसावहमिति ब्रुवन् २६ गुरुं चैवाप्यु
पासीत स्वाध्यायार्थं समाहितः आहूतश्चाप्यधीयीत लब्धं तस्मै निवेदयेत् हितं तस्याचरेन्नित्यं मनोवाक्कायकर्मभिः २७

योरग्निकार्यं अग्नौ कार्यं समित्प्रक्षेपादि यत् तत्कुर्यात् स्वगृह्योक्तेन विधिना तदनंतरं वृद्धान् गुरुप्रभृतीनभिवादयेत् कथं असौ देवदत्तशर्माहमिति स्वना
मकीर्तयन् २६ तथा गुरुं वक्ष्यमाणलक्षणमुपासीत तत्परिचर्यापरस्तदधीनस्तिष्ठेत् स्वाध्यायार्थमध्ययनसिद्ध्ये समाहितोऽविक्षिप्तचित्तो भवेत् आहूतश्चाप्य
धीयीत गुर्वाहूत एवाधीयीत न स्वयं गुरुं प्रेरयेत् यच्च लब्धं तत्सर्वं गुरवे निवेदयेत् तथा तस्य गुरोर्हितमाचरेत् नित्यं सदा मनोवाक्कायकर्मभिः न प्रतिकूलं कुर्यात्
अपिशब्दाद्गुरुदर्शने गोत्रमोक्षकंठप्रावृतादि वर्जयेत् २७ छ छ

कृतमुपकारंनविस्मरतीतिकृतज्ञः अद्रोहीदयावान् मेधावीग्रंथग्रहणधारणशक्तः शुचिःवाह्याभ्यंतरशौचवान् कल्यःआधिव्याधिरहितः अनसूयकोदोषानाविष्करणेनगुणाविष्करणशीलः साधुःवृत्तवान् शक्तःशुश्रूषायां आप्तोबंधुः ज्ञानदःविद्याप्रदः वित्तदः अर्पणपूर्वकमर्थप्रदाता एतेगुणाःसमस्ताव्यस्ताश्चयथासंभवंद्रष्टव्याः एतेचधर्मतःशास्त्रानुसारेणाध्याप्याः २८ तथास्मृत्यंतरप्रसिद्धंपालाशादिदंडं अजिनंचकार्ष्णाजिनादि उपवीतंकार्पासादिनिर्मितं मेखलांचमुंजादिनिर्मितां ब्राह्मणादिर्ब्रह्मचारीधारयेत् २९ पूर्वोक्तदंडादियुक्तोब्रह्मचारीब्राह्मणेष्वनिंद्येषु अभिशस्तादिव्यतिरिक्तेषुस्व-

कृतज्ञाद्रोहिमेधाविशुचिकल्यानसूयकाः अध्याप्याधर्मतःसाधुशक्ताप्तज्ञानवित्तदाः २८ दंडाजिनोपवीतानि मेखलांचैवधारयेत् ब्राह्मणेषुचरेद्भैक्ष्यमनिंद्येष्वात्मवृत्तये २९ आदिमध्यावसानेषुभवच्छब्दोपलक्षिता ब्राह्मणक्षत्रियविशांभैक्ष्यचर्यायथाक्रमम् ३०

कर्मनिरतेषुभैक्ष्यंचरेत् आत्मवृत्तये आत्मनोजीवनायनपरार्थं आचार्यतद्भार्यापुत्रव्यतिरेकेण निवेद्यगुरवेतदनुज्ञातोभुंजीत तदभावेतत्पुत्रादाविति नियमात् अत्रचब्राह्मणग्रहणंसंभवेसतिननियमार्थं यत्तुसार्ववर्णिकंभैक्ष्यचरणमितितत्त्रैवर्णिकमात्रार्थं यच्चचातुर्वर्ण्यंचरेद्भैक्ष्यमितितदापद्विषयंकथंभैक्ष्यचर्याकार्या आदिमध्यावसानेषुभवच्छब्दोपलक्षिता भवतिभिक्षांदेहि भिक्षांभवतिदेहि भिक्षांदेहिभवतिइत्येवंवर्णक्रमेणभैक्ष्यचर्याकार्या ३० ५ ५

पूर्वोक्तेनविधिनाभिक्षामाहृत्यगुरवेनिवेद्यतदनुज्ञयाकृताग्निकार्योवाग्यतोमौनी अन्नंसत्कृत्यसंपूज्य अकुत्सयन्ननिंदन् अपोशानक्रियापूर्वंअमृतोपस्तरणमसीत्यादिकंपूर्वंकृत्वाभुंजीत अत्रपुनरग्निकार्यग्रहणंसंध्याकालेकथंचिदकृताग्निकार्यस्यकालांतरविधानार्थंनपुनरुक्तृतीयप्राप्त्यर्थं ३१ ब्रह्मचर्येस्थितःएकान्नंनाद्यादनापदिव्याध्याद्यभावे ब्राह्मणःपुनःश्राद्धेभ्यर्थितःसन्काममश्नीयात् व्रतमपीडयन्मधुमांसपरिहारेण अत्रब्राह्मणग्रहणंक्षत्रियादेःश्राद्धभोजनव्युदासार्थंराजन्यवैश्ययोश्चैवनैतत्कर्मप्रचक्षतेइतिस्मरणात् ३२ मधु क्षौद्रंनमद्यं तस्यनित्यंब्राह्मणोमद्यंवर्जयेदितिनि-

कृताग्निकार्योभुंजीतवाग्यतोगुर्वनुज्ञया अपोशनक्रियापूर्वंसत्कृत्यान्नमकुत्सयन् ३१ ब्रह्मचर्येस्थितोनैकमन्नमद्यादनापदि ब्राह्मणःकाममश्नीयाच्छ्राद्धेव्रतमपीडयन् ३२ मधुमांसांजनोच्छिष्टशुक्तस्त्रीप्राणिहिंसनम् भास्करालोकनाश्लीलपरिवादादिवर्जयेत् ३३ सगुरुर्यःक्रियाःकृत्वावेदमस्मैप्रयच्छति उपनीयददद्वेदमाचार्यःसउदाहृतः ३४

षेधात् मांसंछागादेरपिअंजनंघृतादिनागात्रस्य कज्जलादिनाचाक्ष्णोःउच्छिष्टंअगुरोः शुक्तंनिष्ठुरवाक्यंनान्नरसः तस्याभक्ष्यप्रकरणेनिषेधात् स्त्रियमुपभोगे प्राणिहिंसनंजीववधः भास्करस्योदयास्तमयावलोकनं अश्लीलमसत्यभाषणं परिवादःसदसद्रूपस्यपरदोषस्यव्याख्यापनं आदिशब्दात्स्मृत्यंतरोक्तंगंधमाल्यादिगृह्यते एतानिब्रह्मचारीवर्जयेत् ३३ योसौगर्भाधानाद्याउपनयनांताःक्रियायथाविधिकृत्वावेदमस्मैब्रह्मचारिणेप्रयच्छतिसगुरुः यःपुनरुपनयनमात्रंकृत्वावेदंददातिसआचार्यः ३४ ५

वेदस्यैकदेशंमंत्रब्राह्मणयोरेकंअंगानिवायोध्यापयतिसउपाध्यायः यःपुनःपाकयज्ञादिकंवृतःकरोतिसऋत्विक् एतेचगुर्वाचार्योपाध्यायऋत्वि
जोयथापूर्वंयथाक्रमेणमान्याःपूज्याः एभ्यःसर्वेभ्योमातागरीयसीपूज्यतमा ३५ वेदग्रहणार्थंब्रह्मचर्यावधिमाह यदाविवाहासंभवेवेदानधीत्य
वेदौवावेदंवेतिप्रवर्तते तदाप्रतिवेदंवेदंवेदंप्रतिब्रह्मचर्यंपूर्वोक्तंद्वादशवर्षाणिकार्यं अशक्तौपंच ग्रहणांतिकमित्येकेवर्णयंति केशांतःपुनःगोदा-
नाख्यंकर्मगर्भादारभ्यषोडशेवर्षेब्राह्मणस्यकार्यं एतच्चद्वादशवार्षिकेवेदव्रतेबोद्धव्यं इतरस्मिन्पक्षेयथासंभवंद्रष्टव्यं राजन्यवैश्ययोस्तूपनयन

एकदेशमुपाध्यायऋत्विग्यज्ञकृदुच्यते एतेमान्यायथापूर्वमेभ्योमातागरीयसी ३५ प्रतिवेदंब्रह्मचर्यंद्वादशा
ब्दानिपंचवा ग्रहणांतिकमित्येकेकेशांतश्चैवषोडशे ३६ आषोडशादाद्वाविंशाच्चतुर्विंशाच्चवत्सरात् ब्रह्मक्षत्रवि
शांकालऔपनायनिकःपरः ३७

कालवत् द्वाविंशेचतुर्विंशेवाद्रष्टव्यं ३६ उपनयनकालस्यपरमावधिमाह आषोडशात्षोडशात्षोड
शवर्षंयावत् आद्वाविंशादाचतुर्विंशाद्वर्षाद्ब्रह्मक्षत्रविशां औपनायनिकःउपनयनसंबंधीपरःकालःनातःपरमुपनयनकालोस्ति किंतुअतऊर्ध्वंपतंत्ये ६
तेसर्वधर्मबहिष्कृताःसर्वधर्मेष्वनधिकारिणोभवंतिसावित्रीपतिताःपतितसावित्रीकाभवंतिसावित्रीदानयोग्यानभवंति व्रात्याःसंस्कारहीनाश्च व्रात्यस्तोमाख्यक्र
तोर्विना कृतेतुतस्मिन्उपनयनाधिकारिणोभवंति ३७ ६

३८ अद्यास्त्रयोद्विजाइत्युक्तंतत्रहेतुमाह मातुःसकाशात्प्रथमंजायंतेमौंजीबंधनाद्द्वितीयंजन्मयस्मात्तस्मादेतेब्राह्मणक्षत्रियवैश्याद्विजाउच्यंते ३९
वेदग्रहणाध्ययनफलमाह यज्ञानांश्रौतस्मार्तानांतपसांकायसंतापरूपाणांचांद्रायणादीनांशुभानांचकर्मणांउपनयनादिसंस्काराणामवबोधकत्वेन
वेदएवद्विजातीनांपरोनिःश्रेयसकरःमोक्षकरोनान्यः वेदएवेतितन्मूलत्वेनस्मृतेरप्युपलक्षणार्थं ४० ग्रहणाध्ययनफलमुक्त्वेदानींकाम्यब्रह्मयज्ञा

अतऊर्ध्वंपतंत्येतेसर्वधर्मबहिष्कृताः सावित्रीपतिताव्रात्याव्रात्यस्तोमादृतेक्रतोः ३८ मातुर्यदग्रेजायंतेद्वितीयंमौंजिबं
धनात् ब्राह्मणक्षत्रियविशस्तस्मादेतेद्विजाःस्मृताः ३९ यज्ञानांतपसांचैवशुभानांचैवकर्मणाम् वेदएवद्विजातीनांनिः
श्रेयसकरःपरः ४० मधुनापयसाचैवसदेवांस्तर्पयेद्द्विजः पितॄन्मधुघृताभ्यांचऋचोधीतेचयोन्वहम् ४१ यजूंषिशक्ति
तोधीतेयोन्वहंसघृतामृतैः प्रीणातिदेवानाज्येनमधुनाचपितॄंस्तथा ४२ सतुसोमघृतैर्देवांस्तर्पयेद्योन्वहंपठेत् सामानि
तृप्तिंकुर्याच्चपितॄणांमधुसर्पिषा ४३

ध्ययनफलमाह योन्वहंऋचोधीतेसमधुनापयसाचदेवान्पितॄंश्चमधुघृताभ्यांतर्पय
यति यःपुनःशक्तितोन्वहंयजूंष्यधीतेसघृतामृतैर्देवान्पितॄंश्चमधुघृताभ्यांतर्पयति यस्तुसामान्यन्वहमधीतेससोमघृतैर्देवान्पितॄंश्चमधु
सर्पिर्भ्यांप्रीणाति ऋगादिग्रहणंसामान्येनऋगादिमंत्रमात्रार्थम् ४१ ४२ ४३ ६ ६ ६ ६

यः पुनः शक्तितोन्वहं अथर्वांगिरसोधीतेसदेवान्मेदसापितृंश्चमधुसर्पिर्भ्यांतर्पयति यस्तुवाकोनुवाकवाक्यंसंप्रश्नोत्तररूपंवेदवाक्यं पुराणंचब्राह्मादि चकारान्मानवादिधर्मशास्त्रं नाराशंसीश्चरुद्रदैवत्यान्मंत्रान् गाथाश्चयज्ञगाथेंद्रगाथाद्याः इतिहासान्महाभारतादीन् विद्या-

मेदसातर्पयेद्देवानथर्वांगिरसःपठन् पितृंश्चमधुसर्पिर्भ्यामन्वहंशक्तितोद्विजः ४४ वाकोवाक्यंपुराणंचनाराशंसीश्चगाथिकाः इतिहासांस्तथाविद्याःशक्त्याधीतेहियोन्वहम् ४५ मांसक्षीरौदनमधुतर्पणंसदिवौकसाम् करोतितृप्तिंकुर्याच्चपितृणांमधुसर्पिषा ४६ तेतृप्तास्तर्पयंत्येनंसर्वकामफलैःशुभैः यंयंक्रतुमधीतेसौतस्यतस्याप्नुयात्फलम् ४७ त्रिर्वित्तपूर्णपृथिवीदानस्यफलमश्नुते तपसोयत्परस्येहनित्यस्वाध्यायवान्द्विजः ४८

श्चवारुण्याद्याविद्याः शक्तितोन्वहमधीतेसमांसक्षीरौदनमधुसर्पिर्भिर्देवान्पितृंश्चमधुसर्पिर्भ्यांतर्पयति ४४ ४५ ४६ तेपुनस्तृप्ताःसंतोदेवाःपितरश्च एवंस्वाध्यायकारिणंसर्वकामफलैःशुभैरनन्योपघातलक्षणैस्तर्पयंति प्रशंसार्थमाह यस्ययस्यक्रतोःप्रतिपादकंवेदैकदेशमन्वहमधीतेतस्यतस्यक्रतोः फलमाप्नोति तथावित्तपूर्णायाःपृथिव्याःत्रिःत्रिवारंदानस्ययत्फलंपरस्यतपसश्चांद्रायणादेर्यत्फलंतदपिनित्यंस्वाध्यायवान्प्राप्नोति नित्यग्रहणंकाम्यस्यापिसतोनित्यत्वज्ञापनार्थम् ४७ ४८ ७

एवंसामान्येनब्रह्मचारिधर्मानभिधायाधुनानैष्ठिकस्यविशेषमाह अनेनउक्तेनप्रकारेणात्मानंनिष्ठांउत्क्रांतिकालंनयतीतिनैष्ठिकः सयावज्जीवमाचार्यसमीपेवसेत् नवेदग्रहणकालोत्तरंस्वतंत्रोभवेत् तदभावेतत्पुत्रसमीपे तदभावेतद्भार्यासमीपे तदभावेवैश्वानरेपि अनेनोक्तविधिनादेहंसाधयन्क्षपयन् विजितेंद्रियः इंद्रियजयेविशेषप्रयत्नवान्ब्रह्मचारीब्रह्मलोकममृतत्वमाप्नोति कदाचिदिहनपुनर्जायते इतिब्रह्मचारिप्रकरणम्

नैष्ठिकोब्रह्मचारीतुवसेदाचार्यसन्निधौ तदभावेस्यतनयेपत्न्यांवैश्वानरेपिवा ४९ अनेनविधिनादेहंसाधयन्विजितेंद्रियः ब्रह्मलोकमवाप्नोतिनचेहजायतेपुनः ५० गुरवेतुवरंदत्वास्नायीततदनुज्ञया वेदव्रतानिवापारंनीत्वाह्युभयमेववा ५१

४९ ५० यःपुनर्विवाहुस्तस्यविवाहार्थंस्नानमाह पूर्वोक्तेनप्रकारेणवेदंमंत्रब्राह्मणात्मकम् व्रतानिब्रह्मचारिधर्मान् अनुक्रांतान्वाउभयंवापारंनीत्वासमाप्यगुरवेपूर्वोक्तायवरमभिलषितंयथाशक्तिदत्वास्नायात् अशक्तौतदनुज्ञयाअदत्तवरोपि एषांचपक्षाणांशक्तिकालाद्यपेक्षयाव्यवस्था ५१ ७ ७ ७ ७ ७

स्नानानंतरं किं कुर्यादत आह अविप्लुतब्रह्मचर्यः अस्खलितब्रह्मचर्यः लक्षण्यां बाह्याभ्यंतरलक्षणैर्युक्तां बाह्यानि तनुलोमकेशदशनादीनि
मनुनोक्तानि आभ्यंतराणि अष्टौ पिंडान्कुर्वीतेत्याद्याश्वलायनोक्तविधिना ज्ञातव्यानि पूर्वस्यां रात्रौ गोष्ठवल्मीककितवस्थानह्रदरणक्षेत्रचतुष्पथश्म
शानेभ्यो मृत्तिकां गृहीत्वा पिंडाष्टकं कर्तव्यं तत्रानुक्रमेण प्रथमे पिंडे स्पृष्टे धान्यवती भवेत् द्वितीये स्पृष्टे पशुमती भवेत् तृतीयेग्निहोत्रशुश्रूषणपराभ
वति चतुर्थे विवेकिनी चतुरा सर्वजनार्जनपरा भवति पंचमे रोगिणी षष्ठे वंध्या सप्तमे व्यभिचारिणी अष्टमे विधवा भवेदित्याश्वलायनस्मरणात् स्त्रि
यं नपुंसकत्वनिवृत्तये स्त्रीत्वेन परीक्षितां अनन्यपूर्विकां दानेनोपभोगेन वा पुरुषांतरापरिगृहीतां कांतां कमनीयां वोढुर्मनोनयनानंदकारिणीं यस्यां

॥ अविप्लुतब्रह्मचर्यो लक्षण्यां स्त्रियमुद्वहेत् अनन्यपूर्विकां कांतामसपिंडां यवीयसीं ५२

मनश्चक्षुषोर्निबंधस्तस्यामृद्धिरित्यापस्तंबस्मरणात् एतच्च न्यूनाधिकांगादिबाह्यदोषाभावे असपिंडां समान एकः पिंडो देहो यस्याः सा सपिंडा न
सपिंडा असपिंडा तां सपिंडता च एकशरीरावयवान्वयेन भवति तथाहि पुत्रस्य पितृशरीरावयवान्वयेन पित्रा सह सापिंड्यम् एवं पितामहादिभिरपि
पितृद्वारेण तच्छरीरावयवान्वयात् एवं मातृशरीरावयवान्वयेन मात्रा तथा मातामहादिभिरपि मातृद्वारेण तथा मातृष्वसृमातुलादिभिरपि एकश
रीरावयवान्वयात् तथा पितृव्यपितृष्वस्रादिभिरपि तथा पत्न्या सह पत्न्या एकशरीरारंभकतया एवं भ्रातृभार्याणामपि परस्परमेकशरीरारब्धैः सहैक

शरीरारंभकत्वेन एवं यत्र यत्र सपिंडशब्दस्तत्र तत्र साक्षात्परंपरया वा एकशरीरावयवान्वयो वेदितव्यः यद्येवं मातामहादीनामपि दशाहं शावमाशौ
चं सपिंडेषु विधीयत इत्यविशेषेण प्राप्नोति स्यादेतत् यदि तत्र मत्तानामितरे कुर्युरित्यादि विशेषवचनं न स्यात् अतश्च सपिंडेषु यत्र विशेषवचनं ना
स्ति तत्र दशाहमित्येतद्वचनमवतिष्ठते अवश्यं चैकशरीरावयवान्वयेन सापिंड्यं वर्णनीयं आत्मा हि जज्ञे आत्मन इत्यादिश्रुतेः तथा प्रजामनु प्रजाय
स्वेति च स एवायं विरूढः प्रत्यक्षेणोपलभ्यत इत्याद्यापस्तंबवचनाच्च तथा गर्भोपनिषदि एतत् षाट्कौशिकं शरीरं त्रीणि पितृतस्त्रीणि मातृतः
अस्थिस्नायुमज्जानः पितृतः त्वङ्मांसरुधिराणि मातृत इति तत्र तत्रावयवान्वयप्रतिपादनात् निर्वाप्यपिंडान्वयेन तु सापिंड्ये मातृसंताने भ्रातृपु

अरोगिणीं भ्रातृमतीमसमानार्षगोत्रजाम् ॥

त्रादिषु च सापिंड्यं न स्यात् समुदायशक्त्यंगीकारेण रूढिपरिग्रहे अवयवशक्तिस्त्वत्र तत्रावगम्यमाना परित्यक्ता स्यात् परंपरयैकशरीरावयवा
न्वयेन सापिंड्ये यथा नातिप्रसंगस्तथा वक्ष्यामः यवीयसीं वयसा प्रमाणतश्च न्यूनामुद्वहेत् परिणयेत् स्वगृह्योक्तविधिना ५२ विशेषांतरमप्याह
अरोगिणीं अचिकित्सनीयव्याध्यनुपसृष्टां भ्रातृमतीं पुत्रिकाकरणशंकानिवृत्तये अनेनापरिभाषितापि पुत्रिका भवतीति गम्यते असमानार्ष
गोत्रजां ऋषेरिदमार्षं नाम प्रवर इत्यर्थः गोत्रं वंशपरंपराप्रसिद्धं आर्षं च गोत्रं च आर्षगोत्रे समाने आर्षगोत्रे यस्यासौ समानार्षगोत्रस्तस्माज्जाता-

समानार्षगोत्रजानसमानार्षगोत्रजा असमानार्षगोत्रजानां गोत्रप्रवरौच पृथक्पृथक्पर्युदासे निमित्तं तेनासमानगोत्रजां असमानार्षजामि
त्यर्थः तथाचासमानप्रवरैर्विवाह इति गौतमः तथाच असपिंडाचया मातुरसपिंडाचया पितुरितिमनुः तथा मातृगोत्रामप्यपरिणेयांकेचिदिच्छं
ति मातुलस्यसुतामूढ्वा मातृगोत्रांतथैवच समानप्रवरांचैव कृत्वाचांद्रायणंचरेदिति प्रायश्चित्तस्मरणात् अत्रचासपिंडामित्यनेन पितृष्वसृ
मातृष्वस्रादिदुहितृनिषेधः तथा असगोत्रामित्यनेनासपिंडाया अपिभिन्नसंतानजायाः समानगोत्राया निषेधः असमानप्रवरामित्यनेनाप्यसपि
डाया असगोत्राया अपिसमानप्रवराया निषेधः तथा असपिंडामित्येतत्सार्ववर्णिकं सर्वत्रसापिंड्यसद्भावात् असमानार्षगोत्रजामित्येतत्त्रैवर्णिक

## पंचमात्सप्तमादूर्ध्वंमातृतः पितृतस्तथा ५३

विषयं यद्यपिराजन्यविशांप्रातिस्विकगोत्राभावात्प्रवराभावस्तथापि पुरोहितगोत्रप्रवरौ वेदितव्यौ तथाच यजमानस्यार्षेयान्प्रवृणीत इत्युक्त्वा
पौरोहित्यान्राजविशांप्रवृणीते इत्याहाश्वलायनः सपिंडासु समानगोत्रासु समानप्रवरासु भार्यात्वमेवनोत्पद्यते रोगिण्यादिषु तु भार्यात्वेउत्पन्नेपि दृष्ट-
विरोधएव असपिंडामित्यत्रैकशरीरान्वयद्वारेण साक्षात्पारंपर्येणच सापिंड्यमुक्तं तच्चसर्वत्रसर्वस्य यथाकथंचिदनादौ संसारे भवतीत्यतिप्रसंग इत्यत-
आह मातृतो मातुः संताने पंचमादूर्ध्वं पितृतः पितुः संताने सप्तमादूर्ध्वं सापिंड्यं निवर्त्तत इति शेषः अतश्चायं सपिंडशब्दोवयवशक्त्या सर्वत्रप्रवर्त्तमानो

पिनिर्मथ्यपंकजादिशब्दवन्नियतविषय एव तथाच पित्रादयः षट् सपिंडाः पुत्रादयश्च षट् आत्माचसप्तमः संतानभेदेपियतः संतानभेदस्तमादाय ग
णयेद्यावत्सप्तमइतिसर्वत्रयोजनीयं तथाच मातरमारभ्य तत्पितृपितामहादिगणनायां पंचमपुरुषवर्त्तिनी मातृतः पंचमीत्युपचर्यते एवंपितरमारभ्य त
त्पित्रादिगणनायां सप्तमपुरुषसंतानवर्त्तिनी पितृतः सप्तमीति तथाच भगिन्योर्भगिनीभ्रात्रोर्भ्रातृपुत्रीपितृव्ययोः विवाहेद्यादिभूतत्वाच्छारवाभेदो
वगण्यते यदपिवसिष्ठेनोक्तं पंचमींसप्तमींचैव मातृतः पितृतस्तथेति त्रीनतीत्य मातृतः पंचातीत्यच पितृतं इतिच पैठीनसिना तदप्यर्वाङ्निषेधार्थं नपु
नस्तत्प्राप्त्यर्थमितिसर्वस्मृतीनामविरोधः एतच्चसमानजातीये द्रष्टव्यं विजातीयेतुविशेषः यथाह शंखः यद्येकजाताबहवः पृथक्क्षेत्राः पृथक्जनाः एक

## दशपूरुषविख्यातांच्छ्रोत्रियाणांमहाकुलात्

पिंडाः पृथक्शौचाः पिंडस्त्वावर्त्ततेत्रिषु एकस्मात् ब्राह्मणादेर्जाताः एकजाताः पृथक्क्षेत्राः भिन्नजातीयासु स्त्रीषु जाताः पृथक्जनाः समानजातीया
सुभिन्नासु स्त्रीषुजाताः तेएकपिंडाः सपिंडाः किंतु पृथक्शौचाः पृथक्शौचमाशौचप्रकरणे वक्ष्यामः पिंडस्त्वावर्त्ततेत्रिषु त्रिपुरुषमेव सापिंड्यमि
ति. ५३ पुरुषा एव पूरुषाः दशभिः पूरुषैः मातृतः पंचभिः पितृतः पंचभिर्विख्यातंयत्कुलंतस्मात् श्रोत्रियाणामधीतवेदानां अध्ययनमुपलक्षणं
श्रुताध्ययनसंपन्नानां महच्चतत्कुलंच महाकुलं पुत्रपौत्रपशुदासीग्रामादिसमृद्धं तस्मात्कन्या आहर्त्तव्येतिनियम्यते ७ ७ ७

एवंसर्वतःप्राप्तौसत्यामपवादमाह संचारिणोरोगाः कुष्ठापस्मारप्रभृतयः शुक्रशोणितद्वारेणानुप्रविशंतोदोषाः पुनःहीनक्रियनिःपुरुषत्वादयो मनुनोक्ताः एतैःसमन्विताद्स्फीतादपिपूर्वोक्तान्महाकुलादपिनाहर्त्तव्या ५४ एवंकन्याग्रहणेनियममुक्त्वाकन्यादानेवरनियममाह एतैरेवपूर्वोक्तैर्गुणैर्युक्तोदोषैश्चवर्जितोवरोभवति तस्यायमपरोविशेषः सवर्णउत्कृष्टोवानहीनवर्णः श्रोत्रियःस्वयंचश्रुताध्ययनसंपन्नः यत्नात्प्रयत्नेनपुंस्त्वेपरी

स्फीतादपिनसंचारिरोगदोषसमन्वितात् ५४ एतैरेवगुणैर्युक्तःसवर्णःश्रोत्रियोवरः यत्नात्परीक्षितःपुंस्त्वेयुवाधीमान् जनप्रियः ५५

क्षितः परीक्षोपायश्चनारदेनदर्शितः यस्याप्सुप्लवतेबीजंह्लादिमूत्रंचफेनिलं पुमान्स्याल्लक्षणैरेतैर्विपरीतैस्तुषंढकइ-
ति युवानवृद्धः धीमान्लौकिकवैदिकव्यवहारेषुनिपुणमतिः जनप्रियःस्मितपूर्वमृदुभिभाषणादिभिरनुरक्तजनः रतिपुत्रधर्मार्थत्वेनविवाहस्त्रि १०
विधः तत्रपुत्रार्थोद्विविधः नित्यःकाम्यश्च तत्रनित्येप्रजार्थेसवर्णःश्रोत्रियोवरइत्यनेनसवर्णामुख्यादर्शिता ५५ छ छ छ

---

इदानींकाम्येनित्यसंयोगेचानुकल्पोवक्तव्यइत्याह यदुच्यतेकामतस्तुप्रवृत्तानामिमाःस्युःक्रमशोवराइत्युपक्रम्यब्राह्मणस्यचतस्रोभार्याःक्षत्रियस्यतिस्रः वैश्यस्यद्वेइतिद्विजातीनांशूद्रावेदनमितिनैतद्याज्ञवल्क्यस्यमतं यस्मादयंद्विजातिस्तत्रस्वयंजायते तज्जायाजायाभवतियदस्यांजायतेपुनरितिश्रुतेः अत्रचतत्रात्माजायतेस्वयमितिहेतुंवदतानैत्यकपुत्रोत्पादनायकाम्यकपुत्रोत्पादनायवाप्रवृत्तस्यशूद्रापरिणयननिषेधंकुर्वतानैत्यकपुत्रोत्पादनानुकूल्येकाम्यपुत्रोत्पादनेब्राह्मणस्यक्षत्रियावैश्येक्षत्रियस्यचवैश्याभ्यनुज्ञाताभवति ५६ इदानींरतिकामस्योत्पन्नपुत्रस्य

यदुच्यतेद्विजातीनांशूद्राद्दारोपसंग्रहः नैतन्ममसमतंयस्मात्तत्रात्माजायतेस्वयम् ५६ तिस्रोवर्णानुपूर्व्येणद्वेतथैकायथाक्रमम् ब्राह्मणक्षत्रियविशांभार्यास्वाशूद्रजन्मनः ५७

विनष्टभार्यस्याश्रमांतरानधिकारिणोगृहस्थाश्रमावस्थानमात्राभिकांक्षिणःपरिणयनक्रममाह वर्णक्रमेणब्राह्मणस्यतिस्रःक्षत्रियस्यद्वेवैश्यस्यैकाशूद्रस्यतुस्वैवभार्याभवति सवर्णापुनःसर्वेषांमुख्यास्थितैव पूर्वस्याःपूर्वस्याअभावेउत्तरोत्तराभवति अयमेवचक्रमोनैत्यकानुकूलेकाम्येचपुत्रोत्पादनविधौ अतश्चयच्छूद्रापुत्रस्यपुत्रमध्येपरिगणनंविभागकीर्त्तनंच तथाविप्रान्मूर्धावसिक्तोहीत्युपक्रम्यविन्नास्वेषविधिःस्मृतइतिचतद्रतिकामस्याश्रममात्राभिकांक्षिणोयानांतरीयकतयोत्पन्नस्य ५७ छ छ

विवाहानाह मथमाह्माभिधानोविवाहः यस्मिन्नुक्तलक्षणाय्वरायाहूयय्यथाशक्त्यलंकृताकन्यादीयतेउदकपूर्वकंतस्यांजातःपुत्रःउभयतः पित्रादीन्दशपुत्रादींश्चदश आत्मानंचैकविंशंपुनातिसहृत्तश्चेत् ५८ सदैवोपिविवाहः यस्मिन्यज्ञानुष्ठानेविततेऋत्विजेशक्त्यलंकृताकन्यादीयते यत्रपुनर्गोमिथुनमादायकन्यादीयतेस आर्षः प्रथमजोदैवविवाहजः चतुर्दशपुनातिसप्तावरान्सप्तपरान् उत्तरज आर्षविवाहजः षट्पुनातित्रीन्पूर्वान्त्रीनवरान् ५९ सहधर्मंचरतामितिपरिभाष्यकन्यादानंप्राजापत्यः तज्जः षट्पूर्वान्षट्परान् आत्मनासहेत्येवंत्रयोदशपुनाति ६० आसुरःप्र

ब्राह्मोविवाह आहूयदीयतेशक्त्यलंकृता तज्जःपुनात्युभयतःपुरुषानेकविंशतिम् ५८ यज्ञस्थऋत्विजेदैव आदायार्ष
स्तुगोद्वयम् चतुर्दशप्रथमजःपुनात्युत्तरजश्चषट् ५९ इत्युक्त्वाचरतांधर्मंसहयादीयतेर्थिने सकायःपावयेत्तज्जःषट्षड्
वंश्यान्सहात्मना ६० आसुरोद्रविणादानाद्गांधर्वःसमयान्मिथः राक्षसोयुद्धहरणात्पैशाचःकन्यकाछलात् ६१ पाणिर्ग्राह्यः
सवर्णासुगृण्हीयात्क्षत्रियाशरम् वैश्याप्रतोदमादद्याद्वेदनेत्वग्रजन्मनः ६२

नर्द्रविणादानात् गांधर्वस्तुपरस्परानुरागेणभवति राक्षसो
युद्धेनापहरणात् पैशाचस्तुकन्यकाछलात् छलेनछद्मनास्वापाद्यवस्थास्वपहरणात् ६१ सवर्णादिपरिणयनेविशेषमाह सवर्णासुविवाहेगृह्योक्तेनविधिनापाणिरेवग्राह्यः क्षत्रियकन्यातुशरंगृण्हीयात् वैश्याप्रतोदमादद्यादुत्कृष्टवेदनेशूद्रापुनर्वसनस्यदशां यथाहमनुः वसनस्यदशाग्राह्याशूद्रयोत्कृष्टवेदनेइति ६२ ११

---

दातृक्रममाह एतेषांपित्रादीनांपूर्वपूर्वाभावेपरःपरःकन्याप्रदः प्रकृतिस्थश्चेत् यद्युन्मादादिदोषवान्नभवति अतोयस्याधिकारः सोप्रयच्छन् भ्रूणहत्यामृतावृतावाप्नोति एतच्चोक्तलक्षणवरसंभवेवेदितव्यम् यदापुनर्दातॄणामभावस्तदाकन्यैवगम्यंगमनार्हसुक्तलक्षणंस्वयमेववरयेत् ६३ ६४ सकृदेवकन्याप्रदीयतइतिशास्त्रनियमः अतस्तांदत्वाअपहरन्चोरवद्दंड्यः एवंसर्वत्रप्रतिषेधेप्राप्तेअपवादमाह यदिपूर्वस्माद्वरात्श्रेयान्विद्या

पितापितामहोभ्रातासकुल्योजननीतथा कन्याप्रदःपूर्वनाशेप्रकृतिस्थःपरःपरः ६३ अप्रयच्छन्समाप्नोतिभ्रूणहत्यामृतावृतौ
गम्यंत्वभावेदातॄणांकन्याकुर्यात्स्वयंवरम् ६४ सकृत्प्रदीयतेकन्याहरंस्तांचोरदंडभाक् दत्तामपिहरेत्पूर्वाच्छ्रेयांश्चेद्वरआ
व्रजेत् ६५ अनाख्यायददद्दोषंदंड्यउत्तमसाहसम् अदुष्टांतुत्यजन्दंड्योदूषयंस्तुमृषाशतम् ६६

भिजनाद्यतिशययुक्तोवर आगच्छतिपूर्वस्यचपातकयोगोदुर्वृत्तत्वंवातदादत्तामपिहरेत् एतच्चसप्तमपदात्प्राकद्रष्टव्यम् ६५ यःपुनश्चवरकर्मार्हं दोषमनाख्यायकन्यांप्रयच्छति असावुत्तमसाहसंदंड्यः उत्तमसाहसंवक्ष्यते अदुष्टांतुप्रतिगृह्यत्यजन्उत्तमसाहसमेवदंड्यः यःपुनर्विवाहात्प्रागेवदोषादिनाअसद्भिःदोषैर्दीर्घरोगादिभिःकन्यांदूषयतिसपणानांवक्ष्यमाणलक्षणानांशतंदंड्यः ६६ ७ ७ ७ ७

अनन्यपूर्विकामित्यत्रानन्यपूर्वापरिणेयोक्तातत्रानन्यपूर्वाकीदृशीत्याह अनन्यपूर्वाद्विविधा पुनर्भूः स्वैरिणीचेति पुनर्भूरपिद्विविधा क्षताचाक्षताच तत्रक्षतासंस्कारात्प्रागेवपुरुषसंबंधदूषिता अक्षतापुनःसंस्कारदूषिता यापुनःकौमारेपतिंत्यक्त्वाकामतःसवर्णमाश्रयतिसास्वैरिणीति ६७ एवंसर्वप्रकारेणान्यपूर्वापर्युदासेप्राप्तेविशेषमाह अपुत्रामलब्धपुत्रांपित्रादिभिःपुत्रार्थमनुज्ञातोदेवरोभर्त्तुःकनीयान्भ्रातासपिंडोवाउक्तलक्षणःसगोत्रोवा एतेषांपूर्वस्यपूर्वस्याभावेपरःपरःघृताभ्यक्तसर्वांगःऋतावेववक्ष्यमाणलक्षणेइयाद्गच्छेत् आगर्भोत्पत्तेःऊर्ध्वंपुनर्गच्छन् अन्येनवाप्रकारेणपतितोभवति अनेनविधिनोत्पन्नःपूर्वपरिणेतुःक्षेत्रजःपुत्रोभवेत् एतच्चवाग्दत्ताविषयमित्याचार्याः यस्याम्रियेतकन्यायावाचासत्येकृतेपतिः तामनेन

अक्षताचक्षताचैवपुनर्भूःसंस्कृतापुनः स्वैरिणीयापतिंहित्वासवर्णंकामतःश्रयेत् ६७ अपुत्रांगुर्वनुज्ञातोदेवरःपुत्रकाम्यया सपिंडोवासगोत्रोवाघृताभ्यक्तऋतावियात् ६८ आगर्भसंभवाद्गच्छेत्पतितस्त्वन्यथाभवेत् अनेनविधिनाजातःक्षेत्रजोस्यभवेत्सुतः ६९ हृताधिकारांमलिनांपिंडमात्रोपजीविनीम् परिभूतामधःशय्यांवासयेद्व्यभिचारिणीम् ७०

विधानेननिजोविंदेतदेवरइतिमनुस्मरणात्

६८ ६९ व्यभिचारिणीप्रत्याह याव्यभिचरतितांहृताधिकारांभृत्यभरणाद्यधिकाररहितांमलिनांअंजनाभ्यंजनशुभ्रवस्त्राभरणशून्यांपिंडमात्रोपजीविनींप्राण १२
यात्रामात्रभोजनांधिक्कारादिभिःपरिभूतांभूतलशायिनींस्ववेश्मन्येववासयेत् वैराग्यजननार्थनपुनःशुद्ध्यर्थं यत्पुंसःपरदारेषुतच्चैनांचारयेद्व्रतमितिपृथक्प्राय
श्चित्तोपदेशात् ७०

तस्याअल्पप्रायश्चित्तार्थमर्थवादमाह परिणयनात्पूर्वंसोमगंधर्ववन्हयःस्त्रियोभुक्त्वायथाक्रमंतासांशौचमधुरवचनसर्वमेध्यत्वानिदत्तवंतः तस्मात्स्त्रियःसर्वत्रस्पर्शनालिंगनादिषुमेध्याःशुद्धाःस्मृताः ७१ नचतस्यास्तर्हिदोषोनास्तीत्याशंकनीयमित्याह अप्रकाशितान्मनोव्यभिचारात्पुरुषांतरसंभोगसंकल्पात् यदपुण्यंतस्यऋतौरजोदर्शनेशुद्धिः शूद्रकृतेतुगर्भेत्यागः ब्राह्मणक्षत्रियविशांभार्याःशूद्रेणसंगताः अप्रजाताविशुद्ध्यंतिप्रायश्चित्तेननेतराइतिस्मरणात् तथागर्भवधेभर्तृवधेमहापातकेचब्रह्महत्यादौआदिग्रहणाच्छिष्यादिगमनेचत्यागः चतस्रस्तुपरित्याज्याःशिष्यगागुरुगाचया पतिघ्नीचविशेषेणजुं

सोमःशौचंददावासांगंधर्वश्चशुभांगिरम् पावकःसर्वमेध्यत्वंमेध्यावैयोषितोह्यतः ७१ व्यभिचाराहृतौ शुद्धिर्गर्भेत्यागोविधीयते गर्भभर्तृवधादौचतथामहतिपातके ७२ सुरापीव्याधिताधूर्त्तावंध्यार्थघ्न्यप्रियंवदा स्त्रीप्रसूश्चाधिवेत्तव्यापुरुषद्वेषिणीतथा ७३

गितोपगताचयेतिव्यासस्मरणात् जुंगितःप्रतिलोमजश्चर्मकारादिः त्यागश्चोपभोगधर्मकार्ययोः नतुनिष्काशनंगृहात्तस्याः निरुंध्यादेकवेश्मनीतिनियमात् ७२ द्वितीयपरिणयनेहेतूनाह सुरांपिबतीतिसुरापी शूद्रापि पतत्यर्धशरीरस्ययस्यभार्यासुरांपिबेदितिसामान्येनप्रतिषेधात् व्याधिंतादीर्घरोगग्रस्ता धूर्त्ताविसंवादिनी वंध्यानिष्फला अर्थ-

णी अर्थनाशिनी अप्रियंवदानिष्ठुरभाषिणी स्त्रीप्रसूः स्त्रीजननी पुरुषद्वेषिणी सर्वत्राहितकारिणी अधिवेत्तव्येति प्रत्येकमभिसंबध्यते अधिवेदनंभार्यांतरपरिग्रहः ७३ किंच साधिविन्नापूर्ववदेवदानमानसत्कारैर्भर्त्तव्या अन्यथाऽभरणेमहदपुण्यंवक्ष्यमाणोदंडश्च नच्चभरणेसति केवलमपुण्यपरीहारः यतःयत्रदंपत्योरानुकूल्यंचित्तैक्यंतत्रधर्मार्थकामानांप्रतिदिनमभिवृद्धिः ७४ स्त्रियंप्रत्याह याभर्त्तरिजीवतिमृतेवायान्या

अधिविन्नातुभर्त्तव्यामहदेनोन्यथाभवेत् यत्रानुकूल्यंदंपत्योस्त्रिवर्गस्तत्रवर्धते ७४ मृतेजीवतिवा
पत्यौयानान्यमुपगच्छति सेहकीर्त्तिमवाप्नोतिमोदतेचोमयासह ७५ आज्ञासंपादिनींदक्षांवीरसूंप्रि
यवादिनीम् त्यजन्दाप्यस्तृतीयांशमद्रव्योभरणंस्त्रियाः ७६

पत्यादन्यंपुरुषंनैवोपगच्छति सेहलोकेविपुलांकीर्त्तिमवाप्नोति उमयाचसहक्रीडतिपुण्यप्रभावादमुत्रेति ७५ अधिवेदनकारणाभावे अधिवेत्तारंप्रत्याह आज्ञासंपादिनीमादेशसंपादिनींदक्षांशीघ्रकारिणींवीरसूंपुत्रवतींप्रियंवादिनींमधुरभाषिणींयस्त्यजति अधिविंदति सराज्ञाधनस्य तृतीयांशंदाप्यः निर्धनस्तुभरणंग्रासाच्छादनादिदाप्यः ७६ 

स्त्रीधर्मानाह स्त्रीभिःसदाभर्तृवचनंकार्यं यस्मादयमेवस्त्रियाउत्कृष्टोधर्मः स्त्रीणांस्वर्गहेतुत्वात् यदातुमहापातकदूषितस्तदाआशुद्धेःसंप्रतीक्ष्यः नतत्पारतंत्र्यंउत्तरकालंतुपूर्ववदेवतत्पारतंत्र्यम् ७७ शास्त्रीयदारसंग्रहस्यफलमाह लोकेआनंत्यंवंशस्याविच्छेदः दिवःप्राप्तिश्च दारसंग्रहस्यप्रयोजनंकथमित्याह पुत्रपौत्रप्रपौत्रकैः लोकानंत्यमग्निहोत्रादिभिश्चस्वर्गप्राप्तिरित्यन्वयः यस्मात्स्त्रीभ्यएतद्द्वयंभवति तस्मात्स्त्रियःसेव्याउपभोग्याः प्रजार्थंरक्षितव्याश्चधर्मार्थं तथाचापस्तंबेन धर्मप्रजासंपत्तिःप्रयोजनंदारसंग्रहस्योक्तं धर्मप्रजासंपन्नेषुदारेषुनान्यांकुर्वीतेतिवदता रतिफलंतुलौकिकमेव ७८ पुत्रोत्पत्त्यर्थंस्त्रियःसेव्याइत्युक्तंतत्रविशेषमाह स्त्रीणांगर्भधारणयोग्यावस्थोपलक्षितः कालःऋतुःसचरजोदर्शनदिवसादारभ्यषोडशा

स्त्रीभिर्भर्तृवचःकार्यमेषधर्मःपरःस्त्रियाः आशुद्धेःसंप्रतीक्ष्योहिमहापातकदूषितः ७७ लोकानंत्यंदिवःप्राप्तिःपुत्रपौत्रप्रपौत्रकैः यस्मात्तस्मात्स्त्रियःसेव्याःकर्त्तव्याश्चसुरक्षिताः ७८ षोडशर्तुनिशाःस्त्रीणांतस्मिन्युग्मासुसंविशेत् ब्रह्मचार्येवपर्वाण्याद्याश्चतस्रश्चवर्जयेत् ७९

होरात्राणि एतस्मिन्नृतौयुग्मासुसमासुरात्रिषु रात्रिग्रहणाद्दिवसप्रतिषेधः संविशेद्गच्छेत् पुत्रार्थं युग्मासुइतिबहुवचनंसमुच्चयार्थं अतश्चैकस्मिन्नपिऋतौ अप्रतिषिद्धासुयुग्मासुसर्वासुरात्रिषुगच्छेत् एवंगच्छन्ब्रह्मचार्येवभवति अतोयत्रब्रह्मचर्यंश्राद्धादौचोदितंतत्रगच्छतोपिनब्रह्मचर्यस्खलनदोषोस्ति किंचपर्वाण्याद्याश्चतस्रोवर्जयेत् पर्वाणीतिबहुवचनाद्यथार्थावगमादष्टमीचतुर्दश्योर्ग्रह-

णाम् यथाहमनुः अमावास्यामष्टमींचपौर्णमासींचतुर्दशीम् ब्रह्मचारीभवेन्नित्यमप्यृतौस्नातकोद्विजइति अतोमावास्यादीनिरजोदर्शनादारभ्य चतस्रो-
रात्रीश्चवर्जयेत् ७९ किंच एवमुक्तेनप्रकारेणस्त्रियंगच्छन्क्षामांगच्छेत् क्षामताचतस्मिन्कालेरजस्वलाव्रतेनैवभवति अथचेन्नभवतितदाकर्तव्याक्षा
मतापुत्रोत्पत्त्यर्थं अल्पास्निग्धभोजनादिना पुमान्पुंसोधिकेशुक्रेस्त्रीभवत्यधिकेस्त्रियइतिवचनात् यदायुग्मायामपिरात्रौशोणिताधिक्यंतदास्त्र्येवपुरु

एवंगच्छन्स्त्रियंक्षामांमघांमूलंचवर्जयेत्
सुस्थइंदौसकृत्पुत्रंलक्षण्यंजनयेत्पुमान् ८०

षाकृतिः अयुग्मायामपिशुक्राधिक्येपुमानेवभवतिस्त्र्याकृतिः कालस्यनिमित्तत्वात् शुक्रशोणितयोश्चोपादानकारणत्वेनप्राबल्यात् तस्मात्क्षा १४
माकर्त्तव्या मघामूलनक्षत्रेचवर्जयेत् चंद्रेचैकादशादिशुभस्थानगतेचकारात्पुंनक्षत्रशुभयोगलग्नादिसंपत्तौसकृदेकस्यांरात्रौनद्विस्त्रिर्वा ततो
लक्षणैर्युक्तं पुत्रंजनयति पुमानप्रतिहतपुंस्त्वः ८० ७ ७ ७ ७ ७ ७ ७

---

एवमृतौनियममुक्त्वाइदानीमनृतौनियममाह भार्यायाइच्छानतिक्रमेणप्रवृत्तिरस्यास्तीतियथाकामीभवेत् वाशब्दोनियमांतरपरिग्रहार्थः नपू
र्वनियमनिवृत्त्यर्थः स्त्रीणांवरमिंद्रदत्तमनुस्मरन् भवतीनांकामविहृतापातकीस्यादिति यथाताअब्रुवन्वरंवृणामहै ऋत्वियात्प्रजांविंदामहै काममा
विजनितोः संभवामेति तस्मादृत्वियात्स्त्रियःप्रजांविंदंतेकाममाविजनितोःसंभवंतिवरंवृतंतासामिति अपिच स्वदारेष्वेवनिरतः नितरांतन्मनस्कोभ
वेदित्यनुषज्यते एवकारेणस्त्र्यंतरगमनंनिवर्त्तयति प्रायश्चित्तस्मरणात् उभयत्रापिदृष्टप्रयोजनमाह स्त्रियोरक्ष्यायतःस्मृताइति यस्मात्स्त्रियोरक्ष्याः

यथाकामीभवेद्वापिस्त्रीणांवरमनुस्मरन् स्वदारनिरतश्चैवस्त्रियोरक्ष्यायतःस्मृताः ८१

स्मृताउक्ताः कर्त्तव्याश्चसुरक्षिताइति तच्चसुरक्षितत्वंयथाकामित्वेनस्त्र्यंतरागमनेनभवतीति अत्राह तस्मिन्युग्मासुसंविशेदिति किमयंविधि
र्नियमःपरिसंख्यावा उच्यते नतावद्विधिःप्राप्तार्थत्वात् नापिपरिसंख्यादोषत्रयसमासक्तेः अतोनियमंप्रतिपेदिरेन्यायविदः कःपुनरेषांभेदः अत्यंता
प्राप्तप्रापणंविधिः यथाग्निहोत्रंजुहुयादष्टकाःकर्त्तव्याइति पक्षेप्राप्तस्याप्राप्तपक्षांतरप्रापणंनियमः यथासमेयजेतेति दर्शपूर्णमासाभ्यांयजेतेतिया
गःकर्त्तव्यतयाविहितःसचदेशमंतरेणकर्त्तुमशक्यइत्यर्थाद्देशःप्राप्तः सचसमोविषमश्चेतिद्विविधः यदायजमानःसमेयक्ष्यतेतदासमेयजेतेतिवच

पंक्तिः ओ॰ २ विधिरत्यंतमप्राप्तौनियमःपाक्षिकेविधिः तत्रचान्यत्रचाप्राप्तौपरिसंख्यानिगद्यते

पा॰स्मृ॰मि॰

१५

नसुदाहृतेस्वार्थस्यप्राप्तत्वात् यदातु विषमेदेशेयियक्ष्यतेतदासमेयजेतेतिस्वार्थंविधत्ते स्वार्थस्यतदानीमप्राप्तत्वात् विषमदेशनिवृत्तिस्त्वार्थिकी आ॰
चोदितदेशेनैवयागनिष्पत्तेः अचोदितदेशोपादानेनयथाशास्त्रंयागोनानुष्ठितःस्यादिति तथाप्राङ्मुखोन्नानिभुंजीतेति इदमपिस्मार्त्तमुदाहरणंपू १
र्वेणव्याख्यातं एकस्यानेकत्रप्राप्तस्यान्यतोनिवृत्त्यर्थमेकत्रपुनर्वचनंपरिसंख्या तद्यथा इमामगृभ्णन्रशनामृतस्येत्यश्वाभिधानीमादत्तइत्ययंमंत्रः
स्वसामर्थ्यादश्वाभिधान्यागर्दभाभिधान्याश्चरशनायाग्रहणेविनियुक्तः पुनरश्वाभिधानीमादत्तइत्यनेनाश्वाभिधान्यांविनियुज्यमानोगर्दभाभिधान्या
निवर्त्तते तथापंचपंचनखाभक्ष्याइत्यत्रहियदृच्छयाश्वादिषुशशादिषुचभक्षणंप्राप्तं पुनःशशादिषुश्रूयमाणंश्वादिभ्योनिवर्त्ततइति किंपुनरत्रयु-
क्तं परिसंख्येत्याह तथाहि कृतदारसंग्रहस्यस्वेच्छयैवर्तौगमनंप्राप्तमितिनविधेरयंविषयः नापिनियमस्य गृह्यस्मृतिविरोधात् एवंहिस्मरंतिगृ-
ह्यकाराः दारसंग्रहानंतरंत्रिरात्रंद्वादशरात्रंसंवत्सरंवाब्रह्मचारीस्यादिति नचद्वादशरात्रात्संवत्सराद्वापूर्वमेवऋतुसंभवेऋतौगच्छेदेवेतिनियमा-
द्ब्रह्मचर्यस्मरणंबाध्येत अपिचप्राप्तेभावार्थेवचनंविशेषणपरंयुक्तं प्राप्तंचर्त्तौभार्यागमनमिच्छयैवातोयदिगच्छेदृतावेवेतिवचनव्यक्तिर्युक्ता किंच
नैयमिकात्पुत्रोत्पत्तिविधेरेवऋतौगमनंनित्यंप्राप्तमेवेति ऋतौगच्छेदेवेतिनियमोनर्थकःस्यात् नियमेचादृष्टंकल्पनीयं किंच ऋतौगंतव्यमेवेतिनिय
मेअसन्निहितस्यव्याध्यादिनाअसमर्थस्यानिच्छोश्चाशक्योर्थउपदिष्टःस्यात् विध्यनुवादविरोधश्चनियमे तथाह्येकःशब्दः सकृदुच्चरितस्तमेवार्थं
पक्षेअनुवदतिपक्षेविधत्तेचेति तस्मादृतावेवगच्छेन्नान्यत्रेतिपरिसंख्यैवयुक्ता तदिदंभारुचिविश्वरूपादयोनानुमन्यंते यतोनियमएवयुक्तः पक्षेस्या १५
र्थविधिसंभवात् अगमनेदोषश्रवणाच्च ऋतुस्नातांतुयोभार्यांसन्निधौनोपगच्छति घोरायांभ्रूणहत्यायांयुज्यतेनात्रसंशयइति नचविध्यनुवाद

विरोधः अनुवादाभावाद्विध्यर्थत्वाच्चवचनस्य तत्रहिविध्यनुवादविरोधः यत्रविधेयावधितयातदेवानुवेदितव्यमप्राप्ततयान्योद्देशेनविधातव्यंच यथा
वाजपेयाधिकरणपूर्वपक्षेवाजपेयेनस्वाराज्यकामोयजेतेतिवाजपेयलक्षणगुणविधानावधित्वेनयागोनुवेदितव्यः सएवस्वाराज्यलक्षणफलोद्देशे
नविधातव्यश्चेति नचानुवादेनेहकृत्यमस्ति यत्तुनियमेदृष्टंकल्प्यमित्युक्तंतत्परिसंख्यायामपिसमानं अनृतौगच्छतोदोषकल्पनात् यत्तुनैयमिक
पुत्रोत्पादनविध्याक्षेपेणैवऋतौनित्यगमनप्राप्तेर्ननियमइतितदसत् सएवायंनैयमिकपुत्रोत्पादनविधिःस्यात् मतमेवंगच्छन्स्त्रियंक्षामालक्षण्यं
पुत्रंजनयेदितिस्त्र्यभिगमनातिरिक्तःपुत्रोत्पादनविधिरिति तन्न गमनकरणिकायाभावनायाएवपुत्रोत्पत्तिकर्मताप्रदृश्यते एवंगच्छन्लक्षण्यंपुत्रं
जनयेदित्यनेनयथाग्निहोत्रंजुह्वन्स्वर्गंभावयेदितिनचासंनिहिताद्देरशक्यार्थविधिप्रसंगः सन्निहितशक्तयोरेवोपदेशात् ऋतुस्नातांतुयोभार्यांसं
निधौनोपगच्छतीति यःस्वदारानृतुस्नातान्स्वस्थःसन्नोपगच्छतीतिचविशेषोपादानात् अनिच्छानिवृत्तिस्तुनियमंविधानादेव नचविशेषणपरता-
पिपक्षेभावार्थविधिसंभवात् नापिगृह्यस्मृतिविरोधः संवत्सरात्पूर्वमेवऋतुदर्शनेसंविशतोनब्रह्मचर्यस्खलनदोषः यथाश्राद्धादिषु तस्मात्स्वार्थहा
निपरार्थकल्पनाप्राप्तबाधलक्षणदोषत्रयवतीपरिसंख्यानयुक्ता पंचपंचनखाभक्ष्याइत्यत्रयद्यपिशशादिषुभक्षणस्यपक्षेप्राप्तेर्नियमःशशादि-
षुश्वादिषुचप्राप्तेः परिसंख्येत्युभयंसंभवः तथापिनियमपक्षेशशाद्यभक्षणेदोषप्रसंगः श्वादिभक्षणेचादोषप्रसंगेनप्रायश्चित्तस्मृतिविरोधइतिप-
रिसंख्यैवाश्रिता एतेनसायंप्रातर्द्विजातीनामशनंस्मृतिनोदितमित्यत्रापिनियमोव्याख्यातः नांतराभोजनंकुर्यादितिचपुनरुक्तंस्यात्परिसंख्यायामेवं
चनियमेसतिऋतावृतावितिवीप्सालभ्यते निमित्तावृत्तौनैमित्तिकमप्यावर्त्ततइतिन्यायात् यथाकामीभवेदित्यपिनियमएव अनृतावपिस्त्रीकामना

पांसत्यां स्त्रियमभिरमयेदेवेति ऋतावुपेयात्सर्वत्र वा प्रतिषिद्धवर्ज्यमित्येतदपि गौतमीयसूत्रद्वयं नियमपरमेव ऋतावुपेयादनृतावपि स्त्रीकामनायां प्रतिषिद्धवर्जमुपेयादेवेत्यलमतिप्रसंगेन ८१ किंच भर्तृप्रभृतिभिः पूर्वोक्ताः साध्व्यः स्त्रियो यथाशक्त्यलंकारवसनभोजनपुष्पादिभिः संमाननीयाः यस्मात्ताः पूजिताः धर्मार्थकामान्संवर्धयंति ८२ तया पुनः समर्पितगृहव्यापारया किंभूतया भवितव्यमित्याह संयतः स्वस्थाननिवेशितः उपस्करो गृहोपकरणवर्गो यया सा न तथोक्ता यथोलूखलमुसलशूर्पादेः कंडनस्थाने दृषदुपलयोरवियोगेन पेषणस्थान इत्यादि दक्षा गृहव्यापारकुशला हृष्टा सदैव प्रहसितान

भर्तृभ्रातृपितृज्ञातिश्वश्रूश्वशुरदेवरैः बंधुभिश्च स्त्रियः पूज्या भूषणाच्छादनाशनैः ८२ संयतोपस्करा दक्षा हृष्टा व्ययपराङ्मुखी कुर्यात्श्वशुरयोः पादवंदनं भर्तृतत्परा ८३ क्रीडां शरीरसंस्कारं समाजोत्सवदर्शनम् हास्यं परगृहे यानं त्यजेत्प्रोषितभर्तृका ८४

ना व्ययपराङ्मुखी नव्ययशीला स्यादिति सर्वत्र शेषः किंच श्वश्रूश्च श्वशुरश्च श्वशुरौ श्वशुरः श्वश्र्वेत्येकशेषः तयोः पादवंदनं नित्यं कुर्यात् श्वशुरग्रहणं मान्यांतरोपग्रहणार्थं भर्तृतत्परा भर्तृवशवर्तिनी सती पूर्वोक्तं कुर्यात् भर्तृसन्निधावुक्तं ८३ प्रोषिते भर्तरि तया किं कर्तव्यमित्याह देशांतरगतभर्तृका क्रीडां कंदुकादिभिः शरीरसंस्कारमुद्वर्तनादिभिः समाजो जनसमूहः उत्सवो विवाहादिः तयोर्दर्शनं हास्यं विश्रंभणं परगृहगमनं त्यजेदिति प्रत्येकं संबध्यते ८४

किंच पाणिग्रहणात्प्राक् पिता कन्यामकार्यकरणाद्रक्षेत् तत ऊर्ध्वं भर्ता तदभावे पुत्राः वृद्धाभावे च तेषामुक्तानामभावे ज्ञातयः ज्ञातीनामभावे राजा पक्षद्वयावसाने तु राजा भर्ता प्रभुः स्त्रिया इति वचनात् अतः क्वचिदपि स्त्रीणां नैव स्वातंत्र्यम् ८५ किंच भर्त्रा विना भर्तृरहिता पित्रादिभिः रहिता न स्यात् यस्मात्तद्रहिता गर्हणीया निंद्या भवेत् एतच्च ब्रह्मचर्यपक्षे भर्तरि प्रेते ब्रह्मचर्यं तदन्वारोहणं वेति विष्णुस्मरणात् अन्वारोहणे महानभ्युदयः तथा च व्यासः कपोतिकाख्यानव्याजेन दर्शितवान् पतिव्रता संप्रदीप्तं प्रविवेश हुताशनं तत्र चित्रांगदधरं भर्तारं सान्वपद्यत ततः स्वर्गगतः पक्षी भार्यया सह सं-

रक्षेत्कन्यां पिता विन्नां पतिः पुत्रास्तु वार्धके अभावे ज्ञातयस्तेषां न स्वातंत्र्यं क्वचित्स्त्रियाः ८५
पितृमातृसुतभ्रातृश्वश्रूश्वशुरमातुलैः हीना न स्याद्विना भर्त्रा गर्हणीयान्यथा भवेत् ८६

गतः कर्मणा पूजितस्तत्र रेमे च सह भार्ययेति तथा च शंखांगिरसौ तिस्रः कोट्योर्धकोटी च यानि लोमानि मानुषे तावत्कालं वसेत्स्वर्गे भर्तारं यानुगच्छतीति प्रतिपाद्य तयोरवियोगं दर्शयतः व्यालग्राही यथा सर्पं बलादुद्धरते बिलात् तद्वदुद्धृत्य सा नारी सह तेनैव मोदते तत्र सा भर्तृपरमा स्तूयमानाप्सरोगणैः क्रीडते पतिना सार्धं यावदिंद्राश्चतुर्दशेति तथा ब्रह्मघ्नो वाथ मित्रघ्नः कृतघ्नो वा भवेत्पतिः पुनात्यविधवा नारी तमादाय मृता तु या तथा हारीतः मृते भर्तरि या नारी समारोहेद्धुताशनम् सारुंधतीसमाचारा स्वर्गलोके महीयते यावच्चाग्नौ मृते पत्यौ स्त्री नात्मानं प्रदाहयेत् तावन्न

पा॰स्मृ॰मि॰ मुच्यतेसाहिस्त्रीशरीरात्कथंचनेति हारीतोपि मातृकंपैतृकंचापियत्रचैवप्रदीयते कुलत्रयंपुनात्येषा भर्त्तारंयानुगच्छतीति तथा आर्त्तार्तेमुदिते आ॰
१७ हृष्टाप्रोषितेमलिनाकृशा मृतेम्रियेतयापत्यौसास्त्रीज्ञेयापतिव्रतेति अयंसर्वासांस्त्रीणामगर्भिणीनामबालापत्यानां आचांडालानांसाधारणोधर्मः १
भर्त्तारंयानुगच्छतीत्यविशेषोपादानात् यानिचब्राह्मण्यनुगमननिषेधपराणिवाक्यानि मृतानुगमनंनास्तिब्राह्मण्याब्रह्मशासनात् इतरेषुतुव-
र्णेषुतपःपरममुच्यते जीवंतीतद्धितंकुर्यान्मरणादात्मघातिनी यास्त्रीब्राह्मणजातीया मृतंपतिमनुव्रजेत् सास्वर्गमात्मघातेननात्मानंनपतिंनये
त् इत्येवमादीनितानिपृथक्चित्यधिरोहणविषयाणि पृथक्चितिंसमारुह्यनविप्रागंतुमर्हतीति विशेषस्मरणात् अनेनक्षत्रियादिस्त्रीणांपृथ-
क्चित्यभ्यनुज्ञागम्यते यत्तुकैश्चिदुक्तं पुरुषाणामिवस्त्रीणामप्यात्महननस्य प्रतिषिद्धत्वादतिप्रवृद्धस्वर्गाभिलाषायाः प्रतिषेधशास्त्रमतिक्रामंत्या
अयमनुगमनोपदेशः श्येनवत् यथाश्येनेनाभिचरन्यजेतेति तीव्रक्रोधाक्रांतस्यांतस्य प्रतिषेधशास्त्रमतिक्रामतः श्येनोपदेशइति तद्युक्तं येतावत्
श्येनकरणिकायां भावनायां भाव्यभूतहिंसायां विधिसंस्पर्शाभावेन प्रतिषेधसंस्पर्शात् फलद्वारेणश्येनस्यानर्थत्वंवर्णयंति तेषांमतेहिंसायाएवस्व
र्गार्थतया अनुगमनशास्त्रेण विधीयमानत्वात्प्रतिषेधसंस्पर्शाभावादग्नीषोमीयवत्स्पृष्टमेवानुगमनस्यश्येनवैषम्यं यत्तुमतंहिंसानाममरणानुकूलो
व्यापारः श्येनश्चपरमरणानुकूलव्यापाररूपत्वाद्धिंसैव कामाधिकारेचकरणांशेरागतःप्रवृत्तिसंभवेन विधेरप्रवर्त्तकत्वात् रागप्रयुक्तहिंसारूपत्वात्
श्येनः प्रतिषिद्धःस्वरूपेणैवानर्थइति तत्राप्यनुगमनशास्त्रेणमरणस्यैवस्वर्गसाधनतया विधानान्मरणेयद्यपिरागतःप्रवृत्तिस्तथापिमरणानुकूले १७
व्यापारे अग्निप्रवेशादावितिकर्त्तव्यतारूपे विधितएवप्रवृत्तिरितिननिषेधस्यावकाशः वायव्यंश्वेतमालभेतभूतिकामइतिवत् तस्मात्स्पष्टमेवानुगम

नस्यश्येनवैषम्यं यत्तुतस्मादुहनपुरायुषःस्वःकामीप्रेयादितिश्रुतिविरोधादनुगमनमयुक्तमिति तच्चन स्वःकाम्यायुषःप्राक्नप्रेयादितिस्वर्गफलोद्दे-
शेनायुषः प्रागायुर्व्ययोनकर्त्तव्यो मोक्षार्थिना यस्मादायुषः शेषेसति नित्यनैमित्तिककर्मानुष्ठानक्षपितांतःकरणकलंकस्यश्रवणमनननिदिध्यासनसं-
पत्तौसत्यामात्मज्ञानेन नित्यनिरतिशयानंदब्रह्मप्राप्तिलक्षणमोक्षसंभवः तस्मादनित्याल्पसुखरूपस्वर्गार्थमायुषोव्ययोनकर्त्तव्यइत्यर्थः अतश्चमोक्ष-
मनिच्छंत्या अनित्याल्पसुखरूपस्वर्गार्थिन्या अनुगमनंयुक्तं इतरकाम्यानुष्ठानवदितिसर्वमनवद्यं ८६ किंच प्रियमनवद्यत्वेनमनोनुकूलमायत्यां
चयच्छ्रेयस्करंतद्धितं प्रियंचहितंचप्रियहितं पत्युःप्रियहितेतस्मिन्युक्तानिरता स्वाचारा शोभनः आचारोयस्याःसातथोक्ता शोभनश्चाचारोदर्शितः-

पतिप्रियहितेयुक्तास्वाचाराविजितेंद्रिया सेहकीर्त्तिमवाप्नोतिप्रेत्यचानुत्तमांगतिम् ८७

शंखेन नानुक्तागृहान्निर्गच्छेत्
नानुत्तरीयानत्वरितंव्रजेत् नपरपुरुषंभाषेतान्यत्र वणिकप्रव्रजितवृद्धवैद्येभ्यः ननाभिंदर्शयेत् आगुल्फाद्वासःपरिदध्यात् नस्तनौविवृतौकुर्यात् न
हसेदप्रावृताभर्तारंतद्बंधून्वानद्विष्यान्नगणिकाधूर्ताभिसारिणीप्रव्रजिताप्रेक्षणिकामायामूलकुहककारिकादुःशीलादिभिःसहैकत्रतिष्ठेत् सं-
सर्गेणाहिचारित्रंदुष्यतीति विजितेंद्रिया विजितानिसंयमितानिइंद्रियाणिश्रोत्रादीनिवागादीनिचमनःसहितानियया साइहलोकेकीर्त्तिमख्यातिंपर-
लोकेचोत्तमांगतिंप्राप्नोति अयंचसकलएवस्त्रीधर्मोविवाहादूर्ध्वंवेदितव्यः प्रागुपनयनात्कामचारकामवादकामभक्षाइतिस्मरणात् वैवाहिकोविधिःस्त्री
णामौपनायनिकःस्मृतइति ८७ छ छ

अनेकभार्यंप्रत्याह सवर्णायांसत्यां अन्यामसवर्णांनैवधर्मकार्यंकारयेत् सवर्णास्वपिबह्वीषुधर्म्येविधौधर्मानुष्ठानेज्येष्ठयाविनाऽन्यैषांमुक्ता
इतरामध्यमाकनिष्ठावाननियोक्तव्या ८८ प्रमीतपत्निकायाविधिमुक्त्वादानींप्रमीतभार्यंप्रत्याह पूर्वोक्तांवृत्तवतींआचारवतींविपन्नांस्त्रिय-
मग्निहोत्रेणश्रौतेनाग्निनातदभावेस्मार्तेनदाहयित्वापतिः भर्त्ताअनुत्पादितपुत्रोनिष्टयज्ञोवाआश्रमांतरेष्वनधिकृतोदारान्तराभावेपुनर्दारान्

सत्यामन्यांसवर्णायांधर्मकार्यंनकारयेत् सवर्णासुविधौधर्म्येज्येष्ठयानविनेतरा ८८
दाहयित्वाग्निहोत्रेणस्त्रियंवृत्तवतींपतिः आहरेद्विधिवद्दारानग्नींश्चैवाविलंबयन् ८९

अग्नींश्चविधिवदाहरेत् अविलंबयन्शीघ्रमेव अनाश्रमीनतिष्ठेतदिनमेकमपिद्विजइतिदक्षस्मरणात् एतच्चाधानेनसहाधिकृतायाएवनान्यस्याः
यत्तुद्वितीयांचैवयोभार्यांदहेद्वैतानिकाग्निभिःजीवत्यांप्रथमायांतुसुरापानसमंहितदिति तथा मृतायांतुद्वितीयायांयोग्निहोत्रंसमुत्सृजेत् ब्रह्मघ्नंतंविजा १८
नीयाद्यश्चकामात्समुत्सृजेदिति एवमादि तदाधानेनसहानधिकृतायाअग्निदाहेवेदितव्यं इतिविवाहप्रकरणम् ८९ छ छ छ

---

ब्राह्मणस्यचतस्रोभार्याभवंतिक्षत्रियस्यतिस्रोवैश्यस्यद्वेशूद्रस्यैकेत्युक्तातासुचपुत्राउत्पादयितव्याइत्युक्तं इदानींकस्यांकस्मात्कःपुत्रोभवति
इतिविवेकमाह सवर्णेभ्योब्राह्मणादिभ्यः सवर्णासुब्राह्मण्यादिषुसजातयोमातृपितृसमानजातीयाःपुत्राभवंति विन्नास्वेषविधिःस्मृतइतिसर्व
शेषत्वेनोपसंहरणात् विन्नासुसवर्णास्वितिसंबध्यते विन्नाशब्दस्यसंबंधिशब्दत्वाद्वेत्तृभ्यःसवर्णेभ्यइतिलभ्यते एकःसवर्णशब्दःस्पष्टार्थः
अतश्चायमर्थः संवृत्तः उक्तेनविधिनाऊढायांसवर्णायांवोढुःसमानादुत्पन्नःसमानजातीयोभवति अतश्चकुंडगोलककानीनसहोढादीनामस
वर्णत्वमुक्तंभवति तेचसवर्णेभ्योनुलोमप्रतिलोमेभ्यश्चाभिद्यमानाः साधारणधर्मैरहिंसादिभिरधिक्रियंते शूद्राणांतुसधर्माणःसर्वेपध्वंसजाः

सवर्णेभ्यःसवर्णासुजायंतेहिसजातयः अनिंद्येषुविवाहेषुपुत्राःसंतानवर्धनाः ९०

स्मृताइतिस्मरणात् अपध्वंसजाःव्यभिचारजाताः शूद्रधर्मैरपिद्विजशुश्रूषादिभिरधिक्रियंते ननुकुंडगोलकयोरब्राह्मणत्वेश्राद्धेप्रतिषेधोनुप
पन्नः न्यायविरोधश्च योयज्जातीयात् यज्जातीयायामुत्पन्नःसतज्जातीयएव यथागोर्गविगौः अश्वाद्वडवायामश्वः तस्माद्ब्राह्मणाद्ब्राह्मण्यामुत्प
न्नोनब्राह्मणइतिविरुद्धं तथाकानीनपौनर्भवादीननुक्रम्य सजातीयेष्वयंप्रोक्तस्तनयेषुमयाविधिरितिवचनविरोधश्च नैतत्सारं ब्राह्मणेनब्रा
ह्मण्यामुत्पन्नोब्राह्मणइतिभ्रमनिवृत्त्यर्थः श्राद्धेप्रतिषेधः यथात्यंतमप्रातस्यपतितस्यश्राद्धेप्रतिषेधः नचन्यायविरोधः यत्रप्रत्यक्षगम्याजातिर्भ

वतितत्रतथा ब्राह्मणादिजातिस्तुस्मृतिलक्षणायथास्मरणंभवति यथासमानेपिब्राह्मण्येकुंडिनोवसिष्ठोगौतमइतिस्मरणलक्षणंगोत्रं तथाम
नुष्यत्वेसमानेपिब्राह्मण्यादिजातिः स्मरणलक्षणा मातापित्रोश्चैतदेवजातिलक्षणं नचानवस्था अनादित्वात्संसारस्य शब्दार्थव्यवहारवत्
सजातीयेष्वयंप्रोक्तस्तनयेषुमयाविधिरितिनूक्तानुवादत्वाद्यथासंभवंव्याख्यास्यते क्षेत्रजस्तुमातृसमानजातीयोनियोगस्मरणात् शिष्टसमा
चाराच्च यथाधृतराष्ट्रपांडुविदुराः क्षेत्रजाःसंतोमातृसमानजातीयाइत्यलमतिप्रसंगेन किंच अनिंद्येषुब्राह्मा ‌ दिषुविवाहेषुपुत्राःसंतानवर्ध-
नाः अरोगिणोदीर्घायुषोधर्मप्रज्ञासंपन्नाभवंति ९० वर्णानुक्त्वाइदानीमनुलोमानाह ब्राह्मणात्क्षत्रियायांविन्नायामुत्पन्नोमूर्धावसिक्तोहि

विप्रान्मूर्धावसिक्तोहिक्षत्रियायांविशःस्त्रियां अंबष्ठःशूद्र्यांनिषादोजातःपारसवोपिवा ९१

नामपुत्रोभवति वैश्यकन्यकायांविन्ना
यामंबष्ठोनामभवति शूद्रायांविन्नायांनिषादोनामपुत्रोभवति निषादोनामकश्चिन्मत्स्यघातजीवीप्रतिलोमजः समाभूदितिपारसवोयंनिषादइतिसं-
ज्ञाविकल्पः विप्रादितिसर्वत्रानुवर्त्तते यत्तुब्राह्मणेनक्षत्रियायामुत्पादितःक्षत्रियएवभवति क्षत्रियेणवैश्यायामुत्पादितोवैश्यएवभवति वैश्येनशूद्राया
मुत्पादितःशूद्रएवभवतीतिशंखस्मरणं तत्क्षत्रियादिधर्मप्राप्त्यर्थंनपुनर्मूर्धावसिक्तादिजातिनिराकरणार्थंक्षत्रियादिजातिप्राप्त्यर्थंवा अतश्चमूर्धावसि १९
क्तादीनां क्षत्रियादिभिरुक्तैरेवदंडाजिनोपवीतादिभिरुपनयनादिकार्यं प्रागुपनयनात्कामचारादिपूर्ववद्वेदितव्यम् ९१ ७ ७ ७

---

वैश्यायांशूद्रायांचविन्नायांराजन्यान्माहिष्योग्रौयथाक्रमंपुत्रौसंभवतः वैश्येनशूद्रायांविन्नायांकरणोनामपुत्रोभवति एषसवर्णमूर्धावसिक्तादि
संज्ञाविधिःविन्नास्वूढासुस्मृतउक्तोवेदितव्यः एतेमूर्धावसिक्तांबष्ठनिषादमाहिष्योग्रकरणाःषडनुलोमजाःपुत्रावेदितव्याः ९२ प्रतिलोमजानाह ब्रा
ह्मण्यांक्षत्रियवैश्यशूद्रैरुत्पादिताःयथाक्रमंसूतवैदेहिकचांडालाख्याःपुत्राभवंति तत्रचांडालःसर्वधर्मबहिष्कृतः ९३ किंच क्षत्रियायोषिद्वैश्यान्मा

वैश्याशूद्र्योस्तुराजन्यान्माहिष्योग्रौसुतौस्मृतौ वैश्यात्तुकरणःशूद्र्यांविन्नास्वेषविधिःस्मृतः ९२
ब्राह्मण्यांक्षत्रियात्सूतोवैश्याद्वैदेहिकस्तथा शूद्राज्जातस्तुचांडालःसर्वधर्मबहिष्कृतः ९३ क्षत्रियामा
गधंवैश्याच्छूद्रात्क्षत्तारमेवच शूद्रादायोगवंवैश्याजनयामासवैसुतम् ९४

गधंनामपुत्रंजनयति सैवशूद्रात्क्षत्तारंवै
श्ययोषिच्छूद्रादायोगवंपुत्रंजनयति एतेचसूतवैदेहिकचांडालमागधक्षत्रायोगवाःषट्प्रतिलोमजाः एतेषांचवृत्तयःऔशनसेमानवेचद्रष्टव्याः ९४ ७

संकीर्णसंकरेजात्यंतरमाह क्षत्रियेणवैश्यायामुत्पादितोमाहिष्यः वैश्येनशूद्रायामुत्पादिताकरणीतस्यांमाहिष्येणोत्पादितोरथकारोनामजात्याभवति तस्यचोपनयनादिसर्वंकार्यं वचनात् यथाहशंखः क्षत्रियवैश्यानुलोमानंतरोत्पन्नजोरथकारस्तस्येज्यादानोपनयनसंस्कारक्रियाअश्वप्रतिष्ठारथसूत्रवास्तुविद्याध्ययनवृत्तितावेति एवंब्राह्मणक्षत्रियोत्पन्नमूर्धावसिक्तमाहिष्याद्यनुलोमसंकरेजात्यंतरतोपनयनादिप्राप्तिश्चवेदितव्या तयोर्द्विजातित्वात् संज्ञास्तुस्मृत्यंतरोक्ताद्रष्टव्याः एतच्चप्रदर्शनमात्रमुक्तं संकीर्णसंकरजातीनामानंत्याद्वक्तुमशक्यत्वादतएतावदत्रविवक्षितं असंतःप्र-

माहिष्येणकरण्यांतुरथकारःप्रजायते असत्संतस्तुविज्ञेयाःप्रतिलोमानुलोमजाः ९५
जात्युत्कर्षोयुगेज्ञेयःपंचमेसप्तमेपिवा व्यत्ययेकर्मणांसाम्यंपूर्ववच्चाधरोत्तरम् ९६

तिलोमजाःसंतश्चानुलोमजाज्ञातव्याइति ९५ सवर्णेभ्यःसवर्णासुजायंतइत्यादिनावर्णप्राप्तौकारणमुक्तमिदानींकारणांतरमाह जातयोमूर्धावसिक्ताद्यास्तासामुत्कर्षोब्राह्मणत्वादिजातिप्राप्तिर्जात्युत्कर्षोयुगेजन्मनिसप्तमेपंचमेअपिशब्दात्षष्ठेवाबोद्धव्यः व्यवस्थितश्चायंविकल्पः व्यवस्थाचब्राह्मणेनशूद्रायामुत्पादितानिषादीसाब्राह्मणेनोढादुहितरंकांचिज्जनयति सापिब्राह्मणेनोढाअन्यामित्यनेनप्रकारेणषष्ठीसप्तमंब्राह्मणंजनयति ब्राह्मणेनवैश्यायामुत्पादिताअंबष्ठासाप्यनेनप्रकारेणपंचमीषष्ठंब्राह्मणंजनयति मूर्धावसिक्तापिअनेनप्रकारेणचतुर्थीपंचमंब्राह्मणमेवजनयति

एवमुग्राक्षत्रियेणोढामाहिष्याचयथाक्रमंक्षत्रियंषष्ठंपंचमंजनयति तथाकरणीवैश्योढापंचमंवैश्यमित्येवमन्यत्राप्यूहनीयं किंच कर्मणांव्यत्यये वृत्त्यर्थानांकर्मणांविपर्यासेयथाब्राह्मणोमुख्यवृत्त्याअजीवन् क्षात्रेणकर्मणाजीवेदित्यनुकल्पः तेनाप्यजीवन्वैश्यवृत्त्यातयाप्यजीवन्शूद्रवृत्त्या क्षत्रियोपिस्वकर्मणाजीवनार्थेनाजीवन्वैश्यवृत्त्याशूद्रवृत्त्यावा वैश्योपिस्ववृत्त्याअजीवन्शूद्रवृत्त्येतिकर्मणांव्यत्ययः तस्मिन्व्यत्ययेसतियद्यापद्विमोकेपितांवृत्तिंनपरित्यजतितदापंचमे षष्ठेसप्तमेवाजन्मनिसाम्यं यस्यहीनवर्णस्यकर्मणाजीवतितत्समानजातित्वंभवति तद्यथा ब्राह्मणःशूद्रवृत्त्याजीवन्तामपरित्यजन् यंपुत्रमुत्पादयतिसोपितयैववृत्त्याजीवन्पुनरप्येवंपरंपरयासप्तमेजन्मनिशूद्रमेवजनयति वैश्यवृत्त्याजीवन्षष्ठेवैश्यं क्षत्रियवृत्त्याजीवन्पंचमेक्षत्रियम् क्षत्रियोपिशूद्रवृत्त्याजीवन्षष्ठेशूद्रं वैश्यवृत्त्याजीवन्पंचमेवैश्यम् वैश्योपिशूद्रवृत्त्याजीवन्तामपरित्यजन्पुत्रपरंपरयापंचमेजन्मनिशूद्रंजनयति पूर्ववच्चाधरोत्तरं अस्यार्थः वर्णसंकरेअनुलोमजाःप्रतिलोमजाश्चदर्शिताः संकीर्णसंकरजाताश्चरथकारनिदर्शनेनदर्शिताः इदानींवर्णसंकरजाताःप्रदर्श्यंते अधरेचउत्तरेचअधरोत्तरं यथामूर्धावसिक्तायांक्षत्रियवैश्यशूद्रैरुत्पादितास्तथांबष्ठायांवैश्यशूद्राभ्यांनिषाद्यांशूद्रेणोत्पादिता अधराःप्रतिलोमजास्तथामूर्धावसिक्तांबष्ठानिषादीषुब्राह्मणोत्पादिताः माहिष्योग्रयोर्ब्राह्मणेनक्षत्रियेणचोत्पादिताः करण्यांब्राह्मणेनक्षत्रियेणवैश्येनचोत्पादिताःउत्तरेअनुलोमजाः एवमन्यत्राप्यूहनीयं एतदधरोत्तरंपूर्ववदसत्सदितिबोद्धव्यम् इतिवर्णजातिविवेकप्रकरणम् ९६ ५ ५ ५ ५ ५ ५

श्रौतस्मार्त्तानिकर्माणि अग्निसाध्यानिदर्शयिष्यन्कस्मिन्नग्नौकिंकर्त्तव्यमित्याह स्मृत्युक्तंवैश्वदेवादिकंकर्मलौकिकंच यत्प्रतिदिनंपाकलक्षणं तदपिगृहस्थोविवाहाग्नौविवाहसंस्कृतेकुर्वीत विभागकालाहृतेवावैश्यकुलादग्निमानीयेत्यादिनोक्तसंस्कारसंस्कृते अपिशब्दात्प्रेतेवागृहपतावाहृतेसंस्कृतएव ततश्चकालत्रयातिक्रमेप्रायश्चित्तीयते श्रुत्युक्तमग्निहोत्रादिकंकर्मवैतानिकाग्निषु आहवनीयादिषुकुर्वीत ९७ गृहस्थधर्मानाह शरीरचिंतां आवश्यकांदिवासंध्यासुकर्णस्थब्रह्मसूत्रउदङ्मुखइत्याद्युक्तविधिनानिर्वर्त्यगंधलेपक्षयकरमित्यादिनोक्तेनविधिनाकृ

कर्मस्मार्त्तंविवाहाग्नौकुर्वीतप्रत्यहंगृही दायकालाहृतेवापिश्रौतंवैताग्निकादिषु ९७ शरीरचिंतांनिर्वर्त्यकृतशौचविधिर्द्विजः प्रातःसंध्यामुपासीतदंतधावनपूर्वकम् ९८

तशौचविधिर्द्विजः दंतधावनपूर्वकंप्रातःसंध्यामुपासीत दंतधावनविधिश्च कंटकक्षीरवृक्षोत्थंद्वादशांगुलसंमितम् कनिष्ठिकाग्रवत्स्थूलंपर्वार्धकृतकूर्चकं दंतधावनमुद्दिष्टंजिह्वोल्लेखनिकातथेति अत्रवृक्षोत्थमित्यनेनतृणलोष्टांगुल्यादिनिषेधः पलाशाश्वत्थादिनिषेधश्चस्मृत्यंतरोक्तोद्रष्टव्यः दंतधावनमंत्रश्च आयुर्बलंयशोवर्चः प्रजाःपशुवसूनिच ब्रह्मप्रज्ञांचमेधांचत्वंनोदेहिवनस्पतेइति ब्रह्मचारिप्रकरणोक्तस्यापिसंध्यावंदनस्यपुनर्वचनंदंतधावनपूर्वकत्वप्रतिपादनार्थम् दंतधावननृत्यगीतादिब्रह्मचारीवर्जयेदितितन्निषेधात् ९८ ७ ७ ७ ७ ७



प्रातःसंध्यावंदनानंतरं अग्नीनाहवनीयादीन्यथोक्तेनविधिनाहुत्वा औपासनाग्निंवातदनंतरंसूर्यदैवत्यान्उदुत्यंजातवेदसमित्यादीन्मंत्रान्जपेत् समाहितः अविक्षिप्तचित्तः तदनंतरंवेदार्थान्निरुक्तव्याकरणादिश्रवणेनाधिगच्छेज्जानीयात् चकारादधीतंचाभ्यसेत् विविधानिचशास्त्राणिमीमांसाप्रभृतीनिधर्मार्थारोग्यप्रतिपादकान्यधिगच्छेत् ९९ तदनंतरमीश्वरमभिषेकादिगुणयुक्तमन्यंवाभिमतं अकुत्सितंयोगक्षेमार्थं अलब्धलाभोयोगः लब्धपरिपालनंक्षेम तदर्थमुपेयादुपासीत उपेयादित्यनेनसेवांप्रतिषेधति वेतनग्रहणेनाज्ञाकरणंसेवा तस्याःश्ववृत्तित्वेन

हुत्वाग्नीन्सूर्यदैवत्यान्जपेन्मंत्रान्समाहितः वेदार्थानधिगच्छेच्च शास्त्राणिविविधानिच ९९ उपेयादीश्वरंचैवयोगक्षेमार्थसिद्धये स्नात्वादेवान्पितॄंश्चैवतर्पयेदर्चयेत्तथा १०० वेदाथर्वपुराणानिसेतिहासानिशक्तितः जपयज्ञप्रसिद्ध्यर्थंविद्यांचाध्यात्मिकींजपेत् १०१

निषेधात् ततोमध्यान्हेशास्त्रोक्तेनविधिनानद्यादिषुस्नात्वादेवान्स्वगृह्योक्तान् पितॄंश्चचकारादृषींश्चदेवादितीर्थेनतर्पयेत् तदनंतरंगंधपुष्पाक्षतैःहरिहरहिरण्यगर्भप्रभृतीनामन्यतमंयथावासनंऋग्यजुःसाममंत्रैस्तत्प्रकाशकैः स्वनामभिर्वाचतुर्थ्यंतैर्नमस्कारयुक्तैराराधयेत् यथोक्तविधिना १०० तदनंतरंवेदाथर्वेतिहासपुराणानिसमस्तानिव्यस्तानिवा आध्यात्मिकींचविद्यांजपयज्ञसिद्ध्यर्थंयथोक्तेनविधिनायथाशक्तिजपेत् १०१ ७

बलिकर्मभूतयज्ञः स्वधापितृयज्ञः होमोदेवयज्ञः स्वाध्यायोब्रह्मयज्ञः अतिथिसत्क्रियामनुष्ययज्ञः एतेपंचमहायज्ञा अहरहः कर्त्तव्याःनित्यत्वा
त् यत्पुनरेषां फलश्रवणंतदेषांपावनत्वख्यापनार्थं नकाम्यत्वप्रतिपादनाय १०२ स्वगृह्योक्तेनविधिनावैश्वदेवहोमंकृत्वातदवशिष्टेनान्नेनभू
तेभ्योबलिंहरेत् अन्नग्रहणमपक्वव्युदासार्थं तदनंतरंयथाशक्ति भूमावन्नंश्वचांडालवायसेभ्योनिक्षिपेत् चशब्दात्कृमिपापरोगिपतितेभ्यः
यथाहमनुः शुनांचपतितानांचश्वपचांपापरोगिणाम् वायसानांकृमीणांच शनकैर्निक्षिपेद्भुवीति एतच्चसायंप्रातः कर्त्तव्यं अथसायंप्रातःसिद्ध

बलिकर्मस्वधाहोमस्वाध्यायातिथिसत्क्रियाः भूतपित्रमरब्रह्ममनुष्याणांमहामखाः १०२
देवेभ्यश्चहुतादन्नाच्छेषाद्भूतबलिंहरेत् अन्नंभूमौश्वचांडालवायसेभ्यश्चनिक्षिपेत् १०३

स्यहविष्यस्यजुहुयादित्याश्वलायनस्मरणात् इहकेचिद्वैश्वदेवाख्यस्यकर्मणःपुरुषार्थत्वमन्नसंस्कारकर्मत्वंचेच्छंति अथसायंप्रातःसिद्धस्य
हविष्यस्यजुहुयादित्यन्नसंस्कारकर्मताप्रतीयते अथातःपंचमहायज्ञाइत्युपक्रम्यतानेतानहरहःकुर्वीतेतिनित्यत्वाभिधानात्पुरुषार्थत्वंचावग
म्यतइति तदयुक्तं पुरुषार्थत्वेन्नसंस्कारकर्मत्वानुपपत्तेः तथाहि द्रव्यसंस्कारकर्मत्वपक्षेन्नार्थतावैश्वदेवकर्मणः पुरुषार्थत्वेवैश्वदेवकर्मार्थतान्द्रव्य
स्येतिपरस्परविरोधात्पुरुषार्थत्वमेवयुक्तं महायज्ञेश्चयज्ञैश्चब्राह्मीयंक्रियतेतनुरिति तथावैश्वदेवेनिवृत्तेतुयदन्योतिथिराव्रजेत् तस्माअन्नंयथाश

क्तिप्रदद्यान्नबलिंहरेदितिमनुस्मरणात् पुरुषार्थत्वेवैश्वदेवाख्यंकर्मनप्रतिपाकमावर्त्तनीयं तस्मादथसायंप्रातरित्यादिनोत्पत्तिप्रयोगौदर्शितौ ता
नेतान्यज्ञानहरहःकुर्वीतेति अधिकारविधिरितिसर्वमनवद्यं १०३ प्रत्यहमन्नंपितृभ्योमनुष्येभ्यश्चयथाशक्तिदेयं अन्नाभावेकंदमूलफलादि तस्या
प्यभावेजलंदेयं अपिशब्दात्स्वाध्यायंसततंकुर्यात् अविस्मरणार्थं नपचेदन्नमात्मार्थं अन्नग्रहणंसकलादनीयद्रव्यप्रदर्शनार्थं कथंतर्हिदेवतो
द्देशेनैव १०४ परिणीतापितृगृहेस्थितास्ववासिनी शेषाःप्रसिद्धाः बालादीनतिथिभृत्यांश्चसंभोज्य भोजयित्वादंपत्योः शेषभोजनंकर्त्तव्यं १०५

अन्नंपितृमनुष्येभ्योदेयमप्यन्वहंजलम् स्वाध्यायंचान्वहंकुर्यान्नपचेदन्नमात्मने १०४ बालस्ववासिनीवृद्धगर्भिण्या
तुरकन्यकाः संभोज्यातिथिभृत्यांश्चदंपत्योःशेषभोजनम् १०५ आपोशानेनोपरिष्टादधस्तादश्नतातथा अनग्नममृतं
चैवकार्यमन्नंद्विजन्मना १०६

भुंजानेनद्विजन्मनाउपरिष्टादधस्ताच्चापोशनाख्येनकर्मणान्नमनग्नममृतंचकार्यं द्विजन्मग्रहणमुपन
यनप्रभृतिसर्वाश्रमसाधारण्यार्थं अतिथित्वेनवर्णानांदेयंशक्त्यानुपूर्वशः अप्रणोद्योतिथिःसायमपिवाग्भूतृणोदकैः वैश्वदेवानंतरंवर्णानांब्राह्मणा
दीनां अतिथित्वेनयुगपत्प्राप्तानांब्राह्मणाद्यानुपूर्व्येणयथाशक्तिदेयं सायंकालेपियद्यतिथिरागच्छति तदा असावप्रणोद्यः अप्रत्याख्येयएव तथा
हमनुः तृणानिभूमिरुदकंवाक्चतुर्थीचसूनृता एतान्यपिसतांगेहेनोच्छिद्यंतेकदाचनेति यद्यप्यदनीयंकिमपिनास्तितथापिवाग्भूतृणोदकैरपिसत्कारंकु
र्यात् १०६

वैश्वदेवानंतरं भोक्तव्यमिति संबंधः ... यतये च सत्कृत्य स्वस्ति वाच्य भिक्षादानमप्पूर्वमित्यनेन विधिना भिक्षादातव्या भिक्षाचग्रास
भिक्षवेसामान्येनभिक्षादातव्या सुव्रताय ब्रह्मचारिणेयतयेच सत्कृत्यस्वस्तिवाच्य भिक्षादानमप्पूर्वमित्यनेनविधिनाभिक्षादातव्या भिक्षाचग्रास
संमिताग्रासश्चमयूरांडपरिमाणः ग्रासमात्राभवेद्भिक्षापुष्कलंतच्चतुर्गुणं हंतस्तैरूकचतुर्भिःस्यादग्रंतत्त्रिगुणंभवेदिति शातातपस्मरणात् भोजन
कालेचागतान्सखिसंबंधिबांधवान्भोजयेत् सखायोमित्राणि संबंधिनोयेभ्यःकन्यागृहीतादत्तावा मातृपितृसंबंधिनोबांधवाः १०७ महांतमुक्षा
णंधौरेयंमहाजंवाश्रोत्रियायोक्तलक्षणायोपकल्पयेत् भवदर्थमस्माभिःपरिकल्पितोयमितितन्निवेदयेत्नतुदानायव्यापादनायवा यथास

सत्कृत्यभिक्षवेभिक्षादातव्यासुव्रतायच भोजयेच्चागतान्कालेसखिसंबंधिबांधवान् १०७
महोक्षंवामहाजंवाश्रोत्रियायोपकल्पयेत् सत्क्रियान्वासनंस्वादुभोजनंसूनृतंवचः १०८

र्वमेतद्भवदीयमिति प्रतिश्रोत्रियमुक्षासंभवात् अस्वर्ग्यंलोकविद्विष्टंधर्ममप्याचरेन्नत्विति निषेधाच्च तस्मात्सत्क्रियाकर्त्तव्या सत्क्रियास्वा
गतवचनासनपाद्यार्घ्याचमनादिदानं तस्मिंस्तूपविष्टेपश्चादुपवेशनमन्वासनं स्वादुभोजनंमिष्टमशनं सूनृतंवचः धन्यावयमद्यभवदाग २३
मनादित्येवमादि अश्रोत्रियेपुनरश्रोत्रियस्योदकासनेइतिगौतमोक्तंवेदितव्यं १०८ ७ ७ ७ ७

स्नातकोविद्यास्नातकः व्रतस्नातकः विद्याव्रतस्नातकइतिसमाप्यवेदमसमाप्यव्रतंयःसमावर्त्ततेसविद्यास्नातकःसमाप्यव्रतमसमाप्यवेदंयःस
मावर्त्ततेसव्रतस्नातकःउभयंसमाप्ययःसमावर्त्ततेसविद्याव्रतस्नातकः आचार्यउक्तलक्षणः पार्थिवोवक्ष्यमाणलक्षणः प्रियोमित्रं विवाह्योजामा
ता चकारात्श्वसुरपितृव्यमातुलादीनांग्रहणं ऋत्विजोवृत्वामधुपर्कमाहरेत्स्नातकायोपस्थितायराज्ञेवाचार्यायचश्वशुरपितृव्यमातुलानांचे
त्याश्वलायनस्मरणात् एतेस्नातकादयःप्रतिसंवत्सरंगृहमागताअर्घ्याःमधुपर्केणसंपूज्याः अर्घशब्दोमधुपर्कंलक्षयति ऋत्विजश्चोक्तलक्षणाः
संवत्सरादर्वागपिप्रतियज्ञंमधुपर्केणसंपूज्याः १०९ अध्वनिवर्त्तमानोतिथिर्वेदितव्यः श्रोत्रियवेदपारगावध्वनिवर्त्तमानौब्रह्मलोकमभीप्सतो

प्रतिसंवत्सरंत्वर्घ्याःस्नातकाचार्यपार्थिवाः प्रियोविवाह्यश्चतथायज्ञंप्रत्यृत्विजःपुनः १०९ अध्वनीनोतिथिर्ज्ञेयः
श्रोत्रियोवेदपारगः मान्यावेतौगृहस्थस्यब्रह्मलोकमभीप्सतः ११० परपाकरुचिर्नस्यादनिंद्यामंत्रणादृते

गृहस्थस्यमान्यावतिथीवेदितव्यौ यद्यप्यध्ययनमात्रेणश्रोत्रियस्तथापिश्रुताध्ययनसंपन्नोत्रश्रोत्रियोभिधीयते एकशाखाध्ययनक्षमो
वेदपारगः ११० परपाकेरुचिर्यस्यासौतथोक्तोनैवस्यात् अनिंद्येनामंत्रणंविना अनिंद्येनामंत्रितोनापक्रामेदितिस्मरणात् वाक्चपाणी
चपादौचवाक्पाणिपादं तस्यचापल्यंवर्जयेत् वाक्चापल्यं असभ्यानृतादिभाषणं पाणिचापल्यंपल्याणास्फोटनादि पादचापल्यंलंघनोत्प्लव

नादि चकारान्नेत्रादिचापल्यं वर्जयेत् नशिश्नोदरपाणिपादचक्षुर्वाक्चापलानिकुर्यादितिगौतमस्मरणात् अतिभोजनंचवर्जयेत् अना 
रोग्यहेतुत्वात् १११ पूर्वोक्तंश्रोत्रियातिथिंवेदपारगातिथिंचभोजनादिनातृप्तंसीमांतंयावदनुव्रजेत् ततोभोजनानंतरमहःशेषंशिष्टैरिति 
हासपुराणादिवेदिभिःइष्टैश्चकाव्यकथाप्रपंचचतुरैःबंधुभिश्चानुकूलालापकुशलैःसहासीत ११२ ततःपूर्वोक्तेनविधिनापश्चिमांसंध्या
मुपास्यअग्निमग्नीन्वाहुत्वातानुपास्योपस्थायभृत्यैःपूर्वोक्तैःस्ववासिन्यादिभिःपरिवृतोनातितृप्त्याभुक्त्वाचकारादायव्ययादिगृहचिंतांनिर्वर्त्यानंत

वाक्पाणिपादचापल्यंवर्जयेच्चातिभोजनम् १११ अतिथिंश्रोत्रियंतृप्तमासीमांतमनुव्रजेत् अहःशेषंसमासीतशि
ष्टैरिष्टैश्चबंधुभिः ११२ उपास्यपश्चिमांसंध्यांहुत्वाग्नींस्तानुपास्यच भृत्यैःपरिवृतोभुक्त्वानातितृप्त्याथसंविशेत्
११३ ब्राह्मेमुहूर्त्तेचोत्थायचिंतयेदात्मनोहितम् धर्मार्थकामान्स्वेकालेयथाशक्तिनहापयेत् ११४

रंसंविशेत्स्वप्यात् ११३ ततोब्राह्मेमुहूर्त्तेउत्थायपश्चिमेर्धप्रहरेप्रबुध्यात्मनोहितंकृतंकरिष्यमाणंचवेदार्थसंशयांश्चचिंतयेत् तदानींचित्तस्याव्या
कुलत्वेनतत्त्वप्रतिभासयोग्यत्वात् ततोधर्मार्थकामान्स्वोचितकालेयथाशक्तिनपरित्यजेत् यथासंभवंसेवेतेत्यर्थःपुरुषार्थत्वात् यथाहगौतमः २४
नपूर्वाण्हमध्यंदिनापराण्हानफलान्कुर्यात् धर्मार्थकामेभ्यस्तेषुधर्मोत्तरःस्यादिति अत्रयद्यप्येतेषांसामान्येनसेवनमुक्तंतथापिकामार्थयोर्धर्माविरोधे
नानुष्ठानं तयोर्धर्ममूलत्वादेवप्रतिदिनमनुष्ठानम् ११४

विद्यापूर्वोक्ता कर्मश्रौतंस्मार्त्तंवा वयःआत्मनोतिरिक्तंसमत्वावाऊर्ध्वं बंधुःस्वजनसंपत्तिः वित्तंग्रामरत्नादिकं एतैर्युक्ताःक्रमेणमान्याःपूजनीयाः
एतैर्विद्याकर्मबंधुवित्तैःप्रभूतैःप्रवृद्धैःसमस्तैर्व्यस्तैर्वायुक्तःशूद्रोपिवार्धकेअशीतेरूर्ध्वंमानमर्हतीति शूद्रोप्याशीतिकोवरइतिगौतमस्मरणात्
११५ वृद्धःप्रसिद्धः भारीभाराक्रांतः नृपोभूपतिर्नक्षत्रियमात्रं स्नातोविद्याव्रतोभयस्नातः स्त्रीप्रसिद्धा रोगीव्याधितः वरोविवाहोद्यतःचक्रीशा
कटिकः चकारान्मत्तोन्मत्तादीनांग्रहणं बालवृद्धमत्तोन्मत्तोपहतदेहभाराक्रांतस्त्रीस्नातकप्रव्रजितेभ्यइतिशंखस्मरणात् एभ्यःपंथादेयःएतेष्व

विद्याकर्मवयोबंधुवित्तैर्मान्यायथाक्रमम् एतैःप्रभूतैःशूद्रोपिवार्धकेमानमर्हति ११५ वृद्ध
भारिनृपस्नातस्त्रीरोगिवरचक्रिणाम् पंथादेयोनृपस्तेषांमान्यःस्नातश्चभूपतेः ११६

भिमुखायातेषुस्वयंपथोपक्रामेत् वृद्धादीनांराज्ञासहपथिसमवायेराजामान्यइतितस्मैपंथादेयःभूपतेरपिस्नातकोमान्यःस्नातकग्रहणंस्नातक
मात्रप्राप्त्यर्थंनब्राह्मणाभिप्रायेण तस्यसर्वेषगुरुत्वात् यथाहशंखः अथब्राह्मणायाग्रेपंथादेयोराज्ञइत्येके तच्चानिष्टं गुरुर्ज्येष्ठश्चब्राह्मणोराजान
मतिशेतेतस्मैपंथाइति वृद्धादीनांपथिपरस्परसमवायेवृद्धतराद्यपेक्षयाविद्यादिभिर्वाविशेषोद्रष्टव्यः ११६ ७ ७ ७

वैश्यस्य क्षत्रियस्यच्चकारा द्ब्राह्मणस्य द्विजानुलोमानांच यागाध्ययनदानानि साधारणानि कर्माणि ब्राह्मणस्याधिकानि प्रतिग्रह याजनाध्यापनानि तथेति स्मृत्यंतरोक्तरूत्यकपसंग्रहः यथाह गौतमः कृषिवाणिज्येस्वयंकृते कुसीदंचेति अध्यापनंतु क्षत्रियवैश्ययोर्ब्राह्मणप्रेरितयोर्भवति न स्वेच्छया आपत्काले ब्राह्मणस्याब्राह्मणाद्विद्योपयोगोनुगमनंशुश्रूषा समाप्ते ब्राह्मणोगुरुरिति गौतमस्मरणात् एतान्यनापदि ब्राह्मणस्य षट् कर्माणि तत्र त्रीणीज्यादीनि धर्मार्थानि प्रतिग्रहादीनि वृत्त्यर्थानि षण्णां तु कर्मणामस्य त्रीणि कर्माणि जीविका याजनाध्यापने चैव विशुद्धाच्च प्रति

इज्याध्ययनदानानि वैश्यस्य क्षत्रियस्य च प्रतिग्रहोधिको विप्रे याजनाध्यापने तथा ११७ प्रधानं क्षत्रिये कर्म प्रजानां परिपालनम् कुसीदकृषिवाणिज्यपाशुपाल्यं विशः स्मृतम् ११८

ग्रह इति मनुस्मरणात् अत इज्यादीन्यवश्यंकर्त्तव्यानि न प्रतिग्रहादीनि द्विजातीनामध्ययनमिज्यादानं ब्राह्मणस्याधिकाः प्रवचनयाजनप्रतिग्रहाः पूर्वेषु नियम इति गौतमस्मरणात् ११७ क्षत्रियस्य प्रजापालनं प्रधानं कर्म धर्मार्थं वृत्त्यर्थंच वैश्यस्य कुसीदकृषिवाणिज्यपशुपालनानि वृत्त्यर्थानि कर्माणि कुसीदं वृद्ध्यर्थं द्रव्यप्रयोगः लाभार्थं क्रयविक्रयो वाणिज्यं शेषं प्रसिद्धं शस्त्रास्त्रभृत्त्वं क्षत्रस्य वणिक्पशुकृषी विशः आजीवनार्थं धर्मस्तु दानमध्ययनं यजिरिति मनुस्मरणात् ११८ ॐ ॐ ॐ



शूद्रस्य द्विजशुश्रूषा प्रधानं कर्म धर्मार्थं वृत्त्यर्थंच तत्र ब्राह्मणशुश्रूषा परमो धर्मः विप्रसेवैव शूद्रस्य विशिष्टं कर्म कीर्त्यत इति मनुस्मरणात् यदा पुनर्द्विजशुश्रूषयाजीवितुं न शक्नोति तदा वणिग्वृत्त्याजीवेत् नानाविधैर्वा शिल्पैर्द्विजातीनां हितं कुर्वन् यादृशैः कर्मभिः द्विजातिशुश्रूषायामयोग्यो न भवति तादृशानि कर्माणि कुर्वन्नित्यर्थः तानि च देवलोक्तानि शूद्रधर्मो द्विजातिशुश्रूषापापवर्जनं कलत्रादिपोषणं कर्षणपशुपालनभारोद्वहनापणव्यवहारचित्रकर्मनृत्यगीतवेणुवीणामुरजमृदंगवादनादीनि ११९ किंच भार्यायामेव न साधारणस्त्रीषु परस्त्रीषु वा रतिरभिगमनं यस्य स तथोक्तः शु-

शूद्रस्य द्विजशुश्रूषा तयाजीवन्वणिग्भवेत् शिल्पैर्वा विविधैर्जीवेद्द्विजातिहितमाचरन् ११९
भार्यारतिः शुचिर्भृत्यभर्त्ता श्राद्धक्रियापरः नमस्कारेण मंत्रेण पंचयज्ञान्नहापयेत् १२०

चिः बाह्याभ्यंतरशौचयुक्तः द्विजवत् भृत्यादिभर्त्ता श्राद्धक्रियारतः श्राद्धानि नित्यनैमित्तिककाम्यानि च क्रियाः स्नातकव्रतानि अविरुद्धानि तेषु रतः नम इत्यनेन मंत्रेण पूर्वोक्तान्पंच महायज्ञानहरहर्नहापयेत् अनुतिष्ठेत् नमस्कारमंत्रंच केचित् देवताभ्यः पितृभ्यश्च महायोगिभ्य एवच नमः स्वाहायै स्वधायै नित्यमेव नमो नम इति वर्णयंति नम इत्यन्ये तत्र वैश्वदेवं लौकिकेग्नौ कर्त्तव्यं न वैवाहिकेग्नावित्याचार्याः १२० ॐ ॐ

इदानींसाधारणधर्मानाह हिंसाप्राणिपीडातस्याअकरणमहिंसा सत्यमप्राणिपीडाकरंयथार्थवचनम् अस्तेयमदत्तानुपादानं शौचंबाह्यमा
भ्यंतरंच बुद्धिकर्मेंद्रियाणांनियतविषयवृत्तिताइंद्रियनिग्रहः यथाशक्तिप्राणिनामन्नोदकादिदानेनार्त्तिपरिहारोदानं अंतःकरणसंयमोदमः
आपन्नरक्षणंदया अपकारेपिचित्तस्याविकारः क्षांतिः एतेसर्वेषांपुरुषाणांब्राह्मणाद्याचांडालांतंधर्मसाधनम् १२१ वयोबाल्ययौवनादि बुद्धि
र्नैसर्गिकीलौकिकवैदिकव्यवहारेषु अर्थोवित्तंगृहक्षेत्रादि वाक्कथनं वेषोमाल्यवस्त्रादिविन्यासः श्रुतंपुरुषार्थशास्त्रश्रवणं अभिजनःकुलम्
कर्मकृत्यर्थंप्रतिग्रहादि एतेषांवयःप्रभृतीनांसदृशीमुचितांवृत्तिमाचरणं आचरेत्स्वीकुर्यात् यथास्तब्धःस्योचितानयौवनोचिता एवंबुद्ध्यादिष्वपि

अहिंसासत्यमस्तेयंशौचमिंद्रियनिग्रहः दानंदमोदयाक्षांतिःसर्वेषांधर्मसाधनम् १२१ वयोबुद्ध्यर्थवाग्वेषःश्रुता
भिजनकर्मणाम् आचरेत्सदृशींवृत्तिमजिह्मामशठांतथा १२२ त्रैवार्षिकाधिकान्नोयःसहिसोमंपिबेद्द्विजः प्राक्
सौमिकीःक्रियाःकुर्याद्यस्यान्नंवार्षिकंभवेत् १२३

योज्यं अजिह्मामवक्रां अशठाममत्सरां १२२ एवंस्मार्त्तानिकर्माण्यनुक्रम्येदानीं
श्रौतानिकर्माण्यनुक्रामति त्रिवर्षजीवनपर्याप्तंत्रैवार्षिकंअधिकंवा अन्नंयस्यसएवसोमपानंकुर्यात् नातोल्पधनः अतस्स्वल्पीयसिद्रव्येयःसोमंपिब २६
तिद्विजःसपीतसोमपूर्वोपिनतस्याप्नोतितत्फलमितिदोषश्रवणात् एतच्चकाम्याभिप्रायेणनित्यस्यचावश्यकर्त्तव्यत्वान्ननियमः यस्यवर्षजीवनपर्याप्तम

न्नंभवतिसप्राक्सौमिकीः सोमात्प्राक्प्राक्सोमंप्राक्सोमंभवाःप्राक्सौमिक्यः कास्ताः अग्निहोत्रदर्शपूर्णमासपशुचातुर्मास्यानिकर्माणितद्विकारा-
श्चैताःक्रियाःकुर्यात् १२३ एवंकाम्यानिश्रौतानिकर्माण्यभिधायेदानींनित्यान्याह संवत्सरेसंवत्सरे सोमयागःकार्यः पशुःप्रत्ययनं अयने अयने द
क्षिणोत्तरसंज्ञिते निरूढःपशुयागःकार्यः तथाप्रतिसंवत्सरंवा पशुनासंवत्सरेसंवत्सरेयजेतषट्सुषट्सुवामासेष्वित्येके इतिस्मरणात् आग्रयणेष्टि
श्चसस्योत्पत्तौकर्त्तव्या चातुर्मास्यानिच प्रतिसंवत्सरंकर्त्तव्यानि १२४ एषांसोमप्रभृतीनांपूर्वोक्तानांनित्यानांकथंचिदसंभवेतत्कालेवैश्वानरीमिष्टिंकु

प्रतिसंवत्सरंसोमःपशुःप्रत्ययनंतथा कर्त्तव्याग्रयणेष्टिश्चचातुर्मास्यानिचैवहि १२४ एषामसंभ
वेकुर्यादिष्टिंवैश्वानरींद्विजः हीनकल्पंनकुर्वीतसतिद्रव्येफलप्रदम् १२५ चांडालोजायतेयज्ञकरणा
च्छूद्रभिक्षितात् यज्ञार्थलब्धमददद्भासःकाकोपिवाभवेत् १२६

र्यात् किंच योयंहीनकल्पउक्तःसतिद्रव्येसोनकर्त्तव्यः यच्चफलप्रदंकाम्यंकर्मतद्धीनकल्पंनकुर्वीत नकर्त्तव्यमिति १२५ यज्ञार्थंशूद्रधनया
चनेनसजन्मांतरेचांडालोजायते यःपुनर्यज्ञार्थंयाचितंसर्वंनप्रयच्छतिनत्यजतिसभासः काकोवावर्षशतंभवेत् यथाहमनुः यज्ञार्थमर्थंभिक्षि
त्वायःसर्वंनप्रयच्छति सयातिभासतांविप्रःकाकतांवाशतंसमाइति भासःशकुंतः काकःप्रसिद्धः १२६ ॰ ॰ ॰

कुशूलंकोष्ठकं कुंभीउष्ट्रिका कुशूलंचकुंभीचकुशूलकुंभ्यौताभ्यांपरिमितंधान्यंयस्यसतथोक्तः कुशूलधान्यःस्यात्कुंभीधान्योवा तत्रस्वकुटुंब
पोषणेद्वादशाहमात्रपर्याप्तंधान्यंयस्यास्तिसकुशूलधान्यः कुंभीधान्यस्तुस्वकुटुंबपोषणेषडहमात्रपर्याप्तधान्यः त्र्यहःपर्याप्तंधान्यमस्यास्तीतित्र्या
हिकः श्वोभवंधान्यमस्यास्तीतिश्वस्तनः नविद्यतेश्वस्तनंयस्यसोश्वस्तनः कुशूलधान्यादिसंचयोपायमाह शाल्यादेर्निपतितपरित्यक्तवल्लरीग्र
हणंशिलं एकैकस्यपरित्यक्तस्यकणस्योपादानमुंछः शिलंचोंछश्चशिलोंछंतेन शिलोंछेनवा कुशूलधान्यादिश्चतुर्विधोगृहस्थोजीवेत् एषांकुशू
लधान्यादीनांब्राह्मणानांगृहस्थानांचतुर्णांपरःपरः पश्चात्पश्चात्पठितःश्रेयानुत्कृष्टतमःप्रशस्यतमः एतच्चयद्यपिद्विजःप्रकृतस्तथापिब्राह्म

कुशूलकुंभीधान्योवात्र्याहिकोश्वस्तनोपिवा जीवेद्वापिशिलोंछेनश्रेयानेषांपरःपरः १२७

णस्यैवभवितुमर्हतीति विद्योपशमनादियोगात् तथाचमनुः अद्रोहेणैवभूतानामल्पद्रोहेणवापुनः यावृत्तिस्तांसमास्थायविप्रोजीवेदनाप
दीतिविप्रमेवप्रस्तुत्य कुशूलधान्यकोवास्यात्कुंभीधान्यकएववा इत्याद्यभिहितत्वात् एतच्चातिसंपन्नंसंयतंयायावरंप्रत्युच्यते नविप्रमात्राभि
प्रायेण तथासतित्रैवार्षिकाधिकान्नोयःसहिसोमंपिबेद्द्विजइत्यनेनविरोधः तथाचगृहस्थानांद्वैविध्यंतत्रतत्रोक्तं यथाहदेवलः द्विविधोगृहस्थो
यायावरःशालीनश्चतयोर्यायावरःप्रवरःयाजनाध्यापनप्रतिग्रहरिक्थसंचयवर्जनात् षट्कर्माधिष्ठितःप्रैष्यचतुष्पदगृहग्रामधनधान्ययुक्तोलो-

कानुवर्त्तीशालीनइति शालीनोपिचतुर्विधः याजनाध्यापनप्रतिग्रहकृषिवाणिज्यपाशुपाल्यैःषड्भिर्जीवत्येकः याजनादिभिस्त्रिभिरन्यः याजना
ध्यापनाभ्यामपरः चतुर्थस्त्वध्यापनेनैव तथाहमनुः षट्कर्मैकोभवत्येषांत्रिभिरन्यःप्रवर्त्तते द्वाभ्यामेकश्चतुर्थश्चब्रह्मसत्रेणजीवतीति अत्रचप्रति
ग्रहोधिकोविप्रइत्यादिनाशालीनस्यवृत्तयोदर्शिताः यायावरस्यजीवेद्वापिशिलोंछेनेति इतिगृहस्थधर्मप्रकरणम् १२७ एवंश्रौतस्मार्त्तानिकर्माणिगृ
हस्थस्याभिधायेदानींस्नानादारभ्यब्राह्मणस्यावश्यकर्त्तव्यानिविधिप्रतिषेधात्मकानिमानससंकल्परूपाणिस्नातकव्रतान्याह ब्राह्मणस्यप्रतिग्रहाद-
योर्थप्राप्त्युपायादर्शिताः तत्रविशेषउच्यते स्वाध्यायविरोधिनमर्थंअप्रतिषिद्धमपिनेहेतनान्विच्छेत नयतस्ततः कुतश्चिदविदिताचारान्नविरुद्धप्रसंगे

नस्वाध्यायविरोध्यर्थमीहेतनयतस्ततः नविरुद्धप्रसंगेनसंतोषीचभवेत्सदा १२८ राजांतेवासियाज्येभ्यःसीदन्निच्छेद्धनंक्षु
धा दंभिहैतुकपाखंडिबकवृत्तींश्चवर्जयेत् १२९

नविरुद्धप्रयाज्ययाजनादिप्रसंगेनृत्यगीतादिर्विरुद्धंचप्रसंगश्चविरुद्धप्रसंगंतेननार्थमीहे
तेतिसंबध्यते नञआवृत्तिःप्रत्येकंपर्युदासार्था सर्वत्राप्यस्मिन्स्नातकप्रकरणेनञ्शब्दःपर्युदासार्थएव किंच अर्थलाभेपिसंतोषीपरितृप्तोभवेत्तृष्णा
रत्संयतश्च संतोषंपरमास्थायसुखार्थीसंयतोभवेदितिमनुस्मरणात् १२८ कुतस्तर्हिधनमन्विच्छेदित्याह क्षुधासीदन्पीड्यमानःस्नातकःराज्ञोविदि
तवृत्तांतात् अंतेवासिनोवक्ष्यमाणलक्षणात् याज्यात्याजनार्हाच्चधनमाददीत क्षुधासीदन्नित्यनेनविभागादिप्राप्तकुटुंबपोषणपर्याप्तधनोनकुत

श्चिदर्थमन्विच्छेदितिगम्यते किंच दंभिहैतुकादीन्सर्वकार्येषुलौकिकवैदिकशास्त्रीयेषुवर्जयेत् चकाराद्विकर्मस्थवैडालव्रतिकान् शठान् यथाहम नुः पाखंडिनोविकर्मस्थान्वैडालव्रतिकान्शठान् हैतुकान्बकवृत्तींश्चवाङ्मात्रेणापिनार्चयेदिति लोकरंजनार्थमेवकर्मानुष्ठायीदंभी युक्तिबलेन सर्वत्रसंशयकारीहैतुकः त्रैविद्यविरुद्धपरिगृहीताश्रमिणः पाखंडिनः बकवदस्यवर्त्तनमितिबकवृत्तिः यथाहमनुः अधोदृष्टिर्नैष्कृतिकःस्वार्थसाधनतत्परः शठोमिथ्याविनीतश्चबकवृत्तिरुदाहृतइति प्रतिषिद्धसेविनोविकर्मस्थाः विडालोमार्जारस्तस्यव्रतंस्वभावोव्रतंयस्यासौविडालव्रतिकः तस्यलक्षणमाहमनुः धर्मध्वजीसदालुब्धश्छाद्मिकोलोकदांभिकः वैडालव्रतिकोज्ञेयोहिंस्रःसर्वाभिसंधकइति शठःसर्वत्रवक्रः एतैःसंसर्गनिषेधादेवस्वयमे

शुक्लांबरधरोनीचकेशश्मश्रुनखःशुचिः नभार्यादर्शनेश्नीयान्नैकवासानसंस्थितः १३०

वंविधोनभवेदितिगम्यते १२९ किंच शुक्लेधौतेअंबरेवाससीधरतिइतिशुक्लांबरधरः केशाश्चश्मश्रूणिचनखाश्चकेशश्मश्रुनखंनीचंनिकृंतंकेशश्मश्रुनखंयस्यासौतथोक्तः शुचिरंतर्बहिश्चस्नानानुलेपनधूपस्रगादिभिःसुगंधीचभवेत् यथाहगौतमः स्नातकोनित्यंशुचिःसुगंधिःस्नानशीलइति सुगंधित्वविधानादेवनिर्गंधमाल्यस्यनिषेधः तथाचगोभिलः नागंधांस्रजंधारयेदन्यत्रहिरण्यरत्नस्रजइति सदास्नातकएवंभूतोभवेत् एतच्चसतिसंभवे 

नजीर्णमलवद्वासाभवेच्चविभवेसतीतिस्मरणात् नचभार्यायादर्शनेतस्यांपुरतोवस्थितायामश्नीयात् अवीर्यवदपत्योत्पत्तिभयात् तथाचश्रुतिः जायायाअंतेनाश्नीयादवीर्यवदपत्यंभवतीति अतस्तयासहभोजनंदूरादेवनिरस्तं नचैकवासाः नसंस्थितःउत्थितः अश्नीयादितिसंबध्यते १३० किंच कदाचिदपिसंशय्यमाणविपत्तिसंशयावहंकर्मनप्रपद्येतनकुर्यात् यथाव्याघ्रचोराद्युपाहितदेशाक्रमणादि अकस्मान्निष्कारणंकिंचिदपिपरुषमप्रियंउद्वेगकरंवाक्यंनवदेत् नचाहितमनृतंवाप्रियमपिचकारादसभ्यंबीभत्सकरंचाकस्मान्नवदेदितिसंबध्यते एतच्चपरिहासादिव्यतिरेकेण गुरुणापिसमंहास्यंकर्त्तव्यंकुटिलंविनेतिस्मरणात् नचस्तेनः अन्यदीयस्यादत्तस्यग्रहीतानस्यात् प्रतिषिद्धवृत्त्युपजीवीवार्धुषी नवार्धुषीस्यात् १३१

नसंशयंप्रपद्येतनाकस्मादप्रियंवदेत् नाहितंनानृतंचैवनस्तेनःस्यान्नवार्धुषी १३१ दाक्षायणीब्रह्मसूत्रीवेणुमान्सकमंडलुः कुर्यात्प्रदक्षिणंदेवमृद्गोविप्रवनस्पतीन् १३२

किंच दाक्षायणंसुवर्णंतदस्यास्तीतिदाक्षायणी ब्रह्मसूत्रंयज्ञोपवीतंतदस्यास्तीतिब्रह्मसूत्री वैणवयष्टिमान् कमंडलुमान्स्यादितिसर्वत्रसंबंधनीयं अत्रब्रह्मचारिप्रकरणोक्तस्यापियज्ञोपवीतस्यपुनर्वचनंद्वितीयप्राप्त्यर्थं यथाहवसिष्ठः स्नातकानांद्वितीयंस्यादंतर्वासस्तथोत्तरं यज्ञोपवीतेद्वेयष्टिः सोदकश्चकमंडलुरिति अत्रचदाक्षायणीतिसामान्याभिधानेपिकुंडलधारणमेवकार्यं वैणवींधारयेद्यष्टिंसोदकंचकमंडलुं यज्ञोपवीतंवेदंचशुभेरौक्मेचकुंडलइतिमनुस्मरणात् तथादेवंदेवतार्चांमृदमुद्धृतांगां

ब्राह्मणंवनस्पतींश्च अश्वत्थादीन्प्रदक्षिणंकुर्यात् एतान्प्रदक्षिणतः कृत्वाव्रजेत् एवंचतुःपथादीनपि मृदंगांदेवतांविप्रंघृतंमधुचतुःपथं प्रद
क्षिणानिकुर्वीतप्रज्ञातांश्चवनस्पतीनितिमनुस्मरणात् १३२ नद्यादिषुनमेहेत् नमूत्रपुरीषोत्सर्गंकुर्यात् एवंश्मशानादावपि यथाहशंखः नगो
मयकृष्टोप्तशाद्वलचितिश्मशानवल्मीकखलपर्वतपुलिनेषुमेहेत् भूताधारत्वादिति तथाग्न्यादीन्प्रति अग्न्यादीनामभिमुखंनमेहेत् नाप्येतान्पश्यन्
यथाहगौतमः नवाय्वग्निविप्रादित्यापोदेवतागाश्चप्रतिपश्यन्वामूत्रपुरीषामेध्यान्युदस्येन्नदेवताःप्रतिपादौप्रसारयेत् एतद्देशव्यतिरेकेणभूमिम
यज्ञियैस्तृणैरंतर्धायमूत्रपुरीषेकुर्यादिति यथाहवसिष्ठः परिवेष्टितशिराभूमिमयज्ञियैस्तृणैरंतर्धायमूत्रपुरीषेकुर्यादिति १३३ नैवार्कमीक्षेत य-

नतुमेहेन्नदीछायावर्त्मगोष्ठांबुभस्मसु नप्रत्यग्न्यर्कगोसोमसंध्यांबुस्त्रीद्विजन्मनः १३३ नेक्षेतार्कंननग्नांस्त्रींन
चसंसृष्टमैथुनाम् नचमूत्रंपुरीषंवानाशुचीराहुतारकाः १३४

द्यपिसामान्येनोक्तंतथापिउदयास्तमयराहुग्रस्तोदकप्रतिबिंबमध्यान्हवर्तिनएवादित्यस्यावेक्षणंनिषिध्यतेनसर्वदा यथोक्तंमनुना नेक्षेतोद्यंत
मादित्यंनास्तंयांतंकदाचन नोपसृष्टंनवारिस्थंनमध्यंनभसोगतमिति उपभोगादन्यत्रनग्नांस्त्रियंनेक्षेत अन्यत्रमैथुनादित्याश्वलायनः संसृष्टमै
थुनांकृतोपभोगांउपभोगांते अनग्नामपिनेक्षेतचकाराद्भोजनादिकमाचरंतीं तथाचमनुः नाश्नीयाद्भार्ययासार्द्धंनैनामीक्षेतचाश्नतीं क्षुवतींजृंभ
ओष्ठ ४ नकुर्यात्

माणांचनचासीनांयथासुखं नांजयंतींस्वकेनेत्रेनचाभ्यक्तामनावृतां नपश्येत्प्रसवंतींचश्रेयस्कामोद्विजोत्तमइति मूत्रपुरीषेचनपश्येत् तथाअशु-
चिःसन्राहुतारकाश्चनपश्येत् चकारादुदकेस्वप्रतिबिंबंनपश्येत् नचोदकेनिरीक्षेतस्वरूपमितिधारणेतिवचनात् १३४ वर्षतिसतिअयंमेवज्रःपा
प्मानमपहन्त्वितिमंत्रमुच्चारयेत् अप्रावृतोगच्छेत् अनाच्छादितइयात् नप्रधावेच्चवर्षतीतिप्रतिषेधात् नचप्रत्यक्शिराःस्वप्यात् चकारान्नग्नोनशयी
त एकश्चशून्यगृहेनचनग्नःशयीतेति नैकःसुप्याच्छून्यगृहेइतिचमनुस्मरणात् १३५ ष्ठीवनमुद्गिरणंअसृग्रक्तं शकृत्पुरीषं शेषंप्रसिद्धं एतान्य-
प्सुननिक्षिपेत् एवंतुषादीनपि यथाहशंखः तुषकेशपुरीषभस्मास्थिश्लेष्मनखलोमान्यप्सुननिक्षिपेत् पादेनपाणिनावाजलंनाभिहन्यादिति अग्नौ

अयंमेवज्रइत्येवंसर्वंमंत्रमुदीरयेत् वर्षत्यप्रावृतोगच्छेत्स्वपेत्प्रत्यक्शिरानच १३५ ष्ठीवनासृक्शकृन्मूत्ररेतांस्यप्सुन
निक्षिपेत् पादौप्रतापयेन्नाग्नौनचैनमभिलंघयेत् १३६ जलंपिबेन्नांजलिनानशयानंप्रबोधयेत् नाक्षैःक्रीडेन्नधर्मघ्नै
र्व्याधितैर्वानसंविशेत् १३७

नपादौनप्रतापयेत् नाप्यग्निंलंघयेत्चकारात्ष्ठीवनादीन्यग्नौनक्षिपेत् मुखोपधमनादिचाग्नेर्नकुर्यात्
तथाचमनुः नाग्निंमुखेनोपधमेन्नग्नांनेक्षेतचस्त्रियं नामेध्यंप्रक्षिपेदग्नौनचपादौप्रतापयेत् अधस्तान्नोपदध्याच्चनचैनमभिलंघयेत् नचैनं-
पादतःकुर्यान्नप्राणाबाधमाचरेदिति १३६ जलमंजलिनासंहताभ्यांहस्ताभ्यांनपिबेत् जलग्रहणंपेयमात्रोपलक्षणं विद्यादिभिरात्मनोधिकंशयानंनप्र
बोधयेत्नोत्थापयेत् श्रेयांसंनप्रबोधयेदितिविशेषात् अक्षादिभिर्नक्रीडेत् धर्मघ्नैःपशुलंभनादिभिर्नक्रीडेत व्याधितैर्ज्वराद्यभिभूतैरेकत्रनसंविशेत्न
शयीत १३७

जनपदकुलाचारग्रामविरुद्धं कर्मवर्जयेत् प्रेतधूमंच बाहुभ्यांनदीतरणंवर्जयेदितिसंबध्यते केशादिषुसंस्थितिंवर्जयेत् चकारादस्थिकार्पासामे
ध्येषु १३८ परस्यक्षीरादिपिबंतींगांपरस्मैनाचक्षीत नचनिवर्तयेत् अद्वारेणकुपथेन क्वचिदपिनगरेग्रामेमंदिरेवानप्रविशेत् नचकृपणस्यशा
स्त्रातिक्रमकारिणोराज्ञःसकाशात्प्रतिगृण्हीयात् १३९ प्रतिग्रहेषुसाध्येषुचसूनादयः पंचपूर्वस्मात्पूर्वस्मात्परः परोदशगुणंदुष्टः सूनाप्राणिहिंसा
सास्यास्तीतिसूनी प्राणिहिंसापरः चक्रीतैलिकः ध्वजीसुराविक्रयी वेश्यापण्यस्त्री नराधिपःअनंतरोक्तः १४० अथाध्ययनधर्मानाह अध्याय-

विरुद्धंवर्जयेत्कर्मप्रेतधूमंनदीतरम् केशभस्मतुषांगारकपालेषुचसंस्थितिम् १३८ नाचक्षीतधयंतींगांनाद्वारेण
विशेत्क्वचित् नराज्ञःप्रतिगृण्हीयाल्लुब्धस्योच्छास्त्रवर्तिनः १३९ प्रतिग्रहेसूनिचक्रिध्वजिवेश्यानराधिपाः दुष्टादशगु
णंपूर्वात्पूर्वादेतेयथाक्रमम् १४० अध्यायानामुपाकर्मश्रावण्यांश्रवणेनवा हस्तेनौषधिभावेवापंचम्यांश्रावणस्यतु १४१

तइत्यध्यायावेदास्तेषामुपाकर्मउपक्रमओषधीनांप्रादुर्भावेसतिश्रावणमासस्यपौर्णमास्यांश्रवणनक्षत्रयुतेवादिनेहस्तेनयुतायांपंचम्यांवास्वगृह्योक्तविधि
नाकुर्यात् यदातुश्रावणमासेऔषधयोनप्रादुर्भवंतितदाभाद्रपदेमासेश्रवणनक्षत्रेकुर्यात् ततऊर्ध्वंसार्धंचतुरोमासान्वेदानधीयीत तथाचमनुः श्राव
ण्यांप्रौष्ठपद्यांवाप्युपाकृत्ययथाविधि युक्तश्छंदांस्यधीयीतमासान्विप्रोर्धपंचमानिति १४१ ७ ७ ७ ७ 

पौषमासस्यरोहिण्यामष्टकायांवाग्रामात्बहिर्जलःसमीपंछंदसां वेदानांस्वगृह्योक्तविधिनोत्सर्गंकुर्यात् यदापुनर्भाद्रपदेमासेउपाकर्मतदामाघशु
क्लप्रथमदिवसेउत्सर्गंकुर्यात् यथोक्तंमनुना पौषेतुछंदसांकुर्याद्बहिरुत्सर्जनंबुधः माघशुक्लस्यवाप्राप्तेपूर्वाण्हेप्रथमेहनीति तदनंतरंपक्षिणीमहो-
रात्रंवाविरम्यशुक्लपक्षेषुवेदान्कृष्णपक्षेष्वंगान्यधीयीत यथाहमनुः यथाशास्त्रंतुकृत्वैवमुत्सर्गंछंदसांबहिः विरमेत्पक्षिणींरात्रिंयद्वाप्येकमहर्नि
शम् अतऊर्ध्वंतुछंदांसिशुक्लेषुनियतःपठेत् वेदांगानिचसर्वाणिकृष्णपक्षेषुसंपठेदिति १४२ अनध्यायानाह उक्तेनमार्गेणाधीयानस्यशिष्यर्त्विग्गु

पौषमासस्यरोहिण्यामष्टकायामथापिवा जलांतेछंदसांकुर्यादुत्सर्गंविधिवद्बहिः १४२ त्र्यहंप्रेतेष्वनध्यायःशिष्यर्त्विग्गुरुबं
धुषु उपाकर्मणिचोत्सर्गेस्वशाखाश्रोत्रियेतथा १४३ संध्यागर्जितनिर्घातभूकंपोल्कानिपातने समाप्यवेदंद्युनिशमारण्यक
मधीत्यच १४४

रुबंधुषुप्रेतेषुमृतेषुत्र्यहमनध्यायः त्रीनहोरात्रानध्ययनंवर्जयेत् उपाकर्मणिउत्सर्गाख्येकर्मणिकृतेत्र्यहमनध्यायः उत्सर्गेतुमनू
क्तपक्षिण्यहोरात्राभ्यांसहास्यविकल्पः स्वशाखाश्रोत्रियेस्वशाखाध्यायिनिप्रेतेचत्र्यहमनध्यायः १४३ संध्यायांमेघध्वनौनिर्घातेआकाशेउत्पातध्वनौभू
मिचलनेउल्कापतनेमंत्रस्यब्राह्मणस्यवासमाप्तौआरण्यकाध्ययनेचद्युनिशमहोरात्रमनध्यायः १४४ ७ ७ ७ ७

पंचदश्याममावास्यायांपूर्णिमायांचतुर्दश्यामष्टम्यांराहुसूतकेचंद्रसूर्योपरागेचद्युनिशमनध्यायः यत्तुत्र्यहंनकीर्त्तयेद्ब्रह्मराज्ञोराहोश्चसूतकेइति
तद्ग्रस्तास्तविषयं ऋतुसंधिगतास्वचप्रतिपत्सुश्राद्धिकभोजनेतत्प्रतिग्रहेचद्युनिशमनध्यायः एतच्चैकोद्दिष्टव्यतिरिक्तविषयं तत्रतुत्रिरात्रं प्रतिगृ
ह्यद्विजोविद्वानेकोद्दिष्टस्यकेतनं त्र्यहंनकीर्त्तयेद्ब्रह्मेतिस्मरणात् १४५ अध्येतॄणांपश्वादिभिरंतरागमनेकृतेशक्रध्वजस्यावरोपणदिवसेउच्छ्रयदि
वसेचाहोरात्रमनध्यायः द्युनिशमितिप्रकृतेपुनरहोरात्रग्रहणंसंध्यागर्जितनिर्घातभूकंपोल्कानिपातेष्वाकालिकत्वज्ञापनार्थं आकालिकनिर्घात-

पंचदश्यांचतुर्दश्यामष्टम्यांराहुसूतके ऋतुसंधिषुभुक्त्वावाश्राद्धिकंप्रतिगृह्यच १४५
पशुमंडूकनकुलश्वाहिमार्जारमूषकैः कृतेंतरेत्वहोरात्रं शक्रपातेतथोच्छ्रये १४६

भूकंपराहुदर्शनोल्काइतिगौतमवचनात् निमित्तकालादारभ्यापरेद्युर्यावत्सएवकालस्तावत्कालआकालः तत्रभवआकालिकोनध्यायः एतच्च
प्रातःसंध्यास्तनितेरात्रिसंध्यास्तनितेतुरात्रिमेव सायंसंध्यास्तनितेरात्रिः प्रातःसंध्यामहोरात्रमितिहारीतस्मरणात् यत्तुनगौतमेनोक्तं श्वानकुल ३१
सर्पमंडूकमार्जाराणांत्र्यहमुपवासोविप्रवासश्चेति तत्प्रथमाध्ययनविषयएव १४६ ७ ७ ७ ७

श्वाकुक्कुरः क्रोष्टासृगालः गर्दभोरासभः सामसामानि बाणोवंशः उलूकोघूकः आर्त्तोदुःखितः एषांश्वादीनांनिःस्वनेतावत्कालमनध्यायः वीणादि
स्वनेपि वेणुवीणाभेरीमृदंगगर्ग्यार्त्तशब्देष्वितिगौतमवचनात् गंत्रीशकटं अमेध्यादीनांसंनिधानेतावत्कालिकोनध्यायः १४७ अशुचौदेशे अशु
चावात्मनिच तथाविद्युत्संप्लवेपुनःपुनर्विद्योतमानायांविद्युतिस्तनितसंप्लवेपुनःपुनर्मेघघोषेतावत्कालिकोनध्यायः भुक्त्वार्द्रपाणिर्नाधीयीत जलम
ध्येर्द्धरात्रेमहानिशाख्येमध्यमप्रहरद्वये अतिमारुतेअहन्यपितावत्कालंनाधीयीत १४८ औत्पातिकेरजोवर्षे दिग्दाहेयत्रज्वलिताइवदिशोदृश्यंते

श्वक्रोष्टुगर्दभोलूकसामबाणार्त्तनिःस्वने अमेध्यशवशूद्रांत्यश्मशानपतितांतिके १४७ देशेशुचावात्मनिचविद्यु
त्स्तनितसंप्लवे भुक्त्वार्द्रपाणिरंभोंतरर्धरात्रेतिमारुते १४८ पांसुप्रवर्षेदिग्दाहेसंध्यानीहारभीतिषु धावतःपूति
गंधेचशिष्टेचगृहमागते १४९ खरोष्ट्रयानहस्त्यश्वनौवृक्षेरिणरोहणे सप्तत्रिंशदनध्यायानेतांस्तात्कालिकान्विदुः
१५०

संध्ययोर्नीहारेधूमिकायां भीतिषुचौरराजादिकृतासुतावत्कालमनध्यायः धावतस्त्वरितंगच्छतोनध्यायः पूतिगंधेकुत्सितगंधेच अ
मेध्यमद्यादिगंधे शिष्टेचश्रोत्रियादौगृहंप्राप्तेतदनुज्ञावधिरनध्यायः १४९ यानंरथादि इरणमूषरं मरुभूमिर्वा खरादीनामारोहणेवावत्कालम
नध्यायः एवंश्वक्रोष्टुगर्दभेत्यस्मादारभ्यसप्तत्रिंशदनध्यायांस्तात्कालिकान् निमित्तसमकालान्विदुरनध्यायविधिज्ञाः विदुरित्यनेनस्मृत्यंतरोक्तान

न्यानपिसंगृण्हाति यथाहमनुः शयानःप्रौढपादश्चकृत्वाचैवावसक्थिकं नाधीयीतामिषंजग्ध्वासूतकान्नाद्यमेवचेत्यादि १५० एवमनध्याया
नुक्त्वाप्रकृतानिस्नातकव्रतान्याह देवानामृत्विक्स्नातकाचार्यराज्ञांपरस्त्रियाश्चछायांनाक्रामेन्नाधितिष्ठेन्नलंघयेत्बुद्धिपूर्वः यथाहमनुः देवता
नांगुरोराज्ञःस्नातकाचार्ययोरपि नाक्रामेत्कामतश्छायांबभ्रुणोदीक्षितस्यचेति बभ्रुणोनकुलवर्णस्ययस्यकस्यचित् गोरश्वस्यवासोमादेर्वाबभ्रु
णइतिनपुंसकलिंगनिर्देशात् रक्तादीन्चनाधितिष्ठेत् आदिग्रहणात्स्नानोदकादेर्ग्रहणंउद्वर्त्तनमलस्नानंविण्मूत्ररक्तमेवच श्लेष्मनिष्ठ्यूतवां

**दैवर्त्विक्स्नातकाचार्यराज्ञांछायांपरस्त्रियाः नाक्रामेद्रक्तविण्मूत्रष्ठीवनोद्वर्त्तनादिच १५१ विप्राहिक्षत्रियात्मानोनाव**
**ज्ञेयाःकदाचन आमृत्योःश्रियमाकांक्षेन्नकंचिन्मर्मणिस्पृशेत् १५२ दूरादुच्छिष्टविण्मूत्रपादांभांसिसमुत्सृजेत् श्रुति**
**स्मृत्युदितंसम्यक्नित्यमाचारमाचरेत् १५३**

नानिनाधितिष्ठेतकामतइति १५१ विप्रोबहुश्रुतोब्राह्मणः अहिःसर्पः क्षत्रियोनृपतिः
एतेकदाचिदपिनावमंतव्याः आत्माचस्वयंनावमंतव्यः आमृत्योर्यावज्जीवंश्रियमिच्छेत् नकंचिन्मर्मणिस्पृशेत् कस्यचिदपिमर्मदुश्चरितंनप्रकाशये 
त् १५२ भोजनादुच्छिष्टंविण्मूत्रेपादप्रक्षालनोदकंचगृहात्दूरात्समुत्सृजेत् श्रौतंस्मार्त्तंचाचारंनित्यंसम्यगनुतिष्ठेत् १५३ ७ ७

गोब्राह्मणमग्निंअन्नमदनीयंविशेषतःपक्वमशुचिर्नस्पृशेत् पादेनत्वनुच्छिष्टोपि यदापुनःप्रमादात्स्पृशतितदाआचमनोत्तरकालंस्पृष्ट्वैतानशु
चिर्नित्यमद्भिःप्राणानुपस्पृशेत् गात्राणिचैवसर्वाणिनाभिंपाणितलेनत्वितिमनूक्तंकार्यं एवंप्राणादीनुपस्पृशेत् कस्यचिदपिनिंदाताडनेनकुर्यात्
एतच्चानपकारिणि अयुध्यमानस्योत्पाद्यब्राह्मणस्यासृगंततः दुःखंसुमहदाप्नोतिप्रेत्यापाज्ञतयानरइति पुत्रशिष्यौशिक्षार्थमेवताडयेत् चकारा

**गोब्राह्मणानलान्नानिनोच्छिष्टोनपदास्पृशेत् ननिंदाताडनेकुर्यात्पुत्रंशिष्यंचताड**
**येत् १५४ कर्मणामनसावाचायत्नाद्धर्मंसमाचरेत् अस्वर्ग्यंलोकविद्विष्टंधर्ममप्याचरे**
**न्नतु १५५**

द्दासादीनपि ताडनंचरज्ज्वादिनोत्तमांगव्यतिरेकेणकार्यं शिष्यशिष्टिरवधेनबाधनाशक्तौरज्जुवेणुविदलाभ्यां
तनुभ्यामन्येनघ्नन्राज्ञाशास्यइतिगौतमवचनात् पृष्ठतस्तुशरीरस्यनोत्तमांगेकथंचनेतिवचनात् १५४कर्मणाकायेनयथाशक्तिधर्ममनुतिष्ठेत्तमेव
मनसाध्यायेत् वाचावदेत् धर्मंविहितमपिलोकविद्विष्टंलोकाभिशस्तिजननंमधुपर्केगोवधादिकंनाचरेत् यस्मादस्वर्ग्यमग्निष्टोमीयवत्स्वर्गसाधनंनभवति
१५५

माताजननी पिताजनकः अतिथिरध्वनीनः भ्रातरोभिन्नोदरा अपि जामयोविद्यमानभर्तृकाःस्त्रियः संबंधिनोवैवाह्याः मातुलोमातुर्भ्राता वृद्धः
सप्तत्युत्तरवयस्कः बालआषोडशाद्वर्षात् आतुरोरोगी आचार्यउपनेता वैद्योविद्वान्भिषग्वा संश्रितःउपजीवी बांधवाःपितृपक्ष्यामातृपक्ष्याश्च
मातुलस्यपृथगुपादानमादरार्थं ऋत्विग्याजकःपुरोहितःशांत्यादेःकर्ता अपत्यंपुत्रादि भार्यासहधर्मचारिणी दासःकर्मकरः सनाभयःसोदराः भ्रातृ
भ्यःपृथगुपादानमजामिभगिनीभास्यर्थं एतैर्मात्रादिभिःसहवाक्कलहंपरित्यज्य वासर्वान्प्राजापत्यादीन्लोकान्प्राप्नोति १५६ १५७ परवारिषुपर
संबंधिषुसर्वसत्वोद्देशेनात्यक्तेषुतडागादिषुपंचपिंडाननुद्धृत्यनस्नायात् अनेनात्मीयोत्सृष्टाभ्यनुज्ञातेषुपिंडोद्धारमंतरापिस्नानमभ्यनुज्ञातं नद्या

मातृपित्रतिथिभ्रातृजामिसंबंधिमातुलैः वृद्धबालातुराचार्यवैद्यसंश्रितबांधवैः १५६ ऋत्विक्पुरोहितापत्यभार्या
दाससनाभिभिः विवादंवर्जयित्वातुसर्वान्लोकान्जयेद्गृही १५७ पंचपिंडाननुद्धृत्यनस्नायात्परवारिषु स्नायान्नदीदे
वखातह्रदप्रस्रवणेषुच १५८

दिषुकथंतर्हीत्याह स्नायान्नदीति साक्षात्परंपरयावासमुद्रगाःस्रवंत्योनद्यः देवखातंदेवनिर्मितंपुष्करादिउदक
प्रवाहाभिघातकृतसजलोमहानिम्नप्रदेशोह्रदः पर्वताद्युच्चप्रदेशात्प्रसृतमुदकंप्रस्रवणं एतेषुपंचपिंडानुद्धरणेनैवस्नायात् एतच्चनित्यस्नानविषयंसं
निसंभवेनदीषुदेवखातेषुतडागेषुसरःसुच स्नानंसमाचरेन्नित्यंगर्तप्रस्रवणादिष्वितिनित्यग्रहणात् शौचाद्यर्थंचयथासंभवंपरवारिषुपंचपिंडानुद्ध
रणेपिसर्वस्यननिषेधः १५८ 

शय्याकशिपुः आसनंपीठादि उद्यानमाम्रप्रवणादि गृहंप्रसिद्धं यानंरथादि परसंबंधीन्येतान्यदत्तान्यननुज्ञातानिवर्जयेत्नोपभुंजीत अभोज्या
न्नान्याह अग्निहीनस्येति अग्निहीनस्यश्रौतस्मार्ताग्न्यधिकाररहितस्यशूद्रस्यप्रतिलोमस्यवाधिकारवतोप्यग्निरहितस्यान्नमनापदिनभुंजीत
नप्रतिगृण्हीयाच्च तस्मात्प्रशस्तानांस्वकर्मणाश्रुत्यजातीनांब्राह्मणोभुंजीतप्रतिगृण्हीयाच्चेतिगौतमवचनात् ५९ कदर्योलुब्धः आत्मानंधर्मकृत्यं
चपुत्रदारांश्चपीडयेत् लोभाद्यःपितरौभृत्यान्सकदर्यइतिस्मृतइत्युक्तः बद्धोनिगडादिनावाचासंनिरुद्धश्च चोरःब्राह्मणस्वर्णव्यतिरिक्तपर

परशय्यासनोद्यानगृहयानानिवर्जयेत् अदत्तान्यग्निहीनस्यनान्नमद्यादनापदि १५९ कदर्यबद्धचोराणांक्लीबरंगावती
रिणाम् वैणाभिशस्तवार्धुष्यगणिकागणदीक्षिणाम् १६० चिकित्सकातुरक्रुद्धपुंश्चलीमत्तविद्विषाम् क्रूरोग्रपतितव्रात्य
दांभिकोच्छिष्टभोजिनाम् १६१

स्वापहारी क्लीबोनपुंसकः रंगावतारीनटचारणमल्लादिः वेणुच्छेदजीवीवैणः अभिशस्तःपतनीयैःकर्मभिर्युक्तः
वार्धुष्योनिषिद्धवृद्ध्युपजीवी गणिकापण्यस्त्री गणदीक्षीबहुयाजकः एतेषामन्नंनाश्नीयादित्यनुवर्तते १६० चिकित्सकोभिषग्वृत्त्युपजीवी आतु
रोमहारोगोपसृष्टः वातव्याध्यश्मरीकुष्ठमेहोदरभगंदराः अर्शांसिग्रहणीत्यष्टौमहारोगाःप्रकीर्तिताइति क्रुद्धःकुपितःपुंश्चलीव्यभिचारिणी मत्तो

विद्यादिनागर्वितः विद्विट्शत्रुः क्रूरोदृढाभ्यंतरकोपः वाक्कायव्यापारेणउद्वेजकउग्रः पतितोब्रह्महादिः व्रात्यः पतितसावित्रीकः दांभिकोवंचकः उच्छिष्टभोजी परभुक्तोज्झितोशी एतेषांचिकित्सकादीनामन्नंनाश्नीयात् ६२ अवीरास्त्रीस्वतंत्रा व्यभिचारमंतरेणापिपतिपुत्ररहितेत्यर्थः स्वर्णकारः स्वर्णस्यविकारांतरकृत् स्त्रीजितःसर्वत्रस्त्रीवशवर्त्ती ग्रामयाजीग्रामस्यशांत्यादिकर्त्ता बहूनामुपनेतावा शस्त्रविक्रयीशस्त्रविक्रयोपजीवी कर्मारो लोहकारः तक्षादिश्च तंतुवायःसूचीशिल्पोपजीवी श्वभिर्यत्संवर्त्तनंजीवनमस्यास्तीतिश्ववृत्ती एतेषामन्नंनाश्नीयात् ६२ नृशंसोनिर्दयःराजाभूप-

अवीरास्त्रीस्वर्णकारस्त्रीजितग्रामयाजिनाम् शस्त्रविक्रयकर्मारतंतुवायश्ववृत्तिनाम् ६२ नृशंसराजरजककृतघ्नवधजीविनाम् चैलधावसुराजीवसहोपपतिवेश्मनाम् ६३ पिशुनानृतिनोश्चैवतथाचाक्रिकबंदिनाम् एषामन्नंनभोक्तव्यंसोमविक्रयिणस्तथा ६४

तिः तत्साहचर्यात्पुरोहितश्च यथाहशंखः भीतावगीतरुदिताक्रंदितावघुष्टक्षुधितपरिभुक्तविस्मितोन्मत्तावधूतराजपुरोहितान्नानिवर्जयेदिति रजकोवस्त्रादीनांनीलादिरागकारकः कृतघ्नउपकृतस्यहंता वधजीवीप्राणिनांवधेनवर्त्तकः चैलधावः वस्त्रनिर्णेजनकृत् सुराजीवोमद्यविक्रियजीवी उपपतिर्जारः सहोपपतिनावेश्मयस्यासौसहोपपतिवेश्मा पिशुनःपरदोषस्यख्यापकः अनृतीमिथ्यावादी ३४

चाक्रिकस्तैलिकः शाकटिकश्चेत्येके अभिशस्तःपतितश्चाक्रिकस्तैलिकइतिभेदेनाभिधानात् बंदिनःस्तावकाः सोमविक्रयीसोमलताया विक्रेता एतेषामन्नंनभोक्तव्यं सर्वेचैतेकदर्यादयोद्विजाएवकदर्यत्वादिदोषदुष्टाअभोज्यान्नाः इतरेषांप्राप्त्यभावात्प्राप्तिपूर्वकत्वाच्चनिषेधस्य १६३ १६४ अग्निहीनस्यनान्नमद्यादनापदीत्यत्रशूद्रस्याभोज्यान्नत्वमुक्तंतत्रप्रतिप्रसवमाह दासागर्भदासादयः गोपालोगवांपालकः गवांपालनेनयोजीवति कुलमित्रंपितृपितामहादिक्रमायातः अर्धसीरीहलपर्यायसीरोपलक्षितकृषिफलभागग्राही नापितोगृहव्यापारकारयितानापित

शूद्रेषुदासगोपालकुलमित्रार्धसीरिणः भोज्यान्नानापितश्चैवयश्चात्मानंनिवेदयेत् ६५ अनर्चितंवृथामांसंकेशकीटसमन्वितम् शुक्तंपर्युषितोच्छिष्टंश्वस्पृष्टंपतितेक्षितम् ६६ उदक्यास्पृष्टसंघुष्टंपर्यायान्नंचवर्जयेत् गोघ्रातंशकुनोच्छिष्टंपदास्पृष्टंचकामतः ६७

श्च यश्चवाङ्मनःकायकर्मभिरात्मानंनिवेदयतितवाहमिति एतेदासादयःशूद्राणांमध्येभोज्यान्नाः चकारात्कुंभकारश्च गोपनापितकुंभकारकुलमित्रार्धिकनिवेदितात्मानोभोज्यान्नाइतिवचनात् इतिस्नातकव्रतप्रकरणम् १६५ नस्वाध्यायविरोध्यर्थमित्यतआरभ्यब्राह्मणस्यस्नातकव्रतान्यभिधायेदानींद्विजातिधर्मानाह अनर्चितंअर्चार्होयस्मैयदवज्ञयादीयते वृथामांसंवक्ष्यमाणप्राणात्ययादिव्यतिरेकेणदेवाद्यर्चनावशिष्टंचयन्नभवति आत्मार्थमेवयत्साधितं केशकीटादिभिश्चसमन्वितंसंयुक्तं यत्स्वयमनम्लंकेवलकालपरिवासेनद्रव्यांतरसंस

र्गकालपरिवासाभ्यांचाम्लीभवतितच्छुक्तं दध्यादिव्यतिरेकेण नपापीयसोन्नमभीयात् नहिःपक्वेन शुक्तेनपर्युषितं अन्यत्ररागखांडवचुक्रद
धिगुडगोधूमयवपिष्टविकारेभ्यइतिशंखस्मरणात् पर्युषितंराज्यंतरितं उच्छिष्टंभक्तोज्झितं श्वस्पृष्टं शु नास्पृष्टं पतितेक्षितं पतितादिभिरीक्षि
तं उदक्यारजस्वलातयास्पृष्टं उदक्याग्रहणंचांडालाद्युपलक्षणार्थं अमेध्यपतितचांडालपुल्कसरजस्वलाकुनखिकुष्ठिसंस्पृष्टान्नं वर्जयेदिति
शंखस्मरणात् कोभुंक्तेइतियदाघुष्यदीयतेतत्संघुष्टान्नं अन्यसंबंध्यन्यव्यपदेशेनयद्दीयतेतत्पर्यायान्नं यथाब्राह्मणान्नंददच्छूद्रः शूद्रान्नंब्रा
ह्मणोददत् उभावेताव भोज्यान्नौभुक्त्वाचांद्रायणंचरेदिति पर्याचांतमितिपाठेपरिगतमाचांतंगंडूषग्रहणंयस्मिन् तत्पर्याचांतंतन्न भोक्तव्यं एत-

अन्नंपर्युषितंभोज्यंस्नेहाक्तंचिरसंस्थितम् अस्नेहा अपिगोधूमयवगोरसविक्रियाः १६८

दुक्तं भवति गंडूषग्रहणादू
र्ध्वं आचमनात्प्राकू नभोक्तव्यं पार्श्वचांतमितिपाठेएकस्यांपंक्तौपार्श्वस्थे आचांतेनभोक्तव्यं भस्मोदकादिविच्छेदेन विनावर्जयेदितिप्रत्येकंसंबं
ध्यते तथागोघ्रातं गवाघ्रातं शकुनेनकाकादिनाभुक्तमास्वादितं शकुनोच्छिष्टं पदास्पृष्टं बुद्धिपूर्वंपादेनस्पृष्टंवर्जयेत् १६६ १६७ पर्युषितस्यप्रतिप्रस
वमाह अन्नमदनीयंपर्युषितंघृतादिस्नेहसंयुक्तंचिरकालसंस्थितमपिभोज्यं गोधूमयवगोरसविक्रियाः मंडकसक्तुकिलाटकूर्चिकादयः अस्नेहा ३५
अपिचिरकालसंस्थिताभोज्याः यदिविकारांतरमनापन्नाः अपूपधानाकरंभसक्तुयावकतैलपायसशाकानिशुक्तानिवर्जयेदितिवसिष्ठस्मरणात् १६८

गौर्यावृषेणसंधीयतेसाचसंधिनी वशांवंध्यांविजानीयाद्वृषाक्रांतांचसंधिनीमितित्रिकांडीस्मरणात् यावैकांवेलामतिक्रम्यदुह्यतेयाचवत्सांतरेण
संधीयतेसापिसंधिनी प्रसूताअनतिक्रांतदशाहाअनिर्दशा मृतवत्साअवत्सा संधिनीच अनिर्दशाच अवत्साच संधिन्यनिर्दशावत्साः ताश्चतागावश्च
तासांपयःक्षीरंपरिवर्जयेत् संधिनीग्रहणंस्यंदिनीयमलस्वोरुपलक्षणार्थं यथाहगौतमः स्यंदिनीयमसूसंधिनीनांचेति स्रवत्पयःस्तनीस्यंदिनी यमल
प्रसूर्यमलप्रसविनी एवमजामहिष्योश्चानिर्दशयोःपयोवर्जयेत् गोमहिष्यजानामनिर्दशानामितिवसिष्ठस्मरणात् पयोग्रहणात्तद्विकाराणामपिद-
ध्यादीनांनिषेधः नहिमांसनिषेधेनतद्विकाराणामपिदध्यादीनांनिषेधः नहिमांसनिषेधेतद्विकाराणामनिषेधोयुक्तः विकारनिषेधेप्रकृतेरनिषेधोयुक्तः

संधिन्यनिर्दशावत्सागोपयःपरिवर्जयेत् औष्ट्रमैकशफंस्त्रैणमारण्यकमथाविकम् १६९

पयोनिषेधात्शकृन्मूत्रादेर
निषेधः उष्ट्राज्जातमौष्ट्रंपयोमूत्रादि एकशफावडवादयः तत्प्रभवमैकशफं स्त्रीप्रभवंस्त्रैणं स्त्रीग्रहणमजाव्यतिरिक्तसकलद्विस्तनीनामुपलक्षणार्थं
सर्वासांद्विस्तनीनांक्षीरमभोज्यमजावर्जमितिशंखस्मरणात् अरण्येभवाआरण्यकास्तदीयमारण्यकं क्षीरं माहिषव्यतिरेकेण आरण्यानांचसर्वेषां
मृगाणांमहिषींविनेतिवचनात् अवेर्जातमाविकं वर्जयेदितिप्रत्येकंसंबध्यते औष्ट्रमित्यादिविकारप्रत्ययनिर्देशात् तद्विकारमात्रस्यपयोमूत्रादेः
सर्वदानिषेधः नित्यमाविकमपेयमौष्ट्रमैकशफंचेतिगौतमस्मरणात् १६९ ७ ७ ७ ७ ७

देवतार्थंबल्युपहारनिमित्तंसाधितंहविः हवनार्थंसिद्धंप्राक्होमात् शिग्रुःसौभांजनः लोहितान् वृक्षनिर्यासान् व्रश्चनप्रभवान् वृक्षछेदनजाता
न् अलोहितानपि यथाहमनुः लोहितान् वृक्षनिर्यासान् व्रश्चनप्रभवांस्तथेति लोहितग्रहणात् हिंगुकर्पूरादीनामनिषेधः अनुपाकृतमांसानियज्ञे
अहुतस्यपशोर्मांसानि विड्जानिमनुष्यादिजग्धबीजपुरीषोत्पन्नानिपुरीषस्थानेउत्पन्नानिच तंदुलीयकप्रभृतीनि कवकानिछत्राकाणि वर्जयेदि
तिप्रत्येकमभिसंबध्यते १७० क्रव्यादा आममांसादनशीलाः पक्षिणोगृध्रादयः दात्यूहश्चातकः शुकःकीरः चंच्वाप्रतुद्यभक्षयंतीतिप्रतुदाःश्येनाद

देवतार्थंहविःशिग्रुंलोहितान्व्रश्चनांस्तथा अनुपाकृतमांसानिविड्जानिकवकानिच १७० क्रव्यादपक्षिदा
त्यूहशुकप्रतुदटिट्टिभान् सारसैकशफान्हंसान्सर्वांश्चग्रामवासिनः १७१ कोयष्टिप्लवचक्राह्वबलाकाबकवि
ष्किरान् वृथाकृशरसंयावपायसापूपशष्कुलीः १७२

यः टिट्टिभस्तच्छब्दानुकारी सारसोलक्ष्मणः एकशफाअश्वादयः हंसाःप्रसिद्धाः
ग्रामवासिनः पारावतप्रभृतयः एतान् क्रव्यादादीन्वर्जयेत् १७१ कोयष्टिकः क्रौंचः प्लवोजलकुक्कुटः चक्राह्वश्चक्रवाकः बलाकाबकौप्रसिद्धौ न २६
खैर्विकीर्यभक्षयंतीतिविष्किराश्चकोरादयएवगृह्यंते लावकमयूरादीनांभक्ष्यत्वात् ग्रामकुक्कुटस्यग्रामवासित्वादेवनिषेधात् एतान्कोयष्ट्या

दीन्वर्जयेत् वृथादेवताद्युद्देशमंतरेणसाधिताः कृसरसंयावपायसापूपशष्कुलीर्वर्जयेत् कृसरंतिलमुद्गसिद्धओदनः संयावः क्षीरगुडघृतादिकृ
तःउत्कारिकाख्यः पायसंपयसाशृतमन्नं अपूपःस्नेहपक्वगोधूमविकारः शष्कुलीस्नेहपक्वगोधूमविकारः नपचेदन्नमात्मनेइतिकृसरादीनांनिषेधे-
सिद्धेपुनरभिधानंप्रायश्चित्तगौरवार्थं १७२ कलविंकोग्रामचटकः ग्रामनिवासित्वेनप्रतिषेधेसिद्धेसत्युभयचरत्वात्पुनर्वचनं काकोलोद्रोणकाकः
कुररउत्क्रोशः रज्जुदालकोवृक्षकुट्टकः जालपादाः जालाकारपादाः अजालपादाअपिवैहंसाः संतीतिहंसानांपृथग्वचनं खंजरीटःखंजनः जातितो-
ऽज्ञाता मृगाःपक्षिणश्च एतान्कलविंकादीन्वर्जयेत् १७३ चाषाः किकीदिवयः रक्तपादाः कादंबप्रभृतयः सौनंघातस्थानभवंमांसं भक्ष्याणा

कलविंकंसकाकोलंकुररंरज्जुदालकम् जालपादान्खंजरीटानज्ञातांश्चमृगद्विजान् १७३ चाषां
श्चरक्तपादांश्चसौनंवल्लूरमेवच मत्स्यांश्चकामतोजग्ध्वासोपवासस्त्र्यहंवसेत् १७४

मपिवल्लूरंशुष्कमांसं मत्स्यामीनाः एतांश्चाषादीन्वर्जयेत् चकारान्नालिकाशणकुसुंभादीन् नालिकाशणछत्राककुसुंभालाबुविड्भवान् कुं
भीकुंदुरुवृंताककोविदारांश्चवर्जयेदिति तथाकालप्ररूढानिपुष्पाणिचफलानिच विकारवच्चयत्किंचित्प्रयत्नेनविवर्जयेत् तथावटप्लक्षाश्व-
त्थकपित्थनीपमातुलिंगफलानिवर्जयेदितिस्मरणात् एतान्संधिनीक्षीरप्रभृतीनुक्तांतान्कामतोभक्षयित्वात्रिरात्रमुपवसेत् अकामतस्त्व-
ओ॰१ दधिस्थं

होरात्रं शेषेषूपवसेदहरिति मनुस्मरणात् यत्तु पुनः शंखेनोक्तं बकबलाकाहंसप्लवचक्रवाककारंडवगृहचटककपोतपारावतपांडुशुकसा
रिकासारसटिट्टिभोलूककंकरक्तपादचाषभासवायसकोकिलशार्ङ्गलिकुक्कुटहारीतभक्षणे द्वादशरात्रमनाहारः पिबेद्गोमूत्रयावकमिति तद्ब-
हुकालाभ्यासे मतिपूर्वे समस्तभक्षणे वा वेदितव्यं १७४ पलांडुः स्थूलकंदनालो लशुनानुकारी विड्वराहो ग्रामसूकरः छत्राकं सर्पछत्रं ग्रामकुक्कु
टः प्रसिद्धः लशुनं रसोनं सूक्ष्मश्वेतकंदनालं गृंजनं लशुनानुकारि लोहितसूक्ष्मकंदं एतानि षट् सकृत्कामतो जग्ध्वा भक्षयित्वा चांद्रायणं वक्ष्यमा-

पलांडुं विड्वराहं च छत्राकं ग्रामकुक्कुटं लशुनं गृंजनं चैव जग्ध्वा चांद्रायणं चरेत् १७५

णलक्षणं चरेत् ग्रामकुक्कुटछत्राकयोः पूर्वं प्रतिषेधितयोरिहाभिधानं पलांड्वादिसमानप्रायश्चित्तार्थं मतिपूर्वं चिरतराभ्यासे तु छत्राकं विड्वराहं च
लशुनं ग्रामकुक्कुटं पलांडुं गृंजनं चैव मत्या जग्ध्वा पतेद्द्विज इति मनूक्तं अमतिपूर्वाभ्यासे अमत्यैतानि षड् जग्ध्वा कृच्छ्रं सांतपनं चरेत् तृतीयाध्याये ३७
वक्ष्यमाणं यतिचांद्रायणं वापीति द्रष्टव्यं अमतिपूर्वाभ्यासे तु शंखोक्तं लशुनपलांडुगृंजनविड्वराहग्रामकुक्कुटकुंभीकभक्षणे द्वादशरात्रं पयः पिबेदिति १७५

सेधा श्वावित् गोधा कृकलासानुकारिणी महती कच्छपः कूर्मः शल्लकः शल्लकी शशः प्रसिद्धः पंचनखादीनां श्वमार्जारवानरादीनां मध्ये सेधाद
यो भक्ष्याः चकारात्खड्गोपि यथाह गौतमः पंचनखाः शशशल्लकश्वाविद्गोधाखड्गकच्छपा इति मनुरपि श्वाविधं शल्लकं गोधां खड्गकूर्मशशांस्त
था भक्ष्यान्पंचनखेष्वाहुरनुष्ट्रांश्चैकतोदत इति यत्तु पुनर्वसिष्ठेन खड्गे तु विवदंत इत्यभक्ष्यत्वमुक्तं तच्छ्राद्धादन्यत्र खड्गमांसैर्भवेद्दत्तमक्षय्यं पितृ
कर्मणीति श्राद्धफले श्रुतिदर्शनात् तथा मत्स्यानां मध्ये सिंहतुंडादयो भक्ष्याः सिंहतुंडः सिंहमुखः रोहितो लोहितवर्णः पाठीनश्चंद्राख्यः राजीवः पद्मव

भक्ष्याः पंचनखाः सेधागोधाकच्छपशल्लकाः शशश्च मत्स्येष्वपि हि सिंहतुंडकरोहिताः १७६ तथा पाठीनरा
जीवसशल्काश्च द्विजातिभिः अतः शृणुध्वं मांसस्य विधिं भक्षणवर्जने १७७

र्णः सहशल्कैः शुक्त्याकारैर्वर्तत इति सशल्कः
एते च सिंहतुंडादयो नियुक्ता एव भक्ष्याः पाठीनरोहितावाद्यौ नियुक्तौ हव्यकव्ययोः राजीवाः सिंहतुंडाश्च सशल्काश्चैव सर्वश इति मनुस्मरणात्
द्विजातिग्रहणं शूद्रव्युदासार्थं अनर्चितं वृथामांसमित्यारभ्य द्विजातिधर्मानुक्त्वेदानीं चातुर्वर्ण्यधर्मानाह मांसस्य प्रोक्षितादेर्भक्षणे तद्व्यतिरि
क्तस्य वा निषिद्धस्य वर्जने प्रोक्षितादिव्यतिरेकेण मांसं न भक्षयामीत्येवं संकल्परूपेण विधिं सामश्रवःप्रभृतयः हे मुनयः शृणुध्वं १७६ १७७ ७,

तत्रभक्षणेविधिंदर्शयति अन्नाभावेनव्याध्यभिभवेनवामांसभक्षणमंतरेणयदाप्राणबाधाभवतितदामांसंनियमेनभक्षयेत् सर्वतएवात्मा
नंगोपायेदित्यात्मरक्षणविधानात् तस्मादिहनपुरायुषःस्वःकामीप्रेयादितिमरणनिषेधाच्च तथाश्राद्धेमांसंनिमंत्रितोनियमेनभक्षयेत् अभ
क्षणेदोषश्रवणात् यथाविधिनियुक्तस्तुयोमांसंनात्तिमानवः सप्रेत्यपशुतांयातिसंभवानेकविंशतिमितिमनुस्मरणात् प्रोक्षणाख्यश्रौतसं
स्कारसंस्कृतस्यपशोर्यागार्थस्याग्नीषोमीयादेर्हुतावशिष्टंमांसंप्रोक्षितंतद्भक्षयेत् अभक्षणाद्यागानिष्पत्तेः द्विजकाम्ययाब्राह्मणभोजना

प्राणात्ययेतथाश्राद्धेप्रोक्षितंद्विजकाम्यया देवान्पितॄन्समभ्यर्च्यखादन्मांसंनदोषभाक् १७८ वसेत्सनरकेघोरेदि
नानिपशुरोमभिः संमितानिदुराचारोयोहंत्यविधिनापशून् १७९

र्थंदेवपित्रर्थंचयत्साधितंतेनतानभ्यर्च्यावशिष्टंभक्षयन्नदोषभाग्भ
वति एवंभृत्यभरणावशिष्टमपि यज्ञार्थंब्राह्मणैर्वध्याःप्रशस्तामृगपक्षिणः भृत्यानांचैववृत्त्यर्थमगस्त्योह्याचरत्पुरेतिमनुस्मरणात् नदोषभागितिदोषा
भावमात्रंवदता अतिथ्याद्यर्चनावशिष्टस्याभ्यनुज्ञामात्रंनप्रोक्षितादिवन्नियमइतिदर्शितं एवमप्रतिषिद्धानामपिशशादीनांप्राणात्ययादिव्यतिरेकेणा
भक्ष्यत्वावगमात् शूद्रस्यापिमांसप्रतिबद्धसर्वविधिनिषेधाधिकारोवगम्यते १७८ इदानींप्रोक्षितादिव्यतिरिक्तस्यवृथामांसमित्यनेनप्रतिषिद्धस्यभक्षणेनिं 

दार्थवादमाह अविधिनादेवाद्युद्देशमंतरेणयःपशून्हंति सनरःपशोर्यावंतिरोमाणितावंतिदिनानिघोरेनरकेवसेत् हंतीत्यत्रविधोपिघातकोगृह्यते
यथाहमनुः अनुमंताविशसितानिहंताक्रयविक्रयी संस्कर्ताचोपहर्ताचखादकश्चेतिघातकाइति १७९ इदानींवर्जनेविधिमाह यःप्रोक्षितादिव्यतिरे
केणमयामांसंनभक्षितव्यमितिसत्यसंकल्पोभवति ससर्वान्कामान् तत्साधनेप्रवृत्तोनिर्विघ्नंप्राप्नोति विशुद्धाशयत्वात् यथाहमनुः यद्ध्यायतेयत्कु
रुतेरतिंबध्नातियत्रच तदवाप्नोत्यविघ्नेनयोहिनस्तिनकिंचनेति एतच्चानुषंगिकंफलं मुख्यंफलमाह हयमेधफलंतथेति एतच्चसांवत्सरिकसंकल्पस्य
वर्षेवर्षेश्वमेधेनयोयजेतशतंसमाः मांसानिचनखादेद्यस्तयोःपुण्यफलंसममितिमनुस्मरणात् तथागृहेपिनिवसन्ब्राह्मणादिश्चातुर्वर्णिकोमुनिव

सर्वान्कामानवाप्नोतिहयमेधफलंतथा गृहेपिनिवसन्विप्रोमुनिर्मांसविवर्जनात् १८० सौवर्णराजताब्जानामूर्ध्वपात्रग्र
हाश्मनाम् शाकरज्जुमूलफलवासोविदलचर्मणाम् १८१ पात्राणांचमसानांचवारिणाशुद्धिरिष्यते चरुस्रुक्स्रुवसस्ने
हपात्राण्युष्णेनवारिणा १८२

न्माननीयोभवतिमांसस्यत्यागात् एतच्चनप्रतिषिद्धमांसविषयं नापिप्रोक्षितादिविषयं परिशेषादतिथ्याद्य
र्चनावशिष्टाभ्यनुज्ञातविषयमिति इतिभक्ष्याभक्ष्यप्रकरणं १८० इदानींद्रव्यशुद्धिमाह सौवर्णंसुवर्णकृतं राजतंरजतकृतं अब्जंमुक्ताफलशंखशु
क्त्यादि ऊर्ध्वपात्रंयज्ञियोलूखलादि ग्रहादिसाहचर्यात्ग्रहाःषोडशिप्रभृतयः अश्माहषदादिः शाकंवास्तुकादि रज्जुःबल्वजादिनिर्मिता मूलमार्द्र

 

कादि फलमाम्रादि वासोवस्त्रं विदलंवैणवादि चर्मअजादीनां विदलचर्मणोर्ग्रहणंतद्विकाराणांछत्रवरत्रादीनामुपलक्षणार्थं पात्राणिप्रोक्षणी
पात्रप्रभृतीनि चमसाःहोतृचमसादयः एतेषांसौवर्णादीनांलेपरहितानामुच्छिष्टस्पर्शमात्रे वारिणाप्रक्षालनेनशुद्धिः चरुश्चरुस्थाली स्रुक्स्रु
वौप्रसिद्धौ सस्नेहानिपात्राणिप्राशित्रहरण्यादीनि एतानिचलेपरहितान्युष्णेनवारिणाशुध्यंति निर्लेपंकांचनंभांडमद्भिरेवविशुद्ध्यति अब्जमश्म-
मयंचैवराजतंचानुपस्कृतमितिमनुस्मरणात् अनुपस्कृतमखातपूरितं सलेपानांतु तैजसानांमणीनांचसर्वस्याश्ममयस्यच भस्मनाद्भिर्मृदाचैवशु
द्धिरुक्तामनीषिभिरितिमनूक्तंद्रष्टव्यं मृद्भस्मनोरेककार्यत्वाद्विकल्पः आपस्तंबसमुच्चीयंते काकादिमुखोपघातेतु कृष्णशकुनिमुखावघृष्टंपात्रंनिर्लि
खेत् श्वापदमुखावमृष्टंपात्रंनप्रयुंजीतेतिद्रष्टव्यं एतच्चमार्जारादन्यत्र मार्जारश्चैवदर्वीचमारुतश्चसदाशुचिरितिमनुस्मरणात् १८१ १८२ स्फ्योवज्र

स्फ्यशूर्पाजिनधान्यानांमुसलोलूखलानसाम् प्रोक्षणंसंहतानांच बहूनांधान्यवाससाम् १८३

यज्ञांगं अनःशकटं शेषंप्रसिद्धं एतेषामुष्णेनवारिणाशुद्धिः पुनरजिनग्रहणं यज्ञांगाजिनप्राप्त्यर्थं संहतानामुक्तविशुद्धिद्रव्यालब्धावयविनांबहू-
नांधान्यानांवाससांच वासोग्रहणमुक्तशुद्धीनामुपलक्षणार्थं उक्तशुद्धीनांधान्यवासःप्रभृतीनांबहूनांराशीकृतानांप्रोक्षणेनैवशुद्धिः बहुत्वंचस्पृष्टापे ३९
क्षया एतदुक्तंभवति यदाधान्यानिवस्त्रादीनिवाराशीकृतानि तत्रचांडालादिस्पृष्टान्यल्पानिबहूनिवास्पृष्टानि तत्रस्पृष्टानामुक्तैवशुद्धिरितरेषांप्रो

क्षणमिति तथाचस्मृत्यंतरं वस्त्रधान्यादिराशीनामेकदेशस्य दूषणात् तावन्मात्रंसमुद्धृत्य शेषंप्रोक्षणमर्हतीति यदापुनःस्पृष्टानांबहुत्वंअस्पृष्टा
नांचाल्पत्वंतदासर्वेषामेवक्षालनं यथाहमनुः अद्भिस्तुप्रोक्षणंशौचंबहूनांधान्यवाससां प्रक्षालनेनत्वल्पानामद्भिःशौचंविधीयतेइति स्पृष्टानाम
स्पृष्टानांचसमत्वेपिप्रोक्षणमेव बहूनांप्रोक्षणविधानेनाल्पानांक्षालनेनशुद्धिः पुनरल्पानांक्षालनवचनस्यसमेषु क्षालनवचननिवृत्त्यर्थत्वात् इयत्स्पृ
ष्टमियदस्पृष्टमित्यविवेकेतुक्षालनमेव पाक्षिकस्यापिदोषस्यपरिहर्त्तव्यत्वात् अनेकपुरुषोद्धार्यमाणानांतुधान्यवासःप्रभृतीनांस्पृष्टानामस्पृ
ष्टानांचप्रोक्षणमेवेतिनिबंधकृतः १८३ निर्लेपानांस्पर्शमात्रदुष्टानांशुद्धिमुक्त्वेदानीं सलेपानांशुद्धिमाह दारूणांमेषमहिषादिशृंगाणांकरिवाराह

तक्षणंदारुशृंगास्थ्नांगोवालैःफलसंभुवाम् मार्जनंयज्ञपात्राणांपाणिनायज्ञकर्मणि १८४

शंखाद्यस्थ्नां अस्थिग्रहणे
नदंतानामपिग्रहणं उच्छिष्टस्नेहादिभिर्लिप्तानांमृद्भस्मोदकादिभिरनपगतलेपानां यावन्नापैत्यमेध्याक्तोगंधोलेपश्चतत्कृतः तावन्मृद्वारिवादेयंस
र्वासुद्रव्यशुद्धिष्विति सामान्यशुद्धिविधानात् तक्षणंतावन्मात्रावयवापनयनंशुद्धिः फलसंभुवांबिल्वालाबुनारिकेलादिफलसंभूतानांपात्राणांगोवा
लैरुद्घर्षणाच्छुद्धिः यज्ञपात्राणांस्रुक्स्रुवादीनांयज्ञकर्मणिप्रयुज्यमानानांदक्षिणेनहस्तेनदर्भैर्दशापवित्रेणवायथाशास्त्रंकर्मांगतयामार्जनंकर्त्त
व्यं एतच्चश्रौतमुदाहरणं अन्येषामपिसौवर्णादीनांपात्राणांस्मार्त्तलौकिककर्मसुकृतशौचानामेवांगत्वमितिदर्शयितुं यज्ञांगानांपुनःकृतशौचानामपिदर्द
शापवित्रादिमार्जनंसंस्कारार्थमितिशेषः १८४

इदानींसलेपानामेवकेषांचिल्लेपापकर्षणेविशेषहेतूनाह उखरमृत्तिकासहितेनगोमूत्रेणोदकेनवालेपापेक्षया आविकमूर्णामयंकौशिकंकोश प्रभवंतसरीपट्टादि प्रक्षालितंशुध्यति उदकगोमूत्रैरितिबहुवचनपश्चादुदकप्राप्त्यर्थं अंशुपट्टंवल्कलतंतुकृतं सश्रीफलैः बिल्वफलसहितैःकुत पः पार्वतीयच्छागरोमनिर्मितकंबलः अरिष्टफलसहितैः फेनसहितैः उदकगोमूत्रैः शुध्यतीत्यनुवर्त्तते एतच्चोच्छिष्टस्नेहादियोगेसतिवेदितव्यं अल्पोपघातेतुप्रोक्षणादि क्षालनासहत्वात् सर्वत्रद्रव्याविनाशेनैवशुद्धेरिष्टत्वात् तथाचदेवलः ऊर्णकौशेयकुतपपट्टक्षौमदुकूलजाः अल्पा

सोखैरुदकगोमूत्रैःशुध्यत्याविककौशिकम् सश्रीफलैरंशुपट्टंसारिष्टैःकुतपंतथा १८५

शौचाभवंत्येते शोषणप्रोक्षणादिभिरिति अ-
भिधायाह तान्येवामेध्ययुक्तानिक्षालयेच्छोधनैःस्वकैः धान्यकल्कैस्तुफलजैरसैःक्षारानुगैरपीति क्षौमवदेवशाणस्य समानयोगत्वात् ऊर्णादिग्रह णंतदारब्धतूलिकादिप्राप्त्यर्थं अथतस्याल्पोपघातेनैवक्षालनंकार्यं अमेध्यलेपादन्यत्र तूलिकांसुपधानंचपुष्परक्तांबरंतथा शोषयित्वातपेकिंचि त्करैःसंमार्जयेन्मुहुः पश्चाच्चवारिणाप्रोक्ष्यविनियुंजीतकर्मणि तान्यप्यतिमलिष्ठानियथावत्परिशोधयेदितिदेवलस्मरणात् पुष्परक्तानिकुंकुमकुसुं भादिरक्तानि पुष्परक्तग्रहणमन्यस्यापिहरिद्रादिरक्तस्यक्षालनासहस्यप्राप्त्यर्थं नमांजिष्ठादेः तस्यक्षालनसहत्वात् शंखेनाप्युक्तं रागद्रव्याणिप्रोक्षि तानिशुचीनीति १८५

गौरसर्षपसहितैरुदकगोमूत्रैः क्षौमं क्षुमा अतसीतत्सूत्रनिर्मितंक्षौमंशुध्यति पुनःपाकेनचमृन्मयंघटादि एतच्चोच्छिष्टस्नेहलेपेवेदितव्यं मद्यमूत्रपुरीषैश्चश्लेष्मपूयाश्रुशोणितैः संस्पृष्टंनैवशुध्येतपुनःपाकेनमृन्मयमितिस्मरणात् चांडालाद्युपघातेतुत्यागएव यथाह पराशरः चांडा लाद्यैस्तुसंस्पृष्टंधान्यंवस्त्रमथापिवा प्रक्षालनेनशुध्येतपरित्यागान्महीमयमिति कारवोरजकचैलधावकसूपकाराद्यास्तेषांहस्तःसदाशुचिः शुचित्वंतत्साध्येकर्मणिवस्त्रधावनादौसूतकादिसंभवेपि तथाचस्मृत्यंतरे कारवःशिल्पिनोवैद्यादासीदासास्तथैवच राजानोराजभृत्याश्चसद्यःशौ-

सगौरसर्षपैःक्षौमंपुनःपाकान्महीमयम् कारुहस्तःशुचिःपण्यंभैक्ष्यंयोषिन्मुखंतथा १८६ भूशुद्धिर्मा
र्जनाद्दाहात्कालाद्गोक्रमणात्तथा सेकादुल्लेखनाल्लेपाद्गृहंमार्जनलेपनात् १८७

चाःप्रकीर्त्तिताइति पण्यंपणार्हंविक्रेयंयवव्री
ह्यादि अनेकक्रेतृजनकरपरिघट्टितमप्यप्रयतंनभवति सूतकादिनिमित्तेनचवणिजां भिक्षाणांसमूहोभैक्ष्यंतत्ब्रह्मचर्यादिगतंअनाचांतरथ्याप्रदाना दिनाऽशुचिरथ्यादिक्रमणादिनापिनदुष्यति तथायोषिन्मुखंसंभोगकालेशुचि स्त्रियश्चरतिसंसर्गइतिस्मरणात् १८६ इदानींभूशुद्धिमाह मार्जन्यापांसु तृणादीनांप्रोत्सारणंमार्जनं दाहस्तृणकाष्ठाद्यैः कालोयावताकालेनलेपादिक्षयोभवतितावान् गोक्रमणंगवांपादपरिघट्टनं सेकः क्षीरगोमूत्रगोमयवारि

भिः प्रवर्षणं वा उल्लेखनं तक्षणं खननं वा लेपो गोमयादिभिः एतैः समस्तैर्व्यस्तैर्वा मार्जनादिभिरमेध्यादुष्टा मलिना च भूमिः शुध्यति तथा च देवलः यत्र प्रसूयते नारी म्रियते दह्यतेपि वा चांडालाध्युषितं यत्र यत्र विष्ठादिसंगतिः एवं कश्मलभूयिष्ठा भूरमेध्या प्रकीर्तिता श्वसूकरखरोष्ट्रादिसंस्पृष्टा दुष्टतां व्रजेत् अंगारतुषकेशास्थिभस्माद्यैर्मलिना भवेदिति अमेध्यादुष्टामलिनेति शोध्यभूमेस्त्रैविध्यमभिधाय शुद्धिविभागं दर्शयति पंचधा वा चतुर्धा वा भूरमेध्यापि शुध्यति दुष्टा त्रिधा द्विधा शुध्यते मलिनैकधेति यत्र मनुष्या दह्यंते यत्र चांडालैरध्युषितं तयोः पंचभिः दहनकालगोक्रमणसेकोल्लेखनैः शुद्धिः यत्र मनुष्या जायंते यत्र च म्रियंते यत्र चात्यंतं विष्ठादिसंगतिः तासां दाहवर्जितैस्तैरेव चतुर्भिः श्वसूकरखरैश्चिरकालमध्युषितायाः गोक्रमणसेकोल्लेख-

गोघ्रातेन्नेन तथा केशमक्षिकाकीटदूषिते सलिलं भस्म मृद्वापि प्रक्षेप्तव्यं विशुद्धये १८८

नैस्त्रिभिः उष्ट्रग्रामकुक्कुटादिभिश्चिरकालमधिवासितायाः सेकोल्लेखनाभ्यां शुद्धिः अंगारतुषादिभिश्चिरकालमधिवासिताया उल्लेखनेन शुद्धिः मार्जनानुलेपने तु सर्वत्र समुच्चीयेते एवं गृहं मार्जनलेपनाभ्यां शुध्यति गृहस्य पृथगुपादानं संमार्जनलेपयोः प्रतिदिवसं प्राप्त्यर्थं १८७ गोघ्राते गोनिश्वासोपहतेन्ने अदनीयमात्रे तथा केशमक्षिकाकीटदूषिते केशग्रहणं लोमादिप्राप्त्यर्थं कीटाः पिपीलिकादयः उदकं भस्म मृद्वा यथासंभवं प्रक्षेप्तव्यं शुध्यर्थं यत्तु गौतमेनोक्तं नित्यमभोज्यं केशकीटावपन्नमिति तत्केशकीटादिभिः सहपक्वं तद्विषयम् १८८ ७ ७ ७ ७ ७ 

---

त्रपुप्रभृतीनि प्रसिद्धानि तेषां क्षारोदकेनाम्लोदकेन वारिणा चोपघातापेक्षया समस्तैर्व्यस्तैर्वा शुद्धिः कार्या कांस्यलोहानां भस्मोदकेन ताम्रग्रहणादीतिकारत्तलोहयोर्ग्रहणं एकयोनित्वात् एतच्च ताम्रादीनामम्लोदकादिभिः शुद्ध्यभिधानं न नियमार्थं मलसंयोगजं तज्जं यस्य येनोपहन्यते तस्य तच्छोधनं प्रोक्तं सामान्यं द्रव्यशुद्धिकृदित्यविशेषेण स्मरणात् अतो न ताम्रादेरुच्छिष्टोदकादिलेपस्यान्येनापगमसंभवे नियमेनाम्लोदकादिना शुद्धिः कार्या अत एव मनुना सामान्येनोक्तं ताम्रायः कांस्यरैत्यानां त्रपुणः सीसकस्य च शौचं यथार्हं कर्त्तव्यं क्षाराम्लोदकवारिभिरिति यत्तु भस्मना शुध्यते कांस्यं ताम्रमम्लेन शुध्यतीति तत्ताम्रादेः शौचस्य परां काष्ठां प्रतिपादयितुं नान्यस्य निषेधाय यदा तूपघातातिशयस्तदाम्लोदकादीनामावृत्तिः गवाघ्राता-

त्रपुसीसकताम्राणां क्षाराम्लोदकवारिभिः भस्माद्भिः कांस्यलोहानां शुद्धिः प्लावो द्रवस्य तु १८९

नि कांस्यानि शूद्रोच्छिष्टानि यानि च शुध्यंति दशभिः क्षारैः श्वकाकोपहतानि चेति स्मरणात् शुद्धिः प्लावो द्रवस्य त्विति द्रवस्य द्रवद्रव्यस्य घृतादेः प्रस्थप्रमाणाधिकस्य श्वकाकाद्युपहतस्य अमेध्यसंस्पृष्टस्य च प्लावः प्लावनं समानजातीयेन द्रवद्रव्येण भांडस्यातिपूरणं यावन्निःसरणं शुद्धिरित्यनुवर्त्तते ततोल्पस्य त्यागः बह्वल्पत्वं च देशाद्यपेक्षया कालाद्यपेक्षया वेदितव्यं यथाह बौधायनः देशं कालं तथात्मानं द्रव्यं द्रव्यप्रयोजनं उपपत्तिमवस्थां च ज्ञात्वा शौचं प्रकल्पयेदिति कीटाद्युपहतस्य तु उत्सवनं यथाह मनुः द्रवाणां चैव सर्वेषां शुद्धिरुत्प्लवनं स्मृतमिति उत्प्लवनं चात्र वस्त्रांतरिते पात्रे प्रक्षेपः अन्य

थकोत्ताद्यपगमस्यासंभवात् शूद्रभांडस्थितस्यमधूदकादेः पात्रांतरानयनाच्छुद्धिः मधूदके पयस्तद्विकारश्च पात्रात्पात्रांतरानयने शुध्यंतीति बौधा
यनस्मरणात् मधुघृतादेर्वर्णापसदहस्तात्प्राप्तस्य पात्रांतरानयनंपुनः पचनंचकार्यं यथाह शंखः अभ्यवहार्याणांघृतेनाभिघारितानांपुनः पचनंएवंस्ने
हानांस्नेहवद्रसानामिति १८९ एवंसौवर्णराजतादीनांएतत्प्रकरणप्रतिपादितानांसर्वेषांशुद्धिरुक्तास्नेहाद्युपघाते शुद्धिमुक्त्वेदानींतेषामेवामेध्योपहता
नांशुद्धिमाह अमेध्याःशरीरजामज्जावसाशुक्रादयः वसाशुक्रमसृङ्मज्जामूत्रविट्कर्णविड्नखाः श्लेष्माश्रुदूषिकास्वेदोद्वादशैतेनृणांमलाः तथा
मानुषास्थिशवंविष्ठारेतोमूत्रार्त्तवंवसा स्वेदोश्रुदूषिकाश्लेष्ममद्यंचामेध्यमुच्यतेइति मनुदेवलादिभिःप्रतिपादिताः तैर्वसादिभिरक्तंलिप्तं अमेध्या-

अमेध्याक्तस्यमृत्तोयैः शुद्धिर्गंधादिकर्षणात्

क्तंतस्यमृदातोयेनशुद्धिःकर्त्तव्या गंधापकर्षणेन आदिग्रहणाल्लेपस्यापिग्रहणं यथाहगौतमः लेपगंधापकर्षणैः शौचममेध्यलिप्तस्येति सर्व
शुद्धिषुच प्रथमंमृत्तोयैरेवलेपगंधापकर्षणंकार्यं अशक्तावन्येन तदद्भिःपूर्वंमृदाचेतिगौतमस्मरणात् वसादिग्रहणंचसर्वेषाममेध्यत्वंप्रतिपाद
यितुं नसमानोपघाताय मद्यैर्मूत्रपुरीषैर्वाश्लेष्मपूयाश्रुशोणितैः संस्पृष्टंनैवशुध्येतपुनःपाकेनमृन्मयमित्युपघातेविशेषाभिधानात् अमेध्यत्वंचै ४२
वमेषां देहाच्चैवमलाश्च्युताइतिवचनाद्देहच्युतानामेव नस्वस्थानावस्थितानां पुरुषस्यनाभेरूर्ध्वंकरव्यतिरिक्तांगानामन्यामेध्यस्पर्शेस्नानं यथा

हदेवलः मानुषास्थिवसांविष्ठामार्त्तवंमूत्ररेतसी मज्जानंशोणितंस्पृष्ट्वापरस्यस्नानमाचरेदिति तान्येवस्वानिसंस्पृश्यप्रक्षाल्याचम्यशुध्यतीति
तथाऊर्ध्वंनाभेःकरौमुक्त्वायदंगमुपहन्यते तत्रस्नानमधस्तात्तुप्रक्षाल्याचम्यशुध्यतीति कृतेपियथोक्तशौचेमनसोपरितोषाद्यत्रशुद्धिसंदेहो
भवतितद्वाक्शस्तंशुचि शुद्धमेतदस्त्वितिब्राह्मणवचनेनशुद्धंभवतीत्यर्थः अंबुनिर्णिक्तंयत्रप्रतिपादिताशुद्धिर्नास्तितस्यप्रक्षालनेनशुद्धिः प्र-
क्षालनासहस्यप्रोक्षणेन अज्ञातंचसदायत्काकाद्युपहतमुपयुक्तंनकदाचिदपिज्ञायतेतच्छुचितदुपयोगाददृष्टदोषोनास्तीत्यर्थः ननुतद्विरुध्य

वाक्शस्तमंबुनिर्णिक्तमज्ञातंचसदाशुचि १९० शुचिगोतृप्तिकृत्तोयंप्रकृतिस्थंमहीगतम्
तथामांसंश्वचांडालक्रव्यादादिनिपातितम् १९१

ते संवत्सरस्यैकमपिचरेत्कृच्छ्रंद्विजोत्तमः अज्ञातभुक्तशुद्ध्य-
र्थंज्ञातस्यतुविशेषतइत्यदृष्टदोषेपिप्रायश्चित्तप्रतिपादनात् नैतत्प्रायश्चित्तस्यजग्धिविषयत्वात् दोषाभावस्यचान्योपयोगविषयत्वात्
१९० महीगतंभूमिस्थमुदकंएकगवीतृप्तिजननसमर्थंचांडालादिभिरस्पृष्टंप्रकृतिस्थंरूपरसगंधस्पर्शांतरमनापन्नंशुचि आचमनादि-
योग्यंभवति महीगतमित्यशुद्धभूगतस्याशुचित्वनिषेधार्थं नत्वांतरिक्षोदकस्यशुद्धत्वव्यावृत्त्यर्थं नाप्युत्सृतस्य उद्धृताश्चापि शुध्यंतिशुद्धैःपात्रैः
समुद्धृताः एकरात्रोषिता आपस्त्याज्याःशुद्रा अपिस्वयमितिदेवलवचनात् तथाचांडालादिकृतेतडागादौनदोषः अंत्यैरपिकृतेकूपेसेतौवाप्यादि

केतथा तत्रस्नात्वाच पीत्वाच प्रायश्चित्तंनविद्यतेइतिशातातपस्मरणात् तथामांसंश्वचांडालक्रव्यादादिभिर्निपातितंशुचि आदिग्रहणात्पुल्क सादेरपिग्रहणं निपातितमितिग्रहणंभक्षितस्यनिराकरणार्थं १९१ रश्मयः सूर्यादेःप्रकाशकद्रव्यस्य अग्निःप्रसिद्धः रजः अजादिसंबंधव्यतिरेके ण तत्रश्वकाकोष्ट्रखरोलूकसूकरग्राम्यपक्षिणां अजाविरेणुसंस्पर्शादायुर्लक्ष्मीश्चहीयतेइतिदोषश्रवणात् संमार्जनादिकार्ये छायावृक्षादेः गौः अश्वः वसुधाभूमिः अनिलोवायुः विप्रुषोऽवश्यायबिंदवः मुखजानांवक्ष्यमाणत्वात् मक्षिकाश्च एतेचांडालादिस्पृष्टाअपिस्पर्शेशुचयः वत्सः

रश्मिरग्नीरजश्छायागौरश्वोवसुधानिलः विप्रुषोमक्षिकास्पर्शेवत्सःप्रस्नवनेशुचिः १९२
अजाश्वयोर्मुखंमेध्यंनगोर्ननरजामलाः पंथानश्चविशुद्ध्यंतिसोमसूर्यांशुमारुतैः १९३

प्रस्नवने ऊधोगतदुग्धापकर्षणेशुचिः वत्सग्रहणं बालस्योपलक्षणार्थं बालैरनुपरिक्रांतंस्त्रीभिराचरितंचयत् अविज्ञातंचयत्किंचिन्नित्यंमेध्य मितिस्थितिरितिवचनात् १९२ अजाश्वयोर्मुखंमेध्यं नगोः ननरजामलाः नरशब्दोलक्षणयादेहमभिधत्ते तज्जामलावसादयोनमेध्याभवंति पंथा ४३
नोमार्गाश्चांडालादिभिःस्पृष्टाअपिरात्रौसोमांशुभिर्मारुतेनचशुध्यंति दिवासूर्यांशुभिर्मारुतेनच १९३ ७ ७ ७ ७

मुखेजातामुखजाः श्लेष्मविप्रुषोमेध्यानोच्छिष्टंकुर्वंति अनिपातिताश्चेदंगे नमुख्या विप्रुषउच्छिष्टंकुर्वंतिनचेदंगेनिपतंतीति गौतमवचनात् तथा ये आचमनतोयबिंदवःपादौस्पृशंतितेमेध्याः श्मश्रुचास्यगतंमुखप्रविष्टंउच्छिष्टंनकरोति दंतसक्तंचान्नादिकंस्वयमेवच्युतंस्यक्त्वाशुचिर्भवति अच्यु तंदंतसमं तथाच गौतमः दंतश्लिष्टंतुदंतवदन्यत्रजिह्वाभिमर्शनात्प्राक्च्युतेरित्येके च्युतेष्वास्रावविद्याान्निगिरन्नेवतच्छुचिरिति निगिरणंपुनरने- नयाज्ञवल्क्योक्तेनत्यागेनविकल्प्यते निगिरन्नेवेत्येवकारः चर्वणेत्वाचमेन्नित्यंमुक्त्वातांबूलचर्वणं ओष्ठौविलोमकौस्पृष्ट्वावासोविपरिधायचेतिवि

मुखजाविप्रुषोमेध्यास्तथाचमनबिंदवः श्मश्रुचास्यगतंदंतसक्तंत्यक्त्वाततःशुचिः १९४ स्नात्वापीत्वाक्षुतेस्व प्ने भुक्त्वारथ्योपसर्पणे आचांतःपुनराचामेद्वासोविपरिधायच १९५

ष्ण्यूक्ताचमननिषेधार्थः तांबूलग्रहणंफलाद्युपल क्षणार्थं यथाहशातातपः तांबूलेचफलेचैव भुक्तेस्नेहावशिष्टके दंतलग्नस्यसंस्पर्शेनोच्छिष्टोभवतिद्विजइति १९४ स्नानपानक्षुतस्वप्नभोजनरथ्यो पसर्पणवासोविपरिधानेषुकृतेष्वाचांतःपुनराचामेत् द्विराचमेदित्यर्थः चकाराद्रोदनाध्ययनारंभात्वानृतोक्त्यादिषु तथाचवसिष्ठः सुप्त्वाभुक्त्वाक्षुत्वा स्नात्वापीत्वारुदित्वाचाचांतःपुनराचामेदिति मनुरपि सुप्त्वाक्षुत्वाचभुक्त्वाचष्ठीवित्वोक्त्वानृतंवचः पीत्वापोध्येष्यमाणस्य आचामेत्प्रयतोपिसन्नि- ति भोजनेत्वादावपिद्विराचमनं भोक्ष्यमाणस्तुप्रयतोपिद्विराचामेदित्यापस्तंबस्मरणात् स्नानपानयोरादौसकृत् अध्ययनेत्वारंभेद्विः शेषेष्वंतेएवयथोक्तं द्विराचमनं १९५

रथ्यामार्गमात्रं कर्दमः पंकः तोयमुदकं रथ्यास्थितानि कर्दमतोयानि अंत्यैश्चांडालादिभिः श्वभिर्वायसैश्च स्पृष्टानि मारुतेनैव शुध्यंति शुद्धिमुपयांति
बहुवचनं तद्गतगोमयशर्करादिग्रहणार्थं पक्केष्टकादिभिश्चितानि धवलगृहादीनि चांडालादिस्पृष्टानि मारुतेनैव शुध्यंति एतच्च प्रोक्षणसंहतानामित्यक्त
प्रोक्षणनिषेधार्थं तृणकाष्ठपर्णादिमयानां तु प्रोक्षणमेवेति इति द्रव्यशुद्धिप्रकरणं १९६ इदानीं दानधर्मं प्रतिपादयिष्यंस्तदंगभूतपात्रप्रतिपादनार्थं
तत्प्रशंसामाह ब्रह्मा हिरण्यगर्भः कल्पादौ तपस्तप्त्वा ध्यानं कृत्वा कान्मुख्यान् सृजामीति पूर्वं ब्राह्मणान् सृष्टवान् किमर्थं वेदगुप्तये वेदरक्षणार्थं पितृ

**रथ्याकर्दमतोयानि स्पृष्टान्यंत्यश्ववायसैः मारुतेनैव शुध्यंति पक्केष्टकचितानि च १९६ तपस्तप्त्वासृजद्ब्रह्मा ब्राह्मणान्वेदगुप्तये तृप्त्यर्थं पितृदेवानां धर्मसंरक्षणाय च १९७ सर्वस्य प्रभवो विप्राः श्रुताध्ययनशालिनः तेभ्यः क्रियापराः श्रेष्ठास्तेभ्योप्यध्यात्मवित्तमाः १९८**

णां देवानां च तृप्त्यर्थं अनुष्ठानोपदेशद्वारेण धर्मरक्षणार्थं च अतस्तेभ्यो दत्तमक्षय्यफलं भवतीत्यभिप्रायः १९७ सर्वस्य
क्षत्रियादेर्विप्राः प्रभवः श्रेष्ठा जात्या कर्मणा च ब्राह्मणेष्वपि श्रुताध्ययनशालिनः श्रुताध्ययनसंपन्ना उत्कृष्टाः तेभ्योपि क्रियापराः विहितानुष्ठानशीलाः ते
भ्योप्यध्यात्मवित्तमाः वक्ष्यमाणमार्गेण शमदमादियोगेनात्मतत्त्वज्ञाननिरताः श्रेष्ठा इत्यनुषज्जते १९८ छ छ छ ४४

एवं जातिविद्यानुष्ठानतपसां प्रशंसामुखेनैकैकयोगेन पात्रतामभिधायाधुना तेषां समुच्चये संपूर्णपात्रतामाह केवलया विद्यया श्रुताध्ययनसंपत्त्या नै
व संपूर्णपात्रत्वं नापि केवलेन तपसा शमदमादिना अपिशब्दात्केवलानुष्ठानेन केवलजात्या वा नैव संपूर्णपात्रता कथं तर्हि यत्र पुरुषे वृत्तमनुष्ठानं इ-
मे चोभे विद्यातपसी स्तः चशब्दाद्ब्राह्मणजातिश्च तदेव मन्वादिभिः संपूर्णपात्रं प्रकीर्तितं हि यस्मादतः परमुत्कृष्टपात्रं नास्ति अत्र जातिविद्यानुष्ठानत
पः समुच्चयानामुत्तरोत्तरप्राशस्त्येन फलतारतम्यं द्रष्टव्यं १९९ पूर्वोक्ते पात्रे गवादिकमर्चितं शास्त्रोक्तोदकदानादीतिकर्तव्यतासहितं देयं अपात्रे क्षत्रि

**न विद्यया केवलया तपसा वापि पात्रता यत्र वृत्तमिमे चोभे तद्धि पात्रं प्रकीर्तितम् १९९ गोभूतिलहिरण्यादि पात्रे दातव्यमर्चितम् नापात्रे विदुषा किंचिदात्मनः श्रेय इच्छता २००**

यादौ ब्राह्मणे च पतितादौ विदुषा पात्रविशेषेण फलविशेषं जानता श्रेयः संपूर्णमि
च्छता किंचिदल्पमपि न दातव्यं श्रेयोग्रहणादपात्रदानेपि किमपि तामसं फलमस्तीति सूचितं यथाह कृष्णद्वैपायनः अदेशकाले यद्दानमपात्रेभ्यश्च
दीयते असत्कृतमवज्ञातं तत्तामसमुदाहृतमिति अपात्रे न दातव्यमिति वदता विशिष्टदेशकालद्रव्यसन्निधौ पात्रस्यासंनिधाने द्रव्यस्य वा तदुद्देशे
न त्यागं तस्मै प्रतिश्रवणं वा कृत्वा समर्पयेत् नापात्रे दातव्यमिति सूचितम् तथा प्रतिश्रुतमपि पश्चात्पातकादिसंयोगज्ञानेन देयं प्रतिश्रुत्याप्यधर्मसं-
युक्ताय न दद्यादिति निषेधात् २०० छ छ छ छ छ

अपात्रे दातुर्निषेधमुक्त्वा प्रतिग्रहीतारं प्रत्याह विद्यातपोभ्यां हीनेन प्रतिग्रहः सुवर्णादिर्न ग्राह्यः यस्माद्विद्यादिहीनः प्रतिगृण्हन् दातारमात्मानं चाधो नरकं नयति शापयतीति २०१ गवादि पात्रे दातव्यमित्युक्तं तत्र विशेषमाह प्रतिदिवसं शक्त्यनुसारेण यथोक्तविधिना पात्रे गवादिकं स्वकुटुंबाविरोधेन दातव्यं निमित्तेषु चंद्रोपरागादिषु विशेषतोधिकं यत्नेन दातव्यं याचितेनापि श्रद्धापूतं अनसूयापवित्री कृतं शक्त्या दातव्यं याचितेनापि दातव्यमिति वदता यथोक्तं पात्रं स्वयमेव गत्वा आहूय वा यद्दानं तन्महाफलमुक्तं तथा च स्मरणं गत्वा यद्दीयते दानं तदनंतफलं स्मृतम् सहस्रगुणमाहूय याचिते तु

विद्यातपोभ्यां हीनेन न तु ग्राह्यः प्रतिग्रहः गृण्हन्प्रदातारमधो नयत्यात्मानमेव च २०१ दातव्यं प्रत्यहं पात्रे
निमित्ते तु विशेषतः याचितेनापि दातव्यं श्रद्धापूतं तु शक्तितः २०२ हेमशृंगी शफै रौप्यैः सुशीला वस्त्रसंयुता
सकांस्यपात्रा दातव्या क्षीरिणी गौः सदक्षिणा २०३ दातास्याः स्वर्गमाप्नोति वत्सरान् रोमसंमितान् कपिला
चेत्तारयति भूयश्चासप्तमं कुलम् २०४

तदर्धकमिति २०२ गवादिकं देयमित्युक्तं तत्र गोदाने विशेषमाह हेममये शृंगे यस्याः सा हेमशृंगी श
फैः रौप्यैः राजतैः खुरैः संयुता वस्त्रेण च संयुता कांस्यपात्रसहिता बहुक्षीरा गौर्यथाशक्ति दक्षिणासहिता दातव्या २०३ गोदानफलमाह अस्या गोः रोमसंमि ४५
तान् रोमसंख्याकान् वत्सरान् स्वर्गमाप्नोति दाता सा यदि कपिला न दानं केवलं दातारं तारयति किंतु कुलमपि आसप्तमं सप्तममभिव्याप्य पित्रादीन् षट् आत्मानं
च सप्तमं अप्यर्थे भूयः शब्दः २०४

सवत्सा रोमतुल्यानि वत्सेन सह वर्त्तत इति सवत्सा तस्या रोमतुल्यानि वत्सस्य गोश्च यावंति रोमाणि तावत्संख्याकानि युगानि कृतत्रेतादीनि उभयतोमुखीं द
दत्स्वर्गमाप्नोति अनुभवति पूर्वेण विधिना चेत् २०५ का पुनरुभयतोमुखी कथं वा तद्दानं महाफलमित्यत आह गर्भान्निर्गच्छतो वत्सस्य द्वौ पादौ मुखं च
यावत्कालं योन्यां दृश्यते तावत्कालं उभयतोमुखमस्या अस्तीत्युभयतोमुखी यावत्कालं गर्भं न मुंचति तावत्सा गौः पृथिवी समा ज्ञेया अतः फलातिशयो युक्तः
२०६ यथाकथंचिद्धेमशृंगाद्यसंभवेपि यथासंभवं पूर्वोक्तेन विधिना धेनुं दोग्ध्रीं अधेनुं वा अवंध्यां अरोगां रोगरहितां अपरिक्लिष्टां अत्यंतादुर्बलांगां दत्वा दाता

सवत्सारोमतुल्यानि युगान्युभयतोमुखीं दातास्याः स्वर्गमाप्नोति पूर्वेण विधिना ददत् २०५ यावद्वत्सस्य पादौ द्वौ मुखं
योन्यां च दृश्यते तावद्गौः पृथिवी ज्ञेया यावद्गर्भं न मुंचति २०६ यथाकथंचिद्दत्वा गां धेनुं वाधेनुमेव वा अरोगामपरिक्लि
ष्टां दाता स्वर्गे महीयते २०७ श्रांतसंवाहनं रोगिपरिचर्या सुरार्चनम् पादशौचं द्विजोच्छिष्टमार्जनं गोप्रदानवत् २०८

स्वर्गे महीयते पूज्यते २०७ गोदानसमान्याह श्रांतस्यासनशयनादिदानेन श्रमापनयनं श्रांतसंवाहनम् रोगिणां परिचर्या यथाशक्त्यौषधादिदा
नेन सुरार्चनं हरिहरहिरण्यगर्भादीनां गंधमाल्यादिभिराराधनं पादशौचं द्विजानां समानानामधिकानां च तेषामेवोच्छिष्टस्य संमार्जनम् एतान्य
नंतरोक्तेन गोदानेन समानि २०८

भूःफलप्रदा दीपादेवायतनादिषु प्रतिश्रयः प्रवासिनामाश्रयः निवेशनार्थगार्हस्थ्यार्थंकन्यादीयतेतन्नैवेशिकम् स्वर्णसुवर्णं धुर्योभारसहोब-
लीवर्दः शेषंप्रसिद्धं एतान् भूदीपादीन् दत्वास्वर्गलोकेपूज्यते स्वर्गफलंच भूमिदानादीनांनफलांतरव्युदासार्थं यत्किंचित्कुरुतेपापंज्ञानतोज्ञानतो-
पिवा अपिगोचर्ममात्रेणभूमिदानेनशुध्यति तथा वारिदस्तृप्तिमाप्नोतिसुखमक्षय्यमन्नदः तिलदश्चप्रजामिष्टांदीपदश्चक्षुरुत्तमं वासोदश्चंद्रसालो-
क्यमश्विसालोक्यमश्वदइत्यादिफलांतरश्रवणात् गोचर्मलक्षणंच बृहस्पतिना दर्शितं सप्तहस्तेनदंडेनत्रिंशद्दंडनिवर्त्तनम् दशतान्येवगोचर्म

भूदीपांश्चान्नवस्त्रांभस्तिलसर्पिःप्रतिश्रयान् नैवेशिकंस्वर्णधुर्यंदत्वास्वर्गेमहीयते २०९ गृहधान्याभयोपानच्छ-
त्रमाल्यानुलेपनम् यानंवृक्षंप्रियंशय्यांदत्वात्यंतसुखीभवेत् २१०

दत्वास्वर्गेमहीयते २०९ गृहंप्रसिद्धं धान्यानिचशालिगोधूमा-
दीनि अभयंभीतत्राणं उपानहौ छत्रं माल्यंमल्लिकादेः अनुलेपनंकुंकुमचंदनादि यानंरथादि वृक्षमुपजीव्यमाम्रादिकं प्रियंयद्यस्यप्रियंधर्मा-
द्विकं शय्यांचदत्वात्यंतंअतिशयेनसुखीभवति नचहिरण्यादिकंद्रष्टुंदातुमशक्यत्वाद्धर्मादीनामसंभवः भूमिदानादावपिसमानत्वात् स्मृत्यंतरे-
पिधर्मदानश्रवणात् देवतानांगुरूणांचमातापित्रोस्तथैवचं पुण्यंदेयंप्रयत्नेननापुण्यंचोदितंक्वचित् अपुण्यदानेतदेववर्धते प्रतिग्रहीतुरपि 

---

लोभादिनाप्रवृत्तस्य यःपापमबलंज्ञात्वाप्रतिगृह्णातिदुर्मतिः गर्हिताचरणात्तस्यपापंतावत्समाश्रयेत् समंद्विगुणसाहस्रमानंत्यंचप्रदातृश्रि-
तिस्मरणात् इहचसर्वत्रदेशकालपात्रविशेषाद्देयविशेषाद्दातृविशेषाद्दानेफलंमयाप्रोक्तंहिंसायांतद्देवहीतिप्रतिगृहीतृवृत्तिविशेषाच्चदातृ-
प्रतिग्रहीत्रोःफलतारतम्यंद्रष्टव्यं २१० यस्मात्सर्वधर्ममयंब्रह्मअवबोधकत्वेनतस्मात्तद्दानंसर्वदानेभ्योप्यधिकं अतस्तद्ददध्यापनादिद्वारेणब्र-
ह्मलोकमवाप्नोति अविच्युतंच्युतिर्यथानभवति आभूतसंप्लवंब्रह्मलोकेवतिष्ठतेइत्यर्थः अत्रचब्रह्मदानेपरस्वत्वापादनमात्रंदानंस्वत्वनिवृ-

सर्वधर्ममयंब्रह्मप्रदानेभ्योधिकंयतः तद्ददत्समवाप्नोतिब्रह्मलोकमविच्युतम् २११ प्रतिग्रहसमर्थोपिनादत्तेयः
प्रतिग्रहम् येलोकादानशीलानांसतानाप्नोतिपुष्कलान् २१२ कुशाःशाकंपयोमत्स्यागंधाःपुष्पंदधिक्षितिः मांसं
शय्यासनंधानाःप्रत्याख्येयंनवारिच २१३

त्तेःकर्त्तुमशक्यत्वात् २११ दानात्फलमुक्त्वेदानींदानव्यतिरेकेणापिदानफलावा-
प्तिहेतुमाह यःपात्रभूतोपिप्राप्तंप्रतिग्रहंसुवर्णादिकंनादत्तेनस्वीकरोति असौयद्यत्प्राप्तंनोपादत्तेतत्तद्दानशीलानांयेलोकाःतान्समग्रानाप्नो-
ति २१२ इदानींसर्वप्रतिग्रहनिवृत्तिप्रसंगेऽपवादमाह धानाःभ्रष्टयवाःक्षितिर्मृत्तिका शेषंप्रसिद्धं एतत्कुशादिकंस्वयमुपानीतंनप्रत्याख्येयंचका-
राद्गृहादि शय्यांगृहान्कुशान्गंधानपःपुष्पंमणीन्दधि मत्स्यान्धानाःपयोमांसंशाकंचैवननिर्णुदेत् तथागंधोदकंमूलफलमन्नमभ्युद्यतंचयत् सर्वतः
प्रतिगृह्णीयान्मध्वाज्याभयदक्षिणामितिमनुस्मरणात् २१३

किमितिनप्रत्याख्येयमित्याह यद्यस्मादयाचितमेतत्कुशाद्याहृतंदुष्कृतकारिणोपिसंबंधिग्राह्यं किमुतयथोक्तकारिणः तस्मान्नप्रत्याख्येयं अन्यत्रकुलटाषंढपतितेभ्यःशत्रोश्च कुलमटंतीतिकुलटाः स्वैरिण्यादिकाः षंढस्तृतीयाप्रकृतिः २१४ प्रतिग्रहनिवृत्तेरपवादांतरमाह देवतातिथ्यर्चनादेरावश्यकत्वात्तदर्थमनात्मकारणात् पतितादत्यंतकुत्सितवर्जंसर्वतःप्रतिगृण्हीयात् गुरवोमातापित्रादयः भृत्याभरणीयाः भार्यापुत्रादयः इतिदानधर्मप्रकरणम् २१५ इदानींश्राद्धप्रकरणमारभ्यते श्राद्धंनामादनीयस्यतत्स्थानीयस्यवाद्रव्यस्यप्रेतोद्देशेनश्रद्धयात्यागः तच्चद्विविधं पार्वणमेकोद्दिष्टमिति तत्रत्रिपुरुषोद्देशेनयत्क्रियतेतत्पार्वणं एकपुरुषोद्देनक्रियमाणमेकोद्दिष्टं पुनश्चत्रिविधं नित्यंनैमित्तिकंकाम्यंचेति तत्रनित्यं

अयाचिताहृतंग्राह्यमपिदुष्कृतकर्मणः अन्यत्रकुलटाषंढपतितेभ्यस्तथाद्विषः २१४ देवातिथ्यर्चनकृतेगुरुभृत्यार्थमेवच सर्वतःप्रतिगृण्हीयादात्मवृत्त्यर्थमेवच २१५ अमावास्याष्टकावृद्धिःकृष्णपक्षोयनद्वयम् द्रव्यंब्राह्मणसंपत्तिर्विषुवत्सूर्यसंक्रमः २१६

नियतनिमित्तोपाधौचोदितमहरहरमावास्याष्टकादिषु अनियतनियतोपाधौचोदितंनैमित्तिकं यथापुत्रजन्मादिषु फलकामनोपाधौविहितंकाम्यं यथास्वर्गादिकामनायांकृत्तिकादिनक्षत्रेषु पुनश्चपंचविधं अहरहःश्राद्धंपार्वणं वृद्धिश्राद्धमेकोद्दिष्टंसपिंडीकरणंचेति तत्राहरहःश्राद्धं अन्नंपितृमनुष्येभ्यइत्यादिनोक्तं तथाचमनुः दद्यादहरहःश्राद्धमन्नाद्येनोदकेनवा प



योमूलफलैर्वापिपितृभ्यःप्रीतिमावहन्निति अधुनापार्वणंवृद्धिश्राद्धंचदर्शयिष्यंस्तयोःकालानाह यत्रादिनेचंद्रमानदृश्यतेसाअमावास्या तस्यामहर्द्वयव्यापिन्यामपराण्हव्यापिनीग्राह्या अपराण्हःपितृणामितिवचनात् अपराण्हश्चपंचधाविभक्तेदिनेचतुर्थोभागस्त्रिमुहूर्तः अष्टकाश्चतस्रः हेमंतशिशिरयोश्चतुर्णामपरपक्षाणामष्टमीष्वष्टकाइत्याश्वलायनोक्ताः वृद्धिःपुत्रजन्मादि कृष्णपक्षोपरपक्षः अयनद्वयंदक्षिणोत्तरसंज्ञकं द्रव्यंकृष्णसारमांसादिकं ब्राह्मणसंपत्तिर्वक्ष्यमाणा विषुवद्वयंमेषतुलयोःसूर्यगमनं सूर्यसंक्रमः आदित्यस्यराशेःराश्यंतरगमनं अयनविषुवतोःसंक्रांतित्वेसि

व्यतीपातोगजच्छायाग्रहणंचंद्रसूर्ययोः श्राद्धंप्रतिरुचिश्चैवश्राद्धकालाःप्रकीर्त्तिताः २१७

द्धेपिपृथगुपादानंफलातिशयप्रतिपादनार्थं व्यतीपातोयोगविशेषः गजच्छायायदेंदुःपितृदैवत्येहंसश्चैवकरेस्थितः याम्यातिथिर्भवेत्साहिगजच्छायाप्रकीर्त्तितेतिपरिभाषिता हस्तिच्छायेतिकेचित् सेहनगृह्यतेकालप्रक्रमात् ग्रहणंसोमसूर्ययोरुपरागः यदाचकर्त्तुःश्राद्धंप्रतिरुचिर्भवतितदापि चशब्दाद्युगादिप्रभृतयः एतेश्राद्धकालाः यद्यपिचंद्रसूर्यग्रहेनाद्यादितिग्रहणेभोजननिषेधस्तथापिभोक्तुर्दोषोदातुरभ्युदयः २१६ २१७

अहरहः श्राद्धव्यतिरिक्तवक्ष्यमाणचतुर्विधश्राद्धेषु ब्राह्मणसंपत्तिमाह सर्वेषु वेदेषु ऋग्वेदादिषु अनन्यमनस्कतयाप्यस्खलिताध्ययनक्षमा अग्र्याः श्रोत्रियः श्रुताध्ययनसंपन्नः वक्ष्यमाणं ब्रह्म यो वेत्ति असौ ब्रह्मवित् युवा मध्यमवयस्कः सर्वस्येदं विशेषणं मंत्रब्राह्मणयोरर्थं वेत्तीति वेदार्थवित् ज्येष्ठसामेति सामविशेषस्तदध्ययनांगं व्रतं च तद्व्रताचरणेन यस्तदधीते स ज्येष्ठसामा त्रिमधुः ऋग्वेदैकदेशस्तद्व्रतं च तद्व्रताचरणेन तदधीत इति त्रिमधुः त्रिसुपर्णं ऋग्यजुषोरेकदेशस्तद्व्रतं च तद्व्रताचरणेन यस्तदधीते स त्रिसुपर्णिकः एते ब्राह्मणाः श्राद्धसंपद इति वक्ष्यमाणक्रियासंबंधः २१८ स्वस्रीयो भागिनेयः ऋत्विगुक्तलक्षणः जामाता दुहितुर्भर्ता त्रिणाचिकेतं यजुर्वेदैकदेशः तद्व्रतं च तद्व्रताचरणेन यस्तदध्यायी स त्रिणाचिकेतः अन्यत्प्रसिद्धं ए

अग्र्याः सर्वेषु वेदेषु श्रोत्रियो ब्रह्मविद्युवा वेदार्थविज्ज्येष्ठसामा त्रिमधुस्त्रिसुपर्णिकः २१८ स्वस्रीयऋत्विग्जामातृयाज्यश्वशुरमातुलाः त्रिणाचिकेतदौहित्रशिष्यसंबंधिबांधवाः २१९ कर्मनिष्ठास्तपोनिष्ठाः पंचाग्निर्ब्रह्मचारिणः पितृमातृपराश्चैव ब्राह्मणाः श्राद्धसंपदः २२०

ते च पूर्वोक्ताग्र्यश्रोत्रियाद्यभावे वेदितव्याः एष वै प्रथमः कल्पः प्रदाने हव्यकव्ययोः अनुकल्पस्त्वयं प्रोक्तः सदा सद्भिरगर्हित इत्यभिधाय मनुना स्वस्रीयादीनामभिहितत्वात् २१९ कर्मनिष्ठा विहितानुष्ठानपराः तपोनिष्ठास्तपःशीलाः सभ्यावसथ्यौ त्रेताग्नयश्च यस्य संति स पंचाग्निः पंचाग्निविद्याध्यायी च ब्रह्मचारी उपकुर्वाणको नैष्ठिकश्च पितृमातृपरास्तत्पूजापराः चकारात् ज्ञाननिष्ठादयः ब्राह्मणा न क्षत्रियादयः श्राद्धसंपदः श्राद्धेष्वक्षय्यफलसंपत्तिहेतवः २२०



वर्ज्यानाह रोगी महारोगोपसृष्टः हीनमतिरिक्तं वांगं यस्यासौ हीनातिरिक्तांगः एकेनाक्ष्णा यो न पश्यति स काणः एतस्मादेवांधबधिरजिह्मप्रजननखल्वाटदुश्चर्मप्रभृतयो निरस्ताः पुनर्भूरुक्तलक्षणा तस्यां जातः पौनर्भवः अवकीर्णी ब्रह्मचार्येव स्खलितब्रह्मचर्यः कुंडगोलौ परदारेषु जायेते द्वौ सुतौ कुंडगोलकौ पत्यौ जीवति कुंडस्तु मृते भर्तरि गोलक इत्येवमुक्तलक्षणकौ कुनखी संकुचितनखः श्यावदंतकः स्वभावात्कृष्णदशनः एते श्राद्धे निंदिता इति वक्ष्यमाणेन संबंधः २२१ वेतनग्रहणेन यो ध्यापयति स भृतकाध्यापकः वेतनदानेन च यो धीते सोपि क्लीबो नपुंसकः असद्भिः

रोगी हीनातिरिक्तांगः काणः पौनर्भवस्तथा अवकीर्णी कुंडगोलौ कुनखी श्यावदंतकः २२१
भृतकाध्यापकः क्लीबः कन्यादूष्यभिशस्तकः मित्रध्रुक्पिशुनः सोमविक्रयी परिविंदकः २२२

सद्भिर्वा दोषैर्यः कन्यां दूषयति स कन्यादूषी संता सता ब्रह्महत्यादिनाभियुक्तोभिशस्तः मित्रध्रुक् मित्रद्रोही परदोषसंकीर्तनशीलः पिशुनः सोमविक्रयी यज्ञे सोमस्य विक्रेता परिविंदकः परिवेत्ता ज्येष्ठे अकृतदारे अकृताग्निपरिग्रहे वा यः कनीयान् दारपरिग्रहमग्निपरिग्रहं वा कुर्यात्स परिवेत्ता ज्येष्ठस्तु परिवित्तिः यथाह मनुः दाराग्निहोत्रसंयोगं यः करोत्यग्रजे स्थिते परिवेत्ता स विज्ञेयः परिवित्तिस्तु पूर्वज इति एवं दातृयाजकावपि परिवित्तिः परिवेत्ता यया च परिविद्यते सर्वे ते नरकं यांति दातृयाजकपंचमा इति २२२ ७ ७ ७ ७

विनाकारणेनमातापितृगुरूंस्त्यजतिसमातापितृगुरुत्यागी एवंभार्यापुत्रत्याग्यपि वृद्धौचमातापितरौसाध्वीभार्यासुतःशिशुः अप्यकार्यशतंकृत्वा भर्त्तव्यामनुरब्रवीदितिसमाननिर्देशात् कुंडस्यान्नंयोश्नातिसकुंडाशी एवंगोलकस्यापि यस्तयोरन्नमश्नातिसकुंडाशीप्रकीर्त्तितइतिवचनात् वृषलोनिर्धर्मस्तत्सुतोवृषलात्मजः परपूर्वापुनर्भूः तस्याःपतिः अदत्तादायीस्तेनः कर्मदुष्टाःशास्त्रविरुद्धकारिणः चकारात्कितवदेवलकप्रभृतयः एतेश्राद्धेनिंदिताःप्रतिषिद्धाः अग्र्याःसर्वेषुवेदेष्वित्यादिनाश्राद्धयोग्यब्राह्मणप्रतिपादनेनैवतद्व्यतिरिक्तानामयोग्यत्वेसिद्धेपिपुनःकेषांचिद्रोग्या

मातापितृगुरुत्यागीकुंडाशीवृषलात्मजः परपूर्वापतिःस्तेनः कर्मदुष्टाश्चनिंदिताः २२३
निमंत्रयेतपूर्वेद्युर्ब्राह्मणानात्मवान्शुचिः तैश्चापिसंयतैर्भाव्यंमनोवाक्कायकर्मभिः २२४

दीनांप्रतिषेधवचनं उक्तलक्षणब्राह्मणासंभवेप्रतिषेधरहितानांप्राप्त्यर्थं २२३ एवंश्राद्धकालान्ब्राह्मणांश्चोक्त्वाधुनापार्वणप्रयोगमाह पूर्वोक्तान्ब्राह्मणान् श्राद्धेक्षणःक्रियतामितिपूर्वेद्युर्निमंत्रयेत प्रार्थनयाक्षणमभ्युपगमयेत् अपरेद्युर्वा पूर्वेद्युरपरेद्युर्वाश्राद्धकर्मण्यवस्थिते निमंत्रयेतत्र्यवरान्सम्यग्विप्रान्यथोदितानितिमनुस्मरणात् आत्मवान्शोकोन्मादादिरहितःसन्दोषवान्नभवति यद्वा आत्मवान्नियतेंद्रियोभवेत् शुचिःप्रयतश्च तैरपिनिमंत्रितैर्ब्राह्मणैर्मनोवाक्कायव्यापारैःसंयतैर्नियतैर्भवितव्यं २२४ 

अपराण्हेतूक्तलक्षणेतान्निमंत्रितान्ब्राह्मणानाहूयस्वागतवचनेनपूजयित्वाकृतपादधावनानाचांतानुक्तेष्वासनेषुपवित्रपाणिःपवित्रपाणीनुपवेशयेत् यद्यपिसामान्येनापराण्हेइत्युक्तंतथापिकुतपेप्रारभ्यतदादिपंचमुहूर्त्तेषुपरिसमापनंश्रेयस्करं अन्होमुहूर्त्ताविख्यातादशपंचचसर्वदा तत्राष्टमोमुहूर्त्तोयःसकालःकुतपःस्मृतः मध्यान्हेसर्वदायस्मान्मंदोभवतिभास्करः तस्मादनंतफलदस्तत्रारंभोविशिष्यते ऊर्ध्वंमुहूर्त्तात्कुतपाद्यन्मुहूर्त्तचतुष्टयं मुहूर्त्तपंचकंह्येतत्स्वधाभवनमिष्यतेइतिवचनात् तथान्यदपिश्राद्धोपयोगिकुतपसप्तकमुक्तं मध्यान्हःखड्गपात्रंच

अपराण्हेसमभ्यर्च्यस्वागतेनागतांस्तुतान् पवित्रपाणिराचांतानासनेषूपवेशयेत् २२५ युग्मान्दैवेयथाशक्तिपित्र्येयुग्मांस्तथैवच परिस्तृतेशुचौदेशेदक्षिणाप्रवणेतथा २२६

तथानेपालकंबलः रौप्यंदर्भास्तिलागावोदौहित्रश्चाष्टमःस्मृतः पापंकुत्सितमित्याहुस्तस्यसंतापकारिणः अष्टावेतेयतस्तस्मात्कुतपाइतिविश्रुताइति २२५ दैवेआभ्युदयिकेश्राद्धेसमान्ब्राह्मणान्उपवेशयेत् कथंयथाशक्तिशक्तिमनतिक्रम्य तत्रवैश्वदेवे द्वौद्वौ मात्रादीनांतिसृणामेकैकस्याद्वौद्वौतिसृणांवाद्वौ एवंपित्रादीनामेकैकस्यद्वौद्वौत्रयाणांवाद्वौ एवंमातामहादीनां वर्गत्रयेपिवैश्वदेवंतंत्रंवा पित्र्येपार्वणश्राद्धेअयुग्मान्विषमानुपवेशयेत् इतिसंबध्यते एतच्चपरिस्तृतेसर्वतःप्रच्छादिते शुचौगोमयादिनोपलिप्ते दक्षिणाप्रवणेदक्षिणतोवनतेदेशेकार्यं २२६

अयुग्मान्पित्र्यइतिपार्वणश्राद्धांगभूतेवैश्वदेवेप्ययुग्मप्रसंगेइदमारभ्यतेद्वौदेवइति दैवेवैश्वदेवेद्वौब्राह्मणौप्राङ्मुखावुपवेशयौ पित्र्येअयु
ग्मानित्यविशेषप्रसंगेविशेषउच्यते त्रयःपित्र्येइति पित्र्येपित्रादिस्थानेत्रयःउदङ्मुखाउपवेश्याः पक्षांतरमाह एकैकमेववा वैश्वदेवेपित्र्येच
एकमेकमुपवेशयेत् संभवतोविकल्पः मातामहानामप्येवंश्राद्धेनिमंत्रणादिद्वौदैवेप्राक्त्रयःपित्र्येउदगेकैकमेववेत्येवमंतंपितृश्राद्धवत्कर्तव्यं
पितृश्राद्धेमातामहश्राद्धेचवैश्वदेविकंवैश्वदेवंतंत्रेणवाकर्तव्यं तंत्रशब्दःसमुदायवाचकइति यदातुद्वावेवब्राह्मणौलब्धौतदातुवैश्वदेवेपात्रं

द्वौदैवेप्राक्त्रयःपित्र्येउदगेकैकमेववा मातामहानामप्येवंतंत्रंवावैश्वदेविकं २२७ पाणिप्रक्षालनंदत्वाविष्टरार्थं
कुशानपि आवाहयेदनुज्ञातोविश्वेदेवासइत्यृचा २२८

प्रकल्प्यउभयपत्रैकैकंब्राह्मणंनियुंज्यात् यथाहवसिष्ठः यद्येकंभोजयेच्छ्राद्धेदैवं
तत्रकथंभवेत् अन्नंपात्रेसमुद्धृत्यसर्वस्यप्रकृतस्यच देवतायतनेकृत्वाततःश्राद्धंप्रवर्तयेत् प्रास्येदन्नंतदग्नौतुदद्याद्वाब्रह्मचारिणइति २२७ त
दनंतरंविश्वेदेवार्थंब्राह्मणहस्तेजलंदत्वाविष्टरार्थंकुशांश्चयुग्मान्द्विगुणितानासनेदक्षिणतोदत्वाविश्वान्देवानावाहयिष्येइतिब्राह्मणान्पृष्ट्वाते ५०
रावाहयेत्यनुज्ञातोविश्वेदेवासआगतेत्यनयात्रृचा आगच्छंतुमहाभागाइत्यनेनचस्मार्तेनमंत्रेणतानावाहयेत् एतच्चयज्ञोपवीतिनासव्येनप्रदक्षि
णंचकार्यं अपसव्यंततःकृत्वापितृणामप्रदक्षिणमितिपित्र्येविशेषस्मरणात् २२८

ततोविश्वेदेवार्थंब्राह्मणसमीपेभूमिंप्रदक्षिणेनयवैरन्वास्तीर्य अनंतरंतैजसादिभाजनेसपवित्रकेकुशयुग्मांतर्हितेशन्नोदेवीरभिष्टयइत्यनयर्चापः
क्षिप्त्वायवोसिधान्यराजोसीत्यादिनामंत्रेणयवान्ततोगंधपुष्पाणिचक्षिप्त्वानंतरमर्घ्यपात्रपवित्रांतर्हितेषुब्राह्मणहस्तेषुयादिव्याआपःपयसेत्या
दिनामंत्रेणविश्वेदेवाइदंवोर्घ्यइत्यर्घ्योदकंविनिक्षिपेत् २२९ अथकरशौचार्थमुदकंदत्वायथाक्रमंगंधपुष्पधूपदीपदानंकुर्यात् तथाच्छादनदानंच
गंधादीनांस्मृत्यंतरोक्तोविशेषोद्रष्टव्यः चंदनकुंकुमकर्पूरागरुपद्मकान्युपलेपनार्थमितिविष्णुनोक्तं पुष्पाणिचश्राद्धेजात्याःप्रशस्ताःस्युर्मल्लिकाश्वेत

यवैरन्ववकीर्याथभाजनेसपवित्रके शन्नोदेव्यापयःक्षिप्त्वायवोसीतियवांस्तथा २२९ यादिव्याइतिमंत्रेणहस्तेष्वर्घ्यं
विनिक्षिपेत् दत्वोदकंगंधमाल्यंधूपदानंसदीपकम् २३० तथाच्छादनदानंचकरशौचार्थमंबुच अपसव्यंततःकृत्वा
पितृणामप्रदक्षिणम् २३१

यूथिकाजलोद्भवानिसर्वाणिकुसुमानिचचंपकमित्युक्तानि वर्ज्यानिच उग्रगंधीन्यगंधीनिचैत्यवृक्षोद्भवा
निच पुष्पाणिवर्जनीयानिरक्तवर्णानियानिच नकंटकिजंअकंटकमपि शुक्लंसुगंधियत्तद्दद्यात् नरक्तं रक्तमपिकुंकुमंजलजंचदद्यादित्यादीनिद्र
ष्टव्यानि धूपेचविशेषोविष्णुनोक्तः प्राण्यंगंसर्वंधूपार्थेनदद्यात् घृतमधुसंयुक्तंगुग्गुलुंश्रीखंडागरुदेवदारुसरलादिदद्यादिति दीपेचविशेषःशंखे
नोक्तः घृतेनदीपोदातव्यस्तिलतैलेनवापुनः वसामेदोद्भवंदीपंप्रयत्नेनविवर्जयेत् आच्छादनंचशक्त्यानवमहतंसदशंदद्यादिति एतच्चसर्वंवैश्वदेवा

नुष्ठानकांडमुदङ्मुखः कुर्यात् पित्र्यंकांडंदक्षिणामुखः यथाह वृद्धशातातपः उदङ्मुखस्तुदेवानां पितॄणांदक्षिणामुखः प्रदद्यात्पार्वणेसर्वंदैवपू
र्वविधानतइति ३० ३१ततोवैश्वदेवकांडानंतरमपसव्यंयज्ञोपवीतंप्राचीनावीतंकृत्वा अत्रततइतियदुक्ता कांडानुसमयोदर्शितः पित्रादीनांत्रयाणा-
अयुग्मान्कुशान्द्विगुणभुग्नान्प्रदक्षिणंवामतोविष्टरार्थमासनेषूदकपूर्वकंदत्वापुनरुदकंदद्यात् अपःप्रदायद्विगुणभग्नकुशान्दत्वापःप्रदा
येत्याश्वलायनस्मरणात् एतच्चाद्यंतयोरुदकदानंवैश्वदेवेपित्र्येचप्रतिपदार्थप्रतिपादनार्थंद्रष्टव्यं अथपितॄन्पितामहान्प्रपितामहानावाहयिष्य

द्विगुणांस्तुकुशान्दत्वाह्युशंतस्त्वेत्यृचापितॄन् आवाह्यतदनुज्ञातोजपेदायंतुनस्ततः २३२ अपहताइति
तिलान्विकीर्यचसमंततः यवार्थास्तुतिलैःकार्याःकुर्यादर्घ्यादिपूर्ववत् २३३ दत्वार्घ्यंसंस्रवांस्तेषांपात्रे
कृत्वाविधानतः पितृभ्यःस्थानमसीतिन्युब्जंपात्रंकरोत्यधः २३४

इतिब्राह्मणान्पृष्ट्वा आवाहयेतितैरनुज्ञातोउशंतस्त्वानि
धीमहीत्यनयाऋचापित्रादीनावाह्य आयंतुनःपितरइत्यादिनामंत्रेणोपतिष्ठेत् २३२ २३३ यवार्थायवसाध्यानिकार्याणिअन्ववकिरणादीनिति
लैःकर्त्तव्यानि ततोर्घ्यपात्रासादनाच्छादनांतंपूर्ववत्कुर्यात् तत्रायंविशेषः तिलानपहतासुरारक्षांसीत्यादिनामंत्रेणब्राह्मणान्परितोप्रदक्षिण 
मन्ववकीर्यराजतादिपात्रेषुत्रिषुयुग्मकुशनिर्मितकूर्चांतर्हितेषु शन्नोदेवीरितिमंत्रेणापःक्षिप्त्वा तिलोसिसोमदैवत्यइत्यादिमंत्रेणतिलान्पुष्पगंधा

न्विक्षिप्त्वास्वधार्घ्याइतिब्राह्मणानांपुरतोर्घ्यपात्राणिस्थापयित्वा यादिव्याइतिमंत्रांतेपितरिदंतेर्घ्यंपितामहेदंतेर्घ्यंप्रपितामहेदंतेर्घ्यंइतिब्राह्म
णानांहस्तेष्वर्घ्यंदद्यात् एकैकमुभयत्रवेत्यस्मिन्नपिपक्षेपात्रत्रयंकार्यं एवमर्घ्यंदत्वातेषामर्घ्याणांसंस्रवान्ब्राह्मणहस्तगलितार्घोदकानिपितृ-
पात्रेगृहीत्वादक्षिणाग्रंकुशस्तंबंभूमौनिधायतस्योपरिपितृभ्यःस्थानमसीत्यनेनमंत्रेणतत्पात्रंन्युब्जमधोमुखंकुर्यात् तस्योपरिअर्घ्यपात्रपवि-
त्राणिनिदध्यात् अनंतरंगंधपुष्पधूपदीपाच्छादनानि पितरयंतेगंधः पितरिदंतेपुष्पं इत्यादिनाप्रयोगेणदद्यात् २३४ अनंतरमग्नौकरिष्यन्

अग्नौकरिष्यन्नादायपृच्छत्यन्नंघृतप्लुतम् कुरुष्वेत्यभ्यनुज्ञातोहुत्वाग्नौपितृयज्ञवत् २३५
हुतशेषंप्रदद्यात्तुभाजनेषुसमाहितः यथालाभोपपन्नेषुरौप्येषुचविशेषतः २३६

घृतप्लुतंघृताक्तमन्नमादायब्राह्मणान्पृच्छेदग्नौकरिष्येइति घृतग्रहणंसूपशाकादिनिवृत्त्यर्थं ततस्तैःकुरुष्वेत्यभ्यनुज्ञातः प्राचीनावीत्यग्निमुप
समाधायमेक्षणेनादायावदानसंपदाजुहुयात् सोमायपितृमतेस्वधानमः अग्नयेकव्यवाहनायस्वधानमइतिपिंडपितृयज्ञकल्पेनाग्नौहुत्वामे
क्षणमनुप्रहृत्यहुतशेषंमृन्मयवर्जंयथालाभोपपन्नेषुविशेषतोरौप्येषुपित्रादिभाजनेषुदद्यात् नवैश्वदेवभाजनेषु समाहितोनन्यमनस्कः अ
त्रयद्यप्यग्नावित्यविशेषेणोक्तंतथाप्याहिताग्नेःसर्वाधानपक्षेऔपासनाग्नेरभावात्पिंडपितृयज्ञानंतरभाविनिपार्वणश्राद्धेविहितदक्षि-

णाग्नेः सन्निधानाद्दक्षिणाग्नौ होमः कर्मस्मार्तेविवाहाग्नाविस्यस्यापवाददर्शनात् यथाह मार्कंडेयः आहिताग्निस्तु जुहुयाद्दक्षिणाग्नौसमा
हितः अनाहिताग्निस्त्वौपसदेऽन्यभावोद्विजेप्सुवेति अर्धाधानपक्षेत्वौपासनाग्निसद्भावादाहिताग्नेरनाहिताग्नेरप्यौपासनाग्नावेवाग्नौकरणहो
मः एवमन्वष्टकादिषु त्रिष्वपि पिंडपितृयज्ञकल्पातिदेशात् काम्यादिषु चतुर्षु ब्राह्मणपाणावेव होमः यथाहुर्गृह्यकाराः अन्वष्टक्यंच पूर्वेद्युर्मासिमा
स्यथ पार्वणं काम्यमभ्युदयेऽष्टम्यामेकोद्दिष्टमथाष्टमं चतुर्ष्वाद्येषु साग्नीनां वन्हौ होमो विधीयते पित्र्यब्राह्मणहस्तेस्यादुत्तरेषु चतुर्ष्वपि अस्या
र्थः हेमंतशिशिरयोश्चतुर्णामपरपक्षाणामष्टमीष्वष्टकाइत्यष्टका विहिताः तत्र नवम्यां यत्क्रियते तदन्वष्टक्यं सप्तम्यां क्रियमाणं पूर्वेद्युर्मासिमा-
सि कृष्णपक्षे पंचमीप्रभृतिषु यस्यांकस्यांचित्तिथावन्वष्टक्यातिदेशेन यद्विहितं अमावास्यायां पिंडपितृयज्ञानंतरं यद्विहितं तत्पार्वणं स्वर्गादिकाम
नायां कृत्तिकादिनक्षत्रेषु यद्विहितं तत्काम्यं अभ्युदयेषु पुत्रोत्पत्त्यादिषु तडागारामदेवताप्रतिष्ठादिषु च यद्विहितं अष्टम्यां या अष्टका विहिता एको
द्दिष्टं अत्रैकोद्दिष्टशब्देन सपिंडीकरणं लक्ष्यते तत्रैकोद्दिष्टस्यापि सद्भावात् नकेवलं पार्वणस्य साक्षादेकोद्दिष्टे तदभावात् अथवा गृह्यभा-
ष्यकारमतेन साक्षादेकोद्दिष्टेपि पाणिहोमस्य सद्भावात्साक्षादेकोद्दिष्टमेव एतेषामष्टानामाद्येषु चतुर्षु साग्निकस्याग्नौ होमः उत्तरेषु चतुर्ष्वपि पित्र्य
ब्राह्मणहस्ते निरग्निकस्यापि प्रमीतपितृकस्य द्विजस्य पार्वणं नित्यमिति तस्यापि पाणावेव होमः न निर्वपति यः श्राद्धं प्रमीतपितृको द्विजः इंदुक्ष
ये मासिमासि प्रायश्चित्तीयते तु सइति वचनात् एवं काम्याभ्युदयिकाष्टकैकोद्दिष्टेषु पाणावेव अग्न्यभावे तु विप्रस्य पाणावेवोपपादयेदिति म
नुस्मरणात् पाणिदत्तस्य पृथग्ग्रासप्रतिषेधश्च दृश्यते यथाहुर्गृह्यकाराः अन्नं पाणितले दत्तं पृथगश्नंत्यबुद्धयः पितरस्तेन तृप्यंति शेषान्नं न ल



भंतिते यच्च पाणितले दत्तं यच्चान्यदुपकल्पितं एकीभावेन भोक्तव्यं पृथग्भावो न विद्यते इति २३५ २३६ अन्नमोदनसूपपायसघृतादिकं भा
जनेषु दत्वा पृथिवी ते पात्रमित्यादिना मंत्रेण पात्राभिमंत्रणं कृत्वा इदं विष्णुर्विचक्रमे इत्यनया ऋचा अन्ने द्विजांगुष्ठं निवेशयेत् तत्र वैश्वदेवे यज्ञोप
वीती विष्णो हव्यं रक्षेति पित्र्ये प्राचीनावीती विष्णो कव्यं रक्षेति विष्णो हव्यं च कव्यं च ब्रूयाद्रक्षेति वै क्रमादिति मनुस्मरणात् २३७ अनंतरं विश्वे
भ्यो देवेभ्य इदमन्नं परिविष्टं परिवेक्ष्यमाणं चातृप्तेरिति यवोदकेन देवे निवेद्य तथा पित्रे अमुकगोत्रायामुकशर्मणे इदमन्नं परिविष्टं परिवेक्ष्यमा

दत्वान्नं पृथिवीपात्रमिति पात्राभिमंत्रणम् कृत्वेदं विष्णुरित्यन्ने द्विजांगुष्ठं निवेशयेत् २३७ सव्याहृतिकां
गायत्रीं मधुवाताइति त्र्यृचम् जप्त्वा यथासुखं वाच्यं भुंजीरंस्तेपि वाग्यताः २३८

णं चातृप्तेरिति तिलोदकप्रदानेन पित्रे निवेद्य एवं पितामहाय प्रपितामहाय च निवेद्यानंतरमापोशानं दत्वा पूर्वोक्ताभिर्व्याहृतिभिः सहितां गा
यत्रीं मधुवाताइति त्र्यृचं मधु मधु मध्विति त्रिवारं जप्त्वा यथासुखं जुषध्वमिति ब्रूयात् संकल्प्य पितृदेवेभ्यः सावित्रीं मधु मज्जपः श्राद्धं निवेद्यापोशा
नं तु पप्रैषोथ भोजनं तथा गायत्रीं त्रिः सकृद्वापि जपेद्व्याहृतिपूर्विकां मधुवाताइति त्र्यृचं मध्वित्येतत्त्रिकं तथेति पारस्करादिवचनात् भुंजी-
रंस्तेपि वाग्यताः तेपि ब्राह्मणा वाग्यता मौनिनो भुंजीरन् २३८ ७ ७ ७ ७ ७

अन्नंभक्ष्यभोज्यलेह्यचोष्यपेयात्मकंपंचविधं इष्टंयद्ब्राह्मणायप्रेतायकर्त्रेवारोचते हविष्यंश्राद्धहविर्योग्यं व्रीहिशालियवगोधूममुद्गमाषमुन्यन्न
कालशाकमहाशल्कैलाशुंठीमरीचहिंगुगुडशर्कराकर्पूरसैंधवमाम्रपनसनालिकेरकदलीबदरगव्यपयोदधिघृतपायसमधुमांसप्रभृतिस्मृत्य
तरप्रसिद्धंवेदितव्यं हविष्यमित्यनेनैवायोग्यस्यस्मृत्यंतरप्रतिषिद्धस्यकोद्रवमसूरचणककुलित्थपुलाकनिष्पावराजमाषकूश्मांडवार्त्ताकबृहती
द्वयोपोदकीवंशांकुरपिप्पलीवचाशतपुष्पोषरबिडलवणमाहिषचामरक्षीरदधिघृतपायसादीनांनिवृत्तिः अक्रोधनःक्रोधहेतुसंभवेपि अत्वरोऽव्य
ग्रः आतृप्तेर्दद्यादितिसंबंधः तुशब्दाद्यथाकिंचिदुच्छिष्यते तथादद्यात् उच्छेषणस्यदासवर्गभागधेयत्वात् उच्छेषणंभूमिगतमजिह्मस्याशठस्यच

अन्नमिष्टंहविष्यंचदद्यादक्रोधनोत्वरः आतृप्तेस्तुपवित्राणिजप्त्वापूर्वजपंतथा २३९ अन्नमादायतृप्ताःस्थशेषंचैवानु
मान्यच तदन्नंविकिरेद्भूमौदद्याच्चापःसकृत्सकृत् २४०

दासवर्गस्यतत्पित्र्येभागधेयंप्रचक्षतेइतिमनुस्मरणात् तथा आतृप्तेःपवित्रा
णिपुरुषसूक्तपावमानीप्रभृतीनिजप्त्वातृप्तान्ज्ञात्वापूर्वोक्तंजपंचसव्याहृतिकामित्युक्तंजपेत् २३९ अनंतरंसर्वमन्नमादायतृप्ताःस्थेतितान्पृष्ट्वातृ ५३
प्ताःस्मइतितैरुक्तःशेषमप्यस्तिकिंक्रियतामितिपृष्ट्वा इष्टैःसहोपभुज्यतामित्यभ्युपगम्यतदन्नंपितृस्थानब्राह्मणस्यपुरस्तादुच्छिष्टसन्निधौदक्षिणाग्र
दर्भांतरितायांभूमौतिलोदकप्रक्षेपपूर्वकंयेअग्निदग्धाइत्यनयार्चानिक्षिप्यपुनस्तिलोदकंप्रक्षिपेत् तदनंतरंब्राह्मणहस्तेषुगंडूषार्थंसकृत्सकृद
पोदद्यात् २४०



पिंडपितृयज्ञकल्पातिदेशेनचरुश्रपणसद्भावे अग्नौकरणशिष्टचरुशेषेणसहसर्वमन्नमुपादायाग्निसन्निधौपिंडान्दद्यात् तदभावेब्राह्मणार्थंकृ
तमन्नंसर्वमुपादायसतिलंतिलमिश्रंदक्षिणामुखःउच्छिष्टसन्निधौपिंडपितृयज्ञकल्पेनपिंडान्दद्यात् २४१ मातामहानामपिविश्वेदेवावाहनादिपिंड
प्रदानपर्यंतंकर्मएवमेवकर्त्तव्यं अनंतरंब्राह्मणानामाचमनंदद्यात् स्वस्तिवाच्यंततःकुर्यात्स्वस्तिब्रूतेतिब्राह्मणान्स्वस्तिवाचयेत् तैश्चस्वस्त्युक्ते
अक्षय्यमस्त्वितिब्रूतेतिब्राह्मणहस्तेउदकदानंकुर्यात् तैश्चाक्षय्यमस्त्वितिवक्तव्यं २४२ अनंतरंयथाशक्तिहिरण्यरजतादिदक्षिणांदत्वास्वधांवाच

सर्वमन्नमुपादायसतिलंदक्षिणामुखः उच्छिष्टसन्निधौपिंडान्दद्याद्वैपितृयज्ञवत् २४१ मातामहानामप्येवंदद्यादाच
मनंततः स्वस्तिवाच्यंततःकुर्यादक्षय्योदकमेवच २४२ दत्वातुदक्षिणांशक्त्यास्वधाकारमुदाहरेत् वाच्यतामित्यनु-
ज्ञातःप्रकृतेभ्यःस्वधोच्यताम् २४३ ब्रूयुरस्तुस्वधेत्युक्तेभूमौसिंचेत्ततोजलं विश्वेदेवाश्चप्रीयंतांविप्रैश्चोक्तमिदंजपेत् २४४

यिष्येइत्युक्त्वातैर्ब्राह्मणैर्वाच्यतामित्यनुज्ञातः प्रकृतेभ्यःपित्रादिभ्यःमातामहादिभ्यश्चस्वधोच्यतामितिस्वधाकारमुदाहरेत् २४३ तेचब्राह्मणाअ
स्तुस्वधेतिब्रूयुः तैरेवमुक्ते अनंतरंकमंडलुनाभूमौउदकंसिंचेत् ततोविश्वेदेवाःप्रीयंतामितिब्रूयात् ब्राह्मणैश्चप्रीयंतांविश्वेदेवाइत्युक्तेइदमनंतरोच्यमा
नंजपेत् २४४

दातारो हिरण्यादेः नोस्माकं कुले ऽभिवर्धंतां बहवो भवंतु वेदाश्च वर्धतां अध्ययनाध्यापनतदर्थज्ञानानुष्ठानद्वारेण संततिश्च पुत्रपौत्रादिपरंपरया श्रद्धा च पित्र्ये कर्मण्यास्थानोस्माकं मा व्यगमत् मा गच्छतु देयं च हिरण्यादि बहु अपर्यंतं अस्माकं भवत्विति जपेदित्यर्थः २४५ एवं पूर्वोक्तं प्रार्थनामंत्रं जप्त्वा उक्ताः प्रियावाचः धन्या वयं भवच्चरणयुगुलरजः पवित्रीकृतमस्मन्मंदिरं शाकाद्यशनक्लेशमविगणय्य भवद्भिरनुगृहीता वयमित्येवंरू-

दातारो नोभिवर्धंतां वेदाः संततिरेव च श्रद्धा च नो मा व्यगमद्बहु देयं च नोस्त्विति २४५ इत्युक्त्वोक्त्वा प्रिया वाचः प्रणिपत्य विसर्जयेत् वाजे वाज इति प्रीतः पितृपूर्वं विसर्जनम् २४६ यस्मिंस्ते संस्रवाः पूर्वमर्घ्यपात्रे निवेशिताः पितृपात्रं तदुत्तानं कृत्वा विप्रान्विसर्जयेत् २४७

पाः प्रणिपत्य प्रदक्षिणपूर्वं नमस्कृत्य विसर्जयेत् कथं विसर्जयेदित्याह वाजे वाजे वत वाजिनो न इत्यनया ऋचा पितृपूर्वं प्रपितामहादि विश्वेदेवांतं दर्भाग्रेणारंभेण उत्तिष्ठत पितर इति प्रीतः सुप्रीतमना विसर्जनं कुर्यात् २४६ यस्मिन्नर्घपात्रे पूर्वमर्घ्यदानांते संस्रवा ब्राह्मणहस्तगलितार्घ्योदकानि निवेशिताः स्थापिताः तत्पितृपात्रं न्युब्जं सदुत्तानमूर्ध्वमुखं कृत्वा विप्रान्विसर्जयेत् एतच्चाशीर्मंत्रजपादूर्ध्वं वाजे वाजे इत्यतः प्राक् द्रष्टव्यं कृत्वा विसर्जयेदिति क्त्वाप्रत्ययश्रवणात् २४७ ७ ७ ७

---

अनंतरमासीमांतं ब्राह्मणाननुव्रज्य तैरास्यतामित्यनुज्ञातः तान्प्रदक्षिणीकृत्य प्रतिनिवृत्तः पितृसेवितं श्राद्धशिष्टमिष्टैः सह भुंजीत नियम एवायं न परिसंख्या मांसे तु यथारुचीति द्विजकाम्येत्यत्रोक्तं यस्मिन्दिने श्राद्धं कृतं तत्संबंधिनीं रात्रिं भोक्तृभिर्ब्राह्मणैः सह कर्ता ब्रह्मचारी भवेत् तु शब्दात् पुनर्भोजनादिरहितोपि भवेत् दंतधावनतांबूलं स्निग्धस्नानमभोजनं रत्यौषधपरान्नानि श्राद्धकृत्सप्त वर्जयेत् पुनर्भोजनमध्वानं भाराध्ययनमैथुनं दानं प्रतिग्रहं होमं श्राद्धभुक्त्वष्ट वर्जयेदिति वचनात् २४८ एवं पार्वणं श्राद्धमुक्त्वेदानीं वृद्धिश्राद्धमाह वृद्धौ पुत्रजन्मादिनिमित्तश्राद्धे एवमुक्तेन प्रकारेण पितॄन्यजेत पूजयेत् तत्र विशेषमाह प्रदक्षिणावृत्क इति प्रदक्षिणा आवृत् अनुष्ठानपद्धतिर्यस्यासौ प्रदक्षिणावृत्कः प्रदक्षिणप्रचार इति यावत्

प्रदक्षिणमनुव्रज्य भुंजीत पितृसेवितम् ब्रह्मचारी भवेत्तां तु रजनीं ब्राह्मणैः सह २४८ एवं प्रदक्षिणावृत्को वृद्धौ नांदीमुखान्पितॄन् यजेत दधिकर्कंधुमिश्रान्पिंडान्यवैः क्रियाः २४९

नांदीमुखानिति पितॄणां विशेषणं अतश्चावाहनादौ नांदीमुखान् पितॄनावाहयिष्ये नांदीमुखान् पितामहान् इत्यादि प्रयोगो द्रष्टव्यः कथं यजेतेत्याह दधिकर्कंधुमिश्रान् कर्कंधुर्बदरीफलं दध्ना बदरीफलेन च मिश्रान् पिंडान् दत्वा यजेतेति संबध्यते तिलसाध्याः सर्वाः क्रिया यवैः कर्तव्याः अत्र च ब्राह्मणसंख्यादर्शिनैव युग्मान्दैवे यथाशक्ति नि अत्र प्रदक्षिणावृत्कत्वादिपरिगणनमन्येषामपि स्मृत्यंतरोक्तानां विशेषधर्माणां प्रदर्शनार्थं यथाहाश्वलायनः अथाभ्युदयिके युग्मा ब्राह्मणाः

अमूलादर्भाः प्राङ्मुखोयज्ञोपवीतीस्यात्प्रदक्षिणमुपचारोयवैस्तिलार्थोगंधादिदानं द्विर्द्विः ऋजुदर्भानासनेदद्यात् यवोसिसोमदेवत्योगोसवो
देवनिर्मितः प्रत्नवद्भिः प्रत्तःपुष्ट्यानांदीमुखान्पितॄनिमाल्लोकान्प्रीणयाहिनः स्वाहेतिप्रवापनं विश्वेदेवाइदंवोर्घ्यं नांदीमुखाः पितरइदंवोर्घ्य
मितियथालिंगमर्घ्यदानं पाणौहोमोग्नयेकव्यवाहनायस्वाहा सोमायपितृमतेस्वाहेति मधुवाताऋतायतइतितृचस्थानेउपास्मैगायतेतिपंचम
धुमतीःश्रावयेत् अक्षन्नमीमदंतेतिषष्ठीं आचांतेषुभुक्ताशयान्गोमयेनोपलिप्यप्राचीनाग्रान्दर्भान्संस्तीर्यतेषुपृषदाज्यमिश्रेण भुक्तशेषेणै



एकोद्दिष्टंदैवहीनमेकार्घ्यैकपवित्रकम् आवाहनाग्नौकरणरहितंह्यपसव्यवत् २५०

कैकस्यद्वौद्वौपिंडौदद्यादित्यादि यद्यपिपितॄन्यजेतेतिसामान्येनोक्तंतथापिश्राद्धत्रयं क्रमश्चस्मृत्यंतरादवगंतव्यः यथाहशातातपः मातुः
श्राद्धंतुपूर्वंस्यात्पितॄणांतदनंतरम् ततोमातामहानांचवृद्धौश्राद्धत्रयंस्मृतमिति २४९ एकोद्दिष्टमाह एकोद्दिष्टंएकउद्दिष्टोयस्मिन्श्राद्धेतदेकोद्दि
ष्टमितिकर्मनामधेयं शेषंपूर्ववदाचरेदित्युपसंहारात् पार्वणसकलधर्मप्राप्तौविशेषोभिधीयते दैवरहितंविश्वेदेवरहितं एकार्घ्यपात्रमेकदर्भपवित्रकं ५५
च आवाहनाग्नौकरणहोमेनचरहितं अपसव्यवत्प्राचीनावीतब्रह्मसूत्रवत् अनेनानंतरोक्ताभ्युदयिकेयज्ञोपवीतित्वंसूचयति २५० ७ ७

किंच यदुक्तंस्वस्तिवाच्यंततःकुर्यादक्षय्योदकमेवचेतितत्राक्षय्यस्थानेउपतिष्ठतामितिवदेत् विप्रविसर्जनेकर्तव्येवाजेवाजइतिजपानंतरंदर्भान्वा
रंभेणाभिरम्यतामितिब्रूयात् तेचाभिरताःस्मेतिब्रूयुः हेतिप्रसिद्धं शेषंपूर्ववदितियावत् एतच्चमध्यान्हेकर्तव्यं यथाहदेवलः पूर्वाण्हेदैविकंकर्मअ
पराण्हेतुपैतृकं एकोद्दिष्टंतुमध्यान्हेप्रातर्वृद्धिनिमित्तकमिति भुंजीतपितृसेवितमित्यत्रैकोद्दिष्टविशेषनिषेधोदृश्यते नवश्राद्धेषुयच्छिष्टंगृहेपर्
युषितंचयत् दंपत्योर्भुक्तशिष्टंचनभुंजीतकदाचनेति नवश्राद्धंतुदर्शितं प्रथमेन्हितृतीयेन्हिपंचमेसप्तमेतथा नवमैकादशेचैवतन्नवश्राद्धमुच्य

उपतिष्ठतामक्षय्यस्थानेविप्रविसर्जने अभिरम्यतामितिवदेद्ब्रूयुस्तेभिरताःस्मह २५१

ते २५१ सपिंडीकरणमाह गंधोदकतिलैर्युक्तंपात्रचतुष्टयंअर्घ्यसिध्यर्थं पूर्वोक्तविधिनाकुर्यात् तिलैर्युक्तंपात्रचतुष्टयंवदतापितृवर्गेचत्वारोब्रा
ह्मणादर्शिताः वैश्वदेवेद्वौस्थितावेव अत्रप्रेतपात्रोदकंकिंचिदवशेषंत्रिधाविभज्यपितृपात्रेषुसेचयेत् येसमानाःसमनसइतिद्वाभ्यांमंत्राभ्यां शेषं
विश्वेदेवावाहनादिविसर्जनांतंपूर्ववत् पार्वणवदाचरेत् प्रेतार्घ्यपात्रावशिष्टोदकेनप्रेतस्थानब्राह्मणहस्तेर्घ्यंदत्वाशेषमेकोद्दिष्टवत्समापयेत् पि
त्र्येषुत्रिषुपार्वणवत् एतत्सपिंडीकरणमनंतरोक्तमेकोद्दिष्टंचततःप्रागुक्तंस्त्रियाअपिमातुरपिकर्तव्यं एवंवदतापार्वणेमातृश्राद्धंपृथक्कर्तव्य-

 

मित्युक्तं भवति अत्र प्रेतशब्दं पितुः प्रपितामहविषयं केचिद्वर्णयंति तस्य त्रिषु तर्भावेन सपिंडीकरणोत्तरकालं पिंडदानादिनिवृत्त्युपपत्तेः समनंतरं मृतस्योत्तरत्र पिंडोदकदानानुवृत्तेरंतर्भावेनयुक्तः अतएवाह यमः यः सपिंडीकृतं प्रेतं पृथक्पिंडे नियोजयेत् विधिघ्नस्तेन भवति पितृहा चोपजायते इति प्रकर्षेण इतः प्रेत इति चतुर्थेपि प्रेतशब्दोपपत्तेः प्रेतेभ्य एव निपृणीयादिति च प्रयोगदर्शनात् अपि च सपिंडीकरणं श्राद्धं दैवपूर्वं नियोजयेत् पितृनेवाशयेत्तत्र पुनः प्रेतं न निर्दिशेदिति सपिंडीकरणोत्तरकालं प्रेतस्य श्राद्धादिप्रतिषेधो दृश्यते स चानंतरमृतस्य न संभवति अमावास्यादौ श्राद्धविधा

गंधोदकतिलैर्युक्तं कुर्यात्पात्रचतुष्टयम् अर्घ्यार्थं पितृपात्रेषु प्रेतपात्रं प्रसिंचयेत् २५२
ये समानाइति द्वाभ्यां शेषं पूर्ववदाचरेत् एतत्सपिंडीकरणमेकोद्दिष्टं स्त्रिया अपि २५३

नात् सपिंडता तु पुरुषे सप्तमे विनिवर्त्तत इत्येतदपि वचनं चतुर्थस्य त्रिष्वंतर्भाव एव घटते चतुर्थस्य पिंडत्रयव्यापित्वं पंचमस्य पिंडद्वयव्यापित्वम् षष्ठस्यैकपिंडव्यापित्वं सप्तमे निवृत्तिरिति पितृपात्रेष्वित्येतदपि पितृमुख्यत्वादस्मिन्नेव पक्षे घटते नान्यथा प्रपितामहप्रमुखत्वात् तस्मात्पितृपात्रेषु तत्प्रेतपात्रं प्रसिंचयेदिति पितुः प्रपितामहपात्रं पित्रादिपात्रेषु प्रसेचयेदिति तदयुक्तं नह्यत्र पिंडसंयोजनमुत्तरत्र पिंडदानादिनिवृत्तिप्रयोजनं अपि तु प्रेतत्वनिवृत्त्या पितृत्वप्राप्त्यर्थं प्रेतत्वं च क्षुत्तृषोपजनितात्यंतदुःखानुभावावस्था यथाह मार्कंडेयः प्रेतलोके तु वसतिर्नृणां वर्षं प्रकीर्त्तिता 

क्षुत्तृषो प्रत्यहं तत्र भवेतां भृगुनंदनेति पितृत्वप्राप्तिश्च वस्वादिश्राद्धदेवतासंबंधः प्राक्तनैकोद्दिष्टसहितेन सपिंडीकरणेन प्रेतत्वनिवृत्त्या पितृत्वंशमोतीत्यवगम्यते यस्यैतानि न दत्तानि प्रेतश्राद्धानि षोडश प्रेतत्वं च स्थिरं तस्य दत्तैः श्राद्धशतैरपि तथा चतुरो निर्वपेत्पिंडान्पूर्वं तेषु समापयेत् ततः प्रभृति वै प्रेतः पितृसामान्यमश्नुते इत्यादिवचनात् यः सपिंडीकृतं प्रेतमित्यनेनापि पृथगेकोद्दिष्टविधानेन पिंडदाननिषेधात् पार्वणविधानेन सह पिंडदानमवगम्यते एतच्च सांवत्सरिकपाक्षिकैकोद्दिष्टविधानेनापाद्यते यदपि पुनः प्रेतं न निर्दिशेदिति तदपि प्रेतशब्दं नोच्चारयेत् अपि तु पितृशब्दमेवेत्येवमत्यर्थं न च प्रकर्षगमनात्तत्रैव प्रेतशब्दः यतो विशिष्टदुःखानुभवावस्था प्रेतशब्देन रूढ्याभिधीयत इत्युक्तं योपि प्रमीतमात्रे प्रेतशब्दप्रयोगः सोपि भूतपूर्वगत्या सपिंडता तु पुरुषे सप्तमे विनिवर्त्तत इति च प्रथमस्य पिंडस्य चतुर्थव्यापित्वात् द्वितीयस्य पंचमव्यापित्वात् तृतीयस्य षष्ठव्यापित्वात् सप्तमे विनिवर्त्तत इति एवमपि घटते अपि च निर्वाप्यपिंडान्वयेन न सापिंड्यं अव्यापकत्वात् अपि त्वेकशरीरावयवान्वयेनेत्युक्तं पितृशब्दश्च प्रेतत्वनिवृत्त्या श्राद्धदेवतात्वमुपगतेषु वर्त्तत इति पितृपात्रेष्वित्यविरुद्धं तस्मादनंतरमृतपात्रोदकस्य तत्पिंडस्य च पितृपात्रेषु तत्पिंडेषु च संसर्जनमिति स्थितं आचार्यस्तु परमतमेवोपन्यस्तवान् एतच्च पितुः सपिंडीकरणं पितामहादिषु त्रिषु प्रमीतेषु वेदितव्यं पितरि प्रेते पितामहे प्रपितामहे वा जीवति सपिंडीकरणं नास्त्येव व्युत्क्रमाच्च प्रमीतानां नैव कार्या सपिंडनेति वचनात् यत्तु मनुवचनं पिता यस्य तु वृत्तः स्याज्जीवेच्चापि पितामहः पितुः स नाम संकीर्त्य कीर्त्तयेत्प्रपितामहमिति तदपि पितृशब्दप्रयोगनियमाय न पिंडद्वयदानार्थं कथं ध्रियमाणे तु पितरि पूर्वेषामेव निर्वपेत् पिता यस्य तु वृत्तः स्याज्जीवेच्चापि पितामहः सोपि पूर्वेषामेव निर्वपेदित्यन्वयः पक्षद्वयेपि कथं निर्वपेदित्याह पितुः स नाम संकीर्त्य कीर्त्तयेत्प्रपितामहमित्याद्यंतग्रहणेन सर्वत्र पितृभ्यः पितामहेभ्यः

या॰ स्मृ॰ मि॰ प्रपितामहेभ्यइत्येवंप्रयोगः नपुनःकदाचिदपिपितामहस्यप्रपितामहस्यवादित्वं स्वप्रपितामहस्यतत्पितुर्वातत्वं अतश्चपित्रादिशब्दानांसंबंधिव आ॰
५७ -चनात् ध्रियमाणेपितरिपितुःपितृभ्यःपितामहेभ्यःप्रपितामहेभ्यइति पितामहेध्रियमाणेपितामहस्यपितृभ्यःपितामहेभ्यःप्रपितामहेभ्यइति १
अतःपिंडपितृयज्ञेसुंधंतांपितरइत्यादिमंत्राणामूहोनभवति यदपिविष्णुवचनं यस्यपिताप्रेतःस्यात्सपितृपिंडंनिधायपितामहात्पराभ्यांद्वाभ्यां
दद्यादिति तस्यायमर्थः पितामहेध्रियमाणेप्रेतेचपितरिपितुरेकंपिंडमेकोद्दिष्टविधानेननिधायपितुर्यःपितामहस्तत्पराभ्यांद्वाभ्यांदद्यात् पिता
महस्त्वात्मनःप्रपितामहःसंप्रदानभूतःस्थितएवेति प्रपितामहायततःपराभ्यांद्वाभ्यांचदद्यादिति शब्दप्रयोगनियमस्तुपूर्वोक्तएव एवंगोब्राह्म-
णादिहतस्यापिसपिंडीकरणाभावोवेदितव्यः यथाहकात्यायनः ब्राह्मणादिहतेताते पतितेसंगवर्जिते व्युत्क्रमाच्चमृतेदेयंयेभ्यएवददात्यसावि
ति गोब्राह्मणहतस्यपितुःसपिंडीकरणाभावेतमुल्लंघ्यपितामहादिभ्यःपार्वणविधानमुपपन्नमितिसपिंडीकरणाभावोवगम्यते स्मृत्यंतरेपि-
येनराःसंततिच्छिन्नानास्तितेषांसपिंडता नचैतैःसहकर्त्तव्यान्येकोद्दिष्टानिषोडशेति मातुःपिंडदानादौगोत्रविप्रतिपत्तिः भर्तृगोत्रेणपितृगोत्रेण
वादातव्यमिति उभयत्रवचनदर्शनात् स्वगोत्राद्भ्रश्यतेनारीविवाहात्सप्तमेपदे स्वामिगोत्रेणकर्त्तव्यातस्याःपिंडोदकक्रियेत्यादिभर्तृगोत्रविषयं
वचनं पितृगोत्रंसमुत्सृज्यनकुर्याद्भर्तृगोत्रतः जन्मन्येवविपत्तौचनारीणांपैतृकंकुलमित्यादिपितृगोत्रविषयं एवंविप्रतिपत्तावासुरादिविवाहे
षुपुत्रिकाकरणेचपितृगोत्रमेव तत्रतत्रविशेषवचनात् दानस्यानिवृत्तेश्च ब्राह्मादिविवाहेषुव्रीहियववत् बृहद्रथंतरसामवत्विकल्पएव तत्रच ५७
येनास्यपितरोयातायेनयाताःपितामहाः तेनयायात्सतांमार्गंतेनगच्छन्नदुष्यतीतिवचनात् वंशपरंपरायातसमाचरणेनव्यवस्था एवंविधविषय-

व्यतिरेकेणास्यवचनस्यविषयांतराभावात् यत्रपुनःशास्त्रतोनव्यवस्थानाप्याचारतस्तत्रात्मनस्तुष्टिरेववेतिवचनादात्मनस्तुष्टिरेवव्यवस्थापिका
यथागर्भाष्टमेऽष्टमेवाब्दइति मातुःसपिंडीकरणेपिविरुद्धानीववाक्यानिदृश्यंते तत्र पितामह्यादिभिःसार्द्धंसपिंडीकरणंस्मृतं तथाभर्त्रापिभार्यायाः
स्वमात्रादिभिःसहसपिंडीकरणंकर्त्तव्यमिति पैठीनसिराह अपुत्रायांमृतायांतुपतिःकुर्यात्सपिंडतां श्वश्र्वादिभिःसहैवास्याःसपिंडीकरणंभवेदिति
पत्यासहसपिंडीकरणंयमआह पत्याचैकेनकर्त्तव्यंसपिंडीकरणंस्त्रियाः सामृतापिहितेनैक्यंगतामंत्राहुतिव्रतैरिति उशनसातु मातामहेनसपिं
डीकरणमुक्तं पितुःपितामहेयद्वत् पूर्णेसंवत्सरेसुतैः मातुर्मातामहेतद्वदेषाकार्यासपिंडता तथा पितापितामहेयोज्यः पूर्णेसंवत्सरेसुतैः मातामा
तामहेतद्वदित्याह भगवान्शिवइत्येवंविविधेषुवचनेषुसत्सु अपुत्रायांभार्यायांप्रमीतायांभर्त्तास्वमात्रैवसापिंड्यंकुर्यात् अन्वारोहणेतुपुत्रःस्व-
पित्रैवमातुःसापिंड्यंकुर्यात् आसुरादिविवाहोत्पन्नःपुत्रिकासुतश्चमातामहेनैव ब्राह्मादिविवाहोत्पन्नःपित्रामातामहेनपितामह्यावाविकल्पेन-
कुर्यात् अत्रापियदिनियतोवंशसमाचारस्तदानींतथैवकुर्यात् वंशसमाचारोप्यनियतश्चेत्तदात्मनस्तुष्टिरेवचेतियथारुचिकुर्यात् तत्रत्वयेनकेनापि
मातुःसापिंड्येपियत्रान्वष्टकादिषुमातृश्राद्धंपृथग्विहितं अन्वष्टकासुवृद्धौचगयायांचक्षयेहनि मातुःश्राद्धंपृथक्कुर्यादन्यत्रपतिनासह तत्रापिताम
ह्यादिभिरेवपार्वणश्राद्धंकर्त्तव्यं अन्यत्रपतिनासहेतिपतिसापिंड्येतदंशभागित्वात् मातामहसापिंड्येतदंशभागित्वात्तेनैवसह यथाहशातातपः
एकमूर्त्तित्वमायातिसपिंडीकरणेकृते पत्नीपतिपितृणांचतस्मादंशेनभागिनीति एवंसतिमातामहेनमातुःसापिंड्येमातामहश्राद्धंपितृश्राद्धंव-
न्नित्यमेव पत्यापितामह्यावामातुःसापिंड्येमातामहश्राद्धंननित्यं कृतेअभ्युदयः अकृतेनप्रत्यवायइतिनिर्णयः २५२ २५३ ७ ७

संवत्सरादर्वाक्सपिंडीकरणंयस्यकृतंतस्यंतदुद्देशेनप्रतिदिवसंप्रतिमासंवायावत्संवत्सरंशक्त्यनुसारेणान्नमुदकुंभसहितंब्राह्मणायदद्यात् अ
र्वाक्संवत्सरादितिवदतासपिंडीकरणंसंवत्सरेपूर्णेप्राग्वेतिदर्शितं यथाहाश्वलायनः अथसपिंडीकरणंसंवत्सरांते द्वादशाहेवेति कात्यायनोप्याह
ततःसंवत्सरेपूर्णेसपिंडीकरणंभवेत् त्रिपक्षेवायदाचार्वाग्वृद्धिरापद्यतेतदेति द्वादशाहेत्रिपक्षेवृद्धिप्राप्तौसंवत्सरेवेतिचत्वारःपक्षादर्शिताः तत्रद्वा
दशाहेपितुःसपिंडीकरणंसाग्निकेनकार्यं सपिंडीकरणंविनापिंडपितृयज्ञासिद्धेः साग्निकश्चयदाकर्त्ताप्रेतोवाप्यग्निमान्भवेत् द्वादशाहेतदाका
र्यंसपिंडीकरणंपितुरितिवचनात् निरग्निश्चत्रिपक्षेवृद्धिप्राप्तौसंवत्सरेवाकुर्यात् यदाप्राक्संवत्सरात्सपिंडीकरणंतदाषोडशश्राद्धानिकृत्वासपिं

अर्वाक्सपिंडीकरणंयस्यसंवत्सराद्भवेत् तस्याप्यन्नंसोदकुंभंदद्यात्संवत्सरंद्विजे २५४.

डीकरणंकार्यं उतसपिंडीकरणंकृत्वास्वस्वकालेतानिकर्त्तव्यानीतिसंशयः उभयथावचनदर्शनात् श्राद्धानिषोडशादत्त्वानतुकुर्यात्सपिंडनम्
श्राद्धानिषोडशापाद्यविदधीतसपिंडतामिति षोडशश्राद्धानिचद्वादशाहेत्रिपक्षेचषण्मासेमासिचाब्दिके श्राद्धानिषोडशैतानिसंस्मृतानिमनीषिभि
रितिदर्शितानि तथा यस्यापिवत्सराद्दर्वाक्सपिंडीकरणंभवेत् मासिकंचोदकुंभंचदेयंतस्यापिवत्सरमिति तत्रसपिंडीकरणंकृत्वास्वकालएवैतानि
कर्त्तव्यानीतिप्रथमःकल्पः अप्राप्तकालत्वेनप्रागनधिकारात् यदपिवचनंषोडशश्राद्धानिकृत्वासपिंडीकरणंसंवत्सरात्प्रागपिकर्त्तव्यमितिसोयमा

पत्कल्पः यदात्वापत्कल्पत्वेनप्राक्सपिंडीकरणात्प्रेतश्राद्धानिकरोतितदैकोद्दिष्टविधानेनकुर्यात् यदातुमुख्यकल्पेनस्वकालएवकरोतितदाब्दि
कंश्राद्धंयोयथाकरोतिपार्वणमेकोद्दिष्टंवातथामासिकानिकुर्यात् सपिंडीकरणादर्वाक्कुर्वन्श्राद्धानिषोडश एकोद्दिष्टविधानेनकुर्यात्सर्वाणिता
नितु सपिंडीकरणादूर्ध्वंयदाकुर्यात्तदापुनः प्रत्यब्दंयोयथाकुर्यात्तथाकुर्यात्सतान्यपीतिस्मरणात् एतच्चप्रेतश्राद्धसहितंसपिंडीकरणंसंविभक्त
धनेषुबहुषुभ्रातृषुसत्स्वप्येकेनैवकृतेनालंनसर्वैःकर्त्तव्यं नवश्राद्धंसपिंडत्वंश्राद्धान्यपिचषोडश एकेनैवतुकार्याणिसंविभक्तधनेष्वपीतिस्मरणा
त् इदंचप्रेतश्राद्धसहितंसपिंडीकरणंअसंन्यासिनांपुत्रादिभिर्नियमेनकर्त्तव्यं प्रेतत्वविमोक्षार्थत्वात् संन्यासिनांतुनकर्त्तव्यं यथाहोशनाःएको
द्दिष्टंनकुर्वीतयतीनांचैवसर्वदा अहन्येकादशेप्राप्तेपार्वणंतुविधीयते सपिंडीकरणंतेषांनकर्त्तव्यंसुतादिभिः त्रिदंडग्रहणादेवप्रेतत्वंनैवजाय-
तइति पुत्रासंनिधानेयेनसगोत्रादिनादाहसंस्कारःकृतस्तेनैवादशाहांतंप्रेतकर्मकर्त्तव्यं असगोत्रःसगोत्रोवायदिस्त्रीयदिवापुमान् प्रथमेह
नियोदद्यात्सदशाहंसमापयेदितिस्मरणात् शूद्राणामप्येतत्कर्त्तव्यममंत्रकंद्वादशेन्हि एवंसपिंडीकरणंमंत्रवर्ज्यंशूद्राणांद्वादशेन्हीतिविष्णुस्मर-
णात् सपिंडीकरणादूर्ध्वंसांवत्सरिकपार्वणादीनिपुत्रस्यनियमेनैवकार्याणि अन्येषामनियतानि २५४ एकोद्दिष्टकालानाह मृतेहनिप्रतिमासं
संवत्सरंयावदेकोद्दिष्टंकार्यं सपिंडीकरणादूर्ध्वंप्रतिसंवत्सरमेवैकोद्दिष्टंकार्यं आद्यंसर्वैकोद्दिष्टप्रकृतिभूतमेकोद्दिष्टमेकादशेहनि मृतदिवसा
परिज्ञानेतच्छ्रवणदिवसेअमावास्यायांवाकार्यं अपरिज्ञातेमृतेहनिअमावास्यायांश्रवणदिवसेवेतिस्मरणात् अमावास्यायामितिगमनमाससंबं
धिन्याममावास्यायामिति प्रवासदिवसेदेयंतन्मासेहुक्षयेपिवेतिस्मरणात् मृतेहनीत्यत्राहिताग्नेर्विशेषोजातूकर्ण्येनोक्तः ऊर्ध्वंत्रिपक्षाद्यच्छ्राद्धं

मृतेहन्येवतद्भवेत् अधस्तत्कारयेद्दाहारादाहिताग्नेर्द्विजन्मनइति तत्रत्रिपक्षादर्वाग्यत्स्तेतकर्मतद्दाहदिवसादारभ्याहिताग्नेः कार्यं त्रिपक्षादूर्ध्वंयच्छ्रा
द्धंतन्मरणदिवसएवेत्यर्थः अनाहिताग्नेस्तुसर्वमृताहएव आद्यमेकादशेहनीत्याशौचोपलक्षणमितिकेचित् शुचिनाकर्मकर्त्तव्यमितिसुदर्शनगत्वा
त् अथाशौचापगमइतिसामान्येनसर्वेषांवर्णानामुपक्रम्यैकोद्दिष्टस्यविष्णुनाविहितत्वाच्च तदप्युक्तं एकादशेन्हियच्छ्राद्धंतत्सामान्यमुदाहृतम्
चतुर्णामपिवर्णानांसूतकंचपृथक्पृथगितिपैठीनसिस्मरणविरोधात् आद्यंश्राद्धमशुद्धोपिकुर्यादेकादशेहनि कर्तुस्तात्कालिकीशुद्धिरशुद्धःपुनरे
वसइतिशंखवचनविरोधाच्च सामान्योपक्रमंविष्णुवचनंदशाहाशौचविषयमपिघटते प्रतिसंवत्सरंचैवमितिप्रतिसंवत्सरंमृतेहनिएकोद्दिष्टमुपदि

मृतेहनितुकर्त्तव्यंप्रतिमासंतुवत्सरम् प्रतिसंवत्सरंचैवमाद्यमेकादशेहनि २५५

ष्टंयोगीश्वरेण तथाचस्मृत्यंतरं वर्षेवर्षेतुकर्त्तव्यामातापित्रोस्तुसत्क्रिया अदैवंभोजयेच्छ्राद्धंपिंडमेकंचनिर्वपेदिति यमोप्याह सपिंडीकरणादूर्ध्वं
प्रतिसंवत्सरंसुतः मातापित्रोःपृथक्कुर्यादेकोद्दिष्टंमृतेहनीति व्यासस्तुपार्वणंप्रतिषेधति एकोद्दिष्टंपरित्यज्यपार्वणंकुरुतेनरः अकृतंतद्विजानीया-
द्भवेच्चपितृघातकइति जमदग्निस्तुपार्वणमाह आपाद्यचसपिंडत्वमौरसोविधिवत्सुतः कुर्वीतदर्शवच्छ्राद्धंमातापित्रोःक्षयेहनीति शातातपोप्या
ह सपिंडीकरणंकृत्वाकुर्यात्पार्वणवत्सदा प्रतिसंवत्सरंविद्वांश्छागलेयोदितोविधिरित्येवंवचनविप्रतिपत्तौदाक्षिणात्यास्त्वेवंव्यवस्थामाहुः और

सक्षेत्रजाभ्यांमातापित्रोःक्षयाहेपार्वणमेवकर्त्तव्यं दत्तकादिभिरेकोद्दिष्टमितिजातूकर्ण्यवचनात् प्रत्यब्दंपार्वणेनैवविधिनाक्षेत्रजौरसौकुर्यातामितरे
कुर्युरेकोद्दिष्टंसुतादशेति तदसत् नह्यत्रक्षयाहवचनमस्ति अपितुप्रत्यब्दमिति संतिचक्षयाहव्यतिरिक्तानिप्रत्यब्दंश्राद्धानि अक्षय्यतृतीयामा-
घीवैशाखीप्रभृतिषु अतोनक्षयाहविषयपार्वणैकोद्दिष्टव्यवस्थापनायालं यत्तुपराशरवचनं पितुर्गतस्यदेवत्वमौरसस्यत्रिपौरुषं सर्वत्रानेकगो
त्राणामेकस्यैवमृतेहनीति तदपिनव्यवस्थापकं यस्मादयमर्थः देवत्वंगतस्यसपिंडीकृतस्यपितुःसर्वत्रौरसेनत्रिपौरुषंपार्वणंकार्यं अनेकगोत्राणां
भिन्नगोत्राणांमातुलादीनांक्षयेहनियच्छ्राद्धंतदेकस्यैवैकोद्दिष्टमेवेति किंच सपिंडीकरणादूर्ध्वमप्येकोद्दिष्टमेवकर्त्तव्यमौरसेनापीत्युक्तंपैठीन-
सिना एकोद्दिष्टंहिकर्त्तव्यमौरसेनमृतेहनि सपिंडीकरणादूर्ध्वंमातापित्रोर्नपार्वणमिति उदीच्यास्तुपुनरेवंव्यवस्थापयंति अमावास्यायांभाद्रपदकृष्ण
पक्षेवामृताहेपार्वणमन्यत्रमृताहएकोद्दिष्टमेवेति अमावास्याक्षयोयस्यप्रेतपक्षेथवापुनः पार्वणंतत्रकर्त्तव्यंनैकोद्दिष्टंकदाचनेतिस्मरणात् तद-
पिनाद्रियंतेस्मदाद्याः अनिश्चितमूलेनानेनवचनेननिश्चितमूलानांबहूनांक्षयाहमात्रपार्वणविषयाणांवचनानाममावास्याप्रेतपक्षमृताहविषयत्वे
नातिसंकोचस्यायुक्तत्वात् सामान्यवचनानर्थक्याच्च तत्रहिसामान्यवचनस्यविशेषवचनेनोपसंहारः यत्रसामान्यविशेषसंबंधज्ञानेनवचन
द्वयमर्थवत् यथासप्तदशसामिधेनीरनुब्रूयादितिअनारभ्याधीतस्यविकृतिमात्रविषयस्यसप्तदशवाक्यस्यसामिधेनीलक्षणद्वारसंबंधेनार्थवशात् मि
त्रविंदादिप्रकरणपठितेनपंचदशवाक्येनमित्रविंदाद्यधिकारात्पूर्वसंबंधबोधेनार्थवत्त्वामित्रविंदादिप्रकरणेउपसंहारः इहतुद्वयोर्मृताहमात्रविष
यत्वान्नार्थवत्त्वेति अतोत्रपाक्षिकैकोद्दिष्टनिवृत्तिफलकतयापार्वणनियमविधानंयुक्तं नचैकोद्दिष्टवचनानांमातापितृक्षयाहविषयत्वेनपार्वणवच

नानांचतदन्यक्षयाहविषयत्वेनव्यवस्थायुक्ता उभयत्रापिमातापितृकर्तृग्रहणस्यविद्यमानत्वात् सपिंडीकरणादूर्ध्वंप्रतिसंवत्सरंकर्तृभिः मातापित्रोः
पृथक्कार्यमेकोद्दिष्टंमृतेहनीति तथा आपाद्यसहपिंडत्वमौरसोविधिवत्सुतः कुर्वीतदर्शवच्छ्राद्धंमातापित्रोःक्षयेहनीति यदपिकैश्चिदुच्यते
मातापित्रोःक्षयाहेसाग्निःपार्वणंकुर्यान्निरग्निरेकोद्दिष्टमिति वर्षेवर्षेकृतःकुर्यात्पार्वणंयोग्निमान्द्विजः पित्रोरनग्निमान्धीरएकोद्दिष्टंमृतेहनीति
सुमंतुस्मरणात् तदपिसत्स्वपिपक्षत्वादुपेक्षणीयं बव्हृग्नयस्तुयेविप्रायेचैकाग्नयएवच तेषांसपिंडनादूर्ध्वमेकोद्दिष्टंनपार्वणमितिस्मरणात् तन्नै
वंनिर्णयः संन्यासिनांक्षयाहेकृतेनपार्वणमेवकर्त्तव्यं एकोद्दिष्टंयतेर्नास्तित्रिदंडग्रहणादिह सपिंडीकरणाभावात्पार्वणंतस्यसर्वदेतिप्रचेतसः

पिंडांस्तुगोजविप्रेभ्योदद्यादग्नौजलेपिवा प्रक्षिपेत्सत्सुविप्रेषुद्विजोच्छिष्टंनमार्जयेत् २५६

स्मरणात् अमावास्यायांक्षयाहेप्रेतपक्षक्षयाहेचपार्वणमेव अमावास्यांक्षयोयस्यप्रेतपक्षेथवापुनरित्यादिवचनस्योक्तरीत्यानियमपरत्वात् अन्यत्र
क्षयाहेपार्वणैकोद्दिष्टयोर्व्रीहियववद्विकल्पएव तथापिवंशसमाचारव्यवस्थायांसत्यांव्यवस्थितोविकल्पः असत्यामिच्छेत्यलमतिप्रसंगेन २५५ नि
त्यश्राद्धव्यतिरिक्तसर्वश्राद्धशेषमिहाभिधीयते पूर्वदत्तानांपिंडानांपिंडस्यवाप्रतिपत्तिरियं गवेअजायब्राह्मणायवातदर्थिनेपिंडान्दद्यात् अग्नावगाधे ६०
जलेवाप्रक्षिपेत् किंचसत्सुविप्रेषुभोजनदेशावस्थितेषुद्विजोच्छिष्टंनमार्जयेत् नोद्वासयेत् २५६ ७ ७ ७

भोज्यविशेषेणफलविशेषमाह हविष्यंहविर्योग्यंतिलव्रीह्यादि यथाहमनुः तिलैर्व्रीहियवैर्माषैरद्भिर्मूलफलेनवा दत्तेनमासंप्रीयंतेविधिवत्पि
तरोनृणामिति तदन्नंहविष्यान्नंतेनमासंपितरस्तृप्यंतीत्यनागतेनान्वयः पायसेनगव्यपयःसिद्धेनसंवत्सरं संवत्सरंतुगव्येनपयसापायसेनचेतिस्म
रणात् मत्स्योभक्ष्यःपाठीनादिस्तस्येदंमात्स्यं हरिणस्ताम्रमृगः एणःकृष्णः एणःकृष्णमृगोज्ञेयस्ताम्रोहरिणउच्यतेइत्यायुर्वेदस्मरणात् तस्येदंहा
रिणकं उरभ्रःअविस्तत्संबंधिऔरभ्रं शाकुनंभक्ष्यपक्षिसंबंधि छागःअजस्तदीयं छागं पृषच्चित्रमृगस्तन्मांसंपार्षतं एणःकृष्णमृगस्तत्पिशित

हविष्यान्नेनवैमासंपायसेनतुवत्सरम् मात्स्यहारिणकौरभ्रशाकुनच्छागपार्षतैः २५७ एणरौर
ववाराहशाशैर्मांसैर्यथाक्रमम् मासवृद्ध्याभितृप्यंतिदत्तैरिहपितामहाः २५८ खड्गामिषंमहाशल्कं
मधुमुन्यन्नमेवच लोहामिषंमहाशाकंमांसंवाध्रीणसस्यच २५९

मैणं रुरुःशंबरस्तत्प्रभवंरौरवं वराहआरण्यसूकरस्तज्जंवाराहं शशास्येदंशाशं एभिर्मांसैः पितृभ्योदत्तैर्हविष्यान्नेन चैमासमित्युक्तत्वात्ततऊ-
र्ध्वयथाक्रमंएकैकमासवृद्ध्यापितरस्तृप्यंति २५७ २५८ किंच खड्गोगंडकस्तस्यमांसं महाशल्कोमत्स्यभेदः मधुमाक्षिकं मुन्यन्नंसर्वमारण्यं

नीवारादि लोहोरक्तच्छागः तदामिषंलोहामिषं महाशाकंकालशाकं वार्ध्रीणसोवृद्धः श्वेतच्छागः त्रिपिबंत्विंद्रियक्षीणंश्वेतंवृद्धमजापतिं वार्ध्रीणसंतुतंप्राहुर्याज्ञिकाःश्राद्धकर्मणीतियाज्ञिकप्रसिद्धः त्रिपिबः पिबतः कर्णौजिह्वाचयस्यजलंस्पृशातिसत्रिभिःपिबतीतित्रिपिबःतस्य वार्ध्रीणसस्यमांसंयद्ददाति गयास्थश्चयत्किंचिच्छाकादिकमपिगयास्थोददाति चशब्दात्गंगाद्वारादिषुच गंगाद्वारेप्रयागेचनैमिषेपुष्करेर्बुदे संनिहत्यांगयायांचश्राद्धमक्षय्यतांव्रजेत् आनंत्यमश्नुतेइति अनंतफलहेतुत्वंप्राप्नोति आनंत्यमश्नुतइतिप्रत्येकंसंबध्यते तथावर्षात्रयोदश्यांभाद्रपदकृष्णत्रयोदश्यांविशेषतोमघायुक्तायांयत्किंचिद्दीयतेतत्सर्वमानंत्यमश्नुतइतिगतेनसंबंधः अत्रयद्यपिमुन्यन्नमांसमध्वा-

यद्ददातिगयास्थश्चसर्वमानंत्यमश्नुते तथावर्षात्रयोदश्यांमघासुचविशेषतः २६०

दीनिसर्ववर्णानांसामान्येनश्राद्धेयोग्यानिदर्शितानितथापिपुलस्त्योक्ताव्यवस्थाआदरणीया मुन्यन्नंब्राह्मणस्योक्तंमांसंक्षत्रियवैश्ययोः मधुप्रदानंशूद्रस्यसर्वेषांचाविरोधियदिति अस्यायमर्थः मुन्यन्ननीवारादियच्छ्राद्धयोग्यमुक्तंतद्ब्राह्मणस्यप्रधानंसमग्रफलदं यच्चमांसमुक्तं तत्क्षत्रियवैश्ययोःप्रधानं यत्क्षौद्रमुक्तंतच्छूद्रस्य एतत्त्रितयव्यतिरिक्तंयदविरोधियदप्रतिषिद्धंवास्तुकादि यच्चविहितंहविष्यंकालशाकादितत्सर्वेषांसमग्रफलदमिति २५९ २६० ७ ७ ७ ७ ७ 

तिथिविशेषात्फलविशेषमाह कन्यांरूपलक्षणशीलवतीं कन्यावेदिनोजामातरः बुद्धिरूपलक्षणसंपन्नाः पशवः क्षुद्राः अजादयः सत्सुताः सन्मार्गवर्त्तिनः द्यूतंद्यूतविजयः कृषिःकृषिफलं वाणिज्यंवाणिज्यलाभः द्विशफागवादयः एकशफाअश्वादयः ब्रह्मवर्चस्विनःपुत्राःवेदाध्ययनतदर्थानुष्ठानजनितंतेजोब्रह्मवर्चसंतद्वंतः स्वर्णरूप्येहेमरजते तद्व्यतिरिक्तंत्रपुसीसादिकुप्यकं जातिश्रैष्ठ्यंजातिषूत्कृष्टत्वं सर्वकामाःकाम्यंतइतिकामाःस्वर्गपुत्रपश्वादयःएतानिकन्यादीनिचतुर्दशफलानिकृष्णप्रतिपत्प्रभृतिषमावास्यापर्यंतात्सुचतुर्दशीवर्जितासुचतुर्दशसुतिथिषुश्रा-

कन्यांकन्यावेदिनश्चपशून्वैसत्सुतानपि द्यूतंकृषिंचवाणिज्यंद्विशफैकशफंतथा २६१ ब्रह्मवर्चस्विनःपुत्रान्स्वर्णरूप्येसकुप्यके जातिश्रैष्ठ्यंसर्वकामानाप्नोतिश्राद्धदःसदा २६२ प्रतिपत्प्रभृतिष्वेकांवर्जयित्वाचतुर्दशीं शस्त्रेणतुहतायेवैतेभ्यस्तत्रप्रदीयते २६३

द्धदोयथाक्रमप्राप्नोति येकेचनशस्त्रहतास्तेभ्यःकृष्णचतुर्दश्यामेकोद्दिष्टविधिनाश्राद्धंदद्यात् यदिब्राह्मणादिहतानभवंति समत्वमागतस्यापिपितुःशस्त्रहतस्यवै एकोद्दिष्टंसुतैःकार्यंचतुर्दश्यांमहालयेइतिस्मरणात् समत्वमागतस्यसपिंडीकृतस्यमहालयेभाद्रपदकृष्णचतुर्दश्यांशस्त्रहतस्यैवश्राद्धंनान्यस्येतिनियम्यतेनपुनःशस्त्रहतस्यचतुर्दश्यामेवेति अतश्चक्षयाहादौशस्त्रहतस्यापियथाप्राप्तमेवश्राद्धंनचभाद्रपदकृष्णपक्षएवायंविधिरितिमंतव्यं प्रोष्ठपद्यामपरपक्षेमासिमासिचैवमितिशौनकस्मरणात् २६१ २६२ २६३ ७ ७

नक्षत्रविशेषात्फलविशेषमाह कृत्तिकामादिं कृत्वा भरण्यंतं प्रतिनक्षत्रं यः श्राद्धं ददाति स यथाक्रमं स्वर्गादीनायुःपर्यंतान्कामानवाप्नोति य ग्रास्ति कः श्रद्दधानश्चेत् व्यपेतमदमत्सरो भवति आस्तिको विश्वासवान् श्रद्दधानः आदरातिशययुक्तः व्यपेतमदमत्सरः मदो गर्वः मत्सर ईर्ष्या ताभ्यां रहितः स्वर्गं निरतिशयसुखं अपत्यमविशेषेण ओजः आत्मशक्त्यतिशयः शौर्यं निर्भयत्वं क्षेत्रं फलवत् बलं शारीरं पुत्रो गुणवान् श्रैष्ठ्यं ज्ञातिषु सौभाग्यं जनप्रियता समृद्धिर्धनादेः मुख्यता अग्र्यता शुभं सामान्येन प्रवृत्तचक्रता अप्रतिहताज्ञता वाणिज्यप्रभृतयः वाणिज्यकृषिकुसीदगोरक्षाः अरोगित्वं

स्वर्गं ह्यपत्यमोजश्च शौर्यं क्षेत्रं बलं तथा पुत्रं श्रैष्ठ्यं ससौभाग्यं समृद्धिं मुख्यतां शुभम् २६४ प्रवृत्तचक्रतां चैव
वाणिज्यप्रभृतीनपि अरोगित्वं यशो वीतशोकतां परमां गतिम् २६५ धनं वेदान्भिषक्सिद्धिं कुप्यं गा अप्यजा
विकाम् अश्वानायुश्च विधिवद्यः श्राद्धं संप्रयच्छति २६६ कृत्तिकादिभरण्यंतं स कामानाप्नुयादिमान् आस्तिकः श्र
द्दधानश्च व्यपेतमदमत्सरः २६७

अनामययोगित्वं यशः प्रख्यातिः वीतशोकता इष्टवियोगादिजनितदुःखाभावः परमा गतिः ब्रह्मलोकप्राप्तिः धनं सुवर्णादि वेदा ऋग्वेदादयः भिषक्सिद्धिः औषधफलावाप्तिः कुप्यं सुवर्णरजतव्यतिरिक्तं ताम्रादि गावः प्रसिद्धाः अजाश्च अवयश्च अश्वाश्च आयुर्दीर्घजीवनं मासवृध्याभितृप्यंति दत्तैरिह पितामहा इत्यनेन पितॄणां श्राद्धेन तृप्तिर्भवतीत्युक्तं तदनुपपन्नं प्रातिस्विकशुभाशुभकर्मवशेन स्वर्गनरकादिगतानां मनुष्याणां पुत्रादिभिर्दत्तैरन्नपानादिभिस्तृप्त्यसंभवात् २६४ २६५ २६६ २६७ ६२

संभवेपि स्वयमात्मनाप्यनीशाः कथं स्वर्गादिफलं प्रयच्छंतीत्यत आह नह्यत्र देवदत्तादय एव श्राद्धकर्मणि संप्रदानभूताः पित्रादिशब्दैरुच्यंते किंत्वधिष्ठातृवस्वादिदेवतासहिता एव यथा देवदत्तादिशब्देन शरीरमात्रं नाप्यात्ममात्रं किंतु शरीरविशिष्टा आत्मान उच्यंते एवमधिष्ठातृदेवतासहिता एव देवदत्तादयः पित्रादिशब्दैरुच्यंते अतश्चाधिष्ठातृदेवता वस्वादयः पुत्रादिभिर्दत्तेनान्नपानादिना तृप्ताः संतस्तानपि देवदत्तादींस्तर्पयंति कर्तॄंश्च पुत्रादीन् फलेन संयोजयंति यथा माता गर्भपोषणायान्यदत्तेन दोहदान्नपानादिनास्वयमुपभुक्तेन तृप्ता सती स्वजठरगतमप्यपत्यं तर्पयति दोहदान्नादिप्रदायिनश्च प्रत्युपकारफलेन संयोजयति तद्वद्वसवो रुद्रा अदितिसुताः आदित्या एते पितरः पितृपितामहप्रपितामहशब्दवाच्याः न केवलं देवदत्तादय एव श्राद्धदेवताः श्राद्धकर्मणि संप्रदानभूताः किंतु मनुष्याणां पितॄन् देवदत्तादीन् स्वयं श्राद्धेन तर्पितास्तर्पयंति ज्ञानशक्त्यतिशययोगेन किंच न केवलं पितॄंस्तर्पयंति अपि तु श्राद्धकारिभ्यः आयुः प्रजां धनं विद्यां स्वर्गं मोक्षं सुखानि च प्रयच्छंति तथा राज्यं प्रीता नृणां पितामहाः चकारात्तत्र तत्र शास्त्रोक्तमन्यदपि फलं स्वयं प्रीताः पितामहा वस्वादयः प्रयच्छंतीति इति श्राद्धप्रकरणं २६८ २६९ ७ ७

वसुरुद्रादितिसुताः पितरः श्राद्धदेवताः प्रीणयंति मनुष्याणां पितॄन् श्राद्धेन तर्पिताः २६८ आयुः प्रजां धनं
विद्यां स्वर्गं मोक्षं सुखानि च प्रयच्छंति तथा राज्यं प्रीता नृणां पितामहाः २६९

दृष्टादृष्टफलसाधनानिकर्माण्यभिहितान्यप्यभिधास्यंतेचतेषांस्वरूपनिष्पत्तिः फलसाधनत्वंचाविघ्नेन भवतीत्यविघ्नार्थंकर्मविधास्यन्नविघ्नस्य
कारकज्ञापकहेतूनाह विनायकः कर्मविघ्नसिद्ध्यर्थमित्यादिनोभयविधहेतुपरिज्ञानाद्विघ्नस्यप्रागभावपरिपालनायोपस्थितस्यप्रध्वंसायवाप्रेक्षापू
र्वकारिणः प्रवर्त्तंते रोगस्येवोभयविधहेतुपरिज्ञानात् विनायकोविघ्नेश्वरः पुरुषार्थसाधनानांकर्मणांविघ्नसिद्ध्यर्थंस्वरूपफलसाधनत्वविघात
सिद्ध्येविनियोजितः नियुक्तः रुद्रेणब्रह्मणाचकाराद्विष्णुनाच गणानांपुष्पदंतप्रभृतीनामाधिपत्येस्वाम्येच ७० एवंविघ्नस्यकारकहेतुमुक्त्वाज्ञा

विनायकः कर्मविघ्नसिद्ध्यर्थंविनियोजितः गणानामाधिपत्येचरुद्रेणब्रह्मणातथा २७० तेनोपसृष्टोयस्तस्य
लक्षणानिनिबोधत स्वप्नेवगाहतेत्यर्थंजलंमुंडांश्चपश्यति २७१ काषायवाससश्चैवक्रव्यादांश्चाधिरोहति
अंत्यजैर्गर्दभैरुष्ट्रैःसहैकत्रावतिष्ठते २७२

पकहेतुप्रदर्शनार्थमाह तेनविनायकेनोपसृष्टोगृहीतोयस्तस्यलक्षणानिज्ञापकानिनिबोधत
जानीध्वं हेमुनयः पुनर्मुनीनांप्रत्यवमर्शः शांतिप्रकरणप्रारंभार्थः स्वप्नेस्वप्नावस्थायांजलमत्यर्थमवगाहतेस्रोतसाह्रियतेनिमज्जतिवा मुंडितशिरसःपु
रुषान्पश्यति काषायवाससोरक्तनीलादिवस्त्रप्रावरणांश्चक्रव्यादानाममांसाशिनः पक्षिणोगृध्रादीन्मृगांश्चव्याघ्रादीन् अधिरोहति तथांत्यजैश्चांडाला ६३
दिभिः गर्दभैःखरैरुष्ट्रैः क्रमेलकैः सहपरिवृतस्तिष्ठति व्रजन्गच्छन्नात्मानंपरैः शत्रुभिः पृष्ठतोधावद्भिरनुगतमभिभूयमानंआत्मानंमन्यते २७१ २७२

एवंस्वप्नदर्शनान्युक्त्वाप्रत्यक्षलिंगान्याह विमनाविक्षिप्तचित्तः विफलारंभः विफलाआरंभायस्यसतथोक्तः नक्वचित्फलमाप्नोति संसीदत्यनिमित्त
तः विनाकारणेनदीनमनस्कोभवति राजनंदनोराजकुलेजातः श्रुतशौर्यधैर्यादिगुणयुक्तोपिराज्यंनलभते कुमारीरूपलक्षणाभिजनादिसंपन्नापी
प्सितंभर्त्तारं अंगनागर्भिण्यपत्यं ऋतुमतीगर्भं अध्ययनतदर्थज्ञानेसत्यप्याचार्यत्वंश्रोत्रियः विनयाचारयुक्तोपिशिष्योध्ययनंश्रवणंवानलभते

व्रजन्नपितथात्मानंमन्यतेनुगतंपरैः विमनाविफलारंभःसंसीदत्यनिमित्ततः २७३ तेनोपसृष्टोलभतेनरा
ज्यंराजनंदनः कुमारीचनभर्त्तारमपत्यंगर्भमंगना २७४ आचार्यत्वंश्रोत्रियश्चनशिष्योध्ययनंतथा वणि
ग्लाभंनचाप्नोतिकृषिंचापिकृषीवलः २७५ स्नपनंतस्यकर्त्तव्यंपुण्येन्हिविधिपूर्वकम् गौरसर्षपकल्केन
साज्येनोत्सादितस्यच २७६ सर्वौषधैःसर्वगंधैर्विलिप्तशिरसस्तथा भद्रासनोपविष्टस्यस्वस्तिवाच्याद्विजाः
शुभाः २७७

इतिसर्वत्रसंबध्यते वणिक्वाणिज्योपजीवी तत्रकुशलोपिधान्यादिक्रयविक्रयादिषुलाभं कृषीवलः कर्षकः तत्राभियु-
क्तोपिकृषिफलंनाप्नोति एवंयोययावृत्याजीवतिसतत्रनिष्फलारंभश्चेत्तेनोपसृष्टोवेदितव्यः २७३ २७४ २७५ एवंकारकज्ञापकहेतूनभिधाय
विघ्नोपशांत्यर्थंकर्मविधातुमाह तस्यविनायकोपसृष्टस्यानागतविनायकोपसर्गपरिहारार्थिनोवास्नपनमभिषेचनंकर्त्तव्यं पुण्येस्वानुकूलनक्षत्रा

दिष्टुक्तेन्हि दिवसेनरात्रौविधिपूर्वकं शास्त्रोक्तेतिकर्त्तव्यतासहितं स्नपनविधिमाह गौरसर्षपकल्केनसिद्धार्थपिष्टेनसाज्येनघृतलोलीकृतेनोत्सादि
तस्योद्वर्त्तितांगस्य तथासर्वौषधैः प्रियंगुनागकेसरादिभिः सर्वगंधैश्चंदनागरुकस्तूरिकादिभिर्विलिप्तशिरसोवक्ष्यमाणभद्रासनोपविष्टस्य द्विजाब्रा
ह्मणाः शस्ताः श्रुताध्ययनवृत्तसंपन्नाः शोभनाकृतयश्चत्वारोस्यस्वस्तिभवंतोब्रुवंत्विति वाच्याः अस्मिन्समयेगृह्योक्तमार्गेणपुण्याहवाचनंकुर्यादि
त्यर्थः २७६ २७७ किंच अश्वस्थानगजस्थानवल्मीकसरित्संगमाशोष्यह्रदेभ्य आहृतांपंचविधांमृदंगोरोचनांगंधान् चंदनकुंकुमागरुप्रभृ

अश्वस्थानाद्गजस्थानाद्वल्मीकात्संगमाद्ध्रदात् मृत्तिकांरोचनांगंधान्गुग्गुलुंचाप्सुनिक्षिपेत् २७८
याआहृताह्येकवर्णैश्चतुर्भिः कलशैर्ह्रदात् चर्मण्यानडुहेरक्तेस्थाप्यंभद्रासनंततः २७९

तीन्गुग्गुलुंचतास्वप्सुविनिक्षिपेत् याआपः आहृताएकवर्णैः समानवर्णैश्चतुर्भिः कुंभैः शुभैरव्रणास्फुटिताकालकैर्ह्रदादशोष्यात्संगमा
द्वा ततश्चानडुहेचर्मणिरक्तेलोहितवर्णेउत्तरलोमनिप्राचीनग्रीवेभद्रंमनोरममासनंश्रीपर्णीनिर्मितंस्थाप्यं ततउक्तोदकमृत्तिकागंधादिसहि
तांश्चूतादिपल्लवोपशोभितान्नानास्रग्दामवेष्टितकंठान् चंदनचर्चितान् नवाहतवस्त्रविभूषितान् चतसृषुपूर्वादिदिक्षुसंस्थापयित्वाशुक्लौवि 

ओष्ठ २ कुष्ठंमांसीहरिद्रेद्वेमुराशैलेयचंदनं वचाकचोरकंमुस्तासर्वौषध्यः प्रकीर्त्तिताः

लिप्तेस्थंडिलेरचितपंचवर्णस्वस्तिकेलोहितमानडुहंचर्मोत्तरलोमप्राचीनग्रीवमास्तीर्यतस्योपरिश्वेतवस्त्रप्रच्छादितमासनंस्थापयेदित्येतद्भद्रा
सनमेतस्मिन्नुपविष्टस्यस्वस्तिवाच्याः द्विजाः २७८ २७९ किंच स्वस्तिवाचनानंतरंजीवत्पतिपुत्राभिः रूपगुणशालिनीभिः सुवेषाभिः कृतमंग
लंपूर्वदिग्देशावस्थितंकलशमादायानेनमंत्रेणाभिषिंचेद्गुरुः सहस्राक्षमनेकशक्तिकंशतधारंबहुप्रवाहमृषिभिर्मन्वादिभिर्यदुदकंपावनंपवि
त्रंकृतंउत्पादितंतेनोदकेनत्वांविनायकोपसृष्टंविनायकोपसर्गशांतये अभिषिंचामि पावमान्यश्चैता आपस्त्वांपुनंतु तदनंतरंदक्षिणदेशावस्थि

सहस्राक्षंशतधारमृषिभिःपावनंकृतम् तेनत्वामभिषिंचामिपावमान्यःपुनंतुते २८० भगंतेवरुणो
राजा भगंसूर्योबृहस्पतिः भगमिंद्रश्चवायुश्च भगंसप्तर्षयोददुः २८१ यत्तेकेशेषुदौर्भाग्यंसीमंतेयच्च
मूर्धनि ललाटेकर्णयोरक्ष्णोरापस्तद्घ्नंतुसर्वदा २८२

तंद्वितीयंकलशमादायानेनमंत्रेणाभिषिंचेत् २८० भगंकल्याणंतेतु-
भ्यंवरुणोवरुणोराजाभगंसूर्योभगंबृहस्पतिः भगमिंद्रश्चवायुश्च भगंसप्तर्षयश्चददुरिति ततस्तृतीयंकलशमादायानेनमंत्रेणाभिषिंचेत् २८१
तेतवकेशेषुदौर्भाग्यंअकल्याणंसीमंतेमूर्द्धनिचललाटेकर्णयोरक्ष्णोश्चतत्सर्वमापोदेव्योघ्नंतुउपशमयंतुसर्वदा ततश्चतुर्थंकलशमादायपूर्वोक्तैस्त्रि
भिर्मंत्रैरभिषिंचेत् सर्वैर्मंत्रैश्चतुर्थमितिमंत्रलिंगात् २८२

उक्तेनप्रकारेणकृताभिषेकस्यमूर्धनिसव्यपाणिगृहीतकुशांतर्हितेसार्षपंतैलंउदुंबरवृक्षोद्भवेनस्रुवेणवक्ष्यमाणैर्मंत्रैर्जुहुयादाचार्यः२८३ मित
संमितादिभिर्विनायकस्यनामभिःस्वाहाकारांतैःप्रणवादिभिर्जुहुयादितिगतेनसंबंधः स्वाहाकारयोगाच्चतुर्थीविभक्तिःअतश्च ओंमितायस्वाहा
ओंसंमितायस्वाहा ओंशालायस्वाहा ओंकटंकटायस्वाहा ओंकूश्मांडायस्वाहा ओंराजपुत्रायस्वाहेतिषट्मंत्राभवंति अनंतरंलौकिकेग्नौस्था 

स्नातस्यसार्षपंतैलंस्रुवेणौदुंबरेणतु जुहुयान्मूर्धनिकुशान्सव्येनपरिगृह्यतु २८३ मितश्चसंमितश्चैव
तथाशालकटंकटौ कूश्मांडोराजपुत्रश्चेत्यंतेस्वाहासमन्वितैः २८४ नामभिर्बलिमंत्रैश्चनमस्कारसमन्वितैः
दद्याच्चतुष्पथेशूर्पेकुशानास्तीर्यसर्वतः २८५ कृताकृतांस्तंदुलांश्चपललौदनमेवच मत्स्यान्पक्कांस्तथैवामा
न्मांसमेतावदेवतु २८६ पुष्पंचित्रंस्रुगंधंचसुरांचत्रिविधामपि मूलकंपूरिकापूपंतथैवोंडेरकस्रजः २८७ दध्य
न्नंपायसंचैवगुडपिष्टंसमोदकम् एतान्सर्वान्समाहृत्यभूमौकृत्वाततःशिरः २८८ विनायकस्यजननीमुपतिष्ठे
त्तनोंबिकाम् दूर्वासर्षपपुष्पाणांदत्वार्घ्यंपूर्णमंजलिम् २८९

लीपाकविधिनाचरुंश्रपयित्वाएतैरेवषड्भिर्मंत्रैस्तस्मिन्नेवाग्नौहुत्वात
च्छेषंबलिमंत्रैरिंद्राग्नियमनिर्ऋतिवरुणवायुसोमेशानब्रह्मानंतानांनामभिश्चतुर्थ्यंतैर्नमोन्वितैस्तेभ्योबलिंदद्यात् अनंतरंकिंकुर्यादित्याह ६५

कृताकृताद्युपहारद्रव्यजातंविनायकस्योपाहृत्यसंनिधानात्तज्जनन्याश्चशिरसाभूमिंगत्वा तत्पुरुषायविद्महेवक्रतुंडायधीमहि तन्नोदंतीप्रचोदया
दित्यनेनमंत्रेणविनायकं स्रुभगायैविद्महेकाममालिन्यैधीमहि तन्नोगौरीप्रचोदयादित्यनेनांबिकांच नमस्कुर्यात् ततउपहारशेषमास्तीर्णकुशेशूर्
पेनिधायचतुष्पथेनिदध्यात् बलिंगृण्हंत्विमेदेवाआदित्यावसवस्तथा मरुतश्चाश्विनौरुद्राःस्रुपर्णःपन्नगाग्रहाः असुरायातुधानाश्चपिशाचोरगमा
तरः शाकिन्योयक्षवेतालायोगिन्यःपूतनाःशिवाःजृंभकाःसिद्धगंधर्वामायाविद्याधरानराः दिक्पालालोकपालाश्चयेचविघ्नविनायकाः जगतांशां
तिकर्त्तारोब्रह्माद्याश्चमहर्षयः माविघ्नमाचमेपापंमासंतुपरिपंथिनः सौम्याभवंतुतृप्ताश्चभूतप्रेताःसुखावहाः इत्येतैर्मंत्रैः कृताकृताः सकृदवहता
स्तंदुलाः पललंतिलपिष्टंतन्मिश्रओदनः पललौदनः मत्स्याःपक्काअपक्काश्चमांसमेतावदेवच पक्कमपक्कंच पुष्पंचित्रंरक्तपीतादिनानावर्णं चं
दनादिस्रुगंधद्रव्यं स्रुरात्रिविधा गौडीमाध्वीपैष्टीच मूलकंमूलककंदाकारोभक्ष्यविशेषः पूरिकाप्रसिद्धा अपूपःस्नेहपक्कोगोधूमविकारःउंडेर
कस्रजः उंडेरकाःपिष्टादिमय्यः ताःप्रोताःस्रजः दध्यन्नंदधिमिश्रमन्नं पायसं गुडपिष्टंगुडमिश्रंशाल्यादिपिष्टं मोदकालड्डुकाः अनंतरंविनायकं
तज्जननीमंबामंबिकांवक्ष्यमाणमंत्रेणोपतिष्ठेत् किंकृत्वेत्याह सकुस्रुमोदकेनार्घ्यंदत्वादूर्वासर्षपपुष्पाणांपूर्णमंजलिंदत्वोपतिष्ठेदितिगतेना
न्वयः २८४ २८५ २८६ २८७ २८८ २८९ उपस्थानमंत्रमाह विनायकोपस्थानेभगवन्निस्पृहः ततोभिषेकानंतरंयजमा
नः शुक्लांबरधरः शुक्लमाल्यानुलेपनोब्राह्मणान्भोजयेत् यथाशक्तिगुरवेश्रुताध्ययनवृत्तसंपन्नायविनायकस्नपनविधिज्ञायवस्त्रयुग्मंदद्यात्
अपिशब्दाद्यथाशक्तिदक्षिणांविनायकोद्देशेनब्राह्मणेभ्यश्च तत्रायंप्रयोगक्रमः चतुर्भिर्ब्राह्मणैःसार्धंमुक्तलक्षणोगुरुर्मंत्रज्ञोभद्रासनरचनानं-

तरंतत्संनिधौविनायकंतज्जननींचोक्तमंत्राभ्यांगंधपुष्पादिभिः समभ्यर्च्यचरुंश्रपयित्वाभद्रासनोपविष्टस्ययजमानस्यपुण्याहवाचनंकृत्वाचतुर्भिः कलशैरभिषिच्यसार्षपंतैलंशिरसिहुत्वाचरुहोमंविधायाभिषेकशालायांचतुर्दिक्षुइंद्रादिलोकपालेभ्योबलिंदद्यात् यजमानस्तुस्नानानंतरंशु क्लमाल्यांबरधरोगुरुणासहितोविनायकांबिकाभ्यामुपहारंदत्वाशिरसाभूमिंगत्वाकुस्रुमोदकेनार्घ्यंदत्वादूर्वासर्षपपुष्पांजलिंचदत्वाविनायकमंबि

रूपंदेहियशोदेहि भगंभवतिदेहिमे पुत्रान्देहिधनंदेहिसर्वकामांश्चदेहिमे २९० ततःशुक्लांबरधरः
शुक्लमाल्यानुलेपनः ब्राह्मणान्भोजयेद्दद्याद्वस्त्रयुग्मंगुरोरपि २९१ एवंविनायकंपूज्यग्रहांश्चैवविधा
नतः कर्मणांफलमाप्नोतिश्रियंचाप्नोत्यनुत्तमाम् २९२

कांचोपतिष्ठेत् गुरुरुपहारशेषंशूर्पेकृत्वाशिरसाभूमिंगत्वाचत्वरेनि दध्यात् अनंतरंवस्त्रयुग्मंदक्षिणांब्राह्मणभोजनंचदद्यादिति इतिविनायकस्नपनविधिः २९० २९१ अस्यैवविनायकस्नपनस्यउक्तोपसंहारेण- संयोगांतरंदर्शयितुमाह एवमुक्तेनप्रकारेणविनायकंसंपूज्यकर्मणांफलमविघ्नेनाप्नोतीत्युक्तोपसंहारः संयोगांतरमाह श्रियंचोत्कृष्टतमामाप्नोती ६६ ति श्रीकामश्चानेनैवविधानेनविनायकंपूजयेदित्यर्थः आदित्यादिग्रहपीडाशांतिकामस्यलक्ष्म्यादिकामस्यचग्रहपूजादिकल्पंविधास्यन्ग्रहपूजासु

प्रक्षिपति ग्रहांश्चैवविधानतइति ग्रहानादित्यादीन्वक्ष्यमाणेनविधिनासंपूज्यकर्मणांसिद्धिमाप्नोतिश्रियंचाप्नोति २९२ नित्यकाम्यसंयोगानाह आदित्यस्यभगवतःसदाप्रतिदिवसंरक्तचंदनकुंकुमकुसुमादिभिःपूजांकुर्वन्स्कंदस्यमहागणपतेश्चनित्यंपूजांकुर्वन्सिद्धिंमोक्षमात्मज्ञानद्वारेण प्राप्नोतीतिनित्यसंयोगः आदित्यस्कंदमहागणपतीनामन्यतमस्यसर्वेषांवातिलकंस्वर्णादिनिर्मितंरूप्यनिर्मितंवाकुर्वन्सिद्धिमभिलषितामाप्नोति त थाचश्रीचेतिकाम्यसंयोगः इतिमहागणपतिकल्पः २९३ ग्रहांश्चैवविधानतःकर्मणांफलमाप्नोतिश्रियंचाप्नोत्यनुत्तमामित्यनेनग्रहपूजायाःकर्मणा

आदित्यस्यसदापूजांतिलकंस्वामिनस्तथा महागणपतेश्चैवकुर्वन्सिद्धिमवाप्नुयात् २९३ श्रीकामः
शांतिकामोवाग्रहयज्ञंसमाचरेत् वृष्ट्यायुःपुष्टिकामोवातथैवाभिचरन्नपि २९४ सूर्यःसोमोमहीपुत्रः
सोमपुत्रोबृहस्पतिः शुक्रःशनैश्चरोराहुःकेतुश्चेतिग्रहाःस्मृताः २९५

मविघ्नेनफलसिद्धिः श्रीश्चफलमित्युक्तमिदानींफलांतराण्याह श्रीकामइतिपूर्वोक्तस्यानुवादः शांतिकामआपदुपशांतिकामः सस्यादिवृद्ध्यर्थंप्रवर्ष णंवृष्टिः आयुरपमृत्युजयेनदीर्घकालजीवनं पुष्टिरनवद्यशरीरत्वं एताःकामयतइतिवृष्ट्यायुःपुष्टिकामः एतेश्रीकामादयोग्रहयज्ञंग्रहपूजांसमाच रेयुः तथाभिचरन्नपि अदृष्टोपायेनपरपीडाअभिचारः तत्कामश्चग्रहयज्ञंसमाचरेत् २९४ ग्रहानाह एतेसूर्यादयोनवग्रहाः २९५ ७ ७

ग्रहाः पूज्याइत्युक्तं किंकृत्वेत्याह सूर्यादीनांमूर्त्तयस्ताम्रादिभिर्यथाक्रमंकार्याः तदलाभेस्ववर्णैर्वर्णकैः पटेलेख्याः मंडलकेषुवा गंधैःरक्तचंद नादिभिर्यथावर्णेनलेख्याइत्यन्वयः द्विभुजत्वादिविशेषस्तुमत्स्यपुराणोक्तोद्रष्टव्यः यथा पद्मासनः पद्मकरः पद्मगर्भसमद्युतिः सप्ताश्वरथसं स्थश्चद्विभुजःस्यात्सदारविः श्वेतःश्वेतांबरधरोदशाश्वःश्वेतभूषणः गदापाणिर्द्विबाहुश्चकर्त्तव्योवरदःशशी रक्तमाल्यांबरधरः शक्तिशूलगदा धरः चतुर्भुजोमेषगमोवरदःस्याद्धरासुतः पीतमाल्यांबरधरःकर्णिकारसमद्युतिः खड्गचर्मगदापाणिः सिंहस्थोवरदोबुधः देवदैत्यगुरूताद्वत् पीतश्वेतौचतुर्भुजौ दंडिनौवरदौकार्यौसाक्षसूत्रकमंडलू इंद्रनीलद्युतिःशूलीवरदोगृध्रवाहनः बाणबाणासनधरः कर्त्तव्योर्कसुतःसदा करालवदनःखड्गचर्मशूलीवरप्रदः नीलःसिंहासनस्थश्चराहुरत्रप्रशस्यते धूम्राद्विबाहवःसर्वेगदिनोविकृताननाः गृध्रासनगतानित्यंकेतवःस्युर्वरप्रदाः सर्वेकिरीटिनःकार्याग्रहालोकहितावहाः स्वांगुलेनोच्छ्रिताःसर्वेशतमष्टोत्तरंसदेति एतेषांस्थापनदेशश्चतत्रैवोक्तः मध्येतुभास्करंविद्याल्लोहितंदक्षिणेनतु उत्तरेणगुरुंविद्याद्बुधंपूर्वोत्तरेणतु पूर्वेणभार्गवंविद्यात्सोमंदक्षिणपूर्वके पश्चिमे नशनिंविद्याद्राहुंपश्चिमदक्षिणे पश्चिमोत्तरतःकेतुंस्थाप्यावैशुक्लतंडुलैरिति पूजाविधिमाह यथावर्णंयस्ययग्रहस्ययोवर्णः तद्वर्णानिवस्त्रगंध पुष्पाणिदेयानि बलयश्च धूपश्चसर्वेभ्योगुग्गुलुर्देयः चरवश्चप्रतिदैवतंअग्निप्रतिष्ठापनान्वाधानादिपूर्वकंचतुरश्चतुरोमुष्टीन्निर्वपस्यमुष्मैत्वाजुष्टंनिर्वपामीत्यादिविधिनाकार्याः अनंतरंकृतसमिद्धोमाविध्माधानाद्याघारांतंकर्मकृत्वाआदित्याद्युद्देशेनयथाक्रमंवक्ष्यमाणमंत्रैर्वक्ष्यमाणाःसमिधोवक्ष्यमाणप्रकारेणहुत्वाचरवोहोतव्याः २९६ २९७ २९८ मंत्रानाह आकृष्णेनरजसावर्त्तमानइत्यादयोनवमंत्राः यथाक्रममादित्यादीनांवेदि

ताम्रकात्स्फाटिकाद्रक्तचंदनात्स्वर्णकादुभौ राजतादयसःसीसात्कांस्यात्कार्याग्रहाःक्रमात् २९६ स्ववर्णैर्वापटेलेख्यागंधैर्मंडलकेषुवा यथावर्णंप्रदेयानिवासांसिकुसुमानिच २९७ गंधाश्चबलयश्चैवधूपोदेयश्चगुग्गुलुः कर्त्तव्यामंत्रवंतश्चचरवःप्रतिदैवतम् २९८

आकृष्णेनइमंदेवा अग्निर्मूर्धादिवःककुत् उद्बुध्यस्वेतिचऋचोयथासंख्यंप्रकीर्त्तिताः २९९ बृहस्पतेअतियदर्यस्तथैवान्नात्परिस्रुतः शंनोदेवीस्तथाकांडात्केतुंकृण्वन्निमांस्तथा ३०० अर्कःपलाशखदिरअपमार्गोथपिप्पलः औदुंबरःशमीदूर्वाकुशाश्चसमिधःक्रमात् ३०१ एकैकस्यत्वष्टशतमष्टाविंशतिरेवच होतव्यामधुसर्पिर्भ्यांदध्नाक्षीरेणवायुताः ३०२

तव्याः २९९ ३०० इदानींसमिधआह अर्कपलाशादयोयथाक्रमंसूर्यादीनांसमिधोभवंति ताश्चसार्द्राअभग्नाःसत्वचःप्रादेशमात्राःकर्त्तव्याः ३०१ किंच आदित्यादीनामेकैकस्याष्टशतसंख्याअष्टाविंशतिसंख्यावायथासंभवंमधुनासर्पिषादध्नाक्षीरेणवायुताअक्ताःअर्कादिसमिधोहोतव्याः ३०२ ७ ७ ७ ७

इदानींभोजनान्याह गुडमिश्रओदनोगुडौदनः पायसंहविष्यंसुन्यन्नादि क्षीरषाष्टिकंक्षीरमिश्रः षाष्टिकौदनः दध्नामिश्रओदनोदध्योदनः हविर्घृतौदनः चूर्णंतिलचूर्णमिश्रओदनः मांसंभक्ष्यमांसमिश्रओदनः चित्रौदनः नानावर्णौदनः एतानिगुडौदनादीनि यथाक्रममादित्याद्युद्देशेन भोजनार्थंद्विजेभ्योब्राह्मणेभ्योदद्यात् ब्राह्मणसंख्यायथाविभवंद्रष्टव्या गुडौदनाद्यभावेतुयथालाभमोदनादिपादप्रक्षालनादिविधिपूर्वकंसत्कृत्यसंमानपुरःसरंदद्यात् ३०३ ३०४ दक्षिणामाह धेनुःदोग्ध्री शंखःप्रसिद्धः अनड्वान्भारसहोबलीवर्दः हेमकनकवर्णं वासःपीतं हयः

गुडौदनंपायसंचहविष्यंक्षीरषाष्टिकम् दध्योदनंहविश्चूर्णंमांसंचित्रान्नमेवच ३०३ दद्याद्ग्रहक्रमादेवद्विजेभ्योभोजनंद्विजः शक्तितोवायथालाभंसत्कृत्यविधिपूर्वकम् ३०४ धेनुःशंखस्तथानड्वान्हेमवासोहयःक्रमात् कृष्णागौरायसंछागएतावैदक्षिणाःस्मृताः ३०५ यश्चयस्ययदादुष्टःसतंयत्नेनपूजयेत् ब्रह्मणैषांवरोदत्तः पूजिताःपूजयिष्यथ ३०६

पांडुरः कृष्णागौः आयसंशस्त्रादि छागःप्रसिद्धः एताधेन्वादयोयथाक्रममादित्याद्युद्देशेनब्राह्मणानांदक्षिणाःस्मृताः उक्तामन्वादिभिः एतच्चसंभवेसति असंभवेतुयथालाभंशक्तितोन्यदेवयत्किंचिद्देयं ३०५ शांतिकामनाविशेषेणसर्वेग्रहाःपूजयितव्याइत्युक्तंतत्रविशेषमाह यस्यपुरुषस्ययोग्रहोयदादुष्टोष्टमादिस्थानस्थितःसतंग्रहंतदायत्नेनविशेषेणपूजयेत् यस्मादेषांग्रहाणांब्रह्मणापूर्ववरोदत्तः ६८

तः पूजिताःसंतोयूयमिष्टप्रापणेनानिष्टनिरसनेनच पूजयितारंपूजयिष्यथेति अविशेषेणाद्विजानधिकृत्यशांतिकपौष्टिकादीनिकर्माण्यनुक्रांतानि तत्राभिषेकयुक्तस्यराज्ञोविशेषेणाधिकारइति ३०६ नरेंद्राणामभिषिक्तक्षत्रियाणांग्रहाःपूज्यतमाः अथचान्येषामपिपूज्याइतिगम्यतेउभयत्रकारणमाह प्राणिनामभ्युदयविनिपाताःग्रहाधीनाः यस्मात्तदधिकारिभिःपूज्याः किंच जगतश्चस्थावरजंगमात्मकस्यभावाभावावुत्पत्तिनिरोधौग्रहाधीनौतत्रयद्येतेपूजिताः तदास्वकालएवोत्पत्तिनिरोधौभवतोनान्यथा उत्पत्तिसमयेनोत्पादोकालेनिरोधश्चजगदीश्वरत्वाच्चनरेंद्राणांत

ग्रहाधीनानरेंद्राणामुच्छ्रायाःपतनानिच भावाभावौचजगतस्तस्मात्पूज्यतमाग्रहाः ३०७

द्योगक्षेमकारिणांपूज्यतमाग्रहाइतितेषांविशेषेणशांतिकादिष्वधिकारः तथाचगौतमेन राजासर्वस्येष्टेब्राह्मणवर्जमिति राजानमधिकृत्यवर्णानाश्रमांश्चन्यायतोभिरक्षेच्चलतश्चैतान्स्वधर्मेस्थापयेदित्यादीन्कांश्चिद्धर्मानुक्त्वायानिचदैवोत्पातचिंतकाःप्रब्रूयुस्तान्याद्रियेत तदधीनमपित्येकेयोगक्षेमंप्रतिजानतेइति शांतिकपौष्टिकाद्यनुष्ठानहेतुमभिधायशांतिकपुण्याहस्वस्त्ययनायुष्यमंगलसंयुक्तान्याभ्युदयिकानिविद्वेषिणःस्तंभनाभिचारद्विषद्वृद्धियुक्तानिचशालाग्नौकुर्यादितिशांतिकादीनिदर्शितानि इतिग्रहशांतिप्रकरणं ३०७ ५ ५ ५

साधारणान्गृहस्थधर्मानुक्त्वेदानींराज्याभिषेकादिगुणयुक्तस्यगृहस्थस्यविशेषधर्मानाह पुरुषार्थसाधनकर्मारंभाध्यवसायउत्साहः महा
नुत्साहोयस्यासौमहोत्साहः बहुवेदार्थदर्शीस्थूललक्षः परकृतोपकारापकारौनविस्मरतीतिकृतज्ञः तपोज्ञानादिवृद्धानांसेवकः विनयेनयु
क्तोविनीतः विनयशब्देनाविरुद्धः पूर्वोक्तस्नातकधर्मकलापउच्यते नसंशयंप्रपद्येतनाकस्माद्प्रियंवदेदित्यादिनोक्तः सत्वसंपन्नःसंपदापदोर्ह
र्षविषादरहितः मातृतःपितृतश्चाभिजनवान्कुलीनः सत्यवाक्सत्यवचनशीलः शुचिर्बाह्यांतरशौचयुक्तः अवश्यकार्याणांकर्मणामारंभेशार

महोत्साहःस्थूललक्षःकृतज्ञोवृद्धसेवकः विनीतःसत्वसंपन्नःकुलीनःसत्यवाक्शुचिः ३०८
अदीर्घसूत्रःस्मृतिमानक्षुद्रोपरुषस्तथा धार्मिकोव्यसनश्चैव प्राज्ञःशूरोरहस्यवित् ३०९ स्व
रंध्रगोप्तान्वीक्षिक्यांदंडनीत्यांतथैवच विनीतस्त्वथवार्त्तायांत्रय्यांचैवनराधिपः ३१०

ब्धानांचसमापनेयोनविलंबतेऽसावदीर्घसूत्रः अधिगतार्थाविस्मरणशीलःस्मृतिमान् अक्षुद्रोसद्गुणद्वेषी अपरुषःपरदोषाकीर्त्तनःधार्मि
कःवर्णाश्रमधर्मान्वितः नविद्यंतेव्यसनानियस्यासौअव्यसनः व्यसनानिचाष्टादश यथाहमनुः मृगयाक्षादिवास्वप्नःपरिवादःस्त्रियोमदः तौर्य
ओळ १ स्त्रीसेवनंतच्चदिवावेदितव्यं मदोमदिरादिना नृत्यगीतवादित्राणित्रीणि



त्रिकंवृथाधानःकामजोदशकोगणः पैशून्यंसाहसंद्रोहईर्ष्यासूयार्थदूषणं वाग्दंडजंचपारुष्यंक्रोधजोपिगणोष्टकइति तत्रचसप्तकष्टतमानि
यथाह पानमक्षाःस्त्रियश्चैवमृगयाचयथाक्रमं एतत्कष्टतमंविद्याच्चतुष्कंकामजेगणे दंडस्यपातनंचैववाक्पारुष्यार्थदूषणे क्रोधजेपिगणेविद्या
त्कष्टमेतत्त्रिकंसदेति प्राज्ञोगंभीरार्थावधारणक्षमः शूरोनिर्भयः रहस्यवित्गोपनीयार्थगोपनचतुरः स्वरंध्रगोप्तास्वस्यसप्तस्वराज्यांगेषुयत्परप्रवेश
द्वारशैथिल्यंतत्स्वरंध्रंतस्यगोप्ताप्रच्छादयिता आन्वीक्षिक्यामात्मविद्यायांदंडनीत्यामर्थयोगक्षेमोपयोगिन्यांवार्त्तायांकृषिवाणिज्यपशुपाल

समंत्रिणःप्रकुर्वीतप्राज्ञान्मौलान्स्थिरान्शुचीन् तैःसार्द्धंचिंतयेद्राज्यंविप्रेणाथततःस्वयम् ३११

नरूपायांधनोपचयहेतुभूतायां त्रय्यांऋग्यजुःसाममय्यांचविनीतः तत्तद्भिज्ञैःप्रावीण्यंनीतः यथाहमनुः त्रैविद्येभ्यस्त्रयींविद्यांदंडनीतिंचत
द्विदः आन्वीक्षिकींचात्मविद्यांवार्त्तारंभांश्चलोकतइति नराधिपोराज्याभिषिक्तःस्यादितिसर्वत्रसंबंधः ३०८ ३०९ ३१० एवमभिषेकयुक्तस्यांत
रंगान्धर्माननभिधायेदानींबहिरंगानाह महोत्साहादिगुणैर्युक्तोराजामंत्रिणःकुर्वीत कथंभूतान् प्राज्ञान्हिताहितविवेककुशलान् मौलान्स्ववंश
परंपरायातान् स्थिरान्महत्स्वपिहर्षविषादस्थानेविकाररहितान् शुचीन्धर्मार्थकामभयोपधाशुद्धान् तेचसप्ताष्टौवाकार्याः यथाहमनुः मौलान्शा
ओ॰ १ छद्मनांचधईर्ष्या परगुणासहिष्णुता असूया वाक्पारुष्यमाक्रोशादि अनपराधेनताडनादिदंडपारुष्यं

स्त्रविदः शूरान्लब्धलक्षान्कुलोद्भवान् सचिवान्सप्तचाष्टौवाकुर्वीतसुपरीक्षितानिति एवंमंत्रिणःपूर्वंकृत्वातैःसार्धंराज्यंसंधिविग्रहादिलक्षणं
कार्यंचिंतयेत् समस्तैर्व्यस्तैश्च अनंतरंतेषामभिप्रायंज्ञात्वासकलशास्त्रार्थविचारकुशलेनब्राह्मणेनपुरोहितेनसहकार्यंविचिंत्यततःस्वयंबुद्ध्याकार्यं
चिंतयेत् ३११ कीदृशंपुरोहितंकुर्यादित्याह पुरोहितंचसर्वेषुदृष्टादृष्टार्थेषुकर्मसुपुरतोहितंदानमानसत्कारैरात्मसंबद्धंकुर्यात् कथंभूतं देवज्ञंग्रहो
त्पाततत्त्वज्ञमनादेवेदितारं उदितोदितं विद्याभिजनानुष्ठानादिभिरुदितैःशास्त्रोक्तैःउदितंसमृद्धं दंडनीत्यामर्थशास्त्रेकुशलं अथर्वांगिरसेचशांत्या-

पुरोहितंप्रकुर्वीतदैवज्ञमुदितोदितम् दंडनीत्यांचकुशलमथर्वांगिरसेतथा ३१२ श्रौतस्मार्तक्रियाहेतो
र्वृणुयादेवचर्त्विजः यज्ञांश्चैवप्रकुर्वीतविधिवद्भूरिदक्षिणान् ३१३ भोगांश्चदद्याद्विप्रेभ्योवसूनिविविधानिच
अक्षयोयंनिधीराज्ञांयद्विप्रेषूपपादितम् ३१४

दिकर्मणि ३१२ श्रौताग्निहोत्रादिस्मार्तौपासनादिक्रियानुष्ठानसिद्ध्यर्थंऋत्विजोवृणुयात् यज्ञांश्चराजसूयादीन्विधिवद्यथाविधानंभूरिदक्षिणान्
बहुदक्षिणानेवकुर्यात् ३१३ किंच ब्राह्मणेभ्योभोगान्सुखानितत्साधनदानद्वारेणदद्यात् वसूनिचसुवर्णरूप्यभूप्रभृतीनिविविधानिनानाप्र 
काराणि यस्मादेषराज्ञांअक्षयोनिधिःशेवधिःयद्ब्राह्मणेभ्योदीयते साधारणधर्मत्वेनदानप्राप्तौसत्यांराज्ञांदानप्राधान्यप्रतिपादनार्थंपुनर्वचनं ३१४

किंच अग्नेःसकाशादग्निसाध्यात्भूरिदक्षिणात्राजसूयादेरपिविप्राग्नौहुतंश्रेष्ठमिहोच्यते यत्तएतदस्कन्नंक्षरणरहितं अव्यथंपशुहिंसार
हितं प्रायश्चित्तैरदूषितंप्रायश्चित्तायासरहितं ३१५ वसूनिविप्रेभ्योदद्यादित्युक्तं कयापरिपाट्यादद्यादित्याह अलब्धलाभायधर्मशास्त्रानुसारे
णयत्नेत यत्नेनलब्धंतत्परिपालयेत् स्वयमवेक्षयारक्षेत् पालितंनीत्यावणिक्पथादिकयावर्द्धयेत् वृद्धंचपात्रेषुत्रिविधेषुधर्मार्थिकामपात्रेषु
निक्षिपेत्दद्यात् ३१६ पात्रेनिक्षिप्यकिंकुर्यादित्याह यथोक्तविधिनाभूमिंदत्वास्वत्वनिवृत्तिंकृत्वानिबंधंवाएकस्यभांडभरस्येयंतोरूपकाएकस्य

अस्कन्नमव्यथंचैवप्रायश्चित्तैरदूषितम् अग्नेःसकाशाद्विप्राग्नौहुतंश्रेष्ठमिहोच्यते ३१५ अलब्ध
मीहेद्धर्मेणलब्धंयत्नेनपालयेत् पालितंवर्धयेन्नीत्यावृद्धंपात्रेषुनिक्षिपेत् ३१६ दत्वाभूमिंनिबंधं
वाकृत्वालेख्यंतुकारयेत् आगामिभद्रनृपतिपरिज्ञानायपार्थिवः ३१७ पटेवाताम्रपट्टेवास्वमुद्रो
परिचिन्हितम् अभिलेख्यात्मनोवंश्यानात्मानंचमहीपतिः ३१८

पर्णभरस्येयंतिपर्णानीतिवानिबंधंकृत्वालेख्यंकारयेत् किमर्थमागामिनःएष्यंतोयेभद्राःसाधवोनृपतयोभूपास्तेषामनेनदत्तमनेनप्रतिगृही
तमितिपरिज्ञानाय पार्थिवोभूपतिः अनेनभूपतेरेवभूमिदानेनिबंधदानेवाधिकारोनभोगपतेरितिदर्शितं ३१७ लेख्यंकारयेदित्युक्तंकथंकारयेदि

ओ॰ ३ स्वयमेवक्षयाद्रक्षेत्

स्याह कार्पासिके पटे ताम्रपट्टे फलके वा आत्मनो वंश्यान् प्रपितामहपितामहपितॄन् बहुवचनस्यार्थवत्त्वाय वंशवीर्यश्रुतादिगुणोपवर्णनपूर्वक मभिलेख्यात्मानं च शब्दात्प्रतिग्रहीतारं प्रतिग्रहपरिमाणं दानच्छेदोपवर्णनं चाभिलेख्य प्रतिगृह्यत इति प्रतिग्रहो निबंधस्तस्य रूपकादिपरिमाणं दीयत इति दानं क्षेत्रादि तस्य छेदः छिद्यते अनेनेति छेदः नद्याघ्राघाटादौ निवर्त्तनं तत्परिमाणं च तस्योपवर्णनं अमुकनद्या दक्षिणतो यं ग्रामः क्षेत्रं वा पूर्वतो मुकग्रामस्यैतावन्निवर्त्तन मित्यादि निवर्त्तनपरिमाणं च लेख्यमेव आघाटस्य नदीनगरवर्त्मादेः संचारित्वेन भूमेर्न्यूनाधिकभावसंभवात्

प्रतिग्रहपरीमाणं दानच्छेदोपवर्णनम् स्वहस्तकालसंपन्नं शासनं कारयेत्स्थिरः ३१९

न्निवृत्त्यर्थं स्वहस्तेन स्वहस्तलिखितेन मतं मे अमुकनाम्नः अमुकपुत्रस्य यदत्रोपरिलेखित मित्यनेन संपन्नं युक्तं कालेन च द्विविधेन शकनृपातीत रूपेण संवत्सररूपेण च कालेन चंद्रसूर्योपरागादिना संपन्नं स्वमुद्रया गरुडवाराहादिरूपयोपरि बहिश्चिन्हितं अंकितं स्थिरं दृढं शासनं शिष्यंते भविष्यंतो नृपतयः अनेन दानाच्छ्रेयोनुपालन मिति शासनं कारयेत् महीपतिर्न भोगपतिः संधिविग्रहादिकारिणानयेन केनचित् संधिविग्रहकारी तु भवेद्यस्तस्य लेखकः स्वयं राज्ञा समादिष्टः सल्लिखेद्राजशासनमिति स्मरणात् दानमात्रेणैव दानफलसिद्धे शासनकारणं भोगाभिवृद्ध्या फलातिशयार्थम् ७१

३१८ ३१९

इदानीं राज्ञो निवासस्थानमाह रम्यं रमणीयं अशोकचंपकादिभिः पशव्यं पशुभ्यो हितं पशुवृद्धिकरं आजीव्यमुपजीव्यं कंदमूलपुष्पफलादिभिः जांगलं यद्यप्यल्पोदकतरुपर्वतो देशो जांगलः तथाप्यत्र सजलतरुपर्वतो देशो जांगलशब्देनाभिधीयते तं देशमावसेदधिवसेत् तत्रैवंविधे देशे जनानां कोशस्य सुवर्णादे रात्मनश्च रक्षणार्थं दुर्गं कुर्वीत दुर्गं च षड्विधं यथाह मनुः धन्वदुर्गं महीदुर्गमब्दुर्गं वार्क्षमेव च नृदुर्गं गिरिदुर्गं च समाश्रित्य वसेत्पुरमिति ३२० किंच तत्रतत्र धर्मार्थकामादिषु अध्यक्षान् योग्यानधिकारिणः प्रकुर्यान्नियुंजीत यथाहुः धर्मकृत्येषु धर्मज्ञानर्थकृत्येषु पंडिता

रम्यं पशव्यमाजीव्यं जांगलं देशमावसेत् तत्र दुर्गाणि कुर्वीत जनकोशात्मगुप्तये ३२० तत्रतत्र च निष्णा
तानध्यक्षान्कुशलान् शुचीन् प्रकुर्यादायकर्मांतव्ययकर्मसु चोद्यतान् ३२१

न् स्त्रीषु क्लीबान् नियुंजीत नीचान्निंद्येषु कर्मस्विति कीदृशान्निष्णातान् अनन्यव्यापारान् कुशलान् तत्तद्व्यापारचतुरान् शुचीन् चतुर्विधोपधाशुद्धान् आयकर्मसु सुवर्णाद्युत्पत्तिस्थानेषु व्ययकर्मसु सुवर्णादिदानस्थानेषु उद्यतान् अनलसान् चशब्दात्प्राज्ञत्वादिगुणयुक्तान् उक्तं च मा

औ॰ ३ निरुदकेन पंचयोजनेन देशेन समंततो व्याप्तं धन्वदुर्गं पाषाणेष्टकायुतद्वादशहस्तोच्छ्रितेन बहुविस्तृतेन युद्धार्थमुपरिभ्रमणयोग्येन साधारणगवाक्षादियुक्तेन प्रकारेण समंता द्वेष्टित सद्मा(?)रं महीदुर्गं अगाधोदकेन समंततो वेष्टितं अब्दुर्गं वृक्षजन्यं वार्क्षं चतुरंगबलजं नृदुर्गं गिरिणा वेष्टितं गिरिदुर्गं

त्वमुपधाशुद्धिरप्रमादोभियुक्तता कार्येषुव्यसनाभावः स्वामिभक्तिश्चयोग्यतेति ३२१ भोगांश्चदद्याद्विप्रेभ्योवसूनिविविधानिचेतिसामान्येनस्व स्वदानमुक्तं इदानींनृपाणांविक्रमार्जितस्यदानेफलातिशयमाह अस्मादुत्कृष्टतमोधर्मोनृपाणांनविद्यतेयद्रणार्जितंद्रव्यंविप्रेभ्योदीयते यच्चप्रजा- भ्योऽभयदानं ३२२ रणार्जितंदेयमित्युक्तंद्रव्यार्जनायरणेप्रवृत्तस्यविपत्तिरपिसंभवतीतिनधर्मोनाप्यर्थइतितनोनिवृत्तिरेवश्रेयसीत्यतआह येभू- म्यार्थमाहवेषुप्रवृत्ताअपराङ्मुखाअभिमुखावध्यंतेमार्यंतेतेस्वर्गंयांति योगाभ्यासेरतायथा यद्यकूटैरविषदिग्धादिभिरायुधैर्योद्धारोभवंति ३२३

नातःपरतरोधर्मोनृपाणांयद्रणार्जितम् विप्रेभ्योदीयतेद्रव्यंप्रजाभ्यश्चाभयंसदा ३२२ यआहवेषु वध्यंतेभूम्यर्थमपराङ्मुखाः अकूटैरायुधैर्यांतितेस्वर्गंयोगिनोयथा ३२३ पदानिक्रतुतुल्यानिभग्ने ष्वविनिवर्त्तिनाम् राजासुकृतमादत्तेहतानांविपलायिनाम् ३२४ तवाहंवादिनंक्लीबंनिर्हेतिंपरसंगतम् नहन्याद्विनिवृत्तंचयुद्धप्रेक्षणकादिकम् ३२५

किंच स्वबलेषुकरितुरगरथपदातिषुभग्नेष्वनिवर्त्तिनांपरबलाभिमुखयायिनां पदानिक्रतुतुल्यानिअश्वमेधतुल्यानि विपर्यये दोषमाह विपलायिनांपराङ्मुखानांहतानांराजासुकृतमादत्ते ३२४ अपिच तवाहमितियोवदतितं क्लीबंनपुंसकं निर्हेतिंनिरायुधं परसंगतमन्येनसहयुध्यमानं विनिवृत्तंयुद्धाद्विनिवृत्तं युद्धप्रेक्षणकोयुद्धदर्शी तमपिनहन्यादितिसर्वत्रसंबंधः आ



दिग्रहणादश्वसारथ्यादीनांग्रहणं यथाहगौतमः नदोषोहिंसायामाहवेन्यत्राश्वसारथ्यनायुधकृतांजलिप्रकीर्णकेशपराङ्मुखोपविष्टस्थलवृ- क्षारूढदूतगोब्राह्मणवादिभ्यइति शंखोप्याह नपानीयंपिबंतंन भुंजानंनोपानहौमुंचंतंनावर्माणंसवर्माणंनस्त्रियंनकरेणुंनवाजिनंनसारथिंन दूतंनब्राह्मणंनराजानमराजाहन्यादिति ३२५ कृतरक्षःपुरस्यात्मनश्चरक्षांविधायप्रतिदिनंप्रातःकालउत्थायस्वयमेवायव्ययोपश्येत् ततोव्यव हारान्दृष्ट्वामध्यान्हकालेस्नात्वाकामतोयथाकालंभुंजीत ३२६ तदनंतरंहिरण्यादिकंव्यापृतैर्हिरण्याद्यानयननियुक्तैरानीतंस्वयमेवनिरीक्ष्यभां

कृतरक्षःसमुत्थायपश्येदायव्ययौस्वयम् व्यवहारांस्ततोदृष्ट्वास्नात्वाभुंजीतकामतः ३२६ हिरण्यंव्यापृतानीतंभांडागारे षुनिक्षिपेत् पश्येच्चारांस्ततोदूतान्प्रेषयेन्मंत्रिसंगतः ३२७

डागारेषुनिक्षिपेत् ततश्चारान्विश्वस्तान्प्रत्यागतान्पश्येत् येपरराज्येवृत्तांतपरिज्ञा नायपरिव्राजिकतापसादिरूपेणगूढचारिणःप्रेषितास्तांश्चारान्दृष्ट्वाकचिन्निवेशयेत् तदनंतरंदूतांश्चपश्येत् दूताश्चयेप्रकटमेवराजांतरंप्रतिगतागतं- माचरंति तेचत्रिविधाः निसृष्टार्थाःसंदिष्टार्थाः शासनहराश्चेति तत्रनिसृष्टार्थाःराजकार्याणिदेशकालोचितानिस्वयमेवकथयितुंक्षमाःउक्तमात्रंयेपरस्मै निवेदयंतितेसंदिष्टार्थाः शासनहरास्तुराजलेखहारिणः तान्पूर्वप्रेषितानागतान्मंत्रिसंगतःपश्येत् दृष्ट्वातद्वार्त्तामाकलय्यपुनःप्रेषयेत् ३२७ छ

तदनंतरमपराण्हे स्वैरं यथेष्टमेकांतः पुरविहारी स्यात् मंत्रिभिर्वा विश्वासिभिः कलाकुशलैः परिहासवेदिभिः परिवृतः स्त्रीभिश्च रूपयौवनवैदग्ध्य-
शालिनीभिः भुक्तवान् विहरेच्चैव स्त्रीभिरंतःपुरे सह विहृत्य च यथाकामं पुनः कार्याणि चिंतयेदिति मनुस्मरणात् ततो विशिष्टैर्वस्त्रकुंकुमविलेपना-
लंकारैरलंकृतः हस्त्यश्वरथपदातिबलं दृष्ट्वा सेनान्या सेनापतिना सह तद्रक्षणादि देशकालौ चिंतं चिंतयेत् ३२८ ततः सायंकाले संध्यामुपास्य सामा
न्येनप्राप्तस्यापि पुनर्वचनं कार्याकुलत्वादविस्मरणार्थं अनंतरं ये पूर्वं दृष्टाः क्वचित्स्थाने निवेशितास्तेषां चाराणां गूढभाषितमंतर्वेश्मनि शस्त्रपाणिः

ततः स्वैरविहारी स्यान्मंत्रिभिर्वा समागतः बलानां दर्शनं कृत्वा सेनान्या सह चिंतयेत् ३२८ संध्यामुपास्य शृणुयाच्चाराणां गूढभाषितम् गीतनृत्यैश्च भुंजीत पठेत्स्वाध्यायमेव च ३२९ संविशेत्तूर्यघोषेण प्रतिबुध्येत्तथैव च शास्त्राणि चिंतयेद्बुद्ध्वा सर्वकर्त्तव्यतास्तथा ३३०

शृणुयात् उक्तं च संध्यां चोपास्य शृणुयादंतर्वेश्मनि शस्त्रभृत् रहस्याख्यापिनां चैव प्रणिधीनां च चेष्टितमिति ततो
नृत्यगीतादिभिः कंचित्कालं क्रीडित्वा कक्षांतरं प्रविश्य भुंजीत गत्वा कक्षांतरं त्वन्यत्समनुज्ञाप्य तं जनं प्रविशेद्भोजनार्थं च स्त्रीभिरंतःपुरं सहेति स्मरणात् ततो
ऽविस्मरणार्थं यथाशक्ति स्वाध्यायं पठेत् ३२९ तदनंतरं तूर्यशंखघोषेण संविशेत्स्वप्यात् तथैव तूर्यादिघोषेण प्रतिबुध्येत प्रतिबुध्य च शास्त्रं प्रविद्भिर्विश्वासिभिः ७३

सह एकाकी वा पश्चिमे यामे शास्त्राणि चिंतयेत् सर्वकर्तव्यताश्च सर्वकार्याणि च एतच्च स्वस्थं प्रत्युच्यते अस्वस्थः पुनः सर्वकार्येषु अन्यं नियोजयेत् यथा
ह मनुः एतद्वृत्तं समातिष्ठेदरोगः पृथिवीपतिः अस्वस्थः सर्वमेवैतन्मंत्रिमुख्ये निवेशयेदिति ३३० अनंतरं तत्रस्थ एव विश्वस्तान्स्वान् चारान् दानमानस-
त्कारैः पूजितान् स्वेषु सामंताद्यधिकारिषु अन्येषु महीपतिषु प्रेषयेत् तच्चिकीर्षितपरिज्ञानाय ततः प्रातः संध्यामुपास्याग्निहोत्रं हुत्वा पुरोहितर्त्विगाचा
र्यादिभिराशीर्भिरभिनंदितो ज्योतिर्विदो दृष्ट्वा तेभ्यश्च ग्रहादिस्थितिं विदित्वा शांतिकादीनि च पुरोहितायादिश्य वैद्यांश्च दृष्ट्वा तेभ्यश्च स्वशरीरस्थितिं-

प्रेषयेच्च ततश्चारान्स्वेष्वन्येषु च सादरान् ऋत्विक्पुरोहिताचार्यैराशीर्भिरभिनंदितः ३३१ दृष्ट्वा ज्योतिर्विदो वैद्यान् दद्याद्गां कांचनं महीम् नैवेशिकानि च ततः श्रोत्रियेभ्यो गृहाणि च ३३२ ब्राह्मणेषु क्षमी स्निग्धेष्वजिह्मः क्रोधनोरिषु स्याद्राजा भृत्यवर्गेषु प्रजासु च यथा पिता ३३३

निवेद्य प्रतिविधानं चादिश्य गां दोग्ध्रीं कांचनं महीं च नैवेशिकानि विवाहोपयोगीनि कन्यालंकारादीनि गृहाणि
च सुधाधवलितादीनि श्रोत्रियेभ्योऽधीतवेदेभ्यो ब्राह्मणेभ्यो दद्यादिति प्रत्येकं संबध्यते ३३१ ३३२ किंच ब्राह्मणेष्वधिक्षिपत्स्वपि क्षमी क्षमावान् स्नि
ग्धेषु स्नेहवत्सु मित्रादिष्वजिह्मः अवक्रः अरिषु क्रोधनः भृत्यवर्गेषु प्रजासु च हिताचरणेनाहितनिवर्तनेन च पितेव दयावान् स्यादिति प्रत्येकं संबध्यते ३३३

प्रजापरिपालनफलमाह यस्मान्न्यायेनशास्त्रोक्तमार्गेणप्रजाःपरिपालयन् परिपालितप्रजोपचितपुण्यात् षड्भागंषष्ठंभागमादत्ते यस्माच्चसर्वेभ्यो भूम्यादिदानेभ्यः प्रजानांपरिपालनमधिकफलं तस्मात्प्रजासुयथापितानथैवस्यादितिगतेनसंबंधः ३३४ चाटाः प्रतारकाः विश्वास्ययेपरधनमपहरंति प्रच्छन्नापहारिणस्तस्कराः दुर्वृत्ताः इंद्रजालिककितवादयः सहोबलंसहसाबलेन कृतंसाहसंमहच्चतत्साहसंचमहासाहसंतेनवर्त्ततेइतिमहासाहसिकाः प्रसह्यापहारिणः आदिशब्दान्मौलिककुहकप्रभृतयः एतैःपीड्यमानाःबाध्यमानाःप्रजारक्षेत् कायस्थागणकालेखकाश्चतैःपीड्यमानाः

पुण्यात्षड्भागमादत्तेन्यायेनपरिपालयन् सर्वदानाधिकंयस्मात्प्रजानांपरिपालनम् ३३४ चाटतस्करदुर्वृत्त महासाहसिकादिभिः पीड्यमानाःप्रजारक्षेत्कायस्थैश्चविशेषतः ३३५ अरक्ष्यमाणाःकुर्वंतियत्किंचित्किल्बिषंप्रजाः तस्मात्तुनृपतेरर्धयस्माद्गृण्हात्यसौकरान् ३३६

विशेषतोरक्षेत् तेषांराजवल्लभतयातिमायावित्वाच्चदुर्निवारत्वात् ३३५ अरक्ष्यमाणाः प्रजाः यत्किंचित्किल्बिषंचौर्यपरदारगमनादिकुर्वंतितस्मात्पापादर्धंनृपतेर्भवति यस्मादसौराजारक्षणार्थंप्रजाभ्यः करान्गृण्हाति ३३६ ७४

राष्ट्रेराज्ञाअधिकारेषुयेनियुक्तास्तेषांविचेष्टितंचरितंचारैरुक्तलक्षणैःसम्यक्ज्ञात्वासाधून्सच्चरितान्संमानयेत् दानमानसत्कारैःपूजयेत् विपरीतान्दुश्चरित्रान्सम्यग्विदित्वाघातयेत् अपराधानुसारेण येपुनरुत्कोचजीविनस्तान्द्रव्यरहितान्कृत्वास्वराष्ट्रात्प्रवासयेत् श्रोत्रियान्सदानमानसत्कारैःसहितान्कृत्वास्वराष्ट्रेस्वदेशेसदैववासयेत् ३३७ ३३८ योसौराजास्वराष्ट्रादन्यायेनद्रव्यमादायस्वकोशंविवर्धयेत्सोचिराच्छीघ्रमेवविगतश्रीकोविनष्टलक्ष्मीकः बंधुभिःसहनाशंप्राप्नोति ३३९ प्रजानांतस्करादिकृतपीडनेनयःसंतापस्तस्मादुद्भूतोहुताशनइवसं

येराष्ट्राधिकृतास्तेषांचारैर्ज्ञात्वाविचेष्टितम् साधून्संमानयेद्राजाविपरीतांश्चघातयेत् ३३७ उत्कोचजीविनोद्रव्यहीनान्कृत्वाविवासयेत् सदानमानसत्कारान्श्रोत्रियान्वासयेत्सदा ३३८ अन्यायेननृपोराष्ट्रात्स्वकोशंयोभिवर्धयेत् सोचिराद्विगतश्रीकोनाशमेतिसबांधवः ३३९ प्रजापीडनसंतापात्समुद्भूतोहुताशनः राज्ञःकुलंश्रियंप्राणांश्चादग्ध्वाननिवर्त्तते ३४० यएवनृपतेर्धर्मःस्वराष्ट्रपरिपालने तमेवकृत्स्नमाप्नोतिपरराष्ट्रंवशंनयन् ३४१

तापकारित्वादपुण्यराशिर्हुताशनशब्देनोच्यते सराज्ञःकुलंश्रियंप्राणांश्चादग्ध्वानाशमनीत्वाननिवर्ततेनोपशाम्यति ३४० न्यायतःस्वराष्ट्रपरिपालनेराज्ञोयोधर्मस्तंसकलंवक्ष्यमाणन्यायेनपरराष्ट्रंवशंनयन् आत्मसात्कुर्वन्नाप्नोतिधर्मषड्भागंच ३४१

किंच यदापरदेशोवशमुपागतः नदानस्वदेशाचारादिसंकरःकार्यः यस्मिन्देशे आचारः कुलस्थितिर्व्यवहारो वायथैवप्रागासीत्तथैवासौपरिपा
लनीयः यदिशास्त्रविरुद्धोनभवति यदावशमुपागतइत्यनेनवशोपगमनात्प्रागनियमइतिदर्शितं यथोक्तंउपरुध्यारिमासीतराष्ट्रंचास्योपपीड
येत् दूषयेच्चास्यसततंयवसान्नोदकेंधनमिति ३४२ यस्मात्तैःसार्धंचिंतयेद्राज्यमित्याद्युक्तंमंत्रमूलंराज्यंतस्मान्मंत्रंयत्नेनतथासुरक्षितंकुर्यात्
यथास्यराज्ञःकर्मणांसंधिविग्रहादीनामाफलोदयात्फलनिष्पत्तेःप्राग्यावदन्येमंत्रंनजानंति ३४३ किंच अरिःशत्रुः मित्रंसुहृत् उभयविलक्ष

यस्मिन्देशेय आचारोव्यवहारःकुलस्थितिः तथैवपरिपाल्योसौयदावशमुपागतः ३४२ मंत्रमूलंयतोराज्यं
तस्मान्मंत्रंसुरक्षितम् कुर्याद्यथास्यनविदुःकर्मणामाफलोदयात् ३४३ अरिर्मित्रमुदासीनोनंतरस्तत्परःप
रः क्रमशोमंडलंचिंत्यंसामादिभिरुपक्रमैः ३४४

णउदासीनश्च तेचत्रयस्त्रिविधाःसहजाःकृत्रिमाःप्राकृताश्चेति तत्रसह
जोरिःसापत्नपितृव्यतत्सुतादिः कृत्रिमोरिःयस्यापकृतंयेनचापकृतं प्राकृतस्त्वनंतरदेशाधिपतिःसहजंमित्रंभागिनेयपैतृष्वस्रीयमातृष्व-
स्रीयादि कृत्रिमंमित्रंयेनोपकृतंयस्यचोपकृतं प्राकृतंमित्रमेकांतरितदेशाधिपतिः सहजकृत्रिममित्रशत्रुलक्षणरहितोसहजकृत्रिमोदासीनो
प्राकृतोदासीनोद्व्यंतरितदेशाधिपतिः अरिश्चतुर्विधः यातव्योच्छेत्तव्यपीडनीयकर्शनीयभेदेन तत्रयातव्योनंतरभूपतिः व्यसनीहीनबलोवि 

रक्तप्रकृतिर्विदुर्गोमित्रहीनोदुर्बलश्चोच्छेत्तव्यः पीडनीयोमंत्रबलहीनः प्रबलमित्रबलयुक्तःकर्शनीयः निर्मूलनाशमुच्छेदंपीडनंबलनि
ग्रहं कर्शनंतुपुनःप्राहुःकोशदंडापकर्षणादिति मित्रंद्विविधं बृंहणीयंकर्श नीयमितिकोशबलहीनंबृंहणीयं कोशबलाधिकंकर्शनीयं अनं
तरस्तत्परःपरइतिप्राकृतारिमित्रोदासीनानाह अनंतरःप्राकृतोरिः तत्परःप्राकृतंमित्रं तस्मात्परःप्राकृतउदासीनः शेषाःपुनःप्रसिद्धत्वान्नो
क्ताः एतद्राजमंडलंक्रमशःपूर्वादिक्रमेणचिंत्यं तेषांचेष्टितंज्ञातव्यं ज्ञात्वाचसामादिभिरुपायैर्वक्ष्यमाणैरनुसंधेयं एवंपुरतःपृष्ठतःपार्श्वतश्च
त्रयस्त्रयआत्माचैकइतित्रयोदशराजकमिदंराजमंडलंपद्माकारंपार्ष्णिग्राहाक्रंदासारादयस्त्वरिमित्रोदासीनेष्वेवांतर्भवंति संज्ञाभेदमात्रं

उपायाःसामदानंचभेदोदंडस्तथैवच सम्यक्प्रयुक्ताःसिध्येयुर्दंडस्त्वगतिकागतिः ३४५

ग्रंथांतरेदर्शितमितियोगीश्व
रेणनपृथगुक्ताः ३४४ सामादिभिरुपक्रमैरित्युक्तंइदानींतानुपायानाह साममप्रियभाषणं दानंसुवर्णादेः भेदोभेदकरणं तत्सामंतादीनांप
रस्परतोवैरस्योत्पादनं दंडउपांशुप्रकाशाभ्यांधनापहारादिर्वधपर्यंतोपकारः एतेसामादयःपरिपंथ्यादिसाधनोपायाः एतेचदेशकालाद्यनुसा
रेणसम्यक्प्रयुक्ताःसिध्येयुः तेषांचमध्येदंडस्त्वगतिकागतिः उपायांतरसंभवेसतिनप्रयोक्तव्यः एतच्चपीडनीयकर्शनीयाभिप्रायेण यातव्योच्छे
त्तव्ययोर्दंडएवमुख्यः एतेसामादयोनकेवलंराजव्यवहारविषयाः अपितुसकललोकव्यवहारविषयाः यथा अधीष्वपुत्रकाधीषदास्यामितवमोदका
न् यद्यान्यस्मैप्रदास्यामिकर्णमुत्पाटयामितेइति ३४५

किं संधिर्व्यवस्थाकरणं विग्रहोपकारः यानं परं प्रतियात्रा आसनमुपेक्षा संश्रयो बलवदाश्रयणं द्वैधीभावः स्वबलस्य द्विधाकरणं एतान्संधि प्रभृतीन्गुणान्यथावत्देशकालशक्तिमित्रादिवशेन कल्पयेत् ३४६ यानकालानाह यदा परराष्ट्रं सस्यैर्ग्रीष्मादिभिर्गुणैश्च समजलेंधनतृणा दिभिरुपेतं संपन्नं शत्रुश्च हीनो बलादिभिः आत्मा च हृष्टवाहनपूरुषः वाहनानि हस्त्यश्वादीनि तानि च पूरुषाश्च वाहनपूरुषाः हृष्टाः वाहनपूरु षा यस्य स तथोक्तः तदा परराष्ट्रमात्मसात्कर्तुं व्रजेत् ३४७ प्राणिनामभ्युदयविनिपातानां दैवायत्तत्वा द्यदि दैवमस्ति तदा स्वयमेव परराष्ट्रादि वशी

संधिं च विग्रहं चैव यानमासनसंश्रयौ द्वैधीभावं गुणानेतान्यथावत्परिकल्पयेत् ३४६ यदा सस्यगुणोपेतं प रराष्ट्रं तदा व्रजेत् परश्च हीन आत्मा च हृष्टवाहनपूरुषः ३४७ दैवे पुरुषकारे च कर्मसिद्धिर्व्यवस्थिता तत्र दैवम भिव्यक्तं पौरुषं पौर्वदेहिकम् ३४८

भविष्यति अथ नास्ति कृतेपि पौरुषेण भविष्यति अतो व्यर्थ एवायं यात्राप्रयास इत्यत आ ह कर्मसिद्धिः फलप्राप्तिः इष्टानिष्टलक्षणा सा न केवलं दैवे व्यवस्थिता अपि तु पुरुषकारेपि लोके तथा दर्शनात् चिकित्सकादि शास्त्रवैयर्थ्याच्च अपि च पुरुषकाराभावे दैवमेव नास्तीत्याह तत्र दैवमिति यतः पूर्वदेहार्जितं पौरुषमेव दैवमुच्यते अल्पपुरुषकारानंतरं महाफलोदयाभिव्यक्तं पौरुषं पौर्वदेहिकं कर्म तस्मात्पुरुषकाराभावेन दैवमस्तीति पुरुषकारे यत्नो विधातव्यः ३४८ ॥ ॥ ॥

---

इदानीं मतांतराण्याह केचिदिष्टानिष्टलक्षणं फलं दैवाद्दैवेच्छंति केचित्स्वभावात्स्वयमेव भवति न कारणमपेक्षत इति केचित्कालात्केचित्पुरुष कारत एवेति स्वमतमाह दैवादीनां संयोगे समुच्चये फलं भवतीति कुशलबुद्धयो मन्वादयो मन्यंते ३४९ एकैकस्मात्फलं न भवतीत्यत्र दृष्टांतमा ह नात्र तिरोहितमस्ति ३५० लाभाय परराष्ट्रं गंतव्यमित्युक्तं लाभश्च त्रिविधः हिरण्यलाभो भूलाभो मित्रलाभश्चेति तेषु मित्रलाभो ज्यायान् त तस्तत्प्राप्त्युपाये यत्नो विधातव्यः तत्प्राप्त्युपायश्च सत्यवचनमित्याह यस्माद्धिरण्यभूमित्रलाभेभ्यो मित्रलब्धिर्वरा उत्कृष्टा तस्मात्तत्प्राप्त्यै यतेत यत्नं

केचिद्दैवात्स्वभावाद्वा कालात्पुरुषकारतः संयोगे केचिदिच्छंति फलं कुशलबुद्धयः ३४९ यथा ह्येकेन चक्रे ण रथस्य न गतिर्भवेत् एवं पुरुषकारेण विना दैवं न सिध्यति ३५० हिरण्यभूमिलाभेभ्यो मित्रलब्धिर्वरा यतः अतो यतेत तत्प्राप्त्यै रक्षेत्सत्यं समाहितः ३५१ स्वाम्यमात्या जनो दुर्गं कोशो दंडस्तथैव च मित्राण्येताः प्रकृत यो राज्यं सप्तांगमुच्यते ३५२

कुर्यात् सामादिभिः सत्यं च रक्षेत् समाहितः सावधानः सत्यमूलत्वान्मित्रलाभस्य ३५१ इदानीं रा ज्यांगान्याह महोत्साह इत्याद्युक्तलक्षणो महीपतिः स्वामी अमात्या मंत्रिपुरोहितादयः जनो ब्राह्मणादिप्रजाः दुर्गं धन्वदुर्गादि कोशः सुवर्णादिधनरा शिः दंडो हस्त्यश्वरथपत्तिलक्षणं चतुरंगं बलं मित्राणि सहजकृत्रिमप्राकृतानि एताः स्वाम्याद्याः राज्यस्य प्रकृतयो मूलकारणानि एवं राज्यं सप्तांगमुच्यते ३५२

तदेवंविधंराज्यंप्राप्य दुर्वृत्तेषुवंचकशठधूर्त्तपरदारपरद्रव्यापहारिहिंसकादिषुनृपोदंडंपातयेत्प्रयोजयेत् हियस्माद्धर्मएवदंडरूपेणपूर्वंब्रह्मणानि र्मितोस्यचदंडइतियौगिकीसंज्ञा दंडोदमनादित्याहुः तेनादांतान्दमयेदित्यादिगौतमस्मरणात् ३५३ सपूर्वोक्तोदंडोलुब्धेनकृपणेनाकृतबुद्धिना चंचलबुद्धिनान्यायतोन्यायानुसारेणनेतुंप्रयोक्तुंशक्योनभवति कीदृशेनतर्हिशक्यइत्याह सत्यसंधेनाप्रतारकेणशुचिनाजितारिषड्वर्गेणसत्सहाये नपूर्वोक्तसहायसहितेनधीमतानयानयकुशलेनसदंडोन्यायतोधर्मानुसारेणनेतुंशक्यः ३५४ सदंडःशास्त्रोक्तमार्गेणप्रयुज्यमानःसन्देवासुरमानवैः

तदवाप्यनृपोदंडंदुर्वृत्तेषुनिपातयेत् धर्मोहिदंडरूपेणब्रह्मणानिर्मितःपुरा ३५३ सनेतुंन्यायतोशक्योलु ब्धेनाकृतबुद्धिना सत्यसंधेनशुचिनासुसहायेनधीमता ३५४ यथाशास्त्रंप्रयुक्तःसन्सदेवासुरमानवम् जग दानंदयेत्सर्वमन्यथातत्प्रकोपयेत् ३५५ अधर्मदंडनंस्वर्गकीर्त्तिलोकाश्चनाशयेत् सम्यक्तुदंडनंराज्ञःस्वर्गकी र्त्तिजयावहम् ३५६

सहितंइदंसर्वंजगदानंदयेत्हर्षयेत् अन्यथाशास्त्रातिक्रमेणप्रयुक्तश्चेज्जगत्प्रकोपयेत् ३५५ नकेवल मधर्मदंडेनजगत्प्रकोपः अपितुप्रयोक्तुर्दृष्टादृष्टहानिरपीत्याह यःपुनःशास्त्रातिक्रमेणलोभादिनादंडःकृतःसपापहेतुत्वात्स्वर्गकीर्त्तिलोकांश्च विनाशयतीति शास्त्रोक्तमार्गेणतुकृतःधर्महेतुत्वात्स्वर्गकीर्त्तिजयानांहेतुर्भवति ३५६ ॰ ॰ ॰ ॰ 

---

अर्घ्योर्घार्हआचार्यादिः शेषंप्रसिद्धं एतेप्यानृशंस्यादयोपिस्वधर्माच्चलितादंड्याः किमुतान्ये यतःस्वधर्माच्चलितःअदंड्योनामराज्ञःकोपिनास्ति ए तच्चमातापित्रादिव्यतिरेकेण तथाचस्मृत्यंतरं अदंड्यौमातापितरौस्नातकपरिव्राजकपुरोहितवानप्रस्थाः श्रुतशीलशौचाचारवंतस्तेहिधर्माधिकारि णइति ३५७ किंच यस्तुदंड्यान्स्वधर्मचलनादिनादंडयोग्यान्सम्यक्शास्त्रदृष्टेनमार्गेणाधिग्धनदंडादिनादंडयति वध्यान्वधार्हान्घातयति ते नराज्ञाभूरिदक्षिणैःक्रतुभिरिष्टंभवति बहुदक्षिणक्रतुफलंप्राप्नोतीत्यर्थः नचफलश्रवणाद्दंडप्रणयनंकाम्यमितिमंतव्यं अकरणेप्रायश्चित्तस्मरणा

अपिभ्रातासुतोर्घ्योवाश्वशुरोमातुलोपिवा नादंड्योनामराज्ञोस्तिधर्माद्विचलितःस्वकात् ३५७ योदंड्यान्दं डयेद्राजासम्यग्वध्यांश्चघातयेत् इष्टंस्यात्क्रतुभिस्तेनसमाप्तवरदक्षिणैः ३५८ इतिसंचिंत्यनृपतिःक्रतुतुल्य फलंपृथक् व्यवहारान्स्वयंपश्येत्सभ्यैःपरिवृतोन्वहम् ३५९

त् यथाहवसिष्ठः दंडोत्सर्गेराजैकरात्रमुपवसेत् त्रिरात्रंपुरोहि तः कृच्छ्रमदंड्यदंडनेपुरोहितस्त्रिरात्रंराजेति ३५८ दुष्टेसम्यग्दंडःप्रयोक्तव्यइत्युक्तंदुष्टपरिज्ञानंचव्यवहारदर्शनमंतरेणनभवतीतितत्परिज्ञा नायव्यवहारदर्शनमहरहःस्वयंकर्त्तव्यमित्याह इत्येवमुक्तप्रकारेणक्रतुतुल्यंफलंदंड्येदंडनेस्वर्गादिनाशंचादंड्यदंडनेसम्यग्विचिंत्यपृथक्पृथ क्वर्णादिक्रमेणसभ्यैर्वक्ष्यमाणलक्षणैःपरिवृतःप्रतिदिनंव्यवहारान्वक्ष्यमाणमार्गेणदुष्टादुष्टपरिज्ञानार्थंराजास्वयंपश्येत् ३५९ ॰ ॰

कुलानिब्राह्मणादीनां जातयोमूर्धावसिक्तप्रभृतयः श्रेणयस्तांबूलिकादीनां गणाहेलाबुकादीनां जानपदाः कारुकादयः एतान्स्वधर्माच्चलितान् प्रच्युतान्राजायथापराधंविनीयदंडयित्वापथिस्वधर्मेस्थापयेत् दंडंदुर्वृत्तेषुनिपातयेदित्युक्तं सचदंडोद्विविधः शारीरोर्थदंडश्चेति यथाहनारदः शारीरस्त्वर्थदंडश्चदंडस्तुद्विविधःस्मृतः शारीरस्ताडनादिस्तुमरणांतःप्रकीर्तितः काकिण्यादिस्त्वर्थदंडःसर्वस्वांतस्तथैवचेति द्विविधोप्यपराधानुसारेणानेकधाभवति आहस्म शारीरोदशधाप्रोक्तोह्यर्थदंडस्त्वनेकधेति तत्रकृष्णलमाषसुवर्णपलादिशब्दैरर्थदंडावक्तव्यास्तेच

कुलानिजातीःश्रेणीश्चगणान्जानपदानपि स्वधर्माच्चलितान्राजाविनीयस्थापयेत्पथि ३६०

जालसूर्यमरीचिस्थंत्रसरेणूरजःस्मृतम् तेष्टौलिक्षातुतास्तिस्रोराजसर्षपउच्यते ३६१

प्रतिदेशंभिन्नपरिमाणार्थाइत्येकरूपापराधेपिदेशभेदेनन्यूनाधिकदंडोमाभूदितिकृष्णलादिशब्दानांनियतपरिमाणविषयत्वंदंडव्यवहारेदर्शयितुमाह जालकांतरप्रविष्टादित्यरश्मिस्थितंयद्रजस्तत्त्रसरेणुरित्युक्तं योगीश्वरादिभिस्तत्त्वदर्शिभिः तेचत्रसरेणवोष्टौलिक्षास्वेदजयूकांडं तालिक्षास्तिस्रोराजसर्षपोराजिका तेराजसर्षपास्त्रयोगौरसर्षपः सिद्धार्थः गौरसर्षपाः षट्यवोमध्यः मध्यमोनस्थूलोनसूक्ष्मः एतेनगौरसर्षपा अपिमध्यमाइतिगम्यते तथाराजसर्षपा अपि मध्यशब्दादेवसर्षपादिशब्दाः नकेवलमुन्मानवचनाः किंतुतदुन्मितद्रव्यवचनाइतिगम्यते यथाप्रस्थपरिमितायवाः प्रस्थउच्यंते एवंसर्षपाद्युन्मितंद्रव्यंसर्षपादिशब्दैः सर्षपादिशब्दानांच्चकेवलोन्मानवचनत्वेत्रसरेणूनुपसंहृत्योन्मातुमशक्यत्वात्तद्द्वारेणकृष्णलादिव्यवहारोनस्यात् तत्रस्थूलस्थूलतरस्थूलतमसूक्ष्मसूक्ष्मतरसूक्ष्मतममध्यसर्षपाद्युन्मानभेदेनप्रतिदेशंव्यवहारभेदेस्थितेदंडव्यवहारेमध्यइतिनियम्यते तेमध्यमायवास्त्रयएकःकृष्णलः तेकृष्णलाः पंचैकोमाषः तेमाषाःषोडशैकः सुवर्णः तेसुवर्णाश्चत्वारः पलमितिसंज्ञाः कथिताइति पंचवापिपलंप्रकीर्तितंनारदादिभिः तत्रस्थूलैस्त्रिभिर्यवैः कृष्णलपरिकल्पनायांव्यावहारिकनिष्कस्यषोडशांशः कृष्णलोभवति तैःपंचभिर्माषः माषैःषोडशभिः सुवर्णःसचव्यावहारिकैःपंचभिर्निष्कैरेकःसुवर्णोभवति तेचत्वारःपलमिति निष्काणांविंशतिःपलं यदातुसूक्ष्मैस्त्रिभिर्यवैः कृष्णलःपरिकल्प्यतेतदाव्यावहारिकनिष्कस्यद्वात्रिंशत्तमोभागः कृष्णलोभवति तस्मिन्पक्षेसुवर्णःसार्धनिष्कद्वयंभवति पलंचदशनिष्कं यदातुमध्यमयवैः कृष्णलपरिकल्पनातदानिष्कस्यविंशतितमोभागः कृष्णलः सुवर्णश्चतुर्निष्कः षोडशनिष्कंपलं एवंपंचसुवर्णपलमितिपक्षेविंशतिनिष्कंपलं एवमन्य-

गौरस्तुतेत्रयःषट्तेयवोमध्यस्तुतेत्रयः कृष्णलःपंचतेमाषस्तेसुवर्णस्तुषोडश पलंसुवर्णाश्चत्वारःपंचवापिप्रकीर्तितम् ३६२

दपिनिष्कस्यचत्वारिंशोभागः कृष्णलः द्विनिष्कः सुवर्णोष्टनिष्कंपलं इत्यादिलोकव्यवहारानुसारेणास्मादेवसूत्रादूहनीयं ३६१ ३६२ एवं
सुवर्णस्योन्मानंप्रतिपाद्येदानींरजतस्याह द्वेकृष्णलेपूर्वोक्तेरूप्यमाषोरूप्यसंबंधीमाषः तेरूप्यमाषाःषोडशधरणंपुराणइत्यप्यस्यैवसंज्ञांतरम्
तेषोडशस्याद्धरणंपुराणश्चैवराजतइतिमनुस्मरणात् दशभिर्धरणैःशतमानंपलमितिचाभिधीयते पूर्वोक्ताश्चत्वारः सुवर्णाएकोराजतोनिष्को
भवति ३६३ इदानींताम्रस्योन्मानमाह पलस्यचतुर्थोंशः कर्षइतिलोकप्रसिद्धः कर्षेणोन्मितःकार्षिकः ताम्रस्यविकारस्ताम्रिकः कर्षसंमित

द्वेकृष्णलेरूप्यमाषोधरणंषोडशैवते शतमानंतुदशभिर्धरणैःपलमेवतु ३६३ निष्कंसुवर्णाश्चत्वारः
कार्षिकस्ताम्रिकःपणः ३६४

स्ताम्रविकारः पणसंज्ञोभवति कार्षापणसंज्ञकश्च कार्षापणस्तुविज्ञेयस्ताम्रिकःकार्षिकः
पणइतिमनुवचनात् पंचसुवर्णपलपक्षेविंशतिमाषःपणोभवति तथासतिमाषोविंशतिमोभागः पणस्यपरिकीर्तितइत्यादिव्यवहारःसिद्धोभव
ति चतुःसुवर्णपलपक्षेतुषोडशमाषःपणोभवति अस्मिंश्चपक्षेसुवर्णकार्षापणपणशब्दानांसमानार्थत्वेपिपणकार्षापणशब्दौताम्रविषयावेव ए ७९
वंतावद्धेमरूप्यताम्राणामुन्मानमुक्तं दंडव्यवहारोपयोगित्वात् कांस्यरीतिकादीनामपिलोकव्यवहारांगभूतानामेवोन्मानंद्रष्टव्यम् ३६४ ७

स्वशास्त्रपरिभाषामाह पणानांसहस्रंपणसाहस्रंतत्परिमाणमस्येतिपणसाहस्रः अशीत्यासहवर्ततइतिसाशीतिः अशीत्यधिकपणसहस्रपरिमि
तोयोदंडः सउत्तमसाहससंज्ञोवेदितव्यः तदर्धंमध्यमः तस्यसाशीतिपणसाहस्रस्यार्धंचत्वारिंशदधिकपणपंचशतपरिमितोदंडोमध्यमसाहससं-
ज्ञः तदर्धमधमः तस्यचत्वारिंशदधिकपंचशतपणस्यार्धंसप्तत्यधिकपणशतद्वयपरिमितोदंडोधम साहससंज्ञः स्मृतउक्तोमन्वादिभिः यत्तुपणानांद्वेश

साशीतिःपणसाहस्रोदंडउत्तमसाहसः तदर्धंमध्यमःप्रोक्तस्तदर्धमधमःस्मृतः ३६५ धिग्दंडस्त्वथ
वाग्दंडोधनदंडोवधस्तथा योज्याव्यस्ताःसमस्तावाप्यपराधवशादिमे ३६६

तेसार्धेप्रथमःसाहसः स्मृतः मध्यमःपंचविज्ञेयः सहस्रंत्वेवचोत्तमइतिमनुनोक्तं तत्पक्षांतरममतिपूर्वापराधविषयंद्रष्टव्यं ३६५ दंडभेदानाह धिग्दंडो
धिक्धिगितिकुत्सनं वाग्दंडस्तुपरुषशापवचनात्मकः धनदंडोधनापहारात्मकः वधदंडःशारीरोबंधरोधादिर्जीवितांतः एतेचतुर्विधादंडाः व्यस्ताएकैकशः
समस्ताःद्वित्राःत्रिचतुरोवाअपराधानुसारेणप्रयोक्तव्याःउक्तक्रमेणपूर्वपूर्वासाध्येउत्तरउत्तरःप्रयोक्तव्यः यथाहमनुः धिग्दंडंप्रथमंकुर्याद्वाग्दंडंतदनंतरं तृती
यंधनदंडंतु वधदंडमतःपरमिति ३६६

दंडव्यवस्थानिमित्तान्याह यथापराधंज्ञात्वातदनुसारेण दंडप्रणयनमेवंदेशकालवयःकर्मवित्तानिज्ञात्वातदनुसारेणदंड्येषु दंडार्हेषु दंडप्रणय- आ॰
नंकुर्यात् तथाबुद्धिपूर्वाबुद्धिपूर्वसकृदावृत्त्यनुसारेणच यद्यपिराजानमधिकृत्यायंराजधर्मकलापउक्तस्तथापिवर्णांतरस्यापिविषयमंडलादिपरि १

ज्ञात्वापराधंदेशंचकालंबलमथापिवा वयःकर्मचवित्तंचदंडंदंड्येषुपातयेत् ३६७

पालनाधिकृतस्यायंधर्मोवेदितव्यः राजधर्मा
न्प्रवक्ष्यामियथावृत्तोभवेन्नृपइत्यत्रपृथङ्नृपग्रहणात्करग्रहणस्यरक्षार्थत्वाच्चरक्षणस्यदंडप्रणयनायत्तत्वादिति ३६७ इतिश्रीपद्मनाभभट्टो ८०
पाध्यायात्मजस्यश्रीमत्परमहंसपरिव्राजकविज्ञानेश्वरभट्टारकस्यकृतौऋजुमिताक्षरायांयाज्ञवल्क्यधर्मशास्त्रविवृतौसदाचारःप्रथमोध्यायःसमाप्तः ७

उत्तमोपपदस्येयंशिष्यस्यकृतिरात्मनः धर्मशास्त्रस्यविवृतिर्विज्ञानेश्वरयोगिनः १ अस्मिन्नध्यायेप्रकरणानि उपोद्घातप्रकरणं १ ब्रह्मचारिप्र
करणं २ विवाहप्रकरणं ३ जातिविवेकप्रकरणं ४ गृहस्थधर्मप्रकरणं ५ स्नातकप्रकरणं ६ भक्ष्याभक्ष्यप्रकरणं ७ द्रव्यशुद्धिप्रकरणं ८ दानध
र्मप्रकरणं ९ श्राद्धप्रकरणं १० गणपतिकल्पः ११ शांतिप्रकरणं १२ राजधर्मप्रकरणं १३ एवंत्रयोदशप्रकरणानि इतियाज्ञवल्क्यमुनिशास्त्रग
ताविवृतिर्नकस्यविहिताविदुषःप्रमिताक्षरापिविपुलार्थवतीपरिषिंचतिश्रवणयोरमृतं १ ७ ७ ७ ७

इतियाज्ञवल्क्यस्मृतिमिताक्षरायामाचाराध्यायःसमाप्तः

अथयाज्ञवल्क्यस्मृतिमिताक्षराव्यवहाराध्याय प्रारंभः

श्रीगणेशायनमः उत्तमोपपदस्येयंधर्मस्यकृतिरात्मनः धर्मस्यविवृतिर्ज्ञेयाविज्ञानेश्वरयोगिनः १ इतियाज्ञवल्क्यमुनिशा-
स्त्रगताविवृतिर्नकस्यविदुषाविहिता प्रमिताक्षरापिविपुलार्थवतीपरिषिंचतिश्रवणयोरमृतम् २ ग्रंथेस्वरव्यंजनबिंदुरेफमात्राविही
नंलिखितंमयायत् तत्सर्वमार्यैःपरिशोधनीयंप्रायेणमुह्यंतिहियेलिखंति ३ अभिषेकादिगुणयुक्तस्यराज्ञः प्रजापालनंपरमोध
र्मः तच्चदुष्टनिग्रहमंतरेणनसंभवति दुष्टपरिज्ञानंचनव्यवहारदर्शनमंतरेणसंभवति तद्व्यवहारदर्शनमहरहःकर्तव्यमित्युक्तं
व्यवहारान्नृपःपश्येत्सभ्यैःपरिवृतोन्वहमिति सचव्यवहारःकीदृशःकतिविधःकथंचेतीतिकर्तव्यताकलापोनाभिहितस्ततस्त

व्यवहारान्नृपःपश्येद्विद्वद्भिर्ब्राह्मणैःसह धर्मशास्त्रानुसारेणक्रोधलोभविवर्जितः १

दभिधानायद्वितीयोऽध्यायआरभ्यते व्यवहारान् अन्यविरोधेनस्वात्मसंबंधितयाकथनंव्यवहारः यथा कश्चिदिदंक्षेत्रादिम
दीयमितिकथयत्यन्योपितद्विरोधेनमदीयमिति तस्यानेकविधत्वंदर्शयतिबहुवचनेन नृपइतिनक्षत्रियमात्रस्यायंधर्मः किंतुप्र-
जापालनाधिकृतस्यान्यस्यापीतिदर्शयति पश्येदितिपूर्वोक्तस्यानुवादोधर्मविशेषविधानार्थः विद्वद्भिर्वेदव्याकरणधर्मशास्त्रा
भिज्ञैर्ब्राह्मणैर्नक्षत्रियादिभिः ब्राह्मणैःसहेतितृतीयानिर्देशात्तेषामप्राधान्यं सहयुक्तेऽप्रधानइतिस्मरणात् अतश्चादर्शने १
न्यथादर्शनेवाराज्ञोदोषोवानब्राह्मणानाम् यथाहमनुः अदंड्यान्दंडयन्राजा दंड्यांश्चैवाप्यदंडयन् अयशोमहदाप्नोतिनर-

कंचाधिगच्छतीति कथंधर्मशास्त्रानुसारेणनार्थशास्त्रानुसारेण देशादिसमयधर्मस्यापिधर्मशास्त्राविरुद्धस्यधर्मशास्त्रविष
यत्वान्नपृथगुपादानं तथावक्ष्यति निजधर्माविरोधेनयस्तुसामयिकोभवेत् सोपियत्नेनसंरक्ष्योधर्मोराजकृतश्चयइति क्रो
धलोभविवर्जितइति धर्मशास्त्रानुसारेणेतिसिद्धेक्रोधलोभविवर्जितइतिवचनमादरार्थं क्रोधोमर्षः लोभोलिप्सातिशयः १
किंच श्रुतेनमीमांसाव्याकरणादिश्रवणेन अध्ययनेनवेदाध्ययनेनचसंपन्नाः धर्मज्ञाः धर्मशास्त्रज्ञाः सत्यवादिनः
सत्यवचनशीलाः रिपौमित्रेचयेसमाद्वेषरागादिरहिताएवंभूताःसभासदःसभायांसंसदियथासीदंतिउपविशंति तथादानमानस

श्रुताध्ययनसंपन्नाधर्मज्ञाःसत्यवादिनः राज्ञासभासदःकार्या रिपौमित्रेचयेसमाः २

त्कारैराज्ञाकर्तव्याः यद्यपिश्रुताध्ययनसंपन्नाइत्यविशेषेणोक्तंतथापिब्राह्मणाएव यथाहकात्यायनः सतुसभ्यैःस्थिरैर्युक्तःप्रा
ज्ञैर्मौलैर्द्विजोत्तमैः धर्मशास्त्रार्थकुशलैरर्थशास्त्रविशारदैरिति तेचत्रयःकर्तव्याबहुवचनस्यार्थवत्त्वात् यस्मिन्देशेनिषीदंति विप्रा
वेदविदस्त्रय इतिमनुस्मरणाच्च बृहस्पतिस्तु सप्तपंचत्रयोवासभासदोभवंतीत्याह लोकवेदज्ञधर्मज्ञाःसप्तपंचत्रयोपिवा य
त्रोपविष्टाविप्राःस्युःसायज्ञसदृशीसभेति नचब्राह्मणैःसहेतिपूर्वश्लोकोक्तानांब्राह्मणानांश्रुताध्ययनसंपन्नाइत्यादिविशेषण
मितिमंतव्यम् तृतीयाप्रथमांतनिर्दिष्टानांविशेषणविशेष्यभावासंभवात् विद्वद्भिरित्यनेनपुनरुक्तिप्रसंगाच्च तथाचकात्या-

यनेनब्राह्मणानांसभासदांचस्पष्टोभेदश्चदर्शितः सप्राड्विवाकःसामात्यःसब्राह्मणपुरोहितः ससभ्यःप्रेक्षकोराजास्वर्गेति
ष्ठतिधर्मतइति तत्रब्राह्मणाअनियुक्ताःसभासदस्तुनियुक्ताइतिभेदः अतएवोक्तम् नियुक्तोवाऽनियुक्तोवाधर्मज्ञोवक्तुम
र्हतीति तत्रनियुक्तानांयथावस्थितार्थकथनेपियदिराजान्यथाकरोति तदासौनिवारणीयोन्यथादोषः उक्तंचकात्यायनेन
अन्यायेनापितंयांतंयेनुयांतिसभासदः तेपितद्भागिनस्तस्माद्बोधनीयःसतैर्नृपइति अनियुक्तानांपुनरन्यथाभिधानेवादो
षोनतुराज्ञोनिवारणे सभावानप्रवेष्टव्यावक्तव्यंवासमंजसम् अब्रुवन्विब्रुवन्वापिनरोभवतिकिल्बिषीतिमनुस्मरणात् रिपो

अपश्यताकार्यवशाद्व्यवहारान्नृपेणतु सभ्यैःसहनियोक्तव्योब्राह्मणःसर्वधर्मवित् ३

मित्रेचेतिचकाराल्लोकरंजनार्थंकतिपयैर्वणिग्भिरप्यधिष्ठितंसदःकर्तव्यम् यथाहकात्यायनः कुलशीलवयोवृत्तवित्तवद्भिरमत्स
रैः वणिग्भिःस्यात्कतिपयैःकुलभूतैरधिष्ठितमिति २ व्यवहारान्नृपःपश्येदित्युक्तंतत्रानुकल्पमाह कार्यांतरव्यग्रतयाव्यवहारान
पश्यतानृपेणपूर्वोक्तैःसभ्यैःसहसर्वधर्मवित् सर्वान्धर्मशास्त्रोक्तान् सामयिकांश्चधर्मान्वेत्ति विचारयति ससर्वधर्मवित् ब्राह्मणोन
क्षत्रियादिर्नियोक्तव्योव्यवहारदर्शने तंचकात्यायनेनोक्तगुणविशिष्टंकुर्यात् यथा दांतंकुलीनंमध्यस्थमनुद्वेगकरंस्थिरम् २
परत्रभीरुंधर्मिष्ठमुद्युक्तंक्रोधवर्जितमिति एवंभूतब्राह्मणासंभवेक्षत्रियंवैश्यंवानियुंजीत नशूद्रम् तथाहकात्यायनः

ब्राह्मणोयत्रनस्यात्तुक्षत्रियंतत्रयोजयेत् वैश्यंवाधर्मशास्त्रज्ञंशूद्रंयत्नेनवर्जयेदिति नारदेनत्वयमेवमुख्योदर्शितः धर्मशास्त्रंपुरस्कृ
त्यप्राड्विवाकमतेस्थितः समाहितमतिःपश्येद्व्यवहाराननुक्रमादिति प्राड्विवाकमतेस्थितोनस्वमतेस्थितः राजाचारचक्षुषापरसै
न्यंपश्यतीतिवत् तस्यचेयंयौगिकीसंज्ञा अर्थिप्रत्यर्थिनौपृच्छतीतिप्राट् तयोर्वचनंविरुद्धमविरुद्धंचसभ्यैःसहविविनक्तिवि-
वेचयतीतिविवाकः प्राट्चासौविवाकश्चेतिप्राड्विवाकः उक्तंच विवादानुगतंपृष्ट्वाससभ्यस्तत्प्रयत्नतः विचारयतियेनासौप्रा
ड्विवाकस्ततःस्मृतइति ३ अपिच प्राड्विवाकादयःसभ्यायदिरागादिनास्मृत्यपेतंव्यवहारंविचारयंति तदाराज्ञाकिंकर्तव्यमि

रागाल्लोभाद्भयाद्वापिस्मृत्यपेतादिकारिणः सभ्याःपृथक्पृथग्दंड्याविवादाद्द्विगुणंदमं ४

त्यतआह पूर्वोक्ताःसभ्यारजसोनिरंकुशत्वेन तदभिभूताद्रागात्स्नेहातिशयाल्लोभाद्वालिप्सातिशयाद्भयात्संत्रासात्स्मृत्यपेतंस्मृति-
विरुद्धं आदिशब्दादाचारापेतंकुर्वंतःपृथक्पृथक्एकैकशोविवादात् विवादपराजयनिमित्ताद्दमाद्द्विगुणंदमंदंड्याःपुनर्विवा
दास्पदीभूतात्द्रव्यात् तथासति स्त्रीसंग्रहणादिषुदंडाभावप्रसंगः रागलोभभयानामुपादानंरागादिष्वेवद्विगुणोदमोनाज्ञानमो
हादिष्विति नियमार्थं नचराजासर्वस्येष्टेब्राह्मणवर्जमितिगौतमवचनात् नब्राह्मणादंड्याइतिमंतव्यम् तस्यप्रशंसार्थत्वात् य-
त्तु षड्भिःपरिहार्योराज्ञा वध्यश्चाबंध्यश्चादंड्यश्चाबहिःकार्यश्चापरिवाद्यश्चापरिहार्यश्चेति तदपिसाधुःएषबहुश्रुतोभवति

लोकवेदवेदांगविद्वाक्योवाक्येतिहासपुराणकुशलस्तदपेक्षस्तद्वृत्तिश्चाष्टचत्वारिंशतासंस्कारैः संस्कृतस्त्रिषुकर्मस्वभिरतः षट्
सुवासामयाचारिकेष्वभिविनीतइतिप्रतिपादितबहुश्रुतविषयंनब्राह्मणमात्रविषयम् ४ व्यवहारविषयमाह धर्मशा
स्त्रसमयाचारविरुद्धेन मार्गेणपरैराधर्षितोभिभूतोयद्राज्ञे प्राड्विवाकायवा आवेदयतिविज्ञापयतिचेत् यदितदावेदना
नंव्यवहारपदं प्रतिज्ञोत्तरसंशयहेतुपरामर्शप्रमाणनिर्णयप्रयोजनात्मकोव्यवहारस्तस्यपदंविषयः तस्यचेदंसामान्य
लक्षणं सचद्विविधः शंकाभियोगस्तत्त्वाभियोगश्चेति यथाहनारदः द्व्यभियोगस्तुविज्ञेयःशंकातत्त्वाभियोगतः शं

स्मृत्याचारव्यपेतेनमार्गेणाधर्षितःपरैः आवेदयतिचेद्राज्ञेव्यवहारपदंहितत् ५

कासतांतुसंसर्गात्तत्त्वंहोढाभिदर्शनादिति होढालोप्त्रंलिंगमितियावत् तेनदर्शनंसाक्षाद्वादर्शनंहोढाभिदर्शनंतस्मात् तत्त्वा
भियोगोपिद्विविधः प्रतिषेधात्मकोविध्यात्मकश्चेति यथामत्तोहिरण्यादिकंगृहीत्वानप्रयच्छति क्षेत्रादिकंममायमपहरती
तिवा उक्तंचकात्यायनेन न्यायंस्वंनेच्छतेकर्तुमन्याय्यंवाकरोतियइति सपुनश्चाष्टादशधाभिद्यते यथाहमनुः तेषामा
द्यमृणादानंनिक्षेपोस्वामिविक्रयः संभूयचसमुत्थानंदत्तस्यानपकर्मच वेतनस्यैवचादानंसंविदश्चव्यतिक्रमः क्रयविक्रया ३
नुशयोविवादःस्वामिपालयोः सीमाविवादधर्मश्चपारुष्येदंडवाचिके स्तेयंचसाहसंचैवस्त्रीसंग्रहणमेवच स्त्रीपुंधर्मोवि

भागश्चद्यूतमाह्वयएवच पदान्यष्टादशैतानिव्यवहारस्थिताविहेति एतान्यपिसाध्यभेदेनपुनर्बहुत्वंगतानि यथाहनारदः
एषामेवप्रभेदोन्यः शतमष्टोत्तरंशतम् क्रियाभेदान्मनुष्याणांशतशाखोनिगद्यतइति आवेदयतिचेदित्यनेनस्वयमेवागत्यावे
दयतिनराजप्रेरितस्तत्पुरुषप्रेरितोवेतिदर्शयति यथाहमनुः नोत्पादयेत्स्वयंकार्यंराजावाप्यस्यपूरुषः नचप्रापितमन्येन
ग्रसेतार्थंकथंचनेति परैरिति परेणपराभ्यांपरैरित्येकस्यैकेनद्वाभ्यांबहुभिर्वाव्यवहारोभवतीतिदर्शयति यत्पुनरेकस्य
बहुभिःसार्द्धंस्त्रीणांप्रेष्यजनस्यच अनादेयोभवेद्वादोधर्मविद्भिरुदाहृतइतिनारदवचनम् तद्भिन्नसाध्यविषयम् आवेद
यतिराज्ञेइत्यनेनैवराज्ञापृष्टोविनीतवेषआवेदयेत् आवेदितंचयुक्तंचेन्मुद्रादिनाप्रत्यर्थ्याह्वानमकल्यादीनांचानाह्वानमि-
त्याद्यर्थसिद्धमितिनोक्तम् स्मृत्यंतरेतुस्पष्टार्थमुक्तम् यथा कालेकार्यार्थिनंपृच्छेद्रूणंतंपुरतःस्थितम् किंकार्यंकाचतेपीडा
माभैषीर्ब्रूहिमानव केनकस्मिन्कदाकस्मात्पृच्छेदेवंसभागतम् एवंपृष्टःसयद्ब्रूयात्तत्सभ्यैर्ब्राह्मणैःसह विमृश्यका
र्यंन्याय्यंचेदाह्वानार्थमतःपरम् मुद्रांवानिक्षिपेत्तस्मिन्पुरुषंवासमादिशेत् अकल्पबालस्थविरविषमस्थक्रियाकुलान् कार्या
तिपातिव्यसनिनृपकार्योत्सवाकुलान् मत्तोन्मत्तप्रमत्तार्तान्भृत्यान्नाह्वानयेन्नृपः नहीनपक्षांयुवतिंकुलेजातांप्रसूतिकाम् स
र्ववर्णोत्तमांकन्यांताज्ञातिप्रभुकाःस्मृताः तदधीनकुटुंबिन्यःस्वैरिण्योगणिकाश्चयाः निष्कुलायाश्चपतितास्तासामाह्वानमिष्य
ते कालंदेशंचविज्ञायकार्याणांचबलाबले अकल्पादीनपिशनैर्यानैराह्वानयेन्नृपः ज्ञात्वाभियोगंयेपिस्युर्वनेप्रव्रजितादयः

तानप्याव्हानयेद्राजागुरुकार्येष्वकोपयन्निति आसेधव्यवस्थाप्यर्थसिद्धैवनारदेनोक्ता वक्तव्येर्थेत्वातिष्ठंतमुत्क्रामंतं
चतद्वचः आसेधयेद्विवादार्थीयावदाव्हानदर्शनम् स्थानासेधःकालकृतःप्रवासात्कर्मणस्तथा चतुर्विधःस्यादासेधो
नासिद्धस्तंविलंघयेत् आसेधकालआसिद्धआसेधंयोतिवर्तते सविनेयोन्यथाकुर्वन्नासेद्धादंडभाग्भवेत् नदीसंतार
कांतारदुर्देशोपप्लवादिषु आसिद्धस्तंपरासेधमुत्क्रामन्नापराभ्रुयात् निर्वेष्टुकामोरोगार्तोयियक्षुर्व्यसनेस्थितः अभियु
क्तस्तथान्येनराजकार्योद्यतस्तथा गवांप्रचारेगोपालाः सस्यावापेकृषीवलाः शिल्पिनश्चापितत्कालमायुधीयाश्चविग्रहइति
आसेधोराजाज्ञयाअवरोधः अकल्यादयःपुत्रादिकमन्यंवासुहृदंप्रेषयिष्यंति नचतेपरार्थवादिनःयोनभ्राताननचपितान-

प्रत्यर्थिनोग्रतोलेख्यंयथावेदितमर्थिना समामासतदर्द्धाहर्नामजात्यादिचिन्हितम् ६

पुत्रोननियोगकृत् परार्थवादीदंड्यःस्याद्व्यवहारेषुविब्रुवन्निति नारदवचनात् ५ प्रत्यर्थिनिमुद्रालेख्यपुरुषाणामन्यतमे
नानीतेकिंकुर्यादित्यतआह अर्थ्यतइत्यर्थः साध्यःसोस्यास्तीत्यर्थी तत्प्रतिपक्षःप्रत्यर्थी तस्याग्रतःपुरतोलेख्यं लेखनी
यम् यथायेनप्रकारेणपूर्वमावेदनकालेआवेदितंतथा नपुनरन्यथा अन्यथावादित्वेनव्यवहारस्यभंगप्रसंगात् अन्यवादी ४
क्रियाद्वेषीनोपस्थातानिरुत्तरः आहूतप्रपलायीचहीनःपंचविधःस्मृतइति आवेदनकालएवार्थिवचनस्यलिखितत्वात्पुनर्ले

खनमनर्थकमित्यतआह समामासेत्यादि संवत्सरमासपक्षतिथिवारादि अर्थिप्रत्यर्थिनामब्राह्मणजात्यादिचिन्हितम् आ
दिशब्देनद्रव्यंतत्संख्या स्थानवेलाक्षमालिंगादीनिगृह्यंते यथोक्तम् अर्थवद्धर्मसंयुक्तंपरिपूर्णमनाकुलम् साध्यवद्वाचकपदंप्र
कृतार्थानुबंधिच प्रसिद्धमविरुद्धंचनिश्चितंसाधनेक्षमम् संक्षिप्तंनिखिलार्थंचदेशकालाविरोधिच वर्षर्तुमासपक्षाहोवेला
देशप्रदेशवत् स्थानावसथसाध्याख्याजात्याकारवयोयुतम् साध्यप्रमाणसंख्यावदात्मप्रत्यर्थिनामवत् परात्मपूर्वजानेक
राजनामभिरंकितम् क्षमालिंगात्मपीडावत्कथिताहर्तृदायकम् यदावेद्यतेराज्ञेतन्द्राषेत्यभिधीयतइति भाषाप्रतिज्ञाप
क्षइत्यर्थांतरं आवेदनसमयेकार्यमात्रंलिखितं प्रत्यर्थिनोग्रतः समामासादिविशिष्टंलिख्यतेइतिविशेषः संवत्सरविशेषणंय-
द्यपिसर्वव्यवहारेषुनोपयुज्यते तथाप्याधिप्रतिग्रहक्रयेषुनिर्णयार्थमुपयुज्यते आधौप्रतिग्रहेक्रीतेपूर्वातुबलवत्तरेतिवच-
नात् अर्थव्यवहारेपिएकस्मिन्संवत्सरेयत्संख्याकंयद्द्रव्यंयतोयेनगृहीतंप्रत्यर्पितंच पुनरन्यस्मिन्वत्सरेततद्द्रव्यंतत्संख्याकं
ततस्तेनगृहीतंयाच्यमानोयदिब्रूयात्सत्यंगृहीतंप्रत्यर्पितंचेति तत्संवत्सरांतरेगृहीतंप्रत्यर्पितंनास्मिन्वत्सरेइत्युपयुज्यते एवं
मासाद्यपियोज्यम् देशस्थानादयःपुनःस्थावरेष्वेवोपयुज्यंते देशश्चैवतथास्थानंसंनिवेशस्तथैवच जातिःसंज्ञाधिवास
श्चप्रमाणंक्षेत्रनामच पितृपैतामहंचैवपूर्वराजानुकीर्तनम् स्थावरेषुविवादेषुदशैतानिनिवेशयेदितिस्मरणात् देशोम-
ध्यदेशादिः स्थानंवाराणस्यादि सन्निवेशस्तत्रैवपूर्वपरदिग्विभागपरिच्छिन्नसम्यङ्निविष्टोगृहक्षेत्रादिः जातिरर्थिप्रत्यर्थि

नोब्राह्मणत्वादिः संज्ञाचदेवदत्तादिः अधिवासः समीपदेशेनिवासीजनः प्रमाणंनिवर्तनादिभूपरिमाणं क्षेत्रंनाम शालिक्षेत्रंकं
मुकक्षेत्रं कृष्णाभूमः पांडुभूमइति पितुःपितामहस्यचनामाथिप्रत्यर्थिनोः पूर्वेषांत्रयाणांराज्ञांनामकीर्तनंचेति समामासादी
नांयस्मिन्व्यवहारे यावदुपयुज्यते तत्र तावल्लेखनीयंइतितात्पर्यार्थः ६ एवंपक्षलक्षणेस्थिते पक्षलक्षणरहितानांपक्षवदव
भासमानानांपक्षाभासत्वंसिद्धमेवेति योगीश्वरेणन पृथक्पक्षाभासा उक्ता अन्येस्तुविस्पष्टार्थमुक्तम् असिद्धादेः साधयितु
मशक्यत्वादनिराकरणम् अप्रसिद्धंमदीयंशशविषाणंगृहीत्वानप्रयच्छतीत्यादि निराबाधमस्मद्गृहदीपप्रकाशेनायंस्वगृहे

अप्रसिद्धंनिराबाधंनिरर्थंनिष्प्रयोजनम् असाध्यंवाविरुद्धंवापक्षाभासंविवर्जयेत् ७

व्यवहरतीत्यादि निरर्थमभिधेयरहितम् कचटतपजडदगबेत्यादि निष्प्रयोजनंयथायंदेवदत्तोस्मद्गृहसन्निधौसुस्वरम
धीतइत्यादि असाध्यं यथाहंदेवदत्तेनसभ्रूभंगमुपहसितइत्यादि एतत्साधनासंभवादसाध्यम् अल्पकालत्वान्नसाक्षि
संभवोलिखितंदूरतोल्पत्वान्नदिव्यमिति विरुद्धंयथाहंमूकेनशप्तइत्यादि पुरराष्ट्रादिविरुद्धंवा एतेषांस्वभावेनैवनिराकरण
मितिननिराक्रियते तत्रच अप्रतिसिद्धादीनांव्युत्पत्त्यर्थमुपादानं तदप्यनेकपदसंकीर्णस्यनिराकरणंनक्रियते राज्ञाविव- ५
र्जितोयश्चयश्चपौरविरोधकृत् राष्ट्रस्यवासमस्तस्यप्रकृतीनांतथैवच अन्येवायेपुरग्राममहाजनविरोधकाः अनादेया

स्तुतेसर्वेव्यवहाराः प्रकीर्तिताइति यत्त्वनेकपदसंकीर्णः पूर्वपक्षोनसिध्यतीति तत्र यद्यनेकवस्तुसंकीर्णइत्युच्यते तदानदोषः
मदीयमनेनहिरण्यवासोरूपकादिवापहृतमित्येवंविधस्यादुष्टत्वात् ऋणादानादिपदसंकरे पक्षाभासइतिचेत्तदपिन मदी-
यारूपकाअनेनवृद्ध्यागृहीताः सुवर्णंवास्यहस्तेनिक्षिप्तम् मदीयंक्षेत्रमयमपहरतीत्यादीनांपक्षत्वमिष्यतएव किंतु क्रिया
भेदात् क्रमेणव्यवहारोनयुगपदित्येतावत् यथाहकात्यायनः बहुप्रतिज्ञंयत्कार्यंव्यवहारेस्सुनिश्चितम् कामंतदपि
गृह्णीयाद्राजातत्त्वबुभुत्सयेति यस्मादनेकपदसंकीर्णः पूर्वपक्षोयुगपन्नसिध्यतीतितस्यार्थः अर्थिग्रहणात्पुत्रपौत्रादिग्र
हणम् तेषामेकार्थत्वात् नियुक्तस्यापिनियोगेनैवतदेकार्थत्वाक्षेपात् अर्थिनासंनियुक्तोवाप्रत्यर्थिप्रहितोपिवा योयस्या
र्थेविवदतेतयोर्जयपराजयावितिस्मरणात् नियुक्तजयपराजयौमूलस्वामिनोरेव एतच्चभूमौफलकेवा पांडुलेखेनलिखि
त्वा आवापोद्धारेणविशोधितंपश्चात्पत्रेनिवेशयेत् पूर्वपक्षंस्वभावोक्तंप्राड्विवाकोभिलेखयेत् पांडुलेखेनफलकेततःपत्रेवि
शोधितमिति कात्यायनस्मरणात् शोधनंचयावदुत्तरदर्शनंकर्तव्यम् नातःपरमनवस्थाप्रसंगात् अतएवनारदेनोक्तम्
शोधयेत्पूर्ववादंतुयावन्नोत्तरदर्शनम् अवष्टब्धस्योत्तरेणनिवृत्तंशोधनंभवेदिति पूर्वपक्षमशोधयित्वैवयदुत्तरंदापयति
सभ्यास्तदारागाल्लोभादित्युक्तदंडेनसभ्यान्दंडयित्वापुनः प्रतिज्ञापूर्वकंव्यवहारः प्रवर्तनीयोराज्ञेति ७ एवंशोधितपत्रारू-
ढेपूर्वपक्षेकिंकर्तव्यमित्यत आह श्रुतोभाषार्थोयेनप्रत्यर्थिनासोश्रुतार्थः तस्योत्तरंपूर्वपक्षादुत्तरत्रभवतीत्युत्तरंलेख्यं ले

रवनीयम् पूर्ववेदकस्यार्थिनः संनिधौसमीपे उत्तरंचयत्पूर्वोक्तस्यनिराकरणंतदुच्यते यथाह पक्षस्यव्यापकंसारमसं
दिग्धमनाकुलम् अव्यारव्यागम्यमित्येतदुत्तरंतद्विदोविदुरिति पक्षस्यव्यापकंनिराकरणसमर्थं सारंन्याय्यम् न्याया
दनपेतम् असंदिग्धंसंदेहरहितम् अनाकुलंपूर्वापराविरुद्धम् अव्यारव्यागम्यं अप्रसिद्धपदप्रयोगेणदुश्लिष्टविभक्तिसमा
साध्याहाराभिधानेनवा अन्यदेशभाषाभिधानेनवायत् व्यारव्येयार्थंनभवति तत्सदुत्तरम् तच्चचतुर्विधम् संप्रतिपत्तिर्मिथ्या
प्रत्यवस्कंदनंपूर्वन्यायश्चेति यथाहकात्यायनः सत्यंमिथ्योत्तरंचैव प्रत्यवस्कंदनंतथा पूर्वन्यायविधिश्चैवमुत्तरंस्याच्चतुर्वि

श्रुतार्थस्योत्तरंलेख्यंपूर्ववेदकसन्निधौ

धमिति तत्रसत्योत्तरंयथा रूपकशतंमह्यंधारयतीत्युक्तेसत्यंधारयामीति यथाह साध्यस्यसत्यवचनंप्रतिपत्तिरुदाहृते
ति मिथ्योत्तरंतुनाहंधारयामीति तथाचकात्यायनः अभियुक्तोभियोगस्ययदिकुर्यादपन्हवम् मिथ्यातत्तुविजानीयादुत्तरं
व्यवहारतइति तच्चमिथ्योत्तरंचतुर्विधम् मिथ्यैतन्नाभिजानामितदातत्रनसंनिधिः अजातश्चास्मितत्कालेइतिमिथ्याचतुर्वि
धमिति प्रत्यवस्कंदनंनाम सत्यंगृहीतंप्रतिदत्तंप्रतिग्रहेणलब्धमितिवा तथाहनारदः अर्थिनालिरिवतोयोर्थःप्रत्यर्थीयदितं ६
तथा प्रपद्यकारणंब्रूयात्प्रत्यवस्कंदनंस्मृतमिति प्राङ्न्यायोत्तरंतु यत्राभियुक्तएवंब्रूयादस्मिन्नर्थेअनेनाहमभियुक्तस्तत्रचाय

व्यवहारमार्गेणपराजितइति उक्तंचकात्यायनेन आचारेणावसन्नोपिपुनर्लेखयतेयदि सोभिधेयोजितःपूर्वंप्राङ्न्यायस्तुसउच्यतेइ
ति एवमुत्तरलक्षणेस्थितेउत्तरलक्षणरहितानामुत्तरवदवभासमानानामुत्तराभासत्वमर्थसिद्धंस्पष्टीकृतंस्मृत्यंतरे संदिग्धमन्यत्प्रकृ
तादत्यल्पमतिभूरिच पक्षैकदेशव्याप्यन्यत्तथानैवोत्तरंभवेत् यद्व्यस्तपदमव्यापिनिगूढार्थंतथाकुलम् व्यारव्यागम्यमसारंचनोत्तरं
स्वार्थसिद्धयइति तत्रसंदिग्धंसुवर्णशतमनेनगृहीतमित्युक्तेसत्यंगृहीतंसुवर्णशतंमाषशतंवेतिप्रकृतादन्यत् यथा सुवर्ण
शताभियोगेपणशतंधारयामीति अत्यल्पंसुवर्णशताभियोगेपंचाशतंधारयामीति अतिभूरिसुवर्णशताभियोगेद्विशतंधा
रयामीति पक्षैकदेशव्यापिहिरण्यवस्त्राद्यभियोगेहिरण्यंगृहीतंनान्यदिति व्यस्तपदंऋणादानाभियोगेपदांतरेणोत्तरम् यथासु
वर्णशताभियोगेअनेनाहंताडितइति अव्यापिदेशस्थानादिविशेषणाव्यापि तथामध्यदेशेवाराणस्यांपूर्वस्यांदिशिक्षेत्रमने
नापहृतमितिपूर्वपक्षेलिरिवतेक्षेत्रमपहृतमिति निगूढार्थंसुवर्णशताभियोगेकिमहमेवधारयामीत्यत्रध्वनिनाप्राड्विवाकः
सभ्यावा अर्थीवा अन्यस्मैधारयतीतिसूचयतीतिनिगूढार्थं आकुलंपूर्वापरविरुद्धम् यथासुवर्णशताभियोगेसत्यंगृही
तंनधारयामीति व्यारव्यागम्यंदुःश्लिष्टविभक्तिसमासाध्याहाराभिधानेनव्यारव्यागम्यं अदेशभाषाभिधानेनवा यथा
सुवर्णशतविषयेपितृऋणाभियोगेगृहीतशतवचनात् सुवर्णानांपितुर्नजानामीति अत्रगृहीतशतस्यपितुर्वचनात् सुवर्णा
नांशतंगृहीतमितिनजानामीति असारंन्यायविरुद्धम् यथासुवर्णशतमनेनवृद्ध्यागृहीतंवृद्धिरेवदत्तानमूलमित्यभियो

गेनसत्यं वृद्धिर्दत्तानमूलं गृहीतमिति उत्तरमित्येकवचनानेदेशादुत्तराणांसंकरोनिरस्तः यथाहकात्यायनः पक्षैकदेशेय
त्सत्यमेकदेशेचकारणम् मिथ्याचैवैकदेशेचसंकरात्तदनुत्तरमिति अनुत्तरत्वेचकारणंतेनैवोक्तम् नचैकस्मिन्विवादेतुक्रि
यास्याद्वादिनोर्द्वयोः नचार्थसिद्धिरुभयोर्नचैकत्रक्रियाद्वयमिति मिथ्याकारणोत्तरयोःसंकरे अर्थिप्रत्यर्थिनोर्द्वयोरपिक्रियाप्रा-
प्नोति मिथ्याक्रियापूर्ववादेकारणेप्रतिवादिनीतिस्मरणात् तदुभयमेकस्मिन्व्यवहारेविरुद्धम् तथासुवर्णरूपकशतंचानेनगृ
हीतमित्यभियोगे सुवर्णनगृहीतं रूपकशतंगृहीतंप्रतिदत्तंचेति कारणप्राङ्न्यायसंकरेतुप्रत्यर्थिनएवक्रियाद्वयं प्राङ्न्याय-
कारणोक्तौतु प्रत्यर्थीनिर्दिशेत्क्रियामिति तथासुवर्णगृहीतंप्रतिदत्तंरूपकेव्यवहारमार्गेणपराजितइति अत्रप्राङ्न्यायेजयपत्रे-
णवा प्राङ्न्यायदर्शिभिर्वाभावयितव्यम् कारणोत्तरेतुसाक्षिलेख्यादिभिर्भावयितव्यमितिविरोधः एवमुत्तरत्रयसंकरेपि
द्रष्टव्यम् यथानेनसुवर्णरूपकशतंवस्त्राणिचगृहीतानीत्यभियोगेसत्यंसुवर्णगृहीतंप्रतिदत्तम् रूपकशतंनगृहीतं वस्त्रवि
षयेतुपूर्वन्यायेनपराजितइति एवंचतुःसंकरेपि एतेषांचानुत्तरत्वंयोगपद्येन तस्यतस्यांशस्यतेनतेनविनासिद्धेःक्रमेणो
त्तरत्वमेव क्रमश्चार्थिनःप्रत्यर्थिनःसभ्यानांचेच्छयाभवति यत्रपुनरुभयोःसंकरःतत्रयस्यप्रभूतार्थविषयत्वं तत्क्रियोपादाने
नपूर्वंव्यवहारःप्रवर्तनीयः पश्चादल्पविषयोत्तरोपादानेनव्यवहारोद्रष्टव्यः यत्रत्वप्रतिपत्तेःउत्तरोत्तरस्यचसंकरस्तत्रोत्तरांत- ७
रोपादानेनव्यवहारोद्रष्टव्यः संप्रतिपत्तौक्रियाभावात् यथाहारीतेन मिथ्योत्तरंकारणंचस्यातामेकत्रचेदुभे सत्यंचापिसहा

न्येनतत्रग्राह्यंकिमुत्तरमित्यस्त्वोक्तम् यत्प्रभूतार्थविषयंयत्रवास्यात्क्रियाफलम् उत्तरंतत्रतज्ज्ञेयमसंकीर्णमतोन्यथा संकीर्णं
भवतीतिशेषः ऐच्छिकःक्रमोभवतीत्यर्थः तत्रप्रभूतार्थम् यथानेनसुवर्णरूपकशतं वस्त्राणिचगृहीतानीत्यभियोगेसत्यं
सुवर्णरूपकशतंचनगृहीतं वस्त्राणितुगृहीतानिप्रतिदत्तानिचेति तत्रमिथ्योत्तरस्यप्रभूतविषयत्वात् अर्थिनःक्रियामादाय
प्रथमंव्यवहारःप्रवर्तयितव्यः पश्चाद्वस्त्रविषयोव्यवहारः एवंमिथ्याप्राङ्न्यायसंकरेकारणप्राङ्न्यायसंकरेचयोजनीयम् त
थातस्मिन्नेवाभियोगे सत्यंसुवर्णरूपकशतंचगृहीतंदास्यामि वस्त्राणितुनगृहीतानिगृहीतानिप्रतिदत्तानीतिवावस्त्रविष
येपूर्वपराजितइतिचोत्तरेसंप्रतिपत्तेर्भूरिविषयत्वेपि तत्रक्रियाभावान्मिथ्याद्युत्तरक्रियामादायव्यवहारःप्रवर्तयितव्यःय
त्रतु मिथ्याकारणोत्तरयोःकृत्स्नपक्षव्यापित्वं यथाशृंगग्राहिकतयाकश्चिद्वदति इयंगौर्मदीया अमुकस्मिन्कालेनष्टा अद्यास्य
गृहेदृष्टेति अन्यस्तुमिथ्यैवैतत् एतत्प्रदर्शितकालात्पूर्वमेवास्मद्गृहेस्थिता ममगृहेजाताचेतिवदति इदंतावत्पक्षनिराकरण
समर्थत्वान्नानुत्तरम् नापिमिथ्यैव कारणोपन्यासात् नापिकारणम् एकदेशस्याभ्युपगमाभावात्तस्मात्सकारणमिथ्यो-
त्तरमिदम् अत्रचप्रतिवादिनःक्रिया कारणेप्रतिवादिनीतिवचनात् ननुमिथ्याक्रियापूर्ववादइतिपूर्ववादिनःकस्मात्क्रियान-
भवति तस्यशुद्धमिथ्याविषयत्वात् कारणेप्रतिवादिनीत्येतदपि कस्माच्छुद्धकारणविषयंनभवति नैतत् सर्वस्यापिका
रणोत्तरस्यमिथ्यासहचरितरूपत्वात् शुद्धकारणोत्तरस्याभावात् प्रसिद्धकारणोत्तरेप्रतिज्ञातार्थैकदेशस्याभ्युपगमेनैकदे

शस्यमिथ्यात्वम् यथासत्यंरूपकशतंगृहीतंनधारयामीति प्रतिदत्तत्वादिति प्रकृतोदाहरणेतुप्रतिज्ञातार्थैकदेशस्याभ्यु
पगमोनास्ति इतिविशेषः एतच्चहारीतेनस्पष्टमुक्तम् मिथ्याकारणयोर्वापिग्राह्यंकारणमुत्तरमिति यत्रमिथ्याप्राङ्न्याययोः
पक्षव्यापित्वं यथारूपकशतंधारयामीत्यभियोगेमिथ्यैतदस्मिन्नर्थेपूर्वमयंपराजितइति अत्रापिप्रतिवादिनएवक्रिया प्राङ्न्या
यकारणोक्तौतुप्रत्यर्थीनिर्दिशेत्क्रियामितिवचनात् शुद्धस्यप्राङ्न्यायस्याभावादनुत्तरत्वप्रसंगात् संप्रतिपत्तेरपिसाध्यत्वेनोपदि
ष्टस्यपक्षस्यसिद्धत्वोपन्यासेनसाध्यत्वनिराकरणादेवोत्तरत्वम् यदातुकारणप्राङ्न्यायसंकरः यथाशतमनेनगृहीतमित्यभियु
क्तःप्रतिवदति सत्यंगृहीतंप्रतिदत्तंचेत्यस्मिन्नेवार्थेप्राङ्न्यायेनायंपराजितइति तत्रप्रतिवादिनोयथारुचीतिनकश्चि [illegible]

## ततोर्थीलेखयेत्सद्यः प्रतिज्ञातार्थसाधनम् ८

दिनोरेकस्मिन्व्यवहारेक्रियाद्वयप्रसंगइतिनिर्णयः एवमुत्तरेपत्रेनिवेशितेसाध्यसिद्धेःसाधनायत्तत्वात्साधननिर्देशंकःकुर्यादि
त्यपेक्षितेआह ततस्तदनंतरमर्थीसाध्यवान् सद्यएवानंतरमेवलेखयेत् प्रतिज्ञातःसाध्यःसचासावर्थश्चेतिप्रतिज्ञातार्थः
तस्यसाधनंसाध्यतेनेनेतिसाधनंप्रमाणम् अत्रसद्योलेखयेदिति वदतोत्तराभिधानेकालविलंबनमप्यंगीकृतमितिगम्यते ८
तच्चोत्तरत्रविवेचयिष्यते अर्थीप्रतिज्ञातार्थसाधनंलेखयेदितिवदतायस्यसाध्यमस्तिसप्रतिज्ञातार्थसाधनंलेखयेदित्युक्तम्

अतश्चप्राङ्न्यायोत्तरेप्राङ्न्यायस्यैवसाध्यत्वात्प्रत्यर्थ्येवार्थीजातइतिसएवसाधनंलेखयेत् कारणोत्तरेपिकारणस्यैवसाध्यत्वा
त्कारणवाद्येवार्थीतिसएवलेखयेत् मिथ्योत्तरेतुपूर्ववाद्येवार्थीसएवसाधनंनिर्दिशेत् तथार्थीलेखयेदितिवदता अर्थ्येवलेख
येत् नान्यइत्युक्तम् अतश्चसंप्रतिपत्त्युत्तरेसाध्याभावेनभाषोत्तरवादिनोर्द्वयोरप्य र्थित्वाभावात्साधननिर्देशएवनास्ती
तितावतैवव्यवहारःपरिसमाप्यतइतिगम्यते एतदेवहारीतेनस्पष्टमुक्तम् प्राङ्न्यायकारणोक्तौतुप्रत्यर्थीनिर्दिशेत्क्रि
याम् मिथ्योक्तौपूर्ववादीतुप्रतिपत्तौनसाभवेदिति ८ ततःकिमित्यतआह तस्यसाधनस्यप्रमाणस्यवक्ष्यमाणलिखि

## तत्सिद्धौसिद्धिमाप्नोतिविपरीतमतोन्यथा चतुष्पाद्व्यवहारोयंविवादेषुप्रदर्शितः ९

तसाक्ष्यादिलक्षणस्यसिद्धौनिर्वृत्तौसिद्धिंसाध्यस्यजयलक्षणांप्राप्नोति अतोस्मात्प्रकारादन्यथाप्रकारांतरेणसाधनासिद्धौवि
परीतंसाध्यस्यासिद्धिंपराजयलक्षणामाप्नोतीतिसंबंधः एवंव्यवहाररूपमभिधायोपसंहरति व्यवहारान्नृपःपश्येदित्यु
क्तोव्यवहारः सोयमित्थंचतुष्पाच्चतुरंशकल्पनयाविवादेषुऋणादानादिषुप्रदर्शितोवर्णितः तत्रप्रत्यर्थिनोग्रतोलेख्यइतिभाषा
पादःप्रथमः श्रुतार्थस्योत्तरंलेख्यमित्युत्तरपादोद्वितीयः ततोर्थीलेखयेत्सद्यइतिक्रियापादस्तृतीयः तत्सिद्धौसिद्धिमाप्नोती
तिसाध्यसिद्धिपादश्चतुर्थः यथोक्तम् परस्परंमनुष्याणांस्वार्थविप्रतिपत्तिषु वाक्यान्न्यायाद्व्यवस्थानंव्यवहारउदाहृतः

भाषोत्तरक्रियासाध्यसिद्धिभिः क्रमवृत्तिभिः आक्षिप्तचतुरंशस्तु चतुष्पादभिधीयतइति संप्रतिपत्त्युत्तरेतु साधनानिर्देशा
द्भाषार्थस्यासाध्यत्वाच्चनसाध्यसिद्धिलक्षणः पादोस्तीतित्रिरूपत्वमेव उत्तराभिधानानंतरंसभ्यानामर्थिप्रत्यर्थिनोःकस्य
क्रियास्यादितिपरामर्शलक्षणस्यप्रत्याकलितस्ययोगीश्वरेणव्यवहारपादत्वेनानभिधानात् व्यवहर्त्तुःसंबंधाभावाच्चन
व्यवहारपादत्वमितिस्थितं इतिव्यवहारमातृका १ एवंसर्वव्यवहारोपयोगिनींव्यवहारमातृकामभिधायाधुनाक्वचि
द्व्यवहारविशेषेकंचिद्विशेषंदर्शयितुमाह अभियुज्यतइतिअभियोगोपराधः तमभियोगमनिस्तीर्य अपरिहृत्यएनम

अभियोगमनिस्तीर्यनैनंप्रत्यभियोजयेत् अभियुक्तंचनान्येननोक्तंविप्रकृतिंनयेत् १०

भियोक्तारंनप्रत्यभियोजयेत् अपराधेननसंयोजयेत् यद्यपिप्रत्यवस्कंदनंप्रत्यभियोगरूपंतथापिस्वापराधपरिहारात्म
कत्वात्नास्यप्रतिषेधविषयत्वम् अतःस्वाभियोगानुपमर्दनरूपस्यप्रत्यभियोगस्यायंनिषेधः इदंप्रत्यर्थिनमधिकृत्योक्तम्
अथअर्थिनंप्रत्याह अभियुक्तंचनान्येनेति अन्येनाभियुक्तमनिस्तीर्णाभियोगमन्योर्थीनाभियोजयेत् किंच उक्तमावेद
नसमयेयदुक्तंतद्विप्रकृतिंविरुद्धस्वभावंननयेत् नप्रापयेत् एतदुक्तंभवति यद्वस्तुयेनरूपेणावेदनसमयेनिवेदितंतद्वस्तुत १
थैवभाषाकालेऽपिलेखनीयंनान्यथेति ननुप्रत्यर्थिनोग्रतोलेख्यंयथावेदितमर्थिनेत्यत्रैवेदमुक्तंकिमर्थंपुनरुच्यते नोक्तंविप्रकृ

तिंनयेदिति उच्यते यथावेदितमर्थिनेत्यनेनावेदनसमयेयद्वस्तुनिवेदितंतदेवभाषासमयेपितथैवलेखनीयंएकस्मिन्नपिप
देनवस्त्वंतरमित्युक्तम् यथानेनरूपकशतंवृद्ध्यागृहीतंइत्यावेदनसमयेप्रतिपाद्यप्रत्यर्थिसन्निधौभाषासमयेवस्त्रशतंवृद्ध्या
गृहीतमितिनवक्तव्यम् तथासतिपदांतरागमनेपिवस्त्वंतरगमनाद्धीनवादीदंड्यःस्यादिति नोक्तंविप्रकृतिंनयेदिति अनेनै
कवस्तुत्वेपिपदांतरगमनंनिषिध्यते यथारूपकशतंवृद्ध्यागृहीत्वायंनप्रयच्छतीत्यावेदनकालेभिधायभाषाकालेरूपकशतं
बलादपहृतवान्इतिवदतीति तत्रवस्त्वंतरगमनंनिषिद्धमिहतुपदांतरगमनंनिषिध्यतइतिनपौनरुक्त्यं एतदेवस्पष्टीकृतंना
रदेन पूर्वपादंपरित्यज्ययोन्यमालंबतेपुनः पादसंक्रमणाज्ज्ञेयोहीनवादीसवैनरइति हीनवादीदंड्योभवति नप्रकृतादर्था
द्धीयते अतःप्रत्यर्थिनोर्थिनश्चप्रमादपरिहारार्थमेवायमभियोगमनिस्तीर्येत्याद्युपदेशोनप्रकृतार्थसिद्ध्यसिद्धिविषयः अतए
ववक्ष्यति छलंनिरस्यभूतेनव्यवहारान्नयेन्नृपइति एतच्चार्थव्यवहारेद्रष्टव्यम् मन्युकृतेतुव्यवहारेप्रमादाभिधानेप्रकृता
दपिव्यवहाराद्धीयतएव यथाहनारदः सर्वेष्वर्थविवादेषुवाक्छलेनावसीदति परस्त्रीभूम्यृणादानेशास्योप्यर्थान्नहीय
तइति अस्यार्थः सर्वेष्वर्थविवादेषुनमन्युकृतेषुवाक्छलेप्रमादाभिधानेपिनावसीदतिनपराजीयतेनप्रकृतादर्थाद्धीयतइ
त्यर्थः अत्रोदाहरणं परस्त्रीत्यादि परस्त्रीभूम्यृणादानेप्रमादाभिधानेनदंड्योपियथाप्रकृतादर्थान्नहीयते एवंसर्वेष्वर्थविवा-
देष्विति अर्थविवादग्रहणान्मन्युकृतविवादेषुप्रमादाभिधानेप्रकृतादप्यर्थाद्धीयतइतिगम्यते यथाहमनेनशिरसिपादेनता-

डितइत्यावेदनसमये अभिधायभाषाकाले हस्तेन पादेन वा ताडितइतिवदन्न केवलं दंड्यः पराजीयते च १० अभियोगमनिस्तीर्य नैनंप्रत्यभियोजयेत् इत्यस्यापवादमाह कलहेवाग्दंडपारुष्यात्मके साहसेषु विषशस्त्रादिनिमित्तप्राणव्यापादनादिषु प्रत्यभियोग संभवे स्वाभियोगमनिस्तीर्याप्यभियोक्तारंप्रत्यभियोजयेत् नन्वत्रापि पूर्वपक्षानुपमर्दनरूपत्वेनानुत्तरत्वात्प्रत्यभियोगस्य प्रतिज्ञांतरत्वे युगपद्व्यवहारासंभवः समानः सत्यम् नात्रयुगपद्व्यवहारायप्रत्यभियोगोपदेशः अपितुन्यूनदंडप्राप्तये अधिकदंडनिवृत्तये वा तथाहि अनेनाहंताडितःशप्तोवेत्यभियोगे पूर्वमहमनेनताडितः शप्तोवेति प्रत्यभियोगे दंडाल्पत्वम् यथाहनारदः पूर्वमा

कुर्यात्प्रत्यभियोगंचकलहेसाहसेषुच उभयोःप्रतिभूर्ग्राह्यःसमर्थःकार्यनिर्णये ११

क्षारमेधस्तु नियतंस्यात्सदोषभाक् पश्चाद्यःसोप्यसत्कारी पूर्वेतुविनयोगुरुरिति यदापुनर्द्वयोर्युगपत्ताडनादिप्रवृत्तिस्तत्राधिकंदंडनिवृत्तिः पारुष्येसाहसेवापियुगपत्संप्रवृत्तयोः विशेषश्चेन्नलभ्येतविनयःस्यात्समस्तयोरिति एवंयुगपद्व्यवहारप्रवृत्त्यसंभवेपि कलहादौप्रत्यभियोगोर्थवान्नृणादानादिषुतुनिरर्थकएव अर्थिप्रत्यर्थिनोर्विधिमुक्त्वासभ्यस्यसभापतेः कर्तव्यमाह उभयोरर्थिप्रत्यर्थिनोः सर्वेषु विवादेषु निर्णयस्यकार्यंकार्यनिर्णयः आहिताग्न्यादिषुपाठात्कार्यशब्दस्यपूर्वनिपातः निर्णयस्यकार्यंच साधितधनदानंदंडदानंच तस्मिन्समर्थःप्रतिभूःप्रतिभवति तत्कार्यंच तद्भवतीति प्रतिभूर्ग्राह्यः

ससभ्येनसभापतिना तस्यासंभवेर्थिप्रत्यर्थिनोरक्षणेपुरुषानियोक्तव्याः तेभ्यश्चताभ्यांप्रतिदिनंवेतनंदेयम् तथाहकात्यायनः अथचेत्प्रतिभूर्नास्तिकार्ययोग्यस्तुवादिनः संरक्षितोदिनस्यांते दद्याद्भृत्यायवेतनमिति अर्थिप्रत्यर्थिनोर्निर्णयकार्येससभ्येनसभापतिना प्रतिभूर्ग्राह्यइत्युक्तम् ११ किंतन्निर्णयकार्यंयस्मिन्प्रतिभूर्गृह्यतइत्यपेक्षितआह अर्थिनानिवेदितस्याभियोगस्यप्रत्यर्थिनापन्हवेकृते यद्यर्थिनासाक्ष्यादिभिःभावितोंगीकारितः प्रत्यर्थीतदादद्याद्धनंप्रकृतमर्थिनोराज्ञेचतत्सममपलापदंडं अथार्थीभावयितुंनशक्नोति तदासएवमिथ्याभियोगीजातइत्यभियोगादभियुक्तधनाद्द्विगुणंधनंदद्याद्राज्ञे प्राङ्न्यायेप्रत्यवस्कंदनेचेदमेवयोजनीयम् तत्रार्थेवापन्ह

निन्हवेभावितोदद्याद्धनंराज्ञेचतत्समम् मिथ्याभियोगीद्विगुणमभियोगाद्धनंवहेत् १२

ववादीतिप्रत्यर्थिनाभावितोराज्ञेप्रकृतधनसमंदंडंदद्यात् अथप्रत्यर्थीप्राङ्न्यायंकारणंवाभावयितुंनशक्नोतितदासएवमिथ्याभियोगीतिराज्ञेद्विगुणंधनंदद्यात् अर्थिनेचप्रकृतंधनं संप्रतिपत्त्युत्तरेतुदंडाभावएव एतच्चऋणादानविषयमेव पदांतरेषुतत्रतत्र दंडाभिधानादधनव्यवहारेष्वस्यासंभवाच्चनसर्वविषयत्वं राज्ञाधमर्णिकोदाप्यइत्यस्यऋणादानविषयत्वेपि तत्रैवविशेषंवक्ष्यामः एतदेवसर्वव्यवहारविषयत्वेनापियोजनीयम् कथं अभियोगस्यनिन्हवेभियुक्तेनकृतेयद्यभियोक्त्रासाक्ष्यादिभिर्भावितोभियुक्तस्तदातत्समंतत्रतत्रप्रतिपदोक्तमेव चशब्दोवधारणे धनंदंडंदद्याद्राज्ञइत्यनुवादः अथाभियोक्ताभियोगंवक्तुंनशक्नोति

तदामिथ्याभियोगीतिप्रतिपदोक्तं धनंदंडं द्विगुणंदद्यादितिविधीयते अत्रापिप्राङ्न्यायेप्रत्यवस्कंदनेच पूर्ववदेवयोजनीयम् १२ ततोर्थीले
खयेत्सद्यः प्रतिज्ञातार्थ साधनमिति वदतोत्तरपादलेखनेकालप्रतीक्षणंदर्शितम्तत्रापवादमाह साहसंविषशस्त्रादिनिमित्तंप्राणव्या-
पादनादि स्तेयं चौर्यं पारुष्यं वाग्दंडपारुष्यम् वक्ष्यमाणलक्षणं गौर्दोग्ध्री अभिशापः पातकाभियोगः अत्ययः प्राणधनातिपातस्त
स्मिन् द्वंद्वैकवद्भावादेकवचनं स्त्रियांकुलस्त्रियांदास्यांच कुलस्त्रियांचारित्रविवादे दास्यांस्वत्वविवादे विवादयेदुत्तरंदापयेत् सद्यएव-

साहसस्तेयपारुष्यगोभिशापात्ययेस्त्रियाम् विवादयेत्सद्यएवकालोन्यत्रेच्छयास्मृतः १३ देशाद्देशांतरंयातिसृक्कि
णीपरिलेढिच ललाटंस्विद्यतेचास्यमुखंवैवर्ण्यमेतिच १४ परिशुष्यत्स्खलद्वाक्योविरुद्धंबहुभाषते वाक्चक्षुः
पूजयतिनो तथोष्ठौनिर्भुजत्यपि १५ स्वभावाद्विकृतिंगच्छेन्मनोवाक्कायकर्मभिः अभियोगेचसाक्ष्येवादुष्टःसपरिकी-
र्तितः १६ नकालप्रतीक्षणंकुर्यात् अन्यत्रविवादांतरेषु कालउत्तरदानकालः इच्छयार्थिप्रत्यर्थिसभ्यसभापतीनांस्मृतउक्तः
१३ दुष्टलक्षणमाह मनोवाक्कायकर्मभिर्यःस्वभावादेव नभयादिनिमित्ताद्विकृतिं विकारंयाति गच्छति असावभियोगेसाक्ष्येवादुष्टः
परिकीर्तितः तांविकृतिंविभज्यदर्शयति देशाद्देशांतरंयातिनक्वचिदवतिष्ठते सृक्किणी ओष्ठपर्यंतौपरिलेढिजिह्वाग्रेणस्पर्शयति
घट्टयतीति कर्मणोविकृतिंयाति अस्यललाटंस्वेदबिंदुचितंभवति मुखंचवैवर्ण्यंविवर्णत्वंपांडुत्वंरूक्षत्वंवा एतिगच्छतीति कायस्य

विकृतिः परिशुष्यत्स्खलद्वाक्यः परिशुष्यत्सगद्गदं स्खलद्व्यत्यस्तंवाक्यंयस्यसतथोक्तः विरुद्धंपूर्वापरविरुद्धंबहुभाषतइति
वाचोविकृतिः परोक्तांवाचंप्रतिवचनदानेननप्रपूजयति चक्षुर्वाप्रतिवीक्षणेननपूजयतीति मनसोविकृतेर्लिंगं तथाओष्ठौनि
र्भुज तिवक्रयतीत्यपिकायस्यविकृतिः एतच्चदोषसंभावनामात्रमुच्यते नदोषनिश्चयाय स्वाभाविकनैमित्तिकविकारयोर्विवे
कस्यदुर्ज्ञेयत्वात् अथकश्चिन्निपुणमतिर्विवेकंप्रतिपद्येत तथापिनपराजयनिमित्तंकार्यंभवति नहिमरिष्यतोलिंगदर्शनेनमृत
कार्यंकुर्वंति एवमस्यपराजयोभविष्यतीतिलिंगादवगतेपिनपराजयनिमित्तकार्यप्रसंगः १४ १५ १६ किंच संदिग्धमर्थमधमर्णेनान-

संदिग्धार्थंस्वतंत्रोयःसाधयेद्यश्चनिःपतेत् नचाहूतोवदेत्किंचिद्धीनोदंड्यश्चसस्मृतः १७

गीकृतमेवयःस्वतंत्रःसाधननिरपेक्षःसाधयत्यासेधादिनासहीनोदंड्यश्चभवति यश्चस्वयंसंप्रतिपन्नंसाधनेनवासाधितंया
च्यमानोनिष्पतेत्पलायेत यश्चाभियुक्तोराज्ञाचाहूतःसदसिनकिंचिद्वदति सोपिहीनोदंड्यश्चस्मृतइतिसंबध्यते अभियोगेथ
साक्ष्येवादुष्टःसपरिकीर्तितइति प्रस्तुतत्वाद्धीनपरिज्ञानमात्रमेवमाभूदितिदंड्यग्रहणं दंड्यस्यापिशास्त्योप्यर्थान्नहीयतइ
त्यर्थादहीनत्वदर्शनादत्रतन्माभूदितिहीनग्रहणं अथयत्रद्वावपियुगपद्धर्माधिकारिणंप्राप्तौभाषावादिनौ तद्यथा कश्चित्प्रति
ग्रहेणक्षेत्रंलब्ध्वा कंचित्कालमुपभुज्यकार्यवशात्सकुटुंबोदेशांतरंगतः अन्योपितदेवक्षेत्रंप्रतिग्रहेणलब्ध्वाकंचित्कालमुपभुज्य
देशांतरंगतः ततोद्वावपियुगपदागतौ
१७

मदीयंक्षेत्रमिदंमदीयंक्षेत्रमितिपरस्परंविवदमानौधर्माधिकारिणंप्राप्तौ तत्रकस्यक्रियेत्याकांक्षित आह उभयतःउभयोरपिवा-
दिनोः साक्षिषुसंभवत्सु साक्षिणःपूर्ववादिनः पूर्वस्मिन्काले मयाप्रतिगृहीतमुपभुक्तंचेति योवदत्यसौपूर्ववादी नपुनर्यःपूर्वं
निवेदयति तस्यसाक्षिणःप्रष्टव्याः यदात्वन्यएवंवदति सत्यमनेनपूर्वंप्रतिगृहीतमुपभुक्तंच किंतुराज्ञेदमेवक्षेत्रमस्मादेवक्र
येणलब्ध्वामह्यंदत्तमिति अन्येनवाप्रतिग्रहेणलब्ध्वामह्यंदत्तमिति तत्रपूर्वपक्षोऽसाध्यतयाधरीभूतस्तस्मिन् उत्तरकालप्र
तिगृहीतमुपभुक्तंचेति वादिनःसाक्षिणःप्रष्टव्याभवंति इदमेवव्याख्यानंयुक्ततरम् मिथ्योत्तरे पूर्ववादिनः साक्षिणोभवंति

साक्षिषूभयतः सत्सु साक्षिणः पूर्ववादिनः पूर्वपक्षेऽधरीभूते भवंत्युत्तरवादिनः १८

प्राङ्न्यायकारणोक्तौ पूर्वपक्षेधरीभूतेउत्तर वादिनः साक्षिणोभवंतीतिव्याख्यानंनयुक्तं अस्यार्थस्यततोर्थलिखयेत्साधःप्रति
ज्ञातार्थसाधनमित्यनेनैवोक्तत्वात्पुनरुक्तिप्रसंगात् पूर्वव्याख्यानमेवस्पष्टीकृतंनारदेन मिथ्याक्रियापूर्ववादेकारणेप्रति
वादिनि प्राङ्न्यायविधिसिद्धौतु जयपत्रंक्रियाभवेदित्युक्त्वा द्वयोर्विवदतोरर्थेद्वयोःसत्सुचसाक्षिषु पूर्वपक्षोभवेद्यस्य १२
भवेयुस्तस्यसाक्षिणइतिवदता एतस्यचसर्वव्यवहारविलक्षणत्वात् भेदेनोपन्यासः १८ ७ . ७

अपिच यदिविवादोव्यवहारः सपणः पणनंपणस्तेनसहवर्ततइतिसपणः स्यात्तदातत्रसपणेव्यवहारे हीनंपराजितंपूर्वोक्तंदंडंस्वकृतं
चपणंराज्ञे अर्थिनेचविवादास्पदीभूतंधनंदापयेद्राजा यत्रपुनरेकःकोपावेशवशाद्यद्यहमत्रपराजितोभवामि तदापणशतंदास्यामीति
प्रतिजानीते अन्यस्तुनकिंचित्प्रतिजानीते तत्रापिव्यवहारःप्रवर्तते तस्मिंश्चप्रवृत्तेपणप्रतिज्ञावादीयदिहीयते तदासएवसपणंदंडं
दाप्यः अन्यस्तुपराजितोदंडंदाप्यः नपणंस्वपणंचेतिविशेषोपादानात् यत्रत्वेकःशतमन्यस्तुपंचाशतंप्रतिजानीते तत्रापिपराजये-
स्वकृतमेवपणंदाप्यो सपणश्चेद्विवादःस्यादितिवदतापणरहितोपिविवादोदर्शितः १९ किंच छलंप्रमादाभिहितंनिरस्यपरित्यज्यभू

सपणश्चेद्विवादःस्यात्तत्रहीनंतुदापयेत् दंडंचस्वपणंचैवधनिनेधनमेवच १९ छलंनिरस्यभूतेनव्यवहारान्नयेन्नृपः भूतम
प्यनुपन्यस्तंहीयतेव्यवहारतः २०

तेनवस्तुतत्त्वानुसारेण व्यवहारान्नयेदंतंनृपः तस्माद्भूतमपिवस्तुतत्त्वमपि अनुपन्यस्तमनभिहि
तं हीयते हानिमुपगच्छति व्यवहारतोव्यवहारेणसाक्ष्यादिभिः तस्माद्भूतानुसरणंकर्तव्यं यथार्थिप्रत्यर्थिनौसत्यमेववदतस्तथाससा-
भ्येनसभापतिनायतितव्यं सामादिभिरुपायैः तथासतिसाक्ष्यादिनैरपेक्ष्येणैवनिर्णयोभवति अथसर्वथापिभूतानुसरणंनशक्यते
कर्तुं तथासति साक्ष्यादिभिर्निर्णयःकार्यइत्यनुकल्पः यथोक्तं भूतछलानुसारित्वाद्विगतिःसमुदाहृतः भूतंतत्त्वार्थसंयुक्तंप्रमादाभि
हितंछलमिति तत्रभूतानुसारीव्यवहारोमुख्यः छलानुसारीत्वनुकल्पःसाक्षिलेख्यादिभिर्व्यवहारनिर्णये कदाचिद्वस्तुतत्त्वानुसरणंभ

वति कदाचिन्नभवति साक्ष्यादीनांव्यभिचारस्यापिसंभवात् २० भूतमप्यनुपन्यस्तंहीयतेव्यवहारतइत्यत्रोदाहरणमाह नैकम
नेकंसुवर्णरजतवस्त्रादिलिखितमभियुक्तमर्थिनाप्रत्यर्थीयदिसर्वमेवनिन्हुते अपजानीते तदार्थिनैकदेशेहिरण्येसाक्ष्यादिभिःप्र
त्यर्थीभावितोंगीकारितः सर्वरजताद्यर्थंपूर्वलिखितंदाप्योर्थिनेनृपेण नग्राह्यस्त्वनिवेदितः पूर्वभाषाकाले अनिवेदितःपश्चादर्थि
नापूर्वं मयाविस्मृतइतिनिवेद्यमानोनग्राह्योनदापयितव्योनृपेण एतच्चनकेवलंवाचनिकमेकदेशेप्रत्यर्थिनोमिथ्यावादित्वनिश्चया
देकदेशांतरेपिमिथ्यावादित्वसंभवात् अर्थिनश्चैकदेशेसत्यवादित्वनिश्चयादेकदेशांतरेपि सत्यवादित्वसंभवात् एवंतर्कापरना

निन्हुतेलिखितंनैकमेकदेशेविभावितः

मसंभावनाप्रत्ययानुगृहीतादस्मादेवयोगीश्वरवचनात्सर्वंदापनीयंनृपेणेतिनिर्णयः एवंचतर्कवाक्यानुसारेणनिर्णयेक्रियमाणे-
वस्तुनोन्यथात्वेपिव्यवहारदर्शिनोनदोषः तथाचगौतमोन्यायाधिगमेतर्कोभ्युपायस्तेनाभ्युपेत्ययथास्थानंगमयेदित्युक्त्वातस्मा
द्रा जाचार्यावनिंद्यावित्युपसंहरति नचैकदेशभावितोनुपादेयवचनःप्रत्यर्थीत्येतावदिहगम्यते एकदेशविभावितोनृपेणसर्वं
दाप्यइतिवचनात् यत्तुकात्यायनेनोक्तम् अनेकार्थाभियोगेपियावत्संसाधयेद्धनी साक्षिभिस्तावदेवासौलभतेसाधितंधन- १३
मिति तत्पुत्रादिदेयपित्रादिऋणविषयम् तत्रहिबहूनर्थानभियुक्तःपुत्रादिर्नजानामीतिप्रतिवदन्निन्हववादीनभवतीत्येक

देशविभावितोपिनक्वचिदसत्यवादीतिनिन्हुतेलिखितंनैकमितिशास्त्रंतत्रनप्रवर्तते निन्हवाभावादपेक्षिततर्काभावाच्च अनेकार्थाभि
योगेपीतिकात्यायनवचनंसामान्यविषयम् विशेषशास्त्रस्यविषयंनिन्हवोत्तरंपरिहृत्याज्ञानोत्तरेप्रवर्तते ननुऋणादिषुविवादेषु-
स्थिरप्रायेषुनिश्चितम् ऊनेवाप्यधिकेवार्थेप्रोक्तेसाध्यंनसिद्ध्यतीति वदताकात्यायनेनानेकार्थाभियोगेसाक्षिभिरेकदेशेभावितेः
धिकेवाभाविते साध्यंसर्वमेवनसिद्ध्यतीत्युक्तं तथासत्येकदेशेभावितेअभावितैकदेशासिद्धिःकुतस्त्या उच्यते लिखितसर्वार्थसाध

दाप्यःसर्वंनृपेणार्थंनग्राह्यस्त्वनिवेदितः २१

नतयोपन्यस्तैःसाक्षिभिरेकदेशाभिधानेधिकाभिधानेवाकृत्स्नमेवसाध्यंनसिद्ध्यतीतितस्यार्थः तत्रापिनिश्चितंनसिद्ध्यतीतिवचनात्पू
र्ववत्संशयएवेति प्रमाणांतरस्यावसरोस्त्येव छलंनिरस्येतिनियमात् साहसादौतु सकलसाध्यसाधनतयोद्दिष्टैःसाक्षिभिरेक
देशेपिसाधितेकृत्स्नसाध्यसिद्धिर्भवत्येव तावतैवसाहसादेःसिद्धत्वात्कात्यायनवचनाच्च साध्यार्थांशेपिगदिते साक्षिभिःसकलंभवेत्
स्त्रीसंगेसाहसेचौर्येयत्साध्यंपरिकीर्तितमिति ननुनिन्हुतेलिखितंनैकमितीयंस्मृतिस्तथानेकार्थाभियोगेपीतिइयमेवस्मृतिरेव

तत्रानयोः सत्योः परस्परविरोधे सतीतरेतरबाधनादप्रामाण्यं कस्मान्न भवति विषयव्यवस्था किमित्याश्री-
यत इत्याह यत्र स्मृत्योः परस्परतो विरोधस्तत्र विरोधपरिहाराय विषयव्यवस्थापनादावुत्सर्गापवादादिलक्षणो न्यायो बलवा
न्समर्थः स च न्यायः कुतः प्रत्येतव्य इत्यत आह व्यवहारत इति व्यवहाराद्वृद्धव्यवहारादन्वयव्यतिरेकलक्षणादवगम्यते अतश्चप्रकृ
तोदाहरणे विषयव्यवस्थैव युक्ता एवमन्यत्रापि विषयव्यवस्थाविकल्पादि यथासंभवं योज्यम् एवं सर्वत्र प्रसंगे पवादमाह धर्मशास्त्रा

स्मृत्योर्विरोधे न्यायस्तु बलवान्व्यवहारतः

नुसारेणेत्यनेनैवोशनसाप्यर्थशास्त्रस्य निरस्तत्वात् धर्मशास्त्रांतर्गतमेव राजनीतिलक्षणमर्थशास्त्रमिह विवक्षितं अर्थशास्त्रधर्मशा
स्त्रस्मृत्योर्विरोधे अर्थशास्त्राद्बलवद्धर्मशास्त्रमिति स्थितिर्मर्यादा यद्यपि समानकर्तृकतया अर्थशास्त्रधर्मशास्त्रयोः स्वरूपगतो विशेषो ना
स्ति तथापि प्रमेयस्य धर्मस्य प्राधान्यादर्थस्य चाप्राधान्याद्धर्मशास्त्रं बलवदित्यभिप्रायः धर्मस्य प्राधान्यं शास्त्रादौ दर्शितम्
तस्माद्धर्मशास्त्रार्थशास्त्रयोर्विरोधे अर्थशास्त्रस्य बाध एव न विषयव्यवस्था नापि विकल्पः किमत्रोदाहरणम् न तावत् गुरुं वा १४
बालवृद्धौ वा ब्राह्मणं वा बहुश्रुतम् आततायिनमायांतं हन्यादेवाविचारयन् नाततायिवधे दोषो हंतुर्भवति कश्चन प्रच्छन्नं
वा प्रकाशं वा मन्युस्तं मन्युमृच्छति तथा आततायिनमायांतमपि वेदांतगं रणे जिघांसंतं जिघांसीयान्न तत्र ब्रह्महा भवेदित्याद्य

र्थशास्त्रम् इयं विशुद्धिरुदिता प्रमाप्याकामतो द्विजम् कामतो ब्राह्मणवधे निष्कृतिर्न विधीयत इत्यादि धर्मशास्त्रं तयोर्विरोधे ध
र्मशास्त्रं बलवदिति युक्तं अनयोरेकविषयत्वासंभवेन विरोधाभावान्न बलाबलचिंतावतरति तथाहि शास्त्रं द्विजातिभिर्ग्राह्यं धर्मो
यत्रोपरुध्यत इति उपक्रम्यात्मनश्च परित्राणे दक्षिणानां च संगरे स्त्रीविप्राभ्युपपत्तौ च घ्नन्धर्मेण न दंडभागित्यात्मरक्षणे दक्षिणादी-
नां यज्ञोपकरणानां च रक्षणे युद्धे च स्त्रीब्राह्मणहिंसायां चाततायिनमकूटशस्त्रेण घ्नन् दंडभागित्युक्तम् तस्यार्थवादार्थमिदमुच्यते गुरुं
वा बालवृद्धौ वेत्यादि गुर्वादीनत्यंतावध्यानप्याततायिनो हन्यात्किमुतान्यानिति वा शब्दश्रवणादपि वेदांतगमित्यत्रापि शब्दश्रवणा

अर्थशास्त्रात्तु बलवद्धर्मशास्त्रमिति स्थितिः २२

न्न गुर्वादीनां वध्यत्वप्रतीतिः नाततायिवधे दोषोन्यत्र गोब्राह्मणादिति सुमंतुवचनाच्च आचार्यं च प्रवक्तारं मातरं पितरं गुरुम् नहिं-
स्याद्ब्राह्मणान् गाश्च सर्वांश्चैव तपस्विन इति मनुवचनाच्च आचार्यादीनामाततायिनां हिंसाप्रतिषेधेनैतद्वचनमर्थवन्नान्यथा हिंसामा
त्रप्रतिषेधस्य सामान्यशास्त्रेणैव सिद्धत्वात् नाततायिवधे दोषो हंतुर्भवति कश्चनेत्येतदपि ब्राह्मणादिव्यतिरिक्तविषयमेव यतोऽग्नि
दो गरदश्चैव शस्त्रपाणिर्धनापहः क्षेत्रदारहरश्चैव षडेते आततायिनः यथा उद्यतासिर्विषाग्निश्च शापोद्यतकरस्तथा आथर्वणे
न हंता च पिशुनश्चापि राजनि भार्यातिक्रमकारी च रंध्रान्वेषणतत्परः एवमाद्यान्विजानीयात्सर्वानेवाततायिन इति सामान्येना

ततायिनोदर्शिताः अतश्चब्राह्मणादयः आततायिनश्च आत्मादित्राणार्थं हिंसानभिसंधिनानिवार्यमाणाः प्रमादाद्यदि
विपद्येरन् तत्रलघुप्रायश्चित्तंराजदंडाभावश्चेतिनिश्चयः तस्मादन्यदिहोदाहरणंवक्तव्यं उच्यते हिरण्यभूमिलाभेभ्यो
मित्रलब्धिर्वरायतः अतोयतेततत्साभावित्यर्थशास्त्रं धर्मशास्त्रानुसारेणक्रोधलोभविवर्जितइतिधर्मशास्त्रं तयोःक्वचि
द्विषयेविरोधोभवति तथाचतुष्पाद्यवहारेवर्तमानेएकस्यजयेवधार्यमाणेमित्रलब्धिर्भवति नधर्मशास्त्रमनुसृतंभवति
नान्यस्यजयेवधार्यमाणेधर्मशास्त्रमनुसृतंभवति मित्रलब्धिर्विपरीता तत्रार्थशास्त्राद्धर्मशास्त्रंबलवत् अतएवधर्मार्थसन्निधा

प्रमाणंलिखितंभुक्तिःसाक्षिणश्चेतिकीर्तितं एषामन्यतमाभावेदिव्यान्यतममुच्यते २३

ते अर्थग्राहिणएतदेवेतिप्रायश्चित्तस्यगुरुत्वंदर्शितमापस्तंबेन एतदेवेतिद्वादशवार्षिकंप्रायश्चित्तंपरामृश्यते २२ ततोर्थेलि
खयेत्सद्यःप्रतिज्ञातार्थसाधनमित्युक्तम् किंतत्साधनमित्यपेक्षितआह प्रमीयतेपरिच्छिद्यतेनेनेतिप्रमाणं तच्चद्विविधं मानु
षंदैविकंचेति तत्रमानवंत्रिविधं लिखितंभुक्तिःसाक्षिणश्चेतिकीर्तितंमहर्षिभिः तत्रलिखितंद्विविधं शासनंचीरकंचेति
शासनमुक्तलक्षणं चीरकंतुवक्ष्यमाणलक्षणं भुक्तिरुपभोगः साक्षिणोवक्ष्यमाणस्वरूपप्रकाराः ननुलिखितस्यसाक्षिणां १५
चशब्दाभिव्यक्तिद्वारेणशाब्देंतर्भावाद्युक्तंप्रामाण्यं भुक्तेस्तुकथंप्रामाण्यमुच्यते भुक्तिरपिकैश्चिद्विशेषणैर्युक्तास्वत्वहेतुभूत

क्रयादिकमव्यभिचारादनुमापयंत्यनुपपद्यमानावाकल्पयंतीत्यनुमानेनार्थापत्तौचांतर्भवतीतिप्रमाणमेव एषांलिखितादीनांत्रयाणाम
न्यतमस्याप्यभावेदिव्यानांवक्ष्यमाणस्वरूपभेदानामन्यतमंजातिदेशकालद्रव्याद्यपेक्षयाप्रमाणमुच्यते मानुषाभावएवदिव्यस्यप्रा
माण्यमस्मादेववचनादवगम्यते दिव्यस्यस्वरूपप्रामाण्ययोरागमगम्यत्वात् अतश्चयत्रपरस्परविवादेनयुगपद्धर्माधिकरणंप्रा
प्तयोरेकोमानुषींक्रियामपरस्तुदैवीमवलंबते तत्रमानुष्येवग्राह्या तथाचकात्यायनः यद्येकोमानुषींब्रूयादन्योब्रूयात्तुदैविकीं
मानुषींतत्रगृह्णीयान्नतुदैवींक्रियांनृपइति यत्रापिप्रधानैकदेशसाधनंमानुषंसंभवति तत्रापिनदैवमाश्रयणीयं यथा रूपकशत
मनयावृद्ध्यागृहीत्वायंनप्रयच्छति इत्यभियोगापह्नवेग्रहणसाक्षिणःसंति नोसंख्यायांवृद्धिविशेषेवा अतोदिव्येनभावयामीत्यु
क्ते तत्रैकदेशविभावितन्यायेनापिसंख्यावृद्धिविशेषसिद्धेर्नदिव्यस्यावकाशः उक्तंचकात्यायनेन यद्येकदेशव्याप्तापिक्रियाविद्येत
मानुषी सायाह्यानतुपूर्णापिदैविकीवदतांनृणामिति यत्तुगूढसाहसिकानांतुप्राप्तंदिव्यैःपरीक्षणमिति तदपिमानुषासंभवकृतनियमा
र्थं यदपिनारदेनोक्तम् अरण्येनिर्जनेरात्रावंतर्वेश्मनिसाहसे न्यासापह्नवनेचैवदिव्यासंभवतिक्रियेति तदपिमानुषासंभवएव त-
स्मान्मानुषाभावएवदिव्येननिर्णयइत्यौत्सर्गिकमस्यचापवादोदृश्यते प्रक्रांतेसाहसेवादेपारुष्येदंडवाचिके बलोद्भूतेषुकार्येषुसाक्षिणो
दिव्यमेवचेति तथालेख्यादीनामपिक्वचिन्नियमोदृश्यते यथा पूगश्रेणीगणादीनांयास्थितिःपरिकीर्तिता तस्यास्तुसाधनंले
ख्यंनदिव्यंनचसाक्षिणः तथा द्वारमार्गक्रियाभोगजलवाहादिषुक्रिया भुक्तिरेवतुगुर्वीस्यान्नदिव्यंनचसाक्षिणः दत्तादत्तेष

भृत्यानांस्वामिनांनिर्णयेसति विक्रयादानसंबंधेक्रीत्वाधनमनिच्छति द्यूतेसमाह्वयेचैवविवादेसमुपस्थिते साक्षिणःसाध
नंप्रोक्तंनदिव्यंनचलेख्यकमिति २३ उभयत्रप्रमाणसद्भावेप्रमाणगतबलाबलविवेकेचासतिपूर्वापरयोःकार्ययोः कस्यबली
यस्त्वमित्यतआह ऋणादिषुसर्वेष्वर्थविवादेषु उत्तराक्रियाक्रियतइतिक्रियाकार्यंबलवत्ता उत्तरेकार्येसाधिते तद्वादीजयी
भवति पूर्वकार्येसिद्धेपितद्वादीपराजीयते तद्यथा कश्चिद्ग्रहणेप्रधारणंसाधयति कश्चित्प्रतिदानेनधारणं तत्रग्रहणप्रतिदा
नयोःप्रमाणसिद्धयोःप्रतिदानंबलवदिति प्रतिदानवादीजयति तथापूर्वंद्विकंशतं गृहीत्वाकालांतरेत्रिकंशतमंगीकृतवान्

सर्वेष्वर्थविवादेषु बलवत्युत्तराक्रिया आधौप्रतिग्रहेक्रीतेपूर्वातुबलवत्तरा २४

तत्रोभयत्रप्रमाणसद्भावेपित्रिकशतग्रहणंबलवत् पश्चाद्भावित्वात्पूर्वबाधेनानुत्पत्तेः उक्तंच पूर्वबाधेन नोत्पत्तिरुत्तरस्यहिसेत्स्य
तीति अस्यापवादमाह आध्यादिषुत्रिषुपूर्वमेवकार्यंबलवत् तद्यथा एकमेवक्षेत्रमन्यस्याधिंकृत्वाकिमपिगृहीत्वापुनरन्यस्या
प्याधाय किमपिगृह्णातितत्रपूर्वस्यैवतद्भवतिनोत्तरस्यैवंप्रतिग्रहेक्रयेच नन्वाहितस्यतदानीमस्वत्वात्पुनराधानमेवनसंभवति एवं
दत्तस्यक्रीतस्यदानक्रयौनोपपद्येते तस्मादिदंवचनमनर्थकम् उच्यते अस्वत्वेपिमोहात्कश्चिल्लोभाद्वापुनराधानादिकंकरोतितत्रपूर्वंबलव
दितिन्यायमूलमेवेदंवचनमित्यचोद्यम् २४ १६

भुक्तेःकैश्चिद्विशेषणैर्युक्तायाअप्रामाण्यंदर्शयिष्यन्कस्याश्चिद्भुक्तेःकार्यांतरमाह परेणासंबंधेनभुज्यमानांभुवंधनंवापश्यतः अब्रुव
तःमदीयेयंभूः नत्वयाभोक्तव्येति अप्रतिषेधयतः तस्याभूमेर्विंशतिवार्षिकी अप्रतिरवंविंशतिवर्षोपभोगनिमित्ताहानिर्भवति ध
नस्यतुहस्त्यश्वादेर्दशवार्षिकीहानिः नन्वेतदनुपपन्नम् नह्यप्रतिषेधात्स्वत्वमपगच्छति अप्रतिषिद्धस्यदानविक्रियादिवत् स्व
त्वनिवृत्तिहेतुत्वस्यलोकशास्त्रयोरप्रसिद्धत्वात् नापिविंशतिवर्षोपभोगात् स्वत्वम् उपभोगस्यस्वत्वेप्रमाणत्वात् प्रमाणस्यच
प्रमेयंप्रत्यनुत्पादकत्वात् रिक्थक्रियादिषुस्वत्वकारणहेतुष्वपाठाच्च तथाहि स्वामिरिक्थक्रियासंविभागपरिग्रहाधिगमेषु ब्राह्मण

पश्यतोब्रुवतोभूमेर्हानिर्विंशतिवार्षिकी परेणभुज्यमानायाधनस्यदशवार्षिकी २५

स्याधिकंलब्धंक्षत्रियस्यविनिर्जितम् निर्विष्टंवैश्यशूद्रयोरित्यष्टावेवस्वत्वकारणहेतून्गौतमःपठति नभोगम् नचेदमेववचनंविंश
तिवर्षोपभोगस्य स्वत्वापत्तिहेतुत्वंप्रतिपादयतीतियुक्तम् स्वत्वस्यस्वत्वहेतूनांचलोकप्रसिद्धत्वेनशास्त्रैकसमधिगम्यत्वाभा-
वात् एतच्चविभागप्रकरणेनिपुणतरमुपपादयिष्यते गौतमवचनंतुनियमार्थं अपिच अनागमंचयोभुंक्ते बहून्यब्दशता
न्यपि चौरदंडेनतंपापंदंडयेत्पृथिवीपतिरित्येतदनागमोपभोगस्यस्वत्वहेतुत्वेविरुध्यते नचानागमंतुयोभुंक्तेइत्येतत्परोक्षभो
गविषयं पश्यतोब्रुवतइति प्रत्यक्षभोगविषयमितियुक्तंवक्तुं अनागमंतुयोभुंक्तेइत्यविशेषाभिधानात् नोपभोगेबलंका

र्यमाहर्त्तातत्कृतेनवा पशुस्त्रीपुरुषादीनामितिधर्मोव्यवस्थितइति कात्यायनवचनाच्च समक्षभोगेचहानिकरणाभावेनहाने
रसंभवात् नचैतन्मंतव्यम् आधिमतिग्रहक्रयेषु पूर्वस्याःक्रियायाःप्राबल्यादपवादेनभूविषयेविंशतिवर्षोपभोगयुक्तायाःध
नविषयेदशवर्षोपभोगयुक्तायाःउत्तरविषयक्रियायाःप्राबल्यमनेनोच्यतइति यतस्तेषूत्तरैवक्रियातत्ततोनोपपद्यते स्वमेव
ह्याधेयंदेयंविक्रेयंचभवति नचाहितस्यदत्तस्यविक्रीतस्यवास्वत्वमिति अस्वस्यदानेप्रतिग्रहेच दंडःस्मर्यते अदेयंयश्चगृह्णा
तियश्चादेयंप्रयच्छति उभौतौचौरवच्छास्योदाप्यौचोत्तमसाहसमिति तथाध्यादीनांत्रयाणामपवादत्वेस्यश्लोकस्याधिसीमादी
नामुत्तरश्लोकेऽपवादोनोपपद्यते तस्माद्भूम्यादीनांहानिरनुपपन्नैव नापिव्यवहारहानिःयतःउपेक्षांकुर्वतस्तस्यतूष्णींभूतस्यतिष्ठ
तः कालेविपन्नेपूर्वोक्तेव्यवहारोनसिध्यतीतिनारदेनोपेक्षायांलिंगाभावकृताव्यवहारहानिरुक्तानवस्त्वभावकृता तथामनुनापि
अजडश्चेदपौगंडोविषयश्चास्यभुज्यते भग्नंतद्व्यवहारेणभोक्तातद्धनमर्हतीति व्यवहारतोभंगोदर्शितोनवस्तुतः व्यवहारभंगश्चै
वंभोक्ताकिलवदति अजडोयमपौगंडोबालोयमस्यसन्निधौ विंशतिवर्षाण्यप्रतिरवंमयाभुक्तंतत्रबहवःसाक्षिणःसंति यद्यस्यस्व
मन्यायेनमयाभुज्यतेतदायंकिमित्येतावंतंकालमुदास्तेइति तत्रचायंनिरुत्तरोभवतीति एवंनिरुत्तरस्यापिवास्तवोव्यवहारोभवत्ये
व छलंनिरस्यभूतेनव्यवहारान्नयेन्नृपइतिनियमात् अथमत यद्यपिनवस्तुहानिर्नापिव्यवहारहानिस्तथापिपश्यतोप्रतिषेधतोव्य १७
वहारहानिशंकाभवतीतितन्निवृत्तयेतूष्णींनस्थातव्यमित्युपदिश्यतइति तच्चन स्मार्तकालायाभुक्तेर्हानिशंकाकारणत्वाभावात् तू

ष्णींनस्थातव्यमित्येतावतातन्मात्राभिधित्सायांविंशतिग्रहणमविवक्षितंस्यात् अथोच्यते विंशतिग्रहणमूर्ध्वंपत्रदोषोद्भावननिराकर
णार्थम् यथाहकात्यायनः शक्तस्यसंनिधावर्थोयस्यलेख्येनभुज्यते विंशतिवर्षाण्यतिक्रांतंतत्पत्रंदोषवर्जितमिति तदपिन आ
ध्यादिष्वपिविंशतेरूर्ध्वंपत्रदोषोद्भावननिराकरणस्यसमत्वेनापवादासंभवात् यथाहकात्यायनः अथविंशतिवर्षाणि आधिर्भुक्तः सु
निश्चितः तेनलेख्येनतत्सिद्धिर्लेख्यदोषविवर्जिता तथा सीमाविवादेनिर्णीतेसीमापत्रंविधीयते तस्यदोषाःप्रवक्तव्यायावद्वर्षाणि
विंशतिरिति एतेनधनस्यदशवार्षिकीत्येतदपिप्रत्युक्तं तस्मादस्यश्लोकस्यसत्योर्थोवक्तव्यः उच्यते भूमेर्धनस्यचफलहानिरिहविवक्षिता
नवस्तुहानिर्नापिव्यवहारेहानिः तथाहि निराक्रोशविंशतिवर्षोपभोगादूर्ध्वंयद्यपिस्वामीन्यायतःक्षेत्रंलभेत तथापिफलानुसरणंनलभे
ते अप्रतिषेधलक्षणात्स्वापराधादस्माच्चवचनात् परोक्षभोगेतुविंशतेरूर्ध्वमपिफलानुसरणंलभतएव पश्यतइतिवचनात् प्रत्य
क्षभोगेचसाक्रोशे अब्रुवतइतिवचनात् विंशतेःप्राक्प्रत्यक्षेनिराक्रोशेचलभते विंशतिग्रहणात् ननुतदुत्पन्नस्यापिफलस्यस्वत्वा
त्तद्धानिरनुपपन्नैव बाढं तस्यस्वरूपविनाशेन तथैवावस्थानेयथातदुत्पन्नपूगपनसवृक्षादीनाम् यत्पुनस्तदुत्पन्नमुपभोगान्नष्टंतत्र
स्वरूपनाशादेवस्वत्वनाशः अनागमंतुयोभुंक्तेबहून्यब्दशतान्यपि चौरदंडेनतंपापंदंडयेत्पृथिवीपतिरित्यनेनवचनेननिष्क्रयरूपेण
गणयित्वाचौरवत्तत्समद्रव्यदानंप्राप्तं हानिर्विंशतिवार्षिकीति अपोद्यते राजदंडःपुनरस्त्येवविंशतेरूर्ध्वमपि अनागमोपभोगादप
वादाभावाच्च तस्मात्स्वाम्युपेक्षालक्षणस्वापराधादस्माच्चवचनाद्विंशतेरूर्ध्वंफलंनष्टंनलभतइतिस्थितम् एतेनधनस्यदशवार्षिकीत्येत

दूपिव्याख्यातम् २५ अस्यापवादमाह आधिश्चसीमाचउपनिक्षेपश्च आधिसीमोपनिक्षेपाः जडश्चबालश्चजडबालौ तयोर्धनेजडबालधने आ
धिसीमोपनिक्षेपाश्चजडबालधनेच आधिसीमोपनिक्षेपजडबालधनानितैर्विना उपनिक्षेपोनामरूपसंख्याप्रदर्शनेनरक्षणार्थंपरस्यहस्ते
निहितंद्रव्यं यथाहनारदः स्वंद्रव्यंयत्रविस्रंभान्निक्षिपत्यविशंकितः निक्षेपोनामतत्प्रोक्तंव्यवहारपदंबुधैरिति उपनिधानमुपनिधिः
आध्यादिषुपश्यतोऽब्रुवतोपिभूमेर्विंशतेरूर्ध्वं धनस्यदशभ्योवर्षेभ्यऊर्ध्वमपिहानिर्नभवति पुरुषापराधस्यतथाविधस्याभावात्
उपेक्षाकारणस्यतत्रासंभवात् तथाहि आधेराधित्वेणाधिकएवभोगइत्यपेक्षायामपिनपुरुषापराधः सीम्नश्चिरकृततुषांगारादिचिन्हैःस्मृ

आधिसीमोपनिक्षेपजडबालधनैर्विना तथोपनिधिराजस्त्रीश्रोत्रियाणांधनैरपि २६

साध्यत्वादुपेक्षासंभवति उपनिक्षेपोपनिध्योर्भुक्तेःप्रतिषिद्धत्वात्प्रतिषेधातिक्रमोपभोगेच सोदयालाभादुपेक्षोपपत्तिः जडबाल
योर्जडत्वाद्बालत्वादुपेक्षायुक्तैव राज्ञोबहुकार्यव्याकुलत्वात् स्त्रीणामज्ञानात् अप्रागल्भ्याच्च श्रोत्रियस्याध्ययनाध्यापनतदर्थवि १८
चारानुष्ठानव्याकुलत्वादुपेक्षायुक्तैव तस्मादाध्यादिषुसर्वत्रोपेक्षाकारणेसंभवात् समस्तभोगेनिराक्रोशेचनकदाचिदपिफलहानिः
२६

आध्यादिषुदंडविशेषप्रतिपादनार्थमाह आध्यादीनांश्रोत्रियद्रव्यपर्यंतानांचिरकालोपभोगबलेनापहर्तारंविवादास्पदीभूतंधनंस्वामिने
दापयेत् इत्यनुवादः दंडंचतत्समंविवादास्पदीभूतद्रव्यसमंराज्ञेदापयेदितिविधिः यद्यपिगृहक्षेत्रादिषुतत्समोदंडोनसंभवतितथा
पिमर्यादायाःप्रभेदेचसीमातिक्रमणेतथेत्यादिवक्ष्यमाणोदंडोद्रष्टव्यः अथतत्समदंडेनापहर्तुर्दमनंनभवति बहुधनत्वेनतदाशक्त्य
पेक्षंधनंदापयेत् यावतातस्यदर्पोपशमोभवतितावद्दापयेत् दंडोदमनादित्याहुस्तेनादांतान्दमयेदितिदंडग्रहणस्यदमनार्थत्वात्
यस्यतुतत्सममपिद्रव्यंनास्ति सोपियावतापीड्यतेतावद्दाप्यः यस्यपुनःकिमपिधनंनास्ति असौधिग्दंडादिनादमनीयः तथाचमनुः

आध्यादीनांविहर्तारंधनिनेदापयेद्धनम् दंडंचतत्समंराज्ञेशक्त्यपेक्षमथापिवा २७

धिग्दंडंप्रथमंकुर्याद्वाग्दंडंतदनंतरम् तृतीयंधनदंडंतुवधदंडमतःपरम् वधदंडोपिशारीरोब्राह्मणव्यतिरिक्तानांदशधादर्शितः
तथाहमनुः दशस्थानानिदंडस्यमनुःस्वायंभुवोब्रवीत् त्रिषुवर्णेषुयानिस्युरक्षतोब्राह्मणोव्रजेत् उपस्थमुदरंजिव्हाहस्तौपादौच
पंचमम् चक्षुर्नासाचकर्णौचधनंदेहस्तथैवचेति एतेषांयन्निमित्तापराधस्तत्रैवोपस्थादौनिग्रहःकार्यइतिद्रष्टव्यम् कर्मवाकार
यितव्यो बंधनागारंवाप्रवेशयितव्यः यथोक्तंकात्यायनेन धनदानासहंबुध्वास्वाधीनंकर्मकारयेत् अशक्तौबंधनागारंप्रवे

श्योब्राह्मणादनइति ब्राह्मणस्यपुनर्द्रव्यापहारेकर्मवियोगादीनिमयोज्यानि यथाहगौतमः कर्मवियोगविख्यापननिर्वासनांकक
रणान्यवृत्ताविति नारदेनापि वधःसर्वस्वहरणंपुरान्निर्वासनांकने तदंगच्छेदइत्युक्तोदंडउत्तमसाहसइति अविशेषेणसर्वेषामेष-
दंडविधिःस्मृतइत्युक्त्वोक्तम् वधादृतेब्राह्मणस्यनवधंब्राह्मणोर्हतीति शिरसोमुंडनंदंडस्तस्यनिर्वासनंपुरात् ललाटेचाभिश
स्ताकःप्रयाणंगर्दभेनचेति अंकनेचव्यवस्थादर्शिता गुरुतल्पेभगःकार्यःसुरापानेसुराध्वजः स्तेयेतुश्वपदंकार्यंब्रह्महण्यशि-
राःपुमानिति यत्तुचक्षुर्निरोधोब्राह्मणस्येत्यापस्तंबवचनम् ब्राह्मणस्यपुरान्निर्वासनसमयेवस्त्रादिनाचक्षुर्निरोधःकर्तव्यइति

आगमोऽप्यधिकोभोगाद्विनापूर्वक्रमागतात्

तस्यार्थोनचक्षुरुद्धरणम् अक्षतोब्राह्मणोव्रजेत् नशारीरोब्राह्मणदंडइत्यादिमनुगौतमवचनविरोधात्इत्यलंप्रसंगेन २७ स्वत्वा
व्यभिचारित्वेनभोगस्यस्वत्वेप्रामाण्यमुक्तम् भोगमात्रस्यस्वत्वव्यभिचारित्वात्कीदृशोभोगःप्रमाणमित्यतआह स्वत्वहेतुःप्रतिग्रह-
क्रयादिरागमः सभोगादप्यधिकोबलीयान् स्वत्वबोधनेभोगस्यागमसापेक्षत्वात् यथाहनारदः आगमेनविशुद्धेनभोगोयातिप्रमाण
ताम् अविशुद्धागमोभोगःप्रामाण्यंनैवगच्छतीति नचभोगमात्रात्स्वत्वावगमः परकीयस्याप्यपहारादिनोपभोगप्रसंगात् अतएवभो १९
गंकेवलंतोयस्तुकीर्तयेन्नागमंक्वचित् भोगच्छलापदेशेनविज्ञेयःसतुतस्करइतिस्मर्यते अतश्चसागमोदीर्घकालोनिरंतरोनिराक्रो

शःप्रत्यर्थिप्रत्यक्षश्चेतिपंचविशेषणयुक्तोभोगःप्रमाणमित्युक्तंभवति तथाचस्मर्यते सागमोदीर्घकालश्चविच्छेदोपरवोज्झितः प्रत्यर्थि
संनिधानोपिपरिभोगोपिपंचधेति क्वचिच्चागमनिरपेक्षस्यापिभोगस्यप्रामाण्यमित्याह विनापूर्वक्रमागतादिति पूर्वेषांपित्रादीनांत्रयाणांक्र
मः पूर्वक्रमः तेनागतोयोभोगस्तस्माद्विना आगमोप्यधिकइतिसंबंधः सपुनरागमादप्यधिकः आगमनिरपेक्षःप्रमाणमित्यर्थः त
त्राप्यागमज्ञाननिरपेक्षोनसत्तानिरपेक्षः सत्तातुतेनैवावगम्यतइतिबोद्धव्यम् विनापूर्वक्रमागतादित्येतच्चस्मार्तकालप्रदर्शनार्थम् आ
गमोप्यधिकोभोगादितिचस्मार्तकालविषयम् अतश्चस्मरणयोग्येकालेयोग्यानुपलब्ध्या आगमाभावनिश्चयासंभवादागमज्ञा
नसापेक्षस्यैवभोगस्यप्रामाण्यम् अस्मार्तेतुकालेयोग्यानुपलब्ध्यभावेनागमाभावनिश्चयासंभवादागमज्ञाननिरपेक्षएवसंत
तोभोगः प्रमाणं एतदेवस्पष्टीकृतंकात्यायनेन स्मार्तकालेक्रियाभूमेःसागमाभुक्तिरिष्यते अस्मार्तेनुगमाभावात्क्रमात्त्रिपुरु-
षागतेति स्मार्तश्चकालोवर्षशतपर्यंतः शतायुर्वैपुरुषइतिश्रुतेः अनुगमाभावादिति योग्यानुपलब्ध्यभावेनागमाभावनिश्चया
भावादिति अतश्चवर्षशताधिकोभोगः संततोप्रतिरवःप्रत्यर्थिप्रत्यक्षश्चागमाभावेवानिश्चिते अव्यभिचारादाक्षिप्तागमः
स्वत्वंगमयति अस्मार्तेपिकालेनागमस्मृतिपरंपरायांसत्यांनभोगःप्रमाणमतएवानागमंतुयोभुंक्तेबहून्यब्दशतान्यपि चौर
दंडेनतंपापंदंडयेत्पृथिवीपतिरित्युक्तं नचानागमंतुयोभुंक्तेइत्येकवचननिर्देशाद्बहून्यब्दशतान्यपीति अपिशब्दप्रयोगात्
प्रथमस्यपुरुषस्यनिरागमेचिरकालोपभोगेपिदंडविधानमितिमंतव्यम् द्वितीयेतृतीयेवापुरुषेनिरागमस्यभोगस्यप्रामाण्य

प्रसंगाच्चैतादृष्यते आदौतु कारणंदानंमध्येभुक्तिस्तुसागमेतिनारदस्मरणात् तस्मात्सर्वत्रनिरागमोपभोगे अनागमंतुयोभुंक्तइ त्येतत्द्रष्टव्यम् यदप्यन्यायेनापियद्भुक्तंपित्रापूर्वनरैस्त्रिभिः नतच्छक्यमपाहर्तुंक्रमात्त्रिपुरुषागतमिति तदपिपित्रासहपूर्व नरैस्त्रिभिरितियोज्यम् तत्रापिक्रमात् त्रिपुरुषागतमित्यस्मार्तकालोपलक्षणम् त्रिपुरुषविवक्षायामेकवर्षाभ्यंतरेपिपुरुषत्र यातिक्रमसंभवात् द्वितीयेवर्षेनिराग मस्यभोगस्यप्रामाण्यप्रसंगः तथासतिस्मार्तेकालेक्रियाभूमेःसागमाभुक्तिरिष्यत इतिस्मृतिविरोधः अन्यायेनापियद्भुक्तमित्येतच्चान्यायेनापिभुक्तमपहर्तुंनशक्यम् किंपुनरन्यायानिश्चयइतिव्याख्येयमपि

आगमेपिबलंनैवभुक्तिस्तोकापियत्रनो २८

शब्दश्रवणात् यच्चोक्तं यद्विनागममत्यंतंभुक्तंपूर्वैस्त्रिभिर्भवेत् नतच्छक्यमपाहर्तुंक्रमात्त्रिपुरुषागतमिति अत्राप्यत्यंतमाग मंविनेति अत्यंतमुपलभ्यमानमागमंविनेतिव्याख्येयम् नपुनरागमस्वरूपंविनेति आगमस्वरूपाभावेभोगशतेनापि नस्वत्वंभव- तीत्युक्तम् क्रमात्त्रिपुरुषागतमित्येतदुक्तार्थं ननुस्मरणयोग्येकालेभोगस्यागमसापेक्षस्यप्रामाण्यमनुपपन्नम् तथाहि य द्यागमःप्रमाणांतरेणावगतस्तदा तेनैवस्वत्वावगमान्नभोगस्यस्वत्वे आगमेवाप्रामाण्यं अथप्रमाणांतरेणागमोनावगतःकथं २० तद्विशिष्टोभोगःप्रमाणं उच्यते प्रमाणांतरेणावगतागमसहितएवनिरंतरोभोगःकालांतरे स्वत्वंगमयति अवगतोप्यागमो

भोगरहितोनकालांतरेस्वत्वगमयितुमलम् मध्येदानविक्रयादिनास्वत्वागमस्यसंभवादितिसर्वमनवद्यम् आगमसापेक्षोभोगःप्र माणमित्युक्तं आगमस्तर्हिभोगनिरपेक्षएवप्रमाणमित्यतआह यस्मिन्नागमेस्वल्पापिभुक्तिर्नोनास्ति तस्मिन्नागमेबलंसं पूर्णता नैवास्ति अयमभिसंधिः स्वस्वत्वनिवृत्तिःपरस्वत्वापादनंचदानं परस्वत्वापादनंचपरोयदिस्वीकरोतितदासंपद्यते- नान्यथा स्वीकारश्चत्रिविधः मानसोवाचिकःकायिकश्चेति तत्रमानसोममेदमितिसंकल्परूपः वाचिकस्तुममेदमित्या द्यभिव्याहारोल्लेखीसविकल्पकःप्रत्ययः कायिकस्तुपुनरुपादानाभिमर्शनादिरूपोनेकविधः तत्रचनियमःस्मर्यते दद्यात्कृष्णाजिनं पृष्ठे गांपुच्छेकरिणंकरे केसरेष्वतथैवाश्वंदासींशिरसिदापयेदिति आश्वलायनोप्याह अनुमंत्रयेत्प्राण्यभिमृशेदप्राणिंकन्यांचेति त थाहिरण्यवस्त्रादावुदकदानानंतरमेवोपादानादिसंभवात् त्रिविधोपिस्वीकारःसंपद्यते क्षेत्रादौपुनःफलोपभोगव्यतिरेकेण कायि कस्वीकारासंभवात् स्वल्पेनाप्युपभोगेनभवितव्यम् अन्यथादानक्रियादेःसंपूर्णतानभवतीति फलभोगलक्षणकायिकस्वीकार विकलआगमोदुर्बलोभवतितत्सहितादागमात् एतच्चद्वयोःपूर्वापरकालापरिज्ञाने पूर्वापरकालपरिज्ञानेतुविगुणोपिपूर्व- कालागमएवबलीयानिति ।अथवालिखितंसाक्षिणोभुक्तिःप्रमाणमित्युक्तं एतेषांसमवायेकुत्रकस्यवाप्राबल्यमित्यत्रेदमुपति ष्ठते आगमोप्यधिकोभोगाद्विनापूर्वक्रमागतात् आगमेपिबलंनैवभुक्तिस्तोकापियत्रनोइति अयमर्थः आद्यपुरुषेसाक्षि भिर्भावितआगमोभोगादप्यधिकोबलवान् पूर्वक्रमागतान्द्भोगाद्विना सपुनःपूर्वक्रमागतोभोगश्चतुर्थपुरुषेलिखितेनभावित

see Copy in Cofut.

दागमाद्बलवान् मध्येतुभोगरहितादागमात्स्तोकभोगसहितोप्यागमोबलवानिति एतदेवनारदेनस्पष्टीकृतम् आदौतुकारणंदानं 
मध्येभुक्तिस्तुसागमा कारणंभुक्तिरेवैकासंततायाचिरंतनीति २८ पश्यतोब्रुवतइत्यत्रविंशतिवर्षोपभोगादूर्ध्वंभूमेर्धनस्यापिदश
वर्षोपभोगादूर्ध्वंफलानुसरणंनभवतीत्युक्तम् तत्रफलानुसरणवद्दंडानुसरणमपिनभविष्यतीत्याशंक्यपुरुषव्यवस्थयाप्रामा-
ण्यव्यवस्थयाचदंडव्यवस्थांदर्शयितुमाह येनपुरुषेणभूम्यादेरागमःस्वीकारःकृतःसपुरुषःकुतस्तेक्षेत्रादिकमित्यभियुक्तस्त-
मागमंप्रतिग्रहादेरिलिलिखितादिभिरुद्धरेत्भावयेत् अनेनचाद्यस्यपुरुषस्यागममनुद्धरतोदंडइत्युक्तंभवति तत्सुतोद्वितीयो

आगमस्तुकृतोयेनसोभियुक्तस्तमुद्धरेत् नतत्सुतस्तत्सुतोवाभुक्तिस्तत्रगरीयसी२९

भियुक्तोनागममुद्धरेत् किंतु अविच्छिन्नाप्रतिरवसमक्षभोगम् अनेनचागममनुद्धरतोद्वितीयस्यनदंडोपितुविशिष्टंभोगमनुद्धर-
तोदंडइतिप्रतिपादितम् तत्सुतस्तृतीयोनागमंनापिविशिष्टंभोगमुद्धरेदपितुक्रमागतंभोगमात्रम् अनेनापितृतीयस्यक्रमायात-
भोगानुद्धरणेदंडोनागमानुद्धरणेनविशिष्टभोगानुद्धरणेचेत्यभिहितं तत्रतयोर्द्वितीयतृतीययोर्भुक्तिरेवगरीयसी तत्रापिद्वितीयेगु 
रुस्तृतीयेगरीयसीतिविवेक्तव्यं त्रिष्वप्यागमानुद्धरणेऽर्थहानिःसमानैवदंडेतुविशेषइतितात्पर्यार्थः उक्तंच आगमस्तुकृतोयेनसदंड्य
स्तमनुद्धरन् नतस्सुतस्तत्सुतोवाभोग्यहानिस्तयोरपीति २९

अस्मार्तकालोपभोगस्यागमज्ञाननिरपेक्षस्यप्रामाण्यमुक्तं विनापूर्वक्रमागतादित्यत्र तस्यापवादमाह यदापुनराहर्त्रादिभिरभियुक्तोकृ
तव्यवहारनिर्णयएवपरेतःपरलोकंगतोभवेत्तदातस्यरिक्थीपुत्रादिस्तमागममुद्धरेत् यस्मात्तत्रतस्मिन्व्यवहारेभुक्तिरागमरहितासा
क्ष्यादिभिःसाधितापिनप्रमाणं पूर्वाभियोगेनभोगस्यसापवादत्वात् नारदेनाप्युक्तम् नवारूढविवादस्यप्रेतस्यव्यवहारिणःपुत्रे-
णसोऽर्थःसंशोध्योनतंभोगोनिवर्तयेदिति अनिर्णीतव्यवहारेव्यवहर्तरिप्रेतेव्यवहारीननिवर्ततेइतिस्थितम् ३० निर्णीतेव्यवहा

योभियुक्तःपरेतःस्यात्तस्यरिक्थीतमुद्धरेत् नतत्रकारणंभुक्तिरागमेनविनाकृता ३० नृपेणाधिकृताःपूगाःश्रेणयो॥
थकुलानिच पूर्वपूर्वंगुरुज्ञेयंव्यवहारविधौनृणाम् ३१

रेस्थितेचव्यवहर्तरिवाव्यवहारःक्वचित्पुनःप्रवर्तते क्वचिन्नप्रवर्त
तइतिव्यवस्थासिद्धयेव्यवहारदर्शिनांबलाबलमाह नृपेणराज्ञाअधिकृताःव्यवहारदर्शनेनियुक्ताःराज्ञासभासदःकार्याइत्यादि
नोक्ताः पूगाःसमूहाःभिन्नजातीनांभिन्नवृत्तीनांएकस्थाननिवासिनाम् यथाग्रामनगरादयः श्रेणयोनानाजातीयानामेकजाती-
नामप्येकजातीयकर्मोपजीविनांसंघाताः यथाहेडाबुकादीनांतांबूलिककुविंदचर्मकारादीनांचकुलानि ज्ञातिसंबंधिबंधूनांसमूहाः
एतेषांनृपाधिकृतादीनांचतुर्णांपूर्वंपूर्वंयद्यत्पूर्वपठितंतत्तद्गुरुबलवज्ज्ञेयम् वेदितव्यम् नृणांव्यवहर्तॄणांव्यवहारविधौव्यवहारदर्शी
नकार्ये एतदुक्तंभवति नृपाधिकृतैर्निर्णीतेव्यवहारेपराजितस्ययद्यप्यसंतोषःकुदृष्टिबुद्ध्याभवति तथापिनपूगादिषुपुनर्व्यवहारो

भवति एवंपूगनिर्णीतेपिनश्रेण्यादिगमनम् तथाश्रेणीनिर्णीतेकुलगमनंनभवति कुलनिर्णीतेतुश्रेण्यादिगमनम् श्रेणिनि
र्णीतेपूगादिगमनम् पूगनिर्णीतेनृपाधिकृतगमनंभवतीति नारदेनपुनर्नृपाधिकृतोनिर्णीतेपिव्यवहारेनृपगमनंभवतीत्यु
क्तम् कुलानिश्रेणयश्चैवगणाश्चाधिकृतानृपाः प्रतिष्ठाव्यवहाराणांगुर्वेषामुत्तरोत्तरमिति तत्रचनृपगमनेसोत्तरसभ्ये
नराज्ञापूर्वैःसभ्यैःसपणव्यवहारेनिर्णीयमानेयद्यसौकुदृष्टवादेपराजितस्तदासौदंड्यः अथासौजयतितदाधिकृताःस
भ्यादंड्याः दुर्बलैर्व्यवहारदर्शिभिर्दृष्टोव्यवहारःपरावर्तते प्रबलदृष्टस्तु ननिवर्ततइत्युक्तम् ३१ इदानींप्रबलदृष्टेपिव्यवहारः



बलोपाधिविनिर्वृत्तान्व्यवहारान्निवर्तयेत् स्त्रीनक्तमंतरागारबहिःशत्रुकृतांस्तथा ३२ मत्तोन्मत्तार्तव्यसनिबालभीता
दियोजितः असंबंधकृतश्चैवव्यवहारोनसिध्यति ३३

कश्चिन्निवर्ततइत्याह बलेनबलात्कारेणउपाधिनाभयेनविनिर्वृ
त्तान्निष्पन्नान्व्यवहारान्निवर्तयेत् तथास्त्रीभिर्नक्तंरात्रावस्त्रीभिरपि अंतरागारेगृहाभ्यंतरेबहिर्ग्रामादिभ्यःशत्रुभिश्चकृतान्व्य
वहारान्निवर्तयेदितिसंबंधः ३२ अपिच मत्तोमदनीयद्रव्येण उन्मत्तउन्मादेनपंचविधेनवातपित्तश्लेष्मसंनिपातगृहसंभवेनोपसृ
ष्टः आर्तोव्याध्यादिना व्यसनमिष्टवियोगोनिष्टप्राप्तिःतज्जनितंदुःखं तद्वान्व्यसनी बालोव्यवहारायोग्यः भीतोऽरातिभ्यः आदिग्रह २२
णात्पुरराष्ट्रादिविरुद्धः पुरराष्ट्रविरुद्धश्चयश्चराज्ञाविसर्जितः अनादेयोभवेद्वादोधर्मविद्भिरुदाहृतइतिमनुस्मरणात् एतैर्योजि
तः कृतोव्यवहारोनसिध्यति अनियुक्तासंबंधकृतोपिव्यवहारोनसिध्यतीति संबंधः यत्तुस्मरणम् गुरोःशिष्येपितुःपुत्रेदंपत्योः
स्वामिभृत्ययोः विरोधेपिमिथस्तेषांव्यवहारोनसिध्यतीति तदपिगुरुशिष्यादीनामात्यंतिकव्यवहारप्रतिषेधपरंनभवति तेषामपि
कथंचिद्व्यवहारस्येष्टत्वात् तथाहि शिष्यादिशिष्टिरवधेनाशक्तौरज्जुवेणुविदलाभ्यांतनुभ्यामन्येनघ्नन्राज्ञाशास्यइतिगौतमस्मर
णात् नोत्तमांगेकथंचनेतिमनुस्मरणाच्च यदिगुरुःकोपावेशवशान्महतादंडेनोत्तमांगेताडयतिनदास्मृतिव्यपेतेनमार्गेणाधर्षितःशिष्योयदिराज्ञे
निवेदयतितदाभवत्येवव्यवहारपदम् तथाभूर्यापितामहोपात्तेत्यादिवचनात्पितामहोपात्तेभूम्यादौपितापुत्रयोःस्वाम्येसमानेयदिपिताविक्र
यादिनापितामहोपात्तंभूम्यादिनाशयतितदा पुत्रोयदिधर्माधिकरणंप्रवेशयति तदापितापुत्रयोरपिभवत्येवव्यवहारः यथा दुर्भिक्षे
व्याधिकार्येच्चव्याधौसंप्रतिरोधके गृहीतंस्त्रीधनंभर्तानाकामोदातुमर्हतीतिस्मरणात् दुर्भिक्षादिव्यतिरेकेणयदिस्त्रीधनंभर्ताव्ययीकृ
त्यविद्यमानधनोपियाच्यमानोनददाति तदादंपत्योरपीष्यतेएवव्यवहारः यथाभक्तदासस्यस्वामिनासहव्यवहारं वक्ष्यति गर्भदास
स्यापि गर्भदासादीनधिकृत्य यश्चैषांस्वामिनंकश्चिन्मोचयेत्प्राणसंशयात् दासत्वात्सविमुच्येतपुत्रभागंलभेतचेतिनारदोक्तत्वा
त् तदमोचनेपुत्रभागादानेचस्वामिनासहव्यवहारः केनवार्यते तस्मात्दृष्टादृष्टयोःश्रेयस्करोनभवति गुर्वादिभिर्व्यवहारइतिप्र
थमंशिष्यादयोनिवारणीयाःराज्ञासभ्येनेति गुरोःशिष्यइत्यादेःश्लोकस्यतात्पर्यार्थः अत्यंतनिर्बंधेतुशिष्यादीनामप्युक्तरीत्या
प्रवर्तनीयोव्यवहारः यदपि एकस्यबहुभिःसार्द्धंस्त्रीणांप्रेष्यजनस्यच अनादेयोभवेद्वादोधर्मविद्भिरुदाहृतइतिनारदवचनम्

तत्रैकस्यापिगणद्रव्यं हरेद्यस्तुसंविदं लंघयेत्स्वयः तथाएकं घ्नंतं बहूनांचेत्यादिस्मरणादेकार्यैर्बहुभिः सार्द्धंव्यवहारइष्यत एवेतिभिन्नार्थैर्ब
हुभिरेकस्ययुगपद्व्यवहारोनभवतीतिद्रष्टव्यम् स्त्रीणामित्यपिगोपशौंडिकादिस्त्रीणांस्वातंत्र्याद्व्यवहारोभवत्येवेति तदन्यासांकुलस्त्रीणांप
तिषुजीवत्सु तत्पारतंत्र्याद्नादेयोव्यवहारइतिव्याख्येयं प्रेष्यजनस्यचेति एतदपिप्रेष्यजनस्यस्वामिपारतंत्र्यात् स्वार्थव्यवहारेपिस्वाम्य
नुज्ञयैवव्यवहारोनान्यथेतियोजनीयम् ३३ परावर्त्यंव्यवहारमुक्त्वा इदानींपरावर्त्यंद्रव्यमाह प्रनष्टंहिरण्यादि शौल्किकस्थानपालादिभि
रधिगतंराज्ञेसमर्पितंयत्तद्राज्ञाधनिनेदातव्यम् यदिधनीरूपसंख्यादिभिर्लिंगैर्भावयति यदिनभावयति तदातत्समंदंड्यः असत्य

प्रनष्टाधिगतंदेयंनृपेणधनिनेधनम् विभावयेन्नचेल्लिंगैस्तत्समंदंडमर्हति ३४

वादित्वात् अधिगमस्यस्वत्वनिमित्तत्वात् सत्वेप्राप्ते तत्परावृत्तिरनेनोक्ता अत्रचकालावधिंवक्ष्यति शौल्किकैःस्थानपालैर्वानष्टा
पहृतमाहृतम् अर्वाक्संवत्सरात्स्वामीहरेतपरतोनृपइति मनुनापुनः संवत्सरत्रयमवधित्वेननिर्दिष्टम् प्रनष्टस्वामिकंरिक्थं
राजात्र्यब्दंनिधापयेत् अर्वाक्त्र्यब्दाद्धरेत्स्वामीपरतोनृपतिर्हरेदिति तत्रवर्षत्रयपर्यंतमवश्यंरक्षणीयम् तत्रयदिसंवत्सराद २३
र्वाक्स्वाम्यागच्छेत्तदाकृत्स्नमेवदद्यात् यदापुनःसंवत्सरादूर्ध्वमागच्छतितदाकिंचिद्भागंरक्षणमूल्यंगृहीत्वाशेषंस्वामिनेदद्यात्

यथाह आददीताथषड्भागंप्रनष्टाधिगतान्नृपः दशमंद्वादशंवापिसतांधर्ममनुस्मरन्निति तत्रप्रथमेवर्षेकृत्स्नमेवदद्यात् द्वि
तीयेद्वादशंभागं तृतीयेदशमं चतुर्थादिषुषष्ठंभागंगृहीत्वाशेषंदद्यात् राजभागस्यचतुर्थोंशोऽधिगंत्रेदातव्यः स्वाम्यनागमेतुकृ
त्स्नस्यधनस्यचतुर्थमंशमधिगंत्रेदत्वाशेषंराजागृह्णीयात् तथाहगौतमः प्रनष्टस्वामिकमधिगम्यसंवत्सरंराज्ञारक्ष्यमूर्ध्व
मधिगंतुश्चतुर्थोंशोराज्ञः शेषमित्यत्र संवत्सरमित्येकवचनमविवक्षितम् राजात्र्यब्दंनिधापयेदितिस्मरणात् हरेतपरतोनृपइ
त्येतदपिस्वामिन्यनागतेत्र्यब्दादूर्ध्वंव्ययीकरणाभ्यनुज्ञानतः परमागतेतुस्वामिनिव्ययीभूतेपिद्रव्येराजास्वांशमवतार्यतत्स-

राजालब्ध्वानिधिंदद्याद्द्विजेभ्योर्द्धंद्विजःपुनः विद्वानशेषमादद्यात्ससर्वस्यप्रभुर्यतः ३५ इतरेणनिधौलब्धेराजाष
ष्ठांशमाहरेत् अनिवेदितविज्ञातोदाप्यस्तंदंडमेवच ३६ मंदद्यात् एतच्चहिरण्यादिविषयम् गवादिविषयेवक्ष्यति पणा
नेकशफेदद्यादित्यादिना ३४ रथ्याशुल्कशालादिनिपतितस्यसुवर्णादेर्नष्टस्याधिगमेविधिमुक्त्वा अधुनाभूमौचिरनिखातस्यसु
वर्णादेर्निधिशब्दवाच्यस्याधिगमेविधिमाह उक्तलक्षणंनिधिंराजालब्ध्वा अर्द्धंब्राह्मणेभ्योदत्वाशेषंकोशेनिवेशयेत् ब्राह्मणस्तु
विद्वान्श्रुताध्ययनसंपन्नः सदाचारोयदिनिधिंलभेत तदासर्वमेवगृह्णीयात् यस्मादसौसर्वस्यजगतःप्रभुः इतरेणतुराजावि
द्वद्ब्राह्मणव्यतिरिक्तेन अविद्वद्ब्राह्मणक्षत्रियादिनानिधौलब्धेराजाषष्ठांशमधिगंत्रेदत्वाशेषंनिधिंस्वयमेवाहरेत् यथाहवसिष्ठः

अप्रज्ञायमानंवित्तंयोधिगच्छेद्राजातद्धरेत् षष्ठमंशमधिगंत्रेदद्यादिति गौतमोपि निध्यधिगमेराजधनंभवति नब्राह्मणस्याभिरूपस्य
अब्राह्मणोव्याख्याताषष्ठमंशंलभेतेत्येकेइति अनिवेदितइतिकर्तरिनिष्ठा अनिवेदितश्चासौविज्ञातश्चराज्ञेप्यनिवेदितोविज्ञातः यःकश्चिन्नि
धिंलब्ध्वाराज्ञेननिवेदितवान् विज्ञातश्चराज्ञासससर्वंनिधिंदाप्यो दंडश्चशक्त्यपेक्षया अथनिधेरपिस्वाम्यागत्यरूपकसंख्यादिभिः स्वत्वंभाव
यतितदा तस्मैराजानिधिंदत्वाषष्ठंद्वादशंवांशंस्वयमाहरेत् यथाहमनुः ममायमितियोब्रूयान्निधिंसत्येनमानवः तस्याददीतषड्भागंरा
जाद्वादशमेववेति अंशविकल्पस्तुवर्णकालाद्यपेक्षयावेदितव्यः ३५ ३६ चौरहृतंप्रत्याह चौरैर्हृतंद्रव्यंचोरेभ्योविजित्य जानपदायस्व

देयंचौरहृतंद्रव्यंराज्ञाजानपदायतु अददद्धिसमाप्नोतिकिल्बिषंयस्यतस्यतत् ३७

देशनिवासिनेयस्यतत्द्रव्यंतस्यराज्ञादातव्यम् हियस्मात् अददत् अप्रयच्छत् यस्यतदपहृतंद्रव्यं तस्यकिल्बिषमाप्नोति तस्यचौरस्य
यथाहमनुः दातव्यंसर्ववर्णेभ्योराज्ञाचौरैर्हृतंधनम् राजातदुपयुंजानश्चौरस्याप्नोतिकिल्बिषमिति यदिचौरहस्तादादाय स्वयमुपभुं
क्ते तदाचौरस्यकिल्बिषमाप्नोति अथचौरहृतमुपेक्षतेतदाजानपदस्यकिल्बिषमथचौरहृताहरणाय यतमानोपिनशक्नुयादाहर्तुंतदा
तावद्धनंस्वकोशाद्द्यात् यथाहगौतमः चौरहृतमवजित्ययथास्थानंगमयेत् कोशाद्वादद्यादिति कृष्णद्वैपायनोऽपि प्रत्याहर्तुं २४
नशक्तस्तुधनंचौरहृतंयदि स्वकोशात्तद्धिदेयंस्यादशक्तेनमहीक्षितेति साधारणासाधारणरूपांव्यवहारमातृकामभिधायाधुना

ष्टादशानांव्यवहारपदानामाद्यमृणादानपदंदर्शयति अशीतिभागोवृद्धिःस्यादित्यादिना आधिःप्रणश्येद्विगुणेधनइत्येवमंतेन त
च्चऋणादानंसप्तविधं ईदृशमृणंदेयं ईदृशमदेयं अनेनाधिकारिणादेयं अस्मिन्समयेदेयं अनेनप्रकारेणदेयमित्यधमर्णेपं
चविधम् उत्तमर्णेदानंग्रहणविधिश्चेतिद्विविधमिति एतच्चनारदेनस्पष्टीकृतम् ऋणंदेयमदेयंचयेनयत्रयथाचयत् दानग्रह
णधर्माश्चऋणादानमितिस्मृतमिति ३७ तत्रप्रथममुत्तमर्णस्यदानविधिमाह तत्पूर्वकत्वादितरेषां मासिमासिप्रतिमासंबंधकं
विश्वासार्थंयदाधीयते आधिरितियावत् बंधकेनसहवर्ततइतिसबंधकः प्रयोगस्तस्मिन्सबंधकेप्रयोगेप्रयुक्तस्यद्रव्यस्य

अशीतिभागोवृद्धिःस्यान्मासिमासिसबंधके वर्णक्रमाच्छतंद्वित्रिचतुःपंचकमन्यथा ३८

अशीतितमोविभागोवृद्धिर्धर्म्याभवति अन्यथाबंधकरहितेप्रयोगेवर्णानांब्राह्मणादीनांक्रमेणद्वित्रिचतुःपंचकंशतंधर्म्यंभवति ब्राह्म
णेऽधमर्णेद्विकंशतं क्षत्रियेत्रिकं वैश्येचतुष्कं शूद्रेपंचकम् मासिमासीत्येव द्वौवात्रयोवाचत्वारोवापंचवाद्वित्रिचतुःपंचाःअस्मिन्शतेवृद्धि
र्दीयतेइतिद्वित्रिचतुःपंचकंशतम् तदस्मिन्वृद्ध्यायथालाभोपशुल्कोयदादीयतइति संख्याया अतिशदंतायाःकन् तदंतविधिश्चात्रद्र
ष्टव्यः वृद्धेर्वृद्धिश्चक्रवृद्धिः प्रतिमासंतुकालिका इच्छाकृताकारितास्यात्कायिकाकायकर्मणा इयंचवृद्धिर्मासिमासिगृह्यतेइतिकालि
का इयमेववृद्धिर्दिवसगणनयाविभज्यप्रतिदिवसंगृह्यमाणाकायिकाभवति तथाचनारदेन कायिकाकालिकाचैवकारिताच

तथापरा चक्रवृद्धिश्चशास्त्रेषु तस्यवृद्धिश्चतुर्विधेत्युक्तम् कायाविरोधिनीश्वत्पणपादादिदायिका प्रतिमासंस्रवंतीयावृद्धिः साकालिकामता वृद्धिः साकारितानामाधमर्णेनस्वयंकृता वृद्धेरपिपुनर्वृद्धिश्चक्रवृद्धिरुदाहृतेति ३८ गृहीतृविशेषेणप्रकारांतरमाह कांतारमरण्यं तत्रगच्छंतीतिकांतारगाः येवृद्ध्याधनंगृहीत्वाधिकलाभार्थमतिगहनंप्राणधनविनाशशंकास्थानंप्रविशंतिते दशकंशतंदद्यु र्येचसमुद्रगास्तेविंशकंशतंमासिमासीत्येव एतदुक्तंभवति कांतारगेभ्योदशकंसामुद्रेभ्यश्चविंशकम् उत्तमर्णोदद्यात् मूल्यनाशस्याविशंकितत्वादिति इदानींकारितांवृद्धिमाह सर्वेवाब्राह्मणादयोधमर्णाः अबंधकेस्वबंधकेवास्वकृतांस्वाभ्युपगतांवृद्धिंसर्वासु

कांतारगास्तुदशकंसामुद्राविंशकंशतम् दद्युर्वास्वकृतांवृद्धिंसर्वेसर्वासुजातिषु ३९

जातिषुदद्युः क्वचिदकृतापिवृद्धिर्भवति यथाहनारदः नवृद्धिःप्रीतिदत्तानांस्यादनाकारिताक्वचित् अनाकारितमप्यूर्ध्वंवत्सराद्विवर्द्धनइति यस्तुयाचितकंगृहीत्वादेशांतरंगतस्तंप्रतिकात्यायनेनोक्तं योयाचितकमादायतमदत्वादिशंव्रजेत् उर्ध्वंसंवत्सरात्तस्यतद्धनंवृद्धिमाप्नुयादिति यश्चयाचितकमादाययाचितोप्यदत्वादेशांतरंव्रजति तंप्रतितेनैवोक्तं कृतोद्धारमदत्वायोयाचितस्तुदिशंव्रजेत् ऊर्ध्वंमासत्रयात्तस्यतद्धनंवृद्धिमाप्नुयादिति यःपुनःस्वदेशेस्थितएवयाचितोयाचितकंनददाति तंयाचितकालादारभ्यवृद्धिंदापयेद्राजा यथाह स्वदेशेपिस्थितोयस्तुनदद्याद्याचितःक्वचित् तंततोकारितांवृद्धिमनिच्छंतंचदापयेदिति अना २५

कारितवृद्धेरपवादोनोक्तः पण्यमूल्यंभृतिर्न्यासोदंडोयश्चप्रकल्पितः वृथादानाक्षिकपणावर्द्धंतेनाविवक्षिताइति अविवक्षिताअनाकारिताइति ३९ अधुनाद्रव्यविशेषेणवृद्धिविशेषमाह संततिरेववृद्धिः पशूनांस्त्रीणांपोषणासमर्थस्य तत्पुष्टिसंततिकामस्यप्रयोगःसंभवति ग्रहणंचक्षीरपरिचर्यार्थिनः अधुनाप्रयुक्तस्यद्रव्यस्यवृद्धिग्रहणमंतरेणापिचिरकालावस्थितस्यकस्यद्रव्यस्यकियतीपरावृद्धिरित्यपेक्षित आह रसस्यतैलघृतादेर्वृद्धिग्रहणमंतरेणचिरकालावस्थितस्यस्वकृतयावृद्ध्यावर्द्धमानस्याष्टगुणावृद्धिःपरा नातःपरंवर्द्धते तथावस्त्रधान्यहिरण्यानां यथासंख्यंचतुर्गुणात्रिगुणाद्विगुणाचवृद्धिःपरा वसिष्ठेनतुरसस्यत्रैगुण्यमुक्तम् द्विगुणंहिरण्यंत्रिगुणंधान्यंधा

संततिस्तुपशुस्त्रीणांरसस्याष्टगुणापरा वस्त्रधान्यहिरण्यानांचतुस्त्रिद्विगुणापरा ४०

न्येनैवरसाव्याख्याताः पुष्पमूलफलानिचतुलाधृतमष्टगुणमिति मनुनातुधान्यस्यपुष्पमूलफलादीनांचपंचगुणत्वमुक्तम् धान्येशदेलवेवाह्येनातिक्रामतिपंचतामिति शदः क्षेत्रफलं पुष्पमूलफलादिलवोमेषोर्णाचमरीकेशादिः वाह्योबलीवर्दतुरगादिः धान्यशदलववाह्यविषयावृद्धिः पंचगुणत्वंनातिक्रामतीति तत्राधमर्णयोग्यतावशेनदुर्भिक्षादिकालवशेनचव्यवस्थाद्रष्टव्या एतच्चसकृत्प्रयोगेसकृदाहरणेचवेदितव्यम् पुरुषांतरसंक्रमणेनप्रयोगांतरकरणेतस्मिन्नेववापुरुषेएकरसेताभ्यांप्रयोगांतरीकरणेसुवर्णादिकंद्वैगुण्याद्यतिक्रम्यपूर्ववद्वर्द्धते सकृत्प्रयोगेपिप्रतिदिनंप्रतिमासंप्रतिसंवत्सरंवावृद्ध्याहरणेधमर्णदेयस्यद्वैगुण्यासंभवात्पूर्वाहितवृद्ध्यासहद्वैगुण्यमतिक्र

म्यवर्द्धनएव यथाहमनुः कुसीदवृद्धिर्द्वैगुण्यंनात्येतिसकृदाहितेति सकृदाहृतेत्यपिपाठोस्ति उपचयार्थंप्रयुक्तंद्रव्यंकुसीदंतस्यवृ
द्धिःकुसीदवृद्धिः द्वैगुण्यंनात्येतिनातिक्रामति यदिसकृदाहितासकृत्प्रयुक्तापुरुषांतरसंक्रमणादिनाप्रयोगांतरकरणेद्वैगुण्यमत्येतिस
कृदाहृतेतिपाठेतुशनैःशनैःप्रतिदिनंप्रतिमासंप्रतिसंवत्सरंवाधमर्णादाहृताद्वैगुण्यमत्येतीतिव्याख्येयम् तथागौतमेनाप्युक्तम्
चिरस्थानेद्वैगुण्यंप्रयोगस्येति प्रयोगस्येत्येकवचननिर्देशात्प्रयोगांतरकरणेद्वैगुण्यातिक्रमोभिप्रेतःचिरस्थानइतिनिर्देशात् शनैः
शनैर्वृद्धिग्रहणेद्वैगुण्यातिक्रमोदर्शितः ४० ऋणप्रयोगधर्माउक्ताः सांप्रतंप्रयुक्तस्यधनस्यग्रहणधर्माउच्यंते प्रपन्नमभ्युपगत

प्रपन्नंसाधयन्नर्थंनवाच्योनृपतेर्भवेत् साध्यमानोनृपंगच्छन्दंडोदाप्यश्चतद्धनम् ४१

मधर्मेणधनंसाक्ष्यादिभिर्भावितंवासाधयन्प्रत्याहरन् धर्मादिभिरुपायैरुत्तमर्णोनृपतेर्वाच्योनिवारणीयोनभवति धर्मादयश्चोपायाम
नुनादर्शिताः धर्मेणव्यवहारेणछलेनाचरितेनच प्रयुक्तंसाधयेदर्थंपंचमेनबलेनचेति धर्मेणप्रीतियुक्तेनसत्यवचनेनव्यवहारेण
साक्षिलेख्याद्युपन्यासेन छलेनउत्सवादिव्याजेनभूषणादिग्रहणेन आचरितेन अभोजनेन पंचमेनोपायेनबलेननिगडबंधनादि
ना उपचयार्थंप्रयुक्तंद्रव्यमेतैरुपायैरात्मसात्कुर्यादिति प्रपन्नंसाधयन्नर्थंनवाच्यइतिवदन् अप्रतिपन्नंसाधयन्राज्ञानिवारणीय 
इतिदर्शयति एतदेवस्पष्टीकृतंकात्यायनेन पीडयेद्योधनीकश्चिद्दणिकंन्यायवादिनम् तस्मादर्थात्सहीयेततत्समंचाप्नुयाद्दममिति

यस्तुधर्मादिभिरुपायैःप्रपन्नार्थंसाध्यमानोयाच्यमानोनृपंगच्छेद्राजानमभिगम्यसाधयंतमभियुंक्तेसदंड्योभवति शक्त्यनुसारेणतद्धनंदा
प्यश्चराज्ञा दापनेचप्रकारादर्शिताः राजातुस्वामिनंविप्रंसांत्वेनैवप्रदापयेत् देशाचारेणचान्यांस्तुदुष्टान्संपीड्यदापयेत् रिक्थिनंसुहृदंवापि
छलेनैवप्रदापयेदिति साध्यमानोनृपंगच्छेदित्येतत् स्मृत्याचारव्यपेतेनेत्यस्य प्रत्युदाहरणंचबोद्धव्यम् ५१ बहुषूत्तमर्णिकेषुयुगपत्प्राप्तेष्व
कोधमर्णिकः केनक्रमेणदाप्योराज्ञेत्यपेक्षितआह समानजातीयेषुधनिषुयेनैवक्रमेणधनंगृहीतंतेनैवक्रमेणाधमर्णिकोराज्ञादाप्यःभि

गृहीतानुक्रमाद्दाप्योधनिनामधमर्णिकः दत्वातुब्राह्मणायैवनृपतेस्तदनंतरम् ४२
राज्ञाधमर्णिकोदाप्यःसाधिताद्दशकंशतम् पंचकंचशतंदाप्यःप्राप्तार्थोह्युत्तमर्णिकः ४३

न्नजातीयेषुतुब्राह्मणादिक्रमेण ४२ यदापुनरुत्तमर्णोदुर्बलःप्रतिपन्नमर्थंधर्मादिभिरुपायैःसाधयितुमशक्नुवन्राज्ञासाधितार्थोभ
वतितदाऽधमर्णस्यदंडमुत्तमर्णस्यचभृतिदानमाह अधमर्णिकोराज्ञाप्रतिपन्नार्थात्साधिताद्दशकंशतंदाप्यः प्रतिपन्नस्यसाधि-
तार्थस्यदशममंशंराजाधमर्णिकाद्दंडरूपेणगृह्णीयादित्यर्थःउत्तमर्णस्तुप्राप्तार्थःपंचकंशतंभृतिरूपेणदाप्यः साधितार्थस्यविंशतित
मंभागमुत्तमर्णाद्राजाभृत्यर्थंगृह्णीयादित्यर्थः अप्रतिपन्नार्थसाधनेतुदंडविभागोदर्शितोनिन्हवेभावितोदद्यादित्यादिना सधनमधमर्णि
कंप्रत्युक्तम् ४३

अधुनानिर्धनमधमर्णिकंप्रत्याह ब्राह्मणादि उत्तमर्णोहीनजातिंक्षत्रियादिजातिंपरिक्षीणंनिर्धनमृणार्थंऋणनिर्हरणार्थंकर्मस्वकर्म
स्वजात्यनुरूपंकारयेत् तत्कुटुंबाविरोधेन ब्राह्मणःपुनःपरिक्षीणोनिर्धनः शनैःशनैः यथोदयंयथासंभवमृणंदाप्यः अत्रचहीनजा
तिग्रहणंसमजातेरप्युपलक्षणम् अतश्चसमानजातिमपिपरिक्षीणंयथोचितंकर्मकारयेत् ब्राह्मणग्रहणंचश्रेष्ठजातेरुपलक्षणं
अतश्चक्षत्रियादिरपिपरिक्षीणोवैश्यादेः शनैर्दाप्योयथोदयम् एतदेवमनुनास्पष्टीकृतम् कर्मणापिसमंकुर्याद्धनिकेनाधमर्णिकः

हीनजातिंपरिक्षीणामृणार्थंकर्मकारयेत् ब्राह्मणस्तुपरिक्षीणःशनैर्दाप्योयथोदयम् ४४
दीयमानंनगृह्णातिप्रयुक्तंयःस्वकंधनम् मध्यस्थस्थापितंचेत्स्याद्वर्द्धतेनततःपरम् ४५
अविभक्तैःकुटुंबार्थेयदृणंतत्कृतंभवेत् दद्युस्तद्रिक्थिनःप्रेतेप्रोषितेवाकुटुंबिनि ४६

समोऽपकृष्टजातिश्चदद्याच्छ्रेयांस्तुतच्छनैरिति उत्तमर्णेनसमंनिवृत्तोत्तमर्णाधमर्णव्यपदेशमात्मानमधमर्णःकर्मणाकुर्यादित्य
र्थः ४४ किंच उपचयार्थंप्रयुक्तंधनंअधमर्णेनदीयमानमुत्तमर्णोवृद्धिलोभाद्यदिनगृह्णाति तदाधमर्णेनमध्यस्थहस्तेस्थापि
तंयदिस्यात्तदाततःस्थापनादूर्ध्वंनवर्द्धते अथस्थापितंयाच्यमानोनददाति ततःपूर्ववद्वर्द्धतएव ४५ इदानींदेयमृणंयदायेन २७
देयंतदाह अविभक्तैर्बहुभिःकुटुंबार्थमेकेकेनवायदृणंकृतंतदृणंकुटुंबीदद्यात् तस्मिन्प्रेतेप्रोषितेवातद्रिक्थिनःसर्वेदद्युः
४६

येनदेयमित्यत्रप्रत्युदाहरणमाह पत्याकृतंमृणंयोषिद्भार्यानैवदद्यात् पुत्रेणकृतंयोषिन्मातानदद्यात् तथापुत्रेणकृतंपितानदद्यात् तथा
भार्याकृतंपतिः कुटुंबार्थादृतइतिसर्वविशेषणम् अतश्चकुटुंबार्थंयेनकेनापिकृतंतत्कुटुंबिनादेयम् तदभावेतद्दायहरैःदेयमित्य
र्थःमेव ४७ पुत्रपौत्रैर्ऋणंदेयमितिवक्ष्यतितस्यपुरस्तादपवादमाह सुरापानेनयत्कृतमृणंकामकृतंस्त्रीव्यसननिवृत्तं द्यूतेपराजय
निर्वृत्तंदंडशुल्कयोरवशिष्टंवृथादानंधूर्तबंदिमल्लादिभ्योयत्प्रतिज्ञातं धूर्तेबंदिनिमल्लेचकुवैद्येकितवेशठे चारचारणचोरेषुदत्तंभ
वतिनिष्फलमितिस्मरणात् एतदृणंपित्राकृतंपुत्रादिःशौंडिकादिभ्योनदद्यात् यत्रदंडशुल्कावशिष्टकमित्यवशिष्टग्रहणात्सर्वंदातव्य

नयोषित्पतिपुत्राभ्यांनपुत्रेणकृतंपिता दद्यादृतेकुटुंबार्थान्नपतिःस्त्रीकृतंतथा ४७ सुराकामद्यूतकृतंदंडशुल्कावशिष्ट
कं वृथादानंतथैवेहपुत्रोदद्यान्नपैतृकं ४८ गोपशौंडिकशैलूषरजकव्याधयोषितां ऋणंदद्यात्पतिस्तासांयस्माद्वृत्तिस्तदाश्र
या ४९

मितिनमंतव्यम् दंडंवादंडशेषंवाशुल्कंतच्छेषमेववा नदातव्यंतुपुत्रेणयच्चनव्यवहारिकमित्योशनसस्मरणात् गौतमेनाप्यु
क्तं मद्यशुल्कद्यूतकामदंडान्पुत्रानध्यावहेयुरिति नपुत्रस्योपरिभवंतीत्यर्थः अनेनादेयमृणमुक्तम् ४८ नपतिःस्त्रीकृतंतथेत्यस्याप
वादमाह गोपोगोपालः शौंडिकःसुराकारः शैलूषोनटः रजकोवस्त्राणांरंजकः व्याधोमृगयुः एतेषांयोषिद्भिर्यदृणंकृतंतत्पतिभिर्देयं य
स्मात्तेषांवृत्तिर्जीवनंतदाश्रयायोषिदधीना यस्माद्वृत्तिस्तदाश्रयेतिहेतुव्यपदेशादन्येपियेयोषिदधीनजीवनास्तेपियोषित्कृतमृणंदद्युरिति
गम्यते ४९

पतिकृतंभार्यानदद्यादित्यस्यापवादमाह मुमूर्षुणाप्रवत्स्यतावापत्यानियुक्तयाऋणदानेयत्प्रतिपन्नंतत्प्रतिकृतमृणंदेयं यच्चपत्या
सहभार्ययाऋणंकृतंतदपिभर्त्रभावेभार्यया अपुत्रयादेयम् यच्चस्वयमेवकृतंऋणंतदपिदेयम् ननुप्रतिपन्नादित्रयंस्त्रियादेय
मितिनवक्तव्यम् संदेहाभावात् उच्यते भार्यापुत्रश्चदासश्चत्रयएवाधनाः स्मृताः यत्तेसमधिगच्छंतियस्यैतेतस्यतद्धनमिति
वचनान्निर्धनत्वेनप्रतिपन्नादिष्वदानाशंकायामिदमुच्यते प्रतिपन्नंस्त्रियादेयमित्यादि नचानेनवचनेनस्त्र्यादीनांनिर्धनत्वमभि

प्रतिपन्नंस्त्रियादेयंपत्यावासहयत्कृतम् स्वयंकृतंवायदृणंनान्यत्स्त्रीदातुमर्हति ५०

धीयतेपारतंत्र्यमात्रप्रतिपादनपरत्वात् एतच्चविभागप्रकरणेस्पष्टीकरिष्यते नान्यत्स्त्रीदातुमर्हतीत्येतत्तर्हिनवक्तव्यम् विधा
नेनान्यत्रप्रतिषेधसिद्धेः उच्यते प्रतिपन्नंस्त्रियादेयंपत्यावासहयत्कृतमित्येतयोरपवादार्थमुच्यते अन्यत्कराकारादिवचनो २९
पात्तंप्रतिपन्नमपि पत्यासहकृतमपिनदेयमिति ५०

---

पुनरपियदृणंदातव्यंयेनचादातव्यंयत्रचकालेदातव्यंतत्त्रितयमाह पितायदिदातव्यमृणमदत्वाप्रेतोदूरदेशगतोचिकित्सनीयव्याध्या
द्यभिभूतोवातदातत्कृतमृणमाख्यापनेपुत्रेणपौत्रेणवापितृधनाभावेपिपुत्रत्वेनपौत्रत्वेनच तत्रक्रमोप्ययमेवपित्रभावेपुत्रःपु
त्राभावेपौत्रइति पुत्रेणपौत्रेणवानिन्हवेकृते अर्थिनासाक्ष्यादिभिर्भावितमृणंदेयम् पुत्रपौत्रैरित्यन्वयः अत्रपितरिप्रोषितइत्ये
तावदुक्तम् कालविशेषस्तुनारदेनोक्तोद्रष्टव्यः नार्वाक्संवत्सराद्विंशात्पितरिप्रोषितेसुतः ऋणंदद्यात्पितृव्येवाज्येष्ठेभ्रातर्यथा
पिवेति प्रेतेप्यप्राप्तव्यवहारकालोनदद्यात्प्राप्तव्यवहारकालस्तुदद्यात् सचकालस्तेनैवदर्शितः गर्भस्थैःसदृशोज्ञेय आष्टमाद्

पितरिप्रोषितेप्रेतेव्यसनाभिप्लुतेपिवा पुत्रपौत्रैर्ऋणंदेयंनिन्हवेसाक्षिभावितम् ५१

त्सराच्छिशुः बालआषोडशाद्वर्षात्पौगंडश्चेतिशब्द्यते परतोव्यवहारज्ञःस्वतंत्रःपितरावृतइति यद्यपिपितृमरणादूर्ध्वंबालोपि-
स्वतंत्रोजातस्तथापिनर्णभाग्भवति यथाह अप्राप्तव्यवहारश्चेत्स्वतंत्रोपिहिनर्णभाक् स्वातंत्र्यंहिस्मृतंज्येष्ठेज्यैष्ठ्यंगुणवयःकृत
मिति तथाआसेधाह्वाननिषेधश्चदृश्यते अप्राप्तव्यवहारश्चदूतोदानोन्मुखोव्रती विषमस्थाश्चनासेध्यानचैतानाह्वयेन्नृपइति
तस्मात् अतःपुत्रेणजातेनस्वार्थमुत्सृज्ययत्नतः ऋणात्पितामोचनीयोयथाननरकंव्रजेदिति पुत्रेणव्यवहारज्ञतयाजातेननिष्पन्ने-
नेतिव्याख्येयम् श्राद्धेतुबालस्याप्यधिकारः नब्रह्माभिव्याहरेदन्यत्रस्वधानिनयनादितिगौतमस्मरणात् पुत्रपौत्रैरितिबहुव

चननिर्देशा द्वहव: पुत्रायदिविभक्ता: स्वांशानुरूपेणऋणंदद्यु: अविभक्ताश्चेत्संभूयसमुत्थानेन गुणप्रधानभावेन वर्तमानानांप्र धानभूतएववादद्यादितिगम्यते यथाहनारद: अतऊर्ध्वंपितु:पुत्राऋणंदद्युर्यथांशत: अविभक्ताविभक्तावायस्तावद्दहते धुरमि मि अत्रचपुत्रपौत्रैर्ऋणंदेयमित्यविशेषेणोक्तं तथापिपुत्रेणययथापितासवृद्धिकंददातितथैवऋणंदेयम् पौत्रेणतत्सममूल्यमेव दातव्यंनवृद्धिरिति विशेषोवगंतव्य: ऋणमात्मीयवत्पित्र्यंदेयंपुत्रैर्विभावितम् पैतामहंसमंदेयमदेयंतत्सुतस्यत्विति बृहस्पतिवच नादत्रविभावितमित्यविशेषोपादानात्साक्षिविभावितमित्यत्रसाक्षिग्रहणंप्रमाणोपलक्षणम् सममंयावद्गृहीतंतावदेवदेयंनवृद्धि:त

रिक्थग्राहऋणंदाप्योयोषिद्ग्राहस्तथैवच पुत्रोनन्याश्रितद्रव्य:पुत्रहीनस्यरिक्थिन: ५२

त्सुतस्यप्रपौत्रस्यादेयमगृहीतधनस्य एतच्चोत्तरश्लोकेस्पष्टयिष्यते ५१ ऋणापाकरणेऋणीतत्सुत:पौत्रइतित्रय: कर्तारोदर्शिता स्तेषांचसमवायेक्रमोपिदर्शित: इदानींकर्त्रंतरसमवायेचक्रममाह अन्यदीयंद्रव्यमन्यस्यक्रयादिव्यतिरेकेणयत्स्वीभवतितद्रि क्थंविभागद्वारेणरिक्थंगृह्णातीतिरिक्थग्राह: सऋणंदाप्य: एतदुक्तंभवति योयदीयंद्रव्यंरिक्थरूपेणगृह्णातिसतत्कृतमृणंदा २९
प्योनचौरादिरिति योषितंभार्यांगृह्णातीतियोषिद्ग्राह: सतथैवऋणंदाप्य: यदीयांयोषितंयोगृह्णातिसतत्कृतमृणंदाप्य: योषितो

ऽविभाज्यद्रव्यत्वेनरिक्थव्यपदेशानर्हत्वात्भेदेननिर्देश: पुत्रश्चानन्याश्रितद्रव्य: ऋणंदाप्य: अन्यमाश्रितमन्याश्रितं अन्याश्रितंमातापितृ संबंधिद्रव्यंयस्यासावन्याश्रितद्रव्य: नअन्याश्रितद्रव्य: अनन्याश्रितद्रव्य:पुत्रहीनस्यरिक्थिनऋणंदाप्यइतिसंबंध: एतेषांसमवाये क्रमश्चपाठक्रमएव रिक्थग्राहऋणंदाप्यस्तदभावेयोषिद्ग्राहस्तदभावेपुत्रइति नन्वेतेषांसमवायएवनोपपद्यते नभ्रातरोनपित र:पुत्रारिक्थहरा:पितुरिति पुत्रेसत्यन्यस्यरिक्थग्रहणासंभवात् योषिद्ग्राहोपिनोपपद्यते नद्वितीयश्चसाध्वीनांक्वचिद्भर्तोपदि श्यतइतिस्मरणात् तद्दणंपुत्रोदाप्यइत्यप्ययुक्तम् पुत्रपौत्रैर्ऋणंदेयमित्युक्तत्वात् अनन्याश्रितद्रव्यइतिविशेषणमप्यनर्थकम् पुत्रेसतिद्रव्यस्यान्याश्रयणासंभवात् संभवेचरिक्थग्राहीत्यनेनैवगतार्थत्वात् पुत्रहीनस्यरिक्थिनइत्येतदपिनवक्तव्यम् पु त्रेसत्यपिरिक्थग्राहीऋणंदाप्यइतिस्थितम् असतिपुत्रेरिक्थग्राहीसुतरांदाप्यइतिसिद्धमेवेति अत्रोच्यते पुत्रेसत्यप्य- न्योरिक्थग्राहीसंभवति क्लीबांधबधिरादीनांपुत्रत्वेपिरिक्थग्राह्याभावात् तथाचक्लीबादीननुक्रम्यभर्तव्यास्तुनिरंशकाइति वक्ष्यति तथासवर्णापुत्रोऽन्यायवृत्तिर्नलभेतैकेषामितिगौतमस्मरणात् अतश्चक्लीबादिषुपुत्रेषुसत्सु अन्यायवृत्तेचसवर्णा पुत्रेसतिरिक्थग्राहीपितृव्यतत्पुत्रादि: योषिद्ग्राहोयद्यपिशास्त्राविरोधेननसंभवतितथाप्यतिक्रांतनिषेध: पूर्वपतिकृतर्णापा करणाधिकारीभवत्येव यश्चतसृणांस्वैरिणीनामंतिमांगृह्णाति यश्चपुनर्भुवांतिसृणांप्रथमाम् यथाहनारद: परपूर्वा:स्त्रिय: स्त्वन्या: सप्तप्रोक्तायथाक्रमम् पुनर्भूस्त्रिविधातासांस्वैरिणीतुचतुर्विधा कन्यैवाक्षतयोनिर्यापाणिग्रहणदूषिता पुनर्भू:प्रथमा

नामपुनः संस्कारकर्मणा देशधर्मानवेक्ष्यस्त्रीगुरुभिर्याप्रदीयते उत्पन्नसाहसान्यस्मैसाद्वितीयाप्रकीर्तिता उत्पन्नसाहसाउत्पन्न
व्यभिचारा असत्सुदेवरेषुस्त्रीबांधवैर्याप्रदीयते सवर्णायसपिंडायसातृतीयाप्रकीर्तिता स्त्रीप्रसूताप्रसूतावापत्यावेवतुजीवति
कामात्समाश्रयेदन्यंप्रथमास्वैरिणीतुसा कौमारंपतिमुत्सृज्ययात्वन्यंपुरुषंश्रिता पुनःपत्युर्गृहंयायात्साद्वितीयाप्रकीर्तिता मृते
भर्तरितुप्राप्तान्देवरादीनपास्यया उपगच्छेत्परंकामात्सातृतीयाप्रकीर्तिता प्राप्तादेशाद्धनक्रीताक्षुत्पिपासातुराचया तवाहमि
त्युपगतासाचतुर्थीप्रकीर्तिता अंतिमास्वैरिणीनांयाप्रथमाचपुनर्भुवाम् ऋणंतयोःपतिकृतंदद्याद्यस्तउपाश्रितइति तदन्योपियो
षिद्ग्राहऋणापाकरणेधिकारीतेनैवदर्शितः यातुसप्रधनैवस्त्रीसापत्यावान्यमाश्रयेत् सोस्यादद्याहृणंभर्तुरुत्सृजेद्वातथैवतां
प्रकृष्टेनधनेनसहवर्ततेइतिसप्रधनाबहुधनेतियावत् तथा अधनस्यह्यपुत्रस्यमृतस्योपैतियस्त्रियम् ऋणंवोढुःसभज-
तेसैवचास्यधनंस्मृतमिति पुत्रस्यपुनर्वचनंक्रमार्थं अनन्याश्रितद्रव्यइतिबहुषुपुत्रेषुरिक्थाभावेअंशग्रहणयोग्यस्यैवऋ
णापाकरणेधिकारोनायोग्यस्यांधादेरित्येवमर्थम् पुत्रहीनस्यरिक्थिनइत्येतदपिपुत्रपौत्रहीनस्यप्रपौत्रादयोयदिरिक्थंगृह्ण-
न्तिलदाऋणंदाप्याः नान्यथेत्येवमर्थं पुत्रपौत्रौचरिक्थग्रहणाभावेपिदाप्यावित्युक्तं यथाहनारदः क्रमादव्याहृतंप्राप्तंपुत्रै
र्यन्नर्णमुद्धृतम् दद्युःपैतामहंपौत्रास्तच्चतुर्थान्निवर्ततइतिसर्वंनिरवद्यम् यद्वायोषिद्ग्राहाभावेपुत्रोदाप्यइत्युक्तम् पुत्राभा ३०
वेयोषिद्ग्राहोदाप्यइत्युच्यते पुत्रहीनस्यरिक्थिनइतिरिक्थशब्देनयोषिदेवोच्यते सैवचास्यधनंस्मृतमितिस्मरणात् योय

स्यहरतेदारान्सतस्यहरतेधनमितिच ननुयोषिद्ग्राहाभावेपुत्रऋणंदाप्यःपुत्राभावेयोषिद्ग्राहइतिपरस्परविरुद्धम् उभयसद्भावेनकश्चिद्दाप्य
इति नैषदोषः अंतिमस्वैरिणीग्राहिणःप्रथमपुनर्भूग्राहिणःसप्रधनस्त्रीहारिणश्चाभावेपुत्रोदाप्यःपुत्राभावेतुनिर्धननिरपत्ययोषिद्ग्राहोदा
प्यइति एतदेवोक्तंनारदेन धनस्त्रीहारिपुत्राणामृणभाग्योधनंहरेत् पुत्रोसतोःस्त्रीधनिनोःस्त्रीहारीधनिपुत्रयोरिति धनस्त्रीहारिपु
त्राणांसमवायेयोधनंहरेत्सऋणभाक् स्त्रीधनिनोःस्त्रीचधनंचस्त्रीधनेतेविद्येतेययोस्तौस्त्रीधनिनौतयोःस्त्रीधनिनोरसतोःपुत्रएवऋ
णभाक्भवति धनिपुत्रयोरसतोःस्त्रीहार्येवर्णभाक् स्त्रीहार्यभावेपुत्रऋणभाक् पुत्राभावेस्त्रीहारीतिविरोधप्रतिभासपरिहारःपूर्व
वत् पुत्रहीनस्यरिक्थिनइत्यस्यान्याव्याख्या एतेधनस्त्रीहारिपुत्राऋणंकस्यदाप्याइतिविवक्षायांउत्तमर्णस्यदाप्यास्तदभावेतत्पुत्रादेःतत्पु
त्राद्यभावेकस्यदाप्याइत्यपेक्षायामिदमुपतिष्ठतेपुत्रहीनस्यरिक्थिनइति पुत्राद्यन्वयहीनस्योत्तमर्णस्ययोरिक्थीरिक्थग्रहणयोग्यःसपि
डादिस्तस्यरिक्थिनोदाप्याः तथाचनारदेन ब्राह्मणस्यतुयद्देयंसान्वयस्यचनास्तिचेत् निर्वपेत्तत्सकुल्येषुतदभावेस्वबंधुष्वित्यभि
हितम् यदातुनसकुल्याःस्युर्नचसंबंधिबांधवाः तदादद्याद्द्विजेभ्यस्तुतेष्वसत्स्वप्सुनिक्षिपेदिति ५२ अधुनापुरुषविशेषेऋणग्रह
णंप्रतिषेधन्प्रसंगादन्यदपिप्रतिषेधति प्रतिभुवोभावःप्रातिभाव्यं भ्रातॄणांदंपत्योःपितापुत्रयोश्चाविभक्तेद्रव्येद्रव्यविभागात्प्रा
क्प्रातिभाव्यमृणंसाक्ष्यंचनस्मृतंमन्वादिभिः अपितुप्रतिषिद्धम् साधारणधनत्वात् प्रातिभाव्यसाक्षित्वयोःपक्षेद्रव्यव्ययावसान
त्वात् ऋणस्यचावश्यप्रतिदेयत्वात् एतच्चपरस्परानुमतिव्यतिरेकेण परस्परानुमत्यात्वविभक्तानामपिप्रातिभाव्यादिभवत्येव

विभागादूर्ध्वंपरस्परानुमतिव्यतिरेकेणापिभवतिननुदंपत्योर्विभागात्ताक्प्रातिभाव्यादिप्रतिषेधोनयुज्यते तयोर्विभागाभावेनविशेषणानर्थक्या
त् विभागाभावश्चापस्तंबेनदर्शितः जायापत्योर्नविभागो विद्यतइति सत्यम् श्रौतस्मार्ताग्निसाध्येषुकर्मसुतत्फलेषुचविभागाभावोन
पुनः सर्वकर्मसुद्रव्येषुवा तथाहि जायापत्योर्नविभागोविद्यतेइत्युक्त्वाकिमितिनविद्यतेइत्यपेक्षायांहेतुमुक्तवान् पाणिग्रहणाद्धिसह
त्वंकर्मसुतथापुण्यफलेषुचेति हियस्मात्पाणिग्रहणादारभ्यकर्मसुसहत्वंश्रूयते जायापतीअग्निमादधीयातामिति तस्मादाधानेस
हाधिकारादाधानसिद्धाग्निसाध्येषुकर्मसुसहाधिकारः तथा कर्मस्मार्तंविवाहाग्नावित्यादिस्मरणाद्विवाहसिद्धाग्निसाध्येष्वपिकर्मसु

भ्रातॄणामथदंपत्योःपितुःपुत्रस्यचैवहि प्रातिभाव्यमृणंसाक्ष्यमविभक्तेनतुस्मृतम् ५३

सहाधिकारएव अतश्चोभयविधाग्निनिरपेक्षेषुकर्मसुपूर्तेषुजायापत्योःपृथगेवाधिकारःसंपद्यते तथापुण्यानांफलेषुस्वर्गादिषु
जायापत्योः सहत्वंश्रूयते दिविज्योतिरजरमारभेयातामित्यादि येषुपुण्यकर्मसुसहाधिकारस्तेषांफलेषुसहत्वमितिबोद्
व्यम् नपुनःपूर्तानांभर्त्रनुज्ञयानुष्ठितानांफलेष्वपि ननुद्रव्यस्वामित्वेपिसहत्वमुक्तम् द्रव्यपरिग्रहेषुचनहिभर्तुर्विप्रवासेनैमित्तिकेदा
नंस्तेयमुपदिशंतीति सत्यम् द्रव्यस्वामित्वंपत्न्यादर्शितमनेननपुनर्विभागाभावः यस्माद्द्रव्यपरिग्रहेषुचेत्युक्त्वातत्रकारणमुक्तम् भर्तु ३१
र्विप्रवासेनैमित्तिके ऽवश्यकर्तव्येदानेतिथिभोजनभिक्षाप्रदानादौहियस्मान्नस्तेयमुपदिशंतिमन्वादयःतस्माद्भार्यायामपिद्रव्यस्वा-
मित्वमस्ति अन्यथास्तेयंस्यादिति तस्माद्भर्तुरिच्छयाभार्यायामपिद्रव्यविभागोभवत्येव नस्वेच्छया यथावक्ष्यति यदिकुर्यात्समानंशान्पत्न्यः
कार्याःसमांशकाइति ५३ अधुनाप्रातिभाव्यंनिरूपयितुमाह प्रातिभाव्यंनामविश्वासार्थंपुरुषांतरेणसहसमयः तच्चविषयभेदात्त्रिधाभि
द्यते यथादर्शनेदर्शनापेक्षायांएनंदर्शयिष्यामीति प्रत्ययेविश्वासे मत्प्रत्ययेनास्यधनंप्रयच्छ नायंत्वांवंचयिष्यते यतोमुकस्यपुत्रोयंउर्वरा
प्रायभूरस्यग्रामवरोस्तीति दानेयद्ययंनददातितदानीमहमेवदास्यामीति प्रातिभाव्यंविधीयतइतिप्रत्येकंसंबंधः आद्यौतुदर्शनप्रत्यय-
प्रतिभुवौ वितथे अन्यथाभावे अदर्शने विश्वासव्यभिचारेचदाप्यौराज्ञा प्रस्तुतंधनमुत्तमर्णस्य इतरस्यदानप्रतिभुवः सुताअपिदा

दर्शनेप्रत्ययेदानेप्रातिभाव्यंविधीयते आद्यौतुवितथेदाप्यावितरस्यसुताअपि ५४
दर्शनेप्रतिभूर्यत्रमृतःप्रात्ययिकोपिवा नतत्पुत्राऋणंदद्युर्दद्युर्दानाययःस्थितः ५५

प्याः वितथइत्येव शाठ्येननिर्धनत्वेनवाधमर्णेप्रतिकुर्वति इतरस्यसुताअपीति वदतापूर्वयोःसुतानदाप्याइत्युक्तम् सुताइतिवद-
तानपौत्रादाप्याइतिदर्शितम् ५४ एतदेवस्पष्टीकर्तुमाह यदादर्शनप्रतिभूःप्रात्ययिकोपिवाप्रतिभूर्दिवंगतः तदानयोःपुत्राःप्रा
तिभाव्यायातंपैतृकमृणंनदद्युः यस्तुदानायस्थितःप्रतिभूर्दिवंगतस्तस्यपुत्रादद्युर्नपौत्राः तेचमूल्यमेवदद्युर्नवृद्धिम् ऋणंपैतामहंपौ
त्राःप्रातिभाव्यागतंसुतः समंदद्यात्तत्सुतौतुनदाप्याविति निश्चयइतिव्यासवचनात् प्रातिभाव्यव्यतिरिक्तंपैतामहमृणं पौत्रःसमंया

वद्गृहीतंतावदेवदद्यान्नवृद्धिं तथास्रुतोपिप्रातिभाव्यागतंपित्र्यमृणंसममेवदद्यात् तयोःपुत्रपौत्रयोःसुतौपौत्रप्रपौत्रावपिप्रातिभाव्या
यातंचऋणं यथाक्रममगृहीतधनौनदाप्याविति यदपिस्मरणं खादकोवित्तहीनःस्याल्लग्नकोवित्तवान्यदि मूलंतस्यभवेद्देयंनवृद्धिं
दातुमर्हतीति तदपिलग्नकःप्रतिभूः खादकोधमर्णः लग्नकोयदिवित्तवान्मृतस्तस्यपुत्रेणमूल्यमेवदातव्यं नवृद्धिरितिव्याख्येयं यत्र
दर्शनप्रतिभूः प्रत्ययप्रतिभूर्वाबंधकंपर्याप्तंगृहीत्वाप्रतिभूर्जातस्तत्र तत्पुत्राअपितस्मादेवबंधकात्प्रातिभाव्यायातमृणंदद्युरेव यथा
हकात्यायनः गृहीत्वाबंधकंयत्रदर्शनेस्यस्थितोभवेत् विनापित्राधनात्तस्माद्दाप्यःस्यात्तदृणंसुतइति दर्शनग्रहणंप्रत्ययस्योपलक्षणं वि

बहवःस्युर्यदिस्वांशैर्दद्युःप्रतिभुवोधनम् एकच्छायाश्रितेष्वेषुधनिकस्ययथारुचि ५६

नापित्रापितरिप्रेतेदूरदेशंगतेवेति ५५ यस्मिन्ननेकप्रतिभूसंभवस्तत्रकथंदातव्यमित्याह यद्येकस्मिन्प्रयोगे द्वौबहवोवाप्रतिभुवः
स्युस्तदर्णंसंविभज्यस्वांशेनदद्युः एकच्छायाश्रितेषुप्रतिभूषु एकस्याधमर्णस्यछायासादृश्यंतामाश्रिताःएकच्छायाश्रिताः अधमर्णोय
थाकृत्स्नद्रव्यदानायस्थितस्तथादानेप्रतिभुवोपिप्रत्येकंकृत्स्नदानायस्थिताः एवंदर्शनेप्रत्ययेच तथैकच्छायाश्रितेषुप्रतिभूषुसत्सुध
निकस्योत्तमर्णस्ययथारुचियथाकामं अतश्चधनिकोवित्ताद्यपेक्षयायस्वार्थंयःप्रार्थयते सएवकृत्स्नंदद्यान्नांशतः तेष्वेकच्छायाश्रिते ३२
षुयदिकश्चिद्देशांतरंगतस्तत्पुत्रश्चसंनिहितस्तदाधनिकेच्छयासर्वंदाप्यः मृतेतुकस्मिंश्चित्तत्सुतःस्वपित्रंशमवृद्धिकंदाप्यःयथा

हकात्यायनः एकच्छायांप्रविष्टानांदाप्योयस्तत्रदृश्यते प्रोषितेतत्सुतःसर्वंपित्रंशंतुमृतेसममिति ५६ प्रातिभाव्येऋणदानविधिमुक्त्वाप्रतिभूदत्तस्यप्रतिक्रिय
विधिमाह यद्द्रव्यंप्रतिभूस्तत्पुत्रोवाधनिकेनोपपीडितःप्रकाशंसर्वजनसमक्षंराज्ञाधनिनांदापितोनपुनर्द्वैगुण्यलोभेनस्वयमुपेत्यदत्तं यथाहनारदः पंचार्थंप्रति
भूर्दद्याद्धनिकेनोपपीडितः ऋणिकस्तंप्रतिभुवेद्विगुणंप्रतिदापयेदिति ऋणिकैरधमर्णैस्तस्यप्रतिभुवस्तद्द्विगुणंप्रतिदातव्यंस्यात् तच्चकालविशेषमनपे-
क्ष्यसद्यएवद्विगुणंदातव्यं वचनारंभसामर्थ्यात् एतच्चहिरण्यविषयं ननुइदंप्रतिभूवचनंद्वैगुण्यमात्रंप्रतिपादयति तच्चपूर्वोक्तकालकलाक्रमाबाधेनाप्युपप
द्यते यथाजातेष्टिविधानंशुचित्वाबाधेन अपिचसद्यःसवृद्धिकत्वेपिपक्षेपशुस्त्रीणांसद्यःसंतत्यभावान्मूल्यदानमेवप्राप्नोतीतितदसत् वस्त्रदानहिरण्या

प्रतिभूर्दापितोयत्तुप्रकाशंधनिनांधनम् द्विगुणंप्रतिदातव्यमृणिकैस्तस्यतद्भवेत् ५७ नांचतुस्त्रिद्विगुणापरेस्वनेनैवकालकलाक्रमे
णद्वैगुण्यादिसिद्धेः द्वैगुण्यमात्रविधानइदंवचनमनर्थकंस्यात् पशुस्त्रीणांतुकालक्रमपक्षेपिसंतत्यभावेस्वरूपदानमेव यदाप्रतिभूरपिद्रव्य
दानानंतरं कियतापिकालेनाधमर्णेनसंघटतेतदासंततिरेवसंभवत्येव यद्वापूर्वसिद्धसंतत्यासहपशुस्त्रियोदास्यतीति नकिंचिदेतत् अ
थप्रातिभाव्यंप्रीतिकृतंचप्रतिभुवादत्तंप्रीतिदत्तमेव नचप्रीतिदत्तस्ययाचनात्प्राग्वृद्धिरस्ति यथाह प्रीतिदत्तंतुयत्किंचिद्वर्द्धतेनत्वयाचितम्
याच्यमानमदत्तंचेद्वर्द्धतेपंचकंशतमिति अतश्चास्यप्रीतिदत्तस्यायाचितस्यापिदानदिवसादारभ्ययावद्द्विगुणंकालक्रमेणवृद्धिरित्यनेनवचने
नोच्यतेइतितदप्यसत् अस्यार्थस्यास्माद्वचनादप्रतीतेर्द्विगुणंप्रतिदातव्यमित्येतावदिहप्रतीयते तस्मात्कालक्रममनपेक्ष्यैवद्विगुणंप्रतिदात-
व्यं वचनारंभसामर्थ्यादितिसुष्ठूक्तं ५७

प्रतिभूदत्तस्यसर्वत्रद्वैगुण्येप्राप्तेपवादमाह हिरण्यद्वैगुण्यवत्कालानादरेणैववस्त्रपश्वादयःप्रतिपादितवृद्ध्यादाप्याः श्लोकस्तुव्याख्यातएव यस्यद्रव्यस्ययावतीवृद्धिःपराकाष्ठोक्ता तद्द्रव्यंप्रतिभूदत्तंखादकेनतयावृद्ध्यासहकालविशेषमनपेक्ष्य सद्योदातव्यमितितात्पर्यार्थः यदातुदर्शन प्रतिभूः संप्रतिपन्नेकालेऽधमर्णंदर्शयितुमसमर्थः तदातदन्वेषणायतस्यपक्षत्रयंदातव्यम् तत्रयदितंदर्शयतितदामोक्तव्योऽन्यथाप्रस्तुतंध- नंदाप्यः नष्टस्यान्वेषणार्थंतुदाप्यंपक्षत्रयंपरम् यद्यसौदर्शयेत्तत्रमोक्तव्यःप्रतिभूर्भवेत् कालेव्यतीतेप्रतिभूर्यदितंनैवदर्शयेत् निबंधं दापयेत्तत्तुप्रेतेचैषविधिःस्मृतइतिकात्यायनवचनात् लग्नकविशेषनिषेधश्चतेनैवोक्तः नस्वामीनचवैशत्रुःस्वामिनाधिकृतस्तथा निरुद्धो

संततिःस्त्रीपशूनांचैवधान्यंत्रिगुणमेवच वस्त्रंचतुर्गुणंप्रोक्तंरसश्चाष्टगुणस्तथा ५८

दंडितश्चैवसंदिग्धश्चैवनकश्चित् नैवरिक्थीनमित्रंचनचैवात्यंतवासिनः राजकार्यनियुक्तश्चयेचप्रव्रजितानराः नाशक्तोधनिनेदातुंदंडंराज्ञे चतत्समम् नाविज्ञातोगृहीतव्यःप्रतिभूस्त्वक्रियांप्रतीति संदिग्धोऽभिशस्तः अत्यंतवासिनोनैष्ठिकब्रह्मचारिणः इतिप्रतिभूविधिः धनप्रयोगेविश्वासहेतूद्वौ प्रतिभूराधिश्च यथाहनारदः विस्रंभहेतूद्वावत्रप्रतिभूराधिरेवचेति तत्रप्रतिभूर्निरूपितः इदानीमाधिर्नि- रूप्यते आधिर्नामगृहीतस्यद्रव्यस्योपरिविश्वासार्थमधमर्णेनोत्तमर्णेऽधिक्रियते आधीयतइत्याधिः सचद्विविधः कृतकालोऽकृतका- लश्च पुनश्चैकैकशोद्विविधः गोप्योभोग्यश्च यथाहनारदः अधिक्रियतइत्याधिःसविज्ञेयोद्विलक्षणः कृतकालोपनेयश्चयावद्देयो- ३३

द्यतस्तथा सपुनर्द्विविधःप्रोक्तोगोप्योभोग्यस्तथैवचेति कृतेकालेआधानकालएवामुष्मिन्कालेदीपोत्सवादौमयायमाधिर्मोक्तव्योऽन्यथातवैवाधि- र्भविष्यतीति एवंनिरूपितेकालेउपनेयःआत्मसमीपंनेतव्योमोचनीयइत्यर्थः देयंदानं देयमनतिक्रम्ययावद्देयमुद्यतोनियतःस्थापितइत्यर्थः यावद्देयमुद्यतोयावद्देयोद्यतः गृहीतधनप्रत्यर्पणावधिरनिरूपितकालइत्यर्थः गोप्योरक्षणीयः ५८ एवंचतुर्विधस्याधेर्विशेषमाह प्रयुक्ते धनेस्वकृतयावृद्ध्याकालक्रमेणद्विगुणीभूतेयद्याधिरधमर्णेनद्रव्यदानेननमोक्ष्यते तदानश्यति अधमर्णस्यधनप्रयोक्तुःस्वंभवति कालकृ- तःकृतकालः आहिताग्न्यादिषुपाठात्कालशब्दस्यपूर्वनिपातः सतुकालेनिरूपितेप्राप्तेनश्येत् द्वैगुण्यात्प्रागूर्ध्वंवा फलभोग्यःफलंभोग्यंय

आधिःप्रणश्येद्द्विगुणेधनेयदिनमोक्ष्यते कालेकालकृतोनश्येत्फलभोग्योननश्यति ५९

स्यासौफलभोग्यः क्षेत्रारामादिःसकदाचिदपिननश्यति कृतकालस्यगोप्यस्यभोग्यस्यचतत्कालातिक्रमेनाशउक्तः कालेकालकृतोनश्येदि- ति अकृतकालस्यभोग्यस्यनाशाभावउक्तः फलभोग्योननश्यतीति पारिशेष्यादाधिःप्रणश्येदित्येतदकृतकालगोप्याधिविषयमवतिष्ठते द्वैगुण्यातिक्रमेणनिरूपितकालातिक्रमेणचविनाशेचतुर्दशदिवसप्रतीक्षणंकर्तव्यंबृहस्पतिवचनात् हिरण्येद्विगुणीभूतेपूर्णेकालेकृता- वधेः बंधकस्यधनीस्वामीद्विःसप्ताहंप्रतीक्ष्यच तदंतराधनंदत्वाऋणीबंधमवाप्नुयादिति नन्वाधिःप्रणश्येदित्यनुपपन्नं अधमर्ण- स्यस्वत्वनिवृत्तिहेतोर्दानविक्रयादेरभावात् धनिनश्चस्वत्वहेतोःप्रतिग्रहक्रयादेरभावात् मनुवचनविरोधाच्च नचाधेःकालसंरोधा

न्निसर्गोस्तिनविक्रयइति कालेनसंरोधःकालसंरोधश्चिरकालमवस्थानं तस्मात्कालसंरोधाच्चिरकालावस्थानादाधेर्ननिसर्गोस्ति ना
न्यत्राधिकरणमस्ति नचविक्रयः एवमाधीकरणविक्रयप्रतिषेधाद्धनिनःस्वत्वाभावोवगम्यतइति उच्यते आधीकरणमेवलोकेसो
पाधिकस्वत्वनिवृत्तिहेतुः आधिस्वीकारश्च सोपाधिकस्वत्वापत्तिहेतुःप्रसिद्धः तत्रधनद्वैगुण्येनिरूपितकालेप्राप्तेचद्रव्यदानस्यात्यंत
निवृत्तेरनेन वचनेनाधमर्णस्यात्यंतिकी स्वत्वनिवृत्तिः उत्तमर्णस्यचात्यंतिकंस्वत्वंभवति नचमनुवचनविरोधः यतोनत्वेवाधौसोपका
रकौसिदींवृद्धिमाप्नुयादिति भोग्याधिंप्रस्तुत्येदमुच्यते नचाधेःकालसंरोधान्निसर्गोस्तिनविक्रयइति भोग्यस्याधेश्चिरकालावस्था

गोप्याधिभोगेनोवृद्धिःसोपकारेथहापिते नष्टोदेयोविनष्टश्चदैवराजकृताहते ६०

नेप्याधीकरणविक्रयनिषेधेनधनिनःस्वत्वंनभवति इहाप्युक्तं फलभोग्योननश्यतीति गोप्याधौतुपृथगारब्धंमनुना नभोक्तव्यो
बलादाधिर्भुंजानोवृद्धिमुत्सृजेदिति इहापिवक्ष्यते गोप्याधिभोगेनोवृद्धिरिति आधिःप्रणश्येद्द्विगुणइतितुगोप्याधिंप्रत्युच्यतेइति
सर्वमविरुद्धम् ५९ किंच गोप्याधेस्ताम्रकटाहादेरुपभोगेनवृद्धिर्भवति अल्पेप्युपभोगेमहत्यपिवृद्धिर्हातव्या समयातिक्र
मात् तथासोपकारे उपकारेउपकारकारिणिबलीवर्दताम्रकटाहादौ भोग्याधौ सवृद्धिकेहापिते हानिंव्यवहाराक्षमत्वंगमितेनो ३४.
वृद्धिरितिसंबंधः नष्टोविकृतिंगतःताम्रकटाहादिश्छिद्रभेदनादिनापूर्ववत्कृत्वादेयः तत्रगोप्याधिर्नष्टश्चेत्पूर्ववत्कृत्वादेयःउपभु

क्तोपिचेद्वृद्धिरपिहातव्या भोग्याधिर्यदिनष्टस्तदापूर्ववत्कृत्वादेयः वृद्धिसद्भावेवृद्धिर्हातव्या विनष्टःआत्यंतिकंनाशंप्राप्तः सोपिदेयोमू
ल्यादिद्वारेणतद्दानेसवृद्धिकंमूल्यंलभते यदानददातितदामूलनाशः विनष्टेमूलनाशःस्याद्दैवराजकृताद्दृतइतिनारदवचनात् दैवरा
जकृताद्दृते दैवमग्न्युदकदेशोपप्लवादि दैवकृताद्विनाशाद्विना तथा स्वापराधरहिताद्राजकृतात् दैवराजकृतेतुविनाशेसवृद्धिकंमूलंदात
व्यम् अधमर्णेनाध्यंतरंवा यथाह स्रोतसापहृतेक्षेत्रेराज्ञाचैवापहारिते आधिरन्योथकर्तव्योदेयंवाधनिनेधनमिति तत्रस्रोतसापहृते
इतिदैवकृतोपलक्षणम् ६० अपिच आधेर्भोग्यस्यगोप्यस्यचस्वीकरणादुपभोगादाधिग्रहणसिद्धिर्नसाक्षिलेख्यमात्रेण नाप्युद्देशमा-

आधेःस्वीकरणात्सिद्धीरक्ष्यमाणोप्यसारताम् यातश्चेदन्यआधेयोधनभाग्वाधनीभवेत् ६१

त्रेण यथाहनारदः आधिस्तुद्विविधःप्रोक्तोजंगमःस्थावरस्तथा सिद्धिरस्योभयस्यापिभोगोयद्यस्तिनान्यथेति अस्यचफ
लं आधौप्रतिग्रहेक्रीतेपूर्वातुबलवत्तरेति स्वीकारांताक्रियापूर्वाबलवती स्वीकाररहितातुपूर्वापिनबलवतीति सचाधिःप्रयत्नेन
रक्ष्यमाणोऽपि कालवशेनयद्यसारतामधिकृतएव सवृद्धिकमूल्यद्रव्यापर्याप्ततांगतस्तदाधिरन्यः कर्तव्योधनिने धनंवादेयम् र-
क्ष्यमाणोप्यसारतामितिवदताधिःप्रयत्नेन रक्षणीयोधनिनेतिज्ञापितम् ६१ ५ ५ ५

आधिः प्रणश्येद्द्विगुणे इत्यस्यापवादमाह चरित्रं शोधनाचरितं चरित्रेण बंधकं तेन यद्द्रव्यमात्मसात्कृतं पराधीनं वा कृतं एतदुक्तं भवति धनिनः स्वच्छाशयत्वेन बहुमूल्यमपि द्रव्यमाधीकृत्याधमर्णेनाल्पमेव द्रव्यमात्मसात्कृतं यदि वाधमर्णस्य स्वच्छाशयत्वेनाल्पमूल्यमाधिं गृहीत्वा बहुद्रव्यमेवाधनिनाधमर्णाधीनं कृतमिति तद्धनं सवृद्धिकं स वृद्ध्या सह दापयेत् अयमाशयः एवंरूपं बंधकं द्विगुणीभूतेपि द्रव्ये न नश्यति किंतु द्रव्यमेव द्विगुणं दातव्यमिति तथा सत्यंकारकृतम् करणं कारो भावे घञ् सत्यस्य कारः सत्यंकारः कारे सत्यागदस्येति मुम् सत्यंकारेण कृतं सत्यंकारकृतम् अयमभिसंधिः यदा बंधकार्पणसमय एवेत्थं परिभाषितं द्विगुणीभूतेपि द्रव्ये द्रव्यमेव दातव्यं ना

चरित्रबंधककृतं सवृद्ध्या दापयेद्धनम् सत्यंकारकृतं द्रव्यं द्विगुणं प्रतिदापयेत् ६२

धिनाश इति तदा तद्द्विगुणं दापयेदिति अन्योर्थः चरित्रमेव बंधकं चरित्रबंधकं चरित्रशब्देन गंगास्नानाग्निहोत्रादिजनितं पूर्वमुच्यते य त्र तदेवाधीकृत्य यद्द्रव्यमात्मसात्कृतं तदा तत्र तदेव द्विगुणीभूतं दातव्यं नाधिनाश इति आधिप्रसंगादन्यदुच्यते सत्यंकारकृतमिति क्रय विक्रयादिव्यवस्थानिर्वाहाय यदंगुलीयकादि परहस्ते कृतं तद्व्यवस्थातिक्रमे द्विगुणं दातव्यम् तत्रापि येनांगुलीयकाद्यर्पितं स एव चेद्व्य ३५
वस्थातिवर्ती तेन तदेव दातव्यम् इतरश्चेद्व्यवस्थातिवर्ती तदा तदेवांगुलीयकादि द्विगुणं प्रतिदापयेदिति ६२ ५

किंच धनदानेनाधिमोक्षणायोपस्थितस्याधिर्मोक्तव्यो धनिना न वृद्धिलोभेन स्थापितव्यः अन्यथा अमोक्षणे स्तेनः चौरवद्दंड्यो भवति असन्निहिते पुनः प्रयोक्तरि कुले तदाप्तहस्ते सवृद्धिकं धनं निधायाधमर्णकः स्वीयं बंधकं गृह्णीयात् ६३ अथ प्रयोक्ताप्य सन्निहितस्तदाप्ताश्च धनस्य गृहीतारो न संति यदि वा संनिहिते प्रयोक्तर्याधिविक्रयेण धनं दित्साधमर्णस्य तत्र किं कर्तव्यमित्यपेक्षित आह तस्मिन्काले यत्तस्याधेर्मूल्यं तत्परिकल्प्य तत्रैव धनिनि तथाधिं वृद्धिरहितं स्थापयेत् ततन ऊर्ध्वं विवर्द्धते यावद्धनी धनं गृहीत्वा

उपस्थितस्य मोक्तव्य आधिः स्तेनोऽन्यथा भवेत् प्रयोजकेऽसति धनं कुलेऽन्यस्याधिमाप्नुयात्
६३ तत्कालकृतमूल्यो वा तत्र तिष्ठेदवृद्धिकः विनाधारणिकाद्वापि विक्रीणीत ससाक्षिकं ६४

तमाधिं मुंचति यावद्वा तन्मूल्यद्रव्यमृणे प्रवेशयति यदा तु द्विगुणीभूतेपि धने द्विगुणं धनमेव गृहीतव्यम् नत्वाधिनाश इति विचारितं मृणग्रहणकाल एव तदा द्विगुणीभूते द्रव्ये असन्निहिते चाधमर्णे धनिना किं कर्तव्यमित्यत आह धारणिकादधमर्णाद्विना अधमर्णे असन्निहिते साक्षिभिस्तदाप्तैश्च सह तमाधिं विक्रीय धनं गृह्णीयाद्धनी वाशब्दो व्यवस्थितविकल्पार्थः यदर्णग्रहणकाले द्विगुणीभूते पि धने धनमेव गृहीतव्यम् नाधिनाश इति न विचारितम् तदा आधिः प्रणश्येद्द्विगुण इत्याधिनाशः विचारिते त्वयं पक्ष इति ६४

भोग्याधौविशेषमाह यदाप्रयुक्तंधनंस्वकृतयावृद्ध्याद्विगुणीभूतंतदाधौकृतेतदुत्पन्नेद्रव्येद्विगुणेधनिनःप्रविष्टेधनिनाधिर्मोक्तव्यः यदिचादा
वेवाधौदत्तेद्विगुणीभूतेद्रव्येत्वयाधिर्मोक्तव्यइतिपरिभाषयाकारणांतरेणवाभोगाभावेनयदाद्विगुणीभूतमृणंतदाधौभोगार्थंधनिनिप्रविष्टेतदु
त्पन्नेद्रव्येद्विगुणेसत्याधिर्मोक्तव्यः अधिकभोगेतदपिदेयम् सर्वथासवृद्धिकमूल्यापाकरणार्थाध्युपभोगविषयमिदंवचनम् तमेनंसत्या-
धिमाचक्षतेलौकिकाः यत्रतुवृद्ध्यर्थएवाध्युपभोगइतिपरिभाषा तत्रद्वैगुण्यातिक्रमेपियावन्मूल्यदानं यावत्तुभुक्तमेवाधिं एतदेवस्पष्टी

यदातुद्विगुणीभूतमृणमाधौतदाखलु मोच्यआधिस्तदुत्पन्नेप्रविष्टेद्विगुणेधने ६५

कृतंबृहस्पतिना ऋणीबंधमवाप्नुयात् फलभोग्यंपूर्णकालंदत्वाद्रव्यंतुसामकम् यदिप्रकर्षितंतत्स्यात्तदानधनभाग्धनी ऋणापाकरणाद्बं
धंपरस्परमतंविनेति अस्यार्थः फलंभोग्यंयस्यासौफलभोग्यःबंधआधिःसचद्विविधः सवृद्धिमूल्यापाकरणार्थोवृद्धिमात्रार्थोपाकरणार्थश्च
तत्र सवृद्धिमूल्यापाकरणार्थंबंधंपूर्णकालंपूर्णःकालोयस्यासौपूर्णकालस्तमाप्नुयादृणी यदासवृद्धिकंमूल्यंफलद्वारेणधनिनःप्रविष्टंतदाबंधमा ३६
प्नुयादित्यर्थः वृद्धिमात्रापाकरणार्थंतु बंधकंसामकंदत्वाप्नुयादृणी समंमूल्यंसममेवसामकम् ६५ ७ ८

अस्यापवादमाह तद्बंधकंप्रकर्षितमतिशयितंवृद्धेरप्यधिकफलंयदिस्यात्तदानधनभाग्धनी सामकंनलभतेधनी मूल्यमदत्वैवर्णीबंधमाप्नुयादिति
यावत् अथतत्प्रकर्षितंतद्बंधनंवृद्धमप्यपर्याप्तम् तदासामकंदत्वापिबंधंनलभेताधमर्णः वृद्धिविशेषमपिदत्वैवलभेतेत्यर्थः पुनरुभयत्रापवाद
माह उत्तमाधमर्णयोःपरस्परानुमत्यभावेयदिप्रकर्षितमित्याद्युक्तं परस्परानुमतौतूत्कृष्टमपिबंधकंयावन्मूल्यदानमुपभुंक्तेधनीनिकृष्टम-
पिमूल्यमात्रदानेनाधमर्णोलभतइति इतिऋणादानप्रकरणम् ६६ उपनिधिंप्रत्याह निक्षेप्यद्रव्यस्याधारभूतंद्रव्यांतरंवासनंकरं
डादितत्स्थंवासनस्थंयद्द्रव्यंरूपसंख्यादिविशेषमनाख्याय अकथयित्वामुद्रितमन्यहस्तेरक्षणार्थंविस्रंभादर्प्यतेस्थाप्यते तद्द्रव्यमौपनिधिक-

यदिप्रकर्षितंतत्स्यात्परस्परमतंविना ६६ वासनस्थमनाख्यायहस्तेन्यस्ययदर्प्यते द्रव्यंतदौपनिधिकंप्रतिदेयंतथैवतु ६७
नदाप्योपहृतंतंतुराजदैविकतस्करैः भ्रेषश्चेन्मार्गितेदत्तेदाप्योदंडंचतत्समम् ६८ मुच्यतेयथाहनारदः असंख्यातम
विज्ञातंसमुद्रंयन्निधीयते तज्जानीयादुपनिधिंनिक्षेपगणितंविदुरिति प्रतिदेयंतथैवतु यस्मिन्स्थापितंतेनयथैवपूर्वंसमुद्रादि
चिन्हितमर्पितंतथैवस्थापकायप्रतिदेयंप्रत्यर्पणीयम् ६७ प्रतिदेयमित्यस्यापवादमाह तमुपनिधिंराज्ञादैवेनोदकादिनातस्करै-
र्वापहृतंनष्टंनदाप्योसौ यस्मिन्नुपहितंधानिनएवतत्द्रव्यंनष्टंयदिजिह्मकारितंनभवति यथाहनारदः ग्रहीतुःसहियोर्थेननष्टो
नष्टःसदायिनः दैवराजकृतेतद्वद्वत्तज्जिह्मकारितमिति अस्यापवादःस्वामिनामार्गितेयाचितेयदिनददाति तदुत्तरकालंयद्यपिरा-

जादिभिर्विशेषोनाशः संजातस्तथापित द्रव्यं मूल्यकल्पनयाधनिने ग्रहीतादाप्योराज्ञेचतत्समंदंडम् ६८ भोक्तारंमत्याह यः स्वेच्छयाग्राह्य
ननुज्ञयोपहितंद्रव्यमाजीवत्युपभुंक्ते व्यवहरतिवा प्रयोगादिनालाभार्थमसावुपभोगानुसारेणलाभानुसारेणच दंड्यस्तंचोपधिंसोद
यमुपभोगेसवृद्धिकेव्यवहारेसलाभंधनिनेदाप्यः वृद्धिप्रमाणंचकात्यायनेनोक्तम् निक्षेपंवृद्धिशेषंचक्रयंविक्रयमेवच याच्यमानंन
चेद्दद्यात् वर्द्धतेपंचकंशतमिति एतच्चभक्षितेद्रष्टव्यम् उपेक्षाज्ञाननष्टेतु तेनैवविशेषोदर्शितः भक्षितंसोदयंदाप्यः समंदाप्यउपेक्षितं
किंचिन्न्यूनंप्रदाप्यःस्याद्द्रव्यमज्ञाननाशितमिति किंचिन्न्यूनमितिचतुर्थांशहीनं उपनिधेर्धर्मान् याचितादिष्वतिदिशति विवाहाद्यु

आजीवन्स्वेच्छयादंड्योदाप्यस्तंचापिसोदयम् याचितान्वाहितन्यासनिक्षेपादिष्वयंविधिः ६९

त्सवेषु वस्त्रालंकारादियाचित्वानीतं यदेकस्यहस्तेनिहितंद्रव्यं तेनाप्यनुपश्चादन्यहस्तेस्वामिनेदेहीतिनिहितंतदन्वाहितं न्यासोनामगृह
स्वामिनोदर्शयित्वातत्परोक्षमेवगृहजनहस्तेप्रक्षेपोगृहस्वामिनेसमर्पणीयमिति समक्षंतुसमर्पणंनिक्षेपः आदिशब्देनसुवर्णकारा
दिहस्तेकटकादिनिर्माणायन्यस्तस्यसुवर्णादेः प्रतिन्यासस्यच परस्परप्रयोजनापेक्षया त्वयेदंमदीयंरक्षणीयं मयेदंत्वदीयंरक्ष्यतइति
न्यस्तस्यग्रहणम् यथाहनारदः एषएवविधिर्दृष्टोयाचितान्वाहितादिषु शिल्पिषूपनिधौन्यासेप्रतिन्यासेतथैवचेति एतेषुयाचिता ३७
दिष्वयंविधिः उपनिधेयःप्रतिदानादिविधिः सएववेदितव्यः इतिनिक्षेपप्रकरणम् प्रमाणंलिखितंभुक्तिः साक्षिणश्चेतिकीर्तित

मित्युक्तं तत्रभुक्तिर्निरूपिता सांप्रतंसाक्षिस्वरूपंनिरूप्यते साक्षीचसाक्षाद्दर्शनाच्छ्रवणाच्चभवति यथाहमनुः समक्षदर्शना
त्साक्ष्यंश्रवणाच्चैवसिध्यतीति सचद्विविधः कृतोकृतश्चेति साक्षित्वेननिरूपितःकृतः तत्रकृतःपंचविधोकृतश्चषड्विधइत्येकादशवि
धः यथाहनारदः एकादशविधःसाक्षीशास्त्रेदृष्टोमनीषिभिः कृतःपंचविधोज्ञेयःषड्विधोकृतउच्यतइति तेषांचभेदस्तेनैवदर्शि
तः लिखितःस्मारितश्चैवयदृच्छाभिज्ञएवच गूढश्चोत्तरसाक्षीचसाक्षीपंचविधःस्मृतइति लिखितादीनांचस्वरूपंकात्यायनेनोक्तं
अर्थिनास्वयमानीतोयोलेख्येसंनिवेश्यते ससाक्षीलिखितोनामस्मारितःपत्रकादृतइति स्मारितःपत्रकादृतइत्यस्यविवरणंतेनैवकृतम् यस्तुका
र्यप्रसिद्ध्यर्थंदृष्ट्वाकार्यंपुनःपुनः स्मार्यतेह्यर्थिनासाक्षीसस्मारितइहोच्यतइति यस्तुयदृच्छयागतःसाक्षीक्रियतेसयदृच्छाभिज्ञः अनयोः
पत्रारूढत्वेपिभेदस्तेनैवदर्शितः प्रयोजनार्थमानीतःप्रसंगादागतश्चयः द्वौसाक्षिणौत्वलिखितौपूर्वपक्षस्यसाधकाविति तथा अर्थिना
स्वार्थसिद्ध्यर्थंप्रत्यर्थिवचनंस्फुटम् यःश्राव्यतेस्थितोगूढोगूढसाक्षीसउच्यतेइति तथा साक्षिणामपियःसाक्ष्यमुपर्युपरिभाषते श्रवणा
च्छ्रावणाद्वापिससाक्ष्युत्तरसंज्ञितइति षड्विधस्याप्यकृतस्यभेदोनारदेनदर्शितः ग्रामश्चप्राड्विवाकश्चराजाचव्यवहारिणाम् कार्येष्व
धिकृतोयःस्यादर्थिनाप्रहितश्चयः कुल्याःकुलविवादेषुविज्ञेयास्तेपिसाक्षिणइति प्राड्विवाकग्रहणंलेखकसभ्योपलक्षणार्थं लेख
कःप्राड्विवाकश्चसभ्याश्चैवानुपूर्वशः नृपेपश्यतितत्कार्यंसाक्षिणःसमुदाहृताइति ६९ तेपिसाक्षिणःकीदृशाःकियंतश्चभवंतीत्यत
आह तपस्विनस्तपःशीलाः दानशीलादाननिरताः कुलीनामहाकुलप्रसूताः सत्यवादिनः सत्यवादनशीलाः धर्मप्रधानानार्थकाम

प्रधानाः ऋजवोऽकुटिलाः पुत्रवंतोविद्यमानपुत्राः धनान्विताबहुसुवर्णादिधनयुक्ताः श्रौतस्मार्तक्रियापराः नित्यनैमित्तिकानुष्ठानरताः एवंभूताःपुरुषाः त्र्यवराः साक्षिणोभवंति त्रयः अवराः अन्यूनायेषांतेत्र्यवराः त्रिभ्योर्वाङ्नयेभवंति परतस्तुयथाकामंभवंतीत्यर्थः जातिमनतिक्रम्ययथाजाति जातयोमूर्द्धावसिक्तादयः अनुलोमजाःप्रतिलोमजाश्च. तत्रमूर्द्धावसिक्तानांमूर्द्धावसिक्ताःसाक्षिणोभवंति एवमंबष्ठादिष्वपिद्रष्टव्यम् वर्णमनतिक्रम्ययथावर्णं वर्णाब्राह्मणादयः तत्रब्राह्मणानांब्राह्मणाएवोक्तलक्षणाउक्तसंख्याकाः साक्षिणोभवंति एवं क्षत्रियादिष्वपिद्रष्टव्यम् यथास्त्रीणांसाक्ष्यंस्त्रियएवकुर्युः यथाहमनुः स्त्रीणांसाक्ष्यंस्त्रियःकुर्युरिति सजातिसवर्णासंभवेसर्वेमूर्द्धाव

तपस्विनोदानशीलाःकुलीनाःसत्यवादिनः धर्मप्रधानाऋजवःपुत्रवंतोधनान्विताः ७०
त्र्यवराः साक्षिणोज्ञेयाःश्रौतस्मार्तक्रियापराः यथाजातियथावर्णंसर्वेसर्वेषुवास्मृताः ७१

सिक्तादयोब्राह्मणादयश्चसर्वेषुमूर्द्धावसिक्तादिषुब्राह्मणादिषुचयथासंभवंसाक्षिणोभवंति उक्तलक्षणानांसाक्षिणामसंभवेप्रतिषेधरहितानामन्येषामपिसाक्षित्वप्रतिपादनार्थमसाक्षिणोद्रष्टव्याः तेचपंचविधानारदेनदर्शिताः असाक्ष्यपिहिशास्त्रेषुदृष्टःपंचविधोबुधैः वचनाद्दोषतोभेदात्स्वयमुक्तेर्मृतांतरइति केपुनर्वचनादसाक्षिणइत्यतआह श्रोत्रियास्तापसावृद्धायेचप्रव्रजितादयः असाक्षिणस्तेवचनान्नात्रहेतुरुदाहृतइति तापसावानप्रस्थाः आदिशब्देनपित्राविवदमानादीनांग्रहणम् यथाहशंखः पित्राविवदमानगुरुकुलवासि ३८

परिव्राजकवानप्रस्थानिर्ग्रंथाश्चसाक्षिणइति दोषादसाक्षिणोदर्शिताः स्तेनाःसाहसिकाश्चंडाः कितवावंचकास्तथा असाक्षिणस्तेदुष्टत्वात्तेषुसत्यंनविद्यतइति चंडाः कोपनाः कितवाद्यूतकृतः भेदादसाक्षिणांचस्वरूपंतेनैवदर्शितम् साक्षिणांलिखितानांचनिर्दिष्टानांचवादिना तेषामेकोन्यथावादीभेदात्सर्वेनसाक्षिणइति यथास्वयमुक्तिस्वरूपंचोक्तम् स्वयमुक्तिरनिर्दिष्टःस्वयमेवेत्ययोवदेत् सूचीत्युक्तः सशास्त्रेषुनससाक्षित्वमर्हतीति मृतांतरस्यापिलक्षणमुक्तम् योर्थःश्रावयितव्यःस्यात्तस्मिन्नसतिचार्थिनि क्वतद्वदतुसाक्षित्वमित्यसाक्षीमृतांतरइति येनार्थिनाप्रत्यर्थिनावासाक्षिणांयोर्थःश्रावयितव्योभवेत् यूयमत्रार्थेसाक्षिणइति तस्मिन्नर्थिनिप्रत्यर्थिनिवाअसति

स्त्रीबालवृद्धकितवमत्तोन्मत्ताभिशस्तकाः रंगावतारिपाखंडिकूटकृद्विकलेंद्रियाः ७२
पतितास्यार्थसंबंधिसहायरिपुतस्कराः साहसीदृष्टदोषश्चनिर्धूताद्यास्त्वसाक्षिणः ७३

मृतेर्थेचानिवेदितेसाक्षित्वं कस्मिन्नर्थेकस्यवाकृतेसाक्ष्यंवदलितिमृतांतरः साक्षीनभवति यत्रतुमुमूर्षुणास्वस्थेनवापित्रापुत्रादयःश्राविताअस्मिन्नर्थेमीसाक्षिणइति तत्रमृतांतरोपिसाक्षी यथाहनारदः मृतांतरोर्थिनिप्रेतेमुमूर्षुश्रावितादृते यथा श्रावितोनातुरेणापियस्त्वर्थोधर्मसंहितः मृतेपितत्रसाक्षीस्यात्षट्सुचान्वाहितादिष्विति ७० ७१ तानेतानसाक्षिणोदर्शयति स्त्रीप्रसिद्धा बालोऽप्राप्तव्यवहारः वृद्धोशीतिकावरः वृद्धग्रहणंवचननिषिद्धानामन्येषामपिश्रोत्रियादीनामुपलक्षणार्थं कितवोक्षदेवी मत्तःपानादिना उन्मत्तोग्रहाविष्टः अभिशस्तो

भियुक्तोब्रह्महत्यादिना रंगावतारीचारणः पाखंडिनोनिर्ग्रंथप्रभृतयः कूटकृत्कपटलेख्यादिकारी विकलेंद्रियः श्रोत्रादिरहितः पतितोब्र-ह्महादिः आप्तःसुहृत् अर्थसंबंधीविप्रतिपद्यमानार्थसंबंधी सहायएककार्यः रिपुःशत्रुः तस्करःस्तेनः साहसी स्वबलावष्टंभकारी दृष्ट दोषोदृष्टवितथवचनः निर्धूतोबंधुभिस्त्यक्तः आद्यशब्दादन्येषामपि स्मृत्यंतरोक्तानांदोषादसाक्षिणांभेदादसाक्षिणां स्वयमुक्तेर्मृतांतरस्यचग्रहणम् एतेस्त्रीबालादयःसाक्षिणोनभवंति ७२ ७३ त्र्यवराःसाक्षिणोज्ञेयाइत्यस्यापवादमाह ज्ञानपूर्वकंनित्यनैमित्ति-कधर्मानुष्ठायीधर्मवित् सएकोप्युभयानुमतश्चेत्साक्षीभवति अपिशब्दाद्द्वावपि यद्यपिश्रौतस्मार्तक्रियापराइतित्र्यवराणामपिधर्मवि

उभयानुमतःसाक्षीभवत्येकोपिधर्मवित् सर्वःसाक्षीसंग्रहणेचौर्यपारुष्यसाहसे ७४

त्त्वंसमानं तथापितेषामुभयानुमत्यभावेपिसाक्षित्वंभवत्येकस्य द्वयोर्वोभयानुमत्यैवसाक्षित्वंभवतीत्यर्थवत्त्र्यवरग्रहणम् तपस्विनोदान शीलाइत्यस्यापवादमाह संग्रहणादीनिवक्ष्यमाणलक्षणानि तेषुसर्वेवचननिषिद्धास्तपःप्रभृतिगुणरहिताश्चसाक्षिणोभवंति दोषादसाक्षिणोभेदादसाक्षिणःस्वयमुक्तेश्चात्रापिसाक्षिणोनभवंति सत्याभावादितिहेतोरत्रापिविद्यमानत्वात् मनुष्यमारणंचौर्यंपरदाराभिमर्शनम् पारुष्यमुभयंचेतिसाहसंस्याच्चतुर्विधमितिवचनाद्यद्यपिस्त्रीसंग्रहणचौर्यपारुष्याणांसाहसत्वंतथापितेषांस्वबलावष्टंभेनजनसमक्षं-क्रियमाणानांसाहसत्वम् रहसिक्रियमाणानांतुसंग्रहणादिशब्दवाच्यत्वमितितेषांसाहसात्पृथगुपादानम् ७४ ७ ७ 

साक्षिश्रावणमाह अर्थिप्रत्यर्थिसन्निधौसाक्षिणःसमवेतान् नासमवेताःपृष्टाप्रब्रूयुरितिगौतमवचनात् वक्ष्यमाणंश्रावयेत् तत्रापि कात्यायनेनविशेषोदर्शितः सभांतःसाक्षिणःसर्वानर्थिप्रत्यर्थिसन्निधौ प्राड्विवाकोनियुंजीतविधिनानेनसांत्वयन् देवब्राह्मणसान्निध्येसाक्ष्यंपृच्छेदृतंद्विजान् उदङ्मुखान्प्राङ्मुखान्वापूर्वाह्णेवैशुचिःशुचीन् आहूयसाक्षिणःपृच्छेन्नियम्यशपथैर्भृशम् समस्तान्विदितान्नाचारान्विज्ञातार्थान्पृथक्पृथगिति तथाब्राह्मणादिषुश्रावणेमनुनानियमोदर्शितः सत्येनशापयेद्विप्रंक्षत्रियंवाहनायुधैः गोबीजकां

साक्षिणःश्रावयेद्वादिप्रतिवादिसमीपगान् येपातककृतांलोकामहापातकिनांतथा ७५ अग्निदानांचयेलोकायेचस्त्रीबालघातिनाम्
सतान्सर्वानवाप्नोतियःसाक्ष्यमनृतंवदेत् ७६ सुकृतंयत्त्वयाकिंचिज्जन्मांतरशतैःकृतं तत्सर्वंतस्यजानीहियंपराजयसेमृषा ७७ चनैर्वैश्यंशू

द्रंसर्वैस्तुपातकैरिति ब्राह्मणमन्यथाब्रुवतःसत्यंतेनश्यतीतिशापयेत् क्षत्रियंवाहनायुधानितवविफलानीति गोबीजकांचनादीनितवविफलानिभविष्यंतीतिवैश्यं शूद्रमन्यथाब्रुवतस्तवसर्वाणिपातकानिभविष्यंतीतिशापयेत् अत्रचापवादस्तेनैवदर्शितः गोरक्षकान्वाणिजकांस्तथाकारुकुशीलकान् प्रेष्यान्वार्धुषिकांश्चैवविप्रान्शूद्रवदाचरेदिति विप्रग्रहणंक्षत्रियवैश्ययोरुपलक्षणार्थम् कुशीलकागायकाःप्रतिवादिनासाक्षिदूषणेदत्तेप्रत्यक्षयोग्यदूषणेषुबाल्यादिषुतथैवनिर्णयः अयोग्येषुतुतदूचनाल्लोकतश्चनिर्णयोनसाक्ष्यंतरेणेतिनानवस्था यदिसाक्षिदोषमुद्भाव्यसाधयितुंनशक्नोतिप्रतिवादी तदासौदोषानुसारेणदंड्यः अथसाधयतितदानसाक्षिणःयथाह अभावयन्दमंदाप्योदूषणंसाक्षिणांस्फुटम् भाविते साक्षिणोवर्ज्याः

साक्षिधर्मनिराकृताइति उद्दिष्टेषुचसर्वेषुसाक्षिषु दुष्टेष्वर्थीयदाक्रियांतरनिरपेक्षस्तदापराजितोभवति जितःसविनयंदाप्यःशास्त्रदृष्टेनकर्मणा यदिवादीनिराकांक्षःसाक्षिसत्वेष्ववस्थितइतिस्मरणात् साकांक्षश्चेत्क्रियांतरमवलंबेतेत्यभिप्रायः कथंश्रावयेदित्यत आह.



पातकोपपातकमहापातककारिणामग्निदानांस्त्रीबालघातिनांच येलोकास्तान्सर्वानसावाप्नोति यःसाक्ष्यमनृतंवदति यथाजन्मांतरशतैर्यत्स्कृतंकृतं तत्सर्वंतस्यभवति यस्तेनानृतवदनेनपराजितोभवतीति श्रावयेदितिसंबंधः एतच्चशूद्रविषयंद्रष्टव्यं, शूद्रंसर्वैस्तुपातकैरितिशूद्रेसर्वपातकश्रावणस्यविहितत्वात् गोरक्षकादिद्विजातिविषयंच गोरक्षकान्वाणिजकान्नित्युक्तत्वात् अन्यानेकजन्मार्जितसुकृ-

**अब्रुवन्हिनरःसाक्ष्यमृणंसदशबंधकम् राज्ञासर्वंप्रदाप्यःस्यात्षट्चत्वारिंशकेहनि ७८**

नसंक्रमणस्यमहापातकादिफलप्राप्तेश्चानृतमात्रेणानुपपत्तेः साक्षिसंत्रासार्थमिदमुच्यते यथाहनारदः पुराणैर्धर्मवचनैःसत्यमाहात्म्यकीर्तनैः अनृतस्यापवादैश्चभृशमुत्त्रासयेदिमानिति ७५ ७६ ७७ यदातुश्राविताःसाक्षिणःकथंचिन्नब्रूयुस्तदाकिंकर्तव्यमित्यत-आह यःसाक्ष्यमंगीकृत्यश्रावितःसन्कथंचिन्नवदति सराज्ञासर्वंसवृद्धिकमृणंधनिनेदाप्यः सदशबंधकंदशमांशसहितं दशमांशश्चराज्ञोभवति राज्ञाधमर्णिकोदाप्यःसाधिताद्दशकंशतमित्युक्तत्वात् एतच्चषट्चत्वारिंशकेहनिप्राप्तेवेदितव्यम् ततोर्वाग्वदन्नदाप्यःइदंच ४०
व्याध्याद्युपप्लवरहितस्य यथाहमनुः त्रिपक्षादब्रुवन्साक्ष्यमृणादिषुनरोगदः तदृणंप्राप्नुयात्सर्वं दशबंधंचसर्वशइति अगदइतिराजदैवोपप्लवविरहोपलक्षणम् ७८

---

यस्तुजानन्नपिसाक्ष्यमेवनांगीकरोतिदौरात्म्यात्तंप्रत्याह यःपुनर्नराधमोविप्रतिपन्नमर्थंविशेषतोजानन्नपिसाक्ष्यंनददाति नांगीकरोतिसकूटसाक्षिणांतुल्यःपापैःकृत्वादंडेनच कूटसाक्षिणांचदंडंवक्ष्यति कूटसाक्षिणश्चदंडयित्वापुनर्व्यवहारःनप्रवर्तनीयः कृतेपिकौटसाक्ष्येविदितेनिवर्तनीयः यथाहमनुः यस्मिन्यस्मिन्विवादेतुकौटसाक्ष्यंकृतंभवेत् तत्तत्कार्यंनिवर्तेत कृतंचाप्यकृतंभवेदिति ७९ साक्षिविप्रतिपत्तौकथंनिर्णयइत्यतआह साक्षिणांद्वैधेविप्रतिपत्तौबहूनांवचनंग्राह्यम् समेषुसमसंख्येषुद्वैधेयेगुणिनस्तेषांवचनंप्रमाणं यदापुनर्गुणिनांविप्रतिपत्तिस्तदायेगुणवत्तमाः श्रुताध्ययनतदर्थानुष्ठानधनपुत्रादिगुणसंपन्नास्तेषांवचनंग्राह्यं यत्रतुगुणिनःकतिपयेइतरेबहव

**नददातिहियःसाक्ष्यंजानन्नपिनराधमः सकूटसाक्षिणांपापैस्तुल्योदंडेनचैवहि ७९ द्वैधेबहूनांवचनंसमेषुगुणिनांतथा गुणिद्वैधेतुवचनंग्राह्यंयेगुणवत्तमाः ८० यस्योचुःसाक्षिणःसत्यांप्रतिज्ञांसजयीभवेत् अन्यथावादिनोयस्यध्रुवस्तस्यपराजयः ८१**

स्तत्रापिगुणिनामेववचनंग्राह्यं उभयानुमतःसाक्षीभवत्येकोपिधर्मविदिति गुणातिशयस्यमुख्यत्वात् यत्तुभेदादसाक्षिणइत्युक्तं नत्सर्वसाम्येनागृह्यमाणविशेषविषयम् ८० साक्षिभिश्चकथमुक्तेजयःकथंवापराजयइत्यत आह यस्यवादिनःप्रतिज्ञांद्रव्यजातिसंख्यादिविशिष्टांसाक्षिणःसत्यांवदंति सत्यमेवंजानीमोवयमिति सजयीभवति यस्यपुनर्वादिनःप्रतिज्ञामन्यथावैपरीत्येनमिथ्यैतदितिवदंति तस्यपराजयोध्रुवोनिश्चितः यत्रतुप्रतिज्ञातार्थस्यविस्मरणादिनाभावाभावौसाक्षिणोनप्रतिपादयंति तत्रप्रमाणांतरेणनिर्णयःकार्यः

नचराज्ञासाक्षिणःपुनःपुनःप्रष्टव्याः स्वभावोक्तमेववचनंग्राह्यं यथाह स्वभावोक्तंवचस्तेषांग्राह्यंयद्दोषवर्जितम् उक्तेतुसाक्षिणोराज्ञानप्रष्टव्याःपुनःपुनरिति ८१ अन्यथावादिनोयस्यध्रुवस्तस्यपराजयइत्यस्यापवादमाह पूर्वोक्तलक्षणैःसाक्षिभिःसाक्ष्येस्वाभिप्रायेप्रतिज्ञातार्थवैपरीत्येनाभिहितेयद्यन्येपूर्वेभ्योगुणवत्तमाद्विगुणावाअन्यथाप्रतिज्ञातार्थानुगुण्येनसाक्ष्यंब्रूयुस्तदापूर्वेसाक्षिणःकूटामिथ्यावादिनोभवेयुः नन्वेतदनुपपन्नम् अर्थिप्रत्यर्थिसभ्यसभापतिभिःपरीक्षितैःप्रमाणभूतैःसाक्षिभिर्निर्णीतेऽर्थेप्रमाणांतरान्वेषणेऽनवस्थादोषप्रसंगात् निर्णिक्तेव्यवहारेतुप्रमाणमफलंभवेत् लिखितंसाक्षिणोवापिपूर्वमावेदितंनचेत् यथापक्वेषुधान्येषुनिष्फलाःप्रावृषोगुणाः निर्णिक्तव्यवहाराणांप्रमाणम

उक्तेपिसाक्षिभिःसाक्ष्येयद्यन्येगुणवत्तमाः द्विगुणावान्यथाब्रूयुःकूटाःस्युःपूर्वसाक्षिणः ८२

फलंतथेतिनारदवचनाच्च उच्यते यदार्थीप्रतिज्ञातार्थस्यांतरात्मसाक्षित्वेनाविष्कृतदोषाणामपिसाक्षिणांवचनमर्थविसंवादित्वेनप्रमाणममन्यमानःसाक्षिष्वपिदोषंकल्पयति तदाप्रमाणांतरान्वेषणंकेनवार्यते उक्तंच यस्यदुष्टंकरणंयत्रचमिथ्येतिप्रत्ययःसएवासमीचीनइति यदाचक्षुरादिकरणदोषानध्यवसायेप्यर्थविसंवादात्तज्जनितस्यज्ञानस्याप्रामाण्येनकरणदोषकल्पनातथेहापि साक्षिपरीक्षातिरेके ४१
णवाक्यपरीक्षोपदेशाच्च साक्षिभिर्भाषितंवाक्यंसहसभ्यैःपरीक्षयेदिति कात्यायनेनाप्युक्तं यदाशुद्धाक्रियान्यायात्तदातद्वाक्यशोधनं

शुद्धाच्चवाक्याद्यःशब्दःसशुद्धोर्थइतिस्थितिरिति क्रियासाक्षिलक्षणानार्थसंबंधिनोनाम्नाइतिन्यायाद्यदाशुद्धानंदातद्वाक्यशोधनंसाक्षिवाक्यशोधनंकर्तव्यम् वाक्यशुद्धिश्चसत्यार्थप्रतिपादनेन सत्येनशुध्यतेवाक्यमितिस्मरणात् एवंशुद्धायाःक्रियायाःशुद्धाच्चवाक्याद्यःशब्दोवगतोर्थःसशुद्धस्तथाभूतइतिस्थितिरीदृशीमर्यादान्यायविदाम् कारणदोषबाधकप्रत्ययाभावेसत्यवितथएवार्थइत्यर्थः ननुस्वयमर्थिनाप्रमाणीकृताःसाक्षिणोतिक्रम्यकथंक्रियांतरंप्रमाणीक्रियते नैषदोषः यतःक्रियांबलवतींमुक्त्वादुर्बलांयोवलंबते सजयेवधृतेसभ्यैःपुनस्तांनाप्नुयात्क्रियामिति कात्यायनेनजयावधारणोत्तरकालंक्रियांतरपरिग्रहनिषेधाज्जयावधारणात्प्राक्क्रियांतरपरिग्रहोदर्शितः नारदेनापि निर्णिक्तेव्यवहारेतुप्रमाणमफलंभवेदितिवदताजयावधारणोत्तरकालमेवप्रमाणांतरंनिषिद्धंनप्रागपि तस्मादुक्तेपिसाक्षिभिःसाक्ष्येअपरितुष्यताक्रियांतरमंगीकर्तव्यमितिस्थितम् एवंस्थितेयद्यभिहितवचनेभ्यःसाक्षिभ्योगुणवत्तमाःद्विगुणावापूर्वनिर्दिष्टाअसन्निहिताःसाक्षिणःसंतितदातएवप्रमाणीकर्तव्याः स्वभावेनैवयद्ब्रूयुस्तद्ग्राह्यंव्यावहारिकमिति अस्यसर्वव्यवहारशेषत्वात् निर्णिक्तेव्यवहारेतुप्रमाणमफलंभवेत् लिखितंसाक्षिणोवापिपूर्वमावेदितंनचेदितिनारदवचनाच्च पूर्वनिर्दिष्टानामसंभवेत्वनिर्दिष्टाअपितथाविधाएवसाक्षिणोग्राह्याः नदिव्यं संभवेसाक्षिणांप्राज्ञोवर्जयेद्दैविकींक्रियामितिस्मरणात् तेषामसंभवेदिव्यंप्रमाणंकर्तव्यम् अतःपरमपरितुष्यताप्यर्थिनानप्रमाणांतरमन्वेषणीयम् मनुवचनादितिपरिसमापनीयोव्यवहारः यत्रतु प्रत्यर्थिनःस्वप्रत्ययविसंवादित्वेनसाक्षिवचनस्याप्रामाण्यंमन्यमानस्यसाक्षिषुदोषारोपणेपरितोषस्तत्रप्रत्यर्थिनःक्रियोपन्यासावसराभावात्ससाहावधिकदैविकराजिकव्यस

नोद्भवेनसाक्षिपरीक्षणंकर्तव्यं तत्रचदोषावधारणेसाक्षिणोविवादास्पदीभूतमृणंदाप्याः सारानुसारेणदंडनीयाश्च अथदोषानवधारणंत-
दाप्रत्यर्थिनातावतासंतोष्टव्यम् यथाहमनुः यस्यदृश्येतसप्ताहादुक्तवाक्यस्यसाक्षिणः रोगोग्निर्ज्ञातिमरणमृणंदाप्योधनंचसइति
एतच्चयस्योचुःसाक्षिणःसत्यांप्रतिज्ञांसजयीभवेदित्यस्यापरितुष्यत्प्रत्यर्थिविषयेपवादोद्रष्टव्यः केचिदुक्तेपिसाक्षिभिःसाक्ष्येइत्येतद्वच
नमर्थिनानिर्दिष्टेषुसाक्षिष्वर्थ्यनुकूलमभिहितवत्सु यदिप्रत्यर्थीगुणवत्तमान्द्विगुणान्वासाक्षिणःपूर्वोक्तविपरीतंप्रादयतितदापूर्ववादिनः
साक्षिणः कूटाइतिव्याचक्षते तदसत् प्रत्यर्थिनः क्रियानुपपत्तेः तथाहि अर्थीनामसाध्यस्यार्थस्यनिर्देष्टा तत्प्रतिपक्षः तदभाववादी
प्रत्यर्थी तत्राभावस्यभावसिद्धिसापेक्षत्वाद्भावस्यचाभावनिरपेक्षसिद्धित्वाद्भावस्यैवसाध्यत्वंयुक्तं अभावस्वरूपेणसाक्ष्यादिप्रमेय
त्वाभावात् अतश्चार्थिनएवक्रियायुक्ता अपिचोत्तरानुसारेणसर्वत्रैवक्रियानियतास्मर्यते प्राङ्न्यायकरणोक्तौतुप्रत्यर्थीनिर्दिशे-
त्क्रियाम् मिथ्योक्तौपूर्ववादीतुप्रतिपत्तौनसाभवेदिति नचैकस्मिन्व्यवहारेद्वयोःक्रिया नचैकस्मिन्विवादेतुक्रियास्याद्वादिनोर्द्वयोरिति
स्मरणात् तस्मात्प्रतिवादिनःसाक्षिणोगुणवत्तमाद्विगुणावान्यथाब्रूयुरित्यनुपपन्नं अथमतम् यत्रद्वावपिभावप्रतिज्ञावादिनौमदी
यमिदंदायादप्राप्तमिति पूर्वापरभागविभागानाकलितमेववदतस्तत्रद्वयोःसाक्षिषुसत्सु कस्यसाक्षिणोग्राह्याइत्याकांक्षायांद्वयोर्विव
दतोरर्थेद्वयोःसत्सुच साक्षिषु पूर्वपक्षोभवेद्यस्य भवेयुस्तस्यसाक्षिणइति वचनेनयः पूर्वंनिवेदयतितस्यसाक्षिणोग्राह्याइतिस्थिते ८२
तस्यायमपवादः उक्तेपिसाक्षिभिःसाक्ष्येइति अतश्चपूर्वोत्तरयोर्वादिनोःसमसंख्येषुसमगुणेषुसाक्षिषुसत्सुपूर्ववादिनएवसा-

क्षिणःप्रष्टव्याः यदातुउत्तरवादिनःसाक्षिणोगुणवत्तमाद्विगुणावा तदाप्रतिवादिनःसाक्षिणःप्रष्टव्याः एवंचनाभावस्यसाध्यताउभयोरपिभाववादित्वाच्चतु
र्विधोत्तरविलक्षणत्वाच्च प्रकृतोदाहरणेनक्रियाव्यवस्था एकस्मिन्व्यवहारेयथैकस्यार्थिनःक्रियाद्वयंपरमतेतथावादिप्रतिवादिनोःक्रियाद्वयेप्यविरोधइतितद
प्याचार्योनानुमन्यते उक्तेपिपिसाक्षिभिःसाक्ष्येइतिअतःशब्दादर्थात्प्रकरणाद्वार्थस्यानवगमादित्यलंप्रसंगेन ८२ कूटसाक्षिणोदर्शितास्तेषांदंडमाह योधनदानादि
नाकूटान्साक्षिणःकरोतिसकूटकृत् साक्षिणश्चैतितथाकूटास्तेविवादात्पराजये योदंडस्तत्रतत्रोक्तः तंदंडंद्विगुणंपृथक्पृथगेकैकशोदंडनीयाः ब्रा
ह्मणस्तुविवास्योराष्ट्रान्निर्वास्योनदंडनीयः एतच्चलोभादिकारणविशेषापरिज्ञानेअनभ्यासेद्रष्टव्यम् लोभादिकारणविशेषपरिज्ञा

पृथक्पृथग्दंडनीयाःकूटकृत्साक्षिणस्तथा विवादाद्द्विगुणंदंडंविवास्योब्राह्मणःस्मृतः ८३

नेअभ्यासेचमनुनोक्तम् लोभात्सहस्रंदंड्यःस्यान्मोहात्पूर्वंतुसाहसम् भयाद्वौमध्यमौदंडौमैत्र्यात्पूर्वंचतुर्गुणम् कामाद्दशगुणंपूर्वंक्रो
धात्तुत्रिगुणंपरम् अज्ञानाद्द्वेशतेपूर्णेबालिश्याच्छतमेवतुइति तत्रलोभोर्थलिप्सा मोहोविपर्ययज्ञानं भयंसंत्रासः मैत्रीस्नेहातिश
यः कामःस्त्रीव्यतिरेकाभिलाषः क्रोधोमर्षःअज्ञानमस्फुटज्ञानम् बालिश्यंज्ञानानुत्पादः सहस्रादिषुताम्रिकाःपणागृह्यंते तथा
कूटसाक्ष्यंतुकुर्वाणांस्त्रीन्वर्णान्धार्मिकोनृपः प्रवासयेद्दंडयित्वाब्राह्मणंतुविवासयेदिति एतच्चाभ्यासविषयं कुर्वाणानितिवर्तमा

ननिर्देशात्त्रीन्वर्णान् क्षत्रियादीन् पूर्वोक्तंदंडंदंडयित्वाप्रवासयेत् मारयेत् अर्थशास्त्रेप्रवासशब्दस्यमारणेप्रयोगात् अस्यचार्थ
शास्त्रस्वरूपत्वात् तत्रापिप्रवासनमोष्ठच्छेदनंजिह्वाच्छेदनंप्राणवियोजनंचकौटसाक्ष्यविषयानुसारेणद्रष्टव्यम् ब्राह्मणंतुदंड
यित्वाविवासयेत् स्वराष्ट्रान्निष्कासयेत् यद्वाविवासयेत् वाससोविगतोविवासाः विवासंसंकरोतीतिणिचिकृतेणाविष्ठवत्प्रातिप
दिकस्येतिटिलोपेरूपम् नग्नीकुर्यादित्यर्थः अथवावसत्यस्मिन्नितिवासोगृहं विवासयेत् भग्नगृहंकुर्यादिति ब्राह्मणस्यापिलो-
भादिकारणविशेषापरिज्ञाने अनभ्यासेच तत्रतत्रोक्तोदंडएव अभ्यासेत्वर्थदंडोविवासनंच तत्रापिजातिद्रव्यानुबंधाद्यपेक्ष-
याविवासनंनग्नीकरणं गृहभंगोदेशान्निर्वासनंचेतिव्यवस्थाद्रष्टव्या लोभादिकारणविशेषापरिज्ञाने अनभ्यासेचाल्पविषयेकौट
साक्ष्येब्राह्मणस्यापिक्षत्रियादिवदर्थदंडएव महाविषयेतुदेशान्निर्वासनमेव अत्राप्यभ्यासेसर्वेषामेवमनूक्तंद्रष्टव्यम् नचब्रा
ह्मणस्यार्थदंडोनास्तीतिमंतव्यम् अर्थदंडाभावेशरीरदंडेचनिषिद्धेस्वल्पेप्यपराधेनग्नीकरणगृहभंगांककरणविप्रवासनदंडा
भावोवाप्रसज्येत चतुर्णामपिवर्णानांप्रायश्चित्तमकुर्वताम् शरीरंधनसंयुक्तंदंडंधर्म्यंप्रकल्पयेदितिस्मरणाच्च तथासहस्रं-
ब्राह्मणोदंड्योगुप्तांविप्रांबलाद्व्रजन्नितिस्मरणात् यत्तुशंखवचनं त्रयाणांवर्णानांधनापहारवधबंधक्रियाविवासनांककरणं
ब्राह्मणस्येति तत्रधनापहारःसर्वस्वापहारोविवक्षितोवधसाहचर्यात् शारीरस्त्ववरोधादिर्जीवितांतःप्रकीर्तितः काकिण्या ५३
दिस्त्वर्थदंडःसर्वस्वांतस्तथैवचेति वधसर्वस्वहरणयोःसहपाठात् यदप्युक्तम् राष्ट्रादेनंबहिःकुर्यात्समग्रधनमक्षतमिति न

त्वथमकृतसाहसविषयम् नसर्वविषयम् शारीरस्तुब्राह्मणस्यनकदाचिद्भवति नजातुब्राह्मणंहन्यात्सर्वपापेष्वपिस्थितमितिसामान्येनमनु
स्मरणात् तथा नब्राह्मणवधाद्भूयानधर्मोविद्यतेक्वचिव तस्मादस्यवधंराजामनसापिनचिंतयेदिति ८३ अपिच यःस्तुसाक्षित्वमंगीकृ
त्यान्यैःसाक्षिभिःसहसाक्ष्यंश्रावितःसन्निगदकालेतमोवृतोरागाद्याक्रांतचित्तस्तत्साक्ष्यमन्येभ्यःसाक्षिभ्योनिन्हुते नाहमत्रसाक्षीभ
वामीतिसविवादपराजयेयोदंडस्तंदंडमष्टगुणंदाप्यः ब्राह्मणंपुनरष्टगुणद्रव्यंदंडदानासमर्थंविवासयेत् विवासनंचनग्नीकरणगृहभं

यःसाक्ष्यंश्रावितोऽन्येभ्योनिन्हुतेतत्तमोवृतः सदाप्योऽष्टगुणंदंडंब्राह्मणंतुविवासयेत् ८४

गदेशनिर्वासनलक्षणंविषयानुसारेणद्रष्टव्यम् इतरेषांत्वष्टगुणद्रव्यदंडासंभवेस्वजात्युचितकर्मकरणनिगडबंधनकारागृहप्रवेशा
दिद्रष्टव्यम् एतच्चपूर्वश्लोकेप्यनुसर्तव्यं यदासर्वेसाक्ष्यंनिन्हुवतेतदासर्वेसमानदोषाः यदातुसाक्ष्यमुक्त्वापुनरन्यथावदंतितदानुबं
धाद्यपेक्षयादंड्याः यथाहकात्यायनः उक्त्वान्यथाब्रुवाणाश्चदंड्याःस्युर्वाक्छलान्विताःइति नचान्येनोक्ताःसाक्षिणोन्येनरहस्यनुस
र्तव्याः यथाहनारदः नपरेणसमुद्दिष्टमुपेयात्साक्षिणंनरः भेदयेन्नैवचान्येनहीयेतैवंसमाचरन्निति ८४ ५

साक्षिणामवचनमसत्यवचनंच सर्वत्रप्रतिषिद्धं तदपवादार्थमाह यत्रवर्णिनांशूद्रविट्क्षत्रविप्राणांसत्यवचनेनवधःसंभाव्यतेतत्रसाक्ष्यनृतंवदेत् सत्यंन वदेत् अनेनचसत्यवचनप्रतिषेधेनसाक्षिणःपूर्वप्रतिषिद्धमसत्यवचनमवचनंचाभ्यनुज्ञायते यत्रशंकाभियोगादौसत्यवचनेवर्णिनोवधोऽनृतवचनेनक स्यापिवधस्तत्रानृतवचनमभ्यनुज्ञायते यत्रतुसत्यवचनेऽर्थिप्रत्यर्थिनोरन्यतरस्यवधोऽसत्यवचनेचान्यतरस्यवधस्तत्रतूष्णींभावाभ्यनुज्ञा राजा यद्यनुमन्यते अथराजाकथमप्यकथनेनमुंचतितदाभेदादसाक्षित्वंकर्तव्यम् तस्याप्यसंभवेसत्यमेववेदितव्यमसत्यवचनेनवर्णिवधदोषोऽसत्य वचनदोषश्च सत्यवचनेतुवर्णिवधदोषएव तत्रचयथाशास्त्रंप्रायश्चित्तंकर्तव्यम् नत्वसत्यवचने तूष्णींभावेचशास्त्राभ्यनुज्ञानात्सत्यवाया

वर्णिनांहिवधोयत्रतत्रसाक्ष्यनृतंवदेत् तत्पावनायनिर्वाप्यश्चरुःसारस्वतोद्विजैः ८५

भावइत्यतआह तत्पावनाय अनृतवचनावचननिमित्तप्रत्यवायपरिहाराय सारस्वतश्चरुर्द्विजैरेकैकशोनिर्वाप्यःकर्तव्यः सरस्वतीदेवताअ स्येतिसारस्वतः अनवस्राविताऽन्तरूष्मपक्वओदनेचरुशब्दःप्रसिद्धः इहायमभिसंधिः साक्षिणामनृतवचनमवचनंचयन्निषिद्धंतदिहाभ्य नुज्ञातम् यत्तुनानृतंवदेदब्रुवन्विब्रुवन्वापिनरोभवतिकिल्बिषीतिचसामान्येनानृतवचनमवचनंचनिषिद्धम् तदतिक्रमनिमित्तमिदंप्राय- श्चित्तम् नचमंतव्यम् साक्षिणामनृतवचनावचनाभ्यनुज्ञानेपिसाधारणानृतवचनावचनप्रतिषेधातिक्रमनिमित्तप्रत्यवायस्यतादवस्थ्याद  वचनाभ्यनुज्ञावचनमनर्थकमिति यतःसाक्षिणाम्सत्यवचनावचनप्रतिषेधातिक्रमयोर्भूयान्प्रत्यवायः साधारणानृतवचनावचनयो

रल्पीयानित्यर्थवदभ्यनुज्ञावचनं यद्यपिभूयसःप्रत्यवायस्येतिनिवृत्त्या आनुषंगिकस्याल्पीयसः प्रत्यवायस्यनिवृत्तिरन्यत्र तथापीहाभ्यनु ज्ञावचनात्प्रायश्चित्तविधानाच्चभूयसोनिवृत्त्याल्पीयानप्यानुषंगिकोपिप्रत्यवायोननिवर्ततइतिगम्यते एतदेवान्यत्रप्रश्नेषुवर्णिवधाशंकायां पांथादीनामनृतवचनावचनाभ्यनुज्ञानंवेदितव्यम् नचतत्रप्रायश्चित्तमस्ति प्रतिषेधांतराभावात् निमित्तांतरेणकालांतरेर्थतत्त्वावगमेपि साक्षिणामन्येषांचदंडाभावोऽस्मादेववचनादवगम्यतइति इतिसाक्षिप्रकरणम् ८५ भुक्तिसाक्षिणौनिरूपितौ सांप्रतंलेख्यंनिरूप्यते तत्रलेख्यंद्विविधम् शासनंजानपदंचेति शासनंनिरूपितंजानपदमभिधीयते तच्चद्विविधम् स्वहस्तकृतमन्यकृतंचेति तत्रस्वहस्तकृतम

यःकश्चिदर्थोनिष्णातःस्वरुच्यातुपरस्परम् लेख्यंतुसाक्षिमत्कार्यंतस्मिन्धनिकपूर्वकम् ८६

साक्षिकं अन्यकृतंससाक्षिकम् अनयोश्चदेशाचारानुसारेणप्रामाण्यम् यथाहनारदः लेख्यंतुद्विविधंज्ञेयंस्वहस्तान्यकृतंतथा असाक्षिम त्साक्षिमच्चसिद्धिर्देशस्थितेस्तयोरिति तत्रान्यकृतमाह धनिकाधमर्णयोर्योर्थो हिरण्यादिःपरस्परं स्वरुच्याइयताकालेनैतावद्देयमि यतीप्रतिमासंवृद्धिरितिनिष्णातोव्यवस्थितः तस्मिन्नर्थेकालांतरेविप्रतिपत्तौवस्तुतत्त्वनिर्णयार्थंलेख्यंसाक्षिमदुक्तलक्षणसाक्षियुक्तंधनि कपूर्वकं धनिकःपूर्वोयस्मिंस्तद्धनिकपूर्वं धनिकनामलेखनपूर्वकमितियावत् कार्यंकर्तव्यं उक्तलक्षणाःसाक्षिणोवाकर्तव्याः कर्तातुयत्कृ तंकार्यंसिद्ध्यर्थंतस्यसाक्षिणःप्रवर्ततेविवादेषुस्वकृतंवाथलेख्यकमितिस्मरणात् ८६ ५ ७ ७

अपिच समासंवत्सरः मासश्चैत्रादिः तदर्धंपक्षःशुक्लः कृष्णोवा अहस्तिथिः प्रतिपदादिः नामधनिकाधमर्णयोः जातिर्ब्राह्मणादिः स्वगोत्रंवासिष्ठादिगोत्रं एतैः समादिभिश्चिन्हितम् तथासब्रह्मचारिकंबह्वृचादिशाखाप्रयुक्तं गुणनामबह्वृचःकठइति आत्मीयपितृनामधनिकर्णिकपितृनाम आदिशब्दात् द्रव्यजातिसंख्याधारादेर्ग्रहणम् एतैश्चचिन्हितंलेख्यंकार्यमितिगतेनसंबंधः ८७ किंच धनिकाधमर्णयोर्योर्थः स्वरुच्याव्यवस्थितस्तस्मिन्नर्थेसमासेलेखितेऋणी अधमर्णोनामात्मीयंस्वहस्तेनास्मिल्लेख्ये यदुपरिलेखितं

समामासतदर्धाहर्नामजातिस्वगोत्रकैः सब्रह्मचारिकात्मीयपितृनामादिचिन्हितम् ८७ समासेतुऋणीनामस्वहस्तेननिवेशयेत् मतंमेमुकपुत्रस्ययदत्रोपरिलेखितम् ८८ साक्षिणश्चस्वहस्तेनपितृनामकपूर्वकम् अत्राहममुकः साक्षीलिखेयुरितितेसमाः ८९

तन्ममामुकपुत्र कस्यमतमभिप्रेतमितिनिवेशयेत्पत्रेलिखेत् ८८ तथा तस्मिल्लेख्येयेसाक्षिणोलिखितास्तेप्यात्मीयपितृनामलेखनपूर्वकमस्मिन्नर्थेहममुकोदेवदत्तःसाक्षीतिस्वहस्तेनेकैकशोलिखेयुः तेचसमाःसंख्यातोगुणतश्चकर्तव्याः यद्यधमर्णः साक्षीवालिपिज्ञोनभवति तदाधमर्णोन्येनसाक्षीचसाक्ष्यंतरेणसर्वसाक्षिसन्निधौस्वमतंलेखयेत् यथाहनारदः अलिपिज्ञऋणीयःस्यात्स्वमतंतुसलेखयेत् साक्षीवासाक्षिणान्येनसर्वसाक्षिसमीपतइति ८९ ५ ५ ५

किंच ततोलेखकोधनिकाधमर्णिकाभ्यामुभाभ्यांप्रार्थितेनमयामुकेनदेवदत्तेनविष्णुमित्रसूनुनाएतल्लेख्यंलिखितमित्यंतेलिखेत् ९० सांप्रतंस्वकृतंलेख्यमाह यल्लेख्यंस्वहस्तेनलिखितमधमर्णेन तत्साक्षिभिर्विनापिप्रमाणंस्मृतं मन्वादिभिः बलोपाधिकृताहते बलेनबलात्कारेण उपाधिना लोभक्रोधभयमदादिलक्षणेनयत्कृतं तस्माद्विना नारदोप्याह मत्ताभियुक्तस्त्रीबालबलात्कारकृतंचयत् तदप्रमाणंलिखितंभयोपाधिकृतंतथेति तच्चतत्स्वहस्तकृतंपरकृतंचलेख्यं देशाचारानुसारेणसबंधकव्यवहारेऽबंधकव्यवहारे

उभयाभ्यर्थितेनैतन्मयाह्यमुकसूनुना लिखितंह्यमुकेनेतिलेखकोंतेततोलिखेत् ९०
विनातुसाक्षिभिर्लेख्यंस्वहस्तलिखितंतुयत् तत्प्रमाणंस्मृतंलेख्यं बलोपाधिकृताहते ९१

चयुक्तमर्थक्रमापरिलोपेनलिप्यक्षरापरिलोपेनचलेख्यमित्येतावन्नपुनःसाधुशब्दैरेवप्रातिस्विकदेशभाषयापिलेखनीयम् यथाहनारदः देशाचाराविरुद्धंयद्व्यक्ताधिविधिलक्षणम् तत्प्रमाणंस्मृतंलेख्यमविलुप्तक्रमाक्षरमिति विधानंविधिः आधेर्विधिराधीकरणं तस्यलक्षणं गोप्याधिभोग्याधिकालकृतमित्यादितद्व्यक्तं विस्पष्टं यस्मिंस्तद्व्यक्ताधिविधिलक्षणं अर्थानांक्रमःक्रमश्चाक्षराणिचक्रमाक्षराणि अविलुप्तानिक्रमाक्षराणियस्मिंस्तदविलुप्तक्रमाक्षरं तदेवंभूतंलेख्यंप्रमाणं राजशासनवन्नसाधुशब्दनियमोत्रेत्यभिप्रायः ९१

लेख्यप्रसंगेनलेख्यारूढमप्यृणंत्रिभिरेवदेयमित्याह यथासाक्ष्यादिकृतमृणंत्रिभिरेवदेयं तथालेख्यकृतमप्याहर्तृतत्सुतत्तत्पुत्रैस्त्रिभिरेवदे
यं नचतुर्थादिभिरितिनियम्यते ननुपुत्रपौत्रैर्ऋणंदेयमित्यविशेषेणऋणमात्रंत्रिभिरेवदेयमितिनियतमेव बाढं अस्यैवोत्सर्गस्यपत्रारूढर्ण
विषयेस्मृत्यंतरप्रभवामपवादशंकामपनेतुमिदंवचनमारब्धं तथाहि पत्रलक्षणमभिधायकात्यायनेनाभिहितम् एवंकालमतिक्रांतं
पितृणांदाप्यतेऋणमिति इत्थंपत्रारूढंमृणमतिक्रांतकालमपिपितृणांसंबंधीदाप्यते अत्रपितृणामितिबहुवचननिर्देशात्कालमतिक्रांतमिति
वचनाच्चचतुर्थादिदाप्यइतिप्रतीयते यथाहारीतेनापि लेख्यंयस्यभवेद्धस्तेलाभंतस्यविनिर्दिशेदिति अत्रापियस्यहस्तेलेख्यमस्तितस्य

ऋणंलेख्यकृतंदेयंपुरुषैस्त्रिभिरेवतु आधिस्तुभुज्यतेतावद्यावत्तन्नप्रदीयते ९२

र्णलाभइतिसामान्येनचतुर्थादिभ्योप्यृणलाभोस्तीतिप्रतीयते ततश्चैतदाशंकानिवृत्त्यर्थमेतद्वचनमित्युक्तम् वचनद्वयंचयोगीश्वरवचनानुसा
रेणयोजनीयम् अस्यापवादमाह सबंधकेपिपत्रारूढेऋणेत्रिभिरेवदेयमितिनियमादृणापाकरणानधिकारेणापहरणेप्यनधिकारप्राप्ताविदमु
च्यते यावच्चतुर्थेनपंचमेनवाऋणंनदीयतेतावदेवाधिर्भुज्यते इतिवदतासबंधकर्णापाकरणेचतुर्थादेरप्यधिकारोदर्शितः नन्वेतदप्युक्त
मेव फलभोग्योननश्यतीति सत्यम् तदप्येतस्मिन्नसत्यपवादवचनेपुरुषत्रयविषयमेवस्यादितिसर्वमनवद्यम् ९२ प्रासं ४६
गिकंपरिसमाप्य प्रकृतमेवानुसरति व्यवहाराक्षमेपत्रेपत्रांतरंकुर्यादितिविधीयते व्यवहाराक्षमत्वंचात्यंतव्यवहितदेशांतरस्थेपत्रे

दुर्लेख्ये दुष्टानिसंदिह्यमानान्यथावाचकानिवालेख्यानिलिप्यक्षराणिपदानिवायस्मिंस्तत्दुर्लेख्यं तस्मिन्दुर्लेख्ये नष्टेकालवशेनोन्मृष्टेमषीदौर्ब
ल्यादिनामृदितलिप्यक्षरे हृतेतस्करादिना भिन्नेविदलिते दग्धेप्रज्वलिते छिन्नेद्विधाभूतेसतिभवति एतच्चार्थिप्रत्यर्थिनोःपरस्परानुम-
तौसत्यां विमत्यांतु व्यवहारप्राप्तिदेशांतरस्थपत्रानयनायदुर्गाध्वापेक्षयाकालोदातव्यः दुर्गदेशावस्थितेनष्टेवापत्रेसाक्षिभिरेवव्यवहार
निर्णयःकार्यः यथाहनारदः लेख्येदेशांतरन्यस्तेशीर्णेदुर्लिखितेहृते सतस्तत्कालकरणमसतोद्रष्टृदर्शनमिति सतोविद्यमानस्यप
त्रस्यदेशांतरस्थस्यानयनायकालकरणंकालावधिर्दातव्यः असतःपुनरविद्यमानस्यपूर्वंयेद्रष्टारःसाक्षिणस्तैर्दर्शनंव्यवहारेपरि

देशांतरस्थेदुर्लेख्येनष्टोन्मृष्टेहृतेतथा भिन्नेदग्धेथवाछिन्नेलेख्यमन्यत्तुकारयेत् ९३

समापनंकार्यम् यदातुसाक्षिणोनसंति तदादिव्येननिर्णयःकार्यः अलेख्यसाक्षिकेदैवींव्यवहारेविनिर्दिशेदितिस्मरणात् एतच्चज्ञानपदव्य
वस्थामात्रम् राजकीयमपिव्यवस्थापत्रमीदृशमेवभवति इयांस्तुविशेषः राज्ञःस्वहस्तसंयुक्तंस्वमुद्राचिन्हितंतथा राजकीयंस्मृतंलेख्यं
सर्वेष्वर्थेषुसाक्षिमदिति यथान्यदपिराजकीयंजयपत्रकंवृद्धवसिष्ठेनोक्तम् यथोपन्यस्तसाध्यार्थसंयुक्तंसोत्तरक्रियम् सावधारण
कंचैवजयपत्रकमिष्यते प्राड्विवाकादिहस्तांकंमुद्रितंराजमुद्रया सिद्धेऽर्थेवादिनेदद्याज्जयिनेजयपत्रकमिति तथा सभासदोपिद
त्तंमेमुकपुत्रस्येतिस्वहस्तंदद्युः सभासदश्चयेतत्रस्मृतिशास्त्रविदःस्थिताः यथालेख्यविधौतद्वत्स्वहस्तंदद्युरेवते इतिस्मरणात्

सभासदांचपरस्परानुमतिव्यतिरेकेणनव्यवहारोनिःशल्योभवति यथाहनारदः यत्रसभ्योजनःसर्वः साध्वेतदितिमन्यते सनिःशल्योवि
वादःस्यात्सशल्यस्त्वन्यथाभवेदिति एतच्चतुष्पाद्व्यवहारएव साधयेत्साध्यमर्थंयच्चतुष्पादान्वितंचयत् राजमुद्रांकितंचैवजयपत्रक-
मिष्यतइतिस्मरणात् यत्रतुहीनता यथा अन्यवादिक्रियाद्वेषीनोपस्थातानिरुत्तरः आहूतप्रपलायीचहीनःपंचविधःस्मृतइति तत्रन
जयपत्रकमस्ति अपितुहीनपत्रकमेव तच्चकालांतरेदंडप्राप्त्यर्थं जयपत्रंतुप्राङ्न्यायविधिसिद्ध्यर्थमितिशेषः ९३ लेख्यसंदेहेनिर्णय
निमित्तान्याह शङ्कमशद्धंवेतिसंदिग्धलेख्यस्य शुद्धिःस्वहस्तलिखितादिभिःस्यात् स्वहस्तेनलिखितंयल्लेख्यांतरं तेनशुद्धिः यदिसह

संदिग्धलेख्यशुद्धिःस्यात्स्वहस्तलिखितादिभिः युक्तिप्राप्तिक्रियाचिन्हसंबंधागमहेतुभिः ९४

शान्यक्षराणिभवंतितदाशुद्धिः स्यादित्यर्थः आदिशब्दात्साक्षिलेखकस्वहस्तेलिखितांतरसंवादाच्छुद्धिरिति युक्त्याप्राप्तिर्युक्तिप्राप्तिः देश
कालपुरुषाणांद्रव्येणसहसंबंधःप्राप्तिः अस्मिन्देशेऽस्मिन्कालेऽस्यपुरुषस्येदंद्रव्यं घटतइतियुक्तिः क्रियातत्साक्ष्युपन्यासः चिन्हमसा
धारणंश्रीकारादिःसंबंधः अर्थिप्रत्यर्थिनोःपूर्वमपिपरस्परविश्वासेनदानग्रहणादिसंबंधः आगमोस्येतावतोर्थस्यसंभावितःप्राप्त्युपा
यः एतेहेतवः एभिर्हेतुभिःसंदिग्धलेख्यशुद्धिःस्यादित्यन्वयः यदातुलेख्यसंदेहेनिर्णयोनजायतेतदासाक्षिभिर्निर्णयःकार्यःयथाहकात्या- ४७
त्यायनः दूषकेपत्रकेवादीनदारूढांस्तुनिर्दिशेदिति साक्षिसंभवविषयमिदं साक्ष्यसंभवविषयमिदंतुहारीतवचनं नमयैतत्कृतंपत्रंकूटमे
तेनकारितं अधरीकृत्यतत्पत्रमर्थेदिव्येननिर्णयइति ९४

एवंशोधितेपत्रेऋणेचदातव्येप्राप्ते यदाकृत्स्नमेवदातुमृणमसमर्थस्तदाकिंकर्तव्यमित्यत आह यदाधमर्णिकःसकलमृणंदातुमसम-
र्थस्तदाशक्त्यनुसारेणदत्त्वादत्त्वापूर्वकृतस्यलेख्यस्यपृष्ठेभिलिखेत् एतावन्मयादत्तमितिउत्तमर्णोवाउपगतंप्राप्तंधनंतस्यैवलेख्यस्यपृष्ठे
दद्यादभिलिखेत्एतावन्मयालब्धमितिकथंस्वहस्तपरिचिन्हितं स्वहस्तलिखिताक्षरचिन्हितंयद्वोपगतंप्रवेशपत्रं स्वहस्तलिखितचिन्हितमधम-
र्णायोत्तमर्णोदद्यात् ९५ ऋणेतुकृत्स्नेदत्तेकिंकर्तव्यमित्यतआह क्रमेणसकृदेववाकृत्स्नमृणंदत्त्वापूर्वकृतंलेख्यंपाटयेत् यदातुदुर्गवे
शावस्थितंलेख्यंनष्टंवातदाशुद्ध्यै अधमर्णत्वनिवृत्त्यर्थमन्यल्लेख्यंकारयेदुत्तमर्णम् अधमर्णपूर्वोक्तक्रमेणोत्तमर्णोविशुद्धिपत्रमधम

लेख्यस्यपृष्ठेभिलिखेद्दत्त्वादत्त्वर्णिकोधनम् धनीवोपगतंदद्यात्स्वहस्तपरिचिन्हितम् ९५ दत्त्वर्णंपाटयेल्लेख्यं
शुद्ध्यैवान्यत्तुकारयेत् साक्षिमच्चभवेद्यद्वातद्दातव्यंससाक्षिकम् ९६ तुलाग्न्यापोविषंकोशोदिव्यानीहविशुद्धये

र्णायदद्यादित्यर्थः ससाक्षिकेऋणेकृत्स्नेदातव्येकिंकर्तव्यमित्यतआह यत्तुससाक्षिकमृणंतत्पूर्वसाक्षिसमक्षमेवदद्यात् इतिलेख्यप्रकरणं
९६ लिखितसाक्षिभुक्तिलक्षणंत्रिविधंमानुषंप्रमाणमुक्तम् अथावसरप्राप्तंदिव्यंप्रमाणमभिधास्यन् तुलाग्न्यापइत्यादिभिराद्यैःपंच
भिःश्लोकैःदिव्यमातृकांकथयति तत्रतावद्दिव्यान्युद्दिशति तुलादीनिकोशांतानिपंचदिव्यानीहधर्मशास्त्रेविशुद्धयेसंदिग्धस्यार्थस्य
संदिग्धनिवृत्तयेदातव्यानीति अन्यत्रान्यान्यपितंदुलादीनिद्रव्याणिसंति घटोग्निरुदकंचैवविषंकोशस्तथैवच तंदुलाश्चैवदिव्यानिसप्त

मस्तसमाषकइतिपितामहस्मरणात् अतः कथमेतावंत्येवेत्यत आह एतेनमहाभियोगेष्वेवनान्यत्रेतिनियम्यते नपुनरिमान्येव दिव्या
नीति महत्त्वावधिंचवक्ष्यति नन्वल्पाभियोगेपिकोशइष्यते कोशमल्पेपिदापयेदितिस्मरणात् सत्यंकोशस्यतुलादिषुपाठोनमहाभि-
योगेष्वेवेतिनियमार्थम् किंतुसावष्टंभाभियोगेपिप्राप्त्यर्थः अन्यथाशंकाभियोग एवस्यात् अवष्टंभाभियुक्तानांघटादीनिविनिर्दिशे-
त् तंदुलाश्चैवकोशश्चशंकास्वेवनसंशयइतिस्मरणात् महाभियोगेषुशंकितेषुसावष्टंभेषुचाविशेषेणप्राप्तावपवादमाह एतानि
तुलादीन्यभियोक्तरिशीर्षकस्थेपियुक्तस्यभवंति शीर्षकंशिरः व्यवहारस्यचतुर्थःपादोजयपराजयलक्षणस्तेनचदंडोलक्ष्यते तत्र

**महाभियोगेष्वेतानिशीर्षकस्थेभियोक्तरि ९७ रुच्यावान्यतरःकुर्यादितरोवर्तयेच्छिरः विनापिशीर्षकात्कुर्यान्नृपद्रोहे थपातके ९८**

तिष्ठतीतिशीर्षकस्थः तत्प्रयुक्तदंडभागित्यर्थः ९७ ततोर्थलिखयेत्सद्यःप्रतिज्ञातार्थसाधनमिति भावप्रतिज्ञावादिनएवक्रियाव्यव
स्थादर्शिता तदपवादार्थमाह रुच्याभियोक्त्रभियुक्तयोः परस्परसंप्रतिपत्त्यान्यतरोभियुक्तोवादिव्यंकुर्यादितरोभियुक्तः शिरःशारीरमर्थदं
डंवावर्तयेदंगीकुर्यात् अयमभिसंधिः नमानुषप्रमाणवद्दिव्यंप्रमाणंभावैकगोचरं अपितुभावाभावविशेषेणगोचरयति अतश्चमिथ्यो
त्तरे प्रत्यवस्कंधेप्राङ्न्यायेवार्थिप्रत्यर्थिनोरन्यतरेच्छयादिव्यंभवतीति अल्पाभियोगेमहाभियोगेशंकासावष्टंभयोरप्यविशेषेणकोशोभवती ४८

त्युक्तं तुलादीनिविषांतानितुमहाभियोगेष्वेवसावष्टंभेष्वेवेतिचनियमोदर्शितः तत्रावष्टंभाभियोगेष्वेवेत्यस्यापवादमाह राजद्रोहाति
शंकायांब्रह्महत्यादिपातकाभिशंकायांचशिरस्थायिनाविनापितुलादीनिकुर्यात् महाचौर्याभिशंकायांच यथा राजभिःशंकितानांचनिर्दि
ष्टानांचदस्युभिः आत्मशुद्धिपराणांचदिव्यंदेयंशिरोविनेति तंदुलाःपुनरल्पचौर्यशंकायामेव चौर्येतुतंदुलादेयानान्यत्रेतिविनिश्चयइ-
तिपितामहवचनात् तप्तमाषस्तुमहाचौर्याभिशंकायांचौर्यशंकाभियुक्तानांतप्तमाषोविधीयतइतिस्मरणात् अन्येपुनःशपथाअल्पार्थवि
षये सत्यवाहनशस्त्राणिगोबीजकनकानिच स्पृशेच्छिरांसिपुत्राणांदाराणांसुहृदांतथा अभियोगेषुसत्येषुकोशपानमथापिवा इत्येते
शपथाःप्रोक्ताःमनुनास्वल्पकारणइतिनारदादिस्मरणात् यद्यपिमानुषेप्रमाणनिर्णयस्यनिर्णायकंयत्तद्दिव्यमितिलोकप्रसिद्धाशपथा
नामपिदिव्यत्वंतथापिकालांतरनिर्णयनिमित्तत्वेभ्योधटादिभ्योदिव्येभ्योभेदत्वव्यपदेशोब्राह्मणपरिव्राजकवत् कोशस्यतुशपथत्वेपिधटा
दिषुपाठोमहाभियोगविषयत्वेनावष्टंभाभियोगविषयत्वेनचधटादिसाम्यात्ततुसमनंतरनिर्णयनिमित्तत्वेन तंदुलानांतप्तमाषस्यस
मनंतरनिर्णयनिमित्तत्वेप्यल्पविषयत्वेनशंकाविषयत्वेनचधटादिवैलक्षण्यात्तेषुपाठइतिसंतोष्टव्यम् एतानिचदिव्यानिशपथाश्च
यथासंभवमृणादिषुविवादेषुप्रयोक्तव्यानि यत्तुपितामहवचनम् स्थावरेषुविवादेषुदिव्यानिपरिवर्जयेदिति तदपिलिखितसा-
मंतादिसद्भावे दिव्यानिपरिवर्जयेदितिव्याख्येयम् ननुविवादांतरेष्वपिप्रमाणांतरसंभवेदिव्यानामनवकाशएव सत्यम्
ऋणादिषुविवादेषुउक्तलक्षणसाक्ष्युपन्यासे अर्थिनाकृतेपि प्रत्यर्थीयदिदंडाभ्युपगमावष्टंभेनदिव्यमवलंबते तदादिव्यमपिप्र-

वति साक्षिणामाशयदोषसंभवाद्दिव्यस्यचनिर्दोषत्वेन वस्तुतत्वविषयत्वात्तल्लक्षणताऽस्य धर्मस्य यथाह नारदः तत्रसत्येस्थितोधर्मो व्यवहारस्तुसाक्षिणि दैवसाध्येपौरुषेयीनलेख्यंवाप्रयोजयेदिति स्थावरेषुविवादेषुप्रत्यर्थिनादंडावष्टंभेनदिव्यावलंबनेकृतेपिसामंतादिष्टप्रमाणसद्भावेनदिव्यंग्राह्यमितिविकल्पनिराकरणार्थंस्थावरेषुविवादेष्वित्यादिपितामहवचनम् नात्यंतिकदिव्यनिराकरणार्थं लिखितसामंताद्यभावेस्थावरविवादेष्वनिर्णयप्रसंगात् ९८ किंच पूर्वेद्युरुपोषितमुदितेसूर्येसचैलंस्नानंदिव्यग्राहिणमाहूय नृपस्य सभ्यानांचब्राह्मणानांसन्निधौ सर्वाणिदिव्यानिकारयेत्प्राड्विवाकः त्रिरात्रोपोषितायस्युरेकरात्रोषितायवा नित्यंदिव्यानिदेयानिशुचये

सचैलंस्नानमाहूयसूर्योदयउपोषितम् कारयेत्सर्वदिव्यानिनृपब्राह्मणसन्निधौ ९९

ऽर्द्रवाससइति उपवासविकल्पःपितामहेनोक्तोबलवदबलवन्महाकार्याल्पकार्यविषयत्वेनव्यवस्थितोद्रष्टव्यः उपवासनियमश्चकारयितुः प्राड्विवाकस्यापि दिव्येषुसर्वकार्याणिप्राड्विवाकःसमाचरेत् अध्वरेषुयथाध्वर्युःसोपवासोनृपाज्ञयेतिपितामहवचनात् अत्रचयद्यपिसूर्योदयइत्यविशेषेणोक्तं तथापिशिष्टसमाचारान्द्रात्रुवारेदिव्यानिदेयानि तत्रापिपूर्वाह्णेग्निपरीक्षास्यात्पूर्वाह्णेचधटोभवेत् मध्यान्हेतुजलंदेयंधर्मतत्वमभीप्सता दिवसस्यतुपूर्वाह्णेकोशासिद्धिर्विधीयते रात्रौतुपश्चिमेयामेविषंदेयंसुशीतलइतिपितामहोक्तोविशेषोद्रष्टव्यः अनुक्तकालविशेषाणांतंदुलतप्तमाषप्रभृतीनांपूर्वाह्णएवप्रदानम् पूर्वाह्णेसर्वदिव्यानांप्रदानंपरिकीर्तितमितिसामान्येन ४९

नारदस्मरणात् अहनित्रिधाविभक्तेपूर्वोभागःपूर्वाह्णोमध्योमध्यान्हः उत्तरोपराह्णः तथापरोपिकालविशेषोविधिप्रतिषेधमुखेनदर्शितः विधिमुखस्तावत् अग्नेःशिशिरहेमंतौवर्षाश्चैवप्रकीर्तिताः सरिद्ग्रीष्मेषुसलिलं हेमंतेशिशिरेविषम् चैत्रोमार्गशिराश्चैववैशाखश्चतथैवच एतेसाधारणामासादिव्यानामविरोधिनः कोशस्तुसर्वदादेयस्तुलास्यात्सार्वकालिकीति कोशग्रहणंसर्वशपथानामुपलक्षणम् तंदुलानांपुनर्विशेषानभिधानात्सार्वकालिकत्वम् प्रतिषेधमुखोपि नशीतेतोयसिद्धिःस्यान्नोष्णकालेग्निशोधनम् नप्रावृषिविषंदद्यात्प्रवातेनतुलांतथा नापराह्णेनसंध्यायांनमध्यान्हेकदाचनेति नशीतेतोयसिद्धिःस्यादित्यत्रशीतशब्देनहेमंतशिशिरवर्षाणांग्रहणम् नोष्णकालेग्निशोधनमित्य

तुलास्त्रीबालवृद्धांधपंगुब्राह्मणरोगिणाम्

त्रोष्णकालशब्देनच ग्रीष्मशरदोः विधानलब्धस्यापिपुनर्निषेधआदरार्थः प्रयोजनंतुवक्ष्यते ९९ अधिकारिव्यवस्थामाह स्त्रीस्त्रीमात्रं जातिवयोवस्थाविशेषानादरेण बालआषोडशाद्वर्षाज्जातिविशेषानादरेण वृद्धोशीतिकावरः अंधोनेत्रविकलःपंगुःपादविकलःब्राह्मणोजातिमात्रम् रोगीव्याधितः एतेषांशोधनार्थंतुलैवेतिनियम्यते अग्निःफालस्तप्तमाषश्चक्षत्रियस्य जलमेववैश्यस्य वाशब्दोऽवधारणे विषस्ययवाउक्तपरिमाणाःसप्तैवशूद्रस्यशोधनार्थंभवंति ब्राह्मणस्यतुलाविधानात् शूद्रस्ययवाःसप्तविषस्येवेति विषविधानादग्निर्जलंवेतिक्षत्रियवैश्यविषयम् युक्तं एतदेवस्पष्टीकृतंपितामहेन ब्राह्मणस्यधटोदेयःक्षत्रियस्यहुताशनः वैश्यस्यसलिलंप्रोक्तंवि

षंशूद्रस्यदापयेदिति यत्तुस्त्र्यादीनांदिव्याभावस्मरणं सव्रतानांभृशार्तानांव्याधितानांतपस्विनाम् स्त्रीणांचनभवेद्दिव्यंयदिधर्मस्त्वपेक्षित इति तदुभ्याबान्यतरःकुर्यादितिविकल्पनिवृत्त्यर्थं एतदुक्तंभवति अवष्टंभाभियोगेषुस्त्र्यादीनामभियोक्तृत्वेभियोज्यानामेवदिव्यमेतेषा मभियोज्यत्वेप्यभियोक्तृणामेवदिव्यम् परस्पराभियोगेतुविकल्पएव तत्रापितुलैवेत्यनेनवचनेननियम्यते तथामहापातकादिशंका भियोगेस्त्र्यादीनांतुलैवेति एतच्चवचनंसर्वदिव्यसाधारणेषुमार्गशिरश्चैत्रवैशाखेषुस्त्र्यादीनांसर्वदिव्यसमवधानेनियामकतयार्थवत् नचसार्वकालंस्त्रीणांतुलैवेति स्त्रीणांचनविषंप्रोक्तंनचापिसलिलंस्मृतम् धटकोशादिभिस्तासामंतस्तत्त्वंविचारयेदितिविषसलिलव्य-

अग्निर्जलंवाशूद्रस्ययवाःसप्तविषस्यवा १००

तिरिक्तधटकोशाग्न्यादिभिःशुद्धिविधानात् एवंबालादिष्वपियोजनीयम् तथाब्राह्मणादीनामपिनसार्वकालिकस्तुलादिनियमः सर्वे- षामेववर्णानांकोशशुद्धिर्विधीयते सर्वाण्येतानिसर्वेषांब्राह्मणस्यविषंविनेतिपितामहवचनात् तस्मात्साधारणेकालेबहुदिव्यसम वधानेतुलादिनियमार्थमेवेदंवचनम् कालांतरेतुतत्तत्कालविहितंसर्वेषां तथाहि वर्षास्वग्निरेवसर्वेषां हेमंतशिशिरयोस्तुक्षत्रि याणामग्निविषयोर्विकल्पः ब्राह्मणस्यत्वग्निरेव नकदाचिद्विषंब्राह्मणस्य ब्राह्मणस्यविषंविनेतिप्रतिषेधात् ग्रीष्मशरदोस्तुसलि लमेव येषांतुव्याधिविशेषेणाग्न्यादिनिषेधः कुष्ठिनांवर्जयेदग्निंसलिलंश्वासकासिनाम् पित्तश्लेष्मवतांनित्यंविषंतुपरिवर्जयेदिति ५०

तेषामग्न्यादिकालेपिसाधारणंतुलाद्येवदिव्यंभवति तथा तोयमग्निर्विषंचैवदातव्यंबलिनांनृणामितिवचनाद्दुर्बलानामपिसर्वथापिविधिप्र तिषेधाहतकालानतिक्रमेणजातिवयोवस्थानाश्रितानिदिव्यानिदेयानि १०० महाभियोगेष्वेतानीत्युक्तं तत्राभियोगस्ययदपेक्ष्यमहत्त्वंतद् दानीमाह पणसहस्रादर्वाक्फालंविषंतुलांवानकारयेत् मध्यवर्तिजलमपि यथोक्तम् तुलादीनिविषांतानिगुरुष्वर्थेषुदापयेदिति अत्रको शस्याग्रहणम् कोशमल्पेपिदापयेदित्यल्पाभियोगेपितस्यस्मरणात् एतानिचत्वारिदिव्यानिपणसहस्रादूर्ध्वमेवभवंतीति नार्वागित्य र्थः नन्वर्वागप्यग्न्यादीनिपितामहेनदर्शितानि सहस्रेतुधटंदद्यात्सहस्रार्द्धेतथायसम् अर्द्धस्यार्द्धेतुसलिलंतस्यार्द्धेतुविषंस्मृतमिति

नासहस्राद्धरेत्फालंनविषंनतुलांतथा

सत्यम् तत्रेत्थंव्यवस्था यद्द्रव्यापहारेपातित्यंभवति तद्विषयंपितामहवचनमितरत्द्रव्यविषयंयोगीश्वरवचनमिति एतच्चवचनद्वयं स्तेयसाहसविषयम् अपन्हवेतुविशेषोदर्शितःकात्यायनेन दत्तस्यापन्हवोयत्रप्रमाणंतत्रकल्पयेत् स्तेयसाहसयोर्दिव्यंस्वल्पेप्यर्थेप्र दापयेत् सर्वद्रव्यप्रमाणंतुज्ञात्वादिव्यंप्रकल्पयेत् हेमप्रमाणयुक्तंतुतदादिव्यंनियोजयेत् ज्ञात्वासंख्यांसुवर्णानांशतनाशेविषंस्मृ तम् अशीतेस्तुविनाशेवैदद्यादेवहुताशनम् षष्ट्यानाशेजलंदेयंचत्वारिंशतिवैधटम् त्रिंशद्दशविनाशेतुकोशपानंविधीयते पंचा

धिकस्यवानाशेततोर्द्धार्द्धस्यतंडुलाः ततोर्द्धार्द्धविनाशेहिस्पृशेत्सुत्रादिमस्तकान् ततोर्द्धार्द्धविनाशेतुलौकिकाश्चक्रियाःस्मृताः एवंविचा रयन्राजाधर्मार्थाभ्यांनहीयतइति ज्ञात्वासंख्यांसुवर्णानामित्यत्रसुवर्णशब्दःषोडशमाषाःसुवर्णइत्युक्तपरिमाणवचनः नाशशब्दश्चात्रापन्हववचनः नासहस्रादित्यत्रतुताम्रिकपणसहस्रंबोद्धव्यम् ननुनृपद्रोहेपातकेचैतानिदिव्यान्युक्तानि तत्कथम् नासहस्राद्धरेत्फालमित्यत्राह नृपद्रोहेषुमहापातकाभियोगेच सदाद्रव्यसंख्यामनपेक्ष्यैतानिदिव्यानिकुर्युरुपवासादिनाशुचयःसंतः तथादेशविशेषोपिनारदेनोक्तः सभाराजकुलद्वारेदेवायतनचत्वरे निधेयोनिश्चलःपूज्योधूपमाल्यानुलेपनैरिति निधेयोधटः व्यवस्थाचकात्यायनेनोक्ता

नृपार्थेष्वभिशापेचवहेयुःशुचयेसदा १०१ तुलाधारणविद्वद्भिरभियुक्तस्तुलाश्रितः प्रतिमानसमीभूतोरेखांकृत्वावतारितः १०२

इंद्रस्थानेभिशस्तानांमहापातकिनांनृणाम् नृपद्रोहेप्रवृत्तानांराजद्वारेप्रयोजयेत् प्रातिलोम्यप्रसूतानांदिव्यंदेयंचतुष्पथे अतोन्येषुतुकार्येषुसभामध्येविदुर्बुधाः अस्पृश्याधमदासानांम्लेच्छानांपापकारिणाम् प्रातिलोम्यप्रसूतानांनिश्चयोनतुराजनि तत्प्रसिद्धानिदिव्यानिसंशयेतेषुनिर्दिशेदिति इतिदिव्यमातृका १०१ एवंसर्वदिव्योपयोगिनींव्यवहारमातृकामभिधायेदानींधटादिदिव्यानांप्रयोगमाह तुलायाधारणंतोलनंयेविदंतिसुवर्णकारप्रभृतयः तैःप्रतिमानेनमृदादिनासमीभूतःसमीकृतस्तुलामाश्रितोधिरूढोनियुक्तोभियोक्तावादिव्यकारीलेखांकृत्वायेनसन्निवेशेनप्रतिमानसमीकरणदशायांशिक्यतलेवस्थितस्तस्मिन्पांडुलेख्येनांकयित्वावता ५१

रितस्तुलामभिमंत्रयेत प्रार्थयेतानेनमंत्रेण हेतुलेत्वंसत्यस्यस्थानमसि पुरा आदिसृष्टौदेवैर्हिरण्यगर्भप्रभृतिभिर्विनिर्मितोत्पादिता तत्तस्मात्सत्यंसंदिग्धस्यार्थस्यस्वरूपंवदर्शय कल्याणिशोभने अस्मात्संशयान्मांविमोचय हेमातःयद्यहंपापकृदसत्यवाद्यस्मिततोमांत्वमधोनय अथशुद्धःसत्यवाद्यस्मिततोमामूर्ध्वंनयेति प्राड्विवाकस्यतुलाभिमंत्रणमंत्रःस्मृत्यंतरोक्तः अयंतुदिव्यकारिणः जयपराजयलक्षणंतुमंत्रलिंगादेवावगम्यतेइतिनपृथगुक्तम् धटनिर्माणंपुनरारोहाद्यर्थसिद्धमेव पितामहनारदादिभिःस्पष्टीकृतम् तद्यथा छित्वातुयज्ञियंवृक्षंयूपवन्मंत्रपूर्वकम् प्रणम्यलोकपालेभ्यस्तुलाकार्यामनीषिभिः मंत्रःसौम्योवानस्पत्यश्छेदनेजप्यएव चतुरस्रातुलाकार्यादृढारज्जीतथैवच कट

त्वंतुलेसत्यधामासिपुरादेवैर्विनिर्मिता तत्सत्यंवदकल्याणिसंशयान्मांविमोचय १०३
यद्यस्मिपापकृन्मातस्ततोमांत्वमधोनय शुद्धश्चेद्गमयोर्ध्वंमांतुलामित्यभिमंत्रयेत् १०४

कानिचदेयानित्रिषुस्थानेषुचार्थवत् चतुर्हस्तातुलाकार्यापादौचोपरितत्समौ प्रांतरंतुतयोर्हस्तौभवेदध्यर्द्धएववा हस्तद्वयंनिखेयंतुपादयोरुभयोरपि तोरणेचतथाकार्येपार्श्वयोरुभयोरपि धटादुच्चतरेस्यातांनित्यंदशभिरंगुलैः अवलंबौचकर्तव्यौतोरणाभ्यामधोमुखौ मृन्मयौसूत्रसंबद्धौधटमस्तकचुंबिनौ प्राङ्मुखोनिश्चलःकार्यःशुचौदेशेधटस्तथा शिक्यद्वयेसमासज्यपार्श्वयोरुभयोरपि प्राङ्मुखान्कल्पयेद्दर्भान्शिक्ययोरुभयोरपि पश्चिमेतोलयेत्कर्तॄनन्यस्मिन्मृत्तिकांशुभाम् पिटकंपूरयेत्तस्मिन्निष्टकाग्रावपांसुभिः अत्रचमृत्तिकाग्रावणां

सूनांविकल्पः परीक्षकानियोक्तव्यास्तुलामानविशारदाः वणिजोहेमकाराश्चकांस्यकारास्तथैवच कार्यःपरीक्षकैर्नित्यमवलंबसमोधटः उ
दकंचप्रदातव्यंधटस्योपरिपंडितैः यस्मिन्नप्लवतेतोयंसविज्ञेयःसमोधटः तोलयित्वानरंपूर्वंपश्चात्तमवतार्यतु धटंतुकारयेन्नित्यंपता
काध्वजशोभितम् ततआवाहयेद्देवान्विधिनानेनमंत्रवित् वादित्रतूर्यघोषैश्चगंधमाल्यानुलेपनैः प्राङ्मुखःप्रांजलिर्भूत्वाप्राड्विवाकस्ततो
वदेत् एह्येहिभगवन्धर्मस्मिन्दिव्येसमाविश सहितोलोकपालैश्चवस्वादित्यमरुद्गणैः आवाह्यतुधटेधर्मंपश्चादंगानिविन्यसेत् इंद्रं
पूर्वेतुसंस्थाप्यप्रेतेशंदक्षिणेतथा वरुणंपश्चिमेभागे कुबेरंचोत्तरेतथा अग्न्यादिलोकपालांश्चकोणभागेषुविन्यसेत् इंद्रःपीतोयमःश्या
मोवरुणःस्फटिकप्रभः कुबेरस्तुसुवर्णाभोवन्हिश्चापिसुवर्णभः तथैवनिर्ऋतिःश्यामोवायुर्धूम्रःप्रशस्यते ईशानस्तुभवेद्रक्तःएवंध्या
येत्क्रमादिमान् इंद्रस्यदक्षिणेपार्श्वेवसूनाराधयेद्बुधः धरोध्रुवस्तथासोमआपश्चैवानिलोऽनलः प्रत्यूषश्चप्रभासश्चवसवोष्टौप्रकीर्ति
ताः देवेशेशानयोर्मध्येआदित्यानांतथायनम् धातार्यमाचमित्रश्चवरुणोंशोभगस्तथा इंद्रोविवस्वान्पूषाचपर्जन्योदशमःस्मृतः तत-
स्त्वष्टाततोविष्णुरजघन्योजघन्यजः इत्येतेद्वादशादित्यानामभिःपरिकीर्तिताः अग्नेःपश्चिमभागेतुरुद्राणामयनंविदुः वीरभद्रश्चशंभु
श्चगिरिशश्चमहायशाः अजैकपादहिर्बुध्न्यःपिनाकीचापराजितः भुवनाधीश्वरश्चैवकपालीचविशांपतिः स्थाणुर्भवश्चभगवान्रुद्रा
स्त्वेकादशस्मृताः प्रेतेशरक्षोमध्येतुमातृस्थानंप्रकल्पयेत् ब्राह्मीमाहेश्वरीचैवकौमारीवैष्णवीतथा वाराहीचैवमाहेंद्रीचामुंडागणसंयु
ता निर्ऋतेरुत्तरेभागेगणेशायतनंविदुः वरुणस्योत्तरेभागेमरुतांस्थानमुच्यते पवनःस्पर्शनोवायुरनिलोमारुतस्तथा प्राणःप्राणेश ५२

जीवोचमरुतोष्टौप्रकीर्तिताः धटस्योत्तरभागेतुदुर्गामावाहयेद्बुधः एतासांदेवतानांतुस्वनाम्नापूजनंविदुः पूजावसानंधर्मायदत्वाचार्घादिकं
क्रमात् अर्घादिपश्चादंगानांभूषांतमुपकल्पयेत् गंधादिकांनिवेद्यांतांपरिचर्यांप्रकल्पयेदिति अत्रचतुलांपताकाध्वजालंकृतांविधायतस्या
मेत्येहीतिमंत्रेण धर्ममावाह्य धर्मायार्घंकल्पयामिनमइत्यादिनाप्रयोगेणार्घ्यपाद्याचमनीयमधुपर्काचमनीयस्नानवस्त्रयज्ञोपवीताचम
नीयमुकुटकटकादिभूषांतंदत्वा इंद्रादीनांदुर्गांतानांप्रणवाद्यैःस्वनामभिश्चतुर्थ्यंतैर्नमोंतैरर्घ्यादिभूषांतंपदार्थानुसमयोगंदत्वाधर्माय
गंधपुष्पधूपदीपनैवेद्यानिदत्वाइंद्रादीनांगंधादीनिपूर्ववद्दद्यात् गंधपुष्पाणिचधटपूजायांरक्तानिकार्याणि यथाहनारदः रक्तैर्गंधैश्च
माल्यैश्चदद्याधूपाक्षतादिभिः अर्चयेत्तुधटंपूर्वंततःशिष्टांस्तुपूजयेदिति इंद्रादीनांतुविशेषानभिधानाद्यथालाभंरक्तैरन्यैर्वापूजनमिति
पूजार्थक्रमः एतच्चसर्वंप्राड्विवाकःकुर्यात् यथोक्तम् प्राड्विवाकस्ततोविप्रोवेदवेदांगपारगः श्रुतवृत्तोपसंपन्नःशांतचित्तोविमत्सरः स
त्यसंधःशुचिर्दक्षःसर्वप्राणिहितेरतः उपोषितःशुद्धवासाःकृतदंतानुधावनः सर्वासांदेवतानांचपूजांकुर्याद्यथाविधि तथा ऋत्विग्भिश्च
तुर्भिश्चतसृषुदिक्षुलौकिकाग्नौहोमःकार्यः यथाह चतुर्दिक्षुतथाहोमःकर्तव्योवेदपारगैः आज्येनहविषाचैवसमिद्भिर्होमसाधनैः
सावित्र्याप्रणवेनाथस्वाहांतेनैवहोमयेत् प्रणवादिकांगायत्रीमुच्चार्यपुनःस्वाहाकारांतंप्रणवमुच्चार्यसमिदाज्यचरून्प्रत्येकमष्टोत्तरशतं
जुहुयादित्यर्थः एवंहवनांतांदेवपूजांविधायानंतरमभियुक्तमर्थंवक्ष्यमाणमंत्रसहितंपत्रेलिखित्वातत्पत्रं शोध्यशिरोगतंकुर्यात् य
थाह यच्चार्थमभियुक्तःस्याल्लिखित्वातंतुपत्रके मंत्रेणानेनसहितंतत्कार्यंतुशिरोगतम् मंत्रश्चायम् आदित्यचंद्रावनिलोनलश्चद्यौ

भूमिरापोहृदयंयमश्च अहश्चरात्रिश्चउभेचसंध्येधर्मश्चजानातिनरस्यवृत्तमिति एतच्चधर्मावाहनादिशिरसिपत्रारोपणांतमनुष्ठानकांडंसर्व
दिव्यसाधारणम् यथोक्तम् इमंमंत्रविधिंकृत्स्नंसर्वदिव्येषुयोजयेत् आवाहनंचदेवानांतथैवपरिकल्पयेदिति अनंतरंप्राड्विवाकोधटमामंत्रयते
धटमामंत्रयेच्चैवविधिनानेनशास्त्रविदितिस्मरणात् मंत्राश्चदर्शिताः त्वंधटब्रह्मणासृष्टपरीक्षार्थंदुरात्मनाम् धकाराद्धर्ममूर्तिस्त्वंटकारात्कुटि
लंनरम् धृतोभावयसेयस्माद्धटस्तेनाभिधीयसे त्वंवेत्सिसर्वजंतूनांपापानिसुकृतानिच त्वमेवदेवजानीषेनविदुर्यानिमानवाः व्यवहाराभिश
स्तोऽयंमानुषःशुद्धिमिच्छति तदेनंसंशयादस्माद्धर्मतस्त्रातुमर्हसीति शोध्यस्तु त्वंतुलेत्यादिमापूर्वोक्तेनमंत्रेणतुलामामंत्रयते अनंतरंप्रा
ड्विवाकः शिरोगतपत्रकंशोध्ययथास्थानंनिवेश्यचधटमारोपयति पुनरारोपयेत्तस्मिन्स्थितावस्थितपत्रकमितिस्मरणात् आरोपितंचवि
नाडीपंचकंयावत्तथैवावस्थापयेत् तत्कालपरीक्षांचज्योतिःशास्त्राभिज्ञःकुर्यात् ज्योतिर्विद्ब्राह्मणःश्रेष्ठःकुर्यात्कालपरीक्षणम् विनाड्यःपंच
विज्ञेयाःपरीक्ष्याःकालकोविदैरितिस्मरणात् दशागुर्वक्षरोच्चारणकालःप्राणः षट्प्राणाविनाडी उक्तंच दशगुरुवर्णाःप्राणः षट्प्राणाःस्याद्विना
डिकातासाम् षष्ट्याघटीघटीनांषष्ट्याहोरात्रउक्तश्च खाग्निभिर्दिनैर्मासइति तस्मिंश्चकालेशुद्ध्यशुद्धिपरीक्षणार्थंशुचयःपुरुषाराज्ञानियो
क्तव्याः तेचशुद्ध्यशुद्धीकथयंति यथोक्तंपितामहेन साक्षिणोब्राह्मणाःश्रेष्ठायथादृष्टार्थवादिनः ज्ञानिनःशुचयोऽलुब्धानियोक्तव्यानृपेणतु
शंसंतिसाक्षिणःसर्वेशुद्ध्यशुद्धीनृपेतदेति शुद्ध्यशुद्धिनिर्णयकारणंचोक्तं तुलितोयदिवर्द्धेतसशुद्धःस्यान्नसंशयः समोवाहीयमानोवान ५३
सशुद्धोभवेन्नरइति यत्तुपितामहवचनम् अल्पदोषःसमोज्ञेयोबहुदोषस्तुहीयतइति तत्रयद्यभियुक्तस्यार्थस्याल्पत्वंबहुत्वंवनदिव्येना

वधारयितुंशक्यते तथापिसकृदमतिपूर्वत्वेनचमहत्त्वमितिदंडप्रायश्चित्ताल्पत्वमहत्त्वमवधार्यते यदाचानुपलक्ष्यमाणदृष्टकारणएवकक्ष्यादीनांछे
दोभंगोवाभवति तदाप्यशुद्धिरेव कक्षच्छेदेतुलाभंगेधटकर्कटयोस्तथा रज्जुच्छेदेक्षभंगेवातथैवाशुद्धिमादिशेदितिस्मरणात् कक्ष्यंशिक्यत
लम् कर्कटौतुलांतयोःशिक्याधारावीषद्वक्रावायसकीलकौकर्कटशृंगसन्निभौ अक्षःपादस्तंभयोरुपरिनिविष्टस्तुलाधारपादः यदातुदृश्य
मानकारणएषांभंगस्तदापुनरारोपयेत् शिक्यादिच्छेदभंगेषुपुनरारोपयेन्नरमितिस्मरणात् ततश्च ऋत्विक्पुरोहिताचार्यान्दक्षिणाभिश्च
तोषयेत् एवंकारयितााराजाभुक्त्वाभोगान्मनोरमान् महतींकीर्तिमाप्नोतिब्रह्मभूयायकल्पते यदात्वुक्तलक्षणंधटंतथैवस्थापयितुमिच्छति
तदावायसाद्युपघातनिरासार्थंकपाटादिसहितांशालांकुर्यात् विशालामुन्नतांशुभ्रांधटशालांतुकारयेत् यत्रस्थोनोपहन्येतश्वभिश्चांडा
लवायसैः तत्रैवलोकपालादीन्सर्वदिक्षुनिवेशयेत् त्रिसंध्यंपूजयेच्चैनान्गंधमाल्यानुलेपनैः कपाटबीजसंयुक्तांपरिचारकरक्षिताम् मृ
त्पानीयाग्निसंयुक्तांमशून्यांकारयेन्नृप इतिस्मरणात् बीजानियवव्रीह्यादीनाम् इतिधटविधिः १०२ ३ ४ इदानींक्रमप्राप्त
मग्निविधिमाह दिव्यमातृकोक्तसाधारणधर्मेषुसत्सुतुलाविधानोक्तधर्मावाहनादिशिरःपत्रारोपणांतेचविध्यंते सत्ययमग्निविधौविशे
षः विमृदितव्रीहेर्विमृदितावियर्षिताव्रीहयःकराभ्यांयेनासौविमृदितव्रीहिस्तस्यकरौक्षालयित्वा तिलकालकव्रणकिणादिस्थानेषलक्ष
रसादिनांकयित्वा यथाहनारदः हस्तक्षतेषुसर्वेषुकुर्याद्धंसपदानित्विति अनंतरंसप्ताश्वत्थस्यपर्णानिहस्तयोरंजलीकृतयोर्न्यसेत्
पत्रैरंजलिमापूर्यआश्वत्थैःसप्तभिःसमैरितिस्मरणात् तानिचहस्तसहितानिसूत्रेणतावद्वेष्टयेत् यावंत्यश्वत्थपर्णानिसप्तकृत्वोवेष्टयेदि

स्यर्थः सूत्राणिचसप्तशुक्लानिभवंति वेष्टयीत भितैर्हस्तौसप्तभिः सूत्रतंतुभिरितिनारदवचनात् तथासप्तशमीपत्राणिसप्तैवदूर्वापर्णा
नि-चाक्षतांश्चदध्यक्तानक्षतांश्चाश्वत्थपत्राणामुपरिविन्यसेत् सप्तपिप्पलपत्राणि शमीपत्राण्यथाक्षतान् दूर्वायाःसप्तपत्राणिदध्यक्तां
श्चाक्षतान्न्यसेत्इतिस्मरणात् कुसुमानिचविन्यसेत् सप्तपिप्पलपत्राणि अक्षतंसुमनोदधि हस्तयोर्निक्षिपेत्तत्रसूत्रेणावेष्टनंतथेतिपि
तामहवचनात् सुमनसःपुष्पाणियदपिस्मरणम् अयस्तसंतुपाणिभ्यामर्कपत्रैस्तुसप्तभिः अंतर्हितंवहेःशुद्धमदग्धःसप्तमेपदइ
तितदप्यश्वत्थपत्राभावे अर्कपत्रविषयंवेदितव्यम् अश्वत्थपत्राणांपितामहप्रशंसावचनेनमुख्यत्वावगमात् पिप्पलाज्जायतेवह्निःपिप्पलोवृक्षराट्

करोविमृदितव्रीहेर्लक्षयित्वाततोन्यसेत् सप्ताश्वत्थस्यपत्राणितावत्सूत्राणिवेष्टयेत् १०५
त्वमग्नेसर्वभूतानामंतश्चरसिपावक साक्षिवत्पुण्यपापेभ्योब्रूहिसत्यंकवेमम १०६

स्मृतः अतस्तस्यतुपत्राणिहस्तयोर्विन्यसेद्बुध इति १०५ कर्तुरग्न्यभिमंत्रणमाह अग्नेत्वंसर्वभूतानांजरायुजांडजस्वेदजोद्भिज्जानामं
तःशरीराभ्यंतरेचरसि उपयुक्तान्नपानादीनांपाचकत्वेनवर्तसे पावकशुद्धिहेतो कवेक्रांतदर्शिन् साक्षिवत्पुण्यपापेभ्यः सत्यंब्रूहि पुण्य
पापेभ्यइतिल्यब्लोपेपंचमी पुण्यपापान्यवेक्ष्यसत्यंब्रूहि दर्शयेदित्यर्थः अयःपिंडेत्रिभिस्तापैः संतप्ते संदंशेनपुरत आनीते कर्तापश्चि ५४
ममंडले प्राङ्मुखवस्तिष्ठन् अनेनमंत्रेणाग्निमंत्रयते यथाहनारदः अग्निवर्णमयःपिंडंसस्फुलिंगंसुरंजितम् तापेतृतीयेसंताप्यब्रू

यात्सत्यपुरस्कृतमिति अस्यार्थः लोहशुद्ध्यर्थंसंतप्तलोहपिंडमुदकेनिक्षिप्यपुनःसंताप्योदकेनिक्षिप्य तृतीयेतापेसंताप्यसंदंशेनगृहीत्वा
पुरत आनीतेसत्यपुरस्कृतंसत्यशब्दयुक्तं त्वमग्नेसर्वभूतानामित्यादिमंत्रंकर्ताब्रूयादिति प्राड्विवाकस्तुमंडलभूभागादक्षिणप्रदेशेलौकिक
मग्निमुपसमाधाय अग्नयेपावकायस्वाहेति आज्येनाष्टोत्तरशतवारंजुहुयात् शांत्यर्थंजुहुयादग्नौघृतमष्टोत्तरंशतमितिस्मरणात् हुत्वा
चतस्मिन्नग्नावयःपिंडंप्रक्षिप्यतस्मिंस्ताप्यमानेधर्मावाहनादिहवनांतंपूर्वोक्तविधिंविधायतृतीयेतापेवर्तमाने अयःपिंडमग्निमेभिर्मंत्रैर
भिमंत्रयते त्वमग्नेवेदाश्चत्वारस्त्वंचयज्ञेषुहूयसे त्वंमुखंसर्वदेवानांत्वंमुखंब्रह्मवादिनाम् जठरस्थोहिभूतानांततोवेत्सिशुभाशुभम् पा

तस्येत्युक्तवतोलोहंपंचाशत्पलिकंसमम् अग्निवर्णन्यसेत्पिंडंहस्तयोरुभयोरपि १०७

पंपुनासिवैयस्मात्तस्मात्पावकउच्यसे पापेषुदर्शयात्मानमर्चिष्मान्भवपावक अथवाशुद्धभावेषुशीतोभवहुताशन त्वमग्नेसर्वदेवाना
मंतश्चरसिसाक्षिवत् त्वमेवदेवजानीषेनविदुर्यानिमानवाः व्यवहाराभिशस्तोयंमानुषःशुद्धिमिच्छति तदेनंसंशयादस्माद्धर्मतस्त्रा
तुमर्हसीति १०६ अपिच तस्यकर्तुरित्युक्तवतस्त्वमग्नेसर्वभूतानामित्याद्यभिमंत्रणंकृतवतो लोहं लोहविकारपिंडंपंचाशत्पलिकंपं
चाशत्पलमस्मिन्सममस्त्रिरहितम् सर्वतश्चसमंवृत्तंश्लक्ष्णंच तथाष्टांगुलायामं अस्त्रिहीनंसमंकृत्वा अष्टांगुलायाममयोमयम्
पिंडंतुतापयेदग्नौपंचाशत्पलिकंसममितिपितामहस्मरणात् अग्निवर्णमग्निसदृशमुभयोर्हस्तयोरश्वत्थपत्रदधिदूर्वाद्यंतरित
योर्न्यसेत् निक्षिपेत्प्राड्विवाकः १०७

ततः किंकुर्यादित्यत आह सपुरुषस्तमंलोहपिंडं अंजलिनागृहीत्वासप्तमंडलानिशनैर्व्रजेत् एवकारेणमंडलेष्वेवपदन्यासंमंडलानतिक्र
मणंदर्शयति यथाहपितामहः नमंडलमतिक्रामेन्नाप्यर्वाक्स्थापयेत्पदमिति सप्तैवमंडलानिशनैर्व्रजेदित्युक्तम् तत्रैकैकंमंडलंकिंप्र
माणंमंडयोरंतरंचकियत्प्रमाणकमित्यत आह षोडशअंगुलानियस्यतत् षोडशांगुलकं षोडशांगुलप्रमाणंमंडलंबोद्धव्यम् मंडलयोरं
तरंमध्यंचतावदेव षोडशांगुलमेवसप्तमंडलानिव्रजेदितिवदता प्रथममेकमेवस्थानंमंडलयुक्तं अतश्चाष्टमंडलानिषोडशांगुलकानिमंड
लांतराणितु सप्ततावत्प्रमाणानि एतदेवनारदेनपरिसंख्यायोक्तम् द्वात्रिंशदंगुलंप्राहुर्मंडलान्मंडलांतरम् अष्टभिर्मंडलैरेवमंगु

सतमादायसप्तैवमंडलानिशनैर्व्रजेत् षोडशांगुलकंज्ञेयंमंडलंतावदंतरम् १०८

लानांशतद्वयम् चत्वारिंशत्समधिकं भूमेरंगुलमानतइति अयमर्थः अवस्थानमंडलात् षोडशांगुलान्मंडलांतरमन्यन्मंडलम् द्विती
याद्येकमेकं द्वात्रिंशदंगुलंसांतरालंतदेवमनवस्थानमंडलंषोडशांगुलं गंतव्यानिचसप्तमंडलानिसांतरालानि द्वात्रिंशदंगुलान्येव मष्टा-
भिर्मंडलैश्चत्वारिंशदधिकंशतद्वयंभूमेरंगुलमानतोंगुलमानमिति सार्वविभक्तिकस्तसिः अस्मिंस्तुपक्षेवस्थानमंडलंषोडशांगुलंनिधा
य द्वात्रिंशदंगुलप्रमाणानांसप्तानांसांतरालमंडलभूभागानामेकंभूभागंद्विधाविभज्यांतरालभूभागान् षोडशांगुलप्रमाणान् विहायमं
डलभूभागेषु षोडशांगुलप्रमाणेषु गंतृपदप्रमाणानिसप्तमंडलानिकार्याणि यथातेनैवोक्तम् मंडलस्यप्रमाणंतुकुर्यान्नित्पदसंमित

मिति यत्तुपितामहेनोक्तम् कारयेन्मंडलान्यष्टौपुरस्तान्नवमंतथा आग्नेयंमंडलंचाद्यंद्वितीयंवारुणंस्मृतम् तृतीयंवायुदैवत्यंचतुर्थंय
मदैवतम् पंचमंत्विंद्रदैवत्यंषष्ठंकौबेरमुच्यते सप्तमंसोमदैवत्यंसावित्रंत्वष्टमंतथा नवमंसर्वदैवत्यमितिदिव्यविदोविदुः द्वात्रिंशदंगु
लंप्राहुर्मंडलान्मंडलांतरम् अष्टाभिर्मंडलैरेवमंगुलानांशतद्वयम् षट्पंचाशत्समधिकंभूमेस्तुपरिकल्पना कर्तुःपदसमंकार्यंमंडलंतु
प्रमाणतः मंडलेमंडलेदेयाःकुशाःशास्त्रप्रचोदिताइति तन्नवमंसर्वदैवत्यमपरिमितांगुलप्रमाणंमंडलंविहायाष्टाभिर्मंडलैरष्टाभिश्चां
तरालैःप्रत्येकंषोडशांगुलप्रमाणैरंगुलानांषट्पंचाशदधिकंशतद्वयंसंपद्यते तत्रापिगंतव्यानिसप्तैवमंडलानि यतः प्रथमेतिष्ठति न

मुक्त्वाग्निंमृदितव्रीहिरदग्धः शुद्धिमाप्नुयात् अंतरापतितेपिंडेसंदेहेवापुनर्हरेत् १०९

वमेक्षिपतीतिनविरुध्यते अंगुलप्रमाणंच तिर्यग्यवोदराण्यष्टावूर्ध्वावाव्रीहयस्त्रयः प्रमाणमंगुलस्योक्तंवितस्तिर्द्वादशांगुलः हस्तो
वितस्तिद्वितयंदंडोहस्तचतुष्टयम् तत्सहस्रद्वयंक्रोशोयोजनंतच्चतुष्टयमितिबोद्धव्यम् १०८ सप्तमंडलानिगत्वाकिंकर्तव्यमित्यत आह
अष्टमेमंडलेस्थित्वानवमेमंडले अग्नितप्तमयःपिंडंत्यक्त्वाकराभ्यांव्रीहीन्मर्दयित्वा अदग्धहस्तश्चेच्छुद्धिमाप्नुयात् दग्धहस्तश्चेदशुद्धइ
त्यर्थसिद्धम् यस्तुसंत्रासात्प्रस्खलन्हस्ताभ्यामन्यत्रदह्यते तथाप्यशुद्धोनभवति यथाहकात्यायनः प्रस्खलन्नभिशस्तश्चेत्स्थानाद
न्यत्रदह्यते अदग्धंतंविदुर्देवास्तस्यभूयोपिदापयेदिति यदागच्छतोंतराष्टमंडलादर्वागेवपिंडःपतति दग्धादग्धत्वेवासंशयस्त

द्रापुनर्हरेदित्यर्थशास्त्रमुक्तम् तत्रचायमनुष्ठानक्रमः पूर्वेद्युर्भूशुद्धिंविधायपरेद्युर्मंडलानियथाशास्त्रंनिर्माय मंडलाधिदेवताश्च
तत्र संपूज्याग्निमुपसमाधायशांतिहोमंनिर्वर्त्याग्नावयःपिंडंनिधाय धर्मावाहनादिसर्वदेवतापूजां हवनांतांनिर्वर्त्य उपोषितस्यस्नातस्या
र्द्रवाससः पश्चिमेमंडलेतिष्ठतोव्रीहिमर्दनादिकंकरसंस्कारंविधायप्रतिज्ञापत्रंसमंत्रकंकर्तुः शिरसिबध्वा प्राड्विवाकस्तृतीयेतापेऽग्निम
भिमंत्र्यतत्समयःपिंडंसंदंशनेगृहीत्वाकर्त्रभिमंत्रितंतस्यांजलौनिदध्यात् सोपिमंडलानिसप्तगत्वानवमेमंडलेप्रक्षिप्य। दग्धःशुद्धोभव
तीति इत्यग्निविधिः १०९ संप्रत्युदकविधिमाह हेवरुणसत्येनमामभिरक्षत्वमित्यनेनमंत्रेण कमुदकमभिशाप्याभिमंत्र्य नाभिदघ्नो

सत्येनमाभिरक्षत्वंवरुणेत्यभिशाप्यकम् नाभिदघ्नोदकस्थस्यगृहीत्वोरूजलंविशेत् ११०

दकस्थस्यनाभिप्रमाणोदकस्थितस्यपुरुषस्योरूगृहीत्वाशोध्योजलंप्रविशेत् जलेनिमज्जेत् एतच्चवरुणपूजायांसत्यां गंधमाल्यैःसुरभि
भिर्मधुक्षीरघृतादिभिः वरुणायप्रकुर्वीतपूजामादौसमाहितइतिनारदस्मरणात् यथासाधारणेषुधर्मेषुधर्मावाहनादिसकलदेवतापूजा
होमसमंत्रकप्रतिज्ञापत्रशिरोनिवेशनांतेषुसत्सुच तथा तोयत्वंप्राणिनांप्राणसृष्टेराद्यंतुनिर्मितम् शुद्धेश्चकारणंप्रोक्तंद्रव्याणांदेहिनांत
था अतस्त्वंदर्शयात्मानंशुभाशुभपरीक्षणमितिप्राड्विवाकेनोदकाभिमंत्रणेकृतेशोध्यः सत्येनमाभिरक्षत्वंवरुणेत्युदकंप्रार्थयते उदकस्था ५६
नानिचनारदेनोक्तानि नदीषुनत्नुवेगासुसागरेषुवनेषुच ह्रदेषुदेवखातेषुतडागेषुसरःसुचेति तथापितामहेनापि स्थिरतोयेनिमज्जे

त्तुनग्राहिणिनचाल्पके तृणशैवालरहितेजलौकामत्स्यवर्जिते देवखातेषुयत्तोयंतस्मिन्कुर्याद्विशोधनम् आहार्यंवर्जयेन्नित्यंशीघ्रगासु
नदीषुच आविशेत्सलिलेनित्यंतृणपंकविवर्जितेइति आहार्यंतडागादिभ्य आहृतंताम्रकटाहादिक्षिप्तंजलम् नाभिप्रमाणोदकस्थश्चय
ज्ञियवृक्षोद्भवां धर्मस्थूणामवष्टभ्य प्राङ्मुखस्तिष्ठेत् उदकेप्राङ्मुखस्तिष्ठेद्धर्मस्थूणांप्रगृह्यचेतिस्मरणात् ११० ततःकिंकर्तव्यमित्यत
आह निमज्जनसमकालंगतेस्मिन्जविन्येकस्मिन्पुरुषे अन्योजवीशरपात स्थानस्थितःपूर्वमुक्तमिषुमानीयजलेनिमग्नांगंयदिपश्य
तितदा सशुद्धोभवति एतदुक्तंभवति त्रिषुशरेषुमुक्तेष्वेकोवेगवान् मध्यमेशरपातस्थानंगत्वातमादाय तत्रैवतिष्ठति अन्यस्तुपुरुषोवेगवान्

समकालमिषुंमुक्तमानीयान्योजवीनरः गतेतस्मिन्निमग्नांगंपश्येच्चेच्छुद्धिमाप्नुयात् १११

शरमोक्षस्थानेतिष्ठति एवंस्थितयोस्तयोस्तृतीयस्यांकरतालिकायांशोध्योनिमज्जति तत्समकालमेवतोरणमूलस्थितोपिद्रुततरंम
ध्यमशरपातस्थानंगच्छति शरग्राहीचतस्मिन्प्राप्तेद्रुततरंतोरणमूलंप्राप्यांतर्जलगतंयदिनपश्यतितदाशुद्धोभवतीति एतदेवस्पष्टी
कृतंपितामहेन गंतुश्चापिचकर्तुश्चसमंगमवमज्जनम् गच्छतोरणमूलात्तुलक्ष्यस्थानंजवीनरः तस्मिन्गतेद्वितीयोपिवेगादादाय
सायकम् गच्छेत्तोरणमूलंतुयतःसपुरुषोगतः आगतस्तुशरग्राहीनपश्यतियदाजले अंतर्जलगतंसम्यक्तदाशुद्धिंविनिर्दिशेत्

ति जविनोश्चपुरुषयोर्निर्धारणंकृतंनारदेन पंचाशतोधावकानांयौस्यातामधिकौजवे तौचतत्रनियोक्तव्यौशरानयनकारणादिति तोर
णंचनिमज्जनसमीपस्थाने समेशोध्यकर्णप्रमाणोच्छ्रितंकार्यम् गत्वातुतज्जलस्थानतटेतोरणमुच्छ्रितम् कुर्वीतकर्णमात्रंतुभूमिभा
गेसमेशुचावितिनारदस्मरणात् शरत्रयंवेणवंचधनुर्मंगलद्रव्यैःश्वेतपुष्पादिभिः प्रथमंसंपूजयेत् शरान्संपूजयेत्पूर्वंवेणवंचध
नुस्तथा मंगलैर्धूपपुष्पैश्चततःकर्मसमाचरेदितिपितामहवचनात् धनुषःप्रमाणंलक्ष्यस्थानंचनारदेनोक्तम् क्रूरंधनुःसप्तश
तंमध्यमंषट्शतंस्मृतम् मंदंपंचशतंज्ञेयमेषज्ञेयोधनुर्विधिः मध्यमेनतुचापेनप्रक्षिपेच्चशरत्रयं हस्तानांतुशतेसार्द्धेलक्ष्यंकृ-
त्वाविचक्षणः न्यूनाधिकेतुदोषःस्यात्क्षिपतःसायकांस्तथेति अंगुलानांसप्ताधिकंशतंसप्तशतंक्रूरंधनुः एवंषट्शतंपंचशतंच
एवंचैकादशांगुलाधिकंहस्तचतुष्टयंक्रूरस्यधनुषःप्रमाणम् मध्यमस्यदशांगुलाधिकं मंदस्यनवांगुलाधिकमित्युक्तंभवति
शराश्चानायसाग्रावेणवाःकार्याः शरांश्चानायसाग्रांस्तुप्रकुर्वीतविशुद्धये वेणुकांडमयांश्चैवक्षेप्तातुसुदृढंक्षिपेदितिस्मरणात्
क्षेप्तातुक्षत्रियस्तद्वृत्तिर्वाब्राह्मणःसोपवासोनियोक्तव्यः यदाह क्षेप्ताचक्षत्रियःप्रोक्तस्तद्वृत्तिर्ब्राह्मणोपिवा अक्रूरहृदयःशांतः-
सोपवासस्तथाक्षिपेदिति त्रिषुमुक्तेषुमध्यमःशरोग्राह्यः तेषांचप्रेषितानांचशराणांशास्त्रचोदनात् मध्यमस्तुशरोग्राह्यःपुरुषेणब
लीयसेतिवचनात् तत्रापिपतनस्थानादानेतव्योनसर्पणस्थानात् शरस्यपतनंग्राह्यंसर्पणंतुविवर्जयेत् सर्पन्सर्पन्शरोयायाद ५७
दूराद्दूरतरंयतइतिवचनात् वातेचप्रवायतिविषमादिदेशेचशरमोक्षोनकार्यः इषुंनप्रक्षिपेद्विद्वान्मारुतेवातिवायति विषमेभूप्रदेशे

चवृक्षस्थाणुसमाकुले तृणगुल्मलतावल्लीपंकपाषाणसंयुतइतिपितामहवचनात् निमग्नांगंपश्येच्चेच्छुद्धिमाप्नुयादितिवदताउन्मज्जि
तांगस्याशुद्धिर्दर्शिता स्थानांतरगमनेचाशुद्धिःपितामहेनोक्ता अन्यथानविशुद्धिःस्यादेकांगस्यापिदर्शनादिति स्थानाद्वान्यत्रगमना-
द्यस्मिन्पूर्वंनिवेशितइति एकांगस्यापिदर्शनादितिचकर्णाद्यभिप्रायेण शिरोमात्रंतुदृश्येतनकर्णौनापिनासिका अप्सुप्रवेशनेयस्यशु-
द्धंतदपिनिर्दिशेदितिविशेषाभिधानात् अयमत्रप्रयोगक्रमः उक्तलक्षणजलाशयसन्निधावुक्तलक्षणंतोरणंविधाय उक्तप्रमाणे
देशेलक्ष्यंनिधाय तोरणसन्निधौसशरंधनुःसंपूज्यजलाशयेवरुणमावाह्यपूजयित्वातत्तीरेधर्मादींश्चदेवान्हवनांतमिष्ट्वाशोध्यस्यशि

त्वंविषब्रह्मणःपुत्रःसत्यधर्मेव्यवस्थितः त्रायस्वास्मादभीशापात्सत्येनभवमेऽमृतम् ११२
एवमुक्त्वाविषंशार्ङ्गंभक्षयेद्धिमशैलजम् यस्यवेगैर्विनाजीर्येच्छुद्धिंतस्यविनिर्दिशेत् ११३

रसिप्रतिज्ञापत्रमाबध्यप्राड्विवाकोजलमभिमंत्रयते तोयत्वंप्राणिनांप्राणइत्यादिनामंत्रेण अथशोध्यःसत्येनेत्यादिनामंत्रेणजलम-
भिमंत्र्यगृहीतस्थूणस्यनाभिमात्रोदकावस्थितस्यबलीयसःपुरुषस्यसमीपमुपसर्पति अथशरेषुत्रिषुमुक्तेषुमध्यमशरपातस्थाने
मध्यमशरंगृहीत्वाजविन्येकस्मिन्पुरुषेस्थिते अन्यस्मिंश्चतोरणमूलेस्थितेप्राड्विवाकेनतालत्रयेदत्तेयुगपद्गमनमज्जनमथशरानयनमि
ति इत्युदकविधिः १११ इदानींविषविधिमाह त्वंविषेत्यादिमंत्रेणविषमभिमंत्र्यकर्ताविषंहिमशैलजंशृंगप्रभवंभक्षयेत् तच्च

भक्षितंयस्यविषंवेगैर्विनाजीर्यतिसशुद्धोभवति विषवेगोनामधातोर्धात्वंतरप्राप्तिः धातोर्धात्वंतरप्राप्तिर्विषवेगइतिस्मृतइतिवचनात् धा
तवश्चत्वगसृङ्मांसमेदोस्थिमज्जाशुक्राणीतिसप्त एवंचसप्तैवविषवेगाभवंति तेषांचलक्षणानिपृथगेवविषतंत्रेकथितानि वेगोरोमांचमाद्यो
रचयतिविषजः स्वेदवक्त्रोपशोषौतस्योर्ध्वंस्तत्परौद्वावुरसिजनयतोवर्णभेदप्रवेपौ योवेगःपंचमोसौनमनविवशतांकंठभंगंचहिक्कांषष्ठोनिश्वा
समोहौवितरतिचमृतिंसप्तमोभक्षकस्येति अत्रचमहादेवस्यपूजाकर्तव्या यथाहनारदः दद्याद्दिपसोपवासेदेवब्राह्मणसन्निधौ धूपोप
हारमंत्रैश्चपूजयित्वामहेश्वरमिति प्राड्विवाकः कृतोपवासोमहादेवंपूजयित्वातस्यपुरतोविषंव्यवस्थाप्य धर्मादिपूजांहवनांतांविधायप्रतिज्ञा
पत्रंशोध्यस्यशिरसिनिधायविषमभिमंत्रयते त्वंविषब्रह्मणासृष्टंपरीक्षार्थंदुरात्मनाम् पापानांदर्शयात्मानंशुद्धानाममृतंभव मृत्युमूर्तेवि
षत्वंहिब्रह्मणापरिनिर्मितम् त्रायस्वैनंनरंपापात्सत्येनास्यामृतंभवेति एवमभिमंत्र्यदक्षिणाभिमुखायास्थितायदद्यात् नारदवचनात् द्वि
जानांसन्निधावेवदक्षिणाभिमुखेस्थिते उदङ्मुखःप्राङ्मुखोवाविषंदद्यात्समाहितइति विषंचवत्सनाभादिग्राह्यम् शृंगिणोवत्सनाभस्य-
हैमजस्यविषस्यवेतिपितामहवचनात् वर्ज्यानिचतथैवोक्तानि चारितानिचजीर्णानिकृत्रिमाणितथैवच भूमिजानिचसर्वाणिविषाणिपरिव
र्जयेदिति नारदेनापि भूष्टंचचारितंचैवधूपितंमिश्रितंतथा कालकूटमलांबुंचविषंयत्नेनवर्जयेदिति कालश्चनारदेनोक्तः तोलयित्वेपि
तंकालेदेयंतद्धिहिमागमे नापराह्णेनमध्याह्नेनसंध्यायांतुधर्मविदिति कालांतरेनूक्तप्रमाणादल्पंदेयम् वर्षेचतुर्यवामात्राग्रीष्मेपंचयवाःस्मृ ५८
ता हेमंतेसासप्तयवाशरद्यल्पाततोपिहीतिस्मरणात् अल्पेतिषड्यवेत्यर्थः हेमंतग्रहणेनशिशिरस्यापिग्रहणम् हेमंतशिशिरयोःसामासे

नेतिश्रुतेः वसंतस्यसर्वदिव्यसाधारणत्वात्तत्रापिसप्तयवा विषंचघृतप्लुतंदेयम् नारदवचनात् विषस्यपलषट्भागाद्भागोविंशतिमस्तुयः तमष्ट
भागहीनंतुशोध्येदद्याद्घृतप्लुतमिति पलंचात्रचतुःसुवर्णिकम् तस्यषष्ठोभागोदशमाषाःपंचदशयवाश्चभवंति त्रियवंत्वेवचकृष्णलंपंचकृष्णलको
माषः इत्येकोमाषःपंचदशयवोभवति एवंदशानांमाषाणांयवाःसार्द्धशतंभवंति पूर्वेचदशयवाइतिषष्ट्यधिकंशतं यवाःपलस्यषष्ठोभागस्तस्या
द्विंशतितमोभागोष्टौयवास्तस्याष्टमंभागंहीनः एकयवहीनःतंविंशतिमंभागंसप्तयवंघृतप्लुतंदद्यात् घृतंचविषात्त्रिंशद्गुणंग्राह्यम् पूर्वाह्णेशी
तलेदेशेविषंदेयंतुदेहिनाम् घृतेनियोजितंश्लक्ष्णंपिष्टंत्रिंशद्गुणान्वितमितिकात्यायनवचनात् त्रिंशद्गुणेनघृतेनान्वितंविषं शोध्यश्चकुहकादि
भ्योरक्षणीयः त्रिरात्रंपंचरात्रंवापुरुषैःस्वैरधिष्ठितम् कुहकादिभयाद्राजाधारयेद्दिव्यकारिणम् औषधीर्मंत्रयोगांश्चमणीनथविषापहान् क
र्तुःशरीरसंस्थांस्तुगूढोत्पन्नान्परीक्षयेदितिपितामहस्मरणात् यथाविषमपिरक्षणीयम् शार्ङ्गंहैमवतंशस्तंगंधवर्णरसान्वितम् अकृत्रि
मसमंमूढममंत्रोपहतंचयदितिनारदस्मरणात् तथाविषेपीतेयावत्करतालिकाशतपंचकंतावत्प्रतीक्षणीयोनंतरंचिकित्सनीयः यथाहनारदः
पंचतालिशतंकालंनिर्विकारोयदाभवेत् तदाभवतिसंशुद्धस्ततःकुर्याच्चिकित्सितमिति पितामहेनतुदिनांतोऽवधिरुक्तोल्पमात्राविषयः भ-
क्षितेतुयदास्वस्थोमूर्च्छाछर्दिविवर्जितः निर्विकारोदिनस्यांतेशुद्धंतमपिनिर्दिशेदिति अत्रचप्राड्विवाकः सोपवासोमहादेवंसंपूज्यतत्पुरतो-
विषंस्थापयित्वाधर्मादीनिष्ट्वाशोध्यस्यशिरसिप्रतिज्ञापत्रंनिधायविषमभिमंत्र्यदक्षिणाभिमुखायास्थितायविषंप्रयच्छति सचशोध्योविष
मभिमंत्र्यभक्षयतीतिक्रमः इतिविषविधानम् ११२ ११३ अथकोशविधिमाह उग्रान्देवान्दुर्गादित्यादीन्समभ्यर्च्यगंध

पुष्पादिभिः पूजयित्वा संस्नाप्य तत्स्नानोदकमाहरेत् आहृत्य च तोयत्वं प्राणिनां प्राण इत्यादिना तत्तोयं प्राड्विवाकः संश्राव्य शोध्येन च तत्तोयं पात्रां 
तरे कृत्वा सत्येन माभिरक्ष त्वं वरुणेत्यनेनाभिमंत्रितं पाययेत्प्रसृतित्रयम् एतच्च साधारणधर्मेषु धर्मावाहनादि सकलदेवतापूजा होमसमं
त्रकप्रतिज्ञापत्रशिरोनिवेशनांतेषु सत्स्वेव अत्र च स्नाप्यदेवनियमः कार्यनियमोधिकारिनियमश्च पितामहादिभिरुक्तः भक्तो यो
यस्य देवस्य पाययेत्तस्य तज्जलम् समभावे तु देवानामादित्यस्य तु दापयेत् दुर्गायाः पाययेच्चोरान्ये च शस्त्रोपजीविनः भास्करस्य तु
यत्तोयं ब्राह्मणं तन्न पाययेत् दुर्गायाः स्नापयेच्छूलमादित्यस्य तु मंडलम् अन्येषामपि देवानां स्नापयेदायुधानि त्विति देवतानियमः विस्रं

देवानुग्रान्समभ्यर्च्य तत्स्नानोदकमाहरेत् संश्राव्य पाययेत्तस्माज्जलात्तु प्रसृतित्रयम् ११४

भे सर्वशंकासु संधिकार्ये तथैव च एष कोशः प्रदातव्यो नित्यं चित्तविशुद्धय इति कार्यनियमः पूर्वाह्णे सोपवासस्य स्नातस्यार्द्रपटस्य च सशूकस्या
व्यसनिनः कोशपानं विधीयते सशूक आस्तिकः मद्यपस्त्रीव्यसनिनां कितवानां तथैव च कोशः प्राज्ञैर्न दातव्यो ये च नास्तिकवृत्तयः महापराधे निर्धर्मे
कृतघ्ने क्लीबकुत्सिते नास्तिकव्रात्यदासेषु कोशपानं विवर्जयेदिति महापराधो महापातकं निर्धर्मो वर्णाश्रमधर्मरहितः पाखंडी कुत्सितः प्रतिलोमजः दा
शाः कैवर्ताः इत्यधिकारिनियमः तथा गोमयस्य मंडलं कृत्वा तत्र शोध्यमादित्याभिमुखं स्थापयित्वा पाययेदिति नारदवचनादवगंतव्यम् यथाह 
तमाहूयाभिशस्तं तु मंडलाभ्यंतरे स्थितम् आदित्याभिमुखं कृत्वा पाययेत्प्रसृतित्रयमिति ११४ ५ ८

ननु तुलादिषु विषांतेषु समनंतरमेव शुद्ध्यशुद्धिभावना कोशे तु कथमित्यत आह चतुर्दशादन्हः पूर्वं यस्य राजिकं राजनिमित्तं दैविकं देवप्र
भवं व्यसनं दुःखं घोरं महत् नोनैव प्रजायते अल्पस्य देहिनामपरिहार्यत्वात्स शुद्धो वेदितव्यः ऊर्ध्वं पुनरवधेर्न दोषः यथाह नारदः ऊर्ध्वं यस्य
द्विसप्ताहाद्वैकृतं तु महद्भवेत् नाभियोज्यः स विदुषा कृतकालव्यतिक्रमादित्यर्थसिद्धमेवोक्तम् अर्वाक्चतुर्दशादन्ह इत्येतन्महाभियोगविषयम्
महाभियोगेष्वेतानीति प्रस्तुत्याभिधानात् अवध्यंतराणि पितामहेनोक्तानि अल्पविषयाणि कोशमल्पेपि दापयेदिति स्मरणात् तानि च त्रिरात्रात्स
प्तरात्राद्वा द्वादशाहाद्द्विसप्तकात् वैकृतं यस्य दृश्येत पापकृत्स उदाहृत इति महाभियोगोक्तद्रव्यादर्वाचीनं द्रव्यं त्रिधा विभज्य त्रिरात्राद्यपि पक्षत्रयं

अर्वाक्चतुर्दशादन्हो यस्य नो राजदैविकम् व्यसनं जायते घोरं स शुद्धः स्यान्न संशयः १५

व्यवस्थापनीयं इति कोशविधिः तुलादीनि कोशांतानि पंच महादिव्यानि यथोद्देशं योगीश्वरेण व्याख्यातानि स्मृत्यंतरे स्वल्पाभियोगविषयाण्य-
न्यानि दिव्यानि कथितानि यथाह पितामहः तंदुलानां प्रवक्ष्यामि विधिं भक्षणनोदितम् चौरे तु तंदुला देया नान्यस्येति विनिश्चयः तंदुलान्कारये
च्छुक्लान् छालैर्नान्यस्य कस्यचित् मृन्मये भाजने कृत्वा आदित्यस्याग्रतः शुचिः स्नानोदकेन संमिश्रान् रात्रौ तत्रैव वासयेत् प्राङ्मुखो वापि संस्ना
तं शिरोरोपितपत्रकम् तंदुलान् भक्षयित्वा तु पत्रे निष्ठीवयेत्ततः पिप्पलस्य तु नान्यस्य अभावे भूर्ज एव तु लोहितं यस्य दृश्येत हनुस्तालु
च शीर्यति गात्रं च कंपयेद्यस्य तमशुद्धं विनिर्दिशेदिति शिरोरोपितपत्रकं तंदुलान् भक्षयित्वा निष्ठीवयेत्प्राड्विवाकः भक्षयेदिति पर्यंता-

लिचिरूपं सर्वदिव्यसाधारणंच धर्मावाहनादिपूर्ववदिहापि कर्तव्यं इतितंडुलविधिः तप्तमाषविधिः पितामहेनोक्तः तथाहि सौवर्णराजतंवापितां
म्रंवाषोडशांगुलम् चतुरंगुलखातंतु मृन्मयंवाथमंडलम् वर्तुलमित्यर्थः पूरयेद्घृततैलाभ्यांविंशत्यातुपलैस्तुतत् सुवर्णमाषकंतस्मिन्सु
तप्तेनिक्षिपेत्ततः अंगुष्ठांगुलियोगेनउद्धरेत्तप्तमाषकम् कराग्रंयोनधुनुयाद्विस्फोटोवानजायते शुद्धोभवतिधर्मेणनिर्विकारकरांगुलिः
उद्धरेदितिवचनात्पात्रादुत्क्षेपणमात्रंनबहिःप्रक्षेपणमादरणीयम् अपरकल्पः सौवर्णराजतेताम्रेआयसेमृन्मयेपिवा गव्यंघृतमुपादा
य तदग्नौतापयेच्छुचिः सौवर्णींराजतींताम्रीमायसींवासुशोभिताम् सलिलेनसकृद्धौतांप्रक्षिपेत्ताम्रमुद्रिकाम् भ्रमद्वीचितरंगाढ्येसनख
स्पर्शगोचरे परीक्षेतार्द्रार्कपर्णेचुरुकारंसुघोषकम् ततश्चानेनमंत्रेणसकृत्तदभिमंत्रयेत् परंपवित्रममृतंघृतत्वंयज्ञकर्मसु दहपावकपा
पंत्वंहिमशीतंशुचौभव उपोषितंततः स्नातमार्द्रवाससमागतम् ग्राहयेन्मुद्रिकांतांतु घृतमध्यगतांतथा प्रदेशिनींचतस्याथपरीक्षेयुःपरी
क्षकाः यस्यविस्फोटकानस्युः शुद्धोसावन्यथाशुचिरिति अत्रापिधर्मावाहनाद्यनुसंधातव्यम् घृतानुमंत्रणंप्राड्विवाकस्य त्वमग्नेसर्वभू
तानामितिशोध्यस्याग्न्यभिमंत्रणमंत्रः प्रदेशिनींपरीक्षेयुरितिवचनात् प्रदेशिन्यैवमुद्रिकोद्धरणम् इतितप्तमाषविधिः धर्माधर्मा
ख्यदिव्यविधिश्चपितामहेनोक्तः तथाच अधुनासंप्रवक्ष्यामिधर्माधर्मपरीक्षणम् हंतॄणांयाचमानानांप्रायश्चित्तार्थिनांनृणाम् हंतॄ
णामितिसाहसाभियोगेषु याचमानानामिति अर्थाभियोगेषुप्रायश्चित्तार्थिनामितिपातकाभियोगेषु राजतंकारयेद्धर्ममधर्मंसीसका ६०.
यसमितिप्रतिमाविधानंसीसकंवाआयसंवेति पक्षांतरमाह लिखेद्भूर्जेपटेवापिधर्माधर्मौसितासितौ अभ्युक्ष्यपंचगव्येन

गंधमाल्यैःसमर्चयेत् सितपुष्पस्तुधर्मःस्यादधर्मोसितपुष्पधृक् एवंविधायोपलिख्यपिंडयोस्तौनिधापयेत् गोमयेनमृदावापिपिंडौ
कार्यौसमंततः मृद्भांडकेनुपहतेस्थाप्यौचानुपलक्षितौ उपलिप्तेशुचौदेशेदेवब्राह्मणसन्निधौ आवाहयेत्ततोदेवान्लोकपालांश्चपूर्व
वत् धर्मावाहनपूर्वंतु प्रतिज्ञापत्रकंलिखेत् यदिपापविमुक्तोहंधर्मस्त्वायातुमेकरइति अभिशस्तोभिमंत्रयते अभियुक्तस्तयोश्चै
कंप्रगृह्णीताविलंबितः धर्मेगृहीतेशुद्धःस्यादधर्मेतुसहीयते एवंसमासतःप्रोक्तंधर्माधर्मपरीक्षणमिति इतिधर्माधर्मदिव्यविधिः
अन्येचशपथाद्व्याल्पत्वमहत्त्वविषयाजातिविशेषविषयाश्चमन्वादिभिरुक्ताः यथा निष्केतुसत्यवचनंद्विनिष्केपादलंभनम् त्रिका
द्र्वाक्तुपुण्यंस्यात्कोशपानमतःपरम् सत्येनशापयेद्विप्रंक्षत्रियंवाहनायुधैः गोबीजकांचनैर्वैश्यंशूद्रंसर्वैस्तुपातकैरित्यादयः अत्र
चशुद्धिविभावनामनुनोक्ता नचार्तिर्मूर्च्छतिक्षिप्रंसज्ञेयःशपथेशुचिरिति आर्तिरपियस्यनोराजदैविकंव्यसनंजायतेघोरमित्यु
क्तेवाकालनियमश्चत्रिरात्रप्रभृतिः कार्यलाघवगौरवपर्यालोचनयाद्रष्टव्यः एवंदिव्यैर्जयपराजयावधारणेदंडविशेषोपिदर्शितः
कात्यायनेन शतार्द्धंदापयेच्छुद्धमशुद्धोदंडभाग्भवेदिति तंदंडमाह विषेतोयेहुताशेचतुलाकोशेचतंडुले तप्तमाषकदिव्येचक्र
माद्दंडंप्रकल्पयेत् सहस्रंषट्शतंचैवतथापंचशतानिच चतुस्त्रिद्व्येकमेवंचहीनंहीनेषुकल्पयेदिति निन्हवेभावितोदद्यादित्युक्तदं
डेनायंदिव्यनिबंधनोदंडःसमुच्चीयते इतिदिव्यप्रकरणम् ११५ तत्रदायशब्देनयद्धनंस्वामिसंबंधादेवनिमित्तादन्यस्यस्वंभव
तितदुच्यते सचद्विविधः अप्रतिबंधःसप्रतिबंधश्च तत्रपुत्राणांपौत्राणांचपुत्रत्वेनपौत्रत्वेनचपितृधनंपितामहधनंचस्वंभ-

वतीत्यप्रतिबंधोदायः पितृव्यभ्रात्रादीनांतुपुत्राभावेस्वाम्यभावेच स्वंभवतीतिपुत्रसद्भावः स्वामिसद्भावश्चप्रतिबंधस्तदभावे पितृव्यत्वेनचभ्रातृ
त्वेनच स्वंभवतीतिसप्रतिबंधोदायः एवंतत्पुत्रादिष्वप्यूहनीयः विभागोनामद्रव्यसमुदायविषयाणामनेकस्वाम्यानांतदेकदेशेषु द्रव्यस्यव्यव
स्थापनं एतदेवाभिप्रेत्योक्तंनारदेन विभागोर्थस्यपैत्र्यस्यतनयैर्यत्रकल्प्यते दायभागइतिप्रोक्तंदायभागपदंबुधैरिति पैत्र्यस्येतिस्वत्वनि
मित्तसंबंधोपलक्षणम् तनयैरित्यपिप्रत्यासन्नोपलक्षणं इदमिहनिरूपणीयम् कस्मिन्कालेकस्यकथंकैश्चविभागःकर्तव्यइति तत्रकस्मि
न्कालेकथंकैश्चेतितत्रतत्रश्लोकव्याख्यानएववक्ष्यते कस्यविभागइतिएतदिहचिंत्यते किंविभागात्स्वत्वमुतस्वस्यसतोविभागइति तत्रस्व

प्रमाणंमानुषंदैवमितिभेदेनवर्णितम् अधुनावर्ण्यतेदायविभागोयोगमूर्तिना११५

त्वमेवतावन्निरूप्यते किंशास्त्रैकसमधिगम्यंस्वत्वमुतप्रमाणांतरसमधिगम्यमिति तत्रशास्त्रैकसमधिगम्यमितितावद्युक्तंगौतमवचनात्
स्वामीरिक्थक्रयसंविभागपरिग्रहाधिगमेषुब्राह्मणस्याधिकंलब्धंक्षत्रियस्यविजितं निर्विष्टंवैश्य शूद्रयोरिति प्रमाणांतरगम्येस्वत्वेनेदंवचनमर्थ
वत्स्यात् तथा योदत्तादायिनोहस्ताल्लिप्सेतब्राह्मणोधनम् याजनाध्यापनाद्वापियथास्तेनस्तथैवसइति अदत्तादायिनःसकाशात् याजनादिद्वा ६१
रेण द्रव्यमर्जयतांदंडविधानमुपपन्नंस्यात्स्वत्वस्यालौकिकत्वे अपिच लौकिकंचेत्स्वत्वंममस्वमनेनापहृतमितिनब्रूयात् अपहर्तुरेवस्वत्वात्

अन्यथास्वंतेनापहृतमितिनापहर्तुःस्वम् एवंतर्हिसुवर्णरजतादिस्वरूपवदस्यवास्वस्यवास्वमितिसंशयोनस्यात् तस्माच्छास्त्रैकसमधिगम्यं
स्वत्वमिति अत्रोच्यते लौकिकमेवस्वत्वं लौकिकार्थक्रियासाधनत्वात् व्रीह्यादिवत् आहवनीयादीनांहिशास्त्रगम्यानांनलौकिकक्रि
यासाधनत्वमस्ति नन्वाहवनीयादीनामपिपाकादिसाधनत्वमस्त्येव नैतत् नहितत्राहवनीयादिरूपेणपाकादिसाधनत्वं किंतर्हिप्रत्य
क्षादिपरिदृश्याग्न्यादिरूपेण इहतुसुवर्णादिरूपेणनक्रियादिसाधनत्वमपितुस्वत्वमेव नहियस्ययत्स्वंनभवति तत्तस्यक्रयाद्यर्थक्रियां
साधयति अपिच प्रत्यंतवासिनामप्यदृष्टशास्त्रव्यवहाराणांस्वत्वव्यवहारोदृश्यते क्रयविक्रयादिदर्शनात् किंच नियतोपायकंस्वत्वं
लोकसिद्धमेवेतिन्यायविदोमन्यंते तथाहि लिप्सासूत्रेतृतीयेवर्णकेद्रव्यार्जननियमानांक्रत्वर्थत्वेस्वत्वमेवनस्यात् स्वत्वस्यलौकिकत्वा
दितिपूर्वपक्षाभावमाशंक्यद्रव्यार्जनस्यप्रतिग्रहादिनास्वत्वसाधनत्वंलौकिकसिद्धमितिपूर्वपक्षःसमर्थितोगुरुणा ननुचद्रव्यार्जनस्यक्रत्व
र्थेस्वत्वमेवनभवतीतियागएवनसंवर्तेत प्रलपितमिदंकेनापि अर्जनंस्वत्वंनापादयतीतिविप्रतिषिद्धमितिवदता तथासिद्धांतेपि
स्वत्वस्यलौकिकत्वमंगीकृत्यैवविचारप्रयोजनमुक्तम् अतोनियमातिक्रमः पुरुषस्यनक्रतोरिति अस्यचार्थएवंविवृतः यदाद्रव्यार्जन
नियमानांक्रत्वर्थत्वंतदानियमार्जितेनैवद्रव्येणक्रतुसिद्धिः नियमातिक्रमार्जितेनद्रव्येणनक्रतुसिद्धिरिति नपुरुषस्यैवनियमातिक्रमदोषः
पूर्वपक्षे राद्धांतेतु अर्जननियमस्यपुरुषार्थत्वात्तद तिक्रमेणार्जितेनापिद्रव्येणक्रतुसिद्धिर्भवतिपुरुषस्यैवनियमातिक्रमदोषइति नि
यमातिक्रमार्जितस्यापिस्वत्वमंगीकृतम् अन्यथाक्रतुसिद्ध्यभावात् नचैतावताचौर्यादिप्राप्तस्यापिस्वत्वंस्यादितिमंतव्यम् लोकेतत्रस्वत्व

प्रसिद्ध्यभावात् व्यवहारविसंवादात् एवंप्रतिग्रहाद्युपायैकस्वत्वे लौकिके स्थिते ब्राह्मणस्यप्रतिग्रहादयउपायाः क्षत्रियस्यविजितादयो
वैश्यस्यकृष्यादयः शूद्रस्यशुश्रूषादय इत्यदृष्टार्थनियमाः रिक्थादयस्तुसर्वसाधारणाः स्वामीरिक्थक्रयसंविभागपरिग्रहाधिगमे
ष्वित्युक्ताः तत्राप्रतिबंधोदायोरिक्थं क्रयःप्रसिद्धः संविभागःसप्रतिबंधोदायः प्रतिग्रहोनन्यपूर्वस्यजलतृणकाष्ठादेःस्वीकारः अधिगमो
निध्यादेःप्राप्तिः एतेषुनिमित्तेषुसत्सुस्वामीभवति कृतेषुज्ञायतेस्वामी ब्राह्मणस्याधिकंलब्धमिति ब्राह्मणस्यप्रतिग्रहादिनालब्धंतदधि
कमसाधारणं क्षत्रियस्यविजितमिति अधिकमित्यनुवर्तते क्षत्रियस्यविजयदंडादिलब्धमसाधारणम् निर्विष्टंवैश्यशूद्रयोरिति अत्रा
प्यधिकमित्यनुवर्तते वैश्यस्यकृषिगोरक्ष्यादिलब्धंनिर्विष्टंतदसाधारणम् शूद्रस्यद्विजशुश्रूषादिनाभृतिरूपेणयल्लब्धंतदसाधारणं एव
मनुलोमजानांप्रतिलोमजानांच लोकप्रसिद्धेषुस्वत्वहेतुषुयद्यदसाधारणमुक्तं सूतानामश्वसारथ्यमित्यादि तत्तत्सर्वंनिर्विष्टशब्देनोच्यते स
र्वस्यापिभृतिरूपत्वा न्निर्वेशोभृतिभोगयोरितित्रिकांडीस्मरणात् तत्तदसाधारणंवेदितव्यं यद्यपिपत्नीदुहितरश्चेत्यादिस्मरणं तत्रा-
पिस्वामिसंबंधितयाबहुषुदायविभागितयाप्राप्तेषु लोकप्रसिद्धेपिस्वत्वे व्यामोहनिवृत्त्यर्थंस्मरणमितिसर्वमनवद्यं यदपिममस्वमनेनापहृ
तमितिनब्रूयात्स्वत्वस्यलौकिकत्वइति तदप्यसत् स्वत्वहेतुभूतक्रयादिसंदेहात्स्वत्वसंदेहोपपत्तेः विचारप्रयोजनंतु यद्गर्हितेनार्जयंति
कर्मणाब्राह्मणाधनम् तस्योत्सर्गेणशुध्यंतिजपेनतपसैवचेति शास्त्रैकसमधिगम्येःस्वत्वेगर्हितेनासत्प्रतिग्रहवाणिज्यादिनालब्धा ६२
स्यस्वत्वमेवनास्तीति नतत्पुत्राणांतदविभाज्यमेव यदातुलौकिकंस्वत्वंतदासत्प्रतिग्रहादिलब्धस्यापिस्वत्वात् तत्पुत्राणां तद्विभाज्यमेव

तस्योत्सर्गेणशुध्यंतीतिप्रायश्चित्तमर्जयितुरेव तत्पुत्राणांतुदायत्वेनस्वत्वमितिनतेषांदोषसंबंधः सप्तवित्तागमाधर्म्यादायोलाभःक्र
योजयः प्रयोगःकर्मयोगश्चसत्प्रतिग्रहएवचेतिमनुस्मरणात् इदानीमिदंसंदिह्यते किंच विभागात्स्वमुत स्वस्यसतोविभागइ
ति तत्रविभागात्स्वत्वमिति तावद्युक्तम् जातपुत्रस्याधानविधानात् यदिजन्मनैवस्वत्वंस्यात्तदोत्पन्नस्यापिपुत्रस्यतत्स्वंसाधारणमि
तिद्रव्यसाध्येष्वाधानादिषुपितुरनधिकारःस्यात् तथाविभागात्प्राक्पितृप्रसादोलब्धस्यविभागप्रतिषेधोनोपपद्यते सर्वानुमत्याद
त्तत्वाद्विभागप्राप्त्यभावात् यथाह शौर्यभार्याधनेचोभेयच्चविद्याधनंभवेत् त्रीण्येतान्यविभाज्यानिप्रसादोयश्चपैतृकइति तथा
भर्त्राप्रीतेनयद्दत्तंस्त्रियैतस्मिन्मृतेपितत् सायथाकाममश्नीयाद्द्याद्वास्थावराद्दतइतिप्रीतिदानवचनंनोपपद्यते तज्जन्मनैवस्व
त्वेनचस्थावराद्दतेयद्दत्तमितिसंबंधोयुक्तोव्यवहितयोजनाप्रसंगात् यदपि मणिमुक्ताप्रवालानांसर्वस्यैवपिताप्रभुः स्थावरस्यतु
सर्वस्यनपितानपितामहः तथा पितृप्रसादाद्भुज्यंते वस्त्राण्याभरणानिच स्थावरंतुनभुज्येतप्रसादेसतिपैतृकेइतिस्थावरस्यप्रसा
ददानप्रतिषेधवचनं तत्पितामहोपात्तस्थावरविषयम् अतीतेपितामहेतद्धनंपितापुत्रयोःसाधारणमपिमणिमुक्तादिपितुरेव
स्थावरंतुसाधारणमित्यस्मादेववचनादवगम्यते तस्मान्नजन्मनास्वत्वं किंतुस्वामिनाशाद्विभागाद्वास्वत्वम् अतएवपितुरूर्ध्वंविभा-
गात्प्राग्द्रव्यस्वत्वस्यप्रहीणत्वादन्येनगृह्यमाणंननिवार्यतइतिचोद्यस्यावकाशः तथैकपुत्रस्यापिपितृप्रयाणादेवपुत्रस्यस्वत्वमिति
नविभागमपेक्षतेइति अत्रोच्यते लोकप्रसिद्धमेवस्वत्वमित्युक्तम् लोकेचपुत्रादीनांजन्मनैवस्वत्वंप्रसिद्धतरम् नापन्हवमर्ह

ति विभागशब्दश्चबहुस्वामिकधनविषयः प्रसिद्धोनान्यदीयविषयोनप्रहीणविषयः तंतयोस्तस्यैवार्थस्वामित्वाल्लभेतेत्याचार्यइतिगौ
तमवचनात् मणिमुक्ताप्रवालानामित्यादिवचनंचजन्मनास्वत्वपक्षएवोपपद्यते नचपितामहोपात्तस्थावरविषयमितियुक्तं नपितानपिता
महइतिवचनात् पितामहस्यहि स्वार्जितमपिपुत्रेपौत्रेचसत्यदेयमिति वचनंजन्मनास्वत्वंगमयति यथापरमते मणिमुक्तावस्त्राभ
रणादीनांपैतामहानामपिपितुरेवस्वत्ववचनात् एवमस्मन्मतेपिपित्रार्जितानामप्येतेषांपितुर्दानाधिकारोवचनादित्यविशेषतः यत्तु
भर्त्राप्रीतेनेत्यादिविष्णुवचनं स्थावरस्यप्रीतिदानज्ञापनंतत्स्वोपार्जितस्यापिपुत्राद्यभ्यनुज्ञयैवेतिव्याख्येयम् पूर्वोक्तैर्मणिमुक्ता
दिवचनैः स्थावरव्यतिरिक्तस्यैवप्रीतिदानयोग्यत्वनिश्चयात् यदप्यर्थसाध्येषुवैदिकेषुकर्मस्वनधिकारइति तत्रतद्विधानबलादेवाधि
कारोगम्यते तस्मात्पैतृकेपैतामहेचद्रव्येजन्मनैवस्वत्वम् तथापिपितुरावश्यकेषुधर्मकृत्येषुवाचनिकेषुप्रसाददानकुटुंबभरणापद्वि-
मोक्षादिषुचस्थावरव्यतिरिक्तद्रव्यविनियोगेस्वातंत्र्यमितिस्थितम् स्थावरेषुस्वार्जितेपित्रादिप्राप्तेचपुत्रादिपारतंत्र्यमेव स्थावरंद्विप
दंचैवयद्यपिस्वयमर्जितम् असंभूयसुतान्सर्वान्नदानंनचविक्रयः येजातायेप्यजाताश्चयेचगर्भेव्यवस्थिताः वृत्तिंचतेभिकांक्षंतिनदानंन
चविक्रयइत्यादिस्मरणात् अस्यापवादः एकोपिस्थावरेकुर्याद्दानाधमनविक्रयम् आपत्कालेकुटुंबार्थेधर्मार्थेचविशेषतइति अस्यार्थः
अप्राप्तव्यवहारेषुपुत्रेषुपौत्रेषुवा अनुज्ञादानादावसमर्थेषुभ्रातृषुवा तथाविधेषविभक्तेषपिसकलकुटुंबव्यापिन्यामापदितत्पोषणे ६३
वावश्यंकर्तव्येषुपितृश्राद्धादिषुस्थावरस्यदानाधमनविक्रयमेकोपिसमर्थः कुर्यादिति यत्तुवचनम् विभक्ताअविभक्तावासपिंडाःस्थाव

रेसमाः एकोह्यनीशः सर्वत्रदानाधमनविक्रयइति तदप्यविभक्तेषुद्रव्यस्यमध्यगत्वादेकस्यानीश्वरत्वात् सर्वाभ्यनुज्ञावश्यंकार्या
विभक्तेषूत्तरकालंविभक्ताविभक्तसंशयव्युदासेनव्यवहारसौकर्याय सर्वाभ्यनुज्ञा नपुनरेकस्यानीश्वरत्वेनातोविभक्तानुमतिव्य-
तिरेकेणापिव्यवहारःसिद्ध्यतीत्येवेतिव्याख्येयम् यदपि स्वग्रामज्ञातिसामंतदायादानुमतेनच हिरण्योदकदानेनषड्भिर्गच्छ
तिमेदिनीति. तत्रापिग्रामानुमतिः प्रतिग्रहःप्रकाशःस्यात्स्थावरस्यविशेषतइतिस्मरणात् व्यवहारप्रकाशनार्थमेवापेक्ष्यते न
पुनर्ग्रामानुमत्याविनाव्यवहारासिद्धिः सामंतानुमतिस्तुसीमाप्रतिपत्तिनिरासाय ज्ञातिदायादानुमतेस्तुप्रयोजनमुक्तमेव हिरण्यो
दकदानेनेतिस्थावरेविक्रयोनास्तिकुर्यादाधिमनुज्ञयेतिस्थावरस्यविक्रयप्रतिषेधात् भूमिंयःप्रतिगृह्णातियश्चभूमिंप्रयच्छति उ
भौतौपुण्यकर्माणौनियतौस्वर्गगामिनाविति दानप्रशंसादर्शनाच्चक्रयेपिकर्तव्येसहिरण्यमुदकंदत्वादानरूपेणस्थावरविक्रयंकुर्यादित्यर्थः
पैतृकेपैतामहेचधनेजन्मनैवस्वत्वेपिविशेषंभूयापितामहोपात्तेत्यत्रवक्ष्यामः ११६ इदानींयत्रकालेयेनचयथाविभागःकर्तव्यस्तद्दर्शयन्ना
ह यदाविभागंपिताचिकीर्षति तदाइच्छयाविभजेत् पुत्रानात्मनःसकाशात् पुत्रंपुत्रौपुत्रान् इच्छयानिरंकुशत्वादनियमप्राप्तौनियमार्थ
माह ज्येष्ठंवाश्रेष्ठभागेनेति ज्येष्ठंश्रेष्ठभागेन मध्यमंमध्यभागेन कनिष्ठंकनिष्ठभागेनविभजेदित्यनुवर्तते श्रेष्ठादिविभागश्चमनुनोक्तः
ज्येष्ठस्यविंशउद्धारःसर्वद्रव्याच्चयद्वरम् ततोर्द्धंमध्यमस्यस्यात्तुरीयंतुयवीयसइति वाशब्दोवक्ष्यमाणपक्षापेक्षः सर्वेवास्युःसमांशिनइ
ति सर्वेवाज्येष्ठादयः समांशभाजःकर्तव्याः अयंचविषमोविभागःस्वार्जितद्रव्यविषयः पितृक्रमायातेतुसमस्वाम्यस्यवक्ष्यमाणत्वा

न्नेच्छयाविषमोविभागोयुक्तः विभागंचेत्पिताकुर्यादितियदापितुर्विभागेच्छासतावदेकःकालः अपरोपिजीवत्यपिपितरिद्रव्य निस्पृ
हेनिवृत्तरमणेमातरिचनिवृत्तरजस्कायांपितुरनिच्छायामपिपुत्रेच्छयैवविभागोभवति यथानारदेन अतऊर्ध्वंपितुःपुत्राविभजेयु
र्धनंसममिति पित्रोरूर्ध्वंविभागंप्रतिपाद्य मातुर्निवृत्तेरजसिप्रत्तासुभगिनीषुच निवृत्तेचापिरमणेपितर्युपरतस्पृहइतिदर्शितम् अत्र
पुत्राधनंसमंविभजेयुरित्यनुषज्यते गौतमेनापि ऊर्ध्वंपितुःपुत्रारिक्थंभजेरन्नित्युक्त्वानिवृत्तेचापिरजसीतिद्वितीयःकालोदर्शितः
जीवतिचेच्छतीति तृतीयः तथासरजस्कायामपिमातर्यनिच्छत्यपिपितर्यधर्मवर्तिनिदीर्घरोगग्रस्तेच पुत्राणामिच्छयाभवतीतिविभा

विभागंचेत्पिताकुर्यादिच्छयाविभजेत्सुतान् ज्येष्ठंवाश्रेष्ठभागेन सर्वेवास्युःसमांशिनः १७
यदिकुर्यात्समानंशान्पत्न्यःकार्याःसमांशिकाः नदत्तंस्त्रीधनंयासांभर्त्रावाश्वशुरेणवा १८

गः यथाहशंखः अकामेपितरिरिक्थविभागोवृद्धेविपरीतचेतसिरोगिणिचेति पितुरिच्छयाविभागोद्विधादर्शितः समोविषमश्च १७
तत्रसमविभागेविशेषमाह यदास्वेच्छयापितासर्वानेवस्वसुतान्समविभागिनःकरोतितदापत्न्यश्चपुत्रसमांशभाजःकर्तव्याः यासांपत्नीनांभ
र्त्राश्वशुरेणवास्त्रीधनंनदत्तं दत्तेतुस्त्रीधनेअर्द्धांशंवक्ष्यति दत्तेत्वर्द्धंप्रकल्पयेदिति यदातुश्रेष्ठभागादिनाज्येष्ठादीन्विभजतितदापत्न्यःश्रे ६४
ष्ठादिभागान्नलभंते किंतूद्धृतोद्धारात्समुदायात्समानेवांशान्लभंते सोद्धारंच यथाहापस्तंबः परीभांडंचगृहेअलंकारोभार्यायाइति ११८

ज्येष्ठंवाश्रेष्ठभागेनसर्वेवास्युःसमांशिनइतिपक्षद्वयेप्यपवादमाह स्वयमेवद्रव्यार्जनसमर्थस्यपितृद्रव्यमनीहमानस्यानिच्छतोयत्किंचिदसारम
पिदत्वापृथक्क्रियाविभागःकार्यः पित्रातत्पुत्रादीनांदायजिघृक्षामाभूदिति ज्येष्ठंवाश्रेष्ठभागेनेतिन्यूनाधिकविभागोदर्शितः तत्रशास्त्रोक्तो
द्धारादिविषमविभागव्यतिरेकेणान्यथाविषमविभागनिषेधार्थमाह न्यूनाधिकविभागेनविभक्तानांपुत्राणामसौन्यूनाधिकविभागोयदिध
र्म्यःशास्त्रोक्तोभवति तदासौपितृकृतःकृतएवननिवर्ततेइतिमन्वादिभिःस्मृतः अन्यथातुपितृकृतोपिनिवर्ततइत्यभिप्रायः यथाहना
रदः व्याधितःकुपितश्चैवविषयासक्तमानसः अन्यथाशास्त्रकारीचन विभागेपिताप्रभुरिति ११९ इदानींविभागस्यकालांतरंकर्त्रं

शक्तस्यानीहमानस्यकिंचिद्दत्वापृथक्क्रियाम् न्यूनाधिकविभक्तानांधर्म्यःपितृकृतःस्मृतः ११९ विभजेरन्सुताःपित्रो
रूर्ध्वंरिक्थमृणंसमम् तरंप्रकारनियममाह पित्रोर्मातापित्रोरूर्ध्वंप्रयाणादितिकालोदर्शितः सुताइतिकर्तारोदर्शिताः सममि
तिप्रकारनियमः सममेवेति रिक्थमृणंचविभजेरन् नन्वूर्ध्वंपितुश्चमातुश्चेत्युपक्रम्य ज्येष्ठएवतुगृह्णीयात्पित्र्यंधनमशेषतः शेषास्त
मुपजीवेयुर्यथैवपितरंतथेत्युक्त्वोक्तम् ज्येष्ठस्यविंशउद्धारःसर्वद्रव्याच्चयद्वरम् ततोर्द्धंमध्यमस्यस्यात्तुरीयंतुयवीयसइति सर्वस्माद्ध
नसमुदायाद्विंशतितमोभागःसर्वद्रव्येभ्यश्चयच्छ्रेष्ठंतज्ज्येष्ठायदातव्यम् तदर्द्धंचत्वारिंशत्तमोभागोमध्यमंचद्रव्यंमध्यमायदातव्यम्
तदर्द्धमशीतितमोभागोहीनंचद्रव्यंकनिष्ठायदातव्यमिति मातापित्रोरूर्ध्वंविभजतामुद्धारविभागोमनुनादर्शितः तथा उद्धारेनु

द्धृतेत्वेषामियंस्यादथकल्पना एकाधिकंहरेज्ज्येष्ठःपुत्रोध्यर्द्धंततोनुजः अंशमंशंयवीयांसइतिधर्मोव्यवस्थितइति ज्येष्ठस्यद्वौभागौ
तदनंतरंजातस्यसार्द्धएकोभागः ततोनुजानामेकैकोपिभागइत्युद्धारव्यतिरेकेणापिविषमोभागोदर्शितः पित्रोरूर्ध्वंविभजतांजीवद्विभा
गेत्वस्वयमेवविषमोविभागोदर्शितोज्येष्ठंवाश्रेष्ठभागेनेति अतःसर्वस्मिन्नपिकालेविषमोविभागोस्तीतिकथंसममेवविभजेरन्निति नियं
म्यते अत्रोच्यते सत्यम् अयंविषमोभागःशास्त्रदृष्टस्तथापिलोकविद्विष्टत्वान्नानुष्ठेयः अस्वर्ग्यंलोकविद्विष्टंधर्ममप्याचरेन्नत्विति
निषेधात् यथा महोक्षंवामहाजंवाश्रोत्रियायोपकल्पयेदितिविधानेनापिलोकविद्विष्टत्वादननुष्ठानम् यथावामैत्रावरुणींगांचशामनु

मातुर्दुहितरःशेषमृणात्ताभ्यऋतेन्वयः १२०

बंध्यामालभतइतिगवालंभनविधानेपिलोकविद्विष्टत्वादननुष्ठानम् उक्तंच यथानियोगधर्मोनोनानुबंध्यावधोपिवा तथोद्धारविभा
गोपिनैवसंप्रतिवर्ततइति आपस्तंबोपि जीवन्पुत्रेभ्योदायंविभजेत्सममितिसमतामुक्त्वाज्येष्ठोदायादइति एकइतिकृत्स्नधनग्रहणं
ज्येष्ठस्यैकीयमतेनोपन्यस्य देशविशेषेसुवर्णंकृष्णागावःकृष्णंभौमंज्येष्ठस्यरथःपितुःपरीभांडंचगृहेलंकारोभार्यायाज्ञातिधनंचे
त्येकइत्येकीयमतेनैवोद्धारविभागंदर्शयित्वा तच्छास्त्रविप्रतिषिद्धमितिनिराकृतवान् तंचशास्त्रविप्रतिषेधंस्वयमेवदर्शयतिस्म ६५
मनुः पुत्रेभ्योदायंव्यभजेदित्यविशेषेणश्रूयतेइति तस्माद्विषमोभागःशास्त्रदृष्टोपिलोकविरोधाच्छ्रुतिविरोधाच्चनानुष्ठेयइतिसम

मेवविभजेरन्निति नियम्यते मातापित्रोधनंसुताविभजेरन्नित्युक्तंतत्रमातृधनेपवादमाह मातुर्धनंदुहितरोविभजेरन् ऋणाच्छेषंमा
तृकृतमृणंपुत्रैरेवापाकरणीयंनदुहितृभिः ऋणावशिष्टंतुधनंदुहितरोगृह्णीयुरित्युक्तंचेत् पुमान्पुंसोधिकेशुक्रे स्त्रीभवत्यधिके-
स्त्रिया इतिस्त्र्यवयवानांदुहितृषुबाहुल्यात् स्त्रीधनंदुहितृगामि पितृधनंपुत्रगामि पित्रवयवानांपुत्रेषुबाहुल्यादिति तत्रचगौ
तमेनविशेषोदर्शितः स्त्रीधनंदुहितृणामप्रत्तानामप्रतिष्ठितानांचेति अस्यार्थः प्रत्ताप्रत्तासमवायेप्रत्तानामेवस्त्रीधनं प्रत्ता

पितृद्रव्याविरोधेनयदन्यत्स्वयमर्जितम् मैत्रमौद्वाहिकंचैवदायादानांनतद्भवेत् १२१
क्रमादभ्यागतंद्रव्यंहृतमप्युद्धरेत्तुयः दायादेभ्योनतद्दद्याद्विद्ययालब्धमेवच १२२

सुचाप्रतिष्ठितासमवायेप्रतिष्ठितानांचेति अप्रतिष्ठितानिर्धनाः दुहित्रभावेमातृधनमृणावशिष्टंकोगृह्णीयादित्यतआह ताभ्यो
दुहितृभ्योविनादुहितृणामभावे अन्वयःपुत्रादिर्गृह्णीयात् एतच्चविभजेरन्सुताःपित्रोरूर्ध्वमित्यनेनैवसिद्धंस्पष्टार्थमुक्तम् १२०
अविभाज्यमाह मातापित्रोर्द्रव्याविनाशेनयत्स्वयमर्जितंमैत्रं मित्रसकाशाद्यल्लब्धं औद्वाहिकंविवाहलब्धं दायादानांभ्रातॄणांतन्न
भवेत् क्रमात्पितृक्रमादायातंयत्किंचिद्द्रव्यं अन्यैर्हृतमसामर्थ्यादिनापित्रादिभिरनुद्धृतं यःपुत्राणांमध्येइतराभ्यनुज्ञयोद्धर
ति तद्दायादेभ्योभ्रात्रादिभ्योनदद्यात् उद्धर्तैवगृह्णीयात् तत्रक्षेत्रेतुरीयांशमुद्धर्तालभते शेषंतुसर्वेषांसममेव यथाहशंखः

पूर्वनष्टांतु योभूमिमेकश्चेदुद्धरेत्क्रमात् यथाभागंलभेरन्नन्येदत्वांशंतुतुरीयकमिति क्रमादभ्यागतामितिशेषः तथाविद्ययावाचाध्ययनेनाध्यापने
नवेदार्थव्याख्या नेनवायल्लब्धंतदपिदायादेभ्योनदद्यात् अर्जकएवगृह्णीयात् अत्रच पितृद्रव्याविरोधेनयत्किंचित्स्वयमर्जितमितिसर्वत्रशेषः
अतश्च पितृद्रव्याविरोधेनयन्मैत्रमर्जितं पितृद्रव्याविरोधेनयदौद्वाहिकं पितृद्रव्याविरोधेनयत्क्रमादायातमुद्धृतं पितृद्रव्याविरोधेनविद्यया
यल्लब्धमिति प्रत्येकमभिसंबध्यते तथाचपितृद्रव्याविरोधेनप्रत्युपकारेणयन्मैत्रं आसुरादिविवाहेषुयल्लब्धं यथापितृद्रव्यव्ययेनयत्क्रमा
दायातमुद्धृतं तथापितृद्रव्यव्ययेनलब्धयाविद्ययायल्लब्धं तत्सर्वंसर्वैर्भ्रातृभिः पित्राचविभजनीयम् तथापितृद्रव्याविरोधेनेत्यस्यसर्व
शेषत्वादेवपितृद्रव्याविरोधेनप्रतिग्रहलब्धमितिविभजनीयम् अस्यचसर्वशेषत्वाभावेमैत्रमौद्वाहिकमित्यादिनालब्धव्यम् अथपितृ
द्रव्याविरोधेनापियन्मैत्रादिलब्धंतस्याविभाज्यत्वाद्यन्मैत्रादिवचनमित्यर्थवदित्युच्यते तथासतिसमाचारविरोधः विद्यालब्धेनारदवच
नविरोधश्च कुटुंबंबिभृयाद्भ्रातुर्योविद्यामधिगच्छति भागंविद्याधनात्तस्मात्सलभेताश्रुतोपिसन्निति तथाविद्याधनस्याविभाज्यल
क्षणमुक्तंकात्यायनेन परभक्तोपयोगेनविद्याप्राप्तान्यतस्तुया तयालब्धंधनंयत्तुविद्याप्राप्तंतदुच्यतइति तथापितृद्रव्याविरोधेनेत्यस्य
भिन्नवाक्यत्वेप्रतिग्रहलब्धस्याविभाज्यत्वमाचारविरुद्धमापद्यते एतदेवस्पष्टीकृतंमनुना अनुपघ्नन्पितृद्रव्यंश्रमेणयदुपार्जयेत् दा
यादेभ्योनतद्दद्याद्विद्ययालब्धमेवचेति श्रमेणसेवायुद्धादिना ननुपितृद्रव्याविरोधेनयन्मैत्राल्लब्धंद्रव्यं तदविभाज्यमितिनवक्तव्यं ६६
विभागप्राप्त्यभावात् यद्येनलब्धंतत्तस्यैवनान्यस्येतिप्रसिद्धतरम् प्राप्तिपूर्वकश्चप्रतिषेधः अत्रकश्चिदिदंप्राप्तिमाह यत्किंचि

तु त्पितरिप्रेते धनंज्येष्ठोधिगच्छति भागोयवीयसांतत्रयदिविद्यानुपालिनइति ज्येष्ठोवाकनिष्ठोवामध्यमोवापितरिप्रेते अप्रेतेवायवीयसां प
वर्षीयसांचेतिव्याख्यानेनपितरिसत्यसतिचमैत्रादीनांविभाज्यत्वंप्राप्तंप्रतिषिध्यतेइति तदसत् नह्यत्रप्राप्तस्यप्रतिषेधः किंतुनिषिद्धस्या
नुवादोयम् लोकसिद्धस्यैवानुवादकान्येवप्रायेणास्मिन्प्रकरणेवचनानि अथवा समवेतैस्तुयत्प्राप्तंसर्वेतत्रसमांशिनइतिप्राप्तस्या
पवादइतिसंतुष्यत्विभवान् अतश्चयत्किंचित्पितरिप्रेतेइत्यस्मिन्वचनेज्येष्ठादिपदानांविवक्षयाप्राप्तिरितिव्यामोहमात्रं अतोमैत्रा-
दिवचनैः पितुःप्रागूर्ध्वंवाविभाज्यत्वेनोक्तस्ययत्किंचित्पितरिप्रेतेइत्यपवादइतिव्याख्येयम् तथान्यदप्यविभाज्यमुक्तंमनुना वस्त्रं
पत्रमलंकारंकृतान्नमुदकंस्त्रियः योगक्षेमप्रचारंचनविभाज्यंप्रचक्षतेइति धृतानामेववस्त्राणामविभाज्यत्वम् यद्येनधृतंतत्त
स्यैव पितृधृतानितुपितुरूर्ध्वंविभजतांश्राद्धभोक्त्रेदातव्यानि यथाहबृहस्पतिः वस्त्रालंकारशय्यादिपितुर्यद्वाहनादिकम् गंध
माल्यैःसमभ्यर्च्यश्राद्धभोक्त्रेसमर्पयेदिति अभिनवानितुवस्त्राणिविभाज्यान्येव पत्रंवाहनमश्वशिबिकादि तदपियद्येनारूढंतत्त
स्यैव पित्र्यंतुवस्त्रवदेव अश्वादीनांबहुत्वेतु तद्विक्रयोपजीविनांविभाज्यत्वमेव वैषम्येणाविभाज्यत्वेज्येष्ठस्य अजाविकंसैकश
फंनजातुविषमंभजेत् अजाविकंसैकशफंज्येष्ठस्यैवविधीयतेइतिमनुस्मरणात् अलंकारोपियोयेनधृतःसतस्यैवाधृतःसा
धारणोविभाज्यएव पत्यौजीवतियःस्त्रीभिरलंकारोधृतोभवेत् नतंभजेरन्दायादाभजमानाःपतंतितइति अलंकारोधृतोभवेदि
तिविशेषेणोपादानाद्धृतानांविभाज्यत्वंगम्यते कृतान्नंतंदुलमोदकादि तदप्यविभाज्यम् यथासंभवंभोक्तव्यम् उदकंउ

दकाधारः कूपादिः तच्चविषमंमूल्यद्वारेणनविभाज्यंपर्यायेणोपभोक्तव्यं स्त्रियश्चदास्योविषमानमूल्यद्वारेणविभाज्याः पर्यायेणकर्मकारयि
तव्याः अवरुद्धास्तुपित्रास्वैरिण्याद्याः समाअपिपुत्रैर्नविभाज्याः स्त्रीषुचसंयुक्तास्वविभागइतिगौतमस्मरणात् योगश्चक्षेमश्चयोगक्षे
मं योगशब्देनालब्धलाभकारणं श्रौतस्मार्ताग्निसाध्यमिष्टंकर्मलक्ष्यते क्षेमशब्देनलब्धपरीक्षणहेतुभूतंबहिर्वेदिदानतडागाराम-
निर्माणादिपूर्तंकर्मलक्ष्यते तदुभयंपैतृकमपिपितृद्रव्यविरोधार्जितमप्यविभाज्यं यथाहलौगाक्षिः क्षेमंपूर्तंयोगमिष्टमित्याहुस्त
त्वदर्शिनः अविभाज्येचतेप्रोक्तेशयनासनमेवचेति योगक्षेमशब्देनयोगक्षेमकारिणोराजमंत्रिपुरोहितादयउच्यंतेइतिकेचित् छ

सामान्यार्थसमुत्थानेविभागस्तुसमःस्मृतः अनेकपितृकाणांतुपितृतोभागकल्पना १२३

त्रचामरशस्त्रोपानत्प्रभृतयइत्यन्ये प्रचारोगृहारामादिषुप्रवेशनिर्गममार्गः सोप्यविभाज्यः यत्तूशनसाक्षेत्रस्याविभाज्यत्वमुक्तं अवि
 भाज्यंसगोत्राणामासहस्रकुलादपि याज्यंक्षेत्रंचपत्रंचकृतान्नमुदकंस्त्रियइति तद्ब्राह्मणोत्पन्नक्षत्रियादिपुत्रविषयम् नप्रतिग्रहभू
र्देयाक्षत्रियायसुतायवै यद्यप्येषांपितादद्यान्मृतेविप्रासुतोहरेदितिस्मरणात् याज्यंयाजनकर्मलब्धंपितृप्रसादलब्धंपितृप्रसादल
ब्धस्याविभाज्यत्वंवक्ष्यते नियमातिक्रमस्याविभाज्यत्वमनंतरमेवनिरासितम् १२१ १२२ पितृद्रव्यविरोधेनयदर्जितंतद्विभजनी 
यमितिस्थितम् तत्रार्जकस्यभागद्वयंवसिष्ठवचनात् येनचैषांस्वयमुपार्जितंस्यात्सद्व्यंशमेवलभेतेत्यस्यापवादमाह अविभक्तानां

भ्रातृणांसाधारणस्यार्थस्यकृषिवाणिज्यादिनासमुत्थानेसम्यग्वर्धनेकेनचित्कृतेसमएवविभागोनार्जयितुरंशद्वयम् पित्र्येद्रव्येतुपुत्राणांवि
भागोदर्शितः इदानींपैतामहेपौत्राणांविभागविशेषमाह यद्यपिपैतामहेद्रव्येपौत्राणांजन्मनास्वत्वंपुत्रैरविशिष्टंतथापि तेषांपितृद्वारेणैव
पैतामहद्रव्यविभागकल्पना नस्वरूपापेक्षया एतदुक्तंभवति यदाविभक्ताभ्रातरःपुत्रानुत्पाद्यदिष्टंगतास्तदैकस्यद्वौपुत्रावन्यस्यत्रयोपर
स्यचत्वारइति पुत्राणांवैषम्येतत्रद्वावेकंस्वपित्र्यमंशंलभते अन्येत्रयोप्येकमंशंपित्र्यंचत्वारोप्येकमंशंपित्र्यंलभंतइति तथाकेषुचित्पु
त्रेषुध्रियमाणेषु केषुचित्पुत्रानुत्पाद्यविनष्टेषुयमेवन्यायोध्रियमाणःस्वांशानेवलभंते नष्टानामपिपुत्राःपित्र्यानेवांशान्लभंतइतिवाचनिकाव्य

भूर्यापितामहोपात्तानिबंधोद्रव्यमेवच तत्रस्यात्सदृशंस्वाम्यंपितुःपुत्रस्यचैवहि १२४

वस्था १२३ अधुनाविभक्तेपितर्यविद्यमानभ्रातृकेवापौत्रस्यपैतामहेद्रव्येविभागोनास्ति भ्रियमाणेपितरिपितृतोभागकल्पनेत्युक्तत्वा
त् भवत्तुवास्वार्जितवत्पितुरिच्छयैवेत्याशंकितआह भूःशालिक्षेत्रादिका निबंधएकस्यपर्णभारकस्येयंतिपर्णानि तथाएकस्यक्रमु
कफलभारकस्येयंतिक्रमुकफलानीत्याद्युक्तलक्षणः द्रव्यंसुवर्णरजतादि यत्पितामहेनप्रतिग्रहविजयादिनालब्धंतत्रपितुःपुत्रस्यच
स्वाम्यंलोकप्रसिद्धमितिकृत्वाविभागोस्ति हियस्मात्तत्सदृशंसमानं तस्मान्नपितुरूर्ध्वंयोविभागोनापिपितुर्भागद्वयम् अतःस्वपितृतो
भागकल्पनेत्यप्येतत्स्वाम्येसमेपिवाचनिकम् विभागंचेत्पिताकुर्यादित्येतत्स्वार्जितविषयं तथाद्वावंशौप्रतिपद्येतविभजन्नात्मनःपिते

त्येतदपिस्वार्जितविषयम् जीवतोरस्वतंत्रः स्याज्जरयापिसमन्वितइत्येतदपिपारतंत्र्यंमातापित्रर्जितद्रव्यविषयम् तथा अनीशास्तेपि जीवतोरित्येतदपि तथाच सरजस्कायांमातरिसस्पृहेचपितरिविभागमनिच्छत्यपिपुत्रेच्छयापैतामहद्रव्यविभागोभवति तथाविभक्ते नपित्रापैतामहेद्रव्ये दीयमानेविक्रीयमाणेवापौत्रस्यनिषेधेप्यधिकारः पित्रर्जितेतुननिषेधाधिकारः तत्परतंत्रत्वात् अनुमतिस्तुकर्तव्या तथाहि पैतृकेपैतामहेच स्वाम्यं यद्यपिजन्मनैवतथापिपैतृकेपरतंत्रत्वात् पितुःस्वार्जकत्वेनप्राधान्यात् पित्राविनियुज्यमानेस्वार्जिते द्रव्येपुत्रेणानुमतिःकर्तव्या पैतामहेतुद्वयोःसाम्यमविशिष्टमितिनिषेधाधिकारोप्यस्तीतिविशेषः मनुरपि पैतृकंतुपिताद्रव्यमनवा-

विभक्तेषुसुतोजातोसवर्णायांविभागभाक् दृश्याद्वातद्विभागःस्यादायव्ययविशोधितात् १२५

प्तंयदाप्नुयात् नतत्पुत्रैर्भजेत्सार्द्धमकामः स्वयमर्जितमिति यत्पितामहार्जितंकेनाप्यपहृतंपितामहेनानुद्धृतं यदिपितोद्धरति तत्स्वार्जितमिवपुत्रैः सार्द्धमकामःस्वयंनविभजेदितिवदन् पितामहार्जितमकामोपिपुत्रेच्छयापुत्रैः सहविभजेदितिदर्शयति १२४ विभागोत्तरकालमुत्पन्नस्यकथंभागकल्पनेत्यतआह विभक्तेषुपुत्रेषुपश्चात्सवर्णायांभार्यायामुत्पन्नोविभागभाक् विभज्यतेइतिविभागः पित्रोर्विभागस्तंभजतीतिविभागभाक् पित्रोरूर्ध्वंतयोरंशंलभतइत्यर्थः मातृभागंचासत्यांदुहितरि मातुर्दुहितरःशेषमित्युक्तत्वात् असवर्णायामुत्पन्नस्तु स्वांशमेवपित्र्याल्लभते मातृकंतुसर्वमेव एतदेवमनुनोक्तम् ऊर्ध्वंविभागाज्जातस्तुपित्र्यमेवहरेद्धनमिति पित्रो



रिदंपित्र्यमितिव्याख्येयम् अनीशःपूर्वजःपित्रोर्भ्रातुर्भागेविभक्तजः इतिस्मरणात् मातापित्रोर्विभागेविभागात्पूर्वमुत्पन्नोनस्वामीविभक्तजश्चभ्रातुर्भागेनास्तीत्यर्थः तथा विभागोत्तरकालंपित्रायत्किंचिदर्जितंतत्सर्वंविभक्तजस्यैव पुत्रैःसहविभक्तेनपित्रायत्स्वयमर्जितम् विभक्तजस्यतत्सर्वमनीशाःपूर्वजाःस्मृताइतिस्मरणात् येचविभक्ताःपित्रासहसंसृष्टास्तैःसार्द्धंपितुरूर्ध्वंविभक्तजोविभजेत यथाहमनुः संसृष्टास्तेनवायेस्युर्विभजेतससतैःसहेति पितुरूर्ध्वंपुत्रेषुविभक्तेषुपश्चादुत्पन्नस्यकथंभागकल्पनेत्यतआह तस्यपितरिप्रेतेभ्रातृविभागसमयेऽस्पष्टगर्भायांमातरिभ्रातृविभागोत्तरकालमुत्पन्नस्यविभागस्तद्विभागःकुतइत्यतआह दृश्याद्भ्रातृभिर्गृहीताद्धनात् कीदृशात् आयव्ययविशोधितात् आयःप्रतिदिवसंप्रतिमासंप्रत्यब्दंवायदुत्पद्यते व्ययःपितृकृतर्णापाकरणम् ताभ्यामायव्ययाभ्यांयच्छोधितंतस्मात् उद्धृत्यतद्भागोदातव्यःस्यात् एतदुक्तंभवति प्रातिस्विकेषुभागेषुतदुत्थमायंप्रवेश्यपितृकृतंचर्णमपनीयावशिष्टेभ्यःस्वेभ्यःस्वेभ्योभागेभ्यःकिंचित्किंचिदुद्धृत्यविभक्तजस्यभागःस्वभागसमःकर्तव्यइति एतच्चविभागसमयेभ्रातृभार्यायामप्रजस्यास्पष्टगर्भायांविभागादूर्ध्वमुत्पन्नस्यापिवेदितव्यम् स्पष्टगर्भायांतुप्रसवंवीक्ष्यविभागःकर्तव्यः यथाहवसिष्ठः अथभ्रातॄणांदायविभागोयाश्चानपत्याःस्त्रियस्तासामापुत्रलाभादिति गृहीतगर्भाणामाप्रसवात्प्रतीक्षणमितियोजनीयम् १२५ विभक्तजःपित्र्यंमातृकंचसर्वंधनंगृह्णातीत्युक्तं तत्रयदिविभक्तः पितामातावाविभक्तायपुत्रायस्नेहवशादाभरणादिकंप्रयच्छति तत्रविभक्तजेनदानप्रतिषेधोनकर्तव्योनापिदत्तंप्रत्याहर्तव्यमित्याह मातापितृभ्यांविभक्ताभ्यांपूर्वंविभक्तस्यपुत्रस्ययद्दत्तमलंकारादितत्तस्यैवपुत्रस्यनविभक्त

जस्य स्वं भवति न्यायसाम्याद्विभागात्प्रागपि यस्य यद्दत्तं तत्तस्यैव तथा सति विभक्तजे विभक्तयोः पित्रोरंशं तदूर्ध्वं विभजतां यस्य यद्दत्तं तत्त
स्यैव नान्यस्येति वेदितव्यम् जीवद्विभागे स्वपुत्रसमांशित्वं पत्नीनामुक्तम् यदि कुर्यात्समानंशानित्यादिना पितुरूर्ध्वं विभागेपि मातुः स्व
पुत्रसमांशित्वं दर्शयितुमाह पितुरूर्ध्वं पितुः प्रयाणादूर्ध्वं विभजतां माताऽपि स्वपुत्रांशसमं अंशं हरेत् यदि स्त्रीधनं न दत्तं दत्ते त्वर्द्धां
शहारिणीति वक्ष्यते १२६ पितरि प्रेते यद्यसंस्कृता भ्रातरः संति तत्संस्कारे कोऽधिक्रियत इत्यत आह पितुरूर्ध्वं विभजद्भिर्भ्रातृभिरसं

पितृभ्यां यस्य यद्दत्तं तत्तस्यैव धनं भवेत् पितुरूर्ध्वं विभजतां माताप्यंशं समं हरेत् १२६
असंस्कृतास्तु संस्कार्या भ्रातृभिः पूर्वसंस्कृतैः भगिन्यश्च निजादंशाद्दत्वांशं तु तुरीयकं १२७

स्कृता भ्रातरः समुदायद्रव्येण संस्कर्तव्याः असंस्कृतासु भगिनीषु विशेषमाह अस्यार्थः भगिन्यश्चासंस्कृताः संस्कर्तव्या भ्रातृभिः किं
कृत्वा निजादंशाच्चतुर्थमंशं दत्वा अनेन दुहितरोऽपि पितुरूर्ध्वं अंशभागिन्य इति गम्यते तत्र निजादंशादिति प्रत्येक परिकल्पितादंशादुद्धृत्य चतु
र्थांशो दातव्य इति अयमर्थो न भवति किंतु यज्जातीया कन्या तज्जातीयपुत्रभागचतुर्थांशभागिनी कर्तव्या एतदुक्तं भवति यदि ब्राह्मणी
सा कन्या तदा ब्राह्मणीपुत्रस्य यावानंशो भवति तस्य चतुर्थांशस्तस्या भवतीति तद्यथा यदि कस्यचिद्ब्राह्मण्येव एका पत्नी पुत्रश्चैकः ६१
कन्या चैका तत्र पित्र्यं सर्वमेव द्रव्यं द्विधा विभज्य तथैकं भागं चतुर्धा विभज्य तुरीयमंशं कन्यायै दत्वा शेषं पुत्रो गृह्णीयात् अथ तु द्वौ पुत्रौ

एका कन्या तदा पितृधनं सर्वं त्रेधा विभज्य एकं भागं चतुर्धा विभज्य तुरीयमंशं कन्यायै दत्वा शेषं द्वौ पुत्रौ विभज्य गृह्णीतः अथ त्वेकः पुत्रो द्वे
कन्ये तदा पित्र्यं धनं त्रेधा विभज्य एकं भागं चतुर्धा विभज्य तत्र द्वौ भागौ द्वाभ्यां कन्याभ्यां दत्वावशिष्टं सर्वं पुत्रो गृह्णीयात् एवं समानजातीये
षु समविषमेषु भ्रातृषु भगिनीषु च योजनीयम् यदा तु ब्राह्मणीपुत्र एकः क्षत्रियकन्या एका तत्र पित्र्यं धनं सप्तधा विभज्य क्षत्रियापुत्रभागां
स्त्रींश्चतुर्धा विभज्य तुरीयांशं क्षत्रियाकन्यायै दत्वा शेषं ब्राह्मणीपुत्रो गृह्णाति यत्र तु द्वौ ब्राह्मणीपुत्रौ क्षत्रियाकन्या चैका तत्र पित्र्यं धनमे
कादशधा विभज्य तेषु त्रीनंशान् क्षत्रियापुत्रभागान् चतुर्धा विभज्य चतुर्थमंशं क्षत्रियाकन्यायै दत्वा शेषं सर्वं ब्राह्मणीपुत्रौ विभज्य गृह्णी
तः एवं जातिवैषम्ये भ्रातॄणां भगिनीनां च संख्यायाः साम्ये वैषम्ये च सर्वत्रोहनीयम् न च निजादंशाद्दत्वांशं तु तुरीयकमिति तुरीयांश
विवक्षया संस्कारमात्रोपयोगि द्रव्यं दत्वेति व्याख्यानं युक्तम् मनुवचनविरोधाच्च येभ्योंऽशेभ्यस्तु कन्यायाः प्रदद्युर्भ्रातरः पृथक् स्वात्
स्वादंशाच्चतुर्भागं पतिताः स्युरदित्सव इति अस्यार्थः ब्राह्मणादयो भ्रातरो ब्राह्मणीप्रभृतिभ्यो भगिनीभ्यः स्वेभ्यः स्वजातिवि हि
तेभ्योंऽशेभ्यश्चतुरोंऽशान्हरेद्विप्र इत्यादिवक्ष्यमाणेभ्यः स्वात्स्वादंशादात्मीयभागाच्चतुर्थभागं दद्युः न चात्मीयभागादुद्धृत्य चतुर्थांशो
देय इत्युच्यते किंतु स्वजातिविहितादेकस्मादंशात्पृथक्पृथगेकस्यै कन्यायै चतुर्थांशो देय इति जातिवैषम्ये संख्यावैषम्ये च विभागक्लृ
प्तिरुक्तैव पतिताः स्युरदित्सव इत्यकरणे प्रत्यवायश्रवणादवश्यदातव्यता प्रतीयते अत्रापि चतुर्भागवचनमविवक्षितं संस्कारोपयोगि
द्रव्यदानमेव विवक्षितमिति चेन्न स्मृतिद्वयेपि चतुर्थांशदानाविवक्षायां प्रमाणाभावाददाने प्रत्यवायश्रवणाच्चेति तदपि केचिदुच्यते

अंशदानविवक्षायां बहुभ्रातृकायां बहुधनत्वं बहुभगिनीकस्य च निर्धनतामाप्नोतीति तदुक्तनीत्या परिहृतमेव नह्यत्रात्मीयाद्भागादुद्धृत्य चतुर्थांशस्य दानमुच्यते येन तथा स्याद्‌ अतोऽस्मत्सहायमेधातिथिप्रभृतीनां व्याख्यानमेव चतुरस्रम्‌ नभारुचेः तस्मात्पितुरूर्ध्वं कन्याप्यंशभागिनी पूर्वं चेद्यत्किंचित्पिता ददाति तदेव लभते विशेषवचनाभावादिति सर्वमनवद्यम्‌ एवं विभागश्चेत्पिता कुर्यादित्यादिना प्रबंधेन समानजातीयानां भ्रातॄणां परस्परं पित्रा च सह विभागक्लृप्तिरुक्ता १२७ अधुना भिन्नजातीयानां विभागमाह तिस्रो वर्णानुपूर्व्येणेति ब्राह्मणस्य चतस्रः क्षत्रियस्य तिस्रो वैश्यस्य द्वे शूद्रस्यैकेति भार्या दर्शिताः तत्र ब्राह्मणात्मजा ब्राह्मणोत्पन्ना वर्णशः वर्णशब्देन ब्राह्मणादिवर्णाः स्त्रिय उच्यंते संख्यैकवच

चतुस्त्रिद्व्येकभागाः स्युर्वर्णशो ब्राह्मणात्मजाः क्षत्रजास्त्रिद्व्येकभागा विड्जास्तु द्व्येकभागिनः १२८

नात्र वीप्सायामित्यधिकरणकारकादेकवचनाद्वीप्सायां शस्‌ अतश्च वर्णे वर्णे ब्राह्मणोत्पन्ना यथाक्रमं चतुस्त्रिद्व्येकभागाः स्युर्भवेयुः एतदुक्तं भवति ब्राह्मणेन ब्राह्मण्यामुत्पन्ना एकैकशश्चतुरश्चतुरो भागाँल्लभंते तेनैव क्षत्रियायामुत्पन्नास्त्रींस्त्रीन्‌ वैश्यायां द्वौ द्वौ शूद्रायामेकमेकमिति क्षत्रजाः क्षत्रियेणोत्पन्नाः वर्णश इत्यनुवर्तते यथाक्रमं त्रिद्व्येकभागाः क्षत्रियेणोक्तलक्षणेन क्षत्रियायामुत्पन्नाः प्रत्येकं त्रीन्‌ त्रीन्‌ भागान्‌ लभंते वैश्यायां द्वौ द्वौ शूद्रायामेकमेकं विड्जाः वैश्येनोत्पन्नाः अत्रापि वर्णश इत्यनुवर्तते यथाक्रमं द्व्येकभागिनः वैश्येन वैश्यायामुत्पन्नाः प्रत्येकं द्वौ द्वौ भागौ लभंते शूद्रायामेकमेकं शूद्रस्यैकैव भार्येति भिन्नजातीयपुत्राभावात्तत्पुत्राणां पूर्वोक्त एव विभागः

यद्यपि चतुस्त्रिद्व्येकभागा इत्यविशेषेणोक्तं तथापि प्रतिग्रहप्राप्तभूव्यतिरिक्तविषयमिदं द्रष्टव्यम्‌ यतः स्मरति न प्रतिग्रहभूर्देया क्षत्रियादिसुताय वै यद्यप्येषां पिता दद्यान्मृते विप्रासुतो हरेदिति प्रतिग्रहग्रहणात्क्रयादिना लब्धा भूः क्षत्रियादिसुतानामपि भवत्येव शूद्रापुत्रस्य विशेषप्रतिषेधाच्च शूद्र्यां द्विजातिभिर्जातो न भूमेर्भागमर्हतीति यदि क्रयादिप्राप्ता भूः क्षत्रियादिसुतानां न भवेत्तदा शूद्रापुत्रस्य विशेषप्रतिषेधो नोपपद्यते यत्पुनः ब्राह्मणक्षत्रियविशां शूद्रापुत्रो न रिक्थभाक्‌ यदेवास्य पिता दद्यात्तदेवास्य धनं भवेदिति तदपि जीवता पित्रा यदि शूद्रापुत्राय किमपि प्रदत्तं स्यात्तद्विषयं यदा तु प्रसाददानं नास्ति तदैकांशभागित्यविरुद्धम्‌ १२८ सर्वविभागशेषं किंचिदुच्यते परस्परापहृतं समुदा

अन्योन्यापहृतं द्रव्यं विभक्ते यत्तु दृश्यते तत्पुनस्ते समैरंशैर्विभजेरन्निति स्थितिः १२९

यद्द्रव्यं विभागकाले वाज्ञातं विभक्ते पितृधने यद्दृश्यते तत्समैरंशैर्विभजेरन्नित्येवं स्थितिः शास्त्रमर्यादा अत्र समैरंशैरिति वदता मुद्धारविभागो निषिद्धः विभजेरन्निति वदता येन दृश्यते तेनैव न ग्राह्यमिति दर्शितं एवं वचनस्यार्थवत्त्वान्न समुदायद्रव्यस्यापहारे दोषाभावपरत्वम्‌ ननु मनुना ज्येष्ठस्यैव समुदायद्रव्यापहारे दोषो दर्शितो न कनीयसाम्‌ यो ज्येष्ठो विनिकुर्वीत लोभाद्भ्रातॄन्यवीयसः सज्येष्ठः स्यादभागश्च नियंतव्यश्च राजभिरिति वचनात्‌ नैतत्‌ यतः संभावितस्वामित्वस्य पितृस्थानीयस्य ज्येष्ठस्यापि दोषं वदता ज्येष्ठपरतंत्राणां कनीयसां पुत्रस्थानीयानां दंडापूपिकन्यायात्सुतरां दोषो दर्शित एव तथा चाविशेषेण दोषः श्रूयते यो वै भागिनं भागान्नुदते च्यवते वैनं स यदि वैनं न च्यवते थपु

त्वमथपौत्रंत्वयनइति योभागिनंभागार्हंभागान्नुदते भागादपाकरोति भागंतस्मैनप्रयच्छति सभागान्नुन्नएनंनोत्तारंत्वयनेनाशयतिदो
षिणंकरोति यदिननाशयतितदातस्यपुत्रंपौत्रंवानाशयतीतिज्येष्ठविशेषमंतरेणैव साधारणद्रव्यापहारिणोदोषः श्रुतः अथसाधार
णंद्रव्यमात्मनोपिस्वंभवतीति स्वबुद्ध्यागृह्यमाणंनदोषमावहतीति समंतदसत् स्वबुद्ध्यागृहीतेप्यवर्जनीयतयापरस्वमपिगृहीत-
मेवेतिनिषेधानुपवेशाद्दोषमावहत्येव यथामौद्गचरौविपन्नेसदृशतयामाषेषुगृह्यमाणेषु अयज्ञियामाषाइतिनिषेधेनप्रविशति
मुद्गावयवबुद्ध्यागृह्यमाणत्वादितिपूर्वपक्षिणोक्तेमुद्गावयवेषुगृह्यमाणेष्ववर्जनीयतयामाषावयवाअपिगृह्यंतएवेतिनिषेधःप्रविशत्ये

अपुत्रेणपरक्षेत्रेनियोगोत्पादितःसुतः उभयोरप्यसौरिक्थीपिंडदाताचधर्मतः १३०

वेतिराद्धांतिनोक्तम् तस्माद्वचनतोन्यायतश्चसाधारणद्रव्यापहारेदोषोस्त्येवेतिसिद्धम् १२९ द्व्यामुष्यायणस्यभागविशेषंदर्शय
न् तस्यस्वरूपमाह अपुत्रांगुर्वनुज्ञातइत्याद्युक्तविधिना अपुत्रेणदेवरादिना परक्षेत्रेपरस्यभार्यायांगुरुनियोगेनोत्पादितःपुत्रउभ
योर्बीजिक्षेत्रिणोरसौरिक्थीरिक्थहारीपिंडदाताचधर्मतइत्यस्यार्थः यदासौनियुक्तोदेवरादिः स्वयमप्यपुत्रोपुत्रस्यक्षेत्रेस्वपरपुत्रार्थं
प्रवृत्तोयंजनयति सहिद्विपितृकोद्व्यामुष्यायणोद्वयोरपिरिक्थहारीपिंडदाताच यदातुनियुक्तःपुत्रवान् केवलंक्षेत्रिणःपुत्रार्थंप्रयतते ७१
तदातदुत्पन्नाःक्षेत्रिणएवपुत्राभवंतीति नबीजिनःसचननियमेन बीजिनोरिक्थहारीपिंडदोवेति तथोक्तंमनुना क्रियाभ्युप

गमात्त्वेवबीजार्थंयत्प्रदीयते तस्येहभागिनौदृष्टौबीजीक्षेत्रिकएवचेति क्रियाभ्युपगमादिति अत्रोत्पन्नमपत्यमावयोरुभयोरपिभवत्विति
संविदंगीकरणाद्यत्क्षेत्रंक्षेत्रस्वामिनाबीजावपनार्थंबीजिनेदीयते तत्रतस्मिन्क्षेत्रेउत्पन्नस्यापत्यस्यबीजिक्षेत्रिणौभागिनौस्वामिनौदृष्टौ
महर्षिभिः तथाफलंत्वनभिसंधायक्षेत्रिणांबीजिनांतथा प्रत्यक्षंक्षेत्रिणामर्थोबीजाद्योनिर्बलीयसीति फलंत्वनभिसंधायेतिअत्रोत्पन्न
मपत्यमावयोरस्त्वित्येवमनभिसंधायपरक्षेत्रेयदपत्यमुत्पाद्यते तदपत्यंक्षेत्रिणएव यतोबीजाद्योनिर्बलीयसीतिगवाश्वादिषुतथाद
र्शनात् अत्रापिनियोगोवाग्दत्ताविषयएव इतरस्यनियोगस्यमनुनानिषिद्धत्वात् देवराद्वासपिंडाद्वास्त्रियासम्यङ्नियुक्तया प्रजे-
प्सिताधिगंतव्यासंतानस्यपरीक्षये विधवायांनियुक्तस्तुघृताक्तोवाग्यतोनिशि एकमुत्पादयेत्पुत्रंनद्वितीयंकथंचनेत्येवंनियोगमुक्त
्वास्यमनुःस्वयमेवनिषेधति नान्यस्मिन्विधवानारीनियोक्तव्याद्विजातिभिः अन्यस्मिन्हिनियुंजानाधर्मंहन्युःसनातनं नोद्वाहिके
षुमंत्रेषुनियोगःकीर्त्यतेक्वचित् नविवाहविधावुक्तंविधवावेदनंपुनः अयंद्विजैर्हिविद्वद्भिःपशुधर्मोविगर्हितः मनुष्याणामपिप्रोक्तो
वेनेराज्यंप्रशासति समहीमखिलांभुंजन्राजर्षिप्रवरःपुरा वर्णानांसंकरंचक्रेकामोपहतचेतनः ततःप्रभृतियोमोहात्प्रमीतपतिकांस्त्रियम्
नियोजयत्यपत्यार्थंगर्हंतेतंहिसाधवइति नचविहितप्रतिषिद्धत्वाद्विकल्पइतिमंतव्यम् नियोक्तृणांनिंदाश्रवणात् स्त्रीधर्मेषुव्यभिचारस्य
बहुदोषश्रवणात् संयमस्यप्रशस्तत्वाच्च यथामनुरेव कामंतुक्षपयेद्देहंपुष्पमूलफलैःशुभैः नतुनामापिगृह्णीयात्पत्यौप्रेतेपरस्यत्विति
जीवनार्थंपुरुषांतराश्रयणंप्रतिषिध्यते आसीतामरणात्क्षांतानियताब्रह्मचारिणी योधर्मएकपत्नीनांकांक्षंतीतमनुत्तमम् अनेकानि

स्त्रहस्त्राणिकौमारब्रह्मचारिणाम् दिवंगतानिविप्राणामकृत्वाकुलसंततिम् मृतेभर्तरिसाध्वीस्त्रीब्रह्मचर्येव्यवस्थिता स्वर्गंगच्छत्यपुत्रापि यथातेब्रह्मचारिणः अपत्यलोभाद्यातुस्त्रीभर्तारमतिवर्तते सेहनिंदामवाप्नोतिपरलोकाच्चहीयतेइति पुत्रार्थमपिपुरुषांतराश्रयणंनिषेधति तस्माद्विहितप्रतिषिद्धत्वाद्विकल्पइतिनयुक्तम् १३०. एवंविवाहसंस्कृतानियोगेप्रतिषिद्धे कस्तर्हिधर्म्योनियोगइत्यत आह यस्मैवाग्दत्ताकन्या साप्रतिग्रहमंत्रैणैव तस्याःपतिरित्यस्मादेववचनादवगम्यते तस्मिन्म्रेतेदेवरस्तस्यज्येष्ठः कनिष्ठोवानिजः सोदरोविं



यस्याम्रियेतकन्यायावाचासत्येकृतेपतिः तामनेनविधानेननिजोविंदेतदेवरः १३१
यथाविध्यभिगम्यैनांशुक्लवस्त्रांशुचिव्रताम् मिथोभजेताप्रसवात्सकृत्सकृदृतावृतौ १३२

देतपरिणयेत् यथाविधियथाशास्त्रमधिगम्यपरिणीय अनेनविधानेनघृताभ्यंगवाङ्नियमादिनाशुक्लवस्त्रांशुचिव्रतांमनोवाक्कायसंयतांमिथोरहस्यागर्भग्रहणात् प्रत्यृतावेकैकंवारंगच्छेत् अनेनविवाहोवाचनिकोघृताभ्यंगादिनियमवन्नियुक्ताभिगमनांगमितिनदेवरस्यभार्यात्वमापादयति अतस्तदुत्पन्नमपत्यंक्षेत्रस्वामिनएवभवति नदेवरस्य संविदातूभयोरपि समानासमानजातीयपुत्राणांविभागक्लृप्तिरुक्ता १३१ १३२ ७२

अधुनामुख्यगौणपुत्राणांदायग्रहणव्यवस्थांदर्शयिष्यन्तेषांस्वरूपंतावदाह उरसोजातऔरसःपुत्रः सचधर्मपत्नीजः सवर्णाधर्मविवाहोढाधर्मपत्नी तस्यांजातऔरसःपुत्रोमुख्यः तत्समःपुत्रिकासुतः तत्सम औरससमः पुत्रिकायाःसुतःपुत्रिकासुतः अतएवौरससमः यथाहवसिष्ठः अभ्रातृकांप्रदास्यामितुभ्यंकन्यामलंकृताम् अस्यांयोजायतेपुत्रः समेपुत्रोभवेदितीति अथवापुत्रिकैवसुतःपुत्रिकासुतः सोप्यौरससमएव पित्रवयवानामल्पत्वात् मात्रवयवानांबाहुल्याच्च यथाहवसिष्ठः द्वितीयःपुत्रिकैवेति द्वितीयःपुत्रःपुत्रिकैवेत्यर्थः द्या

औरसोधर्मपत्नीजस्तत्समःपुत्रिकासुतः क्षेत्रजःक्षेत्रजातस्तुसगोत्रेणेतरेणवा १३३
गृहेप्रच्छन्नउत्पन्नोगूढजस्तुसुतःस्मृतः कानीनःकन्यकाजातोमातामहसुतोमतः १३४

मुष्यायणस्तुजनकस्यौरसादपकृष्टोऽन्यक्षेत्रोत्पन्नत्वात् क्षेत्रजःक्षेत्रजातस्तुसगोत्रेणेतरेणवा इतरेणासपिंडेनदेवरेणवोत्पन्नःपुत्रःक्षेत्रजः १३३ गूढजःपुत्रोभर्तृगृहेप्रच्छन्नउत्पन्नोहीनाधिकजातीयपुरुषजत्वपरिहारेणपुरुषविशेषजत्वनिश्चयाभावेपिसवर्णजत्वनिश्चयेसतिबोद्धव्यः कानीनस्तुकन्यकायामुत्पन्नः पूर्ववत्सवर्णात्समातामहपुत्रः यद्यनूढासाभवेत्तथापिपितृगृहएवसंस्थिता अथतूढातथावोढुरेवपुत्रः यथाहमनुः पितृवेश्मनिकन्यातुयंपुत्रंजनयेद्रहः तंकानीनंवदेन्नाम्नावोढुःकन्यासमुद्भवमिति १३४ ७

पौनर्भवस्तुपुत्रोक्षतायांक्षतायांवापुनर्भुवांसवर्णादुत्पन्नः मात्राभर्त्रनुज्ञयाप्रोषितेप्रेतेवाभर्तरिपित्रावोभाभ्यांवासवर्णायस्मैदीयतेसतस्यदत्त- 
कःपुत्रः यथाहमनुः मातापितावादद्यातांयमद्भिःपुत्रमापदि सदृशंप्रीतिसंयुक्तंसदेयोदत्त्रिमःस्मृतइति आपद्ग्रहणादनापदिनदेयः दातुर 
यंप्रतिषेधः तथाएकपुत्रोनदेयः नत्वेवैकंपुत्रंप्रतिगृह्णीयाद्दद्यादेतिवसिष्ठस्मरणात् तथानेकपुत्रसद्भावेपिज्येष्ठोनदेयः ज्येष्ठेनजातमात्रे-
णेपुत्रीभवतिमानवइति तस्यैवपुत्रकार्यकरणेमुख्यत्वात् पुत्रप्रतिग्रहप्रकारश्चपुत्रंप्रतिगृहीष्यन्बंधूनाहूयराजनिचावेद्यनिवेशनमध्येव्या
हृतिभिर्हुत्वा अदूरबांधवंबंधुसन्निकृष्टएवप्रतिगृह्णीयादिति वसिष्ठेनोक्तः अदूरबांधवमित्ययंचदेशभाषाविप्रकृष्टस्यप्रतिषेधः एवंक्रीतस्य

अक्षतायांक्षतायांवाजातःपौनर्भवःसुतः दद्यान्मातापितावायंसपुत्रोदत्तकोभवेत् १३५ क्रीतश्चताभ्यांविक्री
तःकृत्रिमःस्यात्स्वयंकृतः दत्तात्मातुस्वयंदत्तोगर्भेविन्नःसहोढजः १३६

यंदत्तकृत्रिमेष्वपियोजनीयम् समानन्यायत्वा-
त् १३५ क्रीतस्तुपुत्रस्ताभ्यांमातापितृभ्यांमात्रापित्रावाविक्रीतःपुत्रवत् सचैकंज्येष्ठंचपुत्रंवर्जयित्वाआपदिसवर्णाइत्येव यत्तुमनुनोक्तम्
क्रीणीयाद्यस्त्वपत्यार्थंमातापित्रोर्यमंतिकात् सक्रीतकसुतस्तस्यसदृशोऽसदृशोपिवेति तद्गुणैःसदृशोऽसदृशोवेतिव्याख्येयम् नजात्या
सजातीयेष्वयंप्रोक्त इत्युपसंहारात् कृत्रिमःस्यात्स्वयंकृतःकृत्रिमस्तुपुत्रः स्वयंपुत्रार्थिनाधनक्षेत्रप्रदर्शनादिप्रलोभनैःपुत्रीकृतोमातापि 
तृविहीनस्तत्सद्भावेतत्परतंत्रत्वात् दत्तात्मातुपुत्रोयोमातापितृविहीनस्ताभ्यांत्यक्तोवातवाहंपुत्रोभवामीतिस्वयंदत्तत्वमुपगतः सहोढजस्तु

---

गर्भेस्थितोगर्भिण्यांपरिणीतायांयःपरिणीतःसवोढुःपुत्रः १३६ अपविद्धोमातापितृभ्यामुत्सृष्टोयोगृह्यतेसगृहीतुःपुत्रः सर्वत्रसवर्णइत्ये
व एवंमुख्यामुख्यपुत्राननुक्रम्यैतेषांदायग्रहणेक्रममाह एतेषांपूर्वोक्तानांपुत्राणांद्वादशानांपूर्वस्यपूर्वस्याभावेउत्तरःउत्तरःपिंडदःश्रा
द्धदोंशहरोधनहरोवेदितव्यः औरसपौत्रिकेयसमवायेऔरसस्यैव धनग्रहणेप्राप्तेमनुरपवादमाह पुत्रिकायांकृतायांतुयदिपुत्रोनजा
यते समस्तत्रविभागःस्यात्ज्येष्ठतानास्तिहिस्त्रियाइति अन्येषामपिपूर्वस्मिन्पूर्वस्मिन्सत्यप्युत्तरेषांपुत्राणांचतुर्थांशभागित्वमुक्तं
वसिष्ठेन यस्मिंश्चेत्प्रतिगृहीतेऔरसउत्पद्येतचतुर्भागभागीस्यात् दत्तकइति दत्तकग्रहणंक्रीतकृत्रिमादीनांप्रदर्शनार्थम् पुत्रीकरणा

उत्सृष्टोगृह्यतेयस्तुसोपविद्धोभवेत्सुतः पिंडदोंशहरश्चैषांपूर्वाभावेपरःपरः १३७

विशेषात् तथाचकात्यायनः उत्पन्नेत्वौरसेपुत्रेचतुर्थांशहराःस्मृताः सवर्णाअसवर्णास्तुग्रासाच्छादनभाजनाइति सवर्णादत्तक
क्षेत्रजादयस्तेसत्यौरसेचतुर्थांशहराः असवर्णाःकानीनगूढोत्पन्नसहोढपौनर्भवास्तेत्वौरसेसतिनचतुर्थांशहराः किंतुग्रासाच्छाद
नभाजनाः यदपिविष्णुवचनम् अप्रशस्तास्तुकानीनगूढोत्पन्नसहोढजाः पौनर्भवश्चनैवैतेपिंडरिक्थांशभागिनइति तदप्यौ
रसेसतिचतुर्थांशनिषेधपरमेव औरसाद्यभावेतुकानीनादीनामपिसकलपित्र्यधनग्रहणमस्त्येव पूर्वाभावेपरःपरइतिवच
नात् यदपिमनुवचनम् एकएवौरसःपुत्रःपित्र्यस्यचस्मृतःप्रभुः शेषाणामानृशंस्यार्थंप्रदद्यात्तुप्रजीवनमिति तदपिद

त्रकादीनामौरसप्रतिकूलत्वेनिर्गुणत्वेचवेदितव्यम् तत्रक्षेत्रजस्यविशेषोदर्शितस्तेनैव षष्ठंतुक्षेत्रजस्यांशंप्रदद्यात्पैतृकाद्धनात् औरसोविभज न्दायंपित्र्यंपंचममेववेति प्रतिकूलत्वनिर्गुणत्वसमुच्चयेषष्ठमंशम् एकतरसद्भावेपंचममितिविवेक्तव्यं यदपिमनुनापुत्राणांषड्द्वयमुपन्यस्य पूर्वषट्कस्यदायादबांधवमुत्तरषट्कस्यादायादबांधवत्वमुक्तम् औरसःक्षेत्रजश्चैवदत्तःकृत्रिमएवच गूढोत्पन्नोपविद्धश्चदायादाबांधवाश्चषट् कानी नश्च सहोढश्चक्रीतःपौनर्भवस्तथा स्वयंदत्तश्चपौत्रीचषडदायादबांधवाइति तदपिस्वपितृसपिंडसमानोदकानांसन्निहितरिक्थहरांतराभावेपू र्वषट्कस्यतद्रिक्थहरत्वमुत्तरषट्कस्यतुतन्नास्ति बांधवत्वंपुनःसमानगोत्रत्वेनचोदकप्रदानादिकार्यकरत्वंवर्गद्वयस्यापिसममेवेतिव्याख्येयम् गो त्ररिक्थेजनयितुर्नभजे त्कृत्रिमःसुतः गोत्ररिक्थानुगःपिंडोव्यपैतिददतःस्वधेत्यत्र दत्रिमग्रहणस्यपुत्रप्रतिनिधिप्रदर्शनार्थत्वात् पितृधनहा रित्वंतुपूर्वस्यपूर्वस्याभावेसर्वेषामविशिष्टम् नभ्रातरोनपितरःपुत्रारिक्थहराःपितुरित्यस्यौरसव्यतिरिक्तानांपुत्रप्रतिनिधीनांसर्वेषांरिक्थहा रित्वप्रतिपादनपरत्वात् औरसस्यैकएवौरसःपुत्रःपित्र्यस्यवसुनःप्रभुरित्यनेनैवरिक्थभाक्त्वस्योक्तत्वात् दायादशब्दस्यदायादानपिदापयेदि त्यादौ पुत्रव्यतिरिक्तरिक्थभाग्विषयत्वेनप्रसिद्धत्वाच्च वसिष्ठादिषुवर्गद्वयेपिकस्यचिद्व्यत्ययेनपाठोगुणवदगुणवद्विषयोवेदितव्यः गौतमीयेतु पौत्रिकेयस्यदशमत्वेनपाठोविजातीयविषयः तस्मात्स्थितमेतत्पूर्वपूर्वाभावेपरःपरोंशभागिति यत्तु भ्रातॄणामेकजातानामेकश्चेत्पुत्रवान्भ वेत् सर्वेतेतेनपुत्रेणपुत्रिणोमनुरब्रवीदिति तदपिभ्रातृपुत्रस्यपुत्रीकरणसंभवेन्येषांपुत्रीकरणनिषेधार्थम् नपुनःपुत्रत्वप्रतिपादनाय ७५ तत्कृतोगोत्रजोबंधुरित्यनेनविरोधात् १३७ ५ ७ ६ ७ ६

---

इदानीमुक्तोपसंहारव्याजेनतत्रैवनियममाह समानजातीयेष्वेवपुत्रेषु अयंपूर्वाभावेपरःपरइत्युक्तोविधिःनभिन्नजातीयेषु तत्रचकानीनगूढोत्प न्नसहोढपौनर्भवाणांसवर्णत्वंजनकद्वारेणनस्वरूपेण तेषांवर्णजातिलक्षणाभावस्योक्तत्वात् तथानुलोमजानांक्षत्रियादीनामौरसेष्वंतर्भावात्ते षामप्यभावेक्षेत्रजादीनांदायहरत्वंबोद्धव्यम् शूद्रापुत्रस्त्वौरसोपिकृत्स्नंभागमन्याभावेपिनलभते यथाहमनुः यद्यपिस्यात्तुसत्पुत्रोयद्यपु त्रोपिवाभवेत् नाधिकंदशमाद्दद्याच्छूद्रापुत्रायधर्मतइति यदिसत्पुत्रोविद्यमानद्विजातिपुत्रोयद्यपुत्रोऽविद्यमानद्विजातिपुत्रोवास्यात्तस्मि न्मृते क्षेत्रजादिर्वान्योवासपिंडःशूद्रापुत्रायतद्धनाद्दशमांशादधिकंनदद्यादित्यस्मादेवक्षत्रियावैश्यापुत्रयोःसवर्णापुत्राभावेसकलधनग्रहणंग

सजातीयेष्वयंप्रोक्तस्तनयेषुमयाविधिः जातोऽपिदास्यांशूद्रेणकामतोंशहरोभवेत् १३८

म्यते अधुनाशूद्रधनविभागेविशेषमाह शूद्रेणदास्यामुत्पन्नःपुत्रःकामतःपितुरिच्छयाभागंलभते पितुरूर्ध्वंतुयदिपरिणीतापु त्राःसंति तेभ्रातरस्तंदासीपुत्रं अर्धभागिनंकुर्युः स्वभागादर्धंदद्युरित्यर्थः अथपरिणीतापुत्रानसंति तदाकृत्स्नंधनंदासीपुत्रोगृह्णीयात् यदिपरिणीतादुहितरस्तत्पुत्रावानसंति तत्सद्भावेत्वर्धभागिकएवदासीपुत्रः अत्रचशूद्रग्रहणाद्द्विजातिनादास्यामुत्पन्नःपितुरिच्छया प्यंशंनलभते नाप्यर्धम् दूरतएवकृत्स्नं किंत्वनुकूलश्चेज्जीवनमात्रंलभते १३८ ७ ५ ५

मुख्यगौणसुतादायंगृह्णंतीतिनिरूपितम् तेषामभावेसर्वेषांदायादक्रमउच्यते पूर्वोक्ताद्वादशपुत्राःयस्यनसंति असावपुत्रः तस्यापुत्रस्यस्वर्यातस्यपरलोकंगतस्यधनभाक्धनग्राही एषांपत्न्यादीनामनुक्रांतानांमध्येपूर्वस्याभावउत्तरउत्तरोधनभागितिसंबंधः सर्वेष्वमूर्द्धावसिक्तादिषु अनुलोमजेषुप्रतिलोमजेषुचवर्णेषुचब्राह्मणादिषुअयंदायग्रहणविधिर्दायग्रहणक्रमोवेदितव्यः तत्रप्रथमंपत्नीधनभाक् पत्नीविवाहसंस्कृता पत्युर्नोयज्ञसंयोगइतिस्मरणात् एकवचनंचजात्यभिप्रायेण अतश्चबह्व्यश्चेत्समानजातीयाविजातीयाश्चवांशंविभज्यधनंगृह्णंति

मृतेपितरिकुर्युस्तंभ्रातरस्त्वर्द्धभागिकम् अभ्रातृकोहरेत्सर्वंदुहितॄणांसुताहते १३९ पत्नीदुहितरश्चैवपितरौभ्रातरस्तथा तत्सुतागोत्रजाबंधुशिष्यसब्रह्मचारिणः १४० एषामभावेपूर्वस्यधनभागुत्तरोत्तरः स्वर्यातस्यह्यपुत्रस्यसर्ववर्णेष्वयंविधिः १४१ वृद्धमनुरपिपत्न्याःसमग्रधनसंबंधंवक्ति अपुत्राशयनंभर्तुःपालयंतीव्रतेस्थिता पत्न्येवदद्यात्तत्पिंडंकृत्स्नमंशंलभेतचेति वृहद्विष्णुरपि अपुत्रधनंपत्न्यभिगामितदभावेदुहितृगामि तदभावेपितृगामितदभावेमातृगामीति कात्यायनोपि पत्नीपत्युर्धनहारीयास्यादव्यभिचारिणी तदभावेतुदुहितायद्यनूढाभवेत्तदेति तथा अपुत्रस्यार्यकुलजापत्नीदुहितरोपिवा तदभावेपितामाताभ्रातापुत्राश्चकीर्तित इति वृहस्पतिरपि कुल्येषुविद्यमानेषुपितृभ्रातृसनाभिषु असुतस्यप्रमीतस्यपत्नीतद्भागहारिणी एतद्विरुद्धानीववाक्यानिलक्ष्यंते भ्रातॄणामप्रजाःप्रेयात्कश्चिच्चेत्प्रव्रजेतवा विभजेरन्धनंतस्य ७५

शेषास्तेस्त्रीधनंविना भरणंचास्यकुर्वीरन्स्त्रीणामाजीवनक्षयात् रक्षंतिशय्यांभर्तुश्चेदाच्छिद्युरितरासुतिति पत्नीसद्भावेपिभ्रातॄणांधनग्रहणम् पत्नीनांचभरणमात्रंनारदेनोक्तं मनुनातु पिताहरेदपुत्रस्यरिक्थंभ्रातरएववेत्यपुत्रस्यधनंपितुर्भ्रातुर्वेतिदर्शितम् तथाअनपत्यस्यपुत्रस्यमातादायमवाप्नुयात् मातर्यपिचवृत्तायांपितुर्माताहरेद्धनमितिमातुःपितामह्याश्चधनसंबंधोदर्शितः शंखेनापि स्वर्यातस्यह्यपुत्रस्यभ्रातृगामिद्रव्यंतदभावेपितरौहरेयातांज्येष्ठावापत्नीति भ्रातॄणांपित्रोर्ज्येष्ठायाश्चपत्न्याः क्रमेणधनसंबंधोदर्शितः कात्यायनेनापि विभक्तेसंस्थितेद्रव्यंपुत्राभावेपिताहरेत् भ्राताvाजननीवाथमातावातत्पितुःक्रमादित्येवमादीनांविरुद्धार्थानांवाक्यानांयोगीश्वरेणव्यवस्थादर्शिता पत्नीगृह्णीयादित्येतद्वचनजातंविभक्तभ्रातृस्त्रीविषयम् साचयदिनियोगार्थिनीभवति कुतएतत् नियोगसव्यपेक्षायाःपत्न्याधनहरणंनस्वतंत्रायाइति पिताहरेदपुत्रस्येत्यादिवचनानांतत्रव्यवस्थाकारणंवक्तव्यम् नान्यद्व्यवस्थाकारणमस्तीतिगौतमवचनाच्च पिंडगोत्रर्षिसंबंधारिक्थंभजेरन्स्त्रीवानपत्यस्यबीजंलिप्सेतेति अस्यार्थः पिंडगोत्रर्षिसंबंधा अनपत्यस्यरिक्थंभजेरन्स्त्रीवारिक्थंभजेत यदिबीजंलिप्सेतेति मनुरपि धनंयोबिभृयाद्भ्रातुर्मृतस्यस्त्रियमेववा सोपत्यंभ्रातुरुत्पाद्यदद्यात्तस्यैवतद्धनमिति .अनेनैतद्दर्शयति विभक्तधनेपिभ्रातर्युपरतेऽपत्यद्वारेणैवधनसंबंधोनान्यथेति तथाविभक्तधनेपि कनीयान्ज्येष्ठभार्यायांपुत्रमुत्पादयेद्यदि समस्तत्रविभागःस्यादितिधर्मोव्यवस्थितइति तथावसिष्ठोपि रिक्थलोभान्नास्तिनियोगइति रिक्थलोभान्नियोगंप्रतिषेधन् नियोगद्वारकएवपत्न्याधनसंबंधोनान्यथेतिदर्शयति नियोगाभावेतुपत्न्याभरणमात्रमेव नारदवचनात् भरणंचास्यकुर्वीरन्स्त्रीणामाजीवनक्षयादिति योगीश्वरेणापि

किलवक्ष्यते अपुत्रायोषितश्चैषांभर्तव्याः साधुवृत्तयः निर्वास्याव्यभिचारिण्यः प्रतिकूलास्तथैवचेति अपिच द्विजातिधनस्ययज्ञार्थत्वा
त्स्त्रीणांचयज्ञेनधिकाराद्धनग्रहणमयुक्तम् तथाचकेनापिस्मृतं यज्ञार्थंद्रव्यमुत्पन्नंतत्रानधिकृतास्तुये अरिक्थभाजस्तेसर्वेग्रासा-
च्छादनभाजनाः यज्ञार्थंविहितंवित्तंतस्मात्तद्विनियोजयेत् स्थानेषुधर्मजुष्टेषुनस्त्रीमूर्खविधर्मिषुइतितदनुपपन्नम् पत्नीदुहितर
इत्यत्रविनियोगस्याप्रतीतेरप्रस्तुतत्वाच्च अपिच इदमत्रवक्तव्यम् पत्नीधनग्रहणेनियोगोवानिमित्तं तदुत्पन्नमपत्यंवा तत्रनियोग-
स्यैवनिमित्तत्वे अनुत्पादितपुत्राया अपिधनसंबंधः प्राप्नोति उत्पन्नस्यपुत्रस्यधनसंबंधोनप्राप्नोति अथतदपत्यस्यैवनिमित्तत्वं त
थासतिपुत्रस्यैवधनसंबंधात्पत्नीतिनारब्धव्यम् अथस्त्रीणांपतिद्वारकोधनसंबंधः पुत्रद्वारकोवानान्यथेतिमंतव्यं तदप्यसत् अ-
ध्यग्न्यध्यावाहनिकंदत्तंचप्रीतिकर्मणि भ्रातृमातृपितृप्राप्तंषड्विधंस्त्रीधनंस्मृतमित्यादिविरोधात् किंचसर्वपुत्राभावेपत्नीदुहितरइ
त्यारब्धं तत्रनियुक्तायाधनसंबंधंवदताक्षेत्रजस्यैवधनसंबंधउक्तोभवति सचप्रागेवाभिहितइत्यपुत्रप्रकरणेपत्नीतिनारब्धव्यं
अथपिंडगोत्रर्षिसंबंधारिक्थंभजेरन्स्त्रीवानपत्यस्यबीजंलिप्सेतेतिगौतमवचनान्नियुक्तायाइतिधनसंबंधइति तदप्यसत् नहियदि
बीजंलिप्सेततदानपत्यस्यस्त्रीधनंगृह्णीयादित्ययमर्थोस्मात्प्रतीयते किंत्वनपत्यस्यधनंपिंडगोत्रर्षिसंबंधाभजेरन्स्त्रीच सास्त्रीबी
जंवालिप्सेतसंयतावाभवेदिति तस्याधर्मांतरोपदेशः वाशब्दस्यपक्षांतरवचनत्वेनयथार्थप्रतीतेः अपिचसंयतायाएवधनग्रहणं ७६
युक्तं ननियुक्तायाः स्मृतिलोकनिंदितायाः अपुत्राशयनंभर्तुःपालयंतीव्रतेस्थिता पत्न्येवदद्यात्तत्पिंडंकृत्स्नमंशंलभेतचेतिसंय

तायाधनग्रहणमुक्तम् तथानियोगश्चनिंदितोमनुना नान्यस्मिन्विधवानारीनियोक्तव्याद्विजातिभिः अन्यस्मिन्हिनि
युंजानाधर्मंहन्युःसनातनमिति यत्तुवसिष्ठवचनम् रिक्थलोभान्नास्तिनियोगइति तदविभक्तेसंसृष्टिनिवाभर्तरिप्रेते
तस्याधनसंबंधोनास्तीतिस्वापत्यस्यधनसंबंधार्थंनियोगोनकर्तव्यइतिव्याख्येयम् यदपिनारदवचनम् भर-
णंचास्यकुर्वीरन्स्त्रीणामाजीवनक्षयादिति तदपि संसृष्टानांतुयोभागस्तेषामेवसइष्यतइति संसृष्टानांप्रस्तुतत्वात्
तत्स्त्रीणामनपत्यानांभरणमात्रप्रतिपादनपरम् नचभ्रातृणामप्रजःप्रेयान्नित्येतस्यसंसृष्टिविषयत्वेसंसृष्टानांतुयोभागइत्यनेनपौनरु-
क्त्यमाशंकनीयम् यतःपूर्वोक्तविवरणेनस्त्रीधनस्याविभाज्यत्वं तत्स्त्रीणांचभरणमात्रंविधीयते यदप्यपुत्रायोषितश्चैषामित्यादिवचनंतत्
क्लीबादिस्त्रीविषयमितिवक्ष्यते यत्तुद्विजातिधनस्ययज्ञार्थत्वात्स्त्रीणांचयज्ञेनधिकाराच्चधनग्रहणमयुक्तमितितदसत् सर्वस्यद्रव्यजात
स्ययज्ञार्थत्वेदानहोमाद्यसिद्धेः अथयज्ञशब्दस्यधर्मोपलक्षणत्वात् दानहोमादीनामपिधर्मत्वात्तदर्थत्वमविरुद्धमितिमतं एवंतर्ह्यर्थका
मयोर्धनसाध्ययोरसिद्धिरेवस्यात् तथासति धर्ममर्थंचकामंचयथाशक्तिनहापयेत् तथानपूर्वाह्णमध्यंदिनापराह्णानफलान्कु
र्याद्यथाशक्तिधर्मार्थकामेभ्यः तथानतथैतानिशक्यंतेसंनियंतुमसेवयेत्यादियाज्ञवल्क्यगौतममनुवचनविरोधः अपिच धन
स्ययज्ञार्थत्वेहिरण्यंधार्यमितिहिरण्यसाधारणस्यक्रत्वर्थतानिराकरणेनपुरुषार्थत्वमुक्तम् तदसंगतंस्यात् किंच यज्ञशब्दस्य
धर्मोपलक्षणपरत्वेस्त्रीणामपिपूर्तकर्माधिकाराद्धनग्रहणंयुक्ततरम् यत्तुपारतंत्र्यवचनं नस्त्रीस्वातंत्र्यमर्हतीत्यादि तदस्तु

पारतंत्र्ये धनस्वीकारेतुकोविरोधः कथंतर्हियज्ञार्थधमुसन्नमित्यादिवचनम् उच्यते यज्ञार्थमेवार्जितंयद्धनंतद्यज्ञएवनियोक्तव्यंपुत्रादि
भिरपीत्येवंपरंतत् यज्ञार्थंलब्धमददद्भासःकाकोपिवाभवेदितिदोषश्रवणस्यपुत्रादिष्वविशेषात् यदपिकात्यायनेनोक्तम् अदायिकं
राजगामियोषिद्भृत्यौर्ध्वदैहिकं अपास्यश्रोत्रियद्रव्यंश्रोत्रियेभ्यस्तदर्पयेदिति अदायिकंदायादरहितंयद्धनंतद्राजगामि राज्ञोभवतियोषिद्भृ
त्यौर्ध्वदैहिकमपास्यतत्स्त्रीणामशनाच्छादनोपयुक्तं और्ध्वदैहिकंधनिनःश्राद्धाद्युपयुक्तंचापास्यपरिहृत्य राजगामिभवतीतिसंबंधः अ-
स्यापवादः श्रोत्रियद्रव्यंच योषिद्भृत्यौर्ध्वदैहिकमपास्यश्रोत्रियायोपपादयेदिति एतदप्यविरुद्धस्त्रीविषयम् योषिद्ग्रहणात् नारदवच
नंच अन्यत्रब्राह्मणात्किंतुराजाधर्मपरायणः तत्स्त्रीणांजीवनंदद्यादेषदायविधिःस्मृत इत्यविरुद्धस्त्रीविषयमेव स्त्रीशब्दश्रवणात् इह
तुपत्नीशब्दादूढायाःसंयतायाधनग्रहणमविरुद्धम् तस्माद्विभक्तासंसृष्टिन्यपुत्रेस्वर्याते पत्नीधनंप्रथमंगृह्णातीत्ययमर्थः सिद्धोभवति
विभागस्योक्तत्वात् संसृष्टिनांवक्ष्यमाणत्वात् एतेनाल्पधनविषयत्वंश्रीकरादिभिरुक्तंनिरस्तंवेदितव्यं तथाह्यौरसेषुपुत्रेषुसत्स्वपिजीव
द्विभागे अजीवद्विभागेपत्न्याःपुत्रसमांशग्रहणमुक्तं यदिकुर्यात्समानंशान्पत्न्यःकार्याःसमांशिकाः पितुरूर्ध्वंविभजतांमाताप्यंशंस
मंहरेदितिच तथासत्पुत्रस्यस्वर्यातस्यधनंपत्नीभरणादतिरिक्तंनलभतइतिव्यामोहमात्रं अथपत्न्यःकार्याःसमांशिकाइत्यत्रमाताप्यं
शंसमंहरेदित्यत्रचजीवनोपयुक्तमेवधनंस्त्रीहरतीतिमतम् तदसत् अंशशब्दस्यसमशब्दस्यचानर्थक्यप्रसंगात् स्यान्मतं बहु ७७
धनंजीवनोपयुक्तंधनंगृह्णाति अल्पेतुपुत्रांशसममंशंगृह्णातीति तच्चन विधिवैषम्यप्रसंगात् तथाहि पत्न्यःकार्याःसमांशिका मा

ताप्यंशंसमंहरेदितिच बहुधनेजीवनमात्रोपयुक्तम् वाक्यांतरमपेक्ष्यप्रतिपादयति अल्पधनेतुपुत्रांशसममंशंप्रतिपादयतीति तथाचातुर्मास्ये
षुद्वयोः प्रणयंतीत्यत्रपूर्वपक्षिणासौमिक प्रणयनातिदेशेहेतुत्वेनवैश्वदेवउत्तरवेदिकमुपकिरंति नशुनासीरीयइत्युत्तरवेदिप्रतिषेधेदर्शि
तेराद्धांतैकदेशिनानसौमिक प्रणयनातिदेशप्राप्तायाउत्तरवेद्याःप्रथमोत्तमयोः पर्वणोरयंप्रतिषेधः किंतुपात्रेवपंतीतिप्राकरणिकेनवचनेन
प्राप्तायाउत्तरवेद्याः प्रतिषेधोयमित्यभिहिते पुनःपूर्वपक्षिणा पात्रेवपंतीतिप्रथमोत्तमयोःपर्वणोःप्रतिषेधमपेक्ष्यपाक्षिकीमुत्तरवेदिंप्राप-
यति मध्यमयोस्तुनिरपेक्ष्यमेवनित्यंच उत्तरवेदिंप्रतिपादयतीतिविधिवैषम्यंदर्शितम् राद्धांतेपि विधिवैषम्यतयाप्रथमोत्तमयोःपर्वणो
रुत्तरवेदिप्रतिषेधोनित्यानुवादोद्वयोः प्रणयंतीत्याद्यर्थवादपर्यालोचनयापात्रेवपंतीतिमध्यमयोरेव वरुणप्रघाससाकमेधपर्वणोरुत्तरवेदिं
विधत्तइतिदर्शितम् यदपिमतम् पिताहरेदपुत्रस्यरिक्थंभ्रातरएववेतिमनुस्मरणात् तथा स्वर्यातस्यह्यपुत्रस्यभ्रातृगामिद्रव्यंत
दभावेपितरौहरेयातां ज्येष्ठावापत्नीतिशंखस्मरणाच्च अपुत्रस्यधनंभ्रातृगामिइतिप्राप्तम् भरणंचास्यकुर्वीरन्स्त्रीणामाजीवनक्षयादि
त्यादिवचनाच्च भरणोपयुक्तंधनंपत्नीलभतइत्यपिस्थितम् एवंस्थितेबहुधनेअपुत्रेस्वर्यातेभरणोपयुक्तंपत्नीगृह्णाति शेषंचभ्रातरो
यदातुपत्नीभरणमात्रोपयुक्तमेवद्रव्यमस्ति ततोन्यूनंवा तदाकिंपत्न्येवगृह्णात्युतभ्रातरोपीतिविरोधेपूर्वबलीयस्त्वज्ञापनार्थंपत्नीदुहि
तर इत्यारब्धमिति तदप्यत्रभगवानाचार्योनमृष्यति यतः पिताहरेदपुत्रस्यरिक्थंभ्रातरएववेतिविकल्पस्मरणान्नेदंक्रमपरंवचनम
पितुधनग्रहणेधिकारपरप्रदर्शनमात्रपरं तथासत्यपिपत्न्यादिग्रहणेघटतइतिव्याचक्षते शंखवचनमपिसंसृष्टभ्रातृविषयमिति

अपिचाल्पविषयत्वमस्माद्वचनात्प्रकरणाद्वानावगम्यते धनभागुत्तरोत्तर इत्यस्यचपत्नीदुहितर इति विषयद्वयेवाक्यांतरमपेक्ष्याल्प धनविषयत्वं पित्रादिषुतु धनमात्रविषयत्वमिति पूर्वोक्तं विधिवैषम्यं तदवस्थमेवेति यत्किंचिदेतत् यत्तुहारीतवचनम् विधवायौवनस्था चेन्नारीभवतिकर्कशा आयुषःक्षपणार्थंतु दातव्यंजीवनं तदेति तदपिशंकितव्यभिचारायाः सकलधनग्रहणनिषेधपरम् अस्मादेववच नादनाशंकितव्यभिचारायाः सकलधनग्रहणंगम्यते एतदेवाभिप्रेत्योक्तंशंखेन ज्येष्ठावापत्नीति ज्येष्ठागुणज्येष्ठा अनाशंकितव्यभि चारासा सकलंधनंगृहीत्वान्यांकर्कशामपिमातृवत्पालयतीतिसर्वमनवद्यम् तस्मादपुत्रस्यस्वर्यातस्यविभक्तस्यासंसृष्टिनो धनंपरिणीता स्त्रीसंयता सकलंगृह्णातीतिस्थितम् तदभावेदुहितरः दुहितर इति बहुवचनंसमानजातीयानामसमानजातीयानांच समविषमांशप्राप्त्य र्थं तथाचकात्यायनः पत्नीभर्तुर्धनहरीयास्यादव्यभिचारिणी तदभावेतुदुहितायद्यनूढाभवेत्तदेति बृहस्पतिरपि भर्तुर्धनहरीपत्नी तांविनादुहितास्मृता अंगादंगात्संभवतिपुत्रवद्दुहितानृणाम् तस्मात्पितृधनंत्वन्यः कथंगृह्णीतमानवइति तत्रचोढानूढासमवायेनूढैवगृ ह्णाति तदभावेतुदुहितायद्यनुढाभवेत्तदेतिविशेषस्मरणात् तथाप्रतिष्ठिताप्रतिष्ठितासमवायेअप्रतिष्ठितैव तदभावेप्रतिष्ठिता स्त्रीधनं दुहितॄणामप्रत्तानामप्रतिष्ठितानांचेतिगौतमवचनस्यपितृधनेपिसमानत्वात् नचैतत्पुत्रिकाविषयमितिमंतव्यम् तत्समः पुत्रिकाकृत इतिपु त्रिकायास्तत्कृतस्यचौरससमत्वेनपुत्रकरणेभिधानात् चशब्दाद्दुहित्रभावेदौहित्रोधनभाक् यथाहविष्णुः अपुत्रपौत्रसंतानेदौहित्रा ७८
धनमाप्नुयुः पूर्वेषांतुस्वधाकारेपौत्रादौहित्रकामताइति मनुरपि अकृतावाकृतावापियंविंदेत्सदृशात्सुतम् पौत्रीमातामहस्तेनदद्या

त्पिंडंहरेद्धनमिति तदभावेस्यपितरौ पितरौमातापितरौ धनभाजौ यद्यपियुगपदधिकरणवचनतायांद्वंद्वस्मरणात् तदपवादत्वादेकशेषस्य धन ग्रहणेपित्रोःक्रमोनप्रतीयते तथापिविग्रहवाक्येमातृशब्दस्यपूर्वनिपातादेकशेषभावपक्षेचमातापितराविति मातृशब्दस्यपूर्वश्रवणात् पाठक्रमादे वार्थक्रमावगमाद्धनसंबंधेपिक्रमापेक्षायांप्रतीतक्रमानुरोधेनैवप्रथमंमाताधनभाक् तदभावेपितेतिगम्यते किंच पितापुत्रांतरेष्वपिसाधारणोमा तातुनसाधारणीति प्रत्यासत्त्यतिशयादनंतरः सपिंडाद्यस्तस्यतस्यधनंभवेदितिवचनान्मातुरेवप्रथमंधनग्रहणंयुक्तम् नचसपिंडेष्वेवप्रत्यासत्तिर्नि यामिका अपितुसमानोदकादिष्वप्यविशेषेणधनग्रहणेप्राप्ते प्रत्यासत्तिरेवनियामिकेत्यस्मादेववचनादवगम्यतइति मातापित्रोर्मातुरेवचप्रत्यास- त्त्यतिशयाद्धनग्रहणंयुक्ततरं तदभावेपिताधनभाक् पित्रभावेभ्रातरोधनभाजः तथाचमनुः पिताहरेदपुत्रस्यरिक्थंभ्रातरएवचेति यत्पुन र्धारेश्वरेणोक्तम् अनपत्यस्यपुत्रस्यमातादायमवाप्नुयात् मातर्यपिचवृत्तायांपितुर्माताहरेद्धनमिति मनुवचनाज्जीवत्यपिपितरिमातरिवृत्तायां पितुर्मातापितामहीधनंहरेन्नपिता यतःपितृगृहीतंधनंविजातीयेष्वपिपुत्रेषुगच्छति पितामहीगृहीतंतुसजातीयेष्वेवगच्छतीति पितामह्येवग्र ह्णातीति एतदप्याचार्योनानुमन्यते विजातीयपुत्राणामपिधनग्रहणस्योक्तत्वात् चतुस्त्रिद्व्येकभागाः स्युरित्यादिनेति यत्पुनरहार्यंब्राह्मणद्र व्यंराज्ञोनित्यमितिस्थितिरितिमनुस्मरणम् तन्नृपाभिप्रायंनतुपुत्राभिप्रायं भ्रातृष्वपिसोदराः प्रथमंगृह्णीयुः भिन्नोदराणांमात्राविप्रकर्षात् अनंतरःसपिंडाद्यस्तस्यतस्यधनंभवेदितिस्मरणात् सोदराणामभावेभिन्नोदराधनभाजः भ्रातृणामप्यभावेतत्पुत्राःपितृक्रमेणधनभाजः भ्रातृभ्रातृपुत्रसमवायेभ्रातृपुत्राणामनधिकारः भ्रात्रभावेभ्रातृपुत्राणामधिकारवचनात् यदात्वपुत्रेभ्रातरिस्वर्याते तद्भ्रातॄणामविशेषेण

धनसंबंधजाते भ्रातृधनविभागात्प्रागेव यदि कश्चिद्भ्राता मृतः तत्पुत्राणां पितृतोधिकारे प्राप्ते तेषां भ्रातृणां विभज्य ग्रहणे पितृतो भागक ल्पनेति युक्तम् भ्रातृपुत्राणामप्यभावे गोत्रजा धनभाजः गोत्रजाः पितामही सपिंडाः समानोदकाश्च तत्र पितामही प्रथमं धनभाक् मा तर्यपि च वृत्तायां पितुर्माता धनं हरेदिति मात्रनंतरं पितामह्या धनग्रहणे प्राप्ते पित्रादीनां भ्रातृसुतपर्यंतानां बद्धक्रमत्वेन मध्ये तु प्रवेशा- भावात् पितुर्माता धनं हरेदित्यस्य वचनस्य धनग्रहणाधिकारप्राप्तिमात्रपरत्वादुत्कर्षे तत्सुतानंतरं पितामही गृह्णातीत्यविरोधात् पिता मह्याश्चाभावे समानगोत्रजाः सपिंडाः पितामहादयो धनभाजः भिन्नगोत्राणां सपिंडानां बंधुशब्देन ग्रहणात् तत्र च पितृसंतानाभावे पिता महः पितृव्यास्तत्पुत्राश्च क्रमेण धनभाजः पितामहसंतानाभावे प्रपितामही प्रपितामहस्तत्पुत्रास्तत्सूनवश्चेत्येवमासप्तमात् समानगोत्राणां सपिंडानां धनग्रहणं वेदितव्यम् तेषामभावे समानोदकानां धनसंबंधः ते च सपिंडानामुपरि सप्त वेदितव्याः जन्मनामज्ञानावधिका वा यथा ह बृहन्मनुः सपिंडता तु पुरुषे सप्तमे विनिवर्तते समानोदकभावस्तु निवर्तेताचतुर्दशात् जन्मनाम्नोः स्मृतेरेके तत्परं गोत्रमुच्यते इति गोत्रजाभावे बंधवो धनभाजः बंधवश्च त्रिविधाः आत्मबंधवः पितृबंधवो मातृबंधवश्चेति यथोक्तं आत्मपितृष्वसुः पुत्राः आत्म मातृष्वसुः सुताः आत्ममातुलपुत्राश्च विज्ञेया आत्मबांधवाः पितुः पितृष्वसुः पुत्राः पितुर्मातृष्वसुः सुताः पितुर्मातुलपुत्राश्च वि ज्ञेयाः पितृबांधवाः मातुः पितृष्वसुः पुत्रा मातुर्मातृष्वसुः सुताः मातुर्मातुलपुत्राश्च विज्ञेया मातृबांधवा इति तत्र चांतरंगत्वात्प्रथममा- ७९ त्मबंधवो धनभाजस्तदभावे पितृबंधवस्तदभावे मातृबंधव इति क्रमो वेदितव्यः बंधूनामभावे आचार्यः तदभावे शिष्याः पुत्राभावे

---

यः प्रत्यासन्नः सपिंडस्तदभावे आचार्य आचार्याभावेंऽतेवासीत्यापस्तंबस्मरणात् शिष्याभावे सब्रह्मचारी धनभाक् येन सहैकस्मादाचार्यादु पनयनाध्ययनतदर्थज्ञानप्राप्तिः स ब्रह्मचारी तदभावे ब्राह्मणद्रव्यं यः कश्चित् श्रोत्रियो गृह्णीयात् श्रोत्रिया ब्राह्मणस्यानपत्यस्य रिक्थं भजेरन्नि ति गोतमस्मरणात् तदभावे ब्राह्मणमात्रं यथाह मनुः सर्वेषामप्यभावे तु ब्राह्मणा रिक्थभागिनः त्रैविद्याः शुचयो दांतास्तथा धर्मो न हीय त इति न कदाचिदपि ब्राह्मणद्रव्यं राजा गृह्णीयात् अहार्यं ब्राह्मणद्रव्यं राज्ञा नित्यमिति स्थितिरिति मनुवचनात् नारदेनाप्युक्तम् ब्राह्म णार्थस्य तन्नाशे दायादश्चेत्कश्चन ब्राह्मणायैव दातव्यमेनस्वी स्यान्नृपोन्यथेति क्षत्रियादिधनं सब्रह्मचारिपर्यंतानामभावे राजा हरेत्

वानप्रस्थयतिब्रह्मचारिणां रिक्थभागिनः क्रमेणाचार्यसच्छिष्यधर्मभ्रात्रेकतीर्थिनः १४२

न ब्राह्मणः यथाह मनुः इतरेषां तु वर्णानां सर्वाभावे हरेन्नृप इति १४० १४१ पुत्राः पौत्राश्च दायं गृह्णंतितदभावे पत्न्यादय इत्युक्ते इदानीं तदु भयोरपवादमाह वानप्रस्थस्य यतेर्ब्रह्मचारिणश्च क्रमेण प्रतिलोमक्रमेणाचार्यः सच्छिष्यो धर्मभ्रात्रेकतीर्थी च रिक्थस्य धनस्य भागिनः ब्रह्म चारी नैष्ठिकः उपकुर्वाणस्य तु धनं मात्रादय एव गृह्णंति नैष्ठिकस्य तु धनं तदपवादत्वेनाचार्यो गृह्णातीत्युच्यते यतेस्तु धनं सच्छिष्यो गृह्णाति स च्छिष्यः पुनरध्यात्मशास्त्रश्रवणधारणतदर्थानुष्ठानक्षमः दुर्वृत्तस्याचार्यादेरपि भागानर्हत्वात् वानप्रस्थस्य धनं धर्मभ्रात्रेकतीर्थी गृह्णाति धर्मभ्रातात्प्रतिपन्नो भ्राता एकतीर्थी एकाश्रमी धर्मभ्राता चासावेकतीर्थी च धर्मभ्रात्रेकतीर्थी एतेषामाचार्यादीनामभावे पुत्रादिषु सत्स्वप्ये

कृतीर्थ्येवगृह्णाति नखल्वन्यशास्त्राश्रमांतरगताः इतिवसिष्ठस्मरणादाश्रमांतरगतानांरिक्थसंबंधएवनास्तिकुतस्तद्विभागः ननुनैष्ठिकस्य स्वार्जितधनसंबंधोयुक्तः प्रतिग्रहादिनिषेधात् अनिचयोभिक्षुरितिगौतमस्मरणात् भिक्षोरपिनस्वार्जितधनसंबंधसंभवः उच्यते वानप्रस्थस्यतावत् अन्होमासस्यषण्णांवातथासंवत्सरस्यवा अर्थस्यनिचयंकुर्यात्कृतमाश्वयुजेत्यजेदितिवचनाद्धनसंबंधोस्त्येवयतेरपि कौपीनाच्छादनार्थंवावासोपिबिभृयात्तथा योगसंभारभेदांश्चगृह्णीयात्पादुकेतथेत्यादिवचनाद्वस्त्रपुस्तकसंबंधोस्त्येव नैष्ठिकेपिशरीर-यात्रार्थवस्त्रादिसंबंधोस्त्येववेति तद्विभागकथनंयुक्तमेव १४२ इदानींस्वर्यातस्यापुत्रस्यपत्न्यादयोधनभाजइत्यस्यापवादमाह वि-

संसृष्टिनस्तुसंसृष्टीसोदरस्यतुसोदरः दद्यादपहरेच्चांशंजातस्यचमृतस्यच १४३

भक्तंधनंपुनर्मिश्रीकृतंसंसृष्टंतदस्यास्तीतिसंसृष्टी संसृष्टित्वंचनयेनकेनापि किंतुपित्राभ्रात्रापितृव्येणवा यथाहबृहस्पतिः विभक्तोयः पुनःपित्राभ्रात्रावैकत्रवैस्थितः पितृव्येणाथवैप्रीत्यासतत्संसृष्टमुच्यतइति तस्यसंसृष्टिनोमृतस्यांशंविभागंविभागकाले अविज्ञातगर्भा यांभार्यायां पश्चादुत्पन्नस्यपुत्रस्यसंसृष्टीदद्यात् पुत्राभावेसंसृष्ट्येवापहरेत् गृह्णीयात् नपत्न्यादिः संसृष्टिनस्तुसंसृष्टीत्यस्यापवादमाह संसृष्टिनः संसृष्टीत्यनुवर्तते अतश्चसोदरस्यसंसृष्टिनोमृतस्यांशंसोदरः संसृष्टीसंसृष्टानुजातस्यदद्यात् तदभावेपहरेदितिसंबंधः पूर्वव त् एवंचसोदरासोदरसंसर्गेसोदरसंसृष्टिनोधनंसोदर एवगृह्णाति नभिन्नोदरः संसृष्ट्यपीतिपूर्वोक्तस्यापवादः १४३



इदानींसंसृष्टिन्यपुत्रेस्वर्यातेसंसृष्टिनोभिन्नोदरस्यसोदरस्यचासंसृष्टिनः सद्भावेकस्यधनग्रहणमितिविवक्षायांद्वयोर्विभज्यग्रहणेकारणमाह अन्योदर्यः सापत्नोभ्रातासंसृष्टीधनंहरेत् नपुत्रः अन्योदर्योधनंहरेदसंसृष्टी अनेनान्वयव्यतिरेकाभ्यामन्योदर्यस्यसंसृष्टित्वंधनग्रहणेकारणमु क्तंभवति असंसृष्टीत्येतदुत्तरेणापिसंबध्यते अतश्चासंसृष्ट्यपिसंसृष्टिनोधनमाददीत कोसावित्यतआह संसृष्टइति संसृष्टएकोदरसंसृष्टः सोदरइतियावत् अनेनासंसृष्टस्यापिसोदरस्यधनग्रहणेसोदरत्वंकारणमुक्तम् संसृष्टइत्युत्तरेणापिसंबध्यते तत्रचसंसृष्टीत्यर्थः नान्यमातृजः अत्रैवशब्दाध्याहारेणव्याख्यानंकार्यं संसृष्ट्यप्यन्यमातृजएवसंसृष्टिनोधनंनाददीतेति एवंचासंसृष्ट्यपिवादद्यादित्यपिश्रब्द-

अन्योदर्यस्तुसंसृष्टीनान्योदर्योधनंहरेत् असंसृष्ट्यपिवादद्यात्संसृष्टोनान्यमातृजः १४४

वणात् संसृष्टोनान्यमातृजएवेत्यवधारणनिषेधादसंसृष्टसोदरस्य संसृष्टभिन्नोदरस्यच विभज्यग्रहणंकर्तव्यमित्युक्तंभवति द्वयोरपि धनग्रहणकारणस्यैकैकस्यसद्भावात् एतदेवस्पष्टीकृतंमनुना विभक्ताः सहजीवंतोविभजेरन्पुनर्यदीतिसंसृष्टिविभागंप्रक्रम्ययेषांज्ये ष्ठः कनिष्ठोवाहीयेतांशप्रदानतः म्रियेतान्यतरोवापितस्यभागोनलुप्यते सोदर्याविभजेयुस्तंसमेत्यसहिताः समम् भ्रातरोयेचसंसृष्टा भगिन्यश्चसनाभयइतिवदतायेषांभ्रातॄणांसंसृष्टिनांमध्येज्येष्ठः कनिष्ठोवामध्यमोवांशप्रदानतोंशप्रदाने सार्वविभक्तिकस्तसिः विभा-गकालइतियावत् हीयतेस्वांशाद्भ्रश्यते आश्रमांतरपरिग्रहेणब्रह्महत्यादिनावाम्रियेत वातस्यभागोनलुप्यते अतःपृथगुद्धरणीयोनसंसृ

ष्टिनएवगृह्णीयुरित्यर्थः तस्योद्धृतस्यविनियोगमाह सोदर्याविभजेयुस्तमिति समुद्धृतंभागंसोदर्याःसहोदरा असंसृष्टाअपिसमेत्यदेशांतरगताअपिसमागम्यसहिताःसंभूयसमंनन्यूनाधिकभावेन येचभ्रातरोभिन्नोदराःसंसृष्टास्तेचसनाभयोभगिन्यश्चसमंविभजेयुःसमंविभज्यगृह्णीयुरित्यर्थः १४४ पुत्रपत्न्यादिसंसृष्टिनांयद्दायग्रहणमुक्तंतस्यापवादमाह क्लीबस्तृतीयाप्रकृतिःपतितोब्रह्महत्यादिना तज्जःपतितोत्पन्नःपंगुःपादविकलःउन्मत्तकःवातिकपैत्तिकश्लैष्मिकसन्निपातग्रहावेशलक्षणैरुन्मादैरभिभूतः जडोविकलांतःकरणः हिताहितावधारणाक्षमइतियावत् अंधोनेत्रेंद्रियविकलः अचिकित्स्यरोगः अप्रतिसमाधेयक्षयादिरोगग्रस्तः आद्यशब्देना

क्लीबोथपतितस्तज्जःपंगुरुन्मत्तकोजडः अंधोचिकित्स्यरोगाद्याभर्तव्याःस्युर्निरंशकाः१४५

श्रमांतरगतपितृद्वेष्युपपातकिबधिरमूकनिरिंद्रियाणांग्रहणं यथाहवसिष्ठः अनंशास्त्वाश्रमांतरगताइति नारदेनापि पितृद्विट्पतितःषंढोयश्चस्यादौपपातिकः औरसाअपिनैतेशंलभेरन्क्षेत्रजाःकुतइति मनुरपि अनंशौक्लीबपतितौजात्यंधपतितौतथा उन्मत्तजडमूकाश्चयेचकेचिन्निरिंद्रियाइति निरिंद्रियोनिर्गतमिंद्रियंयस्माद्व्याध्यादिनासनिरिंद्रियः एतेक्लीबादयोनंशारिक्थभाजोनभवंति केवलमशनाच्छादनदानेनपोषणीयाभवेयुः अभरणे तुपतितत्वदोषः सर्वेषामपितुन्याय्यंदातुंशक्त्यामनीषिणा ग्रासाच्छादनमत्यंतंपतितोह्यददद्भवेदितिमनुस्मरणात् अत्यंतंयावज्जीवमित्यर्थः एतेषांविभागात्प्रागेवदोषप्राप्तावनंशत्वमुपपन्नं नपुनर्विभक्तस्यविभागोत्तरकालमप्यौषधादिनादोषनिर्हरणेभागप्राप्तिरस्त्येव विभक्तेषुसुतोजातःसवर्णायांविभागभागि त्यस्यसमानन्यायत्वात् पतितादिषुपुल्लिंगत्वमविवक्षितं अतश्चपत्नीदुहितृमात्रादीनामप्युक्तदोषदुष्टानामनंशत्वंवेदितव्यम् १४५ क्लीबादीनामनंशत्वात्तत्पुत्राणामप्यनंशत्वेप्राप्तेइदमाह एतेषांक्लीबादीनामौरसाःक्षेत्रजावापुत्रानिर्दोषा अंशग्रहणविरोधिक्लैब्यादिदोषरहिताभागहारिणोंशग्राहिणोभवंति तत्रक्लीबस्यक्षेत्रजःपुत्रःसंभवत्यन्येषामौरसाअपि औरसक्षेत्रजयोर्ग्रहणमितरपुत्रव्युदासार्थम् क्लीबादिदुहितृणांविशेषमाह

औरसक्षेत्रजास्त्वेषांनिर्दोषाभागहारिणः सुताश्चैषांप्रभर्तव्यायावद्वैभर्तृसात्कृताः१४६
अपुत्रायोषितश्चैषांभर्तव्याःसाधुवृत्तयः निर्वास्याव्यभिचारिण्यःप्रतिकूलास्तथैवच १४७
पितृमातृपतिभ्रातृदत्तमध्यग्न्युपागतम् आधिवेदनिकाद्यंचस्त्रीधनंतत्प्रकीर्तितम् १४८

एषांक्लीबादीनांसुतादुहितरोयावद्विवाहसंस्कृताभवंति तावद्भरणीयाःचशब्दात्संस्कार्याश्च १४६ क्लीबादिपत्नीनांविशेषमाह एषांक्लीबादीनामपुत्राःपत्न्यःसाधुवृत्तयःसदाचाराश्चेद्भर्तव्याःभरणीयाः व्यभिचारिण्यस्तुनिर्वास्याःप्रतिकूलास्तथैवचनिर्वास्याः भरणीयाश्चाव्यभिचारिण्यश्चेत् नपुनःप्रातिकूल्यमात्रेणभरणमपिनकर्तव्यम् १४७ विभजेरन्सुताःपित्रोरित्यत्रस्त्रीपुंसधनविभागंसंक्षेपेणाभिधायपुरुषधनविभागोविस्तरेणाभिहितः इदानींस्त्रीधनविभागंविस्तरेणविधास्यन्तत्स्वरूपंतावदाह पित्रामात्रापत्याभ्रात्राचयद्दत्तंयच्चविवाहकाले

ग्नावधिकृत्यमातुलादिभिर्दत्तं आधिवेदनिकं अधिवेदननिमित्तं अधिविन्नस्त्रियैदद्यादित्यादिवक्ष्यमाणं आद्यशब्देनरिक्थक्रयसंविः
भागपरिग्रहाधिगमनप्राप्तमेतत् स्त्रीधनंमन्वादिभिरुक्तं स्त्रीधनशब्दश्चयौगिकोनपारिभाषिकः योगसंभवेपरिभाषाया अयुक्तत्वात्
यत्तुनर्मनुनोक्तम् अध्यग्न्यध्यावहनिकं दत्तंचप्रीतिकर्मणि भ्रातृमातृपितृप्राप्तंषड्विधंस्त्रीधनंस्मृतमितिस्त्रीधनस्यषड्विधत्वं तन्न्यू
नसंख्यावच्छेदार्थं नाधिकसंख्यावच्छेदाय अध्यग्न्यादिस्वरूपंचकात्यायनेनाभिहितम् विवाहकालेयत्स्त्रीभ्योदीयतेवन्हिसन्निधौ त
दध्यग्निकृतंसद्भिः स्त्रीधनंपरिकीर्तितम् यत्पुनर्लभतेनारीनीयमानापितुर्गृहात् अध्यावहनिकंनामस्त्रीधनंतदुदाहृतम् प्रीत्याद

बंधुदत्तंयथाशुल्कमन्वाधेयकमेवच अतीतायामप्रजसि बांधवास्तदवाप्नुयुः १४९

त्तंतुयत्किंचित्स्वश्र्वावाश्वशुरेणवा पादवंदनिकंचैवप्रीतिदत्तंतदुच्यते ऊढयाकन्ययावापिपत्युःपितृगृहेपिवा भ्रातुःसकाशात्पित्रो
र्वालब्धंसौदायिकंस्मृतमिति १४८ किंच बंधुभिः कन्यया मातृबंधुभिः पितृबंधुभिश्चदत्तंशुल्कंयद्गृहीत्वाकन्यादीयते अन्वाधेयकं
परिणयनादनुपश्चादाहितंदत्तं उक्तंचकात्यायनेन विवाहात्परतोयच्चलब्धंभर्तृकुलात्स्त्रिया अन्वाधेयंतुतद्द्रव्यंलब्धंपितृकुलात्तथे
ति स्त्रीधनंपरिकीर्तितमितिगतेनसंबंधः एवंस्त्रीधनमुक्तं तद्विभागमाह तत्पूर्वोक्तंस्त्रीधनमप्रजसि अनपत्यायांदुहितृदौहित्र- 
पुत्रपौत्ररहितायांस्त्रियामतीतायांबांधवाभर्त्रादयोवक्ष्यमाणागृह्णंति १४९

सामान्येनबांधवाधनग्रहणाधिकारिणोदर्शिताइदानींविवाहभेदेनाधिकारिभेदमाह अप्रज स्त्रियाः पूर्वोक्तायाःब्राह्मदैवार्षप्राजा
पत्येषुचतुर्षुविवाहेषुभार्यात्वंप्राप्तायाअतीतायाःपूर्वोक्तंधनंप्रथमंभर्तुर्भवति तदभावेतत्प्रत्यासन्नानांसपिंडानांभवति शेषेषा
सुरगांधर्वराक्षसपैशाचेषुविवाहेषु तदप्रज स्त्रीधनंपितृगामि माताचपिताचपितरौ तौगच्छतीतिपितृगामि एकशेषनिर्दिष्टायाअ
पिमातुः प्रथमंधनग्रहणंपूर्वमेवोक्तं तदभावेतत्प्रत्यासन्नानांधनग्रहणं सर्वेष्वेवविवाहेषुप्रसूताप्रसववतीचेदुहितृणांतद्धनंभवति
अत्रदुहितृशब्देनदुहितृदुहितरउच्यंते साक्षाद्दुहितृणांयातुर्दुहितरःशेषमित्यत्रोक्तत्वात् अतश्चमातृधनंमातरिवृत्तायांप्रथमं

अप्रजस्त्रीधनंभर्तुर्ब्राह्मणादिचतुर्ष्वपि दुहितृणांप्रसूताचेच्छेषेषुपितृगामितत् १५०

दुहितरोगृह्णंति अत्रचोढानूढासमवायेऽनूढागृह्णंति तदभावेपरिणीताः तत्रापिप्रतिष्ठिताप्रतिष्ठितासमवायेऽप्रतिष्ठितागृह्णाति तदभावेप्र
तिष्ठिता यथाहगौतमः स्त्रीधनंदुहितृणामप्रत्तानामप्रतिष्ठितानांचेति तत्रचशब्दात् प्रतिष्ठितानांच अप्रतिष्ठिता अनपत्यानिर्धनावा ए-
तच्चशुल्कव्यतिरेकेण शुल्कंसोदर्याणामेव भगिनीशुल्कःसोदर्याणामूर्ध्वंमातुरितिगौतमवचनात् सर्वासांदुहितृणामभावेदुहितृदुहि-
तरोगृह्णंति दुहितृणांप्रसूताचेदित्यस्माद्वचनात् तासांभिन्नमातृकाणांविषमाणांसमवायेमातृद्वारेणभागकल्पना प्रतिमातृवास्ववर्गे
भागविशेषइतिगौतमस्मरणात् दुहितृदौहित्रीणांसमवायेदौहित्रीणांकिंचिदेवदातव्यम् यथाहमनुः यास्तासांस्युर्दुहितरस्तासामपि

यथाहतः मातामह्याधनात्किंचित्प्रदेयंप्रीतिपूर्वकमिति दौहित्रीणामप्यभावेदौहित्राधनहारिणः यथाहनारदः मातुर्दुहितरोभावेदुहितॄणांत
दन्वयइति तच्छब्देनसन्निहितदुहितृपरामर्शात् दौहित्राणामभावेपुत्रागृह्णंति ताभ्यऋतेन्वयइत्युक्तत्वात् मनुरपिदुहितॄणांचपुत्राणां
चमातृधनसंबंधंदर्शयति जनन्यांसंस्थितायांतुसमंसर्वेसहोदराः भजेरन्मातृकंरिक्थंभगिन्यश्चसनाभयइति मातृकंरिक्थंसर्वेसहोद
राःसमंभजेरन् सनाभयोभगिन्यश्चसमंभजेरन्निति संबंधः नपुनः सहोदराभगिन्यश्चसंभूयभजेरन्निति इतरेतरयोगस्य द्वंद्वंकशे
षाभावादप्रतीतेः विभागकर्तृत्वान्वयेनापिचशब्दोपपत्तेः यथादेवदत्तःकृषिंकुर्याद्यज्ञदत्तश्चेति समग्रहणमुद्धारविभागनिवृत्त्यर्थं सोद

दत्वाकन्यांहरन्दंड्योव्ययंदद्याच्चसोदयम्

रग्रहणंभिन्नोदरनिवृत्त्यर्थं अनपत्यहीनजातिस्त्रीधनंतुभिन्नोदराप्युत्तमजातिसपत्नीदुहितागृह्णाति तदभावेतदपत्यं तथाचमनुः
स्त्रियास्तुयद्भवेद्वित्तंपित्रादत्तंकथंचन ब्राह्मणीतद्धरेत्कन्यातदपत्यस्यवाभवेदिति ब्राह्मणीग्रहणमुत्तमजात्युपलक्षणं अतश्चानपत्यवैश्या
धनं क्षत्रियाकन्यागृह्णाति पुत्राणामभावेपौत्राः पितामहीधनहारिणः रिक्थभाजऋणंप्रतिकुर्युरितिगौतमस्मरणात् पुत्रपौत्रैर्ऋणंदेयमि
तिपौत्राणामपिपितामहर्णापाकरणेधिकारात् पौत्राणामप्यभावेपूर्वोक्तभर्त्रादयोबांधवाधनहारिणः १५० स्त्रीधनप्रसंगेनवाग्दत्ताविष ८३
यंकिंचिदाह कन्यांवाचादत्वापहरन्द्रव्यानुबंधाद्यनुसारेणराज्ञादंडनीयः एतच्चापहरणकारणाभावे सतितुकारणेदत्तामपिहरेत्कं

न्यांश्रेयांश्चेद्वर आव्रजेदित्यपहाराभ्यनुज्ञानान्नदंड्यः यच्चवाग्दाननिमित्तंवरेणस्वसंबंधिनांकन्यासंबंधिनांचोपचारार्थंधनंव्ययीकृतंतत्सर्वंसो
दयंसवृद्धिकंकन्यादातावरायदद्यात् अथकथंचिद्वाग्दत्तासंस्कारात्प्राक् म्रियेततदाकिंकर्तव्यमित्यतआह यदिवाग्दत्तामृतानदायत्पूर्वमं
गुलीयकादिशुल्कंवावरेणदत्तंतद्वर आददीत परिशोध्योभयव्ययं उभयोरात्मनः कन्यादातुश्चयोव्ययस्तंपरिशोध्यविगणय्यावशि
ष्टमाददीत यत्तुकन्यायैमातामहादिभिर्दत्तंशिरोभूषणादिकंवाक्रमागतंतत्सहोदरभ्रातरोगृह्णीयुः रिक्थंकन्यायामृतायागृह्णीयुःसोदरा
स्तदभावेमातुस्तदभावेपितुरितिबौधायनस्मरणात् १५१ मृतप्रजास्त्रीधनंभर्तृगामीत्युक्तं इदानींजीवत्याःसप्रजाया अपिस्त्रियाधन

मृतायांदत्तमादद्यात्परिशोध्योभयव्ययम् १५१ दुर्भिक्षेधर्मकार्येच व्याधौसंप्रतिरोधके गृहीतं
स्त्रीधनंभर्तानस्त्रियैदातुमर्हति १५२

ग्रहणेकचिद्भर्तुरभ्यनुज्ञामाह दुर्भिक्षेकुटुंबभरणार्थंधर्मकार्येअवश्यकार्ये
व्याधौच संप्रतिरोधकेबंदिग्रहणनिग्रहादौद्रव्यांतररहितःस्त्रीधनंगृह्णन् भर्तानपुनर्दातुमर्हति प्रकारांतरेणापहरन्दद्यात् भर्तृव्यतिरेकेण
जीवत्याःस्त्रियाधनंकेनापिदायादेननगृहीतव्यम् जीवतीनांतुतासांयेतद्धरेयुःस्वबांधवाः तांच्छिष्याच्चोरदंडेनधार्मिकःपृथिवीपतिरि
तिदंडविधानात् तथा पत्यौजीवतियःस्त्रीभिरलंकारोधृतोभवेत् नतंभजेरन्दायादाभजमानाःपतंतितेइतिदोषश्रवणाच्च १५२
आधिवेदनिकंस्त्रीधनमुक्तंतदाह यस्याउपरिविवाहःसाधिविन्नासाचासौस्त्रीचेत्यधिविन्नस्त्रीतस्यै अधिविन्नस्त्रियै आधिवेद

निकंआधिवेदननिमित्तंधनंसमंयावदधिवेदनार्थंव्ययीकृतंतावद्दद्यात् यस्यैश्वशुरेणभर्त्रावास्त्रीधनंनदत्तं दत्तेपुनःस्त्रीधनेआधिवेद-
निकद्रव्यस्यार्द्धंदद्यात् अर्द्धशब्दश्चात्रसमविभागवचनोनभवति अतश्चयावतातत्पूर्वदत्तमाधिवेदनिकसमंभवतितावद्देयमित्यर्थः
१५३ एवंविभागमुक्त्वाइदानींतत्संदेहेनिर्णयहेतूनाह विभागस्यनिन्हवेअपलापे ज्ञातिभिःपितृभिर्मातृभिःबंधुभिःमातुलादिभिः
साक्षिभिःपूर्वोक्तलक्षणैर्लेख्येनचविभागपत्रेणविभागभावनाविभागनिर्णयोज्ञातव्या तथायौतकैःपृथक्कृतैर्गृहक्षेत्रैश्चपृथक्कृष्यादि

अधिविन्नस्त्रियैदद्यादाधिवेदनिकंसमम् नदत्तंस्त्रीधनंयस्यैदत्तेत्वर्द्धंप्रकीर्तितम् १५३
विभागनिन्हवेज्ञातिबंधुसाक्ष्यभिलेखितैः विभागभावनाज्ञेयागृहक्षेत्रैश्चयौतकैः १५४

कार्यप्रवर्तनंपृथक्पंचमहायज्ञादिधर्मानुष्ठानंच नारदेनविभागलिंगमुक्तम् विभागधर्मसंदेहेदायादीनांविनिर्णयः ज्ञातिभिर्भा
गलेख्येनपृथक्कार्यप्रवर्तनात् भ्रातॄणामविभक्तानामेकोधर्मःप्रवर्तते विभागेसतिधर्मोपिभवेत्तेषांपृथक्पृथगिति तथापराण्य
पिविभागलिंगानितेनैवोक्तानि साक्षित्वंप्रातिभाव्यंचदानंग्रहणमेवच विभक्ताभ्रातरःकुर्युर्नाविभक्ताःकथंचनेति इतिरिक्थविभागप्रकर
णम् १५४ — ८५

अधुनासीमाविवादनिर्णयउच्यते ग्रामद्वयसंबंधिनःक्षेत्रस्यसीम्नोविवादेतथैकग्रामांतर्वर्तिक्षेत्रमर्यादाविवादेच सामंतादयःस्थलांगा
रादिभिःपूर्वकृतैःसीमालक्षणैरुपलक्षितांचिन्हितांनयेयुःनिश्चिनुयुः सीमाक्षेत्रादिमर्यादा साचचतुर्विधा जनपदसीमाग्रामसीमाक्षे
त्रसीमागृहसीमाचेति साचयथासंभवंपंचलक्षणा तदुक्तंनारदेन ध्वजिनीमत्सिनीचैवनैधानीभयवर्जिता राजशासननीताचसी
मापंचविधास्मृतेति ध्वजिनीवृक्षादिलक्षिता वृक्षादीनांप्रकाशत्वेनध्वजतुल्यत्वात् मत्सिनीसलिलवती मत्स्यशब्दस्यआधारजल

सीम्नोविवादेक्षेत्रस्यसामंताःस्थविरादयः गोपाःसीमाकृषाणाश्चसर्वेचवनगोचराः
१५५ नयेयुरेनांसीमानांस्थलांगारतुषद्रुमैः सेतुवल्मीकनिम्नास्थिचैत्याद्यैरुपलक्षितां १५६

लक्षणत्वात् नैधानीनिखाततुषांगारादिमती तेषांनिखनत्वेननिधानतुल्यत्वात् भयवर्जिता अर्थिप्रत्यर्थिपरस्परसंप्रतिप-
त्तिनिर्मिता राजशासननीताज्ञातृचिन्हाभावेराजेच्छयानिर्मिता एवंभूतायांषोढाविवादःसंभवति यथाहकात्यायनः आधि
क्यन्यूनताचांशेअस्तिनास्तित्वमेवच अभोगभुक्तिःसीमाचषड्विवादस्यहेतवइति तथाहि ममात्रपंचनिवर्तनायाभूमेरधि
काभूरस्तीति केनचिदुक्ते पंचनिवर्तनैवनाधिकेत्याधिक्येविवादः पंचनिवर्तनामदीयाभूमिरित्युक्तेनततोन्यूनैवेति

न्यूनतायांपंचनिवर्तनोममांशइत्युक्ते अंशएवनास्तीत्यस्तिनास्तित्वविवादः मदीयाभूःप्रागविद्यमानभोगैवभुज्यतेइत्युक्ते नसंततानिरंतन्ये
वभक्तिरित्यभोगभुक्तौविवादः इयंमर्यादेयंवेतिसीमाविवादइतिषट्प्रकारएवविवादः संभवति षट्प्रकारेपिभूविवादेश्रुत्यर्थाभ्यांसी
मायाअपिनिर्णीयमानत्वात् सीमानिर्णयप्रकारएतस्यांतर्भावः समंताद्भवाःसामंताः चतसृषुदिक्ष्वनंतरग्रामादयस्तेचप्रतिसीमंव्यव-
स्थिताः ग्रामोग्रामस्यसामंतः क्षेत्रंक्षेत्रस्यकीर्तितम् गृहंगृहस्यनिर्दिष्टंसमंतात्परिरभ्यहीतिकात्यायनवचनात् ग्रामादिशब्देनतत्स्थाः
पुरुषालक्ष्यंते ग्रामःपलायितइति यथा सामंतग्रहणंचतत्संसक्ताद्युपलक्षणार्थं उक्तंचकात्यायनेन संसक्तकास्तुसामंतास्तत्सं
सक्तास्तथोत्तराः संसक्तसक्तसंसक्ताःषट्प्रकाराःप्रकीर्तिताइति स्थविरावृद्धाः आदिग्रहणेनमौलोद्धृतयोर्ग्रहणम् वृद्धादिलक्षणं-
चतेनैवोक्तं निष्पाद्यमानंयैर्दृष्टंतत्कार्यंतद्गुणान्वितम् वृद्धावायदिवावृद्धास्तेतुवृद्धाःप्रकीर्तिताः येतत्रपूर्वेसामंताःपश्चाद्देशांतरंग
ताः तन्मूलत्वात्तुतेमौलाऋषिभिःपरिकीर्तिताः उपश्रवणसंभोगकार्याख्यानोपचिन्हिताः उद्धरंतिपुनर्यस्मादुद्धृतास्तेनतेस्मृताइ
ति गोपाःगोचारकाः सीमाकृषाणाःसीमासंनिहितक्षेत्रकर्षकाः सर्वेचवनगोचराः वनेगोचरावनचारिणोव्याधादयः तेचमनुनो-
क्ताः व्याधान्शाकुनिकान्गोपान्कैवर्तान्मूलखानकान् व्यालग्राहानुंछवृत्तीनन्यांश्चवनगोचरानिति स्थलमुन्नतोभूप्रदेशः अंगा
रा निर्वाणांगाराः तुषाधान्यत्वचः द्रुमान्यग्रोधादयः सेतुर्जलप्रवाहबंधः चैत्यंपाषाणबंधः आदिशब्देनवेणुवालुकादीनांग्रहणम् ए ८५
तानिचप्रकाशाप्रकाशभेदेनद्विप्रकाराणि तथाचमनुः सीमावृक्षांस्तुकुर्वीतन्यग्रोधाश्वत्थकिंशुकान् शाल्मलीशालतालांश्चक्षीरि-
अंगारोग्नेरुच्छिष्टः

णश्चैवपादपान् गुल्मान्वेणूंश्चविविधान्शमीवल्लीस्थलानिच शरान्कुब्जकगुल्मांश्चयथासीमाननश्यति तडागान्युदपानानिवाप्यःप्र
स्रवणानिच सीमासंधिषुकार्याणिदेवतायतनानिचेति प्रकाशरूपाणि उपछन्नानिचान्यानिसीमालिंगानिकारयेत् सीमाज्ञानेनृणां
वीक्ष्यनित्यंलोकेविपर्ययम् अश्मनोस्थीनिगोवालांस्तुषान्भस्मकपालिकाः करीषमिष्टकांगारशर्करावालुकास्तथा यानिचैवंप्रकारा
णि कालाद्भूमिर्नभक्षयेत् तानिसंधिषुसीमायामप्रकाशानिकारयेत् एतैर्लिंगैर्नयेत्सीमांराजाविवदमानयोरितिप्रच्छन्नलिंगानि एतैः
प्रकाशाप्रकाशरूपैर्लिंगैः सामंतादिप्रदर्शितैःसीमांप्रतिविवादज्ञानयोःसीमानिर्णयंकुर्याद्राजा१५५ १५६ यदापुनश्चिन्हानिनसंति

सामंतावासमग्रामाश्चत्वारोष्टौदशापिवा रक्तस्रग्वसनाःसीमांनयेयुःक्षितिधारिणः१५७

विद्यमानानिवालिंगानिलिंगतयासंदिग्धानितदानिर्णयोपायमाह सामंताःपूर्वोक्तलक्षणाः समग्रामाश्चत्वारोष्टौदशापिवेति एवंसमसंख्याः
प्रत्यासन्नग्रामीणाः रक्तस्रग्विणोरक्तांबरा मूर्ध्न्यारोपितक्षितिखंडाः सीमानंनयेयुः दर्शयेयुः सामंतावेतिविकल्पाभिधानंस्मृत्यंतरोक्तसा-
क्ष्यभिप्रायं यथाहमनुः साक्षिप्रत्ययएवस्यात्सीमावादविनिर्णयइति तत्रचसाक्षिणांनिर्णेतृत्वंमुख्यं तदभावेसामंतानां तदु-
क्तं साक्ष्यभावेतुचत्वारोग्रामाःसीमांतवासिनः सीमाविनिर्णयंकुर्युःप्रयताराजसन्निधाविति तदभावेतत्संसक्तादीनांनिर्णेतृत्वं य
थाहकात्यायनः स्वार्थसिद्धौप्रदुष्टेषुसामंतेष्वर्थगौरवात् तत्संसक्तैस्तुकर्तव्यउद्धारोनात्रसंशयः संसक्तेसक्तदोषेतुतत्संसक्ताः

प्रकीर्तिताः कर्तव्यानप्रदुष्टास्तुराज्ञाधर्मेविजानतेति सामंताद्यभावेमौलादयोग्राह्याः तेषामभावेसामंतामौलवृद्धोद्धृतादयः स्थावरेषट्प्रकारेपिकार्यानात्रविचारणेति कात्यायनक्रमाभिधानात् एतेच्च सामंतादयः संख्यागुणातिरेकेणभवंति सामंताः साधनंपूर्वमनिर्दोषाः स्युर्गुणान्विताः द्विगुणास्तूत्तराज्ञेयास्ततोन्येत्रिगुणामताइतिस्मरणात् तेचसाक्षिणः सामंतादयश्च स्वैः स्वैः शपथैः शापिताः संतः सीमानंनयेयुः शिरोभिस्तेगृहीत्वोर्वीस्त्रग्विणोरक्तवाससः सुकृतैः शापिताः स्वैःस्वैर्नयेयुस्तेसमंजसमितिमनुस्मरणात् नयेयुरितिबहुवचनंद्वयोर्निरासार्थंनैकस्य एकश्चेदुन्नयेत्सीमांसोपवासः समुन्नयेत् रक्तमाल्यांबरधरोभूमिमादायमूर्द्धनीतिनारदेनैकस्याभ्यनुज्ञानात् योयंनैकः समुन्नयेत्सीमानरः प्रत्ययवानपि गुरुत्वादस्यकार्यस्यक्रियेषाबहुषुस्थितेत्यैकस्यनिषेधः सउभयानुमतधर्मविद्यातिरिक्तविषयइत्यविरोधः स्थलादिचिन्हाभावेपिसाक्षिसामंतादीनांसीमाज्ञानउपायविशेषोनारदेनोक्तः निम्नगापहृतोत्सृष्टनष्टचिन्हासुभूमिषु तत्प्रदेशानुमानाच्चप्रमाणाद्भोगदर्शनादिति निम्नगयानद्या अपहृतेनापहरणेनोत्सृष्टानि स्वस्थानात्प्रच्युतानिनष्टानिवालिंगानियासुमर्यादाभूमिषु तत्रतत्प्रदेशानुमानादुत्सृष्टनष्टचिन्हानांप्राचीनप्रदेशानुमानात् ग्रामादारभ्यसहस्रदंडपरिमितंक्षेत्रमस्यग्रामस्यपश्चिमेभागेइत्येवंविधात्प्रमाणाद्वा प्रत्यर्थिसमक्षमविप्रतिपन्नायाअस्मार्तकालोपलक्षितभुक्तेर्वानिश्चिनुयुः बृहस्पतिनाचात्रविशेषोदर्शितः आगमंचप्रमाणंचभोगकालंचनामच भूभागलक्षणंचैवयेविदुस्तेत्रसाक्षिणइति एतेचसाक्षिसामंतादयः शपथैःश्राविताः संतः कुलादिसमक्षंराज्ञाप्रष्टव्याः यथाहमनुः ग्रामेयकुलानांतुसमक्षंसीम्निसाक्षिणः ८६

प्रष्टव्याःसीम्निलिंगानितयोश्चैवचवादिनोरिति तेचपृष्टाःसाक्ष्यादयःएकमत्येनसमस्ताः सीम्निनिर्णयंकुर्युः तैर्निर्णीतांसीमानंतत्प्रदर्शितसकललिंगयुक्तांसाक्ष्यादिनामान्वितांचाविस्मरणार्थंपत्रेसमारोपयेत् उक्तंचमनुना तेपृष्टास्तुयथाब्रूयुःसमस्ताःसीम्निनिर्णयम् निबध्नीयात्तथासीमांसर्वांस्तांश्चैवनामतइति एतेषांसामंतप्रभृतीनांसीमासंक्रमणादिनादारभ्ययावत्त्रिपक्षंराजदैविकंव्यसनंचेन्नोत्पद्यते तदातत्प्रदर्शनात्सीमानिर्णयः अयंचराजदैविकव्यसनावधिःकात्यायनेनोक्तः सीमासंक्रमणेकोशेपादस्पर्शेतथैवच त्रिपक्षपक्षसप्ताहंदैवराजिकमिष्यतेइति १५७ यदात्वमीषामुक्तसाक्ष्यवचसांत्रिपक्षाभ्यंतरेरोगादिदृश्यते अथवाप्रतिवादिनिर्दि

अनृतेतुपृथक्दंड्याराज्ञामध्यमसाहसम्

ष्टाभ्यधिकसंख्यागुणसाक्ष्यंतरविरूद्धवचनतातदातेमृषाभाषितयादंडनीयास्तदाह अनृतेमिथ्यावचनेनिमित्तभूतेसति सर्वे सामंताः प्रत्येकंमध्यमसाहसेनचत्वारिंशदधिकेनपणपंचशतेनदंडनीयाः सामंतविषयताचास्यसाक्षिमौल्यादीनांस्मृत्यंतरेदंडांतरविधानादवगम्यते तथाचमनुः यथोक्तेननयंतस्तेपूयंतेसत्यसाक्षिणः विपरीतंनयंतस्तुदाप्याः स्युर्द्विशतंदममिति नारदोपि अथचेदनृतंब्रूयुःसामंताःसीमनिर्णये सर्वेपृथक्पृथक्दंड्याराज्ञामध्यमसाहसमिति सामंतानांमध्यमसाहसंदंडमभिधाय शेषाश्चेदनृतंब्रूयुर्नियुक्ताभूमिकर्मणि प्रत्येकंतुजघन्यास्तेविनेयाःपूर्वसाहसमिति तत्संसक्तादिषुप्रथमंसाह

 समुक्तवान् मौलादीनामपितमेवदंडमाह मौलवृद्धादयस्त्वन्ये दंडगत्यापृथक्पृथक् विनेयाःप्रथमेनैवसाहसेनानृतेस्थिताइति 
आदिशब्देनगोपशाकुनिकव्याधवनगोचराणांग्रहणम् यद्यपिशाकुनिकादीनांपापरतत्वाल्लिंगप्रदर्शनएवोपयोगोनसाक्षात्सीमा
निर्णयेतथापिलिंगदर्शनएवमृषाभाषित्वसंभवाद्दंडविधानमुपपद्यतएव अनृतेतुपृथक्दंड्याइत्येतद्दंडविधानमज्ञानविषयम्
बहूनांतुगृहीतानांनसर्वेनिर्णयंयदि कुर्युर्भयाद्वालोभाद्वादंड्यास्तूत्तमसाहसमितिज्ञानविषयेसाक्ष्यादीनांकात्यायनेनदंडांतरवि
धानात् तथासाक्षिवचनभेदेप्ययमेवदंडस्तेनैवोक्तः कीर्तितेयदिभेदःस्याद्दंड्यास्तूत्तमसाहसमिति एवमज्ञानादिनानृतवचने

अभावेज्ञातृचिन्हानांराजासीम्नःप्रवर्तिता १५८

साक्ष्यादीन्दंडयित्वापुनःसीमाविचारःप्रवर्तयितव्यः अज्ञानोक्तौदंडयित्वापुनःसीमांविचारयेदित्युक्त्वा त्यक्त्वादुष्टांस्तुसामंतान
न्यान्मौलादिभिःसह संमिश्र्यकारयेत्सीमामेवंधर्मविदोविदुरितिनिर्णयप्रकारस्तेनैवोक्तः यदापुनःसामंतप्रभृतयोज्ञातारश्चिन्हानि
चनसंतितदाकथंनिर्णयइत्यतआह ज्ञातृणांसामंतादीनांलिंगानांचवृक्षादीनामभावेराजैवसीम्नःप्रवर्तिताप्रवर्तयिताअंतर्भा
वितोत्रण्यर्थःग्रामद्वयमध्यवर्तिनींविवादास्पदीभूतांभुवंसमंप्रविभज्यअस्येयंभूरस्येयमित्युभयोःसमर्प्यतन्मध्येसीमालिंगानिकुर्यात् ८७
यदातस्यांभूमावन्यतरस्योपकारातिशयोदृश्यतेतदातस्यैवग्रामस्यसकलाभूःसमर्पणीया यथाहमनुः सीमायामविषह्यायांस्वयंराजै

वधर्मवित् प्रदिशेद्भूमिमेकेषामुपकारादितिस्थितिरिति ५८ असत्यामप्यतद्वाद्वावाशंकायामस्याःस्मृतेर्न्यायमूलतांदर्शयितुमति
देशमाह आरामःपुष्पफलोपचयहेतुर्भूभागः आयतनंनिवेशनं पलालकूटाद्यर्थविभक्तोभूप्रदेशः ग्रामःप्रसिद्धः ग्रामग्रहणंचनग-
राद्युपलक्षणार्थं निपानंपानीयस्थानं वापीकूपप्रभृतिकं उद्यानंक्रीडावनं वेश्मगृहं एतेष्वारामादिष्वयमेवसामंतसाक्ष्यादिलक्षणो-
विधिर्ज्ञातव्यः तथाप्रवर्षणोद्भूतजलप्रवाहेषु अनयोर्गृहयोर्मध्येनजलौघःप्रवहति अनयोर्वेत्येवंप्रकारेविवादे आदिग्रहणात्प्रासाद
दिष्वपिप्राचीनएवविधिर्वेदितव्यः तथाचकात्यायनः क्षेत्रकूपतटाकानांकेदारारामयोरपि गृहप्रासादावसथनृपदेवगृहेषुचेति ५९

आरामायतनग्रामनिपानोद्यानवेश्मसु एषएवविधिर्ज्ञेयोवर्षांबुप्रवहादिषु १५९
मर्यादायाःप्रभेदेचसीमातिक्रमणेतथा क्षेत्रस्यहरणेदंडाअधमोत्तममध्यमाः १६०

सीमानिर्णयमुक्त्वातत्प्रसंगेनमर्यादाप्रभेदनादौदंडमाह अनेकक्षेत्रमध्येव्यवच्छेदिकासाधारणाभूर्मर्यादा तस्याःप्रकर्षेणभेदनेसीमाति
क्रमणेसीमानमतिलंघ्यकर्षणेक्षेत्रस्यचभयादिप्रदर्शनेनहरणेयथाक्रमेणअधमोत्तममध्यमसाहसादंडावेदितव्याः क्षेत्रग्रहणंचात्रगृ
हारामाद्युपलक्षणार्थं यदापुनःस्वीयभ्रांत्याक्षेत्रादिकमपहरति तदाद्विशतोदमोवेदितव्यः यथाहमनुः गृहंतडागमारामंक्षेत्रंवाभीषया
हरन् शतानिपंचदंड्यःस्यादज्ञानाद्विशतोदमइति अपह्रियमाणक्षेत्रादिभूयस्त्वपर्यालोचनयाकदाचिदुत्तमोदंडःप्रयोक्तव्यः अतएव

ह वधः सर्वस्वहरणंपुरान्निर्वासनांकने तदंगच्छेदइत्युक्तोदंडउत्तमसाहसइति ६० यःपुनःपरक्षेत्रेसेतुकूपादिकंप्रार्थनयार्थदाने
नवालब्धानुज्ञोनिर्मातुमिच्छतितन्निषेधतःक्षेत्रस्वामिनएवदंडइत्याह परकीयांभूमिमपहरन्नाशयन्नपिसेतुर्जलप्रवाहबंधः
क्षेत्रस्वामिनानप्रतिषेध्यः सचेदीषत्पीडाकरोबहूपकारकश्चभवति कूपश्चाल्पक्षेत्रव्यापित्वेनाल्पबाधोबहूदकत्वेनकल्याणकारक
श्चातोबहूदकोनैवनिवारणीयः कूपग्रहणंचवापीपुष्करिण्याद्युपलक्षणार्थं यतःपुनरसौसमस्तक्षेत्रवर्तितयाबहुबाधोनद्यादिसमीपक्षे
त्रवर्तितयाअल्पोपकारकस्तदासौनिषेध्यइत्यर्थादुक्तंभवति सेतोश्चद्वैविध्यमुक्तंनारदेन सेतुश्चद्विविधोज्ञेयःखेयोबध्यस्तथैवच तोयप्रव

नानिषेध्योल्पबाधस्तुसेतुःकल्याणकारकः परभूमिंहरन्कूपःस्वल्पक्षेत्रोबहूदकः १६१ स्वामिनेयोनिवेद्यैवक्षेत्रे
सेतुंप्रवर्तयेत् उत्पन्नेस्वामिनोभोगस्तदाभावेमहीपतेः १६२

र्तनात्खेयोबंध्यःस्यात्तन्निवर्तनादिति यदात्वन्यनिर्मितंसेतुं
भेदनादिनानष्टंस्वयंसंस्करोति तदापूर्वस्वामिनंतद्वंश्यंनृपंवापृष्ट्वैवसंस्कुर्यात् यथाहनारदः पूर्वप्रवृत्तमुत्सन्नमपृष्ट्वास्वामिनंतुयःसेतुं
प्रवर्तयेत्कश्चिन्नसतत्फलभाग्भवेत् मृतेतुस्वामिनिपुनस्तद्वंश्येवापिमानवे राजानमामंत्र्यततःकुर्यात्सेतुप्रवर्तनमिति ६१ क्षेत्रस्वामिनं
प्रत्युपदिष्टमिदानींसेतोःप्रवर्तयितारंप्रत्याह क्षेत्रस्वामिनमनभ्युपगम्यतदभावेराजानंवायःपरक्षेत्रेसेतुंप्रवर्तयत्यसौफलभाग्नभवत्य
पितुतदुत्पन्नेफलेक्षेत्रस्वामिनोभोगस्तदभावेराज्ञः तस्मात्प्रार्थनयाअर्थदानेनवाक्षेत्रस्वामिनंतदभावेराजानंवानुज्ञाप्यैवपरक्षेत्रेसेतुःप्र
वर्तनीयइतितात्पर्यं ६२

क्षेत्रस्वामिनासेतुर्नप्रतिषेध्यइत्युक्तमिदानींतस्यैवप्रसक्तानुप्रसक्त्याकंचिद्धिंतरमाह यःपुनःक्षेत्रस्वामिनोर्थे अहमिदंक्षेत्रंकृषामीतिअं
गीकृत्यपश्चादुत्सृजतिनचान्येनकर्षयति तच्चक्षेत्रंयद्यपिफलाहतंईषद्धलेनविदारितं नसम्यग्बीजवपनार्हं तथापितस्याकृष्टस्यफलंयावत्त
त्रोत्पत्त्यर्हंसामंतादिकल्पितंतावदसौकर्षकोदापनीयः तच्चक्षेत्रंपूर्वकर्षकादाच्छिद्यान्येनकारयेत् इतिसीमाविवादप्रकरणम् १६३ व्य
वहारपदानांपरस्परहेतुहेतुमद्भावाभावात् तेषामाद्यमृणादानमित्यादिनापाठक्रमोनविवक्षितइतिस्वक्रमेणस्वामिपालविवादोऽभि

फालाहतमपिक्षेत्रंनकुर्याद्योनकारयेत् सप्रदाप्यःकृष्टफलंक्षेत्रमन्येनकारयेत् १६३
माषानष्टौतुमहिषीसस्यघातस्यकारिणी दंडनीयातदर्द्धंतुगौस्तदर्द्धमजाविकम् १६४

धीयते परसस्यविनाशकारिणीमहिषीअष्टौमाषान्दंडनीया गौस्तदर्द्धंचतुरोमाषान् अजामेषाश्चमाषद्वयंदंडनीयाः महिष्यादीनांधन
संबंधाभावात्तत्स्वामीपुरुषोलक्ष्यते माषश्चात्रताम्रिकपणविंशतितमोभागः माषोविंशतिमोभागःपणस्यपरिकीर्तितइतिनारदस्मरणा
त् एतच्चाज्ञानविषयम् ज्ञानपूर्वेतु पणस्यपादौद्वौगांतु द्विगुणंमहिषींतथा तथाजाविकवत्सानांपादोदंडःप्रकीर्तितइतिस्मृत्यं
तरोक्तंद्रष्टव्यम् यत्पुनर्नारदेनोक्तं माषंगांदापयेद्दंडंद्वौमाषौमहिषींतथा तथाजाविकवत्सानांदंडःस्यादर्द्धमाषकइतितत्पुनःप्ररोहयोग्यमूला
वशेषभक्षणविषयं १६५

अपराधातिशयेनक्वचिद्दंडद्वैगुण्यमाह यदिपशवःपरक्षेत्रेसस्यंभक्षयित्वा तत्रैवानिवारिताःशेरते तदायथोक्ताद्दंडाद्द्विगुणोदंडोवे 
दितव्यः सवत्सानांपुनर्भक्षयित्वोपविष्टानां यथोक्ताच्चतुर्गुणोदंडोवेदितव्यः वसतांद्विगुणःप्रोक्तःसवत्सानांचतुर्गुणइतिवचनात् क्षेत्रां
तरेप्यन्तरेणातिदेशमाह विवीतःप्रचुरतृणकाष्ठोरक्ष्यमाणःपरिगृहीतोभूप्रदेशः तदुपघातेपीतरक्षेत्रदंडेनसमंदंडमेषांमहि-
ष्यादीनांविद्यात् खरश्चउष्ट्रश्चखरोष्ट्रंतन्महिषीसमम् महिषीयत्रतादृशेनदंडेनदंड्यते तत्रतादृशेनैवदंडेनखरोष्ट्रमपिप्रत्येकंदंडनीयं
सस्योपरोधकत्वेनखरोष्ट्रयोःप्रत्येकंमहिषीतुल्यत्वाद्दंडस्यचापराधानुसारत्वात्खरोष्ट्रमितिसमाहारोनविवक्षितः १६५ परसस्यविना

भक्षयित्वोपविष्टानांयथोक्ताद्द्विगुणोदमः सममेषांविवीतेपिखरोष्ट्रंमहिषीसमम् १६४ यावत्सस्यंविनश्येत्तुताव
त्स्यात्क्षेत्रिणःफलम् गोपस्ताड्यस्तुगोमीतुपूर्वोक्तंदंडमर्हति १६५ शेगोस्वामिनोदंडउक्तः इदानींक्षेत्रस्वामिनेफलमप्यसौ

दापनीयइत्याह सस्यग्रहणंक्षेत्रोपचयोपलक्षणार्थम् यस्मिन्क्षेत्रेयावत्पलालधान्यादिकंगवादिभिर्विनाशितंतावत्क्षेत्रफलमेतावतिक्षे
त्रेएतावद्भवतीतिसामंतैःपरिकल्पितंतत्क्षेत्रस्वामिनेगोमीदापनीयः गोपस्तुताडनीयएव नफलंतद्दापनीयः गोपस्यचताडनंपूर्वोक्तध
नदंडसहितमेव पालदोषेणसस्यनाशेद्रष्टव्यम् यानष्टापालदोषेणगोस्तुसस्यानिनाशयेत् नतत्रगोमिनांदंडःपालस्तंदंडमर्हती 
तिवचनात् गोमीपुनःस्वापराधेनसस्यनाशेपूर्वोक्तंदंडमेवार्हति नताडनम् फलदानंपुनःसर्वत्रगोस्वामिनएव तत्फलपुष्टमहि-

---

ष्यादिक्षीरेणोपभोगद्वारेणतत्क्षेत्रफलभागित्वात् पूर्वादिभक्षितावशिष्टंपलालादिकंगोस्वामिनैवगृहीतव्यम् मध्यस्थकल्पितमूल्यदानेनक्री
तप्रायत्वात् अतएवनारदः गोभिस्तुभक्षितंसस्यंयोनरःप्रतियाचते सामंतानुमतंदेयंधान्यंयत्तत्रवापितम् पलालंगोमिनांदेयंधान्यं
वैकर्षकस्यतिति १६६ क्षेत्रविशेषेअपवादमाह पथिग्रामसमीपवर्तिनिक्षेत्रेग्रामविवीतसमीपवर्तिनिच क्षेत्रेअकामतोगोभिर्भ
क्षितेगोपगोमिनोर्द्वयोरप्यदोषः दोषाभावप्रतिपादनंदंडाभावार्थंविनष्टसस्यमूल्यदानप्रतिषेधार्थंच कामचारेकामतश्चारणेचोरव
त्चौरस्ययादृशोदंडस्तादृशंदंडमर्हति एतच्चानावृतक्षेत्रविषयम् यत्रापरिवृतंधान्यंनिहिंस्युःपशवोयदि नतत्रप्रणयेद्दंडंनृपतिःप

पथिग्रामविवीतांतेक्षेत्रेदोषोनविद्यते अकामतःकामचारेचौरवद्दंडमर्हति १६७ महो
क्षोत्सृष्टपशवःसूतिकागंतुकादयः पालोयेषांचतेमोच्यादेवराजपरिप्लुताः १६८

शुरक्षिणामितिदंडाभावस्यानावृतक्षेत्रविषयत्वेनमनुनोक्तत्वात् आवृतेपुनर्मार्गादिक्षेत्रेपिदोषोस्त्येव वृत्तिकरणंचतेनैवोक्तम्
वृत्तिंचतत्रकुर्वीतयामुष्ट्रोनावलोकयेत् छिद्रंनिवारयेत्सर्वंश्वसूकरमुखानुगमिति १६७ पशुविशेषेपिदंडाभावमाह महांश्चासा
वुक्षाचमहोक्षोवृषःसेक्ता उत्सृष्टपशवः वृषोत्सर्गादिविधानेनदेवतोद्देशेनत्यक्ताः सूतिकाप्रसूताअनिर्दशाहा आगंतुकः
स्वयूथात्परिभ्रष्टोदेशांतरादागतः एतेमोच्याः परसस्यभक्षिणोपिनदंड्याः येषांपालोविद्यतेतेपिदेवराजपरिप्लुताःदेव

राजोपहृताः सस्यनाशकारिणोन दंड्याः आदिग्रहणाद्धस्त्यश्वादयोगृह्यंते तेचोशनसोक्ताः अदंड्याहस्तिनोह्यश्वाःप्रजापाला
हितेस्मृताः अदंड्योकाणकुब्जौचयेशश्वत्कृतलक्षणाः अदंड्यागंतुकीगौश्चसूतिकावाभिसारिणी अदंड्याश्चोत्सवेगावःश्राद्धका-
लेतथैवचेति अत्रोत्सृष्टपशूनामस्वामिकत्वेनदंड्यत्वासंभवात् दृष्टांतार्थमुपादानम् यथोत्सृष्टपशवोनदंड्याएवंमहोक्षादयइति १६८
गोस्वामिनउक्तमिदानींगोपंप्रत्युपदिश्यते गोस्वामिनाप्रातःकालेयथागणयित्वायथार्पिताःपशवस्तेतथैवसायंकालेगोपोगोस्वामि
नेपशून्विगणय्यप्रत्यर्पयेत् प्रमादेनस्वापराधेनमृतान्नष्टांश्चपशून् कृतवेतनःकल्पितवेतनोगोपःस्वामिनेदाप्यः वेतन

यथार्पितान्पशून्गोपःसायंप्रत्यर्पयेत्तथा प्रमादमृतनष्टांश्चप्रदाप्यःकृतवेतनः १६९

कल्पनाचनारदेनोक्ता गवांशताद्वत्सतरीधेनुःस्याद्द्विशताद्भृतिः प्रतिसंवत्सरंगोपेसंदोहश्चाष्टमेहनीति प्रमादनाशश्चमनु
नास्पष्टीकृतः नष्टंजग्धंचकृमिभिःश्वहतंविषमेमृतम् हीनंपुरुषकारेणप्रदद्यात्पालएवतुइति प्रसह्यचौरैरपहृतान्नदाप्यः-
यथाहमनुः विघुष्यतुहृतंचौरैर्नपालोदातुमर्हति यदिदेशेचकालेचस्वामिनःस्वस्यशंसति दैवमृतानांपुनःकर्णादिप्रदर्शनीयम्- ९०
कर्णौचर्मचवालांश्चबस्तिंस्नायूंश्चरोचनाम् पशुस्वामिषुदद्यात्तुमृतेष्वंगानिदर्शयन्नितिमनुस्मरणात् १६९ ७

किंच पालदोषेणपशुविनाशेअर्द्धाधिकत्रयोदशपणंदंडंपालोदाप्यः स्वामिनश्चद्रव्यंविनष्टपशुमूल्यंमध्यस्थकल्पितंदंडपरिमाणार्थंश्लोको
न्यत्पूर्वोक्तमेव. ७० गोप्रसंगात्गोप्रचारमाह ग्रामेच्छयाग्रामजनेच्छया भूम्यल्पत्वमहत्त्वापेक्षया राजेच्छयावागोप्रचारःकर्तव्यः गवादीनां
प्रचारणार्थं कियानपिभूभागोऽकृष्टः परिकल्पनीयइत्यर्थः द्विजस्तृणाद्यंतराभावेगवाग्निदेवतार्थं तृणकाष्ठकुसुमानिसर्वतःस्ववदनिवारितआ
हरेत् फलानित्वपरिवृतानि देवगोग्न्यर्थंतृणमेधांसिवीरुद्वनस्पतीनांपुष्पाणिस्ववदाददीत फलानिचापरिवृतानामितिगौतमस्मरणात्

पालदोषविनाशेतुपालदंडोविधीयते अर्द्धत्रयोदशपणःस्वामिनोद्रव्यमेवच १७०
ग्रामेच्छयागोप्रचारोभूमिराजवशेनवा द्विजस्तृणैधपुष्पाणिसर्वतःसर्वदाहरेत् १७१
धनुःशतंपरीणाहोग्रामेक्षेत्रांतरंभवेत् द्वेशतेखर्वटस्यस्यान्नगरस्यचतुःशतम् १७२

एतच्चपरिगृहीतविषयम् अपरिगृहीतेद्विजव्यतिरिक्तस्यापिपरिग्रहादेवस्वत्वसिद्धेः यथातेनैवोक्तं स्वामीरिक्थक्रयसंविभागपरिग्रहाधिग
मेष्विति यत्पुनरुक्तं तृणंवायदिवाकाष्ठंपुष्पंवायदिवाफलम् अनापृच्छन्हिगृह्णानोहस्तच्छेदनमर्हतीति तद्द्विजव्यतिरिक्तविषयमनापद्विषयं
वा गवादिव्यतिरिक्तविषयंवेति १७१ इदमपरंगवादीनांस्थानासनसौकर्यार्थमुच्यते ग्रामक्षेत्रयोरंतरंधनुःशतपरिमितंपरीणाहःसर्व
तोदिक्षु अनुप्तसस्यंकार्यं खर्वटस्यप्रचुरकंटकसंतानस्यग्रामस्यद्वेशतेपरीणाहः नगरस्यबहुजनसंकीर्णस्यधनुषांचतुःशतपरिमितमंत
रंकार्यं इतिस्वामिपालविवादप्रकरणं १७२

संप्रत्यस्वामिविक्रयाख्यं व्यवहारपदमुपक्रमते तस्यचलक्षणंनारदेनोक्तं निक्षिप्तंवापरद्रव्यंनष्टंलब्ध्वापहृत्यवा विक्रीयतेसमक्षंयत्सवि-
ज्ञेयोस्वामिविक्रयइति तत्रकिमित्याह स्वमात्मसंबंधिद्रव्यंअन्यविक्रीतमस्वामिविक्रीतंयदिपश्यतितंतदालभेत गृह्णीयात् अस्वामि
विक्रयस्यस्वत्वहेतुत्वाभावात् विक्रीतग्रहणंदत्ताहितयोरुपलक्षणार्थं अस्वामिक्रीतत्वेनतुल्यत्वात् अतएवोक्तम् अस्वामिविक्रयंदा
नमाधिंचविनिवर्तयेदिति क्रेतुःपुनरप्रकाशितेगोपितेक्रय्येदोषोभवति तथाहीनाद्द्रव्यागमोपायहीनाद्रहसिचैकांतेसंभाव्यद्रव्यादपि
हीनमूल्येनाल्पतरेणचमूल्येनक्रयेवेलाहीनेवेलयाहीनोवेलाहीनःक्रयोरात्र्यादौकृतस्तत्रचक्रेतातस्करोभवति तस्करदंडभाग्भवतीत्यर्थःय

स्वंलभेतान्यविक्रीतंक्रेतुर्दोषोप्रकाशिते हीनाद्रहोहीनमूल्येवेलाहीनेचतस्करः१७३ नष्टापहृतमासाद्यहर्तारंग्राहयेन्नरं
देशकालातिपत्तौचगृहीत्वास्वयमर्पयेत् १७४

थोक्तम् द्रव्यमस्वामिविक्रीतंप्राप्यस्वामीतदाप्नुयात् प्रकाशक्रयतःशुद्धिःक्रेतुः
स्तेयंरहःक्रयादिति १७३ स्वाम्यभियुक्तेनक्रेत्राकिंकर्तव्यमित्यतआह नष्टमपहृतंवान्यदीयंक्रयादिनाप्राप्यहर्तारंविक्रेतारंनरंग्राहये
त् चौरोद्धरणकादिभिः आत्मविशुद्ध्यर्थंराजदंडप्राप्त्यर्थंच अथाविदितंदेशांतरंगतःकालांतरेवाविपन्नस्तदामूलसमाहरणाशक्तेर्वि
क्रेतारमदर्शयित्वैवस्वयमेवतद्धनंनाष्टिकस्यसमर्पयेत् तावतैवासोशुद्धोभवतीतिश्रीशंकराचार्येणव्याख्यातंतदिदानीमनुपपन्नम्
विक्रेतुर्दर्शनाच्छुद्धिरित्यनेनपौनरुक्त्यप्रसंगादतोन्यथाव्याख्यायते नष्टापहृतमितिनाष्टिकंप्रत्ययमुपदेशः नष्टमपहृतंचात्मीयद्र ९१

व्यमासाद्यक्रेतृहस्तस्थंज्ञात्वातंहर्तारंक्रेतारंस्थलपालादिकंग्राहयेत् देशकालातिपत्तौदेशकालातिक्रमेस्थलपालाद्यसन्निधानेतद्विज्ञा
पनकालात्प्राक्पलायनाशंकायांस्वयमेवगृहीत्वातेभ्यःसमर्पयेत् १७४ ग्राहितेहर्तरिकिंकर्तव्यमित्यतआह यद्यसौगृहीतःक्रे
तानमयेदमपहृतमन्यसकाशात्क्रीतमितिवक्ति तदातस्यक्रेतुर्विक्रेतुर्दर्शनमात्रेणशुद्धिर्भवति नपुनरसावभियोज्यःकिंतुतत्प्रद
र्शितेनविक्रेत्रासहनाष्टिकस्यविवादः यथाहबृहस्पतिः मूलेसमाहृतेक्रेतानाभियोज्यःकथंचन मूलेनसहवादस्तुनाष्टिकस्यविधी
यतइति तस्मिन्विवादेयद्यस्वामिविक्रयनिश्चयोभवति तदातस्यनष्टापहृतस्यगवादिद्रव्यस्ययोविक्रयीविक्रेतातस्यसकाशात्स्वा

विक्रेतुर्दर्शनाच्छुद्धिःस्वामीद्रव्यंनृपोदमम् क्रेतामूल्यमवाप्नोतितस्माद्यस्तस्यविक्रयी१७५

मीनाष्टिकःस्वीयंद्रव्यमवाप्नोति नृपश्चापराधानुरूपंदंडंक्रेताचमूल्यमवाप्नोति अथासौदेशांतरगतस्तदायोजनसंख्ययानयनार्थं
कालोदेयः प्रकाशंवाक्रयंकुर्यान्मूलंवापिसमर्पयेत् मूलानयनकालश्चदेयस्तत्राध्वसंख्ययेतिस्मरणात् अथाविज्ञातदेशतया
मूलमाहर्तुंनशक्नोति तदाक्रयंशोधयित्वैवशुद्धोभवति असमाहार्यमूलस्तुक्रयमेवविशोधयेदितिवचनात् यदापुनःसाक्ष्या
दिभिर्दिव्येनवाक्रयंनशोधयतिमूलंचनप्रदर्शयति तदासएवदंडभाग्भवति अनुपस्थापयन्मूलंक्रयंवाप्यविशोधयन् यथा-
भियोगंधनिनेधनंदाप्योदमंचसइतिमनुस्मरणात् १७५ ५ ७ ५ ७

स्वंलभेतान्यविक्रीतमित्युक्तंतल्लिप्सुनाकिंकर्तव्यमित्यत आह आगमेनरिक्थक्रयादिनाउपभोगेनचमदीयमिदंद्रव्यंतच्चैवंनं
ष्टमपहृतंवेत्यपिभाव्यंसाधनीयं तत्स्वामिना अतोन्यथा तेनस्वामिना अविभाविते पंचबंधोनष्टद्रव्यस्यपंचमोंशो दमोनाष्टिके
नराज्ञेदेयः अत्रचायंक्रमः पूर्वस्वामीनष्टमात्मीयंसाधयेत् ततः क्रेताचौर्यपरिहारार्थंमूल्यलाभायचविक्रेतारं आनयेत्
अथानेतुंनशक्नोति तदात्मदोषपरिहारायक्रयंसाधयित्वाद्रव्यंनाष्टिकस्यसमर्पयेदिति १७६ तस्करप्रच्छादकंप्रत्याह ह
तंप्रनष्टंवाचौरादिहस्तस्थंद्रव्यमनेनमदीयंद्रव्यमपहृतमिति नृपस्यानिवेद्यैव दर्पादिनायोगृह्णाति असौषड्‌उत्तरान्नवतिपणान् दंडनीयः तस्क

आगमेनोपभोगेननष्टंभाव्यमतोऽन्यथा पंचबंधोदमस्तस्यराज्ञेतेनाविभाविते १७६ हृतंप्रनष्टंयोद्रव्यंपरहस्तादवाप्नुया
त् अनिवेद्यनृपेदंड्यः सतुषण्णवतिंपणान् १७७ शौल्किकैःस्थानपालैर्वानष्टापहृतमाहृतं अर्वाक्संवत्सरात्स्वामीहरेतपर
तोनृपः १७८

रप्रच्छादकत्वेनदुष्टत्वात् ७७ राजपुरुषानीतंप्रत्याह यदातुशुल्कादिकारिभिःस्थानरक्षिभिर्वानष्टमपहृतंद्रव्यंराजपा
र्श्वंप्रत्यानीतंतदासंवत्सरादर्वाक्चेत्स्यात्तदा नाष्टिकस्तद्‌द्रव्यमवाप्नुयात् ऊर्ध्वंपुनः संवत्सराद्राजागृह्णीयात् स्वपुरुषानीतंचद्रव्यंजनसमूहे
घुष्ट्वोष्य यावत्संवत्सरं राज्ञारक्षणीयं यथाहगौतमः प्रनष्टस्वामिकमधिगम्यराज्ञेप्रब्रूयुः विख्याप्यसंवत्सरंराज्ञारक्ष्यमिति यत्तुपुनर्मनुना ९२
विध्यंतरमुक्तं प्रनष्टस्वामिकंद्रव्यंराजात्र्यब्दंनिधापयेत् अर्वाक्त्र्यब्दाद्धरेत्स्वामीपरतोनृपतिर्हरेदिति तच्छ्रुतवृत्तसंपन्नब्राह्मणविष

यम् रक्षणनिमित्तषड्भागग्रहणंचतेनैवोक्तम् आददीताथषड्भागंप्रनष्टाधिगतान्नृपः दशमंद्वादशंवापिसतांधर्ममनुस्मरन्निति तृती
यद्वितीयप्रथमसंवत्सरेषुयथाक्रमंषष्ठादयोभागावेदितव्याः प्रपंचितंचैतत्पुरस्तात् १७८ मनूक्तषड्भागादिग्रहणस्यद्रव्यविशेषे अप
वादमाह एकशफे अश्वादौप्रनष्टाधिगते तत्स्वामीराज्ञेरक्षणनिमित्तंचतुरः पणान् दद्यात् मानुषेमनुष्यजातीयेद्रव्ये पंचपणान् अजावि
केपुनः प्रत्येकंपादंपादं महिषोष्ट्रगवांरक्षणनिमित्तंप्रत्येकंद्वौद्वौपणान् दद्यादिति सर्वत्रानुषज्जते अजाविकमितिसमासनिर्देशोपि

पणानेकशफेदद्याच्चतुरः पंचमानुषे माहिषोष्ट्रगवांद्वौद्वौपादंपादमजाविके १७९

पादंपादमितिवीप्साबलात्प्रत्येकंसंबंधोवगम्यते इत्यस्वामिविक्रयप्रकरणम् १७९ अधुनाविहिताविहितमार्गद्वयाश्रयनयादत्ता
नपाकर्मदत्ताप्रतिदानिकमितिचलब्धाभिधानद्वयंदानाख्यंव्यवहारपदं अभिधीयते तत्स्वरूपंचनारदेनोक्तं दत्वाद्रव्यमसम्यग्यःपु
नरादातुमिच्छति दत्ताप्रदानिकंनामव्यवहारपदंहितदिति असम्यगविहितमार्गाश्रयेणद्रव्यंदत्वापुनरादातुमिच्छति यस्मिन् विवाद
पदेतद्दत्ताप्रदानिकं दत्तस्याप्रदानंपुनर्हरणं यस्मिन्दानाख्येतद्दत्ताप्रदानिकंनामव्यवहारपदं विहितमार्गाश्रयत्वेनतत्प्रतिपक्षभू
तंतदेवव्यवहारपदम् दत्तानपाकर्मेत्यर्थादुक्तंभवति दत्तस्यानपाकर्मअपुनरादानं यत्रदानाख्येविवादपदे तद्दत्तानपाकर्म तच्च

देयादेयादिभेदेनचतुर्विधम् यथाहनारदः अथदेयमदेयंचदत्तंचादत्तमेवच व्यवहारेषुविज्ञेयोदानमार्गश्चतुर्विधइति त
त्रदेयमित्यनिषिद्धदानक्रियायोग्यमुच्यते अदेयमस्वतयानिषिद्धतयावादानानर्हं यत्पुनः प्रकृतिस्थेनदत्तमव्यावर्तनीयंत द्दत्त
मुच्यते अदत्तंतुयत्प्रत्याहरणीयंतत्कथ्यते तदेतत्संक्षेपतोनिरूपयितुमाह स्वमात्मीयंकुटुंबाविरोधेनकुटुंबानुपरोधेनकुटुंबभर
णावशिष्टमितियावत्तद्दद्यात् तद्भरणस्यावश्यकत्वात् तथाचमनुः वृद्धौचमातापितरौसाध्वीभार्यासुतःशिशुः अप्यकार्यशतं
कृत्वाभर्तव्यामनुरब्रवीदिति स्वकुटुंबाविरोधेनेत्यनेनादेयमेकविधंदर्शयति स्वदद्यादित्यनेनचास्वभूतानामन्वाहितयाचितकाधि-

स्वकुटुंबाविरोधेनदेयंदारसुतादृते नान्वयेसतिसर्वस्वंयच्चान्यस्मैप्रतिश्रुतम् १८०

साधारणनिक्षेपाणांपंचानामप्यदेयत्वंव्यतिरेकतोदर्शितम् यत्पुनर्नारदेनाष्टविधत्वमुक्तमदेयानां अन्वाहितंयाचितकमाधिःसा
धारणंचयत् निक्षेपःपुत्रदारंचसर्वस्वंचान्वयेसति आपत्स्वपिचकष्टासुवर्तमानेनदेहिना अदेयान्याहुराचार्यायच्चान्यस्मैप्रति
श्रुतमिति एतददेयत्वमात्राभिप्रायेणनपुनः स्वत्वाभिप्रायेण पुत्रदारसर्वस्वप्रतिश्रुतेषुस्वत्वस्यसद्भावात् अन्वाहितादीनांस्वरूपं
प्रागेवप्रपंचितं स्वंदद्यादित्यनेनदारसुतादेरपिस्वत्वाविशेषेणदेयत्वप्रसंगेप्रतिषेधमाह दारसुतादृते दारसुतव्यतिरिक्तंस्वंदद्यान्नदा ९३
रसुतमित्यर्थः तथापुत्रपौत्राद्यन्वयेविद्यमानेसर्वंधनंनदद्यात् पुत्रानुत्पाद्यसंस्कृत्यवृत्तिंचैषांप्रकल्पयेदितिस्मरणात् तथाहिरण्यादिकमन्यस्मै
प्रतिश्रुतमन्यस्मैनदेयम् १८०

एवंदारसुतादिव्यतिरिक्तंदेयमुक्त्वाप्रसंगाददेयधनग्रहणंचप्रतिग्रहीत्राप्रकाशमेवकर्तव्यमित्याह प्रतिग्रहणंप्रतिग्रहः सःप्रकाशःकर्त
व्यः विवादनिराकरणार्थं स्थावरस्यचविशेषतःप्रकाशमेवग्रहणंकार्यम् तस्यसुवर्णादिवदात्मनिस्थितस्यदर्शयितुमशक्यत्वात् एवं
प्रासंगिकमुक्त्वाप्रकृतमनुसरन्नाह देयंप्रतिश्रुतंचैव यद्यस्मैधर्मार्थंप्रतिश्रुतंतत्तस्मैदेयमेव यद्यसौधर्मात्प्रच्युतोनभवति प्रच्युते
पुनर्दातव्यं प्रतिश्रुत्याप्यधर्मयुक्तायनदद्यादितिगौतमस्मरणात् दत्वानापहरेत्पुनः न्यायमार्गेणयद्दत्तंतत्सप्तविधमपिपुनर्नापह
र्तव्यं किंतुतथैवानुमंतव्यम् यत्पुनरन्यायेनदत्तंतददत्तं षोडशप्रकारमपिप्रत्याहर्तव्यमेवेत्यर्थादुक्तंभवति नारदवचनाच्च दत्तंस

प्रतिग्रहःप्रकाशःस्यात्स्थावरस्यविशेषतः देयंप्रतिश्रुतंचैवदत्वानापहरेत्पुनः १८१

प्तविधंप्रोक्तमदत्तंषोडशात्मकमितिप्रतिपाद्यदत्तादत्तयोःस्वरूपंविवृतम् पण्यमूल्यंभृतिस्तुष्ट्यास्नेहात्प्रत्युपकारतः स्त्रीशुल्कानु
ग्रहार्थंच दत्तंदानविदोविदुः अदत्तंतुभयक्रोधशोकवेगरुगन्वितैः तथोत्कोचपरीहासव्यत्यासछलयोगतः बालमूढास्वतंत्रार्त
मत्तोन्मत्तापवर्जितम् कर्तामममेदंकर्मेतिप्रतिलाभेच्छयाचयत् अपात्रेपात्रमित्युक्तेकार्येवाधर्मसंयुते यद्दत्तंस्यादविज्ञानाददत्त
मितितत्स्मृतमिति अयमर्थःपण्यस्यक्रीतद्रव्यस्ययन्मूल्यंदत्तं भृतिर्वेतनंकृतकर्मणेदत्तम् तुष्ट्याबंदिचारणादिभ्योदत्तं स्नेहाद्दु
हितृपुत्रादिभ्योदत्तं प्रत्युपकारतः उपकृतवतेप्रत्युपकाररूपेणदत्तं स्त्रीशुल्कंपरिणयनार्थंकन्याज्ञातिभ्योयद्दत्तं यच्चानुग्रहार्थम

दृष्टार्थंदत्तं तदेतत्सप्तविधमपिदत्तमेवनप्रत्याहरणीयम् भयेनबंदियाहादिभ्योदत्तं क्रोधेनपुत्रादिभ्योवैरनिर्यातनायान्यस्मैदत्तं
पुत्रवियोगादिनिमित्तशोकावेशेनदत्तं उत्कोचेनकार्यप्रतिबंधनिरासार्थमधिकृतेभ्योदत्तं परिहासेनोपहासेनदत्तं एकोपिस्वद्रव्यमन्य
स्मैददात्यन्योपिददातीतिदानव्यत्यासः छलयोगतःशतदानमभिसंधाय सहस्रमितिपरिभाष्यददाति बालेनाप्राप्तषोडशवर्षेण मूढेन
लोकवादानभिज्ञेन अस्वतंत्रेणपुत्रदारादिना आर्तेनरोगाभिभूतेन मत्तेनमदनीयमत्तेन उन्मत्तेनवातिकाद्युन्मादग्रस्तेन वा अपवर्जि
तंदत्तं तथायंमदीयंकर्मकरिष्यतीतिप्रतिलाभेच्छयादत्तं अचतुर्वेदायचतुर्वेदोहमित्युक्तवतेदत्तं यज्ञंकरिष्यामीतिधनंलब्ध्वाद्यूतादौ
विनियुंजानायदत्तमित्येवंषोडशप्रकारमपिदत्तमदत्तमित्युच्यते प्रत्याहरणीयत्वात् आर्तदत्तस्यादत्तत्वंधर्मकार्यव्यतिरिक्तविषयम् स्व
स्थेनार्तेनवादत्तंश्राविर्तंधर्मकारणात् अदत्वातुमृतेदाप्यस्तत्सुतोनात्रसंशयइतिकात्यायनस्मरणात् तथेदमपरंसंक्षिप्तार्थंवचनंसर्ववि
वादसाधारणम् योगाधमनविक्रीतंयोगदानप्रतिग्रहम् यस्यवाप्युपधिंपश्येत्तत्सर्वंविनिवर्तयेदिति योगउपाधिः येनागामिनोपाधिवि
शेषेणाधिविक्रयदानप्रतिग्रहाः कृतास्तदुपाधिविरामेक्रियादीन्विनिवर्तयेदित्यस्यार्थः यःपुनःषोडशप्रकारमपि अदत्तंगृह्णाति यश्चादेयं
प्रयच्छति तयोर्दंडोनारदेनोक्तः गृह्णात्यदत्तंयोलोभाद्यश्चादेयंप्रयच्छति अदेयदायकोदंड्यस्तथादत्तप्रतीच्छकइति इतिदत्ताप्र- ९४
दानिकंनामप्रकरणम् १८१ अथक्रीतानुशयःकथ्यते तत्स्वरूपंनारदेनोक्तम् क्रीत्वामूल्येनयःपण्यंक्रेतानबहुमन्यते क्रीतानु-
शयइत्येतद्विवादपदमुच्यतेइति तत्रचयस्मिन्नहनिपण्यंक्रीतंयस्मिन्नेवान्हितदविकृतंप्रत्यर्पणीयमिति तेनैवोक्तम् क्रीत्वामूल्येनयःप

ण्यंदुःक्रीतंमन्यतेक्रयं विक्रेतुःप्रतिदेयंतत्तस्मिन्नेवान्ह्यविक्षतमिति द्वितीयादिदिनेतुप्रत्यर्पणेविशेषस्तेनैवोक्तः द्वितीयेन्हिददत्क्रेतामूल्यात्
त्रिंशांशमावहेत् द्विगुणंतुतृतीयेन्हिपरतःक्रेतुरेवतदिति परतोनुशयोनकर्तव्यइत्यर्थः एतच्चबीजातिरिक्तोपभोगविनश्वरवस्तुविषयम्
बीजादिक्रयेपुनरन्यएवप्रत्यर्पणविधिरित्याह बीजंव्रीह्यादिबीजं अयोलोहादि वाह्योबलीवर्दादिः रत्नंमुक्ताप्रवालादिकं स्त्रीदासी दोह्यंमा
हिष्यादि पुमान्दासः एषांबीजादीनांयथाक्रमेण दशाहादिकःपरीक्षाकालोविज्ञेयः परीक्ष्यमाणेचबीजादौयद्यसम्यक्त्वबुद्ध्यानुशयोभव
ति तदादशाहाद्यभ्यंतरएवक्रयनिवृत्तिर्नपुनरूर्ध्वमित्युपदेशप्रयोजनं यत्तुमनुवचनम् क्रीत्वाविक्रीयवाकिंचिद्यस्येहानुशयोभवेत्

दशैकपंचसप्ताहमासत्र्यहार्द्धमासिकम् बीजायोवाह्यरत्नस्त्रीदोह्यपुंसांपरीक्षणम् १८२
अग्नौसुवर्णमक्षीणंरजतेद्विपलंशते अष्टौत्रपुणिसीसेचताम्रेपंचदशायसि १८३

सोन्तर्दशाहात्तद्द्रव्यंदद्याच्चैवाददीतचेति तदुक्तंलोहादिव्यतिरिक्तोपभोगविनश्वरगृहक्षेत्रयानशयनासनादिविषयम् सर्वंचैतदपरीक्षि
तक्रीतविषयम् यत्पुनःपरीक्ष्यनपुनःप्रत्यर्पणीयमितिसमयंकृत्वाक्रीतंतद्विक्रेत्रेनप्रत्यर्पणीयम् तदुक्तम् क्रेतापण्यंपरीक्षेतप्राक्स्वयं
गुणदोषतः परीक्ष्याभिमतंक्रीतंविक्रेतुर्नभवेत्पुनरितित्रिदोह्यादिपरीक्षाप्रसंगेनस्वर्णादेरपिपरीक्षणमाह वन्हौप्रताप्यमानंसुवर्णंन
क्षीयते अतःकटकादिनिर्माणार्थंयावत्स्वर्णकारहस्तेप्रक्षिप्तंतावत्तुलितंप्रत्यर्पणीयम् इतरथाक्षयंदाप्यादंड्यश्च रजतेतु

शतपलेसंताप्यमाने पलद्वयंक्षीयेत अथैवत्रपुणि सीसेचशतइत्यनुवर्तते त्रपुणिसीसेचशतपलेसंताप्यमानेष्टौपलानिक्षीयंते ताम्रेपंचदशायसि ताम्रेशतपलेपंचपलानि अयसिदशपलानिक्षीयंते अत्रापिशतइत्येव कांस्यस्यतुत्रपुताम्रयोनिलात्तदनुसारेण क्षयःकल्प्यः इतोधिकक्षयकारिणःशिल्पिनोदंड्याः १८३ क्वचित्कंबलादौवृद्धिमाह स्थूलेनौर्णसूत्रेण यत्कंबलादिकंक्रियते तस्मिन्शतपलेदशपलावृद्धिर्वेदितव्या एवंकार्पाससूत्रपटादौवेदितव्यम् मध्येअनतिसूक्ष्मनिर्मितेपटादौपंचपलावृद्धिः सूक्ष्मसूत्रनिर्मितेश

शतेदशपलावृद्धिरौर्णकार्पाससौत्रिके मध्येपंचपलावृद्धिःसूक्ष्मेतुत्रिपलामता १८४
कार्मिकेरोमबंधेचत्रिंशद्भागःक्षयोमतः नक्षयोनचवृद्धिश्चकौशेयेवल्कलेषुच १८५

तेत्रिपलावृद्धिर्वेदितव्या एतच्चाप्रक्षालितवासोविषयम् १८४ द्रव्यांतरेविशेषमाह कार्मिकंकर्मणाचित्रेणनिर्मितं यच्चानिष्पन्नेपटे रुचकस्वस्तिकादिकंचसूत्रैःक्रियते तत्कार्मिकमित्युच्यते यत्रप्रावारादौरोमाणिबध्यंतेसरोमबंधः तत्रत्रिंशत्तमोभागःक्षयोवेदितव्यः कौशेयेकोशप्रभवे वल्कलेषुवृक्षत्वङ्निर्मितेषुवसनेषुवृद्धिह्रासौनस्तः किंतुयावद्वसनार्थंकुविंदादिभ्योदत्तंतावदेवप्रत्यादेयम् १८५ ५ ५ ५ ५ ५ ५ ५ ९५

द्रव्यानंत्यात्प्रतिद्रव्यंक्षयवृद्धिप्रतिपादनाशक्तेःसामान्येनह्रासवृद्धिज्ञानोपायमाह शाणक्षौमादौद्रव्येनष्टेह्रासमुपगतेद्रव्याणांकुशलाःद्रव्यवृद्धिक्षयाभिज्ञाः देशंकालमुपभोगंतथानष्टद्रव्यस्यबलाबलंसारासारतांचपरीक्ष्य यत्कल्पयंतितदसंशयंशिल्पिनोदाप्याः इतिक्रीतानुशयप्रकरणम् १८६ सांप्रतमभ्युपेत्याशुश्रूषाख्यमपरंविवादपदमभिधातुमुपक्रमते तत्स्वरूपंचनारदेनोक्तं अभ्युपेत्यतुशुश्रूषांयस्तांनप्रतिपद्यते अशुश्रूषाभ्युपेत्यैतद्विवादपदमुच्यतइति आज्ञाकरणंशुश्रूषा तामंगीकृत्ययश्चाद्योनसंपादयति तद्विवादपदमभ्युपेत्याशुश्रूषाख्यं शुश्रूषकश्चपंचविधः शिष्यांतेवासीभृतकोऽधिकर्मकृद्दासइति तेषामा

देशंकालंचभोगंचज्ञात्वानष्टेबलाबलम् द्रव्याणांकुशलाब्रूयुर्यत्तद्दाप्यमसंशयम् १८६

द्याश्चत्वारः कर्मकाराइत्युच्यंते तेचशुभकर्मकारिणः दासाःपुनर्गृहजातादयःपंचदशप्रकाराः गृहद्वाराशुचिस्थानरथ्यावस्करशोधनाद्यशुभकर्मकारिणः तदिदंनारदेनस्पष्टीकृतम् शुश्रूषकःपंचविधःशास्त्रेदृष्टोमनीषिभिः चतुर्विधःकर्मकरस्तेषांदासास्त्रिपंचकाः शिष्यांतेवासिभृतकाश्चतुर्थस्त्वधिकर्मकृत् एतेकर्मकराज्ञेयादासास्तुगृहजादयः सामान्यमस्वतंत्रत्वमेषामाहुर्मनीषिणः जातिकर्मकृतस्तूक्तोविशेषोवृत्तिरेवच कर्मापिद्विविधंज्ञेयमशुभंशुभमेवच अशुभंदासकर्मोक्तंशुभंकर्मकृतांस्मृतम् गृहद्वाराशुचिस्थानरथ्यावस्करशोधनम् गुह्यांगस्पर्शनोच्छिष्टविण्मूत्रग्रहणोज्झनम् इच्छतःस्वामिनश्चांगैरुपस्थानमथांततः अशुभंकर्मविज्ञे

यंशक्रममन्यदतःपरमिति. तत्रशिष्योवेदविद्यार्थी अंतेवासीशिल्पशिक्षार्थी मूल्येनयःकर्मकरोतिसभृतकः कर्मकुर्वतामधिष्ठाताधि
कर्मकृत् अशुचिस्थानमुच्छिष्टप्रक्षेपार्थंगर्तादिकम् अवस्करोगृहमार्जितपांस्वादिनिचयस्थानं उज्झनंत्यागः भृतकश्चात्रत्रिविधः
तदुक्तं उत्तमस्त्वायुधीयोत्रमध्यमस्तुकृषीवलः अधमोभारवाहीस्यादित्येवंत्रिविधोभृतइति दासःपुनः गृहेजातस्तथाक्रीतोलब्धो
दायादुपागतः अनाकालभृतस्तद्वदाहितःस्वामिनाचयः मोक्षितोमहतश्चर्णाद्युद्धप्राप्तःपणेजितः तवाहमित्युपगतःप्रव्रज्यावसितः
कृतः भक्तदासश्चविज्ञेयस्तथैववडवाहृतः विक्रेताचात्मनःशास्त्रेदासाःपंचविधाःस्मृताः गृहेदास्यांजातोगृहजातः क्रीतोमूल्ये
न लब्धःप्रतिग्रहादिना दायादुपागतःपित्रादिदासः अनाकालभृतोदुर्भिक्षेयोदासत्वायमरणाद्रक्षितः आहितःस्वामिनाधनग्र
हणेनाधितांनीतः ऋणमोचनेनदासत्वमभ्युपगतःऋणदासः युद्धप्राप्तः समरेविजित्यगृहीतः पणेजितः यद्यस्मिन्विवादेपरा
जितोहं तदात्वद्दासोभवामीतिपरिभाष्यजितः तवाहमित्युपगतः तवाहंदासइतिस्वयंसंप्रतिपन्नःप्रव्रज्यावसितः प्रव्रज्यातश्च्यु
तः कृतः एतावत्कालंत्वद्दासइति अभ्युपगमितः भक्तदासःसर्वकालंभक्तार्थमेवदासत्वमभ्युपगम्ययःप्रविष्टः वडवाहृतः वड
वागृहदासीतयाहृतः तल्लोभेनतामुद्वाह्यदासत्वेनप्रविष्टः यआत्मानंविक्रीणीते असावात्मविक्रीतेत्येवंपंचदशप्रकाराः यत्तुम
नुना ध्वजाहृतोभक्तदासोगृहजःक्रीतदत्त्रिमो पैतृकोदंडदासश्चसप्तैतेदासयोनयइति सप्तविधत्वमुक्तं तत्तेषांदासत्वप्रतिपा ९६
दनपरम् नतुपरिसंख्यार्थं तत्रैषांशिष्यांतेवासिभृतकाधिकर्मकृद्दासानांमध्येशिष्यवृत्तिःप्रागेवप्रतिपादिता आहूतश्चा

प्यधीयीतलब्धंवास्मैनिवेदयेदित्यादिना अधिकर्मकृद्भृतकानांतुवेतनादानप्रकरणेवक्ष्यते योयावत्कुरुतेकर्मतावत्तस्यतुवेतनमित्यादिना
दासांतेवासिनोस्तु धर्मविशेषंवक्तुमाह बलात्बलावष्टंभेनयोदासीकृतः यश्चौरैरपहृत्यविक्रीतः अपिशब्दादाहितोदत्तश्चमुच्यतेय
दिस्वामीनमुंचतितर्हिराज्ञामोचयितव्यः उक्तंचनारदेन चौरापहृतविक्रीतायेचदासीकृताबलात् राज्ञामोचयितव्यास्तेदास्यंतेषुहिने
ष्यतेइति चौरव्याघ्राद्यवरुद्धस्यस्वामिनःप्राणान्यःप्रददातिरक्षत्यसावपिमोचयितव्यः तदिदंसर्वदासानांसाधारणंदास्यनिवृत्ति
कारणं योवैषांस्वामिनंकश्चिन्मोक्षयेत्प्राणसंशयात् दासत्वात्सविमुच्येतपुत्रभागंलभेतचेति नारदस्मरणात् भक्तदासादीनांप्राति-

बलाद्दासीकृतश्चौरैर्विक्रीतश्चापिमुच्यते स्वामिप्राणप्रदोभक्तत्यागात्तन्निष्क्रयादपि १८७

स्विकमपिमोक्षकारणमुच्यते अनाकालभृतभक्तदासौ भक्तस्यत्यागाद्दासभावादारभ्यस्वामिद्रव्यंयावदुपभुक्तंतावद्दत्वामुच्येते आ
हितर्णदासौतु तन्निष्क्रयात् यद्गृहीत्वास्वामिना आहितोयच्चदत्वाधनिनोत्तमर्णान्मोचितः तस्यनिष्क्रयात्सवृद्धिकस्यप्रत्यर्पणान्मु
च्येते नारदेनविशेषोप्युक्तः अनाकालभृतोदास्यान्मुच्यतेगोयुगंददत् संभक्षितंयद्दुर्भिक्षेनतच्छुध्येतकर्मणा भक्तस्योत्क्षे
पणात्सद्योभक्तदासःप्रमुच्यते आहितोपिधनंदत्वास्वामीयद्येनमुद्धरेत् ऋणंतुसोदयंदत्वाऋणीदास्यात्प्रमुच्यतइति तवाहमि
त्युपगतयुद्धप्राप्तपणजितकृतकवडवाहृतानांचप्रातिस्विकंमोचनकारणंचतेनैवोक्तम् यथा तवाहमित्युपगतोयुद्धप्राप्तःपणेजितः

प्रतिशीर्षप्रदानेनमुच्येरंस्तुल्यकर्मणा कृतकालव्युपगमात्कृतकोपिविमुच्यते निग्रहाद्वडवायास्तुमुच्यतेदडवाहृतइति दासेनसहसंभो
गनिरोधादित्यर्थः तदेवंगृहजातक्रीतलब्धदायप्राप्ताप्तविक्रयिणांस्वामिप्राणप्रदानतत्प्रसादरूपसाधारणकारणव्यतिरेकेणमोक्षो
नास्ति विशेषकारणानभिधानात् दासमोक्षश्चानेनक्रमेणकर्तव्यः स्वंदासमिच्छेद्यः कर्तुमदासंप्रीतमानसः स्कंधादादायतस्यासौ
भिंद्यात्कुंभंसहांभसा साक्षताभिःसपुष्पाभिर्मूर्द्धन्यद्भिरवाकिरेत् अदासइत्यथोक्त्वात्रिःप्राङ्मुखंतमवासृजेदितितेनैवोक्तम्
१८७ प्रव्रज्यावसितस्यतुमोक्षोनास्तीत्याह प्रव्रज्यासंन्यासस्ततोवसितःप्रच्युतः अनभ्युपगतप्रायश्चित्तश्चेद्राज्ञएवदासोभ

प्रव्रज्यावसितोराज्ञोदासआमरणांतिकम् वर्णानामानुलोम्येन दास्यंनप्रतिलोमतः १८८

वति मरणमेवदासत्वस्यांतोन्यस्मिन्कालेनमोक्षोस्ति वर्णापेक्षयादास्यव्यवस्थामाह ब्राह्मणादीनांवर्णानामानुलोम्येनदास्य
म् ब्राह्मणस्यक्षत्रियादयः क्षत्रियस्यवैश्यशूद्रौ वैश्यस्यशूद्रइत्येवमानुलोम्येनदासभावोभवति नप्रातिलोम्येन स्वधर्म
त्यागिनःपुनः परिव्राजकस्यप्रातिलोम्येनापिदासत्वमिष्यतएव यथाहनारदः वर्णानांप्रातिलोम्येनदासत्वंनविधीयते- ९७
स्वधर्मत्यागिनोन्यत्रदारवद्दासतामतेति १८८ ५ ५ ५ ५

अंतेवासिधर्मानाह अंतेवासीगुरोर्गृहे कृतकालंवर्षचतुष्टयमायुर्वेदादिशिल्पशिक्षार्थं त्वद्गृहेवसामीतियावदंगीकृतं तावत्कालंवसेत्
वसन्नपिवर्षचतुष्टयादर्वागेवलब्धापेक्षितशिल्पविद्यः कथंनिवसेत् गुरुप्राप्तभोजनःगुरोःसकाशात्प्राप्तंभोजनंयेनसतथोक्तः
तत्फलप्रदः तस्यशिल्पस्यफलमाचार्यायप्रददातीति तत्फलप्रदः एवंभूतोवसेत् नारदेनविशेषोप्यत्रदर्शितः स्वशिल्पमि-
च्छन्नाहर्तुंबांधवानामनुज्ञया आचार्यस्यवसेदंतेकृत्वाकालंसुनिश्चितम् आचार्यःशिक्षयेदेनंस्वगृहेदत्तभोजनम् नचान्यत्का
रयेत्कर्मपुत्रवच्चैनमाचरेत् शिक्षयंस्तमसंदुष्टंयआचार्यपरित्यजेत् बलाद्वासयितव्यःस्याद्वधबंधौचसोर्हति शिक्षितोपिकृ

कृतशिल्पोपिनिवसेत्कृतकालंगुरोर्गृहे अंतेवासीगुरुप्राप्तभोजनस्तत्फलप्रदः १८९
राजाकृत्वापुरेस्थानंब्राह्मणान्न्यस्यतत्रतु त्रैविद्यंवृत्तिमद्ब्रूयात्स्वधर्मःपाल्यतामिति १९०

तंकालमंतेवासीसमाप्नुयात् तत्रकर्मचयत्कुर्यादाचार्यस्यैवतत्फलम् गृहीतशिल्पःसमयेकृत्वाचार्यप्रदक्षिणम् शिक्षितश्चानुमान्यैन
मंतेवासीनिवर्ततइति वधशब्दोत्रताडनार्थः दोषस्याल्पत्वात् इत्यभ्युपेत्याशुश्रूषाख्यंविवादपदम् १८९ संप्रतिसंविद्व्यतिक्रमःकथ्यते
तस्यचलक्षणंनारदेनव्यतिरेकमुखेनदर्शितम् पाखंडनैगमादीनांस्थितिःसमयउच्यते समयस्यानपाकर्मतद्विवादपदंस्मृतमितिपारि
भाषिकधर्मेणव्यवस्थानंसमयस्तस्यानपाकर्माव्यतिक्रमः परिपालनंतद्व्यतिक्रम्यमाणंविवादपदंभवतीत्यर्थः तदुपक्रमार्थंकिंचिदाह

राजास्वपुरे दुर्गादौ स्थानं धवलगृहादिकं कृत्वा तत्र ब्राह्मणानन्यस्य स्थापयित्वा तद्ब्राह्मणव्रातं त्रैविद्यं वेदत्रयसंपन्नं वृत्तिमद्भूहिरण्यादि
संपन्नं च कृत्वा स्वधर्मो वर्णाश्रमनिमित्तः श्रुतिस्मृतिविहितो भवद्भिरनुष्ठीयतामिति तान्ब्राह्मणान्ब्रूयात् ११० एवं नियुक्तैस्तैर्यत्कर्म
कर्तव्यं तदाह श्रौतस्मार्तधर्मानुपमर्देन समयान्निष्पन्नो यो धर्मो गोप्रचारोदकरक्षणदेवगृहपालनादिरूपः सोपि यत्नेन पालनीयः तथा
राज्ञा च निजधर्माविरोधेनैव यः सामयिको धर्मो यावत्पथिकं भोजनं देयमस्मद्रातिमंडलं तुरंगादयो न प्रस्थापनीया इत्येवंरूपः सोपि रक्ष

निजधर्माविरोधेन यस्तु सामयिको भवेत् सोपि यत्नेन संरक्ष्यो धर्मो राजकृतश्च यः १११
गणद्रव्यं हरेद्यस्तु संविदं लंघयेच्च यः सर्वस्वहरणं कृत्वा तं राष्ट्राद्विप्रवासयेत् ११२

णीयः ११ एवं समयधर्मः परिपालनीय इत्युक्त्वा तदतिक्रमादौ दंडमाह यः पुनर्गणस्य ग्रामादिजनसमूहस्य संबंधि साधारणं द्रव्यम
पहरति संविल्लं समयस्तां समूहकृतां राजकृतां वा यो लंघयेदतिक्रामेत्तदीयं सर्वं धनमपहृत्य स्वराष्ट्राद्विप्रवासयेन्निष्कासयेत् अयं च
दंडोनुबंधाद्यतिशये द्रष्टव्यः अनुबंधाल्पत्वे तु यो ग्रामदेशसंघानां कृत्वा सत्येन संविदम् विसंवदेन्नरो लोभात्तं राष्ट्राद्विप्रवासयेत्
निगृह्य दापयेदेनं समयव्यभिचारिणम् चतुःसुवर्णषण्निष्कंशतमानं च राजन्तमिति मनुप्रतिपादितदंडानां निर्वासनचतुः
सुवर्णषण्निष्कशतमानानां चतुर्णामन्यतमो जातिशक्त्याद्यपेक्षया कल्पनीयः ११२



इदं चैतैः कर्तव्यमित्याह गणिनां मध्ये ये समूहहितवादनशीलास्तद्वचनमितरैर्गणानामंतर्गतैरनुसरणीयम् अन्यथा दंड इत्याह यस्तु ग
णिनां मध्ये समूहहितवादिवचनप्रतिबंधकारी स राज्ञा प्रथमसाहसं दंडनीयः ११३ राज्ञा चेत्थं गणिषु वर्तनीयमित्याह समूहकार्यनिर्वृत्त्यर्थं
स्वपार्श्वमागतान् गणिनो निवर्तितात्मीयप्रयोजनान् दानमानसत्कारैः स राजा परितोष्य विसर्जयेत् ११४ समूहद्रव्यापहारिणं प्रत्याह स

कर्तव्यं वचनं सर्वैः समूहहितवादिनाम् यस्तत्र विपरीतः स्यात्स दाप्यः प्रथमं दमम् ११३
समूहकार्ये आयातान्कृतकार्यान्विसर्जयेत् स दानमानसत्कारैः पूजयित्वा महीपतिः ११४
समूहकार्यप्रहितो यल्लभेत तदर्पयेत् एकादशगुणं दाप्यो यद्यसौ नार्पयेत्स्वयम् ११५
धर्मज्ञाः शुचयो लुब्धा भवेयुः कार्यचिंतकाः कर्तव्यं वचनं तेषां समूहहितवादिनाम् ११६

मूहकार्यार्थं महाजनैः प्रेरितो राजपार्श्वे यद्धिरण्यवस्त्रादिकं लभते तदप्रार्थित एव महाजनेभ्यो निवेदयेत् अन्यथा लब्धादेकादशगुणं दंडं दाप
नीयः ११५ एवंप्रकाराश्च कार्यचिंतकाः कार्या इत्याह श्रौतस्मार्तधर्मज्ञाः बाह्याभ्यंतरशौचयुक्ताः अर्थेष्वलुब्धाः कार्यविचारकाः कर्तव्याः ते
षां वचनमितरैः कार्यमित्येतदादरार्थं पुनर्वचनम् ११६

इदानींत्रैविद्यानांप्रतिपादितंधर्मंश्रेण्यादिष्वतिदिशन्नाह एकपण्यशिल्पोपजीविनःश्रेणयः नैगमाः येवेदस्याप्तप्रणीतत्वेन प्रामाण्यमिच्छंति
पाशुपतादयः पाखंडिनोयेवेदस्यप्रामाण्यमेवनेच्छंति नग्नाटसौगतादयः गणोव्रातः आयुधीयादीनामेककर्मोपजीविनामेषांचतुर्विधानामप्य
यमेवविधिः योनिजधर्माविरोधेनेत्यादिनाप्रतिपादितएतेषांचश्रेण्यादीनांभेदंधर्मव्यवस्थांनृपोरक्षेत् पूर्वोपात्तांवृत्तिंचपालयेत् इतिसंवि
द्यतिक्रमप्रकरणम् १९७ संप्रतिवेतनस्यानपाकर्माख्यंव्यवहारपदंप्रस्तूयते तत्स्वरूपंचनारदेनोक्तं भृत्यानांवेतनस्योक्तोदा
नादानविधिक्रमः वेतनस्यानपाकर्मतद्विवादपदंस्मृतमिति अस्यार्थः भृत्यानांवेतनस्यवक्ष्यमाणश्लोकेरुक्तोदानादानविधिक्रमोयत्रवि

श्रेणिनैगमपाखंडिगणानामप्ययंविधिः भेदंचैषांनृपोरक्षेत्पूर्ववृत्तिंचपालयेत् १९७
गृहीतवेतनःकर्मत्यजन्द्विगुणमावहेत् अगृहीतेसमंदाप्योभृत्यैरक्ष्यउपस्करः १९८

वादपदंतद्वेतनस्यानपाकर्मेत्युच्यते तत्रनिर्णयमाह गृहीतंवेतनंयेनासौस्वांगीकृतंकर्मत्यजन् अकुर्वन्द्विगुणांभृतिंस्वामिनेदद्यात् यदापुनरभ्य
भ्युपगतंकर्मगृहीतवेतनएवत्यजतितदासमंयावद्वेतनमभ्युपगतंतावद्दाप्योनद्विगुणं यद्यंगीकृत्यभृतिंदत्वाबलात्कारयितव्यः कर्माकुर्वन्
प्रतिश्रुत्यकार्योदत्वाभृतिंबलादितिनारदवचनात् भृतिरपितेनैवोक्ता भृत्यायवेतनंदद्यात्कर्मस्वामीयथाक्रमम् आदौमध्येवसानेवाकर्मणो ९९
यद्विनिश्चितमिति तैश्चभृत्यैरुपस्करउपस्करणंलांगलादीनांप्रग्रहयोक्त्रादिकंयथाशक्त्यारक्षणीयमितरथाकृष्यादिनिष्पत्त्यनुपपत्तेः १९८

भृतिमपरिच्छिद्ययःकर्मकारयतितंप्रत्याह यस्तुस्वामीवणिक्गोमीक्षेत्रिकोवा अपरिच्छिन्नवेतनमेवभृत्यंकर्मकारयति तस्माद्वाणिज्य
पशुसस्यलक्षणात्कर्मणोयल्लब्धंतस्यदशमंभागंभृत्यायमहीक्षिताराज्ञादापनीयः १९९ अनाज्ञप्तकारिणंप्रत्याह यस्तुभृत्यःपण्यविक्रया
द्युचितंदेशंकालंचपण्यविक्रयाद्यकुर्वन् दर्पादिनोल्लंघयेत्तस्मिन्नेववादेशेकालेचलाभमन्यथाव्ययाद्यतिशयसाध्यंतथाहीनंकरोति तस्मि
न्भृतकेभृतिदानंप्रतिस्वामिनःछंदःइच्छाभवेद्यावदिच्छतितावद्दद्यान्नपुनःसर्वामेवभृतिमित्यर्थः यदापुनर्देशकालाभिज्ञतयाअधि

दाप्यस्तुदशमंभागंवाणिज्यपशुसस्यतः अनिश्चित्यभृतिंयस्तुकारयेत्समहीक्षिता १९९
देशंकालंचयोतीयाल्लाभंकुर्याच्चयोन्यथा तत्रस्यात्स्वामिनश्छंदोधिकंदेयंकृतेधिके १२००
योयावत्कुरुतेकर्मतावत्तस्यतुवेतनम् उभयोरप्यसाध्यंचेत्साध्येकुर्याद्यथाश्रुतम् २०१

कोलाभःकृतस्तदापूर्वपरिच्छिन्नायाभृतेरधिकिमपिधनमधिकंस्वामिनाभृत्यायदातव्यम् २०० अनेकभृत्यसाध्यकर्मणिभृतिदानप्रकार
माह यदापुनरेकमेवकर्मनियतवेतनमुभाभ्यांक्रियमाणंउभयोरप्यसाध्यंस्यात् व्याघ्राद्यभिभवादुभाभ्यामपिशब्दाद्बहुभिरपियदिनप
रिसमापितं तदायोभृत्योयावत्कर्मकरोति तावत्तस्मैतत्कृतकर्मानुसारेणमध्यस्थकल्पितंवेतनंदेयं नपुनःसमम् नचावयवशःकर्मणि
वेतनस्यापरिभाषितत्वाददानमितिमंतव्यम् साध्येतूभाभ्यांकर्मणिनिवर्तितेयथाश्रुतं यावत्परिभाषितंतावदुभाभ्यांदेयं नपुनःप्रत्येकंकृत्स्नवेत
नंनाधिकर्मानुरूपंपरिकल्प्यदेयम् २०१

आयुधीयभारवाहकोप्यत्राह नविद्यतेराजदैविकंयस्यभांडस्य तत्तथोक्तम् तद्यद्यपिप्रज्ञाहीनतयावाहकेन नाशितं तदानाशानुसारे-
णासौ तद्भांडंदापनीयः तथाहिनारदः भांडंव्यसनमागच्छेद्यदिवाहकदोषतः दाप्योयत्तत्रनश्येत्तुदैवराजकृतादृतेइति यःपुनर्विवा
हाद्यर्थंमंगलवतिवासरेप्रतिष्ठमानस्यतत्प्रस्थानोपयिकंकर्म प्रागंगीकृत्य तदानींनकरिष्यामीतिप्रस्थानविघ्नमाचरति तदासौद्विगुणां
भृतिंदाप्यः अत्यंतोत्कर्षहेतुकर्मनिरोधात् २०२. किंच प्रक्रांते अध्यवसिते प्रस्थाने स्वांगीकृतंकर्मयस्त्यजति असौभृतेः सप्तमंभागं
दाप्यः नन्वत्रैवविषयेप्रस्थानविघ्नकृद्दित्यादिनाद्विगुणभृतिदानमुक्तं इदानींसप्तमोभागइतिविरोधः उच्यते भृत्यांतरोपादानावसर

अराजदैविकंनष्टंभांडंदाप्यस्तुवाहकः प्रस्थानविघ्नकृच्चैवप्रदाप्योद्विगुणांभृतिम् २०२
प्रक्रांतेसप्तमंभागंचतुर्थंपथिसंत्यजन् भृतिमर्द्धपथेसर्वांप्रदाप्यस्त्याजकोपिच २०३

संभवेस्वांगीकृतंकर्मयस्त्यजति तस्यसप्तमोविभागः यस्तुप्रस्थानलग्नसमयएवत्यजतितस्यद्विगुणभृतिदानमित्यविरोधः यःपुनः
पथिप्रक्रांतेगमनेवर्तमानेसति कर्मत्यजतिसभृतेश्चतुर्थंभागंदाप्यः अर्द्धपथेपुनःसर्वांभृतिंदाप्यः यस्तुत्याजकःकर्मात्यजंतंत्याज-
यति स्वामी पूर्वोक्तप्रदेशेष्वसावपिपूर्वोक्तसप्तमभागादिकंभृत्यायदापनीयः एतच्चाव्याधितविषयम् भृत्योनार्तोनकुर्याद्योदर्पात्कर्मय १००
थोदितम् सदंड्यःकृष्णलान्यष्टौनदेयंतस्यवेतनमिति यदापुनर्व्याध्युपगतेतरितदिवसान्परिगणय्य पूरयतितदालभतएववेतनम्

आर्तस्तुकुर्यात्स्वस्थःसन्यथाभाषितमादितः सदीर्घस्यापिकालस्यतल्लभेतैववेतनमितिमनुस्मरणात् यस्त्वपगतव्याधिःस्वस्थएववा
लस्यादिनास्वारब्धंकर्माल्पोनंकरोति परेणवानसमापयति तस्मैवेतनंनदेयमिति यथाहमनुः यथोक्तमार्तःस्वस्थोवायस्तत्कर्मनकार-
येत् नतस्यवेतनंदेयमल्पोनस्यापिकर्मणइति इतिवेतनादानप्रकरणम् ३ अधुनाद्यूतसमाह्वयाख्यंविवादपदमधिक्रियते त
त्स्वरूपंनारदेनाभिहितम् अक्षवध्रशलाकाद्यैर्देवनंजिह्मकारितम् पणक्रीडावयोभिश्चपदंद्यूतसमाह्वयम् अक्षाःपाशकाः वध्र-
काश्चर्मपट्टिकाः शलाकादंतादिमय्योदीर्घचतुरस्राः आद्यग्रहणाच्चतुरंगादिक्रीडासाधनंकरितुरगरथादिकंगृह्यते तैरप्राणिभिर्यद्देव

ग्लहेशतिकवृद्धेस्तुसभिकःपंचकंशतम् गृह्णीयाद्धूर्तकितवादितराद्दशकंशतम् २०४

नंक्रीडापणपूर्विकाक्रियते तथावयोभिःकुक्कुटादिभिश्चशब्दान्मल्लमेषमहिषादिभिश्चप्राणिभिर्यापणपूर्विकाक्रीडाक्रियतेतदुभयंयथा
क्रमेणद्यूतसमाह्वयाख्यंविवादपदम् द्यूतंसमाह्वयश्चद्यूतसमाह्वयम् तदुक्तंमनुना अप्राणिभिर्यत्क्रियतेतल्लोकेद्यूतमुच्यते
प्राणिभिःक्रियमाणस्तुसविज्ञेयःसमाह्वयइति तत्रद्यूतसभाधिकारिणोवृत्तिमाह परस्परसंप्रतिपत्त्याकितवपरिकल्पितःपणो
ग्लहइत्युच्यते तत्रग्लहे तदाश्रयाशतिकाशतपरिमिता तदधिकपरिमाणावावृद्धिर्यस्यासौशतिकवृद्धिकस्तस्माद्धूर्तकितवात्संच-
कं शतमात्मवृत्त्यर्थं सभिकोगृह्णीयात् पंचपणाअयोयस्मिन्शते तच्छतंपंचकं तदस्मिन्वृद्ध्यायलाभेइत्यादिनाकन् जितग्लह

स्य विंशतितमं भागं गृह्णीयादित्यर्थः सभाकितवनिवासार्थाय स्यासौ ससभिकः कल्पिताक्षादिनिखिलक्रीडोपकरणस्तदुपचितद्रव्योपजीवी सभापतिरुच्यते इतरस्मात्पुनरपरिपूर्णशतिकवृद्धेः कितवाद्दशकंशतं जितद्रव्यस्य दशमंभागंगृह्णीयादितियावत् २०४ एवंक्लृप्तवृत्तिनासभिकेन किंकर्तव्यमित्याह एवंक्लृप्तवृत्तिर्द्यूतानुकारी सराज्ञाधूर्तकितवेभ्यो रक्षितस्तस्मैराज्ञे यथासंप्रतिपन्नमंशंदद्यात् तथाजिनंद्रव्यमुद्ग्राहयेत् बंधग्रहणेनासेधादिनाच पराजितसकाशादुद्धरेत् उद्धृत्यचतद्धनंजेत्रे जयिने सभिकोदद्यात् तथाक्षमी

ससम्यक्पालितोदद्याद्राज्ञेभागंयथाकृतम् जितमुद्ग्राहयेज्जेत्रे दद्यात्सत्यंवचःक्षमी ५
प्राप्तेनृपतिनाभागेप्रसिद्धेधूर्तमंडले जितंससभिकेस्थानेदापयेदन्यथानतु ६

भूत्वासत्यंवचोविश्वासार्थं द्यूतकारिणांदद्यात् तदुक्तंनारदेन सभिकःकारयेत्द्यूतंदेयंदद्याच्चतत्कृतमिति २०५ यदापुनःसभिकोदापयितुंनशक्नोतितदाराजादापयेदित्याह प्रसिद्धे अप्रच्छन्ने राजाध्यक्षसमन्विते सभिकसहिते कितवसमाजे सभिकेनच राजभागेदत्ते राजाधूर्तकितवमविप्रतिपन्नंजितंपणंदापयेत् अन्यथाप्रच्छन्ने सभिकरहिते अदत्तराजभागे द्यूतेजितंपणंजेत्रेनदापयेत् २०६ ७ ७ ७ ७ ७ १०१

जयपराजयविप्रतिपत्तौनिर्णयोपायमाह द्यूतव्यवहाराणांद्रष्टारः सभ्यास्तएवकितवाएवराज्ञानियोक्तव्याः नतत्रश्रुताध्ययनसंपत्त्यादिर्नियमोनास्ति साक्षिणश्चद्यूते द्यूतकाराएवकार्याः नतत्रस्त्रीबालवृद्धकितवेत्यादिनिषेधोस्ति क्वचित्द्यूतंनिषेद्धुंदंडमाह कूटैरक्षादिभिरुपधिनाच्चमतिवंचनहेतुना मणिमंत्रौषधादिना येदीव्यंति तान्श्वपदादिनांकयित्वाराजास्वराष्ट्रान्निर्वासयेत् नारदेननिर्वासनेविशेषउक्तः कूटाक्षदेविनःपापान्राजाराष्ट्राद्विवासयेत् कंठेक्षमालामासज्य सत्येषांविनयःस्मृतइति यानिचमनुवचनानिद्यूतनिषेधपराणि द्यूतंसमाह्वयंचैवयःकुर्यात्कारयीतवा तान्सर्वान्घातयेद्राजाशूद्रांश्चद्विजलिंगि

द्रष्टारोव्यवहाराणांसाक्षिणश्चतएवहि राज्ञासचिन्हंनिर्वास्याःकूटाक्षोपधिदेविनः२०७
द्यूतमेकमुखंकार्यंतस्करज्ञानकारणात् एषएवविधिर्ज्ञेयःप्राणिद्यूतेसमाह्वये २०८

नइत्यादीनितान्यपिकूटाक्षदेवनविषयतयाराजाध्यक्षसभिकसहितद्यूतविषयतयाचयोज्यानि २०७ किंच यत्पूर्वोक्तंद्यूतंतदेकमुखंएकमुखंप्रधानंयस्यद्यूतस्यतत्तथोक्तंकार्यम् राजाध्यक्षाधिष्ठितंराज्ञाकारयितव्यमित्यर्थः तस्करज्ञानकारणात् तस्करज्ञानरूपंप्रयोजनंपर्यालोच्यप्रायशश्चौर्यार्जितधनाएवकितवाभवंत्यतश्चौरविज्ञानार्थमेकमुखंकार्यम् द्यूतधर्मंसमाह्वयेतिदिशन्नाह ग्लहेशतिकवृद्धेरित्यादिनायोद्यूतधर्मउक्तः सएवप्राणिद्यूते मल्लमेषमहिषादिनिर्वर्त्येसमाह्वयसंज्ञकेज्ञातव्यः इतिद्यूतसमाह्वयाख्यंप्रकरणं २०८

इदानींवाक्पारुष्यंप्रस्तूयते तल्लक्षणंचोक्तंनारदेन देशजातिकुलादीनामाक्रोशंन्यंगसंयुतम् यद्वचः प्रतिकूलार्थंवाक्पारुष्यंतदुच्यते देशा
दीनामाक्रोशान्यंगत्वं संयुतम् उच्चैर्भाषणमाक्रोशोन्यंगमवद्यं तदुभययुक्तंयत्प्रतिकूलार्थमुद्वेगजननार्थंवाक्यंतद्वाक्पारुष्यंकथ्यते तत्रकल
हप्रियाः खलुगौडाइतिदेशाक्रोशः नितांतंखलुलोलुपाविप्राइतिजात्याक्रोशः क्रूरचरितानतुवैश्वामित्राइतिकुलाक्षेपः आदिग्रहणात्त्वविद्या
शिल्पादिनिंद्याविद्वच्छिल्पादिपुरुषाक्षेपोगृह्यते तस्यचदंडतारतम्यार्थंनिष्ठुरादिभेदेनत्रैविध्यमभिधायतल्लक्षणंतेनैवोक्तं निष्ठुराश्लीष
तीव्रत्वात्तदपित्रिविधंस्मृतं गौरवानुक्रमात्तस्यदंडोपिस्यात्क्रमाद्गुरुः साक्षेपंनिष्ठुरंज्ञेयमश्लीलंन्यंगसंयुतम् पतनीयैरुपाक्रोशैस्तीव्रमा

सत्यासत्यान्यथास्तोत्रैर्न्यूनांगेंद्रियरोगिणाम् क्षेपंकरोतिचेद्दंड्यःपणानर्द्धत्रयोदशान् २०९

हुर्मनीषिणइति तत्रधिङ्मूर्खंजाल्ममित्यादिसाक्षेपम् अत्रन्यंगमित्यसभ्यम् अवद्यंभगिन्यादिगमनं तद्युक्तमश्लीलं सुरापोसीत्यादिम
हापातकाद्याक्रोशैर्युक्तंवचस्तीव्रम् तत्रनिष्ठुराक्रोशेसवर्णविषयेदंडमाह न्यूनांगाःकरचरणादिविकलाः न्यूनेंद्रियानेत्रश्रोत्रादिरहि
ताः रोगिणोदुश्चर्मप्रभृतयः तेषांसत्येनासत्येनान्यथास्तोत्रेणचनिंदार्थयास्तुत्यायोनेत्रयुगलएवांधइत्युच्यते तत्सत्यम् यत्रपुनश्चक्षु
ष्मानेवांधइत्युच्यतेतदसत्यं यत्रविकृताकृतिरेवदर्शनीयस्त्वमसीतिउच्यतेतदन्यथास्तोत्रं एवंविधैःकार्याक्षेपैर्निर्भर्त्सनंकरोत्यसौअ
र्द्धाधिकत्रयोदशपणान्दंडनीयः काणंवाप्यथवाखंजमन्यंवापितथाविधं तथ्येनापिब्रुवन्दाप्योदंडंकार्षापणावरमितियन्मनुवचनंतदपि

दुर्वृत्तवर्णविषयम्यदापुनःपुत्रादयोजामात्रादीन्शपंतितदाशतंदंडनीयाइतितेनैवोक्तम् मातरंपितरंजायांभ्रातरंश्वशुरंगुरुम् आक्षारयन्शतंदा
प्यःपंथानंचाददद्गुरोरिति एतच्चसापराधेषुमात्रादिषुगुरुषुनिरपराधायांचजायायांद्रष्टव्यम् १ अश्लीलाक्षेपेदंडमाह त्वदीयांभगिनीं
मातरंवा अभिगंतास्मीतिशपंतंराजापंचविंशतिकं पणानांपंचाधिकाविंशतिर्यस्मिन्दंडेसतथोक्तः तंदमंदापयेत् २ १० एवंसमानगुणेषुव
र्णिषुदंडमभिधायविषमगुणेषुदंडंप्रतिपादयितुमाह अधमेष्वाक्षेपापेक्षयान्यूनवृत्तादिगुणेष्वर्धोदंडः पूर्ववाक्येपंचविंशतेःप्रकृतत्वात्तदपे
क्षयार्द्धःसार्द्धद्वादशपणात्मकोद्रष्टव्यः परभार्यासुपुनरविशेषेणद्विगुणःपंचविंशत्यपेक्षयैव पंचाशत्पणात्मकोवेदितव्यः तथोत्तमेषुचस्वापेक्ष

अभिगंतास्मिभगिनींमातरंवातवेतिह शपंतंदापयेद्राजापंचविंशतिकंदमं २१० अर्द्धोधमेषुद्विगुणःपरस्त्रीषूत्तमेषुच दंडप्र
णयनंकार्यंवर्णजात्युत्तराधरैः २११

याधिकश्रुतवृत्तेषुदंडःपंचाशत्पणात्मकएव वर्णानांमूर्द्धावसिक्तादीनांचपरस्पराक्षेपेदंडकल्प
नामाह वर्णाब्राह्मणादयःजातयोमूर्द्धावसिक्ताद्याः वर्णाश्चजातयश्चवर्णजातयःउत्तराश्चअधराश्चउत्तराधराः वर्णजातयश्चतेउत्तराधरा
श्चवर्णजात्युत्तराधराः तैःवर्णजात्युत्तराधरैःपरस्परमाक्षेपेक्रियमाणेदंडस्यप्रणयनंप्रकर्षेणनयनमूहनंवेदितव्यम् तच्चदंडकल्पनमुत्त-
राधरैरितिविशेषोपादानादुत्तराधरभावापेक्षयैवकर्तव्यमित्यवगम्यते यथामूर्द्धावसिक्तंब्राह्मणाद्धीनंक्षत्रियादुत्कृष्टंवाक्रुश्यब्राह्मणःक्ष
त्रियाक्षेपनिमित्तात्पंचाशत्पणदंडात्किंचिदधिकंपंचसप्तत्यात्मकंदंडमर्हति क्षत्रियोपितमाक्रुश्यब्राह्मणाक्षेपनिमित्ताच्छतदंडादूनंपंच

समतिमेवदंडमर्हति मूर्द्धावसिक्तोपितावाक्रुश्यतमेवदंडमर्हति मूर्द्धावसिक्तांबष्ठयोः परस्परासेपेब्राह्मणक्षत्रिययोः परस्पराक्रोशनिमि
त्तकोयथाक्रमेणदंडोवेदितव्यो एवमन्यत्राप्यूहनीयम् ११ एवंसर्ववर्णविषयेदंडमभिधायवर्णानामेवप्रातिलोमानुलोमाक्षेपेदंडमाह
अपवादा अधिक्षेपाः प्रातिलोम्येनापवादास्तेषु ब्राह्मणाक्रोशकारिणोः क्षत्रियवैश्ययोर्यथाक्रमेणपूर्वगास्यात्द्विगुणपदोपात्तपंचाशत्पणा
पेक्षयाद्विगुणाः शतपणास्त्रिगुणाः सार्द्धशतपणाःदंडावेदितव्याः शूद्रस्यब्राह्मणाक्रोशेताडनंजिह्वाछेदनंवाभवति यथाहमनुः
शतंब्राह्मणमाक्रुश्य क्षत्रियोदंडमर्हति वैश्योध्यर्द्धशतंद्वेवाशूद्रस्तुवधमर्हतीति विट्शूद्रयोरपिक्षत्रियादनंतरैकांतयोस्तुल्यन्यायतया

प्रातिलोम्यापवादेषु द्विगुणत्रिगुणादमाः वर्णानामानुलोम्येनतस्मादर्द्धार्द्धहानितः १२

शतमध्यर्द्धशतंचयथाक्रमेणक्षत्रियाक्रोशेवेदितव्यम् शूद्रस्यवैश्याक्रोशेशतं आनुलोम्येनतुवर्णानांक्षत्रियविट्शूद्राणांब्राह्मणेना
क्रोशेकृते तस्माद्ब्राह्मणाक्रोशनिमित्ताच्छतपरिमिताक्षत्रियदंडात्प्रतिवर्णमर्द्धस्यार्द्धस्यहानिंकृत्वावशिष्टपंचाशत्पंचविंशतिसार्द्धद्वाद
शपणात्मकंयथाक्रमंब्राह्मणोदंडनीयः तदुक्तंमनुना पंचाशद्ब्राह्मणोदंड्यः क्षत्रियस्याभिशंसने वैश्यःस्यादर्द्धपंचाशच्छूद्रेद्वाद
शकोदमइति क्षत्रियेणवैश्यशूद्रयोराक्रुष्टेयथाक्रमंपंचाशत्पंचविंशतिकोदमो वैश्यस्यचशूद्राक्रोशेपंचाशदित्यूहनीयम् ब्राह्मणराज १०३
न्यवत्क्षत्रियवैश्ययोरितिगौतमस्मरणात् विट्शूद्रयोरेवमेवस्वजातिंप्रतितत्त्वत इतिमनुस्मरणाच्च १२ ७ ७

---

पुनर्निष्ठुराक्षेपमधिकृत्याह बाह्वादीनांप्रत्येकविनाशे वाचिकेवाचाप्रतिपादिते तवबाहुंछिनद्मीत्येवंरूपेत्रशत्यः शतपरिमितोदंडोवे-
दितव्यः पादनासादिषु आदिग्रहणात्स्फिगादिषु वाचिकेविनाशेतदर्द्धिकः तस्यशतस्यार्द्धंतदर्द्धं तद्यस्यास्त्यसौतदर्द्धिकः पंचाशत्प-
णिकोदंडोवेदितव्यः २१३ किंच यःपुनर्जरादिनाक्षीणशक्तिस्तद्बाह्वाद्यंगभंगंकरोमीत्येवंशपत्यसौदशपणान्दंडनीयः यःपुनःस
मर्थःक्षीणशक्तिंपूर्ववदाक्षिपत्यसौपूर्वोक्तशतादिदंडोत्तरकालं तस्याशक्तस्यक्षेमार्थंप्रतिभुवंदापनीयः १४ तीव्राक्रोशेदंडमाह

बाहुग्रीवानेत्रसक्थिविनाशेवाचिकेदमः शत्यस्तदर्द्धिकःपादनासाकर्णकरादिषु १३ अशक्तस्तुवद
न्नेवंदंडनीयःपणान्दश तथाशक्तःप्रतिभुवंदाप्यःक्षेमायतस्यतु १४ पतनीयकृतेक्षेपेदंडोमध्य
मसाहसः उपपातकयुक्तेतुदाप्यःप्रथमसाहसम् १५ त्रैविद्यनृपदेवानांक्षेपउत्तमसाहसः
मध्यमोजातिपूगानांप्रथमोग्रामदेशयोः १६ पातित्यहेतुभिर्ब्रह्महत्यादिभिर्वर्णिनामाक्षेपेमध्यमसाहसोदंडःउ
पपातकसंयुक्तेपुनर्गोघ्नस्त्वमसीत्येवमादिरूपेक्षेपेप्रथमसाहसंदंडनीयः १५ किंच त्रैविद्यावेदत्रयसंपन्नास्तेषांराज्ञांदेवानांच
क्षेपेउत्तमसाहसोदंडः येपुनर्ब्राह्मणमूर्द्धावसिक्तादिजातीनांपूगाःसंघास्तेषां आक्षेपेमध्यमसाहसोदंडः ग्रामदेशयोःप्रत्येकमा
क्षेपेप्रथमसाहसोदंडोवेदितव्यः इतिवाक्पारुष्यंनामविवादप्रकरणम् १६ ७ ५

दंडपारुष्यंनामसंप्रतिप्रस्तूयते तत्स्वरूपंचनारदेनोक्तम् परगात्रेष्वभिद्रोहोहस्तपादायुधादिभिः भस्मादिभिश्चोपघा-
तोदंडपारुष्यमुच्यतेइति परगात्रेषुस्थावरजंगमात्मकद्रव्येषु हस्तपादायुधैरादिग्रहणाद्ग्रावादिभिर्योभिद्रोहोहिंसनंदुःखो
त्पादनं तथाभस्मनाआदिग्रहणाद्रजःपंकपुरीषाद्यैश्चयउपघातःसंस्पर्शनरूपंमनोदुःखोत्पादनंतदुभयंदंडपारुष्यं दंड्य
तेनेनेतिदंडोहस्तेनयत्पारुष्यंविरुद्धाचरणंजंगमादेर्द्रव्यस्यतद्दंडपारुष्यं तस्यत्ववगूरणादिकरणभेदेनत्रैविध्यमभिधा
यहीनमध्यमोत्तमद्रव्यरूपकर्मत्रैविध्यात् पुनस्त्रैविध्यंतेनैवोक्तम् तस्यापिदृष्टंत्रैविध्यंहीनमध्योत्तमक्रमात् अवगोर-
णनिःसंगपातनक्षतदर्शनैः हीनमध्योत्तमानांतुद्रव्याणांसमतिक्रमात् त्रीण्येवसाहसान्याहुस्तत्रकंटकशोधनइति निः
संगपातनंनिःशंकप्रहरणं त्रीण्येवसाहसानि त्रिप्रकाराण्येवसाहसात्कृतानिदंडपारुष्याणीत्यर्थः तथावाग्दंडपारुष्ययोरु-
भयोरपिद्वयोः प्रवृत्तकलहयोर्मध्येयःक्षमतेतस्यनकेवलंदंडाभावः किंतुपूज्यतएव तथापूर्वंकलहेप्रवृत्तस्यदंडगुरुत्वम्
कलहेच बद्धवैरानुसंधातुरेवदंडभाक्त्वं तथाद्वयोरपराधविशेषापरिज्ञानेदंडःसमः तथाश्वपचादिभिरार्याणामपराधेकृतेस
ज्जनाएवदंडदापनेऽधिकारिणस्तेषामशक्यत्वेतान् राजाघातयेद्धनार्थंगृह्णीयादित्येवंपंचप्रकाराविधयस्तेनैवोक्ताः विधिः
पंचविधस्तूक्तएतयोरुभयोरपि पारुष्येसतिसंरंभादुत्पन्नेक्रुद्धयोर्द्वयोः समान्यतेयःक्षमतेदंडभाग्योतिवर्तते पूर्वमाक्षा १०५
रयेद्यस्तुनियतंस्यात्सदोषभाक् पश्चाद्यःसोप्यसत्कारीपूर्वेतुविनयोगुरुः द्वयोरापन्नयोस्तुल्यमनुबध्नातियःपुनःसतयो

दंडमाप्नोतिपूर्वोवायदिवेतरः पारुष्यदोषावृतयोर्युगपत्संप्रवृत्तयोः विशेषश्चेन्नलक्ष्येतविनयःस्यात्समस्तयोः श्वपाकषंडचंडालव्यंगेषुवध
वृत्तिषु हस्तिपव्रात्यदासेषुगुर्वाचार्यातिगेषुच मर्यादातिक्रमेसद्योघातएवानुशासनम् यमेवह्यतिवर्तेरन्नेतेसंतंजनंनृषु सएवविन
यंकुर्यान्नतद्विनयभाङ्नृपः मलाह्येतेमनुष्याणांधनमेषांमलात्मकम् अतस्तान्घातयेद्राजानार्थदंडेनदंडयेदिति॥१६एवंभूतदंडपारु-
ष्यनिर्णयपूर्वकत्वाद्दंडप्रणयनस्यतत्स्वरूपसंदेहेनिर्णयहेतुमाह. यदाकश्चिद्दहस्यहमनेनहतइतिराज्ञेनिवेदयतितदाचिन्हैर्व
र्णादिस्वरूपगतैर्लिंगैर्युक्त्याकारणप्रयोजनपर्यालोचनात्मिकया आगमेनजनप्रवादेनचशब्दाद्दिव्येनवाकूटचिन्हकृतसंभावनाभया

असाक्षिकहतेचिन्हैर्युक्तिभिश्चागमेनच द्रष्टव्योव्यवहारस्तुकूटचिन्हकृतोभयात् १७भस्मपंकरजस्पर्शेदंडोदशपणःस्मृतः
अमेध्यपार्ष्णिनिष्ठ्यूतस्पर्शनेद्विगुणःस्मृतः१८ समेष्वेवंपरस्त्रीषुद्विगुणस्तूत्तमेषुच हीनेष्वर्द्धदमोमोहमदादिभिरदंडनम् १९

त्परीक्षाकार्या १७ एवंनिश्चितेसाधनविशेषेणदंडविशेषमाह भस्मनापंकेनरेणुनावायःपरंस्पर्शयत्यसौदशपणंदंडंदाप्यः अमेध्यमितिअश्रु-
श्लेष्मनखकेशकर्णविट्दूषिकाभुक्तोच्छिष्टादिकंचगृह्यते पार्ष्णिःपादस्यपश्चिमोभागः निष्ठ्यूतंमुखनिःसारितंजलंतैःस्पर्शनंततःपूर्वाद्दश-
पणात् द्विगुणोविंशतिपणोदंडोवेदितव्यः पुरीषादिस्पर्शनेपुनःकात्यायनेनविशेषउक्तः छर्दिमूत्रपुरीषाद्यैरापाद्यःसचतुर्गुणःषड्गुणःका
यमध्येस्यान्मूर्ध्निलष्टगुणःस्मृतइति आद्यग्रहणाद्वसाशुक्रासृङ्मज्जानोगृह्यंते एवंभूतःपूर्वोक्तोदंडःसर्ववर्णविषयेद्रष्टव्यः परभार्या

त्त्वाविशेषेण तथोत्तमेषुस्वापेक्षया अधिकश्रुतवृत्तेषु पूर्वोक्तादशपणाद्विंशतिपणाच्चदंडाद्विगुणोदंडोवेदितव्यः हीनेषुस्वापेक्षयान्यूनश्रुता दिषु पूर्वोक्तस्यार्द्धदमः पंचपणोदशपणश्चवेदितव्यः मोहश्चित्तवैकल्यं मदोमद्यपानजन्योवस्थाविशेषः आदिग्रहणाद्ग्रहावेशादिकं एतै र्युक्तेन भस्मादिस्पर्शनेकृतेपिदंडोनकर्तव्यः १८ १९ प्रातिलोम्यापराधेदंडमाह ब्राह्मणानांपीडाकरमब्राह्मणस्याक्षत्रियादेर्यदं गं करचरणादिकं तच्छेत्तव्यम् क्षत्रियवैश्ययोरपिपीडांकुर्वतःशूद्रस्यांगच्छेदनमेव येनकेनचिदंगेनावरोहंस्याच्छ्रेयांसमंत्यजः छेत्त व्यंतत्तदेवास्यतन्मनोरनुशासनमिति द्विजातिमात्रस्यापराधेशूद्रस्यांगच्छेदविधानाद्वैश्यस्यापिक्षत्रियापकारिणोयमेवदंडस्तु-

विप्रपीडाकरं छेद्यमंगमब्राह्मणस्यतु उद्गूर्णेप्रथमोदंडःसंस्पर्शेतुतदर्द्धिकः २२०

ल्यन्यायत्वात् उद्गूर्णेवधार्थमुद्यतेशस्त्रादिकेप्रथमसाहसोवेदितव्यः शूद्रस्यपुनरुद्गूर्णेपिहस्तादिच्छेदनमेव पाणिमुद्यम्यदंडं वापाणिच्छेदनमर्हतीति मनुस्मरणात् उद्गोरणार्थशस्त्रादिस्पर्शनेतु तदर्द्धिकः प्रथमसाहसादर्द्धदंडोवेदितव्यः भस्मा दिसंस्पर्शेपुनः क्षत्रियवैश्ययोःप्रातिलोम्यापवादेषुद्विगुणंत्रिगुणोदमइतिवाक्पारुष्यन्यायेनकल्प्यम् शूद्रस्यतत्रापिहस्तच्छेदएव- अवनिष्ठीवतोदर्पाद्द्वावोष्ठौछेदयेन्नृपः अवमूत्रयतोमेढ्रमवशर्द्धयतोगुदमितिमनुस्मरणात् २२० ७ ७ 

एवंप्रातिलोम्यापराधेदंडमभिधायपुनःसजातिमधिकृत्याह हस्तेपादेवाताडनार्थमुद्गूर्णेयथाक्रमंदशपणोविंशतिपणश्चदंडोवेदितव्यः परस्परवधार्थंशस्त्रेउद्गूर्णेसर्वेषांवर्णिनांमध्यमसाहसोदंडः २१ किंच पादकेशवस्त्रकराणामन्यतमंगृहीत्वायउल्लुंचति झटित्याकर्षय ति असौदशपणंदंड्यः पीडाचकर्षश्च अंशुकावेष्टश्च पादाध्यासश्च पीडाकर्षांशुकावेष्टपादाध्यासंतस्मिन्समुच्चितेशतंदंड्यः एतदुक्तं भवति अंशुकेनावेष्ट्यगाढमापीड्याकृष्यचयःपादेनघट्टयतितंशतंपणान्दमयेदिति २२ किंच यःपुनःशोणितंयथानदृश्यतेतथा

उद्गूर्णेहस्तपादेतुदशविंशतिकोदमौ परस्परंतुसर्वेषांशस्त्रेमध्यमसाहसः २१
पादकेशांशुककरोल्लुंचनेषुपणान्दश पीडाकर्षांशुकावेष्टपादाध्यासेशतंदमः २२
शोणितेनविनादुःखंकुर्वन्काष्ठादिभिर्नरः द्वात्रिंशतंपणान्दंड्योद्विगुणंदर्शनेसृजः २३
करपाददतोभंगेछेदनेकर्णनासयोः मध्योदंडोव्रणोद्भेदेमृतकल्पहतेतथा २४

मृदुताडनंकाष्ठलोष्टादि भिःकरोत्यसौद्वात्रिंशतंपणान्दंड्यः यदापुनर्गाढताडनेनलोहितंदृश्यते तदा द्वात्रिंशतोद्विगुणंचतुःषष्टिपणान्दंडनीयः त्वङ्मांसास्थिवि भेदेपुनर्विशेषोमनुना दर्शितः त्वग्भेदकःशतं दंड्योलोहितस्यचदर्शकः मांसभेत्ताचषण्निष्कान्प्रवास्यस्त्वस्थिभेदकइति २३ किंच करपा ददंतस्यप्रत्येकंभंगेकर्णनासस्यचप्रत्येकंछेदनेरूढव्रणस्योद्भेदनेमृतकल्पोयथाभवतितथाहतेताडितेमध्यमसाहसोवेदितव्यः अनुबंधादिना विषयस्यसाम्यमत्रापादनीयम् २४

किंच गमनभोजनभाषणनिरोधेनेत्रस्य आदिग्रहणाज्जिह्वायाश्च प्रतिभेदने कंधराग्रीवा बाहुःप्रसिद्धः सक्थिऊरूस्तेषांप्रत्येकंभंजने मध्यमसाहसोदंडः२५ अपिच यदापुनर्बहवोमीलिता एकस्यांगभंगादिकंकुर्वंति तदायस्मिन्यस्मिन् अपराधे योयोदंडउक्त स्तत्तस्माद्द्विगुणोदंडःप्रत्येकंवेदितव्यः अतिक्रूरत्वात्तेषां प्रातिलोम्यानुलोम्यापराधयोरप्येतस्यैव सवर्णविषयेभिहितस्य दंडजातस्यवाक्पारुष्योक्तक्रमेणहानिंवृद्धिंचकल्पयेत् वाक्पारुष्येयएवोक्तःप्रातिलोम्यानुलोमतः स एवदंडपारुष्ये दाप्योराज्ञायथाक्रममितिस्मरणात्

चेष्टाभोजनवाग्रोधेनेत्रादिप्रतिभेदने कंधराबाहुसक्थ्नांचभंगेमध्यमसाहसः २५ एकंघ्नतांबहूनांचयथोक्ताद्द्विगुणोदमः कलहापहृतंदेयं दंडश्चद्विगुणस्ततः २६ दुःखमुत्पादयेद्यस्तुससमुत्थानजंव्ययम् दाप्योदंडंचयोयस्मिन्कलहेसमुदाहृतः२७ अभिघातेतथाछेदेभेदेकुड्यावपातने पणान्दाप्यः पंचदशविंशतिंतद्व्ययंतथा २८

तु कलहेवर्तमानेयद्येनापहृतंतत्तेनप्रत्यर्पणीयं अपहृतद्रव्याद्द्विगुणश्चापहारनिमित्तोदंडोदेयः २६ योयस्यताडनाद्दुःखमुत्पादयेत्सतस्यव्रणरोपणादौ औषधार्थंपथ्यार्थंचयोव्ययःक्रियतेतंदद्यात् समुत्थानंव्रणरोपणं यस्मिन्कलहेयोदंडस्तंचदद्यान्नसमुत्थानजव्ययमात्रं २७ परगात्राभिद्रोहेदंडमुक्त्वानंतरंबहिरंगार्थनाशेदंडमाह मुद्गरादिनाकुड्यस्याभिघातेविदारणेद्विधाकरणेचयथाक्रमंपंचपणोदशपणोविंशतिपणश्चदंडोवेदितव्यः अवपातनेपुनःकुड्यस्यैतेत्रयोदंडाःसमन्विताग्राह्याःपुनःसंपादनार्थंचधनंस्वामिनेदद्यात् २८ १०६

अपिच परगृहेदुःखजनकंकंटकादिद्रव्यंक्षिपन् षोडशपणान्दंड्यः प्राणहरणंपुनर्विषभुजंगादिकंप्रक्षिपन् मध्यमसाहसंदंड्यः २९ पश्वभिद्रोहेदंडमाह क्षुद्राणांपशूनांअजाविहरिणप्रायाणांताडनेदुःखोत्पादने असृक्स्रावणेशाखांगच्छेदने शाखाशब्देनचात्रप्राणसंचाररहितंशृंगादिकंलक्ष्यते अंगानिकरचरणप्रभृतीनि शाखाचांगंचशाखांगं तस्यछेदनेद्विपणप्रभृतिर्दंडः द्वौपणौयस्यदंडस्य सद्विपणः द्विपणःप्रभृतिरादिर्यस्यदंडगणस्यासौद्विपणप्रभृतिः सचदंडगणोद्विपणश्चतुःपणःषट्पणोष्टपणइत्येवंरूपोनपुनर्द्विपणस्त्रिपणश्चतुष्पणःपंचपणइति कथमितिचेदुच्यते अपराधपरत्वात्तावत्प्रथमदंडादुत्तरमुपरितनदंडत्रयमवगम्यते तत्रचाश्रुतत्रित्वादिसंख्याश्रयणाद्वरंश्रुतद्विसंख्यायाएवाभ्यासाश्रयणेन गुरुत्वसंपादनमितिनिरवद्यम् ३० किंच तेषांक्षुद्रपशूनांलिंगच्छेदनेमरणेच मध्यमसाहसोदंडः स्वामिनेचमूल्यंदद्यात् महापशूनांपुनर्गोगजवाजिप्रभृतीनामेतेषुस्थानेषुताडनलोहितस्रावणादिनिमित्तेषुपूर्वोक्ताद्दंडाद्द्विगुणोदंडोवेदितव्यः २३१

दुःखोत्पादिगृहेद्रव्यंक्षिपन्प्राणहरंतथा षोडशाद्यःपणान्दाप्योद्वितीयोमध्यमंदमम् २९ दुःखेचशोणितोत्पादेशाखांगच्छेदनेतथा दंडःक्षुद्रपशूनांतुद्विपणप्रभृतिक्रमात् २३० लिंगस्यछेदनेमृत्यौमध्यमोमूल्यमेवच महापशूनामेतेषुस्थानेषुद्विगुणोदमः २३१

स्थावराभिद्रोहे दंडमाह प्ररोहा अंकुरास्तद्वत्यः शाखाः प्ररोहिण्यः याश्छिन्नाः पुनरुप्ताः प्रतिकांडं प्ररोहंति ताः शाखा येषां वटादीनां ते प्ररोहिशाखिनः तेषां शाखाछेदने यतो मूलशाखा निर्गच्छति स स्कंधस्तस्य छेदने समूलवृक्षछेदने च यथाक्रमं विंशतिपणान् दंडादारभ्य पूर्वस्मादुत्तरोत्तरदंडो द्विगुणः एतदुक्तं भवति विंशतिपणश्चत्वारिंशत्पणो शीतिपण इत्येवं त्रयो दंडा यथाक्रमं शाखाछेदनादिष्वपराधेषु भवंतीति अप्ररोहिशाखिनामप्युपजीव्यद्रुमाणामाम्रादीनां पूर्वोक्तेषु स्थानेषु पूर्वोक्ता एव दंडाः अनुपजीव्याप्ररोहिशाखिषु पुनर्वृक्षेषु कल्प्यम् ३२ वृक्षविशेषान्प्रत्याह चैत्यादिषु जातानां वृक्षाणां शाखाच्छेदनादिषु पूर्वोक्ता दंडा द्विगुणः वि

प्ररोहिशाखिनां शाखास्कंधसर्वविदारणे उपजीव्यद्रुमाणां च विंशतेर्द्विगुणो दमः ३२ चैत्यश्मशानसीमासु पुण्यस्थाने सुरालये जातद्रुमाणां द्विगुणो दमो वृक्षेषु विश्रुते ३३ गुल्मगुच्छक्षुपलताप्रतानौषधिवीरुधां पूर्वस्मृतादर्द्धदंडः स्थानेषूक्तेषु कर्तने ३४

श्रुते च पिप्पलपलाशादिके द्विगुणो दंडः ३३ गुल्मादीन्प्रत्याह गुल्मा अनतिदीर्घनिबिडलता मालत्यादयः गुच्छा अवल्लीरूपा असरलप्रायाः कुरंटकादयः क्षुपाः करवीरादयः सरलप्रायाः लता दीर्घयायिन्यो द्राक्षातिमुक्तप्रभृतयः प्रतानाः कांडप्ररोहरहिताः सरलयायिन्यः सारिवाप्रभृतयः औषध्यः फलपाकावसानाः शालिप्रभृतयः वीरुधः छिन्ना अपि या विविधं प्ररोहंति गुडूचीप्रभृतयः एतेषां पूर्वोक्तेषु स्थानेषु विकर्तने च्छेदने पूर्वोक्ताद्दंडादर्द्धदंडो वेदितव्यः इति दंडपारुष्यप्र॰ ३४ १०७

संप्रति साहसं नाम विवादपदं व्याचिख्यासुस्तल्लक्षणं तावदाह सामान्यस्य साधारणस्य यथेष्टविनियोगानर्हत्वाविशेषेण परकीयस्य वा द्रव्यस्यापहरणं साहसं कुतः प्रसभहरणात् प्रसह्य हरणाद्बलावष्टंभेन हरणादिति यावत् एतदुक्तं भवति राजदंडं जनाक्रोशं चोल्लंघ्य राजपुरुषेतरजनसमक्षं यत्किंचिन्मारणपरदारप्रकर्षणादिकं क्रियते तत्सर्वं साहसमिति साहसलक्षणम् अतः साधारणधनपरधनयोर्हरणस्यापि बलावष्टंभेन क्रियमाणत्वात्साहसत्वमिति नारदेनापि साहसस्य स्वरूपं विवृतम् सहसा क्रियते कर्म यत्किंचिद्बलदर्पितैः तत्साहसमिति प्रोक्तं सहो बलमिहोच्यते इति तदिदं साहसं चौर्यवाग्दंडपारुष्यस्त्रीसंग्रहणेषु व्यासक्तमपि बलदर्पावष्टंभोपाधितो-

सामान्यद्रव्यप्रसभहरणात्साहसं स्मृतम्

भिद्यते इति दंडातिरेकार्थं पृथगभिधानम् तस्य च दंडवैचित्र्यप्रतिपादनार्थं प्रथमादिभेदेन त्रैविध्यमभिधाय तल्लक्षणं तेनैव विवृतम् तत्पुनस्त्रिविधं ज्ञेयं प्रथमं मध्यमं तथा उत्तमं चेति शास्त्रेषु तस्योक्तं लक्षणं पृथक् फलमूलोदकादीनां क्षेत्रोपकरणस्य च भंगाक्षेपोपमर्दाद्यैः प्रथमं साहसं स्मृतम् वासःपश्वन्नपानानां गृहोपकरणस्य च एतेनैव प्रकारेण मध्यमं साहसं स्मृतम् व्यापादो विषशस्त्राद्यैः परदाराभिमर्शनम् प्राणोपरोधि यच्चान्यदुक्तमुत्तमसाहसम् तस्य दंडः क्रियापेक्षः प्रथमस्य शतावरः मध्यमस्य तु शास्त्र

 

ष्टो दंडः पंचशतावरः उत्तमे साहसे दंडः सहस्रावर इष्यते वधः सर्वस्वहरणं पुरान्निर्वासनांकने तदंगच्छेद इत्युक्तो दंड उत्तम साहसे इति वधादयश्चापराधतारतम्यादुत्तमसाहसे समस्ता व्यस्ता वा योज्याः तत्र परद्रव्यापहरणरूपे साहसे दंडमाह त स्यापहृतद्रव्यस्य मूल्यात् द्विगुणो दंडः यः पुनः साहसं कृत्वा नाहमकार्षमिति निह्नुते तस्य मूल्याच्चतुर्गुणो दंडो भवति एतस्मादेव विशेषदंडविधानात्प्रथमसाहसादिसामान्यदंडविधानमपहारव्यतिरिक्तविषयं गम्यते ३५ साहसस्य प्रयोजयितारं प्रत्याह

तन्मूल्याद्विगुणो दंडो निन्हवे तु चतुर्गुणः ३५ यः साहसं कारयति स दाप्यो द्विगुणं दमम् यश्चैवमुक्त्वाहं दाता कारये त्सचतुर्गुणम् ३६ अर्घ्याक्रोशातिक्रमकृद्भ्रातृभार्याप्रहारदः संदिष्टस्याप्रदाता च समुद्रगृहभेदकृत् ३७ सा मंतकुलिकादीनामपकारस्य कारकः पंचाशत्पणिको दंड एषामिति विनिश्चयः ३८ यस्तु साहसं कुर्वित्येवमुक्त्वा कारय

त्यसौ साहसिकदंडात् द्विगुणं दंडं दाप्यः यः पुनरहं तुभ्यं धनं दास्यामि त्वं कुर्वित्येवमुक्त्वा साहसं कारयति स चतुर्गुणं दंडं दाप्योनुबंधातिशया त् ३६ साहसिकविशेषं प्रत्याह अर्घ्यस्यार्घ्यार्हस्याचार्यादेराक्षेपमाज्ञातिक्रमं च यः करोति यश्च भ्रातृभार्यां ताडयति तथा संदिष्टस्य प्रति श्रुतस्यार्थस्याप्रदाता यश्च मुद्रितं गृहमुद्घाटयति तथा स्वगृहक्षेत्रादिसंसक्तगृहक्षेत्रादिस्वामिनां कुलिकानां स्वकुलोद्भवानां आदिग्रहणात् स्वग्राम्यस्वदेशीयानां च योपकर्ता ते सर्वे पंचाशत्पणपरिमितेन दंडेन दंडनीयाः ३७ ३८ ७ ७ १०८

किंच नियोगं विना यः स्वेच्छया विधवां गच्छति चौरादिभयाकुलैर्विक्रुष्टे यः शक्तोपि नाभिधावति यश्च वृथाक्रोशं करोति यश्चंडालो ब्रा ह्मणादीन्स्पृशति यश्च शूद्रप्रव्रजितान् दिगंबरादीन् दैवे पित्र्ये च कर्मणि भोजयति यश्चायुक्तं मातरं ग्रहीष्यामीत्येवं शपथं करोति त- था अयोग्य एव शूद्रादिर्योग्यकर्माध्ययनादि करोति वृषो बलीवर्दः क्षुद्रपशवो जादयस्तेषां पुंस्त्वस्य प्रजननशक्तेर्विनाशकः वृक्षक्षु द्रपशूनामिति पाठे हिंग्वाद्यौषधप्रयोगेण वृक्षादेः फलप्रसूनानां पातयिता साधारणमपलपति साधारणद्रव्यस्य वंचकः दासीगर्भ-

स्वच्छंदविधवागामी विक्रुष्टे नाभिधावकः अकारणे च विक्रोष्टा चंडालश्चोत्तमान् स्पृशेत् ३९ शूद्रप्रव्रजितानां च दैवे पित्र्ये च भोजकः अयुक्तं शपथं कुर्वन्नयोग्यो योग्यकर्मकृत् ४० वृषक्षुद्रपशूनां च पुंस्त्वस्य प्रतिघातकृ त् साधारणस्यापलापी दासीगर्भविनाशकृत् ४१ पितापुत्रस्वसृभ्रातृदंपत्याचार्यशिष्यकाः एषामपतितान्यो न्यत्यागी च शतदंडभाक् ४२ वसानस्त्रीन्पणान् दंड्यो नेजकस्तु परांशुकम् विक्रयावक्रयाधानयाचितेषु पणान्दश ४३

स्य पातयिता च येच पित्रादयो पतिता एव संतोन्योन्यं त्यजंति ते सर्वे प्रत्येकं पणशतं दंडार्हा भवंति इति साहसप्रकरणं ३९ ४० ४१ ४२ साहसप्रसंगात्तत्सदृशापराधेषु नेजकादीनां दंडमाह नेजको वस्त्रस्य धावकः स यदि निर्णेजनार्थं समर्पितानि वासांसि स्वयमाच्छा दयति तदासौ पणत्रयं दंड्यः यः पुनस्तानि विक्रीणीते अवक्रयं वा एतावत्कालमुपभोगार्थं वस्त्रं दीयते मह्यमेतावद्धनं देयमित्येवं

भाटकेन योददाति आधित्वंवानयति स्वसुहृद्भ्यो याचितंवाददात्यसौ प्रत्यपराधेदशपणान्दंडनीयः नानिर्णिक्तवस्त्राणि श्लक्ष्णशाल्म-
लीफलकेक्षालनीयानि नपाषाणे नचव्यत्यसनीयानि नचस्वगृहेवासयितव्यानि इतरथादंडः शाल्मलेफलकेश्लक्ष्णेनिज्याद्वासां-
सिनेजकः नचवासांसिवासोभिर्निर्हरेन्नचवासयेदितिमनुस्मरणात् यदापुनस्तानिप्रमादान्नाशयति तदानारदेनोक्तंद्रष्टव्यम् मू-
ल्याष्टभागोहीयेतसकृद्धौतस्यवाससः द्विःपादस्त्रिस्तृतीयांशश्चतुर्द्धौतेर्द्धमेवच अर्द्धक्षयात्तुपरतःपादांशापचयःक्रमात्-
यावत्क्षीणदशंजीर्णेजीर्णस्यानियमःक्षयइति अष्टपणक्रीतस्यसकृद्धौतस्य वस्त्रस्यनाशितस्याष्टमभागोनपणंमूल्यंदेयम्

पितापुत्रविरोधेतुसाक्षिणांत्रिपणोदमः अंतरेचतयोर्यःस्यात्तस्याप्यष्टगुणोदमः ४४

द्विर्द्धौतस्यतुपादोनं त्रिर्द्धौतस्यपुनस्तृतीयांशन्यूनम् चतुर्द्धौतस्यार्द्धपणचतुष्टयंदेयम् ततःपरंप्रतिनिर्णेजनमवशिष्टंमूल्यंपादाद्य-
पचयेनदेयं यावज्जीर्णं जीर्णस्यपुनर्नाशितस्येच्छातोमूल्यदानकल्पनम् ४३ पितापुत्रयोःकलहेयःसाक्ष्यमंगीकरोति नपुनः
कलहंनिवारयति असौपणत्रयंदंड्यः यश्चतयोःसपणविवादेतद्दानेप्रतिभूर्भवत्यसौ चकारात्तयोर्यःकलहंवर्द्धयतिसोपित्रिपणा १०१
दष्टगुणंचतुर्विंशतिपणान्दंडनीयः दंपत्यादिष्वयमेवदंडोनुसरणीयः ४४ ५ ५ ५

तुलातोलनदंडः शासनंपूर्वोक्तं मानंप्रस्थद्रोणादि नाणकंमुद्रादिचिन्हितंद्रम्मनिष्कादि एतेषांयःकूटकृत् देशप्रसिद्धपरिमाणा-
दन्यथान्यूनत्वमाधिक्यंवाद्रम्मादेरव्यवहारिकमुद्रात्वंवाताम्रादिगर्भत्वंवाकरोति यश्चतैःकूटैर्जानन्नपिव्यवहरतितावुभौप्रत्ये-
कमुत्तमसाहसंदंडनीयौ ४५ नाणकपरीक्षिणंप्रत्याह यःपुनर्नाणकपरीक्षीताम्रादिगर्भंभेवद्रम्मादिकंसम्यगितिब्रूते स-
म्यंचंवाकूटकमिति असावुत्तमसाहसंदंड्यः ४६ चिकित्सकंप्रत्याह यःपुनर्भिषङ्मिथ्याआयुर्वेदानभिज्ञएवजीवनार्थीचिकि-

तुलाशासनमानानांकूटकृन्नाणकस्यच एभिश्चव्यवहर्तायःसदाप्योदममुत्तमम् ४५ अकूटंकूट
कंब्रूते कूटंयश्चाप्यकूटकम् सनाणकपरीक्षीतुदाप्यउत्तमसाहसम् ४६ भिषङ्मिथ्याचरन्दंड्य-
स्तिर्यक्षुप्रथमंदमम् मानुषेमध्यमंराजपुरुषेषूत्तमंदमम् ४७ अबध्यंयश्चबध्नातिबद्धंयश्चप्रमुंचति
अप्राप्तव्यवहारंचसदाप्योदममुत्तमम् ४८

त्सितज्ज्ञोहमितितिर्यङ्मनुष्यराजपुरुषेषुचिकित्सामाचरत्यसौयथा-
क्रमेणप्रथममध्यमोत्तमसाहसान्दंडनीयः तत्रापितिर्यगादिषुमूल्यविशेषेणराजप्रत्यासत्तिविशेषेणदंडस्यलघुगुरुभावः
कल्पनीयः ४७ यःपुनर्बंधनानर्हमनपराधिनंराजाज्ञयाविनाबध्नाति यश्चबद्धंव्यवहारार्थमाहूतं अनिर्वृत्तव्यवहारंचोत्सृ-
जत्यसौउत्तमसाहसंदाप्यः ४८ ५ ५ ५ ५ ५

यः पुनर्वणिक् व्रीहिकार्पासादेः पण्यस्याष्टममंशं कूटमानेन कूटतुलया अन्यथा वा परिहरति असौ पणानां द्विशतं दंडनीयः अ
पहृतस्य द्रव्यस्य पुनर्वृद्धौ हानौ च दंडस्यापि वृद्धिहानी कल्प्ये ४९ भेषजमौषधद्रव्यं स्नेहो घृतादिः गंधद्रव्यमुशीरादि आदि
शब्दाद्धिंगुमरीचादि एतेषु सारं द्रव्यं विक्रयार्थं मिश्रयतः षोडशपणो दंडः ५० किंच न विद्यते बहुमूल्या जातिर्यस्मिन्मृच्चर्मा-
दिके तदजाति तस्मिन् जातिकरणे विक्रयार्थं गंधवर्णरसांतरसंचारणेन बहुमूल्यजातीयसादृश्यसंपादनेन यथा मल्लिकामोदसंचा

मानेन तुलया वापि योंशमष्टमकं हरेत् दंडं स दाप्यो द्विशतं वृद्धौ हानौ च कल्पितम् ४९
भेषजस्नेहलवणगंधधान्यगुडादिषु पण्येषु प्रक्षिपन् हीनं पणान्दाप्यस्तु षोडश ५०
मृच्चर्ममणिसूत्रायः काष्ठवल्कलवाससाम् अजातौ जातिकरणे विक्रेयाष्टगुणो दमः ५१

रेण मृत्तिकायां सुगंधामलकमिति मार्जारचर्मणि वर्णोत्कर्षापादनेन व्याघ्रचर्मेति स्फटिकमणौ वर्णांतरकरणेन पद्मराग इति कार्पासिके सूत्रे
गुणोत्कर्षाधानेन पट्टसूत्रमिति कालायसे वर्णोत्कर्षाधानेन रजतमिति बिल्वकाष्ठे चंदनामोदसंचारणेन चंदनमिति कंकोलेलत्वगाख्यं लवंगमि ११०
ति कार्पासिके वाससि गुणोत्कर्षाधानेन कौशेयमिति विक्रेयस्यापादितसादृश्यमृच्चर्मादेः पण्यस्याष्टगुणो दंडो वेदितव्यः ५१ ७

सुद्रः पिधानं मुद्रेन सह वर्तत इति समुद्रं करंडकं परिवर्तनं व्यत्यासः योन्यदेव मुक्तानां पूर्णकरंडकं दर्शयित्वा हस्तलाघवेनान्यदेव स्फटिका
नां पूर्णकरंडकं समर्पयति यश्च सारभांडं कस्तूरिकादिकं कृत्रिमं कृत्वा विक्रयमाधिं वा नयति तस्य दंडकल्पना वक्ष्यमाणा वेदितव्या कृत्रि
मकस्तूरिकादेर्मूल्यभूते पणभिन्ने न्यूनेन्यूनपण इति यावत् यस्मिन् कृत्रिमे विक्रीते पंचाशत्पणो दंडः पणमूल्ये पुनः शतम् द्विपणमूल्ये
द्विशतो दंड इत्येवं मूल्यवृद्धौ दंडवृद्धिरून्नेया ५२ ५३ वणिजः प्रत्याह राजनिरूपितार्घस्य न्हासं वृद्धिं वा जानंतोपि वणिजः संभूय मि

समुद्रपरिवर्तं च सारभांडं च कृत्रिमम् आधानं विक्रयं वापि नयतो दंडकल्पना ५२ भिन्ने पणे तु पंचाशत्पणे तु शतमुच्यते द्विप
णो द्विशतो दंडो मूल्यवृद्धौ च वृद्धिमान् ५३ संभूय कुर्वतामर्घं सबाधं कारुशिल्पिनाम् अर्घस्य न्हासं वृद्धिं वा जानतो दम उत्तमः ५४
संभूय वणिजां पण्यमनर्घेणोपरुंधताम् विक्रीणतां वा विहितो दंड उत्तमसाहसः ५५ राजनि स्थाप्यते योर्घः प्रत्यहं तेन विक्रयः
क्रयो वा निस्रवस्तस्माद्वणिजां लाभकृत्स्मृतः ५६ लित्वा कारूणां रजकादीनां शिल्पिनां चित्रकारादीनां सबाधं पीडाकरमर्घांतरं लाभलोभा
त्कुर्वंतः पणसहस्रं दंडनीयाः ५४ किंच ये पुनर्वणिजो मिलित्वा देशांतरादागतं पण्यमनर्घेण हीनमूल्येन प्रार्थयमाना उपरुंधंति महार्घेण वा विक्री
णंते तेषामुत्तमसाहसो दंडो विहितो मन्वादिभिः ५५ केन पुनरर्घेण पणितव्यमित्यत आह राजनि संनिहिते सति यस्तेनार्घः स्थाप्यते निरूप्यते
तेनार्घेण प्रतिदिनं क्रयो विक्रयो वा कार्यः निर्गतः स्रवो निःस्रवो विशेषस्तस्माद्राजनिरूपितार्घाद्यो निःस्रवः स एव वणिजां लाभकारी न पुनः स्वच्छंदपरि

र्घस्थितान् मनुनाचार्घकरणेविशेषोदर्शितः पंचरात्रेपंचरात्रेपक्षेमासेनथागते कुर्वीतचैषांप्रत्यक्षमर्घसंस्थापनंनृपइति ५६ किंच स्वदेश
प्राप्तपण्येगृहीत्वायोविक्रीणीते असौपंचकंशतंपणशतेपणपंचकंलाभंगृह्णीयात् परदेशात्प्राप्तेपुनःपण्येशतपणमूल्येदशपणान्लाभंगृह्णी
यात् यस्यपण्यस्यग्रहणदिवसएवविक्रयःसंपद्यते यःपुनःकालांतरेविक्रीणीते तस्यकालोत्कर्षवशाल्लाभोत्कर्षःकल्प्यः एवंचयथार्घेनि-
रूपितेपणशतेपंचपणोलाभोभवति तथैवार्घोराज्ञास्वदेशपण्यविषयेस्थापनीयः ५७ पारदेश्यपण्यार्घनिरूपणप्रकारमाह देशांत
रादागतेपण्येदेशांतरागमनप्रत्यागमनभांडग्रहणशुल्कादिस्थानेषु यावानुपयुक्तोर्थस्तावंतमर्थंपरिगणय्य पण्यमूल्येनसहमेलयित्वा

स्वदेशपण्येतुशतंवणिग्गृह्णीतपंचकम् दशकंपारदेश्येतुयःसद्यःक्रयविक्रयी ५७
पण्यस्योपरिसंस्थाप्यव्ययंपण्यसमुद्भवम् अर्घोनुग्रहकृत्कार्यःक्रेतुर्विक्रेतुरेवच ५८

यथापणशतेदशपणोलाभःसंपद्यते तथाक्रेतृविक्रेत्रोरनुग्रहकार्यर्घोराज्ञास्थापनीयः ५८ प्रासंगिकंपरिसमाप्याधुनाविक्रीयासंप्र
दानंप्रक्रमते तत्स्वरूपंचनारदेनाभिहितम् विक्रीयपण्यंमूल्येनक्रेतुर्यन्नप्रदीयते विक्रीयासंप्रदानंतद्विवादपदमुच्यतेइति तत्र
विक्रेयद्रव्यस्यचराचरभेदेनद्वैविध्यमभिधायपुनःषड्विधत्वंतेनैवप्रत्यपादि लोकेस्मिन्द्विविधंपण्यंजंगमंस्थावरंतथा षड्विधस्तस्यतु १११
बुधैर्दानादानविधिक्रमः गणितंतुलितंमेयंक्रिययारूपतःश्रियेति गणितंक्रमुकफलादि तुलितंकनककस्तूरीकुंकुमादि मेयंशाल्यादि

क्रियया वाहदोहादिरूपयोपलक्षितमश्वमहिष्यादि रूपतः पण्यांगनादि श्रियादीप्त्यामरकतपद्मरागादीति एतत्षड्प्रकारकमपिपण्यंवि
क्रीयासंप्रयच्छतोदंडमाह गृहीतंमूल्यंयस्यपण्यस्यविक्रेत्रा तद्गृहीतमूल्यंतद्यदिविक्रेता प्रार्थयमानायस्वदेशवणिजेक्रेत्रेनसमर्पयति
तच्चपण्यंयदिक्रयकालेबहुमूल्यंसत्कालांतरेल्पमूल्येनैवलभ्यते तदार्घह्रासकृतोयउदयोवृद्धिः पण्यस्यस्थावरजंगमात्मकस्यतेनसहि
तंपण्यंविक्रेताक्रेत्रेदापनीयः यदामूल्यह्रासकृतःपण्यस्योदयोनास्ति किंतुक्रयकालेयावदेवेयतोमूल्यस्येयत्पण्यमितिप्रतिपन्नंता
वदेवतदातत्पण्यमादायतस्मिन्देशेविक्रीणानस्ययोलाभस्तेनोदयेनसहितंद्विकंत्रिकमित्यादिप्रतिपादितवृद्धिरूपोदयेनवासहितंक्रेतुर्वा-

गृहीतमूल्यंयःपण्यंक्रेतुर्नैवप्रयच्छति सोदयंतस्यदाप्योसौदिग्लाभंवादिगागते ५९

च्छावशाद्दापनीयः यथाहनारदः अर्घश्चेदवहीयेत सोदयंपण्यमावहेत् स्थानिनामेषनियमोदिग्लाभंदिग्विचारिणामिति यदा
त्वर्घमहत्त्वेनपण्यस्यन्यूनभावस्तदातस्मिन्पण्येवस्त्रादिकेच यउपभोगस्तदाच्छादनमुखनिवसनादिरूपोविक्रेतुस्तत्सहितंपण्य
मसौदाप्यः यथाहनारदः विक्रीयपण्यंमूल्येनयःक्रेतुर्नप्रयच्छति स्थावरस्यक्षयंदाप्योजंगमस्यक्रियाफलमिति विक्रेतुरुप
भोगःक्षयउच्यते क्रेतृसंबंधित्वेनक्षीयमाणत्वात् नपुनःकुड्यपातभस्मघातादिरूपः तस्यतु उपहन्येतवापण्यंदह्येतापह्रियेतवा विक्रेतुरेवसोनर्थोविक्रीयासंप्रयच्छतइत्यत्रोक्तत्वात् यदात्वसौक्रेतादेशांतरात्पण्यग्रहणार्थमागतस्तदातत्पण्यमादा

यद्देशांतरेविक्रीणानस्ययोलाभस्तेनसहितंपण्यंविक्रेताक्रेत्रेदापयितव्यः अयंचक्रीतपण्यसमर्पणनियमोनुशयाभावेद्रष्टव्यः स
तिखल्वनुशयेक्रीत्वाविक्रीयवाकिंचिदित्यादिमनूक्तंवेदितव्यम् ५९ किंच यदापुनर्जातानुशयःक्रेतापण्यंनजिघृक्षतितदाविक्रीत
मपिपण्यमन्यत्रविक्रेयम् यदापुनर्विक्रेत्रादीयमानंक्रेतानगृह्णातितच्चपण्यंराजदैविकेनोपहत तदाक्रेतुरेवासौहानिर्भवेत् प
ण्याग्रहणरूपेणक्रेतृदोषेणनाशितत्वात् २६० अपिच यदापुनःक्रेत्राप्रार्थ्यमानमपिपण्यंविक्रेतानसमर्पयति अजातानुशयोपितच्च
राजदैविकेनोपहतंभवति तदासौहानिर्विक्रेतुरेव अतोन्यद्दुष्टंपण्यंविनष्टसदृशंक्रेत्रेदेयं ६१ किंच यःपुनर्विनैवानुशयमेकस्यहस्तेविक्री

**विक्रीतमपिविक्रेयंपूर्वक्रेतर्यगृह्णति हानिश्चेत्क्रेतृदोषेणक्रेतुरेवहिसाभवेत् २६० राजदैवोपघातेनपण्येदोषमुपागते**
**हानिर्विक्रेतुरेवासौयाचितस्याप्रयच्छतः ६१ अन्यहस्तेचविक्रीतंदुष्टंवादुष्टवद्यदि विक्रीणीतेदमस्तत्रमूल्यात्तुद्विगुणोभ**
**वेत् ६२** तंपुनरन्यस्यहस्तेविक्रीणीते सदोषंवापण्यंप्रच्छादितदोषंविक्रीणीतेतदा तत्पण्यमूल्याद्द्विगुणोदमोदेतव्यः नारदेनाप्यत्रवि
शेषोदर्शितः अन्यहस्तेचविक्रीययोन्यस्मैतुप्रयच्छति द्रव्यंतद्द्विगुणोदाप्योविनयस्तावदेवतु निर्दोषंदर्शयित्वातुसदोषंयःप्रयच्छति स
मूल्याद्द्विगुणंदाप्योविनयंतावदेवत्विति सर्वश्चायंविधिर्दत्तमूल्येपण्येद्रष्टव्यः अदत्तमूल्येपुनःपण्येवाङ्मात्रक्रयेक्रेतृविक्रेत्रोर्नियमकारि ११२
णःसमयाद्दृतेप्रवृत्तौनिवृत्तौवानकश्चिद्दोषः यथाहनारदः दत्तमूल्यस्यपण्यस्यविधिरेषप्रकीर्तितः अदत्तेन्यत्रसमयान्नविक्रेतुरविक्रयइति
६२

विक्रयानुशयोभिहितः क्रीतानुशयस्वरूपंतुप्राक्प्रपंचितं अधुनातदुभयसाधारणंधर्ममाह परीक्षितक्रीतपण्यानांक्रयोत्तरकालंक्रयकालपरिम
णतोर्घहृतात्वृद्धिमपश्यताक्रेत्रानुशयोनकार्यः विक्रेत्राचमहार्घनिबंधनंपण्यक्षयमपश्यतानानुशयितव्यम् वृद्धिक्षयपरिज्ञानेपुनःक्रेतृ
विक्रेत्रोरनुशयोभवतीतिव्यतिरेकादुक्तंभवति अनुशयकालावधिस्तुनारदेनोक्तः क्रीत्वामूल्येनयत्पण्यंदुष्क्रीतंमन्यतेक्रयी विक्रेतुःप्र
तिदेयंतत्तस्मिन्नेवाह्न्यविक्षतम् द्वितीयेह्निददत्क्रेतामूल्यात्त्रिंशांशमावहेत् द्विगुणंतुतृतीयेह्निपरतःक्रेतुरेवतदिति अपरीक्षि
तक्रयविक्रयेपुनःपण्यवैगुण्यनिबंधनानुशयावधिर्दशैकपंचसप्ताहेत्यादिनादर्शितएव तदनयावाचोयुक्त्यावृद्धिक्षयपरिज्ञान

**क्षयंवृद्धिंचवणिजापण्यानामविजानता क्रीत्वानानुशयःकार्यःकुर्वन्षड्भागदंडभाक् ६३**

स्यानुशयकारणत्वमवगम्यते तथापण्यपरीक्षाविधिबलात्पण्यदोषाणामनुशयकारणत्वं अतःपण्यदोषतद्वृद्धिक्षयकारणत्रितया
भावेनुशयकालाभ्यंतरेपि यद्यनुशयंकरोतितदापण्यषड्भागंदंडनीयः अनुशयकारणसद्भावेप्यनुशयकालातिक्रमेणानुशयंकुर्व
तोयमेवदंडः उपभोगेनविनश्वरेषुस्थिरार्घेष्वनुशयकालातिक्रमेणानुशयंकुर्वतोमनूक्तोदंडोद्रष्टव्यः परेणतुदशाहस्यनदद्या-
न्नापिदापयेत् आददानोददच्चैवराज्ञादंड्यःशतानिषडिति इतिविक्रीयासंप्रदानंनामप्रकरणम् ६३ ७

संभूयसमुत्थानंनामविवादपदमिदानीमभिधीयते सर्वेवयमिदंकर्ममिलिताःकुर्मइत्येवंरूपासंप्रतिपत्तिःसमवायः तेनयेव-
णिङ्नटनर्तकप्रभृतयोलाभलिप्सवःप्रातिस्विकंकर्मकुर्वतेतेषांलाभालाभावुपचयापचयौ यथाद्रव्यंयेनयावद्धनंपण्यग्रहणार्थं
दत्तंतदनुसारेणावसेयौ यद्वा प्रधानगुणभावपर्यालोचनयास्यभागद्वयमस्यैकोभागइत्येवंरूपयासंविदासमयेनयथासंप्रतिप
न्नौ तथावेदितव्यौ ६४ किंच तेषांसंभूयप्रचरतांमध्येपण्यमिदमित्थंनव्यवहर्तव्यमिति प्रतिषिद्धमाचरता यन्नाशितमनादि

समवायेनवणिजांलाभार्थंकर्मकुर्वताम् लाभालाभौयथाद्रव्यंयथावासंविदाकृतौ ६४
प्रतिषिद्धमनादिष्टंप्रमादाद्यच्चनाशितं सतद्दद्याद्विप्लवाच्चरक्षितादशमांशभाक् ६५
अर्घप्रक्षेपणाद्विंशंभागंशुल्कंनृपोहरेत् व्यासिद्धंराजयोग्यंचविक्रीतंराजगामितत् ६६

ष्टमननुज्ञातंवाकुर्वाणेनतथाप्रमादात्प्रज्ञाहीनतयावायेन यन्नाशितंसतत्पण्यंवणिग्भ्योदद्यात् यःपुनस्तेषांमध्येचौरराजादिजनिताद्व्यसनात्प
ण्यंपालयतिसतस्माद्रक्षितात्पण्याद्दशममंशंलभते ६५ इयतःपण्यस्येयन्मूल्यमित्यर्घस्तस्यप्रक्षेपणात् राजतोनिरूपणाद्धेतोर्यसौ
मूल्याद्विंशतितममंशंशुल्कार्थंगृह्णीयात् यत्पुनर्व्यासिद्धमन्यत्रनविक्रेयमिति राज्ञाप्रतिषिद्धंयद्राजयोग्यंमणिमाणिक्याद्यप्रतिषिद्ध- ११३
मपितद्राज्ञेनिवेद्यलाभलोभेनविक्रीतंचेद्राजगामि मूल्यदाननिरपेक्षंतत्सर्वपण्यंराजापहरेदित्यर्थः ६६

यःपुनर्वणिक् शुल्कंवंचनार्थंपण्यपरिमाणंनिन्हुते शुल्कग्रहणस्थानाच्चापसरति यश्चास्येदमस्येदंवेत्येवंविवादास्पदीभूतपण्यंक्रीणा
तिविक्रीणीतेवा तेसर्वेपण्यादष्टगुणंदंडनीयाः ६७ अपिच शुल्कंहिद्विविधं स्थलजंजलजंच तत्रस्थलजमर्घप्रक्षेपणाद्विंशंभागं
शुल्कंनृपोहरेदित्यत्रोक्तम् जलजंतुमानवेभिहितम् पणंयानंतरेदाप्यंपुरुषोर्द्धपणं तरे पादंपशुश्चयोषिच्चपादार्द्धंरिक्तकःपुमान्
भांडपूर्णानियानानितार्यंदाप्यानिसारतः रिक्तभांडानियत्किंचित्पुमांसश्चापरिच्छदाः गर्भिणीतुद्विमासादिसर्वःप्रव्रजितामुनिः
ब्राह्मणालिंगिनश्चैवनदाप्यास्तारिकंनराइति शुल्कद्वयेप्ययमपरोविशेषः नभिन्नकार्षापणमस्तिशुल्कंनशिल्पवृत्तौनशि

मिथ्यावदन्परीमाणंशुल्कस्थानादपासरन् दाप्यस्त्वष्टगुणंयश्चसव्याजंक्रयविक्रयी ६७
तरिकःस्थलजंशुल्कंगृह्णन्दाप्यःपणान्दश ब्राह्मणप्रातिवेश्यानामेतदेवानिमंत्रणे ६८

शौनदूते नभैक्षवृत्तेनहृतावशेषेनश्रोत्रियेप्रव्रजितेनयज्ञेइति तीर्यतेनेनेतितरिःनावादिः तज्जन्यशुल्केधिकृतस्तरिकः स
यदास्थलोद्भवंशुल्कंगृह्णाति तदादशपणान्दंडनीयः वेशोवेश्म प्रतिवेशइतिस्ववेश्माभिमुखंस्ववेश्मपार्श्वस्थंचोच्यते तत्रभवाः
प्रातिवेश्याः ब्राह्मणाश्चतेप्रातिवेश्याश्चब्राह्मणप्रातिवेश्याः तेषांश्रुतवृत्तसंपूर्णानांश्राद्धादिषुविभवेसत्यनिमंत्रणेएतदेवदश
पणात्मकंदंडनंवेदितव्यम् ६८

देशांतरमृतवणिग्रिक्थंप्रत्याह यदासंभूयकारिणांमध्येयःकश्चिद्देशांतरगतोमृतस्तदातदीयमंशंदायादाःपुत्राद्यपत्यवर्गोबां-
धवोमातृपक्षामातुलाद्याः ज्ञातयोपत्यवर्गव्यतिरिक्ताःसपिंडावाआगताःसंभूयव्यवहारिणोयेदेशांतरादागतास्तेवागृह्णीयुः
तैर्विनादायादाद्यभावेराजागृह्णीयात् वाशब्देनचदायादादीनांवैकल्पिकमधिकारंदर्शयति पौर्वापर्यनियमस्तुपत्नीदुहितरइत्या
दिप्रतिपादितएवात्रापिवेदितव्यः शिष्यसब्रह्मचारिब्राह्मणनिषेधोवणिक्प्राप्तिश्चवचनप्रयोजनम् वणिजामपिमध्येयः

देशांतरगतेप्रेतेद्रव्यंदायादबांधवाः ज्ञातयोवाहरेयुस्तदागतास्तैर्विनानृपः ६९

पिंडदानर्णदानादिसमर्थःसगृह्णीयात् सामर्थ्याविशेषेसर्वेवणिजःसंसृष्टिनोविभज्यगृह्णीयुः तेषामप्यभावेदशवर्ष-
दायादाद्यागमनंप्रतीक्ष्यानागतेषुस्वयमेवराजागृह्णीयात् तदिदंनारदेनस्पष्टीकृतम् एकस्यचेत्स्यान्मरणंदायादोस्य
तदाप्नुयात् अन्योवासतिदायादेशक्ताश्चेत्सर्वएवते तदभावेतुगुप्तंतत्कारयेद्दशवत्सरान् अस्वामिकमदायादंदशव ११४
र्षस्थितंततः राजातदात्मसात्कुर्यादेवंधर्मोमहीयतइति ६९

किंच जिह्मोत्वंचकः तंनिर्लाभंनिर्गतलाभमाच्छिद्यत्यजेयुर्बहिःकुर्युः यश्चसंभूयकारिणांमध्येभांडप्रत्यवेक्षणादिकंकर्तुमसमर्थोसावन्येनस्वक
र्मभांडभारवाहनंतदायव्ययपरीक्षणादिकंकारयेत् प्रागुपदिष्टंवणिग्धर्ममृत्विगादिष्वतिदिशति अनेनलाभा लाभोयथाद्रव्यमित्यादिवणि
ग्धर्मकथनेनऋत्विजांहोत्रादीनांकृषीवलानांनटनर्तकतक्षादीनांचशिल्पकर्मोपजीविनांविधिर्वर्तनप्रकार आख्यातः तत्रचऋत्विजांधन-
विभागेविशेषोमनुनादर्शितः सर्वेषामर्धिनोमुख्यास्तदर्द्धेनार्धिनोपरे तृतीयिनस्तृतीयांशाश्चतुर्थांशाश्चपादिनइति अस्यायमर्थः ज्यो
तिष्टोमेनतंशतेनदीक्षयंतीतिवचनेनगवांशतमृत्विगानतिरूपेदक्षिणाकार्येविनियुक्तम् ऋत्विजश्चहोत्रादयःषोडश तत्रकस्यकियानं

जिह्मंत्यजेयुर्निर्लाभमशक्तोन्येनकारयेत् अनेनविधिराख्यातऋत्विक्कर्षककर्मिणां २७०

शइत्यपेक्षायामिदमुच्यते सर्वेषांहोत्रादीनांषोडशर्त्विजांमध्येयेमुख्याश्चत्वारो होत्रध्वर्युब्रह्मोद्गातारः तेगोशतस्यार्द्धिनः सर्वेषांभा
गपूरणोपपत्तिवशादष्टाचत्वारिंशद्रूपार्द्धेनार्द्धभाजः अपरेमैत्रावरुणप्रतिप्रस्थातृब्राह्मणाच्छंसिप्रस्तोतारस्तदर्द्धेनतस्यमुख्यां-
शस्यार्द्धेनचतुर्विंशतिरूपेणार्द्धभाजः येपुनस्तृतीयिनःअच्छावाकनेष्टाग्नीध्रप्रतिहर्तारस्तेतृतीयिनोमुख्यांशस्यषोडशगोरूपतृ
तीयांशेनतृतीयांशभाजः येतुपादिनःग्रावस्तुदुन्नेतृपोतृसुब्रह्मण्यास्तेमुख्यभागस्य यश्चतुर्थांशोद्वादशगोरूप स्तद्भाजः
मनुकथमयमंशनियमोघटते नतावदत्रसमयोनापिद्रव्यसमवायोनापिवचनंयद्वशाद्भागनियमःस्यादतःसमंस्यादश्रुति-

 

त्वादितिन्यायेन सर्वेषां समांशभाक्त्वं कर्मानुरूपेणवांशभाक्त्वमितियुक्तम् अत्रोच्यते ज्योतिष्टोमप्रकृतिके द्वादशाहे दिनस्तृतीयि
नः पादिन इति सिद्धवदनुवादोनघटते यदि तत्प्रकृतिभूते ज्योतिष्टोमे अर्द्धतृतीयचतुर्थांशभाक्त्वं मैत्रावरुणादीनां नस्याद्दत्तो वैदिका
दुःप्रभृति समाख्याबलात्प्रागुक्तोंशनियमोवकल्प्यत इति निरवद्यम् इति संभूयसमुत्थानप्रकरणम् ७० इदानीं स्तेयंप्रस्तूयते
तल्लक्षणंचमनुनाभिहितम् स्यात्साहसंत्वन्वयवत्प्रसभंकर्मयत्कृतम् निरन्वयंभवेत्स्तेयंहृत्वापन्हवतेचयादिति अन्वयवत् द्रव्यर
क्षिराजाध्यक्षादिसमक्षम् प्रसभंबलावष्टंभेन यत्परधनहरणादिकं क्रियते तत्साहसम् स्तेयंतु तद्विलक्षणम् निरन्वयंद्रव्यस्वा

ग्राहकैर्गृह्यते चौरो लोप्त्रेणाथपदेनवा पूर्वकर्मापराधाच्चतथाचाशुद्धवासकः २७१

म्याद्यसमक्षंवंचयित्वा यत्परधनहरणं तदुच्यते यच्चसान्वयमपिकृत्वा नमयेदंकृतमिति भयान्निन्हुते तदपिस्तेयम् नारदेना
प्युक्तम् उपायैर्विविधैरेनान् छलयित्वापकर्षणम् सुप्तमत्तप्रमत्तेभ्यः स्तेयमाहुर्मनीषिण इति तत्रतस्करग्रहणपूर्वकत्वाद्दंड
नस्यग्रहणस्यचज्ञानपूर्वकत्वात् ज्ञानोपायंतावदाह यश्चौरोयमितिजनैर्विख्याप्यते असौग्राहकैराजपुरुषैः स्थानपालप्रभृति
भिर्गृहीतव्यः लोप्त्रेणापहृतभाजनादिनावाचौर्यचिन्हेननाशदिवसादारभ्यचौर्यपदानुसरणेनवाग्राह्यः यश्चपूर्वकर्मापराधीप्रा 
क्प्रख्यातचौर्यः अशुद्धेप्रज्ञातोवासःस्थानंयस्यासौ अशुद्धवासकः सोपिग्राह्यः ७१ ५ ५

किंच नकेवलंपूर्वोक्ताग्राह्याः किंत्वन्येपिवक्ष्यमाणैर्लिंगैः शंकयाग्राह्याः जातिनिन्हवेननाहंशूद्र इत्येवंरूपेण नामनिन्हवेनना
हंलपित्थ इत्येवंरूपेण आदिग्रहणात्स्वदेशग्रामकुलाद्यपलापेनचलक्षिताग्राह्याः द्यूतपण्यांगनामद्यपानादिव्यसनेष्वतिप्रस
क्तास्तथाकुतस्त्योसित्वमिति चौरग्राहिभिः पृष्टायदिशुष्कमुखोभिन्नस्वरोवाभवंतितर्ह्यसावपिग्राह्यः बहुवचनात् स्विन्न
ललाटादीनांग्रहणम् तथायेनिःकारणंकियदस्यधनंकिंवास्यगृहमिति पृच्छंति वेषांतरधारणेनात्मानंगूहयित्वाये

अन्येपिशंकयाग्राह्याजातिनामादिनिन्हवैः द्यूतस्त्रीपानसक्ताश्चशुष्कभिन्नमुखस्वराः ७२
परद्रव्यगृहाणांचपृच्छकागूढचारिणः निरायाव्ययवंतश्चविनष्टद्रव्यविक्रयाः ७३

चरंति येचायाभावेपिबहुव्ययकारिणः येचविनष्टद्रव्याणांजीर्णवस्त्रभिन्नभाजनादीनामनिर्ज्ञातस्वामिकानांविक्रयकास्तेसर्वेचौ
रसंभावनयाग्राह्याः एवंनानाविधचौर्यलिंगान्युरुषान् गृहीत्वा एतेचौराः किंवासाधवइतिसम्यक्परीक्षेत नपुनर्लिंगदर्शनमात्रेणचौर
निर्णयंकुर्यात् अचौरस्यापिलोप्त्रादिलिंगसंबंधसंभवात् यथाहनारदः अन्यहस्तात्परिभ्रष्टमकामादुत्थितंभुवि चौरेणवापरिक्षिप्तं
लोप्त्रंयत्नात्परीक्षयेत् तथा असत्याःसत्यसंकाशाःसत्याश्चासत्यसन्निभाः दृश्यंते विविधाभावास्तस्मादुक्तंपरीक्षणमिति ७२ ७३

एवंचौर्यशंकयागृहीतेनात्माशोधनीयइत्याह यदिचौर्यशंकयागृहीतस्तन्निस्तरणार्थमात्मानंनशोधयतितर्हिवक्ष्यमाणधनदाप
नवधादिदंडभाग्भवेत् अतोमानुषेणतदभावेदिव्येनवाशोधनीयः ननुनाहंचौरइतिमिथ्योत्तरेकथंप्रमाणंसंभवति तस्याभाव
रूपत्वात् उच्यते दिव्यस्यतावद्भावाभावगोचरत्वरुच्यावान्यतरःकुर्यादित्यत्रप्रतिपादितम् मानुषंपुनर्यद्यपिसाक्ष्यात्क्षुद्र
मिथ्योत्तरेनसंभवतितथापिकारणसंसृष्टभावरूपमिथ्याकारणसाधनमुखेनाभावमपिगोचरयत्येव यथानाशापहारकाले
अहंदेशांतरस्थइत्यभियुक्तेभाविनेचौर्याभावस्याप्यर्थासिद्धेः शुद्धिर्भवत्येव ७४ चौरदंडमाह यस्तुभागुक्तपरीक्षया

गृहीतःशंकयाचौर्येनात्मानंचेद्विशोधयेत् दापयित्वागतंद्रव्यंचौरदंडेनदंडयेत् ७४
चौरंप्रदाप्यापहृतंघातयेद्विविधैर्वधैः सचिन्हंब्राह्मणंकृत्वास्वराष्ट्राद्विप्रवासयेत् ७५

तन्निरपेक्षंवानिश्चितचौर्यस्तंस्वामिनेअपहृतंधनंस्वरूपेणमूल्यकल्पनयावादापयित्वाविविधैर्यातैर्घातयेत् एतच्चोत्तमसा
हसदंडप्राप्तियोग्योत्तमद्रव्यविषयम् नपुनःपुष्पवस्त्रादिक्षुद्रमध्यमद्रव्यापहारविषयम् साहसेषुयएवोक्तस्त्रिषुदंडो
मनीषिभिः सएवदंडस्तेयेपिद्रव्येषुत्रिष्वनुक्रमादितिनारदवचनेनवधरूपस्योत्तमसाहसस्योत्तमद्रव्यविषयेव्यवस्था
पितत्वात् यत्पुनर्द्वंद्वमनुवचनम् अन्यायोपात्तवित्तत्वाद्धनमेषांमलात्मकं अतस्तान्घातयेद्राजानार्थदंडेनदंडयेदिति ११६

तदपिमहापराधविषयम् चौरविशेषेपवादमाह ब्राह्मणंपुनश्चौरंमहत्यपराधेपिनघातयेदपितुललाटेकथित्वास्वदेशान्निष्कासयेत् अं
कनंचश्वपदाकारंकार्यम् तथाचमनुः गुरुतल्पेभगःकार्यः सुरापानेसुराध्वजः स्तेयेचश्वपदंकार्यंब्रह्महण्यशिराःपुमानिति एत
च्चदंडोत्तरकालंप्रायश्चित्तमचिकीर्षतोद्रष्टव्यम् यथाहमनुः प्रायश्चित्तमकुर्वाणाःपूर्वेवर्णायथोदितम् नांक्याराज्ञाललाटेतुदाप्या-
स्तूत्तमसाहसमिति ७५ चौरादर्शनेअपहृतद्रव्यप्राप्त्युपायमाह यदिग्राममध्येमनुष्यादिप्राणिवधोधनापहरणंवाजायते तदा
ग्रामपतेरेवचौरोपेक्षादोषस्तत्परिहारार्थंसएवचौरंगृहीत्वाराज्ञेर्पयेत् तदशक्तोहृतंधनंधनिनेदद्यात् यदिचौरपदंस्वग्रामान्निर्गतंन

घातितेपहृतेदोषोग्रामभर्तुरनिर्गते विवीतभर्तुस्तुपथिचौरोद्धर्तुरवीतके ७६ स्वसीम्निदद्याद्ग्रामस्तुपदंवायत्रगच्छ
ति पंचग्रामीबहिःक्रोशाद्दशग्राम्यथवापुनः ७७

दर्शयति दर्शितेपुनस्तत्पदंयत्रप्रविशति तद्विषयाधिपतिरेवचौरंधनंवार्पये
त् तथाचनारदः गोचरेयस्यलुप्येततेनचौरःप्रयत्नतः ग्राह्योदाप्योथवाशेषंपदंयदिननिर्गतम् निर्गतेपुनरेतस्मान्नचेदन्यत्रपातितम्
सामंतान्मार्गपालांश्चदिक्पालांश्चैवदापयेदिति विवीतेत्वपहारेविवीतस्वामिनएवदोषः यदात्वध्वन्येवहृतंभवत्यवीतकेवाविवीतादन्यत्र
क्षेत्रे तदाचौरोद्धर्तुर्मार्गपालस्यदिक्पालस्यवादोषः ७६ किंच यदापुनर्ग्रामाद्बहिःसीमापर्यंतेक्षेत्रेमोषादिकंभवतितदातद्ग्रामवासि
नएवदद्युः यदिसीम्नोबहिश्चौरपदंननिर्गतं निर्गतेपुनर्यत्रग्रामादिकेचौरपदंप्रविशतिसएवचौरार्पणंकुर्यात् यदात्वनेकग्रामम-

ध्येक्रोशमात्राद्बहिः प्रदेशे घातितोमुषितोवाचौरपदंचजनसंमर्दादिनाभग्नंतदापंचानांग्रामाणांसमाहारः पंचग्रामी दशग्रामसमाहारो वादद्यात् विकल्पवचनंतु यथाप्रत्यासन्त्यपहृतंधनप्रत्यर्पणादिकंकुर्यादित्येवमर्थम् यदात्वन्यतोपहृतंद्रव्यंदापयितुंनशक्नोतितदा स्वकोशादेवराजादद्यात् चौरहृतमवजित्ययथास्थानंगमयेत् स्वकोशाद्वादद्यादितिमनुस्मरणात् मुषितामुषितसंदेहेमानुषेणदि व्येनवानिर्णयः कार्यः यदितस्मिन्दाप्यमानेभवेन्मोषेतुसंशयः मुषितः शपथंदाप्योबंधुभिर्वापिसाधयेदितिवृद्धमनुस्मरणात् ७७ अपराधविशेषेणदंडविशेषमाह बंदिग्राहा दीन्बलावष्टंभेनघातकांश्चनरान् शूलानारोपयेत् अयंचवधप्रकारविशेषोपदेशः अ

बंदिग्राहांस्तथावाजिकुंजराणांचहारिणः प्रसह्यघातिनश्चैवशूलानारोपयेन्नरान् ७८ उत्क्षेपकग्रंथिभेदौकरसंदं शहीनकौ कार्यौद्वितीयापराधेकरपादैकहीनकौ ७९

न्यागारायुधागारदेवतागारभेदकान् हस्त्यश्वरथहर्तॄंश्चहन्यादेवाविचा रयन्निति मनुस्मरणात् ७८ किंच वस्त्राद्युत्क्षिप्यत्यपहरतीत्युत्क्षेपकः वस्त्रादिबद्धंस्वर्णादिकंविस्रस्योत्कृत्यवायोपहरत्यसौग्रंथिभे दकः तौयथाक्रमंकरेणसंदंशसदृशेनतर्जन्यंगुष्ठेनचहीनौकार्यौ द्वितीयापराधेपुनःकरश्चपादश्चकरपादंतच्चतदेकंचकरपादै- कं तद्धीनंययोस्तौकरपादैकहीनकौकार्यौ उत्क्षेपकग्रंथिभेदकयोरेकमेकंकरंपादंचछिंद्यादित्यर्थः एतदप्युत्तमसाहसप्राप्तियो- ग्यद्रव्यविषयम् तदंगच्छेदइत्युक्तोदंडउत्तमसाहसइतिनारदवचनात् तृतीयापराधेतुवधएव तथाचमनुः अंगुलीग्रंथिभेद ११७

स्यछेदयेत्प्रथमेग्रहे द्वितीयेहस्तचरणौतृतीयेवधमर्हतीति ७९ जातिद्रव्यपरिमाणतोमूल्याद्यनुसारतोदंडः कल्पनीयइति जातिद्रव्य परिमाणपरिग्रहविनियोगवयःशक्तिगुणसंदेशकालादीनांदंडगुरुलघुभावकरणानामानंत्यात्प्रतिद्रव्यंवक्तुमशक्तेः सामान्येनदंड कल्पनोपायमाह क्षुद्राणांमध्यमानामुत्तमानांचद्रव्याणांहरणेसारतोमूल्याद्यनुसारतोदंडः कल्पनीयः क्षुद्रादिद्रव्यस्वरूपंचनार देनोक्तम् मृद्भांडासनखट्वास्थिदारुचर्मतृणादियत् शमीधान्यंकृतान्नंचक्षुद्रंद्रव्यमुदाहृतम् वासःकौशेयवर्जंचगोवर्जंपशव स्तथा हिरण्यवर्जंलोहंचमध्यंव्रीहियवाअपि हिरण्यरत्नकौशेयंस्त्रीपुंगोगजवाजिनः देवब्राह्मणराज्ञांचद्रव्यंविज्ञेयमुत्तमं त्रि

क्षुद्रमध्यमहाद्रव्यहरणेसारतोदमः

प्रकारेष्वपिद्रव्येष्वौत्सर्गिकप्रथममध्यमोत्तमसाहसरूपोदंडनियमस्तेनैवदर्शितः साहसेषुयएवोक्तस्त्रिषुदंडोमनीषिभिः स एवदंडस्तेयेपिद्रव्येषुत्रिष्वनुक्रमादिति मृन्मयेषुमणिकमल्लिकादिषु गोवाजिव्यतिरिक्तेषुचमहिषमेषपशुषु ब्राह्मणसंबंधिषु चधान्यादिषु तरतमभावोस्तीति उच्चावचदंडविशेषाकांक्षायांमूल्याद्यनुसारेणदंडः कल्पनीयः तत्रचदंडकर्मणि दंडकल्पनायां तद्धेतुभूतदेशकालवयःशक्तिसम्यक्चिंतनीयम् एतच्चजातिद्रव्यपरिमाणपरिग्रहादीनामुपलक्षणं तथाहि अष्टापाद्यंस्ते यकिल्बिषंशूद्रस्यद्विगुणोत्तराणीतरेषांप्रतिवर्णंविदुषोतिक्रमेदंडभूयस्त्वमिति अयमर्थः किल्बिषशब्देनात्रदंडोलक्ष्यते

यस्मिन्नपहारे योदंडउक्तः सविद्वच्छूद्रकर्तृकेपहारे अष्टगुणआपादनीयः इतरेषांपुनर्विट्क्षत्रब्राह्मणादीनांविदुषांद्विगुणोत्तराणिकिल्बिषाणि षोडशद्वात्रिंशच्चतुःषष्टिगुणादंडा आपादनीयाः यस्माद्विट्शूद्रादिकर्तृकेपहारेदंडभूयस्त्वम् मनुनाप्ययमेवार्थोदर्शितः अष्टापाद्यंतुशूद्रस्य स्तेयेभवतिकिल्बिषम् षोडशैवतुवैश्यस्य द्वात्रिंशत्क्षत्रियस्यतु ब्राह्मणस्यचतुःषष्टिः पूर्णंवापिशतंभवेत् द्विगुणावाचतुःषष्टिस्तद्दोषगुणवेदिनइति तथापरिमाणकृतमपि दंडगुरुत्वंदृश्यते यथाहमनुः धान्यंदशभ्यःकुंभेभ्यो हरतोभ्यधिकेवधः शेषेष्वेकादशगुणंदाप्यस्तस्यचतद्धनमिति विंशतिद्रोणकःकुंभः हर्तृन्ह्रियमाणस्वामिगुणापेक्षयासुभिक्षदु

देशकालवयःशक्तीःसंचिंत्यदंडकर्मणि २८०

र्भिक्षकालाद्यपेक्षयाताडनांगच्छेदनवधरूपादंडायोज्याः तथासंख्याविशेषादपिदंडविशेषोरत्नादिषु सुवर्णरजतादीनामुत्तमानांचवाससाम् रत्नानांचैवसर्वेषां शतादभ्यधिकेवधः पंचाशतस्त्वभ्यधिके हस्तच्छेदनमिष्यते शेषेष्वेकादशगुणंमूल्याद्दंडंप्रकल्पयेदिति तथाद्रव्यविशेषादपि पुरुषाणांकुलीनानांनारीणांचविशेषतः रत्नानांचैवसर्वेषांहरणेवधमर्हति अकुलीनानांतुदंडांतरं पुरुषंहरतोदंडउक्तउत्तमसाहसः स्त्र्यपराधेतुसर्वस्वंकन्यांतुहरतोवधइति क्षुद्रद्रव्याणांतुमाषान्न्यूनमूल्यानां मूल्यात्पंचगुणोदंडः काष्ठभांडतृणादीनांमृन्मयानांतथैवच वेणुवैणवभांडानांतथास्नाय्वस्थिचर्मणाम् शाकानामार्द्रमूला

नांहरणेफलमूलयोः गोरसेक्षुविकाराणांतथालवणतैलयोः पक्वान्नानांकृतान्नानांमत्स्यानामामिषस्यच सर्वेषांमूल्यभूतानांमूल्यात्पंचगुणोदमइतिनारदस्मरणात् यःपुनःप्रथमसाहसःक्षुद्रद्रव्येषु शतावरःपंचाशत्पर्यंतोसोमाषमूल्येतदधिकमूल्येवायथायोग्यंव्यवस्थापनीयः यःपुनर्मानवःक्षुद्रद्रव्यगोचरवचनं तन्मूल्याद्द्विगुणोदमइति तदल्पप्रयोजनशरावादिविषयम् तथापराधगुरुत्वादपिदंडगुरुत्वम् संधिंछित्वातुयेचौर्यंरात्रौकुर्वंतितस्कराः तेषांछित्वानृपोहस्तौतीक्ष्णशूलेनिवेशयेत् इत्येवंसर्वेषामानंत्यात्प्रतिद्रव्यंवक्तुमशक्तेर्जातिपरिमाणादिभिःकारणैर्दंडगुरुलघुभावः कल्पनीयः पथिकादीनांपुनरल्पापराधेनदंडः यथाहमनुः द्विजोध्वगःक्षीणवृत्तिर्द्वावि

भक्तावकाशाग्न्युदकमंत्रोपकरणव्ययान् दत्वाचौरस्यवाहंतुर्जानतोदमउत्तमः ८१

क्षूद्वेचमूलके आददानःपरक्षेत्रान्नदंडंदातुमर्हति तथा चणकव्रीहिगोधूमयवानांमुद्गमाषयोः अनिषिद्धैर्गृहीतव्योमुष्टिरेकःपथिस्थितैः तथैवसप्तमेभक्ते भक्तानिषडनश्नता अश्वस्तनविधानेन हर्तव्यंहीनकर्मणइति २८० अचौरस्यापिचौरोपकारिणोदंडमाह भक्तमशनं अवकाशोनिवासस्थानं अग्निश्चौरस्यशीतापनोदाद्यर्थः उदकंतृषितस्य मंत्रश्चौर्यप्रकारोपदेशः उपकरणंचौर्यसाधनम् व्ययःअपहारार्थंदेशांतरंगच्छतःपाथेयं एतानिचौरस्यहंतुर्वादुष्टत्वंजानन्नपियःप्रयच्छतितस्योत्तमसाहसोदंडः चौरोपेक्षिणामपिदोषः शक्ताश्चयउपेक्षंते तेपितद्दोषभागिनइतिनारदस्मरणात् ८१ ७ ७ ७ ७

किंच परगात्रेषुशस्त्रस्यावपातनेदासीब्राह्मणगर्भव्यतिरिक्तेणगर्भस्यपातनेचोत्तमोदंडः दासीगर्भनिपातनेतु दासीगर्भविनाशकृदित्यादिना शतंदंडोभिहितः ब्राह्मणगर्भेतु हत्यागर्भमविज्ञातमित्यत्रब्रह्महत्यातिदेशंवक्ष्यति पुरुषस्यस्त्रियाश्चप्रमापणेशीलवृत्ताद्यपेक्षयोत्तमोवाधमोवादंडोव्यवस्थितोवेदितव्यः ८२ अपिच विशेषेणप्रदुष्टांविप्रदुष्टांभ्रूणघ्नींस्वगर्भपातनींयाचपुरुषस्यहंत्रीसेतूनांभेत्रीच एतागर्भरहिताःस्त्रीर्गलेशिलांबध्वाअप्सुप्रवेशयेत् यथानप्लवंति ८३ किंच अगर्भिणी

शस्त्रावपातेगर्भस्यपातनेचोत्तमोदमः उत्तमोवाधमोवापिपुरुषस्त्रीप्रमापणे ८२ विप्रदुष्टांस्त्रियंचैव
पुरुषघ्नीमगर्भिणीम् सेतुभेदकरींचाप्सुशिलांबध्वाप्रवेशयेत् ८३ विषाग्निदांपतिगुरुनिजापत्यप्रमापणीम् विकर्णकरनासौष्ठींकृत्वागोभिःप्रमापयेत् ८४ अविज्ञातहतस्याशुकलहंसुतबांधवाः प्रष्टव्या
योषितश्चास्यपरपुंसिरताःपृथक् ८५

मित्यनुवर्तते यापरवधार्थमन्नपानादिषुविषंददातिक्षिपति याचदाहार्थंग्रामादिष्वग्निं तथायाचनिजपतिगुर्वपत्यानिमारयति तांछिन्नकर्णकरनासौष्ठींकृत्वा अदांतैर्दुष्टबलीवर्दैःप्रवाह्यमारयेत् स्तेयप्रकरणेयदेतत्साहसिकस्यदंडविधानंतत्प्रासंगिकमितिमंतव्यम् ८४ अविज्ञातकर्तृकेहननेहंतृज्ञानोपायमाह अविज्ञातपुरुषेणघातितस्यसंबंधिनः सुताः प्रत्यासन्नाश्चबांधवाःकेनास्यकलहोजातइतिकलहमाशुप्रष्टव्याः तथामृतस्यसंबंधिन्योयोषितोयाश्चपरपुंसिरताव्यभिचारिण्यस्ताअपिप्रष्टव्याः८५ 

कथंप्रष्टव्याइत्यत आह किमयंस्त्रीकामोद्रव्यकामोवृत्तिकामोवा तथाकस्यांकिंसंबंधिन्यांवास्त्रियामस्यरतिरासीत् कस्मिन्वाद्रव्येप्रीतिः कुतोवावृत्तिकामः केनवासहदेशांतरंगतइतिनानाप्रकारंव्यभिचारिण्योयोषितः पृथक्पृथक्विश्वास्यप्रष्टव्याः तथामरणदेशनिकटवर्तिनोगोपाटविकाद्यायेजनास्तेपिविश्वासपूर्वकंप्रष्टव्याः एवंनानाप्रकारैःप्रश्नैर्हंतारंनिश्चित्यतदुचितोदंडोविधातव्यः ८६ किंच क्षेत्रंपक्वफलसस्योपेतं वेश्मगृहं वनमटवीम् क्रीडावनंवा ग्रामं विवीतमुक्तलक्षणं खलंवायेदहंति यश्चराजपत्नीमभिगच्छति तान्स

स्त्रीद्रव्यवृत्तिकामोवाकेनवायंगतःसह मृत्युदेशसमासन्नंपृच्छेद्वापिजनंशनैः ८६ क्षेत्रवेश्मवनग्रामविवीतखलदाहकाः राजपत्न्यभिगामीचदग्धव्यास्तुकटाग्निना ८७ पुमान्संग्रहणेग्राह्यःकेशाकेशिपरस्त्रिया सद्योवाकामजैश्चिन्हैः
प्रतिपत्तौद्वयोस्तथा ८८

र्वान्कटैर्वीरणमयैर्वेष्टयित्वादहेत् क्षेत्रादेर्दाहकानांमारणदंडप्रसंगात्दंडविधानम् इतिस्तेयप्रकरणम् ८७ स्त्रीसंग्रहणाख्यंविवादपदंव्याख्यायते प्रथमसाहसादिदंडप्राप्त्यर्थंत्रैधानत्वयंव्यासेनविवृतम् त्रिविधंतत्समाख्यातंप्रथमंमध्यमोत्तमम् अदेशकालसंभाषानिर्जनेचपरस्त्रियाः कटाक्षावेक्षणंहास्यंप्रथमंसाहसंस्मृतम् प्रेषणंगंधमाल्यानांधूपभूषणवाससाम् प्रलोभनंचान्नपानैर्मध्यमंसाहसंस्मृतम् सहासनंविविक्तेतुपरस्परमुपाश्रयः केशाकेशिग्रहश्चैवसम्यक्संग्रहणंस्मृतम् स्त्रीपुंसयोर्मिथुनीभावःसंग्रहणम् संग्रहणज्ञानपूर्वकत्वात्तत्कर्तुर्दंडविधानंतस्यतत्ज्ञानोपायंतावदाह संग्रहणे

तत्रतेनेदमितिसरूपइति ब
प्रवृत्तः पुमान् केशाकेश्यादिभिर्लिंगैर्ज्ञात्वाग्रहीतव्यः परस्परं केशग्रहणपूर्विकाक्रीडा केशाकेशि तत्रतेनेदमितिसरूपइति ब
हुव्रीहौ सति इच् कर्मव्यतिहारइतिसमासांतइच्प्रत्ययः अव्ययत्वाच्चलुप्ततृतीयाविभक्तिः ततश्चायमर्थः परभार्ययासह
केशाकेशिक्रीडनेनाभिनवैः कररुहदशनादिकृतव्रणैः रागकृतैर्लिंगैर्द्वयोः संप्रतिपत्त्यावगज्ञात्वासंग्रहणप्रवृत्तोग्रहीतव्यः
परस्त्रीग्रहणनियुक्तावरुन्ध्यादिस्तुदासार्थम् ८८ किंच यःपुनः परदारपरिधानग्रंथिप्रदेशकुचप्रावरणजघनमूर्द्धरुहादि
स्पर्शनं साभिलाषइवाचरति तथा अदेशेनिर्जने जनताकीर्णेवांधकाराकुले संलापनं करोति परभार्ययावासहैकमंचकादौ-

नीवीस्तनप्रावरणसक्थिकेशावमर्शनम् अदेशकालसंभाषंसहैकासनमेवच ८९

यस्त्व-
रिरंसयेवावतिष्ठते सोपिसंग्रहणेप्रवृत्तोग्राह्यः एतच्चाशंक्यमानदोषपुरुषविषयमितरस्यतुनदोषः यथाहमनुः यस्त्व-
नाक्षारितःपूर्वमभिभाषेतकारणात् नदोषंप्राप्नुयात्किंचिन्नहितस्यव्यतिक्रमइति यःपरस्त्रियास्पृष्टःक्षमते असावपिग्रा
ह्यः इतितेनैवोक्तम् स्त्रियंस्पृशेददेशेयःस्पृष्टोवामर्षयेत्तथा परस्परस्यानुमते सर्वंसंग्रहणंस्मृतमिति यश्चमयेयंविदग्धा-
सरूद्रमितेतिश्लाघयाभुजंगजनसमक्षंख्यापयत्यसावपिग्राह्यइतितेनैवोक्तम् दर्पाद्वायदिवामोहाच्छ्लाघयावास्वयंवदे-
त् पूर्वमयेयंभुक्तेतितच्चसंग्रहणंस्मृतमिति ८९ १२०

प्रतिषिद्धयोस्त्रीपुंसयोःपुनः सल्लापादिकरणेदंडमाह प्रतिषिध्यतइतिप्रतिषेधः पतिपित्रादिभिर्येनसहसंभाषणादिकंनिषिद्धंतत्रप्र
वर्तमानास्त्री शतपणंदंडंदद्यात् पुरुषःपुनरेवंनिषिद्धेप्रवर्तमानोद्विशतंदद्यात् द्वयोस्तुस्त्रीपुंसयोःप्रतिषिद्धेप्रवर्तमानयोःसं
ग्रहणेसंभोगे वर्णानुसारेणयोदंडोवक्ष्यते सएवविज्ञेयः एतच्चचारणादिभार्याव्यतिरेकेण नैषचारणदारेषुविधिर्नात्मोपजीवि
षु सज्जयंतिहितेनारीर्निगूढाश्चारयंतिचेतिमनुस्मरणात् ९० तदिदानींसंग्रहणेदंडमाह चतुर्णामपिवर्णानांबलात्कारेण-
सजातीयगुप्तपरदाराभिगमनेसाशीतिपणसहस्रंदंडनीयः यदात्वानुलोम्येनहीनवर्णांस्त्रियमगुप्तामभिगच्छति तदामध्य

स्त्रीनिषेधेशतंदद्याद्द्विशतंतुदमंपुमान् प्रतिषेधेतयोर्दंडोयथासंग्रहणेतथा ९०
स्वजातावुत्तमोदंड आनुलोम्येनमध्यमः प्रातिलोम्येवधःपुंसोनार्याःकर्णादिकर्तनं ९१

मसाहसंदंडनीयः यदापुनःसवर्णामगुप्तामानुलोम्येनगुप्तांवाव्रजतितदामानवेविशेषउक्तः सहस्रंब्राह्मणोदंड्योगुप्तांविप्रां
बलाद्व्रजन् शतानिपंचदंड्यःस्यादिच्छंत्यासहसंगतः सहस्रंब्राह्मणोदंडंदाप्योगुप्तेतुतेव्रजेत् शूद्रायांक्षत्रियविशोःसह-
स्रंतुभवेद्दमइति एतच्चगुरुसखिभार्याव्यतिरेकेणद्रष्टव्यम् मातापितृष्वसाश्वश्रूर्मातुलानीपितृष्वसा पितृव्यसखिशिष्य-
स्त्रीभगिनीतत्सखीस्नुषा दुहिताचार्यभार्याचसगोत्राशरणागता राज्ञीप्रव्रजिताधात्रीसाध्वीवर्णोत्तमाचया आसामन्यतमां

गच्छन्गुरुतल्पगउच्यते शिश्नस्योत्कर्तनात्तत्रनान्योदंडोविधीयतइतिनारदस्मरणात् प्रातिलोम्येउत्कृष्टवर्णस्त्रीगमनेक्षत्रियादेःपुरुषस्यवधः एतच्चगुप्तविषयमन्यत्रतुधनदंडः उभावपिहितावेवब्राह्मण्यागुप्तयासह विप्लुतौशूद्रवद्दंड्यौदग्धव्यौवाकटाग्निना ब्राह्मणींयद्यगुप्तांतुसेवेतांवैश्यपार्थिवौ वैश्यंपंचशतंकुर्यात्क्षत्रियंतुसहस्त्रिणमितिमनुस्मरणात् शूद्रस्यपुनर्गुप्तामुत्कृष्टवर्णांस्त्रियंव्रजतोलिंगच्छेदनसर्वस्वापहारौ गुप्तांतुव्रजतस्तस्यवधसर्वस्वापहाराविति तेनैवोक्तं शूद्रोगुप्तमगुप्तंवा द्वैजातंवर्णमावसन् अगुप्तमेकांगसर्वस्वाद् गुप्तंसर्वेणहीयतइति नार्याःपुनर्हीनवर्णव्रजंत्याःकर्णयोरादिग्रहणान्नासा

अलंकृतांहरेत्कन्यामुत्तमंह्यन्यथाधमम् दंडंदद्यात्सवर्णासु प्रातिलोम्येवधःस्मृतः ९२

देश्वकर्तनम् आनुलोम्येनवासवर्णांवाव्रजंत्यादंडःकल्प्यः अयंचवधाद्युपदेशोराज्ञएव तस्यैवपालनाधिकारान्नद्विजातिमात्रस्यतस्यब्राह्मणःपरीक्षार्थमपिशस्त्रंनाददीतेतिशस्त्रग्रहणनिषेधात् यदातुराज्ञोनिवेदनेकालविलंबनेनकार्यातिपाताशंका तदास्वयमेवजारादीन्हन्यात् शस्त्रंद्विजातिभिर्ग्राह्यंधर्मोयत्रोपरुध्यते तथा नाततायिवधेदोषोहंतुर्भवतिकश्चन प्रकाशंवाप्रकाशंवामन्युस्तंमन्युमृच्छतीतिशस्त्रग्रहणाभ्यनुज्ञानाच्च तथाक्षत्रियवैश्ययोरन्योन्यस्त्र्यभिगमनेयथाक्रमंसहस्रशतपणात्मकोदंडोवेदितव्यो तदाहमनुः वैश्यश्चेत्क्षत्रियांगुप्तांवैश्यांवाक्षत्रियोव्रजेत् योब्राह्मण्यामगुप्तायांतावुभौदंडमर्हतइति ९१ पारदार्यप्रसंगात्क



न्यायामपिदंडमाह विवाहाभिमुखीभूतामलंकृतांसवर्णांकन्यामपहरन्नुत्तमसाहसंदंडनीयः तदनभिमुखींसवर्णांहरन्प्रथमसाहसं उत्कृष्टवर्णजांकन्यामपहरतःपुनःक्षत्रियादेर्वधएव दंडविधानाच्चापहर्तृसकाशादाच्छिद्यान्यस्मैदेयेतिगम्यते ९२ आनुलोम्यापहरणेदंडमाह यदिसानुरागांहीनवर्णांकन्यामपहरति तदादोषाभावान्नदंडः अन्यथात्वनिच्छंतीमपहरतःप्रथमसाहसोदंडः कन्यादूषणेदंडमाह अनुलोमास्वित्यनुवर्तते यद्यकामांकन्यांबलात्कारेणनखक्षतादिनादूषयति तदातस्यकरश्छेत्तव्यः यदापुनस्तामेवांगुलिप्रक्षेपेणयोनिक्षतंकुर्वन्दूषयति तदामनूक्तषट्शतसहितोंगुलिच्छेदः अभिषह्यतुयःकन्यांकुर्याद्दर्पेणमानवः तस्याशु

सकामास्वनुलोमासुनदोषस्त्वन्यथाधमः दूषणेतुकरच्छेदउत्तमायांवधस्तथा ९३

कर्त्ये अंगुल्यौदंडंचार्हतिषट्शतमिति यदापुनःसानुरागांपूर्ववद्दूषयति तदापि तेनैवविशेषउक्तः सकामांदूषयानस्तुनांगुलिच्छेदमर्हति द्विशतंतुदमंदाप्यःप्रसंगविनिवृत्तयेइति यदातुकन्यैवकन्यांदूषयति विदग्धावातत्रापिविशेषस्तेनैवोक्तः कन्यैवकन्यांयाकुर्यात्तस्यास्तुद्विशतोदमः यातुकन्यांप्रकुर्यात्स्त्रीसासद्योमौंड्यमर्हति अंगुल्योरेवचच्छेदंखरेणोद्वहनंतथेति कन्यांकुर्यादितिकन्यांयोनिक्षतवतींकुर्यादित्यर्थः यदापुनरुत्कृष्टजातीयांकन्यामविशेषात्सकामामकामांवाभिगच्छति तदाहीनस्यक्षत्रियादेर्वधएव उत्तमांसेवमानस्तुयद्यान्योवधमर्हतीतिमनुस्मरणात् यदासवर्णांसकामामभिगच्छति तदागोमिथुनशुल्कंतत्पित्रेदद्यात् ॥

यदीच्छतिपितरितु शुल्कमनिच्छतिदंडरूपेणनदेवराज्ञेदद्यात् सवर्णामकामांतुगच्छतोवधएव यथाहमनुः शुल्कंदद्यात्सेवमानः
समामिच्छेत्पितायदि योकामांदूषयेत्कन्यांससद्योवधमर्हति सकामांदूषयंस्तुल्योनवधंप्राप्नुयान्नरइति १३ किंच स्त्रीशब्देना
त्रप्रकृतत्वात्कन्यावमृश्यते तस्यांयदिकश्चिद्विद्यमानानेवापस्मारराजयक्ष्मादिदीर्घकुत्सितरोगसंसृष्टमैथुनत्वादिदोषान्प्रकाश्ये
यमकन्येतिदूषयत्यसौ शतंदाप्यः मिथ्याभिशंसनंतुपुनरविद्यमानदोषाविष्कारेणदूषणेद्वेशतेदापनीयः गोव्यतिरिक्तपशुगमने
तुशतंदाप्यः यःपुनर्हीनांस्त्रियमंत्यावसायिनीमविशेषात्सकामामकामांचगांवाभिगच्छत्यसौमध्यमसाहसंदंडनीयः १४ साधा

शतंस्त्रीदूषणेदद्याद्द्वेतुमिथ्याभिशंसने पशून्गच्छन्शतंदाप्योहीनांस्त्रींगांचमध्यमं १४अवरुद्धासुदासीषुभुजिष्यासुतथैवच

रणस्त्रीगमनेदंडमाह गच्छन्नित्यनुवर्तते उक्तलक्षणावर्णस्त्रियोदास्यः ताएवस्वामिनाशुश्रूषाहानिस्तुदासार्थंगृहएवस्थातव्य
मित्येवंपुरुषांतरेणभोगतोनिरुद्धाः अवरुद्धाःपुरुषनियतपरिग्रहाः भुजिष्याः यदादास्योनरुद्धाभुजिष्यावाप्रभवेयुस्तदातासु
चशब्दाद्वेश्यास्वैरिणीनामपिसाधारणस्त्रीणांभुजिष्याणांचग्रहणम् तासुचसर्वपुरुषसाधारणतयागम्यास्वपिगच्छन्पंचा १२२
शत्पणान्दंडनीयः परपरिगृहीतत्वेनतासांपरदारतुल्यत्वात् एतच्चस्पष्टमुक्तंनारदेन स्वैरिणीब्राह्मणीवेश्यादासी-

निष्कासनीचया गम्याःस्युरानुलोम्येनस्त्रियोनप्रतिलोमतः आस्वेवतुभुजिष्यासुदोषःस्यात्परदारवत् गम्यास्वपिहिनोपेयायतः
स्ताःसपरिग्रहाइति निष्कासिनीस्वाम्यनवरुद्धादासी ननुचस्वैरिण्यादीनांसाधारणतयागम्यत्वाभिधानमयुक्तम् नहिजातितः
शास्त्रतोवाकाश्चनलोकेसाधारणाः स्त्रियउपलभ्यंते तथाहि स्वैरिण्योदास्यश्चतावद्वर्णस्त्रियएव स्वैरिणीयापतिंहित्वासवर्णं
कामतःश्रयेत् वर्णानामानुलोम्येनदास्यंनप्रतिलोमतइतिमनुस्मरणात् नचवर्णस्त्रीणांपत्यौजीवतिमृतेवापुरुषांतरोपभोगोघ
टते दुःशीलःकामवृत्तोवागुणैर्वापरिवर्जितः परिचर्यःस्त्रियासाध्व्यासततंदेववत्पतिः कामंतुक्षपयेद्देहंपुष्पमूलफलैःशुभैः न

गम्यास्वपिपुमान्दाप्यःपंचाशत्पणिकंदमं १५

तुनामापिगृह्णीयात्पत्यौप्रेतेपरस्यत्विति निषेधस्मरणात् नापिकन्यावस्थायाःसाधारणत्वंपित्रादिपरिरक्षितायाः कन्यायाएवदानो
पदेशात् दात्रभावेपितथाविधायाएव स्वयंवरोपदेशात् नचदासीभावात्स्वधर्माधिकारच्युतिः पारतंत्र्यंहिदास्यंनस्वधर्मपरि
त्यागः नापिवेश्यासाधारणीवर्णानुलोमजव्यतिरेकेणगम्यजात्यंतरासंभवात् तदंतःपातित्वेचपूर्ववदेवगम्यत्वम् प्रतिलोमजत्वे
तुतासांनितरामगम्यत्वम् अतःपुरुषांतरोपभोगेतासांनिंदितकर्माभ्यासेनपातित्यात् पतितसंसर्गस्यनिषिद्धत्वाच्चनसंकल्प्य पुरु
षोपभोगयोग्यत्वम् सत्यमेवं किंत्वत्रस्वैरिण्याद्युपभोगेपित्रादिरक्षकराजदंडभयादिदृष्टदोषाभावाद्गम्यत्ववाचोयुक्तिः दंडाभा

वश्यावरुद्धासु दासीष्विति नियतपुरुषपरिग्रहीणधितो दंडविधानात्तदुपाधिरहितास्वर्थादवगम्यते स्वैरिण्याद्यानां पुनर्दंडाभावो-
विधानाभावात् कन्यां भजंतीमुत्कृष्टां न किंचिद्‌ दापयेदिति लिंगनिदर्शनाच्चावगम्यते प्रायश्चित्तं तु स्वधर्मस्खलननिमित्तंग
म्यानां गंतॄणां चाविशेषाद्भवत्येव यत्पुनर्वेश्यानां जात्यंतरासंभवे न वर्णांतःपातित्वमनुमानादुक्तम् वेश्या वर्णानुलोमाद्यंतःपा
तिन्यो मनुष्यजात्याश्रयत्वात् ब्राह्मणादिवदिति तन्न तत्र कुंडगोलकादिभिरनैकांतिकत्वात् अतो वेश्याख्या काचिज्जातिरना
दिर्वेश्यायामुत्कृष्टजातेः समानजातेर्वा पुरुषादुत्पन्ना पुरुषसंभोगवृत्तिर्वेश्येति ब्राह्मण्यादिवल्लोकप्रसिद्धिबलादभ्युपगमनीय

प्रसह्य दास्यभिगमे दंडो दशपणः स्मृतः

नच निर्मूलेयं प्रसिद्धिः स्मर्यते हि स्कंदपुराणे पंचचूडा नाम काश्चनाप्सरसस्तत्संततिर्वेश्याख्या पंचमी जातिरिति अत आसां नियतपु
रुषपरिणयनविधिविधुरतया समानोत्कृष्टजातिपुरुषाभिगमनेनादृष्टदोषो नापि दंडस्तासु चानवरुद्धासु गच्छतां पुरुषाणां यद्य
पि न दंडस्तथाप्यदृष्टदोषोस्त्येव स्वदारनियतः सदेति नियमात् पशुवेश्याभिगमने प्राजापत्यं विधीयत इति प्रायश्चित्तस्मरणाच्चे
ति निरवद्यम् १५ अवरुद्धासु दासीष्वित्यनेन दासीस्वैरिण्यादिभुजिष्याभिगमे दंडविधानात्तास्वभुजिष्यासु दंडो नास्तीत्यर्थादुक्तं १२३
तदपवादमाह पुरुषसंभोगसजीविकासु दासीस्वैरिण्यादिषु शुल्कदानविरहेण प्रसह्य बलात्कारेणाभिगच्छतो दशपणो दंडः

भोग्यं
यदि बहव एकामनिच्छंतीं बलात्कारेणाभिगच्छंति तर्हि प्रत्येकं चतुर्विंशतिपणपरिमितं दंडं दंडनीयाः यदा पुनस्तदिच्छया भोग्यं दत्वा पश्चा
दनिच्छंतीमपि बलाद्भजंति तदा तेषामदोषः यदि व्याध्याद्यभिभवस्तस्या न स्यात् व्याधिता सश्रमा व्यग्रा राजकर्मपरायणा आमंत्रिता चे
न्नागच्छेद्दंड्या वडवा स्मृतेति नारदवचनात् १६ यदा शुल्कं गृहीत्वा स्वस्थापि नेच्छति तदा शुल्कं द्विगुणं दद्यात् तथा शुल्कं दत्वा स्व
यमनिच्छतः स्वस्थस्य पुंसः शुल्कहानिरेव शुल्कं गृहीत्वा पण्यस्त्री नेच्छंती द्विगुणं वहेत् अनिच्छन्दत्तशुल्कोपि शुल्कहानिमवाप्नु
यादिति तेनैवोक्तं तथान्योपि विशेषस्तेनैव दर्शितः अप्रयच्छंस्तथा शुल्कमनुभूय पुमान् स्त्रियम् आक्रमेण वशं गच्छन् घातदंतनखादिभिः

बहूनां यद्यकामासौ चतुर्विंशतिकः पृथक् १६ गृहीतवेतना वेश्या नेच्छंती द्विगुणं वहेत् अगृहीते समं दाप्यः पुमानप्येवमेव
च १७ अयोनौ गच्छतो योषां पुरुषं वापि मेहतः चतुर्विंशतिको दंडस्तथा प्रव्रजितागमे १८ अंत्याभिगमने त्वंक्यः कबंधेन प्र
वासयेत् शूद्रस्तथांत्य एव स्यादंत्यस्यार्यागमे वधः १९ अयोनौ वाभिगच्छेद्यो बहुभिर्वापि वासयेत् शुल्कमष्टगुणं दाप्यो विनयं तावदे
व तु वेश्याः प्रधाना यास्तत्र कामुकास्तद्गृहोषिताः तत्समुत्थेषु कार्येषु निर्णयं संशये विदुरिति १७ किंच यस्तु स्वयोषां मुखादावभिगच्छति
पुरुषं वाभिमुखो मेहति तथा प्रव्रजितां वा गच्छत्यसौ चतुर्विंशतिपणान् दंडनीयः १८ किंच अंत्या चांडाली तद्गमने त्रैवर्णिकान् प्रायश्चित्तान
भिमुखान् सहस्रं त्वंत्यजस्त्रियमिति मनुवचनात् पणसहस्रं दंडयित्वा कबंधेन कुत्सितबंधेन भगाकारेणांकयित्वा स्वराष्ट्रान्निर्वासयेत् =

प्रायश्चित्ताभिमुखस्यपुनर्दंडनमेव शूद्रः पुनश्चांडाल्यभिगमेंत्यएवचांडालएवभवति अंत्यजस्यपुनश्चांडालादेरुत्कृष्टजातिस्त्र्य-
भिगमेवधएव इतिस्त्रीसंग्रहणप्रकरणम् ९९ व्यवहारप्रकरणमध्येस्त्रीपुंसयोगाख्यमप्यपरंविवादपदंमनुनारदाभ्यां
विवृतम् तत्रनारदः विवाहादिविधिस्त्रीणांयत्रपुंसांचकीर्त्यते स्त्रीपुंसयोगसंज्ञंतद्विवादपदमुच्यतइति मनुरप्याह अस्वतंत्राः
स्त्रियः कार्याःपुरुषैः स्वैर्दिवानिशम् विषयेषुचसज्जंत्यःसंस्थाप्यात्मनोवशइत्यादि यद्यपिस्त्रीपुंसयोःपरस्परमर्थिप्रत्यर्थित
यानृपसमक्षंव्यवहारोनिषिद्धस्तथापिप्रत्यक्षेणकर्णपरंपरयावाविदितेतयोः परस्पराभिचारेदंडादिनादंपतीनिजधर्ममार्गेराज्ञा-
स्थापनीयौ इतरथादोषभाग्भवतीतिव्यवहारप्रकरणे राजधर्ममध्ये अस्यस्त्रीपुंधर्मजातस्योपदेशः एतच्चविवादप्रकरणए
वसप्रपंचंप्रतिपादितमितियोगीश्वरेणनपुनरत्रोक्तम् सांप्रतंप्रकीर्णकाख्यंव्यवहारपदंप्रस्तूयते तल्लक्षणंचकथितं-
नारदेन प्रकीर्णकेपुनर्ज्ञेयाव्यवहारानृपाश्रयाः राज्ञामाज्ञाप्रतीघातस्तत्कर्मकरणंतथा पुरप्रदानसंभेदःप्रकृतीनांतथैवच
पाखंडिनैगमश्रेणीगणधर्मविपर्ययाः पितापुत्रविवादश्चप्रायश्चित्तव्यतिक्रमः प्रतिग्रहविलोपश्चकोपआश्रमिणामपि वर्णसं
करदोषश्चतद्वृत्तिनियमस्तथा नदृष्टंयच्चपूर्वेषुसर्वंतत्स्यात्प्रकीर्णकेइति प्रकीर्णकेविवादपदेयेविवादाराजाज्ञोल्लंघनतदाज्ञा
करणादिविषयास्तेनृपसमवायिनः नृपएवतत्रस्मृत्याचारव्यपेतमार्गेवर्तमानानांप्रतिकूलतामास्थायव्यवहारनिर्णयंकुर्यात् 
एवंवदतायोनृपाश्रयोव्यवहारस्तत्प्रकीर्णकमित्यर्थाल्लक्षितंभवति तत्रापराधविशेषेदंडविशेषमाह राजदत्तभूमे

निबंधस्यवापरिमाणान्न्यूनत्वमाधिक्यंवाप्रकाशयेद्राजशासनंयोलिखति यश्चपारदारिकंचौरंवागृहीत्वाराज्ञेनार्पयित्वामुंचतितौ
तावुभावुत्तमसाहसंदंडनीयौ ३०० प्रसंगान्नृपाश्रयव्यतिरिक्तव्यवहारविषयमपिदंडमाह मूत्रपुरीषादिनाअभक्ष्येणभक्ष्यान
र्हेणान्नपानादिमिश्रेणद्रव्यरूपेणवाब्राह्मणंदूषयित्वाखादयित्वोत्तमसाहसंदंडोभवति क्षत्रियंपुनरेवंदूषयित्वामध्यमम् वैश्यं
दूषयित्वाप्रथमं शूद्रंदूषयित्वाप्रथमसाहसद्व्यस्यार्द्धंदंडोभवतीतिसंबंधः लशुनाद्यभक्ष्यदूषणेतुदोषतारतम्याद्दंडतारतम्यमूहनी-

ऊनंवाप्यधिकंवापिलिखेद्योराजशासनं पारदारिकंचौरंवामुंचतोदंडउत्तमः ३००
अभक्ष्येणद्विजंदूष्यदंडउत्तमसाहसम् मध्यमंक्षत्रियंवैश्यंप्रथमंशूद्रमर्द्धिकं १
कूटस्वर्णव्यवहारीविमांसस्यचविक्रयी अंगहीनस्तुकर्तव्योदाप्यश्चोत्तमसाहसं २

यम् १ किंच रसवेधाद्यापादितवर्णोत्कर्षैःकूटैःस्वर्णैर्व्यवहारशीलोयःस्वर्णकारादिः यश्चविमांसस्यकुत्सितमांसस्यश्वादिसंबं
धस्यविक्रयशीलःसौनिकादिः चशब्दात्कूटरजतादिव्यवहारीच तेसर्वेप्रत्येकंनासाकर्णकरैस्त्रिभिरंगुलैर्हीनाःकार्याः चशब्दात्
त्र्यंगच्छेदेनसमुच्चितमुत्तमसाहसंदंडंदाप्याः यत्पुनर्मनुनोक्तम् सर्वकंटकपापिष्ठंहेमकारंतुपार्थिवः प्रवर्तमानमन्यायेछे
दयेल्लवशःक्षुरैरिति तद्देवब्राह्मणराजस्वर्णविषयम् २

विषयविशेषेदंडाभावमाह चतुष्पादैर्गोगजादिभिःकृतोयोदोषोमनुष्यमारणादिरसोगवादिस्वामिनोनभवति अपसरेतिप्रकर्षेणोच्चैर्भाषमाणस्य तथालकुटलोष्ठसायकपाषाणोत्क्षेपणेनबाहुनायुग्येनचयुगवहताश्वादिनाकृतोयःपूर्वोक्तोदोषःसोपिकाष्ठादीन्प्रास्यतोनभवत्यपसरेति प्रजल्पतः काष्ठाद्युत्क्षेपणेनहिंसायादोषाभावकथनंदंडाभावप्रतिपादनार्थं प्रायश्चित्तंपुनरबुद्धिकरणपूर्वमस्त्येव काष्ठादिग्रहणंचशक्तितोमरादेरुपलक्षणार्थम् ३ किंच नसिभवारज्जुर्नस्याच्छिन्नाशकटादियुक्तबलीवर्दैनस्यारज्जु

चतुष्पादकृतोदोषोनापेहीतिप्रजल्पतः काष्ठलोष्टेषुपाषाणबाहुयुग्यकृतस्तथा ३
छिन्ननस्येनयानेनतथाभग्नयुगादिना पश्चाच्चैवापसरताहिंसनेस्वाम्यदोषभाक् ४

र्यस्मिन् तत् छिन्ननस्यंशकटादितेन तथाभग्नयुगेन आदिग्रहणाद्भग्नाक्षचक्रादिनाचयानेन पश्चात्पृष्ठतोपसरताचशब्दात्तिर्यगपगच्छताप्रतिमुखंचागच्छताचमनुष्यादिहिंसनेस्वामीप्राजकोवादोषभाङ्भवति अतत्प्रयत्नजनितत्वाद्धिंसनस्य तथाचमनुः छिन्ननस्येभग्नयुगेतिर्यक्प्रतिमुखागते अक्षभंगेचयानस्यचक्रभंगेतथैवच छेदनेचैवयंत्राणांयोक्त्ररश्म्योस्तथैवच आक्रंदेसत्यपेहीतिनदंडंमनुरब्रवीदिति ४ १२५

उपेक्षायांस्वामिनोदंडमाह अप्रवीणप्राजकप्रेरितैर्दंष्ट्रिभिर्गजादिभिःशृंगिभिर्गवादिभिःवध्यमानंसमर्थोपिस्वामीयद्यमोक्षयन् उपेक्षते तदा अकुशलप्राजकनियोजननिमित्तंप्रथमंसाहसंदंडंदद्यात् यदातुमारितोहमितिविक्रुष्टेपिनमोक्षयतितदाद्विगुणम् यदापुनःप्रवीणमेवप्राजकंप्रेरयतितदाप्राजकएवदंड्योनस्वामी यथाहमनुः प्राजकश्चेद्भवेदाप्तःप्राजकोदंडमर्हतीति प्राजकोयदाआप्तोभियुक्तः प्राणिविशेषाच्चदंडविशेषःकल्पनीयः यथाहमनुः मनुष्यमारणेक्षिप्रंचोरवत्किल्बिषीभवेत्

शक्तोप्यमोक्षयन्स्वामीदंष्ट्रिणांशृंगिणांतथा प्रथमंसाहसंदद्याद्विक्रुष्टेद्विगुणंतथा ५
जारंचोरेत्यभिवदन्दाप्यःपंचशतंदमम् उपजीव्यधनंमुंचस्तदेवाष्टगुणीकृतम् ६

षीभवेत् प्राणभृत्सुमहत्स्वर्द्धंगोगजोष्ट्रहयादिषु क्षुद्राणांतुपशूनांतुहिंसायांद्विशतोदमः पंचाशत्तुभवेद्दंडःशुभेषुमृगपक्षिषु गर्दभाजाविकानांतुदंडःस्यात्पंचमाषकः माषकस्तुभवेद्दंडःश्वशूकरनिपातनइति ५ किंच स्ववंशकलंकभयाज्जारंपारदारिकंचोरनिर्गच्छेत्यभिवदन् पंचशतंपणानांपंचशतानियस्मिन्दमेसतथोक्तस्तंदमंदाप्यः यःपुनर्जारहस्ताद्धनमुपजीव्यउत्कोचरूपेणगृहीत्वाजारंमुंचत्यसौयावद्गृहीतंतावदष्टगुणीकृतंदाप्यः ६

किंच राज्ञोनिष्टस्यानभिमतस्यामित्रस्तोत्रादेः प्रकर्षेणभूयोभूयोवक्तारं तस्यैवराज्ञ आक्रोशकारिणंनिंदाकरणशीलं तदीयस्यचमंत्रस्यस्वराष्ट्रविवृद्धिहेतोः परराष्ट्रापक्षयकरस्यवाभेत्तारं अमित्रकर्णेषुजपंतं जिव्हामुत्कृत्यस्वराष्ट्रान्निष्का सयेत् कोशापहरणादौपुनर्वधएव राज्ञःकोशापहर्तृंश्चप्रतिकूलेषुचस्थितान् घातयेद्विविधैर्दंडैररीणांचोपकारका निति मनुस्मरणात् विविधैःसर्वस्वापहारांगच्छेदवधरूपैरित्यर्थः सर्वस्वापहारेपियद्यस्यजीवनोपकरणंतन्नापहर्तव्यम्

राज्ञोनिष्टप्रवक्तारंतस्यैवाक्रोशकारिणम् तन्मंत्रस्यचभेत्तारंछित्वाजिव्हांप्रवासयेत् ७
मृतांगलग्नविक्रेतु र्गुरोस्ताडयितुस्तथा राजयानासनारोढुर्दंडउत्तमसाहसः ८

चौर्योपकरणंविना यथाहनारदः आयुधान्यायुधीयानांवाह्यादीन्वाह्यजीविनाम् वेश्यास्त्रीणामलंकारान्वाद्यनोद्यादितद्विदाम् यच्चयस्योपकरणंयेनजीवंतिकारवः सर्वस्वहरणेप्येतन्नराजाहर्तुमर्हतीति ब्राह्मणस्यपुनर्नशारीरोब्राह्मणस्यदंडइतिनिषेधाद्वध- स्थानेशिरोमुंडनादिकंकर्तव्यम् ब्राह्मणस्यवधोमौंड्यंपुरान्निर्वासनांकने ललाटेचाभिशस्तांकःप्रयाणंगर्दभेनतुइतिमनुस्मरणात् ७ 
किंच मृतशरीरसंबंधिनोवस्त्रपुष्पादेर्विक्रेतुःगुरोःपित्राचार्यादेस्ताडयितुः तथाराजानुमतिंविना तद्यानंगजाश्वादि आसनंसिंहासनादिआ रोहतश्चोत्तमसाहसोदंडः ८

किंच यःपुनःक्रोधादिनापरस्यनेत्रद्वयंभिनत्ति यश्चज्योतिःशास्त्रवित्गुर्वादिहितेप्सुव्यतिरिक्तोराज्ञोद्विष्टमनिष्टंसंवत्सरांतेतवरा- ज्यच्युतिर्भविष्यतीत्यादिरूपमादेशं करोति तथायःशूद्रोभोजनार्थंयज्ञोपवीतादिब्राह्मणलिंगानिदर्शयति तेषामष्टशतोदमः अ ष्टौपणशतानियस्मिन्दमे सतथोक्तः श्राद्धभोजनार्थंपुनःशूद्रस्यविप्रवेषधारिणःतप्तशलाकयायज्ञोपवीतवद्वपुष्यालिखेदितिस्मृ- त्यंतरोक्तंद्रष्टव्यं वृत्त्यर्थंयज्ञोपवीतादिब्राह्मणलिंगधारिणोवधएव द्विजातिलिंगिनःशूद्रान्घातयेदितिस्मरणात् ९ रागलोभा- दिनान्यथाव्यवहारदर्शनेदंडमाह दुर्दृष्टान्स्मृत्याचारप्राप्तधर्मोल्लंघनेनरागलोभादिभिरसम्यग्विचारितत्वेनाशंक्यमानान्व्यव

द्विनेत्रभेदिनोराजद्विष्टादेशकृतस्तथा विप्रत्वेनचशूद्रस्यजीवतोष्टशतोदमः ९ दुर्दृष्टांस्तुपुनर्दृष्ट्वा
व्यवहारान्नृपेणतु सभ्याःसजयिनोदंड्याविवादाद्द्विगुणंदमं ३१०

हारान्पुनः स्वयंराजासम्यग्विचार्यनिश्चि तदोषाः पूर्वसभ्याःसजयिनःप्रत्येकंविवादपदेयोदमःपराजितस्यतद्द्विगुणंदाप्याः अप्राप्तजेतृदंडविधिपरत्वाद्वचनस्यरागाल्लो भादित्यादिनाश्लोकेनापौनरुक्त्यम् यदापुनःसाक्षिदोषेणव्यवहारस्यदुष्टत्वंतदासाक्षिणएवदंड्यानजयीनापिसभ्याः यदातुरा जानुमत्याव्यवहारस्यदुर्दृष्टत्वंतदासर्वएवराजसहिताःसभ्यादयोदंडनीयाः पादोगच्छतिकर्तारंपादःसाक्षिणमृच्छति पादःसभासदः सर्वान्पादोराजानमृच्छतीतिवचनात् एतच्चप्रत्येकंराजादीनांदोषप्रतिपादनपरं नपुनरेकैकस्यैवपापापूर्वस्यविभागाय यथोक्तं कर्तृस मवायफलजननस्वभावत्वादपूर्वस्य ३१०

न्यायतोनिर्णीतव्यवहारस्यप्रत्यावर्तयितुर्दंडमाह यःपुनर्न्यायमार्गेणपराजितोपि औद्धत्यान्नाहंपराजितोस्मीतिमन्यते तमायांतंकूटलेख्याद्युपन्यासेनपुनर्धर्माधिकरणमतिधिष्ठतंधर्मेणपुनःपराजयंनीत्वाद्विगुणंदंडंदापयेत् नारदेनाप्युक्तम् तीरितंचानुशिष्टंवायोमन्येतविधर्मतः द्विगुणंदंडमास्थायतत्कार्यंपुनरुद्धरेदिति तीरितंसाक्षिलेख्यादिनिर्णीतमकृतदंडं अनुशिष्टमुद्धृतदंडं दंडपर्यंतंनीतमितियावत् यत्पुनर्मनुवचनम् तीरितंचानुशिष्टंचयत्रक्वचनविद्यते कृतंतद्धर्मतोज्ञेयंनतत्साज्ञोनि

योमन्येताजितोस्मीतिन्यायेनापिपराजितः तमायांतंपुनर्जित्वादापयेद्द्विगुणंदमं ११

वर्तयेदिति तदर्थिप्रत्यर्थिनोरन्यतरवचनाद्व्यवहारस्याधर्मतोवृत्तत्वाशंकायांपुनर्द्विगुणंदंडंप्रतिज्ञापूर्वकंव्यवहारंप्रवर्तयेत् न पुनर्धर्मतोवृत्तत्वानिश्चयेपिराज्ञालोभादिनाप्रवर्तयितव्यइत्येवंपरम् यत्पुनर्नृपांतरेणापिन्यायापेतंकार्यं निवर्तितंतदपिसम्यक्परीक्षणेनधर्म्येपथिस्थापनीयम् न्यायापेतंयदन्येनराज्ञाज्ञानकृतंभवेत् तदप्यन्यायविहितंपुनर्न्यायेनिवेशयेदितिस्मरणात् ११ 

अन्यायगृहीतदंडधनस्यगतिमाह अन्यायेनयोदंडोराज्ञालोभाद्गृहीतस्तंत्रिंशद्गुणीकृतंवरुणायेदमितिसंकल्प्यब्राह्मणेभ्यःस्वयंदद्यात् यस्माद्दंडरूपेणयावद्गृहीतमन्यायेनतावत्तस्मैप्रतिदेयमितरथापहारदोषप्रसंगात् अन्यायदंडग्रहणेपूर्वस्वामिनःस्वत्वविच्छेदाभावाच्चेति ३१२ इतिश्रीपद्मनाभभट्टोपाध्यायात्मजस्यश्रीमत्परमहंसपरिव्राजकाचार्यविज्ञानेश्वरभट्टारकस्यकृतौऋजुमिताक्षरायांयाज्ञवल्कीयधर्मशास्त्रविवृतौद्वितीयोध्यायःव्यवहाराख्यःसमाप्तिमियात् अथास्मिन्नध्यायेप्रकरणानुक्रमणिकाकथ्यते आद्यंव्यवहारमातृकाप्रकरणं १ भुक्तिलक्षणं २ ऋणादानं ३ निक्षेपप्रकरणं ४ साक्षिलक्षणं ५ लेख्यलक्षणम् ६

राज्ञाऽन्यायेनयोदंडोगृहीतोवरुणायतम् निवेद्यदद्याद्विप्रेभ्यःस्वयंत्रिंशद्गुणीकृतं ३१२

दिव्यस्वरूपकथनं ७ दायविभागः ८ सीमाविवादः ९ स्वामिपालविवादः १० अस्वामिविक्रयः ११ दत्ताप्रदानिकं १२ क्रीतानुशयः १३ अभ्युपेत्याशुश्रूषा १४ संविद्व्यतिक्रमः १५ वेतनादानं १६ द्यूतसमाह्वयाख्यं १७ वाक्पारुष्यं १८ दंडपारुष्यं १९ साहसं २० विक्रीयासंप्रदानं २१ संभूयसमुत्थानं २२ स्तेयप्रकरणम् २३ स्त्रीसंग्रहणं २४ प्रकीर्णकम् २५ इतिपंचविंशतिप्रकरणानि २५
उत्तमोपपदस्येयंशिष्यस्यकृतिरात्मनः धर्मशास्त्रस्यविवृतिर्विज्ञानेश्वरयोगिनः १ शके १७८४ दुंदुभिना॰फाल्गु॰२अयंस॰

इतिमिताक्षराद्वितीयाध्यायोव्यवहाराख्यःसमाप्तः

अथयाज्ञवल्क्यस्मृतिमिताक्षराप्रायश्चित्ताध्यायप्रारंभः

श्रीगणेशायनमः श्रीसरस्वत्यैनमः श्रीगुरुभ्योनमः अथेदमारभ्यते प्रायश्चित्ताध्याय भाष्यं गृहस्थाश्रमिणां नित्यनैमित्तिकाधर्मा उक्ताः अ
भिषेकादिगुणयुक्तस्य गृहस्थविशेषस्य गुणधर्माश्च प्रदर्शिताः अधुनातदधिकारसंकोचहेतुभूताशौचप्रतिपादनमुखेनतेषामपवादः प्रतिपाद्यते
आशौचशब्देनचकालः स्नानाद्यपनोद्यः पिंडोदकदानादिविधेः अध्ययनादिपर्युदासस्यचनिमित्तभूतः पुरुषगतः कश्चनातिशयः कथ्यते नपुनःक-
र्मानधिकारमात्रं अशुद्धाबांधवाः सर्वेइत्यादावशुद्धत्वाभिधानात् अत्राशुद्धशब्दस्यच वृद्धव्यवहारेणाहिताग्निदीक्षितादावनधिकारिमात्रेप्र-

ऊनद्विवर्षंनिखनेन्नकुर्यादुदकंततः आश्मशानादनुव्रज्यइतरोज्ञातिभिर्मृतः १ य
मसूक्तंतथागाथांजपद्भिर्लौकिकाग्निना सदग्धव्यउपेतश्चेदाहिताग्न्यावृतार्थवत् २

योगाभावात् वृद्धव्यवहारव्युत्पत्तिनिबंधनत्वाच्चशब्दार्थावगतेः किंच यद्याशौचिनांदानादिनिषेधदर्शनात् तदयोग्यत्वमाशौचशब्दाभिधेयंक
ल्प्यते तर्हिउदकदानादिविधिदर्शनात् तद्योग्यत्वमप्यभिधेयंस्यात् तत्रानेकार्थकल्पनादोषप्रसंगइत्युपेक्षणीयोयंपक्षः तत्राशौचिभिःस-
पिंडाद्यैर्यत्कर्तव्यंतत्तावदाह ऊनेअपरिपूर्णेद्विवर्षेयस्यासावूनद्विवर्षस्तंप्रेतंनिखनेत् भूमाववटंकृत्वानिदध्यान्नपुनर्दहेदित्यर्थः नचसकृत्प्र १
सिंचंत्युदकमित्यादिभिः प्रेतोद्देशेनविहितमुदकदानाद्यौर्ध्वदेहिकंकुर्यात् अयंचगंधमाल्यानुलेपनादिभिरलंकृत्यशुचौभूमौआश्मशानादन्यत्रा

स्थिनिचयरहितायांबहिर्ग्रामान्निखननीयः यथाहमनुः ऊनद्विवार्षिकंप्रेतंनिदध्युर्बांधवाबहिः अलंकृत्यशुचौभूमावस्थिसंचयनादृते नास्य
कार्योग्निसंस्कारोनास्यकार्योदकक्रिया अरण्येकाष्ठवत्त्यक्त्वाक्षिपेयुस्त्र्यहमेवतु अरण्येकाष्ठवत्त्यक्त्वेत्यस्यायमर्थः यथारण्येकाष्ठंत्यक्त्वोदा-
सीनास्तद्विषयेभवंतितथोनद्विवार्षिकमपिखातायांभूमौपरित्यज्यतद्विषयेश्राद्धाद्यौर्ध्वदेहिकेषुउदासीनैर्भवितव्यमितिआचारादिप्राप्तश्राद्धाद्य-
भावोनेनदृष्टांतेनसूच्यते सचघृतेनाभ्यज्ययमगाथाःपठद्भिर्निधातव्यः ऊनद्विवार्षिकंप्रेतंघृताक्तंनिखनेद्बहिः यमगाथागायमानोयमसूक्तम-
नुस्मरन्नितियमस्मरणात् ततस्तस्मादूनद्विवार्षिकादितरःपूर्णद्विवर्षोयोमृतोसौआश्मशानपर्यंतंज्ञातिभिःसपिंडैःसमानोदकैश्चज्येष्ठपुरःसरैर
नुव्रज्योनुगंतव्योस्मादेववचनात् ऊनद्विवर्षस्यानुगमनमनियतमितिगम्यते अनुगम्यचपरेयिवांसमित्यादियमसूक्तं यमदैवत्यागाथाश्च
जपद्भिर्लौकिकेनासंस्कृतेनाग्निनादग्धव्योयदिजातारणिर्नास्ति तत्सद्भावेतुनिर्मथितेनदग्धव्योनलौकिकेन तस्याग्निसंपाद्यकार्यमात्रार्थत्वे
नोत्पत्तेः लौकिकाग्निश्चचांडालाग्न्यादिव्यतिरिक्तोग्राह्यः चांडालाग्निरमेध्याग्निःसूतिकाग्निश्चकर्हिचित् पतिताग्निश्चिताग्निश्चनशिष्ट
ग्रहणोचिताइतिदेवलस्मरणात् लौगाक्षिणाचात्रविशेषउक्तः तूष्णीमेवोदकंकुर्यात्तूष्णींसंस्कारमेवच सर्वेषांकृतचूडानामन्यत्रापीच्छ
याद्वयमिति अयमर्थः चौलकर्मानंतरकालेनियमेनाग्न्युदकदानंकार्यं अन्यत्रापिनामकरणादूर्ध्वंअकृतचूडेपीच्छयाप्रेताभ्युदयकाम
नयाद्वयंअग्न्युदकदानात्मकंतूष्णींकार्यं ननियमेनेतिविकल्पः मनुनाप्यत्रविशेषोदर्शितः नात्रिवर्षस्यकर्तव्याबांधवैरुदकक्रिया जातदंतस्यवा
कुर्युर्नाम्निवापिकृतेसति उदकग्रहणंसाहचर्यादग्निसंस्कारस्याप्युपलक्षणार्थं नात्रिवर्षस्येतिवचनात् कुलधर्मापेक्षयाचूडोत्कर्षेपिवर्षत्र-

यादूर्ध्वमग्न्युदकदानादिनियमोवगम्यते लौगाक्षिवचनाद्वर्षत्रयात्प्रागपिकृतचूडस्यतयोर्नियमइतिविवेचनीयं उपेतश्चेद्यद्युपनीतस्तर्हिआहिता-
ग्न्याहृता आहिताग्नेर्दाहप्रक्रियया सगृह्यादिप्रसिद्ध्यालौकिकाग्निनैवदग्धव्यः अर्थवत्प्रयोजनवत् अयमर्थः यद्यस्यकृष्णद्वारंकार्यरूपंप्रयोजनंसं-
भवतिभूमिजोषणप्रोक्षणादितदुपादेयं यत्पुनर्लुप्तप्रयोजनंपात्रयोजनादितन्निवर्त्तते तथालौकिकाग्निविधानेनउपनीतस्यअनाहिताग्नेर्गृह्याग्निना
दाहविधानेनचअपहृतप्रयोजनत्वादाहवनीयादेरपिनिवृत्तिरिति अग्न्यंतरविधानंचवृद्धयाज्ञवल्क्येनोक्तं आहिताग्निर्यथान्यायंदग्धव्यस्त्रि
भिरग्निभिः अनाहिताग्निरेकेनलौकिकेनापरोजनइति नचशूद्रेणश्मशानंप्रतिअग्निकाष्ठादिनयनंकार्यं यस्यानयतिशूद्रोग्निंतृणंकाष्ठंहवींषि
च प्रेतत्वंहिसदातस्यसचाधर्मेणलिप्यतइतियमस्मरणात् तथादाहश्चस्नपनाद्यनंतरंकार्यः प्रेतंदहेच्छुभैर्गंधैःस्नापितंस्रग्विभूषितमितिस्मर
णात् प्रचेतसाप्युक्तं स्नानंप्रेतस्यपुत्राद्यैर्वस्त्राद्यैःपूजनंततः नग्नदेहंदहेन्नैवकिंचिद्देयंपरित्यजेदिति किंचिद्देयमितिशववस्त्रैकदेशंश्मशान-
वास्यर्थंदेयंपरित्यजेदित्यर्थः प्रेतनिर्हरणेपिमनुनाविशेषोदर्शितः नविप्रंस्वेषुतिष्ठत्सुमृतंशूद्रेणहारयेत् अस्वर्ग्याह्याहुतिःसास्याच्छूद्रसं
पर्कदूषिता अत्रचस्वेषुतिष्ठत्सुइत्यविवक्षितं अस्वर्ग्यत्वादिदोषश्रवणात् दक्षिणेनमृतंशूद्रंपुरद्वारेणनिर्हरेत् पश्चिमोत्तरपूर्वैस्तुयथासंख्यं
द्विजातयः तथाहारीतोपि नग्रामाभिमुखंप्रेतंहरेयुरिति यदातुप्रोषितमरणेशरीरंनलभ्यतेतदास्थिभिःप्रतिकृतिंकृत्वातेषामप्यलाभेपर्णशरैः
शौनकादिगृह्योक्तमार्गेणप्रतिकृतिंकृत्वासंस्कारःकार्यः आशौचंचात्रदशाहादिकमेव आहिताग्निश्चेत्प्रवसन्म्रियेतपुनःसंस्कारंकृत्वाशववदा २
शौचमितिवसिष्ठस्मरणात् अनाहिताग्निस्तुत्रिरात्रं सुपिष्टैर्जलसंमिश्रैर्दग्धव्यश्चतथाग्निना असौस्वर्गायलोकायस्वाहेत्युक्त्वासबांधवैः एवं

पर्णशरंदग्ध्वात्रिरात्रमशुचिर्भवेदितिवचनात् ततश्चायमर्थः नामकरणादर्वाङ्निखननमेवनचोदकदानादि ततऊर्ध्वंयावत्त्रिवर्षंवैकल्पि
कमग्न्युदकदानं ततःपरंयावदुपनयनंतूष्णीमेवाग्न्युदकदानंनियतं वर्षत्रयात्प्रागपिकृतचूडस्य उपनयनादूर्ध्वंपुनराहिताग्न्याहृतादाहंकृ-
त्वासर्वमौर्ध्वदेहिकंकार्यं अयंतुविशेषः उपनीतस्यलौकिकाग्निनादाहःकार्यः अनाहिताग्नेर्गृह्याग्निनादाहोयथासंभवंपात्रयोजनंचकार्यं
१ २ संस्कारानंतरंकिंकर्त्तव्यमित्यतआह सप्तमाद्दिवसादर्वाक्दशमदिवसाद्वाज्ञातयःसमानगोत्राःसपिंडाःसमानोदकाश्चअपनःशो
शुचदघमित्यनेनमंत्रेणदक्षिणामुखाःअपःअभ्युपयंति अभ्युपगमनेनतत्प्रयोजनभूतोदकदानविशिष्टमभ्युपगमनंलक्ष्यते एवंमाताम-

सप्तमाद्दशमाद्वापिज्ञातयोभ्युपयंत्यपः अपनःशोशुचदघमनेनपितृदिङ्मुखाः ३

हाचार्येष्वनंतरंउदकदानस्यातिदेशदर्शनात् एतच्चायुग्मासुतिथिषुकार्यं प्रथमतृतीयपंचमसप्तमनवमेषूदकक्रियेतिगौतमस्मरणात् एत
च्चस्नानानंतरंकार्यं शरीरमग्नौसंयोज्यानवेक्षमाणाआपोभ्युपयंतीतिशातातपस्मरणात् तथाप्रचेतसाप्यत्रविशेषोदर्शितः प्रेतस्यबांधवाय
थावृद्धमुदकमवतीर्यनोद्धर्षयेयुरुदकांतेप्रसिंचेयुरपसव्ययज्ञोपवीतवाससोदक्षिणाभिमुखाब्राह्मणस्योदङ्मुखाःप्राङ्मुखाश्चराजन्यवै-
श्ययोरिति स्मृत्यंतरेतुयावत्याशौचदिनानितावदुदकदानस्यावृत्तिरुक्ता यथाहविष्णुः यावदाशौचंतावत्प्रेतस्योदकंपिंडंचदद्युरिति तथा

प्रचेतसाप्युक्तं दिने दिने जलांजलीन् पूर्णान्प्रदद्यात्प्रेतकारणात् तावद्वृद्धिः प्रकर्तव्या यावत्पिंडः समाप्यत इति प्रतिदिनमंजलीनां वृद्धिः कार्या
यावद्दशमः पिंडः समाप्यत इत्यर्थः यद्यप्यनयोर्गुरुलघुकल्पयोरन्यतरानुष्ठानेनापि शास्त्रार्थः सिद्धस्तथापि बहुक्लेशावहत्वेन गुरुतरकल्पे प्र-
वृत्त्यनुपपत्तेः प्रेतस्योपकारातिशयो भविष्यतीति कल्पनीयं अन्यथा गुरुतरकल्पाम्नानस्यानर्थक्यप्रसंगात् वसिष्ठेनापि विशेषोभिहितः
सव्योत्तराभ्यां पाणिभ्यामुदकक्रियां कुर्वीरन्निति ३ वक्ष्यमाणसकृत्प्रसेकनामगोत्रादिगुणविशिष्टस्योदकदानस्यासमानगोत्रेषु मातामहा

## एवं मातामहाचार्यप्रेतानामुदकक्रिया कामोदकं सखिप्रत्तास्वस्रीयश्वशुरर्त्विजां ४

दिष्वतिदेशमाह यथा सगोत्रसपिंडानां प्रेतानामुदकं दीयते तथा मातामहानामाचार्याणां च प्रेतानां नित्यमुदकक्रिया कार्या सखा मित्रं प्रत्ताः परि
णीता दुहितृभगिन्यादयः स्वस्रीयो भागिनेयः श्वशुरः प्रसिद्धः ऋत्विजो याजकाः एषां सख्यादीनां प्रेतानां कामोदकं कार्यं काम इच्छा कामेनोदकदा ३
नं कामोदकं प्रेताभ्युदयकामनायां सत्यामुदकं देयमसत्यां न देयमिति अकरणे प्रत्यवायो नास्तीत्यर्थः ४ ७ ७ ७ ७

---

उदकदाने गुणविधिमाह तच्चोदकदानमित्थं कर्तव्यं सपिंडाः समानोदकाश्च मौनिनो भूत्वा प्रेतस्य नामगोत्रे उच्चार्य अमुकनामा प्रेतोमुकगोत्रस्तृप्य
त्विति सकृदेवोदकं प्रसिंचेयुः त्रिर्वा त्रिः प्रत्येकं कुर्युः प्रेतस्तृप्यत्विति प्रचेतःस्मरणात् प्रतिदिनमंजलिवृद्धिस्तु प्रतिपादितैव तथा अयमपि विशेष
स्तेनैवोक्तः नदीकूलं ततो गत्वा शौचं कृत्वा यथार्थवत् वस्त्रं संशोधयेदादौ ततः स्नानं समाचरेत् सचैलस्तु ततः स्नात्वा शुचिः प्रयतमानसः पाषा
णं तत आदाय विप्रे दद्याद्दशांजलीन् द्वादश क्षत्रिये दद्याद्वैश्ये पंचदश स्मृताः त्रिंशत्शूद्राय दातव्यास्ततः संप्रविशेद्गृहम् ततः स्नानं पुनः कार्यं गृह
शौचं च कारयेदिति सपिंडानां मध्ये केषांचिदुदकदानप्रतिषेधमाह ज्ञातित्वे सत्यपि ब्रह्मचारिणः समावर्तनपर्यंतं पतिताश्च प्रच्युतद्वि-

## सकृत्प्रसिंचंत्युदकं नामगोत्रेण वाग्यताः न ब्रह्मचारिणः कुर्युरुदकं पतितास्तथा ५

जातिकर्माधिकारा उदकादिदानं न कुर्युः ब्रह्मचर्योत्तरकालं पूर्वमृतानां सपिंडादीनां उदकदानमाशौचं च कुर्यादेव यथाह मनुः आदिष्टी नोदकं
कुर्यादाव्रतस्य समापनात् समाप्ते तूदकं कृत्वा त्रिरात्रमशुचिर्भवेदिति आदिष्टी ब्रह्मचारी यस्य पोशान कर्म कुरु दिवा मा स्वाप्सी रित्यादिव्रतादेशयो-
गाद्ब्रह्मचार्युच्यते एतच्च पित्रादिव्यतिरेकेणेति वक्ष्यति आचार्य पितृ पाध्यायानित्यत्राचार्यः पुनरेवं मन्यते आदिष्टीति प्रक्रांतप्रायश्चित्तः कथ्य
ते तस्यैवायमुदकदानादिनिषेधः प्रायश्चित्तरूपव्रतसमाप्त्युत्तरकालमुदकदानाशौचविधिरिति तथा क्लीबादीनां चोदकदायित्वं निषिद्धं क्लीबा
द्या नोदकं कुर्युः स्तेना व्रात्या विधर्मिणः गर्भभर्तृद्रुहश्चैव सुराप्यश्चैव योषित इति वृद्धमनुस्मरणात् ५ ७ ७ ७

एवमुदकदानेकर्त्तृविशेषप्रतिषेधमुक्त्वासंप्रदानविशेषेणप्रतिषेधमाह नरशिरःकपालादिश्रुतिबाह्यलिंगधारणंपाखंडं तद्येषांतेपाखंडिनः अनाश्रिताः अधिकारेसत्यप्यकृताश्रमविशेषपरिग्रहाः स्तेनाःसुवर्णाद्युत्तमद्रव्यहारिणः भर्त्तृघ्न्यःपतिघातिन्यः कामगाःकुलटाः आदिग्रहणात्स्वगर्भब्राह्मणघातिन्योगृह्यंते सुराप्योयासांयासुराप्रतिषिद्धातत्पानरताः आत्मत्यागिन्यःविषाग्न्युदकोद्बंधनादिभिरात्मानंयास्त्यजंति एतेषाखंडयादयस्त्रिरात्रंदशरात्रंवेतिवक्ष्यमाणस्याशौचस्योदकदानाद्यौर्ध्वदेहिकस्यचभाजनानभवंति भाजयंतीतिभाजनाः सपिंडादीनामाशौचादिनिमित्तभूतानभवंति अतस्तन्मरणेसपिंडैरुदकदानादिनकार्यमित्येतत्प्रतिपादनपरंवचनं अत्रसुराप्यइत्यादिषुलिंगमविवक्षितम् अनुपादेय

पाखंड्यनाश्रिताःस्तेनाभर्त्तृघ्न्यःकामगादिकाः सुराप्यआत्मत्यागिन्योनाशौचोदकभाजनाः ६

गतत्वात् एतच्चबुद्धिपूर्वविषयं यथाहगौतमः प्रायोनाशकशस्त्राग्निविषोदकोद्बंधनप्रपतनैश्चेच्छतामिति प्रायोमहाप्रस्थानं अनाशकमनशनं गिरिशिखरादवपातःप्रपतनं अत्रचेच्छतामितिविशेषणोपादानात्प्रमादकृतेदोषोनास्तीत्यवगंतव्यं अथकश्चित्प्रमादेनम्रियेताग्न्युदकादिभिः तस्याशौचंविधातव्यंकर्त्तव्याचोदकक्रियेतिअंगिरःस्मरणात् तथामृत्युविशेषादपिआशौचादिनिषेधः चांडालादुदकात्सर्पाद्ब्रा- ४
ह्मणाद्वैद्युतादपि दंष्ट्रिभ्यश्चपशुभ्यश्चमरणंपापकर्मणाम् उदकंपिंडदानंचप्रेतेभ्योयत्प्रदीयते नोपतिष्ठतितत्सर्वमंतरिक्षेविनश्यतीति एत

दपीच्छापूर्वमात्महननविषयं गौतमवचनेनेच्छापूर्वकमेवोदकेनहतस्याशौचनिषेधस्योक्तत्वात् अत्रापिचांडालादुदकात्सर्पादितितत्साहचर्यदर्शनाद्बुद्धिपूर्वविषयत्वनिश्चयः अतोदर्पादिनाचंडालादीन्हंतुंगतोयस्तैर्मारितस्तस्यायंसर्वतएवात्मानंगोपायेदितिविध्यतिक्रमनिमित्तःपिंडदानादिनिषेधः एवंदुष्टदंष्ट्र्यादिग्रहणार्थमाभिमुख्येनदर्पाद्गच्छतोमरणेयंनिषेधइतिअनुसंधेयं अयंचाशौचप्रतिषेधोदशाहादिकालावच्छिन्नस्य विप्रगोनृपहतानांअन्वक्षंचात्मघातिनामितिसद्यःशौचस्यवक्ष्यमाणत्वात् तथादाहादिकमप्येषांनकार्यं नाशौचंनोदकंनाश्रुनदाहाद्यंतकर्मच ब्रह्मदंडहतानांचनकुर्यात्कटधारणमितियमस्मरणात् ब्रह्मदंडहताब्राह्मणदंडहताः प्रेतवहनसाधनंखट्वादिकटशब्देनोच्यते नचाहिताग्निमग्निभिर्दहंति यज्ञपात्रैश्चेत्येतत्श्रुतिविहिताग्नियज्ञपात्रादिप्रतिपत्तिलोपप्रसंगात् अयंस्मार्त्तोदाहादिनिषेधोविप्रादिहताहिताग्निविषयेनास्कंदतीत्याशंकनीयं यतश्चांडालादिहताहिताग्निसंबंधिनामग्नियज्ञपात्राणांस्मृत्यंतरेप्रतिपत्त्यंतरंविधीयते वैतानंप्रक्षिपेदप्सुआवसथ्यंचतुष्पथे पात्राणितुदहेदग्नौयजमानेवृथामृतइति तथातच्छरीरस्यापिप्रतिपत्त्यंतरमुक्तं आत्मनस्त्यागिनांनास्तिपतितानांतथाक्रिया तेषामपितथागंगातोयेसंस्थापनंहितमितिस्मरणात् तस्मादविशेषेणसर्वेषांदहनादिनिषेधः अतःस्नेहादिनानिषेधातिक्रमेप्रायश्चित्तंकर्त्तव्यं कृत्वाग्निमुदकंस्नानंस्पर्शनंवहनंकथां रज्जुच्छेदाश्रुपातंचतप्तकृच्छ्रेणशुध्यतीतिस्मरणात् एतच्चप्रत्येकंबुद्धिपूर्वेवेदितव्यं अबुद्धिपूर्वकरणेतु एषामन्यतमंप्रेतंयोवहेतदहेतवा कटोदकक्रियांकृत्वाकृच्छ्रंसांतपनंचरेदितिसंवर्त्तोक्तंद्रष्टव्यं यःपुनस्तच्छवंकेवलंस्पृष्टमश्रुपातंवापातितंयादि पूर्वोक्तानामकारीचेदेकरात्रमभोजनमितिस्पर्शाश्रुपातयोरुपवासउक्तः असौकृच्छ्रेष्वशक्तस्य तथाबंधनच्छेदनेत्रिमासंभैक्ष्याहारस्त्रिषवणंचेतिसु

या·स्मृ·मि· मंतुनाभिख्याशिलमुक्तं तदप्यशक्तस्यैव एवमन्यान्यपितद्विषयाणिस्मृतिवाक्यानिव्यवस्थापनीयानि अयंचदाहादिप्रतिषेधोअनुष्ठानासमर्थजीर्ण प्रा·
५ वानप्रस्थादिव्यतिरिक्तविषयः तेषामभ्यनुज्ञादर्शनात् वृद्धःशौचस्मृतेर्लुप्तःप्रत्याख्यातभिषक्क्रियः आत्मानंघातयेद्यस्तुभृग्वग्न्यनशनांबुभिः त ३
स्यत्रिरात्रमाशौचंद्वितीयेत्वस्थिसंचयः तृतीयेतूदकंकृत्वाचतुर्थेश्राद्धमाचरेदितिस्मरणात् एवंयेनयेनोपाधिनाआत्महननंशास्त्रेणाभ्यनुज्ञायतेत
द्व्यतिरिक्तमार्गेणात्महननेश्राद्धाद्यौर्ध्वदेहिकेषुनिषिद्धेषुकिंपुनस्तेषांकार्यमित्यपेक्षायावृद्धयाज्ञवल्क्यच्छागलेयाभ्यामुक्तं नारायणबलिःका
र्योलोकगर्हाभयान्नरैः तथातेषांभवेच्छौचंनान्यथेत्यब्रवीद्यमः तस्मात्तेभ्योपिदातव्यमन्नमेवसदक्षिणमिति व्यासेनाप्युक्तं नारायणंसमुद्दि-
श्यशिवंवायत्प्रदीयते तस्यशुद्धिकरंकर्मतद्भवेन्नैतदन्यथेति एवंनारायणबलिःप्रेतस्यशुद्ध्यापादनद्वारेणश्राद्धादिसंप्रदानत्वयोग्यतांजनयतीति
और्ध्वदेहिकमपिसर्वकार्यमेव अतएवषट्त्रिंशन्मतेपिऔर्ध्वदेहिकस्याप्यनुज्ञादृश्यते गोब्राह्मणहतानांचपतितानांतथैवच ऊर्ध्वंसंवत्सरात्कुर्यां
त्सर्वमेवौर्ध्वदेहिकमित्येवंसंवत्सरादूर्ध्वमेवनारायणबलिंकृत्वौर्ध्वदेहिकंकार्यं नारायणबलिश्चेत्थंकार्यः कस्यांचिच्छुक्लैकादश्यांविष्णुंवैवस्वतं
यमंचयथावदभ्यर्च्यतत्समीपेमधुघृतप्लुतांस्तिलमिश्रान्दशपिंडान्विष्णुरूपेणप्रेतमनुस्मरन्प्रेतनामगोत्रेउच्चार्यदक्षिणाग्रेषुदर्भेषुदक्षिणाभिमु
खोदत्वागंधादिभिरभ्यर्च्यपिंडप्रवाहणांतंकृत्वानद्यांक्षिपेत् नपत्न्यादिभ्योदद्यात् ततस्तस्यामेवरात्र्यामयुग्मान्ब्राह्मणानामंत्र्योपोषितःश्वोभू
तेमध्यान्हेविष्ण्वाराधनंकृत्वाएकोद्दिष्टविधिनाब्राह्मणपादप्रक्षालनादितृप्तिप्रश्नांतंकृत्वापिंडपितृयज्ञावृतोच्छेषनाद्यवनेजनांतंतूष्णींकृत्वावि- ५
ष्णवेब्रह्मणेशिवायययमायचपरिवारसहितायचतुरःपिंडान्दत्वानामगोत्रसहितंप्रेतंसंस्मृत्यविष्णोर्नामसंकीर्त्यपंचमंपिंडंदद्यात् ततोविप्रानाचां

तान्दक्षिणाभिस्तोषयित्वातन्मध्येचैकंगुणवत्तमंप्रेतबुद्ध्यासंस्मरन् गोभूहिरण्यादिभिरतिशयेनसंतोष्यततःपवित्रपाणिभिर्विप्रैःप्रेतायति
लोदकंदापयित्वास्वजनैःसार्द्धंभुंजीत सर्पहतेत्वयंविशेषः संवत्सरंयावत्पुराणोक्तविधिनापंचम्यांनागपूजांविधायपूर्णेसंवत्सरेना
रायणबलिंकृत्वासौवर्णनागंदद्यात् गांचप्रत्यक्षां ततःसर्वमौर्ध्वदेहिकंकुर्यात् नारायणबलिस्वरूपंचवैष्णवेभिहितं यथा एकादशींसमासा
द्यशुक्लपक्षस्यवैतिथिं विष्णुंसमर्चयेद्देवंयमंवैवस्वतंतथा दशपिंडान्घृताभ्यक्तान्दर्भेषुमधुसंयुतान् तिलमिश्रान्प्रदद्याद्वैसंयतोदक्षिणामु
खः विष्णुबुद्धौसमासाद्यनद्यंभसितततःक्षिपेत् नामगोत्रग्रहंतत्रपुष्पैरभ्यर्चनंतथा धूपदीपप्रदानंचभक्ष्यंभोज्यंतथापरं निमंत्रयेतविप्रान्वै
पंचसप्तनवापिवा विद्यातपःसमृद्धान्वैकुलोत्पन्नान्समाहितान् अपरेहनिसंप्राप्तेमध्यान्हेसमुपोषितः विष्णोरभ्यर्चनंकृत्वाविप्रांस्तानुपवेशये
त् उदङ्मुखान्यथाज्येष्ठंपितृरूपमनुस्मरन् मनोनिवेश्यविष्णौवैसर्वंकुर्यादतंद्रितः आवाहनादियत्प्रोक्तंदेवपूर्वंतदाचरेत् तृप्तान्ज्ञात्वाततोवि
प्रान्तृप्तिंपृष्ट्वायथाविधि हविष्यव्यंजनेनैवतिलादिसहितेनच पंचपिंडान्प्रदद्याच्चदैवंरूपमनुस्मरन् प्रथमंविष्णवेदद्याद्ब्रह्मणेचशिवाय-
च यमायसानुचारायचतुर्थंपिंडमुत्सृजेत् मृतंसंकीर्त्यमनसागोत्रपूर्वमतःपरम् विष्णोर्नामगृहीत्वैवंपंचमंपूर्ववत्क्षिपेत् विप्रानाचम्यविधिवद्दक्षि
णाभिःसमर्चयेत् एकंवृद्धतमंविप्रंहिरण्येनसमर्चयेत् गवावस्त्रेणभूम्याचप्रेतंतंमनसास्मरन् ततस्तिलांभोविप्रास्तुहस्तैर्दर्भसमन्वितैः क्षि
पेयुर्गोत्रपूर्वंतुनामबुद्धौनिवेश्यच हविर्गंधतिलांभस्तुतस्मैदद्युःसमाहिताः मित्रभृत्यजनैःसार्द्धंपश्चाद्भुंजीतवाग्यतः एवंविष्णुमतेस्थित्वायो
दद्यादात्मघातिने समुद्धरतितंक्षिप्रंनात्रकार्याविचारणा सर्पदंशनिमित्तसौवर्णनागदानंप्रतिकृतिरूपेणभविष्यत्पुराणेसुमंतुनाभिहितं सुव

र्णभारनिष्पन्नंनागंकृत्वातथैवगां व्यासायदत्वाविधिवत्पितुरानृण्यमाप्नुयात् ६ एवमुदकदानंसापवादमभिधायानंतरंकिंकार्यमित्यत्रआह कृ
तमुदकदानंयैस्तान्कृतोदकान्स्नातान्सम्यगुदकादुत्तीर्णान्मृदुशाद्वलेनवोद्गततृणचयावृतेभूभागेसम्यक्स्थितान्पुत्रादीन्कुलवृद्धाःपुरातनैरितिहा
सैर्वक्ष्यमाणैरपवदेयुः शोकनिरसनसमर्थैर्वचोभिर्बोधयेयुः ७ शोकनिरसनसमर्थेतिहासस्वरूपमाह मनुष्यशब्देनजरायुजांडजादिच-
तुर्विधंभूतजातंलक्ष्यते तस्यभावोमानुष्यं तत्रसंसरणधर्मित्वेनकदलीस्तंभवदंतःसाररहितेजलबुद्बुदवदचिरविनश्वरेसंसारेसारस्यस्थिरस्य



कृतोदकान्समुत्तीर्णान्मृदुशाद्वलसंस्थितान् स्नातानपवदेयुस्तानितिहासैःपुरातनैः ७
मानुष्येकदलीस्तंभनिःसारेसारमार्गणम् करोतियःससंमूढोजलबुद्बुदसंनिभे ८ पं
चधासंभृतःकायोयदिपंचत्वमागतः कर्मभिःस्वशरीरोत्थैस्तत्रकापरिदेवना ९

मार्गणमन्वेषणंयःकरोतिससंमूढोअत्यंतविनष्टचित्तः तस्मात्संसारस्वरूपवेदिभिर्भवद्भिरित्थंनकार्यम् ८ किंच जन्मांतरात्मीयशरीरजनितैःक
र्मबीजैःस्वफलोपभोगार्थंपंचधापृथिव्यादिपंचभूतात्मकतयापंचप्रकारंसंभृतोनिर्मितःकायःसयदिफलोपभोगनिवृत्तौपंचत्वमागतःपुनःपृथिव्यादिरू
पतांप्राप्तस्तत्रभवतांकिमर्थापरिदेवनानिष्प्रयोजनत्वान्नानुशोचनंकर्तव्यं वस्तुस्थितेस्तथात्वात् नहिकेनचिद्वस्तुस्थितिरतिक्रमितुंशक्यते ९ ६ ६

किंच अपिच नेदमाश्चर्यंमरणंनाम यतःपृथिव्यादीनिमहांत्यपिभूतानिनाशंगच्छंति तथासमुद्राअपि जरामरणविरहिणोअमराअपि प्रल
यसमयेअवसानंगच्छंति कथमिवास्थिरतयाफेनसंनिभोमरणधर्माभूतसंघोविनाशंनयास्यति उचितमेवहिमरणधर्मिणःप्रयाणं अतोनिष्प्र
योजनःशोकसमावेशः १० अनिष्टापादकत्वादप्यनुशोचनंनकार्यमित्याह यस्मादनुशोचद्भिर्बांधवैर्वदननयननिर्गमितंश्लेष्माश्रुवायस्मादव-

गंत्रीवसुमतीनाशमुदधिर्दैवतानिच फेनप्रख्यःकथंनाशंमर्त्यलोकोनयास्यति १० श्लेष्माश्रु बांधवैर्मुक्तंप्रेतोभुंक्तेय
तोवशः अतोनरोदितव्यंहिक्रियाःकार्याःस्वशक्तितः ११ इतिसंश्रुत्यगच्छेयुर्गृहंबालपुरःसराः विदश्यनिंबप-
त्राणिनियताद्वारिवेश्मनः १२ आचम्याग्न्यादिसलिलंगोमयंगौरसर्षपान् प्रविशेयुःसमालभ्यकृत्वाश्मनिपदंशनैः १३

शोकामोपिप्रेतोभुंक्ते तस्मान्नरोदितव्यं किंतुप्रेतहितेप्सुभिःस्वशक्त्यनुसारेणश्राद्धादिक्रियाःकार्याः ११ एवंकुलवृद्धवचांसिसम्यगाकर्ण्यत्यक्तशोकाः
संतोबालानग्रतःकृत्वागृहंगच्छेयुः गत्वाचवेश्मनोद्वारिस्थित्वानियताःसंयतमनस्काःनिंबपत्राणिविदश्यदशनैःखंडनंकृत्वास्वादित्वाचमनंकृत्वा
ग्न्युदकगोमयसर्षपानालभ्य आदिग्रहणाद्दूर्वाप्रवालमग्निवृषभौवेतिशंखोक्तौदूर्वांकुरवृषभावपिस्पृष्ट्वाश्मनिचपदंनिधायशनैरस्खलितंवेश्मप्र
विशेयुः १२ १३

अतिदेशमाह यदेतत्पूर्वोक्तंनिंबपत्रदशनादिवेश्मप्रवेशनांतंकर्मतन्नकेवलंज्ञातीनामपितुपरेषामपिधर्मार्थंप्रेतालंकारनिर्हरणादिकंकुर्वतांभव-
ति प्रवेशनादिकमित्यत्रआदिशब्दोमांगलिकत्वात्प्रतिलोमक्रमाभिप्रायः तेषांचधर्मार्थंनिर्हरणादौप्रवृत्तानांतत्क्षणाच्छुद्धिमिच्छतांअसपिंडा-
नांस्नानप्राणायामाभ्यामेवशुद्धिः यथापाराशरः अनाथंब्राह्मणंप्रेतंयेवहंतिद्विजातयः पदेपदेयज्ञफलमनुपूर्वंलभंतिते नतेषामशुभंकिंचि
त् विशुद्ध्यतित्रिरात्रेणमातुराप्तांश्चबांधवान् यद्यन्नमत्तितेषांतुदशाहेनैवशुध्यति अनदन्नन्नमन्हैवनचेत्तस्मिन्गृहेवसेदिति अत्रेयंव्यव-

प्रवेशनादिकंकर्मप्रेतसंस्पर्शिनामपि इच्छतांतत्क्षणाच्छुद्धिःपरेषांस्नानसंयमात् १४

स्था यःस्नेहादिनाशवनिर्हरणंकृत्वातदीयमन्नमश्नातितद्गृहेचवसतितस्यदशाहेनैवशुद्धिः यस्तुकेवलंतद्गृहेवसतिनपुनस्तदन्नमश्नातितस्य
त्रिरात्रं यःपुनर्निर्हरणमात्रंकरोतिनतद्गृहेवसतिनचतदन्नमश्नातितस्यैकाहइति एतत्सजातीयविषय विजातीयविषयेपुनर्यज्जातीयप्रेतनिर्हर
तितज्जातिप्रयुक्तमाशौचंकार्यं यथाहगौतमः अवरश्चेद्वर्णःपूर्ववर्णमुपस्पृशेत्पूर्वोवावरंतत्रतच्छवोक्तमाशौचमिति उपस्पर्शनंनिर्हरणं वि-
प्रस्यशूद्रनिर्हरणेमासमाशौचं शूद्रस्यतुविप्रनिर्हरणेदशरात्रमित्येवंशववदाशौचंकार्यमित्यर्थः १४ ७ ७ ७ ७

ब्रह्मचारिणंप्रत्याह आचार्यउक्तलक्षणः मातापिताचपितरौ उपाध्यायश्चपूर्वोक्तः एतान्निर्हृत्यापिव्रतीब्रह्मचारीव्रत्येवनपुनरस्यव्रतभ्रंशः
कटशब्देनाशौचंलक्ष्यते तत्सहचरितमन्नंसकटान्नंतद्ब्रह्मचारीनाश्नीयात् नचाशौचिभिःसहसंवसेत् एवंवदताआचार्यादिव्यतिरिक्तप्रेतनिर्हर-
णेतुब्रह्मचारिणोव्रतलोपइत्यर्थादुक्तंभवति अतएववसिष्ठेनोक्तं ब्रह्मचारिणःशवकर्मणोव्रतान्निर्वृत्तिरन्यत्रमातापित्रोरिति १५ आशौचि-
नांनियमविशेषमाह क्रीतमयाचितंलब्धंवाअशनंयेषांतेक्रीतलब्धाशनाः भवेयुरितिशेषः क्रीतलब्धाशननियमात्तदलाभेऽनशनमर्यास्सि

आचार्यपित्रुपाध्यायान्निर्हृत्यापिव्रतीव्रती सकटान्नंचनाश्नीयान्नचतैःसहसंवसेत् १५
क्रीतलब्धाशनाभूमौस्वपेयुस्तेपृथक्पृथक् पिंडयज्ञावृतादेयंप्रेतायान्नंदिनत्रयम् १६

द्धंभवति अतएववसिष्ठः गृहान्व्रजित्वाअधःप्रस्तरेत्र्यहमनश्नंतआसीरन्क्रीतोत्पन्नेनवावर्तेरन्निति अधःप्रस्तरआशौचिनांशयनासनार्थस्तृ
णमयःप्रस्तरः तेचसपिंडाभूमावेवपृथक्पृथक्शयीरन् नखट्वादौ मनुनाप्यत्रविशेषोदर्शितः अक्षारलवणान्नाःस्युर्निमज्जेयुश्चतेत्र्यहम्
मांसाशनंचनाश्नीयुःशयीरंश्चपृथक्क्षिताविति तथागौतमेनापिविशेषउक्तः अधःशय्याशायिनोब्रह्मचारिणःशवकर्मिणइति तथापिंडपितृ

यज्ञप्रक्रियया प्राचीनावीतित्वादिरूपया प्रेताय दिनत्रयं पिंडरूपमन्नं तूष्णीं क्षितौ देयं यथाह मरीचिः प्रेतपिंडं बहिर्दद्याद्दर्भमंत्रविवर्जितम् प्रागुदीच्यां चरुं कृत्वा स्नातः प्रयतमानस इति दर्भमंत्रविवर्जितत्वमनुपनीतविषयं असंस्कृतानां भूमौ पिंडं दद्यात्संस्कृतानां कुशेष्विति प्रचेतःस्मरणात् तथा कर्तृनियमश्च गृह्यपरिशिष्टाद्विज्ञेयः असगोत्रः सगोत्रो वा यदि स्त्री यदि वा पुमान् प्रथमेहनि यो दद्यात्स दशाहं समापयेदिति तथा द्रव्यनियमश्च शङ्खेन दर्शितः शालिना सक्तुभिर्वापि शाकैर्वाप्यथ निर्वपेत् प्रथमेहनि यद्द्रव्यं तदेव स्याद्दशाहिकम् तूष्णीं प्रसेकं पुष्पं च धूपं दीपं तथैव चेति पिंडश्च पाषाणेन देयः भूमौ माल्यं पिंडं पानीयमुपले वा दद्युरिति शङ्खस्मरणात् न च दद्युरिति बहुवचनेनोदकदानवत्सर्वैः पिंडदानं कार्यमित्याशंकनीयं किंतु पुत्रेणैव कार्यं तदभावे प्रत्यासन्नेन सपिंडानामन्यतमेन तदभावे मातृसपिंडादिना कार्यं पुत्राभावे सपिंडा मातृसपिंडाः शिष्याः दद्युस्तदभावे ऋत्विगाचार्याविति गौतमस्मरणात् पुत्रबहुत्वे पुनर्ज्येष्ठेनैव कार्यं सर्वैरनुमतिं कृत्वा ज्येष्ठेनैव तु यत्कृतं द्रव्येण चाविभक्तेन सर्वैरेव कृतं भवेदिति मरीचिस्मरणात् पिंडसंख्यानियमश्च ब्राह्मणस्य दश पिंडाः क्षत्रियस्य द्वादशेत्येवमाशौचदिवससंख्यया विष्णुनाभिहितः यावदाशौचं प्रेतस्योदकं पिंडमेकं च दद्युरिति तथा स्मृत्यंतरेपि नवभिर्दिवसैर्दद्यान्नव पिंडान्समाहितः दशमं पिंडमुत्सृज्य रात्रिशेषे शुचिर्भवेदिति शङ्खलिखितवचनमपरेद्युः क्रियमाणश्राद्धार्थब्राह्मणनिमंत्रणाभिप्रायेण योगीश्वरेण तु पिंडत्रयदानमभिहितं अनयोश्च गुरुलघुकल्पयोरुदकदानविषयोक्ता व्यवस्था विज्ञेया अत्रापरः शातातपीयो विशेषः आशौचस्य तु ह्रासेपि पिंडान्दद्याद्दशैव तु इति त्रिरात्राशौचिनां पुनः पारस्करेण विशेषो दर्शितः प्रथमे दिवसे देयास्त्रयः पिंडाः समाहितैः द्वितीये चतुरो दद्यादस्थिसंचयनं तथा त्रींस्तु दद्यात्तृतीयेह्नि वस्त्रादि क्षालयेत्तथेति १६ ८ ७

किंच जलं क्षीरं च मृन्मये पात्रद्वये पृथक्पृथगाकाशे शिक्यादावेकाहं स्थापनीयं अत्र विशेषानुपादानात् प्रथमेहनि कार्यं तथा पारस्करवचनात् प्रेतात्र स्नाहीत्युदकं स्थाप्यं पिब चेदमिति क्षीरं तथास्थिसंचयनं च प्रथमादिदिनेषु कार्यं तथाह संवर्तः प्रथमेह्नि तृतीये वा सप्तमे नवमे तथा अस्थिसंचयनं कार्यं दिने तद्गोत्रजैः सहेति क्वचित्तु द्वितीये त्वस्थिसंचय इत्युक्तं वैष्णवे तु चतुर्थदिवसेस्थिसंचयनं कुर्यात् तेषां च गंगांभसि प्रक्षेप इति अतोन्यतमस्मिन्दिने स्वगृह्योक्तविधिनास्थिसंचयनं कार्यं अंगिरसा चात्र विशेषो दर्शितः अस्थिसंचयने यागो देवानां परिकीर्त्तितः प्रेतीभूतं तमुद्दिश्य यः कश्चिन्न करोति चेत् देवतानां तु यजनं तं शपंत्यथ देवताः देवताश्चात्र श्मशानवासिन्यः तत्र पूर्वदग्धाः श्मशानवासिनो देवाः शवानां परिकीर्त्तिता-

जलमेकाहमाकाशे स्थाप्यं क्षीरं च मृन्मये वैतानोपासनाः कार्याः क्रियाश्च श्रुतिनोदनात् १७

इति तेनैवोक्तं अतस्तान्देवानचिरमृतं च प्रेतमुद्दिश्य धूपदीपादिभिः पिंडरूपेण चान्नेन तत्र पूजा कार्येत्युक्तं भवति तथा वपनं च दशमेहनि कार्यम् दशमेहनि संप्राप्ते स्नानं ग्रामाद्बहिर्भवेत् तत्र त्याज्यानि वासांसि केशश्मश्रुनखानि चेति देवलस्मरणात् तथा स्मृत्यंतरेपि द्वितीयेहनि कर्तव्यं क्षुरकर्म प्रयत्नतः तृतीये पंचमे वापि सप्तमे वा प्रदानत इति श्राद्धप्रदानादर्वागनियम इति यावत् वपनं च केषामित्याकांक्षायामापस्तंबेनोक्तं अनुभाविनां च परिवापनमिति अयमर्थः शावदुःखमनुभवंतीत्यनुभाविनः सपिंडास्तेषां चाविशेषेण वपनमुताल्पवयसामित्यपेक्षायामिदमेवोप

तिष्ठते अनुभाविनांपरिवापनमिति अनुपश्चाद्भवंतीत्यनुभाविनोल्पवयसस्तेषांवपनमिति अनुभाविनःपुत्राइतिकेचिन्मन्यंते गंगायांभास्कर क्षेत्रेमातापित्रोर्गुरोर्मृतौ आधानकालेसोमेचवपनंसप्तसुस्मृतमितिनियमदर्शनात् अशक्तत्विलेनसकलश्रौतस्मार्त्तकर्माधिकारनिवृत्तौप्रसक्तायांकेषुचिदभ्यनुज्ञानार्थमाह वितानोग्नीनांविस्तारस्तत्रभवावैतानाः त्रेताग्निसाध्याअग्निहोत्रदर्शपूर्णमासाद्याःक्रियाउच्यंते प्रतिदिनमुपास्यतइत्युपासनोगृह्योग्निस्तत्रभवाऔपासनाःसायंप्रातर्होमक्रियाउच्यंते तोवैतानौपासनाःवैदिक्यःक्रियाःकार्याः कथंवैदिकत्वमितिचेत् श्रुतिचोदनात् तथाहि यावज्जीवमग्निहोत्रंजुहुयादित्यादिश्रुतिभिरग्निहोत्रादीनांचोदनास्पष्टैव तथाअहरहःस्वाहाकुर्यात् अन्नाभावेकेनचिदाकाष्ठादिश्रुतौपासनहोमोपिचोद्यते अत्रचश्रौतत्वविशेषणोपादानात्स्मार्त्तक्रियाणांदानादीनामननुष्ठानंगम्यते अतएववैय्याघ्रपादेनोक्तं स्मार्तकर्मपरित्यागोराहोरन्यत्रसूतके श्रौतेकर्मणितत्कालंस्नातःशुद्धिमवाप्नुयादिति श्रौतानांचकार्यत्वाभिधानंनित्यनैमित्तिकाभिप्रायेण यथाहपैठीनसिः नित्यानिविनिवर्त्तेरन्वैतानवर्ज्यंशालाग्नौचैकइति नित्यानिविनिवर्त्तेरन्नित्यविशेषेणआवश्यकानांनित्यनैमित्तिकानांनिवृत्तौप्रसक्तायांवैतानवर्ज्यमित्यग्नित्रयसाध्यावश्यकानांपर्युदासः शालाग्नौचैकइतिगृह्याग्नौभवानामप्यावश्यकानांपाक्षिकःपर्युदासउक्तः अतस्तेषांशौचंनास्त्येव काम्यानांपुनःशौचाभावादननुष्ठानं मनुनाप्यनेनैवाभिप्रायेणोक्तं प्रत्यूहेन्नाग्निषुक्रियाइति अग्निषुक्रियानप्रत्यूहेदिति अनग्निसाध्यानांपंचमहायज्ञादीनांनिवृत्तिः अतएवसंवर्त्तः होमंतत्रप्रकुर्वीतशुष्कान्नेनफलेनवा पंचयज्ञविधानंतुनकुर्यान्मृत्युजन्मनोरिति वैश्वदेवस्याग्निसाध्यत्वेपिवचनान्निवृत्तिः विप्रोदशाहमासीतवैश्वदेवविवर्जितइतितेनैवोक्तत्वात् सूतकेकर्मणांत्यागःसंध्यादीनांविधीयतेइति य 

द्यपिसंध्यायाविनिवृत्तिःश्रूयतेतथाप्यंजलिप्रक्षेपादिकंकुर्यात् सूतकेसावित्र्याचांजलिंप्रक्षिप्यप्रदक्षिणंकृत्वासूर्यंध्यायन्नमस्कुर्यादितिपैठीनसिस्मरणात् यद्यपिवैतानौपासनाःकार्याइतिसामान्येनोक्तंतथाप्यन्येनकारयितव्यं अन्यएतानिकुर्युरितिपैठीनसिस्मरणात् बृहस्पतिनाप्युक्तं सूतकेमृतकेचैवअशक्तौश्राद्धभोजने प्रवासादिनिमित्तेषुहावयेन्नतुहापयेदिति तथास्मार्त्तत्वेपिपिंडपितृयज्ञश्रवणाकर्माश्वयुज्यादिकश्चनित्यहोमःकार्यएव सूतकेतुसमुत्पन्नेस्मार्त्तकर्मकथंभवेत् पिंडयज्ञंचरुहोमंचसगोत्रेणकारयेदितिजातूकर्ण्यस्मरणात् यद्यपिसांगेकर्मण्यकर्तृत्वंतथापिस्वद्रव्यत्यागात्मकप्रधानंस्वयंकुर्यात् तस्यानन्यनिष्पाद्यत्वात् अतएवोक्तं श्रौतेकर्मणितत्कालंस्नातःशुद्धिमवाप्नुयादिति यत्पुनर्दानंप्रतिग्रहोहोमःस्वाध्यायश्चनिवर्त्ततइतिहोमप्रतिषेधः सकाम्याभिप्रायोवैश्वदेवाभिप्रायोवाव्यवस्थापनीयः तथासूतकान्नभोजनमपिनकार्यं उभयत्रदशाहानिकुलस्यान्नंनभुज्यतइतियमस्मरणात् उभयत्रजननमरणयोः दशाहानीत्याशौचकालोपलक्षणं कुलस्यसूतकयुक्तस्यसंबंध्यन्नंअसकुल्येनभोक्तव्यं सकुल्यानांपुनर्नदोषः सूतकेतुकुलस्यान्नमदोषंमनुरब्रवीदितितेनैवोक्तत्वात् अयंचनिषेधोदातृभोक्त्रोरन्यतरेणजननेमरणेवाज्ञातेसतिवेदितव्यः उभाभ्यामपरिज्ञातेसूतकंनैवदोषकृत् एकेनापिपरिज्ञातेभोक्तुर्दोषमुपावहेदितिषट्त्रिंशन्मतेदर्शनात् तथाविवाहादिषुसूतकोत्पत्तेःप्राक्ब्राह्मणार्थंपृथक्कृतमन्नंभोक्तव्यमेव विवाहोत्सवयज्ञेषुत्वंतरामृतसूतके पूर्वसंकल्पितार्थेषुनदोषःपरिकीर्त्तितइतिबृहस्पतिस्मरणात् तथापरोपिविशेषःषट्त्रिंशन्मतेदर्शितः विवाहोत्सवयज्ञेषुत्वंतरामृतसूतके परैरन्नंप्रदातव्यंभोक्तव्यंचद्विजोत्तमैः भुंजानेषुतुविप्रेषुत्वंतरामृतसूतके अन्यगेहोदकाचांताःसर्वेतेशुचयःस्मृताइति तथाशौचपरिग्रहत्वेपिकेषुचित्द्रव्येषुदोषाभावः यथाहमरीचि

लवणेमधुमांसेचपुष्पमूलफलेषुच शाककाष्ठतृणेष्वप्सुदधिसर्पिःपयःसुच तिलौषधाजिनेचैवपक्वापक्वेस्वयंग्रहः पण्येषुचैवसर्वेषुनाशौचंमृ-
तसूतकेइति पक्वंभक्ष्यजातंनोदकादि अपक्वंतंदुलादि स्वयंग्रहइतिस्वयमेवस्वाम्यनुज्ञातोगृण्हीयादित्यर्थः पक्वापक्वाभ्यनुज्ञानमन्नसत्रप्रवृत्त
विषयं अन्नसत्रप्रवृत्तानामाममन्नमगर्हितं भुक्त्वापक्वान्नमेतेषांत्रिरात्रंतुपयःपिबेदित्यंगिरःस्मरणात् अत्रपक्वशब्दोभक्ष्यव्यतिरिक्तौदना-
दिविषयः शवसंसर्गनिमित्ताशौचेत्वंगिरसाविशेषउक्तः आशौचयस्यसंसर्गादापतेद्गृहमेधिनः क्रियास्तस्यनलुप्यंतेगृह्याणांचनतद्भवेदिति
तदाशौचंकेवलंगृहमेधिनएवनपुनस्तद्गृहेभवानांभार्यादीनांतद्द्रव्याणांचभवेदित्यर्थः अनिक्रांताशौचेप्ययमेवार्थःस्मृत्यंतरेदर्शितः अतिक्रांतेदशा
हेतुपश्चाज्जानातिचेद्गृही त्रिरात्रंसूतकंतस्यनतद्द्रव्यस्यकर्हिचिदिति१७ एवमाशौचिनोविधिप्रतिषेधरूपान्धर्मानभिधायाधुनाशौचनिमित्तका

त्रिरात्रंदशरात्रंवाशावमाशौचमिष्यते ऊनद्विवर्षउभयोःसूतकंमातुरेवहि १८

लनियमंचाह शवनिमित्तंशावं सूतकशब्देनचजननवाचिनातन्निमित्तमाशौचंलक्ष्यते एवंचवदताजननमरणयोराशौचनिमित्तत्वमुक्तंभवति
तच्चजननमरणमुत्पन्नंज्ञातमेवनिमित्तं निर्दशंज्ञातिमरणंश्रुत्वापुत्रस्यजन्मचेत्यादिलिंगदर्शनात् तथा विगतंतुविदेशस्थंशृणुयाद्योह्यनिर्दशं यच्छे
षंदशरात्रस्यतावदेवाशुचिर्भवेदित्यादिवाक्यारंभसामर्थ्याच्च उत्पत्तिमात्रापेक्षत्वेत्वाशौचस्यदशाहाद्याशौचकालनियमास्तत्तत्प्रभृतिकाएवेतिअ- १०
निर्दशज्ञातिमरणश्रवणेदशरात्रशेषमेवाशौचमर्थात्सिध्यतीतियच्छेषंदशरात्रस्येत्याद्यनारंभणीयंस्यात् तस्माज्ज्ञातमेवमरणंजननंचनिमित्तं

तच्चोभयनिमित्तमपिआशौचंत्रिरात्रंदशरात्रंचेष्यतेमन्वादिभिः अत्राशौचप्रकरणेअहर्ग्रहणंरात्रिग्रहणंवाअहोरात्रोपलक्षणार्थं मन्वादिभिरिष्यत
इतिवचनंतदुक्तसपिंडसमानोदकरूपविषयभेदप्रदर्शनार्थं तथाहि दशाहंशावमाशौचंसपिंडेषुविधीयते जननेप्येवमेवस्यान्निपुणांशुद्धिमिच्छ
तांम् जन्मन्येकोदकानांतुत्रिरात्राच्छुद्धिरिष्यते शवस्पृशोविशुध्यंतित्र्यहात्तूदकदायिनइत्येतैर्वाक्यैस्त्रिरात्रदशरात्रयोःसमानोदकसपिंडविषयत्वे
नव्यवस्थाकृता अतःसपिंडानांसप्तमपुरुषावधिकानाअविशेषेणदशरात्रं समानोदकानांत्रिरात्रमिति यत्पुनःस्मृत्यंतरवचनं चतुर्थेदशरात्रंस्यात्ष
ण्निशाःपुंसिपंचमे षष्ठेचतुरहाच्छुद्धिःसप्तमेत्वहरेवत्विति तद्विगीतत्वान्नादरणीयं यद्यप्यविगीतंतथापिमधुपर्कांगपशुवालंभवत्लोकविद्वि
ष्टत्वान्नानुष्ठेयं अस्वर्ग्यंलोकविद्विष्टंधर्ममप्याचरेन्नत्विति मनुस्मरणात् नचसप्तमेप्रत्यासन्नेसपिंडएकाहोविप्रकृष्टाष्टमादिषुसमानोदकेषुत्र्य
हइत्युक्तं एवमविशेषेणसपिंडानामाशौचेप्राप्तेक्वचिन्नियमार्थमाह ऊनद्विवर्षेसंस्थितेउभयोरेवमातापित्रोर्दशरात्रआशौचंनसर्वेषांसपिंडानां ते
षांतुवक्ष्यति आदंतजननात्सद्यइति तथाचपैंग्यः गर्भस्थेप्रेतेमातुर्दशाहंजातउभयोःकृतेनाम्निसोदराणांचेति अथवाअयमर्थः ऊनद्विवर्षेसं
स्थितेउभयोर्मातापित्रोरेवअस्पृश्यत्वलक्षणमाशौचं नसपिंडानां तथास्मृत्यंतरे ऊनद्विवर्षेप्रेतेमातापित्रोरेवनेतरेषामिति अस्पृश्यत्वलक्षणम
भिप्रेतं इतरस्यपुनःकर्मण्यनधिकारलक्षणस्यसपिंडेष्वपिआदंतजन्मनःसद्यइत्यादिभिर्विहितत्वात् अत्रदृष्टांतःसूतकंमातुरेवहीति यथासूत
कंजनननिमित्तमस्पृश्यत्वलक्षणमाशौचंमातुरेवकेवलंतथोनद्विवर्षोपरमेमातापित्रोरेवास्पृश्यत्वमिति ऊनद्विवर्षेसपिंडानामस्पृश्यत्वंप्रतिषेध
तान्यत्रास्पृश्यत्वमभ्यनुज्ञातंभवति तथाचदेवलः स्वाशौचकालाद्विज्ञेयंस्पर्शनंचत्रिभागतः शूद्रविट्क्षत्रविप्राणांयथाशास्त्रंप्रचोदितमिति एत

च्चानुपनीतप्रयाणनिमित्ते अतिक्रांताशौचेचत्रिरात्रादौवेदितव्यं उपनीतविषयेपिनेनैवोक्तं दशाहादित्रिभागेनकृतेसंचयनेक्रमात् अंगस्पर्शनमिच्छंतिवर्णानांतत्त्वदर्शिनः त्रिचतुःपंचदशभिःस्पृश्यावर्णाःक्रमेणतु भोज्यान्नोदशभिर्विप्रःशेषाद्वित्रिषडुत्तरैरिति द्व्युत्तरैर्दशभिः त्र्युत्तरैर्द्वादशभिः षडुत्तरैःपंचदशभिरितिद्रष्टव्यं १८ जनननिमित्तमस्पृश्यत्वलक्षणमाशौचमाह सूतकंजनननिमित्तंअस्पृश्यत्वलक्षणमाशौचं पित्रोर्मातापित्रोरेव नसर्वेषांसपिंडानां तत्रास्पृश्यत्वंमातुर्ध्रुवंदशाहपर्यंतस्थिरमित्यर्थः कुतस्तदसृग्दर्शनात् तस्याःसंबंधित्वेनासृजोदर्शनात् अतएववसिष्ठः नाशौचंविद्यतेपुंसःसंसर्गंचेन्नगच्छति रजस्तत्राशुचिज्ञेयंतच्चपुंसिनविद्यतेइति पितुस्तुध्रुवंनभवति स्नानमात्रेणास्पृश्यत्वंनि

पित्रोस्तुसूतकंमातुस्तदसृग्दर्शनाद्ध्रुवम् तदहर्नप्रदुष्येतपूर्वेषांजन्मकारणात् १९

वर्त्तते यथाहसंवर्त्तः जातेपुत्रेपितुःस्नानंसचैलंतुविधीयते माताशुध्येद्दशाहेनस्नानात्तुस्पर्शनंपितुरिति माताशुद्ध्येद्दशाहेनेत्येतत्संव्यवहारयोग्यतामात्रं अदृष्टार्थेषुपुनःकर्मसुपैठीनसिनाविशेषउक्तः सूतिकापुत्रवतीविंशतिरात्रेणकर्माणिकारयेत् मासेनस्त्रीजननीमिति अंगिरसाच सपिंडानामस्पृश्यत्वाभावःस्पष्टीकृतः सूतकेसूतिकावर्ज्यंसंस्पर्शोननिषिध्यते संस्पर्शेसूतिकायास्तुस्नानमेवविधीयतेइति यस्मिन्दिवसे कुमारजननंतदहर्नप्रदुष्येततन्निमित्तदानाद्यधिकारापहारकृन्नभवतीत्यर्थः यस्मात्तस्मिन्नहनिपूर्वेषांपित्रादीनांपुत्ररूपेणजन्मउत्पत्तिः त ११

स्मात्तदहर्नप्रदुष्येत तथाचवृद्धयाज्ञवल्क्येनोक्तं कुमारजन्मदिवसेविप्रैःकार्यःप्रतिग्रहः हिरण्यभूगवाश्वाजवासःशय्यासनादिषु तत्रसर्वंप्रतिग्राह्यंकृतान्नंनतुभक्षयेत् भक्षयित्वातुतन्मोहाद्द्विजश्चांद्रायणंचरेदिति व्यासेनाप्यत्रविशेषउक्तः सूतिकावासनिलयाजन्मदानामदेवताः तासांयागनिमित्तंतुशुचिर्जन्मनिकीर्त्तिता प्रथमेदिवसेषष्ठेदशमेचैवसर्वदा त्रिष्वेतेषुनकुर्वीतसूतकंपुत्रजन्मनि मार्कंडेयेनाप्युक्तं रक्षणीया तथाषष्ठीनिशातत्रविशेषतः रात्रौजागरणंकार्यंजन्मदानांतथाबलिः पुरुषाःशस्त्रहस्ताश्चनृत्यगीतैश्चयोषितः रात्रौजागरणंकुर्युर्दशम्यांचैवसूतकेइति १९ आशौचमध्येपुनर्जननेमरणेवाजातेप्रतिनिमित्तंनैमित्तिकमावर्त्ततइतिन्यायेनपुनर्दशाहाद्याशौचप्राप्तौतदपवादमाह

अंतराजन्ममरणेशेषाहोभिर्विशुद्ध्यति

वर्णापेक्षयावयोवस्थापेक्षयावायस्ययावानाशौचकालस्तदंतरातत्समस्यततोन्यूनस्यवाशौचस्यनिमित्तभूतेजननेमरणेवाजातेपूर्वाशौचावशिष्टैरेवाहोभिर्विशुद्ध्यति नपुनःपश्चादुत्पन्नजननादिनिमित्तंपृथक्पृथगाशौचंकार्यं यदापुनरल्पाद्वर्त्तमानाशौचाद्दीर्घकालमाशौचमंतरापतति तदानपूर्वशेषेणशुद्धिः यथाहोशनाः स्वल्पाशौचस्यमध्येतुदीर्घाशौचंभवेद्यदि नपूर्वेणविशुद्धिःस्यात्स्वकालेनैवशुद्ध्यतीति यमोप्याह अहोवृद्धिमदाशौचंपश्चिमेनसमापयेदिति अत्रचांतराजन्ममरणेइतियद्यपिविशेषेणाभिहितंतथापिनसूतकांतर्वर्त्तिनःशावस्यपूर्वाशौचशेषेणशुद्धिः

यथाहांगिराः सूतके मृतकंचेत्स्यान्मृतकेत्वथसूतकम् तत्राधिकृत्यमृतकंशौचंकुर्यान्नसूतकमिति तथाषट्त्रिंशन्मतेपि शावाशौचेसमुत्पन्ने
सूतकंतुयदाभवेत् शावेनशुध्यतेसूतिर्नसूतिःशावशोधिनीति तस्मान्नसूतकांतःपातिनःशावस्यपूर्वशेषेणशुद्धिः किंतुशावांतःपातिन एवसूत
कस्य तथासजातीयांतःपातित्वेपिशावस्यक्वचित्पूर्वशेषेणशुद्धेरपवादःस्मृत्यंतरेदर्शितः मातर्यग्रेप्रमीतायामशुद्धौम्रियतेपिता पितुःशेषेण
शुद्धिःस्यात्मातुःकुर्यात्तुपक्षिणीमिति अयमर्थः मातरिपूर्वमृतायांतन्निमित्ताशौचमध्येयदिपितुरुपरमःस्यात्तदानपूर्वशेषेणशुद्धिः किंतु
पितुःप्रयाणनिमित्ताशौचकालेनैवशुद्धिःकार्या तथापितुःप्रयाणनिमित्ताशौचमध्येमातरिस्वर्यातायामपिनपूर्वशेषमात्राच्छुद्धिः किंतुपूर्वाशौ-
चंसमाप्योपरिपक्षिणींक्षिपेदिति तथाशौचसंनिपातकालविशेषकृतोप्यपवादोगौतमेनोक्तः रात्रिशेषेसतिद्वाभ्यांप्रभातेसतितिसृभिरिति अय
मर्थः रात्रिमात्रावशिष्टेपूर्वाशौचेयद्याशौचांतरसंनिपतेनतर्हिपूर्वाशौचंसमाप्यानंतरंद्वाभ्यांरात्रिभ्यांशुद्धिः प्रभातेपुनस्तस्यारात्रेःपश्चिमेया
मेजननाद्याशौचांतरसंनिपातेसतितिसृभीरात्रिभिःशुद्धिः नपुनस्तच्छेषमात्रेण शातातपेनाप्युक्तं रात्रिशेषेद्व्यहाच्छुद्धिर्यामशेषेशुचिस्त्र्य-
हादिति प्रेतक्रियापुनःसूतकसंनिपातेपिननिवर्त्तनइतितेनैवोक्तं अंतर्दशाहेजननात्पश्चात्स्यान्मरणंयदि प्रेतमुद्दिश्यकर्त्तव्यंपिंडदानंस्वबंधुभिः
प्रारब्धेप्रेतपिंडेतुमध्येचेज्जननंभवेत् तथैवाशौचपिंडांस्तुशेषान्दद्याद्यथाविधीति तथाशावाशौचयोःसंनिपातेपिप्रेतकृत्यंकार्यंतुल्यन्याय
त्वात् तथाजातकर्मादिकमपिपुत्रजन्मनिमित्तमाशौचांतरसंनिपातेपिकार्यमेव यथाहप्रजापतिः आशौचेतुसमुत्पन्नेपुत्रजन्मयदाभवे १२
त् कर्तुस्तात्कालिकीशुद्धिःपूर्वाशौचेनशुध्यतीति पूर्णप्रसवकालजननाशौचमभिधायाधुनाअप्राप्तकालगर्भनिःसरणनिमित्तमाशौचमाह

स्रवतिर्यद्यपिलोकेद्रवद्रव्यकर्तृकेपरिस्पंदेप्रयुज्यतेतथाप्यत्रद्रवाद्रवद्रव्यसाधारणरूपेधःपतनेवर्त्तते कुतोद्रवत्वस्यप्रथममासएवसंभवात्तत्रच-
मासतुल्यानिशाइतिबहुवचनानुपपत्तेः गर्भस्रावेयावंतोगर्भग्रहणमासास्तत्समसंख्याकानिशाःशुद्धेःकारणं एतच्चस्त्रियाएव गर्भस्रावेमास
तुल्यारात्रयःस्त्रीणांस्नानमात्रमेवपुरुषस्येतिवृद्धवसिष्ठस्मरणात् यत्तुनर्गौतमेनत्र्यहंचेतित्रिरात्रमुक्तं तन्मासत्रयादर्वाग्वेदितव्यम् गर्भस्तुत्यां
यथामासमचिरेतूत्तमेत्रयः राजन्येतुचतूरात्रंवैश्येपंचाहमेवतु अष्टाहेनतुशूद्रस्यशुद्धिरेषाप्रकीर्त्तितेतिमरीचिस्मरणात् अचिरेमासत्रयादर्वा
क्गर्भस्रावेउत्तमेब्राह्मणजातौत्रिरात्रमित्यर्थः एतच्चषण्मासपर्यंतंद्रष्टव्यम् सप्तमादिषुपुनःपरिपूर्णमेवप्रसवाशौचंकार्यं तत्रपरिपूर्णागर

गर्भस्रावेमासतुल्यानिशाःशुद्धेस्तुकारणम् २०

र्भस्यजीवतोनिर्गमदर्शनात् तत्रचलोकेप्रसवशब्दप्रयोगात् षण्मासाभ्यंतरेयावद्गर्भस्रावोभवेद्यदा तदामाससमैस्तासांदिवसैःशुद्धिरिष्यते
अतऊर्ध्वंस्वजात्युक्तंतासामाशौचमिष्यते सद्यःशौचंसपिंडानांगर्भस्यपतनेसतीतिस्मरणात् एतच्चसपिंडानांसद्यःशौचविधानंद्रवभूतगर्भपत
नेवेदितव्यं यत्तुनर्वसिष्ठवचनं ऊनद्विवार्षिकेप्रेतेगर्भस्यपतनेचसपिंडानांत्रिरात्रमितितत्पंचमषष्ठयोःकठिनगर्भपतनविषयं आचतुर्थाद्भ
वेत्स्रावःपातःपंचमषष्ठयोः अतऊर्ध्वंप्रसूतिःस्याद्दशाहंसूतकंभवेत् स्रावेमातुस्त्रिरात्रंस्यात्सपिंडाशौचवर्जनम् पातेमातुर्यथामासंपित्रादी

नांदिनत्रयमितिमरीचिस्मरणात् सप्तममासप्रभृतिमृतजननेजातमृतेवासपिंडानांजनननिमित्तंपरिपूर्णमाशौचं जातमृतेमृतजातेवासपिंडा- 
नांदशाहमितिमरीचिस्मरणात् अतःसूतकेचेदोत्थानादाशौचंसूतकवदितिपारस्करवचनाच्च ओत्थानादासूतिकायाउत्थानाद्दशाहमितियावत् सूत 
कवदितिशिशुपरमनिमित्तोदकदानरहितमित्यर्थः बृहन्मनुरपि दशाहाभ्यंतरेबालेप्रमीतेतस्यबांधवैः शावाशौचंनकर्त्तव्यंसूत्याशौचंविधीयतेइ-
ति तथाचस्मृत्यंतरमपि अंतर्दशाहोपरतस्यसूतकाहोभिरेवाशौचमिति एवमादिवचननिचयपर्यालोचनयासपिंडानांजनननिमित्ताशौचसं-
कोचोनास्तीतिगम्यते यत्पुनर्बृहद्विष्णुवचनं जातमृतेमृतजातेवाकुलस्यसद्यःशौचमिति तच्छिशुपरमनिमित्तस्याशौचस्यस्नानाच्छुद्धिप्रतिपा
दनपरम् नप्रसवनिमित्तस्य तथाचपारस्करः गर्भेयदिविपत्तिःस्याद्दशाहंसूतकंभवेत् सपिंडानांप्रसवनिमित्तस्यविद्यमानत्वात् जीवन्जातो
यदिप्रेयात्सद्यएवविशुद्ध्यतीतिप्रेताशौचाभिप्रायम् तथाशंखेनोक्तं प्राङ्नामकरणात्सद्यःशौचमिति यत्पुनःकात्यायनवचनम् अनिवृत्ते
दशाहेतुपंचत्वंयदिगच्छति सद्यएवविशुद्धिःस्यान्नप्रेतंनोदकक्रियेति तदपिवैष्णवेनसमानार्थं यदात्वनप्रेतंनैवसूतकमितिपाठस्तदासूतकमं-
स्पृश्यत्वंनैवपित्रादीनांभवतीत्यर्थः अथवायमर्थः अंतर्दशाहेयदिशिशुपरमस्तदानप्रेताशौचं यदितत्रसपिंडजननंतदासूतकमपिनैवकार्यं
किंतुपूर्वाशौचेनैवशुद्धिरिति यत्तुबृहन्मनुवचनं जीवन्जातोयदिततोमृतःसूतकएवतु सूतकंसकलंमातुःपित्रादीनांत्रिरात्रकमिति यच्च
बृहत्प्रचेतोवचनम् मुहूर्त्तंजीवतोबालःपंचत्वंयदिगच्छति मातुःशुद्धिर्दशाहेनसद्यःशुद्धास्तुगोत्रिणइति तत्रेयंव्यवस्था जननानंतरंना- ११
भिवर्द्धनात्प्राङ्मृतौपित्रादीनांजनननिमित्तमाशौचंदिनत्रयं सद्यःशौचंत्वग्निहोत्राद्यर्थं अग्निहोत्रार्थंस्नानोपस्पर्शनात्तत्कालंशौचमितिशं-

खस्मरणात् नाभिवर्धनोत्तरकालंतुशिशुप्रयाणेपिजनननिमित्तंसंपूर्णमाशौचंसपिंडानां यावन्नच्छिद्यतेनालंतावन्नाप्नोतिसूतकं छि-
न्नेनालेततःपश्चात्सूतकंतुविधीयतेइतिजैमिनिस्मरणात् मनुनाप्ययमर्थोदर्शितः रात्रिभिर्मासतुल्याभिर्गर्भस्रावेविशुद्ध्यति रजस्युपर
तेसाध्वीस्नानेनस्त्रीरजस्वलेतिपूर्वभागस्यार्थोदर्शितः उत्तरस्यत्वयमर्थः रजसिनिःसरणादुपरतेनिवृत्तेरजस्वलास्त्रीस्नानेनसाध्वीदैवा-
दिकर्मयोग्याभवति स्पर्शनादिविषयेपुनरनुपरतेपिरजसिचतुर्थेहनिस्नानाच्छुद्धाभवति तदुक्तंवृद्धमनुना चतुर्थेहनिसंशुद्धाभवतिव्या
वहारिकीति तथास्मृत्यंतरं शुद्धाभर्त्तुश्चतुर्थेन्हिस्नानेनस्त्रीरजस्वला दैवेकर्मणिपित्र्येचपंचमेहनिशुद्ध्यतीति पंचमेहनीतिरजोनिवृत्ति
कालोपलक्षणार्थं यदारजोदर्शनादारभ्यपुनःसप्तदशदिनाभ्यंतरेरजोदर्शनंतदाअशुचित्वंनास्त्येव अष्टादशेत्वेकाहाच्छुद्धिः एकोनविंशेद्व्यहा
त् ततउत्तरेषुत्र्यहाच्छुद्धिः यथाहात्रिः रजस्वलायदिस्नातापुनरेवरजस्वला अष्टादशादिनादर्वागशुचित्वंनविद्यते एकोनविंशतेरर्वागेकाहं
स्यात्ततोद्व्यहम् विंशत्प्रभृत्युत्तरेषुत्रिरात्रमशुचिर्भवेदिति यत्तुचतुर्दशदिनादर्वागशुचित्वंनविद्यतइतिस्मृत्यंतरंतत्रस्नानप्रभृतित्वमभिप्रे-
तमतोनविरोधः अयंचाशुचित्वप्रतिषेधोयस्याविंशतिदिनोत्तरकालमेवप्रायशोरजोदर्शनंतद्विषयः यस्याःपुनरारूढयौवनायाःप्रागेवाष्टाद
शदिनात्प्राचुर्येणरजोनिर्गमस्तस्यास्त्रिरात्रमेवाशौचं तयाचयावत्त्रिरात्रंस्नानादिरहितयास्थातव्यं रजस्वलात्रिरात्रमशुचिर्भवति सात्वनां
जीतनाभ्यंजीतनाप्सुस्नायादधःशयीतनदिवास्वप्यात् नग्रहान्वीक्षेतनाग्निंस्पृशेत्नाश्नीयान्नरज्जुंसृजेत् नचदंतान्धावयेत् नहसेन्नचकिं-
चिदाचरेत् अखर्वेणपात्रेणपिबेदंजलिनावा पात्रेणलोहितायसेनवेतिविज्ञायतइतिवसिष्ठस्मरणात् आंगिरसेपिविशेषः हस्तेश्नीयान्मृन्म

येवाहविर्भुक्क्षितिशायिनी रजस्वलाचतुर्थेन्हिस्नात्वाशुद्धिमवाप्नुयादिति पाराशरेपिविशेषः स्नानेनैमित्तिकेप्राप्तेनारीयदिरजस्वला पात्रां
तरिततोयेनस्नानंकृत्वाव्रतंचरेत् सिक्तगात्राभवेदद्भिःसांगोपांगाकथंचन नवस्त्रपीडनंकुर्यान्नान्यद्वासश्चधारयेदिति उशनसाप्यत्रविशे
षोदर्शितः ज्वराभिभूतायानारीरजसाचपरिप्लुता कथंतस्याभवेच्छौचंशुद्धिःस्यात्केनकर्मणा चतुर्थेहनिसंप्राप्तेस्पृशेदन्यातुतांस्त्रियं सास
चैलावगाह्यापःस्नात्वास्नात्वापुनःस्पृशेत् दशद्वादशकृत्वोवाआचमेच्चपुनःपुनः अंतेचवाससांत्यागस्ततःशुद्धाभवेच्चसा दद्याच्छक्त्या
ततोदानंपुण्याहेनविशुध्यतीति अयंचातुरमात्रेस्नानप्रकारोनुसरणीयः आतुरेस्नानउत्पन्नेदशकृत्वोह्यनातुरःस्नात्वास्नात्वास्पृशेदेनंततः
शुध्येत्सआतुरइतिपाराशरस्मरणात् यदातुरजस्वलायाःसूतिकायावामृतिर्भवतितदायंस्नानप्रकारः सूतिकायांमृतायांतुकथंकुर्वंतियाज्ञि
काः कुंभेसलिलमादायपंचगव्यंतथैवच पुण्यर्ग्भिरभिमंत्र्यापोवाचाशुद्धिंलभेत्ततः तेनैवस्नापयित्वातुदाहंकुर्याद्यथाविधि रजस्वला-
यास्तु पंचभिःस्नापयित्वातुगव्यैःप्रेतांरजस्वलाम् वस्त्रांतरावृतांकृत्वादाहयेद्विधिपूर्वकमिति एतच्चरजोदर्शनपुत्रजन्मादियद्युदयोत्तरका
लमुत्पन्नंतदानद्दिवसप्रभृत्याशौचाहोरात्रगणनाकार्या यदातुरजन्यांरजोदर्शनपुत्रजन्मादिजातंतदार्धरात्रात्प्राक्जननाद्युत्पत्तौपूर्वदिवसैक
देशव्यापित्वेपिआशौचस्यतत्पूर्वदिवसप्रभृत्येवगणनाकार्येत्येकःकल्पः रात्रिंत्रेधाविभज्याद्यभागद्वयेजननादौजातेपूर्वदिनंग्राह्यमितिद्वि
तीयः प्रागुदयादित्यपरः यथाहकश्यपः उदितेतुयदासूर्येनारीणांदृश्यतेरजः जननंवाविपत्तिर्वायस्याहस्तस्यशर्वरी अर्द्धरात्रावधिःकालः १४
सूतकादौविधीयते रात्रिंकुर्यात्त्रिभागांतुद्वौभागौपूर्वएवतु उत्तरांशःप्रभातेनयुज्यतेऋतुसूतके रात्रावेवसमुत्पन्नेमृतेरजसिसूतके पूर्वमेव-

दिनंग्राह्यंयावन्नोदयतेरविरिति एतेषांचकल्पानां देशाचारतोव्यवस्थाविज्ञेया इदंचाशौचमाहिताग्नेरुपरमेसंस्कारदिवसप्रभृतिकर्त्तव्यं अ
नाहिताग्नेस्तुमरणदिवसप्रभृतिसंचयनंतूभयोरपिसंस्कारदिवसप्रभृतीतिविवेचनीयम् यथाहांगिराः अनग्निमतउत्क्रांतेःसाग्नेःसंस्का
रकर्मणः शुद्धिःसंचयनंदाहान्मृताहस्तुयथातिथीति साग्नेःसंस्कारकर्मणइतिश्रवणादाहिताग्नौपितरिदेशांतरमृतेतत्पुत्रादीनामासंस्कारात्सं
ध्यादिकर्मलोपोनास्तीत्यनुसंधेयं तथाचपैठीनसिः अनग्निमतउत्क्रांतेराशौचंहिद्विजातिषु दाहादग्निमतोविद्याद्विदेशस्थेमृतेसतीति २०
सपिंडत्वादिनादशाहादिप्राप्तौक्वचिन्मृत्युविशेषेणापवादमाह नृपोभिषिक्तःक्षत्रियादिः गोग्रहणंशृंगिदंष्ट्र्यादितिरश्चामुपलक्षणार्थं विप्रग्र-

हतानांनृपगोविप्रैरन्वक्षंचात्मघातिनाम्

हणंसत्यजोपलक्षणम् एतैर्हतानांसंबंधिनोयेसपिंडास्तेषांविषोद्बंधनादिभिःबुद्धिपूर्वमात्मानंयेव्यापादयंतितेआत्मघातिनः आत्मघातिग्रहणं
पारवंड्यनाश्रिताइत्येकयोगोपात्तपतितमात्रोपलक्षणार्थं तत्संबंधिनांचान्वक्षमनुगतमक्षमन्वक्षंसद्यःशौचमित्यर्थः नपुनर्दशाहादिकम्
तथाचगौतमः गोब्राह्मणहतानामन्वक्षंराजक्रोधाच्चायुद्धेप्रायोनाशकशस्त्राग्निविषोदकोद्बंधनप्रपतनैश्चेच्छतामिति क्रोधग्रहणंप्रमादव्या
पादितनिरासार्थं अयुद्धग्रहणंयुद्धहतस्यैकाहमाशौचमस्तीतिज्ञापनार्थं ब्राह्मणार्थेविपन्नानांयोषितांगोग्रहेपिच आहवेपिहतानांचएक

रात्रमशौचकमितिस्मरणात् एतच्चयुद्धकालक्षतेनैव कालांतरविपन्नस्यसमरमूर्धनिहतस्यपुनःसद्यःशौचं यथाहमनुः उद्यतैराहवेशस्त्रैःक्षत्र धर्महतस्यच सद्यःसंतिष्ठतेयज्ञस्तथाशौचमितिस्थितिरिति ज्ञातस्यैवजननादेरशौचनिमित्तत्वाज्जन्मादिदिनादुत्तरकालेपिज्ञातेदशाहादि प्राप्तावपवादमाह प्रोषितेदेशांतरस्थेयत्रस्थेन प्रथमदिवसएवसपिंडजननादिकंनज्ञायतेतस्मिन्सपिंडेकालस्यदशाहाद्यवच्छिन्नस्ययःशेषो वशिष्टकालःसएवशुद्धिहेतुर्भवति पूर्णेपुनराशौचकालेदशाहादिकेप्रेतायोदकंदत्वाशुचिर्भवति उदकदानस्यस्नानपूर्वकत्वात्स्नात्वोदकंदत्वा शुचिर्भवति तदुक्तंमनुना निर्दशंज्ञातिमरणंश्रुत्वापुत्रस्यजन्मच सवासाजलमाप्लुत्यशुद्धोभवतिमानवइति पूर्णेदत्वोदकंशुचिरितिप्रे-

प्रोषितेकालशेषःस्यात्पूर्णेदत्वोदकंशुचिः २१

तोदकदानसहचरितस्याशौचकालस्यशुद्धिहेतुत्व विधानात् जन्मन्यतिक्रांताशौचंसपिंडानांनास्तीतिगम्यते पितुस्तुनिर्दशेपिजननेस्नानमस्त्येव श्रुत्वापुत्रस्यजन्मचेतिवचनात् एतच्चपुत्रग्रहणंजन्मनिसपिंडानामतिक्रांताशौचंनास्तीत्यत्रज्ञापकम् अन्यथानिर्दशंज्ञातिमरणंश्रुत्वाजन्मच १५
निर्दशमित्येवावक्ष्यत् तथाचदेवलः नाशुद्धिःप्रसवाशौचेव्यतीतेषुदिनेष्वपीति तस्माद्विपत्तावेवातिक्रांताशौचमितिस्थितिः केचिदन्यथेमं श्लोकंपठंति प्रोषितेकालशेषःस्यादशेषेत्र्यहएवतु सर्वेषांवत्सरेपूर्णेप्रेतेदत्वोदकंशुचिरिति प्रोषितेप्रेतेसर्वेषांब्राह्मणक्षत्रियादीनामवि-

शेषेणकालशेषःशुद्धिहेतुः अशेषेपुनरतिक्रांतेदशाहादौसर्वेषांत्र्यहमेवाशौचंसंवत्सरेपूर्णेयदिप्रोषितप्रयाणमवगतंस्यात्तदासर्वोब्राह्मणादिः स्नात्वोदकंदत्वाशुचिःस्यात् तथाचमनुः संवत्सरेव्यतीतेतुस्पृष्ट्वैवापोविशुध्यतीति अयंचत्र्यहोदशाहादूर्ध्वमासत्रयादर्वाग्द्रष्टव्यः पूर्वोक्तंस द्यःशौचंतुनवममासादूर्ध्वमर्वाक्संवत्सरात्द्रष्टव्यम् यत्पुनर्वासिष्ठवचनं ऊर्ध्वंदशाहाच्छ्रुत्वैकरात्रमिति तदूर्ध्वंषण्मासेभ्योयावन्नवमं यद- पिगौतमवचनं श्रुत्वाचोर्ध्वंदशम्याःपक्षिणीतितन्मासत्रयादूर्ध्वमर्वाक्षष्ठात् तथाचवृद्धवसिष्ठः मासत्रयेत्रिरात्रंस्यात्षण्मासेपक्षिणीतथा अहस्तुनवमादर्वागूर्ध्वंस्नानेनशुध्यतीति एतच्चमातापितृव्यतिरिक्तविषयम् पितरौचेन्मृतौस्यातांदूरस्थोपिहिपुत्रकः श्रुत्वातद्दिनमारभ्यदशा हंसूतकीभवेदितिपैठीनसिस्मरणात् तथाचस्मृत्यंतरेपि महागुरुनिपातेतुआर्द्रवस्त्रोपवासिना अतीतेब्देपिकर्त्तव्यं प्रेतकार्यंयथाविधीति सं वत्सरादूर्ध्वमपिप्रेतकार्यमाशौचोदकदानादिकंकार्यं नपुनःस्नानमात्राच्छुद्धिरित्यर्थः पितृपत्न्यामपिमातृव्यतिरिक्तायांस्मृत्यंतरेविशेषोदर्शितः पितृपत्न्यामपेतायांमातृवर्ज्यंद्विजोत्तमः संवत्सरेव्यतीतेपित्रिरात्रमशुचिर्भवेदिति यस्तुनद्यादिव्यवहितेदेशांतरेमृतस्तत्सपिंडानांदशा हादूर्ध्वमासत्रयादर्वागपिसद्यःशौचं देशांतरमृतंश्रुत्वाक्लीबेवैखानसेयतौ मृतेस्नानेनशुध्यंतिगर्भस्रावेचगोत्रिणइति देशांत रलक्षणंचबृहस्पतिनोक्तं महानद्यंतरंयत्रगिरिर्वाव्यवधायकः वाचोयत्रविभिद्यंतेतद्देशांतरमुच्यते देशांतरंवदंत्येकेषष्टियोजन मायतम् चत्वारिंशद्वदंत्यन्येत्रिंशदन्येतथैवचेति इदंचातिक्रांताशौचमुपनीतोपरमविषयम् नपुनर्वयोवस्थाविशेषाशौचविषयम पि तथाचोक्तंव्याघ्रपादेन तुल्यंवयसिसर्वेषामतिक्रांतेतथैवच उपनीतेतुविषमंतस्मिन्नेवातिकालजमिति अयमर्थः वयसित्रिवर्षा

दिरूपेयदाशौचमादंतजन्मनः सद्यइत्यादिवाक्यविहितंतत्सर्वेषांब्राह्मणादिवर्णानांतुल्यमविशिष्टं अतिक्रांतेदशाहादिकेत्र्यहादिय
दाशौचंतदपिसर्वेषामविशिष्टं उपनीतेपुनरुपरतेदशद्वादशपंचदशत्रिंशद्दिनानीत्येवंविषमाशौचंब्राह्मणादीनां तस्मिन्नेवोपनीतो
परमएवअतिकालजमतिक्रांताशौचंभवति नवयोवस्थाशौचातिक्रमइति २१ क्षत्रियादिषुदशरात्रस्यसपिंडाशौचस्यापवादमा
ह क्षत्रियवैश्यशूद्राणांसपिंडजननेतदुपरमेचयथाक्रमेणद्वादशपंचदशत्रिंशद्दिनान्याशौचंभवति न्यायवर्त्तिनःपुनःशूद्रस्यपाक
यज्ञद्विजशुश्रूषादिरतस्यतदर्धंतस्यमासस्यार्धंपंचदशरात्रमाशौचं एवंचत्रिरात्रंदशरात्रंवेत्येतद्दशरात्रमाशौचंपारिशेष्यात् ब्रा

क्षत्रस्यद्वादशाहानिविशःपंचदशैवतु त्रिंशद्दिनानिशूद्रस्यतदर्धंन्यायवर्त्तिनः २२

ह्मणविषयेव्यवतिष्ठते स्मृत्यंतरेषुतुक्षत्रियादीनांदशाहादयोप्याशौचकल्पादर्शिताः यथाहपराशरः क्षत्रियस्तुदशाहेनस्वकर्मनि
रतःशुचिः तथैवद्वादशाहेनवैश्यःशुद्धिमवाप्नुयात् तथाचशातातपः एकादशाहाद्राजन्योवैश्योद्वादशभिस्तथा शूद्रोविंशतिरात्रे
णशुध्येतमृतसूतके वसिष्ठस्तु पंचदशरात्रेणराजन्योविंशतिरात्रेणवैश्यइति अंगिरास्त्वाह सर्वेषामेववर्णानांसूतकेमृतकेतथा दशाहाच्छुद्धि १६
रेतेषामितिशातातपोऽब्रवीत् इत्येवमनेकोच्चावचाशौचकल्पादर्शिताः तेषांलोकेसमाचाराभावान्नातीवव्यवस्थाप्रदर्शनमुपयोगीतिनात्रव्यव-

स्थाप्रदर्श्यते यदापुनर्ब्राह्मणादीनांक्षत्रियादयःसपिंडाभवंतितदाहारीताद्युक्ताशौचकल्पोनुसरणीयः दशाहाच्छुध्यतेविप्रोजन्महानौस्वयोनि
षु षड्भिस्त्रिभिरथैकेनक्षत्रविट्शूद्रयोनिष्विति विष्णुरप्याह क्षत्रियस्यविट्शूद्रेषुसपिंडेषुषड्रात्रत्रिरात्राभ्यां वैश्यस्यशूद्रेसपिंडेषड्रात्रेणशु-
द्धिः हीनवर्णानांतूत्कृष्टेषुसपिंडेषुजातेषुमृतेषुवातदाशौचव्यपगमेशुद्धिरिति बौधायनेनत्वविशेषेणदशाहइत्युक्तं क्षत्रविट्शूद्रजातीया
येस्युर्विप्रस्यबांधवाः तेषामाशौचेविप्रस्यदशाहाच्छुद्धिरिष्यतेइति अनयोश्चपक्षयोरापदनापद्विषयत्वेनव्यवस्था दास्यादीनांतुस्वाम्याशौ
चेनस्पृश्यत्वंकर्मानधिकारस्तुमासावधिरेव तदाहांगिराः दासीदासश्चसर्वोवैयस्यवर्णस्ययोभवेत् तद्वर्णस्यभवेच्छौचंदास्यांमासस्तुसूत

आदंतजन्मनःसद्यआचूडान्नैशिकीस्मृता त्रिरात्रमाव्रतादेशाद्दशरात्रमतःपरम् २३

कमिति प्रतिलोमानांत्वाशौचाभावएव प्रतिलोमाधर्महीनाइतिस्मरणात् केवलंमृतौप्रसवेचमलापकर्षणार्थंमूत्रपुरीषोत्सर्गवत्शौचंभवत्येव
२२ वयोवस्थाविशेषादपिदशाहाद्याशौचस्यापवादमाह यावताकालेनदंतानामुत्पत्तिस्तस्मिन्कालेअतीतस्यबालस्यतत्संबंधिनांसद्यः
शौचं चूडाकरणादर्वाङ्मृतस्यसंबंधिनांनैशिकीनिशायांभवाअहोरात्रव्यापिन्यशुद्धिः व्रतादेशउपनयनंततोर्वाक्चूडायाश्चोर्ध्वमतीतस्यत्र्य
हमशुद्धिः अत्रचादंतजन्मनःसद्यइतियद्यप्यविशेषेणाभिधानंतथाप्यग्निसंस्काराभावेद्रष्टव्यम् अदंतजातेबालेप्रेतेसद्यएवनास्याग्निसंस्का-

रोनोदकक्रियेति वैष्णवे अग्निसंस्काररहितस्य सद्यःशौचविधानात् सतित्वग्निसंस्कारे अहस्त्वदत्तकन्यासु बालेषु चेति वक्ष्यमाणएकाहः तथाच यमः अदंतजाते तनये शिशौ गर्भच्युते तथा सपिंडानां तु सर्वेषामहोरात्रमशौचकमिति नामकरणात्प्राक् सद्यःशौचमेव नियतं प्राङ्नामकरणात्सद्यःशौचमिति शंखस्मरणात् चूडाकर्म प्रथमे तृतीये वा वर्षे स्मर्यते चूडाकर्म द्विजातीनां सर्वेषामेव धर्मतः प्रथमेऽब्दे तृतीये वा कर्त्तव्यं श्रुतिचोदनादिति स्मरणात् ततश्च दंतजननादूर्ध्वं प्रथमवार्षिकचूडापर्यंतमेकाहः तत्र त्वकृतचूडस्य दंतजनने सत्यपि त्रिवर्षं यावदेकाह एव तथाच विष्णुः दंतजातेप्यकृतचूडे होरात्रेण शुद्धिरिति तत ऊर्ध्वं प्रागुपनयनात् त्र्यहः यत्तु मनुवचनं नृणामकृतचूडानामशुद्धिर्नैशिकी स्मृता निर्वृत्तचूडकानां तु त्रिरात्राच्छुद्धिरिष्यत इति तस्याप्ययमेव विषयः यत्तु न द्विवर्षमधिकृत्य तेनैवोक्तं अरण्ये काष्ठवत्त्यक्त्वा क्षिपेयुस्त्र्यहमेव त्विति यच्च वसिष्ठवचनं ऊनद्विवर्षे प्रेते गर्भपतने वा सपिंडानां त्रिरात्रमिति तत्संवत्सरचूडाभिप्रायेण यत्तु अंगिरोवचनं यद्यप्यकृतचूडो वै जातदंतश्च संस्थितः तथापि दाहयित्वैनमाशौचं त्र्यहमाचरेदिति तद्वर्षत्रयादूर्ध्वं कुलधर्मापेक्षया चौलोत्कर्षे वेदितव्यं विप्रे न्यूनत्रिवर्षे तु मृते शुद्धिस्तु नैशिकीति तिनैवाभिहितत्वात् नचायमेकाहो दंतजननाभाव इति शंकनीयं नहि न्यूनत्रिवर्षस्य दंतानुत्पत्तिः संभवति तथा सत्यपि दंतजनने अकृतचूडस्यैकाहं वदता विष्णुवचनेन विरोधश्च दुःपरिहरः स्यात् तस्मात्प्राच्यैव व्याख्या ज्यायसी यत्तु कश्यपवचनं बालानामदंतजातानां त्रिरात्रेण शुद्धिरिति तन्मातापितृविषयं निरस्य तु पुमान् शुक्रमुपस्पर्शाद्विशुध्यति बैजिकादभिसंबंधादनुरुंध्यादघं त्र्यहमिति जन्यजनकसंबंधोपाधिकतया त्रिरात्रस्मरणात् ततश्चायमर्थः प्राङ्नामकरणात्सद्यःशौचं तदूर्ध्वं दंतजननादर्वागग्निसंस्कारक्रियायां एकाह इतरथा सद्यःशौ 

चं जातदंतस्य च प्रथमवार्षिकाच्चौलादर्वागेकाहः प्रथमवर्षादूर्ध्वं त्रिवर्षपर्यंतं कृतचूडस्य त्र्यहः इतरस्य त्वेकाहः वर्षत्रयादूर्ध्वमकृतचूडस्यापि त्र्यहं उपनयनादूर्ध्वं सर्वेषां ब्राह्मणादीनां दशरात्रादिकमिति २३ इदानीं स्त्रीषु च वयोवस्थाविशेषेणापवादमाह अदत्ता अपरिणीतायाः कन्यास्तासु कृतचूडासु वाग्दानात्प्रागहोरात्रं विशेषेण शुद्धिकारणं सपिंडानां सापिंड्यं च कन्यानां त्रिपुरुषपर्यंतमेव अप्रत्तानां तु स्त्रीणां त्रिपुरुषी विज्ञायत इति वसिष्ठस्मरणात् बालेषु चानुत्पन्नदंतेषु अग्निसंस्कारे सत्येकाहो विशोधनं अकृतचूडायां तु कन्यायां सद्यःशौचं अकृतचूडायां तु कन्यायां सद्यःशौचं विधीयत इति आपस्तंबस्मरणात् वाग्दानादूर्ध्वं तु संस्कारात्प्राक् पतिपक्षे पितृपक्षे च त्रिरात्रमेव यथाह-

## अहस्त्वदत्तकन्यासु बालेषु च विशोधनम्

मनुः स्त्रीणामसंस्कृतानां तु त्र्यहाच्छुध्यंति बांधवाः यथोक्तेनैव कल्पेन शुध्यंति तु सनाभय इति बांधवाः पतिपक्षास्त्रिरात्रेण शुध्यंति सनाभयस्तु पितृपक्षाः सपिंडा यथोक्तेनैव कल्पेन निर्वृत्तचूडकानामित्यादिनोक्तेन त्रिरात्ररूपेण न पुनर्दशरात्ररूपेण विवाहात्प्राक् तस्यायुक्तत्वात् अत एव मरीचिः वारिपूर्वं प्रदत्ता तु यानैव प्रतिपादिता असंस्कृता तु सा ज्ञेया त्रिरात्रमुभयोः स्मृतमिति उभयोः पतिपितृपक्षयोः विवाहादूर्ध्वं तु विष्णुना विशेषो दर्शितः संस्कृतासु स्त्रीषु नाशौचं पितृपक्षे तत्प्रसवमरणे चेत्पितृगृहे स्यातां तदैकरात्रं त्रिरात्रं वेति तत्र प्रसवे एकाहः प्रायणे त्रिरात्रमितिव्य

वस्था इदंतुवयोवस्थाशौचंसर्ववर्णसाधारणं क्षत्रस्यद्वादशाहानीतिवद्वर्णविशेषोपादानेनाभिधानात् अतएवमनुना अनुपात्तवर्णविशेषाशौ
चविधेःसाधारण्यप्रतिपादनार्थंचातुर्वर्ण्याधिकारेसत्यपिपुनश्चतुर्णामपिवर्णानांयथावदनुपूर्वशइत्युक्तं तथांगिरसाप्युक्तं अविशेषेणवर्णानाम-
र्वाक्संस्कारकर्मणः त्रिरात्रात्तुभवेच्छुद्धिःकन्यास्वन्हाविधीयतइति व्याघ्रपादवचनं तुल्यंवयसिसर्वेषामितिशाक्यदर्शितम् अतोयथापिंडय
ज्ञावृतादेयमित्यादिपिंडोदकदानविधिःसर्ववर्णसाधारणः यथावासमानोदकाशौचविधिःअंतराजन्ममरणेइतिसंनिपाताशौचविधिश्च यद्वच्चग
र्भस्रावेमासतुल्यानिशाइतिस्रावाशौचविधिःप्रोषितेकालशेषःस्यादशेषेत्र्यहमेवत्विति विदेशस्थाशौचविधिश्च यथावागुर्वाद्याशौचविधिःसर्व

गुर्वंतेवास्यनूचानमातुलश्रोत्रियेषुच २४

वर्णसाधारणः तथावयोवस्थानिमित्तमप्याशौचंसर्ववर्णसाधारणमेवभवितुमर्हति अतएव क्षत्रेषड्भिःछतेचौलेवैश्येनवभिरुच्यते ऊर्ध्वंत्रिवर्षा
च्छूद्रेतुद्वादशाहोविधीयते तथा यत्रत्रिरात्रंविप्राणामाशौचंसंप्रदृश्यते तत्रशूद्रेद्वादशाहःषण्नवक्षत्रवैश्ययोरित्यादीनिऋष्यशृंगादिवचनानि
विगीतत्वबुद्ध्यानाद्रियमाणैर्धारेश्वरविश्वरूपमेधातिथिप्रभृतिभिराचार्यैरयमेवसाधारणःपक्षोंगीकृतः अविगीतानिचार्त्तनार्त्तक्षत्रियादिविषय १८
तयाव्याख्येयानि गुर्वादिष्वतिदेशमाह गुरुरुपाध्यायः अंतेवासीशिष्यः अनूचानोंगानांप्रवक्ता मातुलग्रहणेनात्मबंधवोमातृबंधवःपितृबं

धवश्चयोनिसंबंधाउपलक्ष्यंते तेचपत्नीदुहितरइत्यत्रदर्शिताः श्रोत्रियएकशाखाध्यायी एकांशाखामधीतेश्रोत्रियइतिबौधायनस्मरणात् एषूप
रतेष्वहोरात्रमाशौचं यस्तुमुख्योगुरुःपितातदुपरमेसपिंडत्वाद्दशाहएव यस्तुपितापुत्रानुत्साद्यसंस्कृत्यवेदानध्याप्यवेदार्थंग्राहयित्वावृत्तिंचविदधा
तितस्यमहागुरुत्वात्तदुपरमेद्वादशरात्रंवामहागुरुषुदानाध्ययनेवर्जयेरन्इत्याश्वलायनेनोक्तंद्रष्टव्यं आचार्योपरमेतुत्रिरात्रमेव यथाहमनुः त्रि-
रात्रमाहुराशौचमाचार्येसंस्थितेसति तस्यपुत्रेचपत्न्यांचदिवारात्रमितिस्थितिरिति यदात्वाचार्योदेर्त्योष्टिंकरोतितदादशरात्रमाशौचं गुरोःप्रेतस्य
शिष्यस्तुपितृमेधंसमारभेत् प्रेताहारैःसमंतत्रदशाहेनविशुध्यतीति तेनैवोक्तत्वात् श्रोत्रियस्यतुसमानग्रामीणस्यएतदाशौचं एकाहंसब्रह्मचा
रिणिसमानग्रामीणेचश्रोत्रियइत्याश्वलायनस्मरणात् एकाचार्योपनीतःसब्रह्मचारीएतच्चासंनिधानेद्रष्टव्यं संनिहितेतुशिष्यादौत्रिरात्रादि यथा
हमनुः श्रोत्रियेतूपसंपन्नेत्रिरात्रमशुचिर्भवेत् मातुलेपक्षिणींरात्रिंशिष्यर्त्विग्बांधवेषुचेति उपसंपन्नेमैत्रीप्रातिवेश्यत्वादिनासंबद्धेशीलयुक्ते
वा मातुलग्रहणंमातृष्वस्रादेरुपलक्षणार्थं बांधवाइत्यात्मबंधवोमातृबंधवःपितृबंधवश्चोच्यंते तथाचबृहस्पतिः त्र्यहंमातामहाचार्यश्रोत्रियेष्व
शुचिर्भवेदिति तथाप्रचेताः मृतेचर्त्विजियाज्येचत्रिरात्रेणविशुध्यतीति तथाचवृद्धबृहस्पतिः संस्थितेपक्षिणींरात्रिंदौहित्रेभगिनीसुते सं
स्कृतेतुत्रिरात्रंस्यादितिधर्मोव्यवस्थितः पित्रोरुपरमेस्त्रीणामूढानांतुकथंभवेत् त्रिरात्रेणैवशुद्धिःस्यादित्याहभगवान्यमः श्वशुरयोर्भगि-
न्यांचमातुलान्यांचमातुले पित्रोःस्वसरितद्वच्चपक्षिणींक्षपयेन्निशां तथा मातुलेश्वशुरेमित्रेगुरौगुर्वंगनासुच आशौचंपक्षिणींरात्रिंमृता
मातामहीयदि तथाचगौतमः पक्षिणीमसपिंडेयोनिसंबंधेसहाध्यायिनिचेति योनिसंबंधामातुलमातृष्वस्रीयपितृष्वस्रीयादयः तथाजा-

बालिः एकोदकानांतुत्र्यहोगोत्रजानामहःस्मृतम् मातृबंधौगुरौमित्रेमंडलाधिपतौतथेति विष्णुः असपिंडेस्ववेश्मनिमृतएकरात्रमिति त-
थावृद्धः भगिन्यांसंस्कृतायांतुभ्रातर्यपिचसंस्कृते मित्रेजामातरिप्रेतेदौहित्रेभगिनीसुते शालकेतत्सुतेचैवसद्यःस्नानेनशुध्यति ग्रामेश्वरे
कुलपतौश्रोत्रियेचतपस्विनि शिष्येपंचत्वमापन्नेशुचिर्नक्षत्रदर्शनात् ग्राममध्यगतोयावच्छवस्तिष्ठतिकस्यचित् ग्रामस्यतावदाशौचंनि
र्गतेशुचितामियादित्यादीन्याशौचविशेषप्रतिपादकानिस्मृतिवचनान्यन्वेषणीयानि ग्रंथगौरवभयादत्रनलिख्यंते एषुचैकविषयगुरुल-
घ्वाशौचप्रतिपादकतयापरस्परविरुद्धेषुसंनिधिविदेशस्थापेक्षयाव्यवस्थानुसंधातव्या २४ किंच अहरित्यनुवर्त्तते अनौरसाःक्षेत्रज

## अनौरसेषुपुत्रेषुभार्यास्वन्यगतासुच

दत्तकादयः तेषुजातेषूपरतेषुवाहोरात्रमाशौचं तथास्वभार्यास्वन्यगतास्वन्यंप्रतिलोमव्यक्तिरिक्तंआश्रितासुअतीतासु अत्राहोरात्रमेव नपु
नःसत्यपिसापिंड्येदशरात्रं प्रतिलोमाश्रितासुचाशौचाभावएव पाखंड्यनाश्रिताइत्यनेनप्रतिषेधात् एतच्चभार्यापुत्रशब्दयोःसंबंधिशब्दत्वा-
त्तत्प्रतियोगिकंभार्यात्वंपुत्रत्वंचतस्यैवेदमाशौचं सपिंडानांत्वाशौचाभावः अतएवप्रजापतिः अन्याश्रितेषुदारेषुपरपत्नीसुतेषुच गोत्रि १९
णःस्नानशुद्धाःस्युस्त्रिरात्रेणैवतत्पितेति स्वैरिण्याद्यासुयमाश्रितास्तस्यतुत्रिरात्रमेव यथाहविष्णुः अनौरसेषुपुत्रेषुजातेषुचमृतेषुच प

रपूर्वासुभार्यासुप्रसूतासुमृतासुचेतित्रिरात्रमत्रप्रकृतं अनयोश्चत्रिरात्रैकरात्रयोःसंनिधिविदेशस्थापेक्षयाव्यवस्थां यदातुपितुस्त्रिरात्रंत-
दासपिंडानामेकरात्रं यथाहमरीचिः सूतकेमृतकेचैवत्रिरात्रंपरपूर्वयोः एकाहस्तुसपिंडानांत्रिरात्रंयत्रवैपितुरिति किंच निवसत्यस्मि
न्नितिनिवासःस्वदेशउच्यते तस्ययोराजास्वामीविषयाधिपतिःसयस्मिन्नहनिअतीतस्तदहर्मात्रंशुद्धिकारणं रात्रौचेदतीतस्तदारात्रिमात्रं
अतएवमनुः प्रेतेराजनिसज्योतिर्यस्यस्याद्विषयेस्थितइति ज्योतिषासहवर्त्ततेइतिसज्योतिराशौचं अन्हिचेद्यावत्सूर्यदर्शनं रात्रौचेद्या
वन्नक्षत्रदर्शनमित्यर्थः २५ अनुगमनाशौचमाह ब्राह्मणेनअसपिंडेन द्विजोविप्रादिः शूद्रोवाप्रेतोनानुगंतव्यः यदिस्नेहादिनानुग

निवासराजनिप्रेतेतदहःशुद्धिकारणम् २५ ब्राह्मणेनानुगंतव्योनशूद्रोनद्विजःकश्चित् अनुग
म्यांभसिस्नात्वास्पृष्ट्वाग्निंघृतभुक्शुचिः २६

च्छतितदांभसितडागादिस्थेस्नात्वाग्निंस्पृष्ट्वाघृतंप्राश्यशुचिर्भवे
त् अस्यचघृतप्राशनस्यभोजनकार्यविधानेप्रमाणाभावान्नभोजनप्रतिषेधः इदंचसमानोत्कृष्टजातिविषयम् यथाहमनुः अनुगम्येच्छ
याप्रेतंज्ञातिमज्ञातिमेवच स्नात्वासचैलःस्पृष्ट्वाग्निंघृतंप्राश्यविशुध्यतीति ज्ञातयोमातृसपिंडाः इतरेषांतुविहितत्वान्नदोषः निकृष्टजा
त्यनुगमनेतुस्मृत्यंतरोक्तंद्रष्टव्यं तत्रशूद्रानुगमने प्रेतीभूतंतुयःशूद्रंब्राह्मणोज्ञानदुर्बलः अनुगच्छेन्नीयमानंसत्रिरात्रेणशुध्यति त्रि

रात्रेतुनतत्र्श्रीर्णेनदींगत्वासमुद्रगाम् प्राणायामशतंकृत्वाघृतंप्राश्यविशुध्यतीतिपराशरोक्तं क्षत्रियानुगमनेत्वहोरात्रं मानुषास्थिस्नि
ग्धंस्पृष्ट्वात्रिरात्रमाशौचं अस्निग्धेत्वहोरात्रं शवानुगमनेचैवमितिवसिष्ठोक्तं वैश्यानुगमनेपुनःपक्षिणी तथाक्षत्रियस्यानंतरंवैश्यानुगम-
नेअहोरात्रमेकांतरशूद्रानुगमनेपक्षिणी वैश्यस्यशूद्रानुगमनेएकाहइत्यूहनीयं तथारोदनेपिपारस्करेणोक्तं मृतस्यबांधवैःसार्धंकृत्वातुपरि
देवनं वर्जयेत्तदहोरात्रंदानंश्राद्धादिकर्मचेति तथालंकरणमपिनकार्यम् कृच्छ्रपादोसपिंडस्यप्रेतालंकरणेकृते अज्ञानादुपवासःस्यादशक्तौ
स्नानमिष्यतेइतिशंखेनप्रायश्चित्तस्याम्नातत्वात् २६ सपिंडाशौचेक्वचिदपवादमाह यद्यपिमहीशब्देनकृत्स्नंभूगोलकमभिधीयते त-

महीपतीनांनाशौचंहतानांविद्युतातथा गोब्राह्मणार्थेसंग्रामेयस्यचेच्छतिभूमिपः २७

थाप्यत्रसकलायाःक्षितेरेकभर्तृकत्वानुपपत्तेःमहीपतीनामितिबहुवचनानुरोधाच्चतदेकदेशभूतानिमंडलानिलक्ष्यंते तत्पालनाधिकृतानांक्षत्रि
यादीनामभिषिक्तानांनाशौचंतैराशौचंनकार्यमित्यर्थः तथाविद्युद्धतानांगोब्राह्मणरक्षणार्थेविपन्नानांचसंबंधिनोयेसपिंडास्तैरप्याशौचंन-
कार्यं यस्यचमंत्रिपुरोहितादेर्भूमिपतयोनन्यसाध्यमंत्राभिचारादिकर्मसिध्यर्थमाशौचाभावमिच्छंतितैरपिनकार्यं अत्रचमहीपतीनांयदसा २०
धारणत्वेनविहितंप्रजापरिरक्षणं तद्येनदानमानसत्कारव्यवहारदर्शनादिनाविनानसंभवतितत्रैवाशौचाभावोनपुनःपंचमहायज्ञादिष्वपि

तथाचमनुः राज्ञोमहात्मिकेस्थानेसद्यःशौचंविधीयते प्रजानांपरिरक्षार्थमासनंचात्रकारणमिति गौतमेनाप्युक्तं राज्ञांचकार्याविघातार्थमि-
तिराजभृत्यादेरप्याशौचंनभवति तथाहप्रचेताः कारवःशिल्पिनोवैद्यादासीदासास्तथैवच राजानोराजभृत्याश्चसद्यःशौचाःप्रकीर्त्तिताइति
कारवःसूपकारादयः शिल्पिनश्चित्रकारचैलनिर्णेजकादयः अयंचाशौचाभावःकिंविषयइत्यपेक्षायांकर्मनिमित्तैःशब्दैस्तत्तदसाधारणस्यकर्मणोबुद्धि
स्थत्वात्तत्रैवद्रष्टव्यः अतएवविष्णुः नराज्ञांराजकर्मणिनव्रतिनांव्रतेनसत्रिणांसत्रेनकारूणांकारुकर्मणीतिप्रतिनियतविषयमेवाशौचाभावंदर्शय

ऋत्विजांदीक्षितानांचयज्ञियंकर्मकुर्वताम् सत्रिव्रतिब्रह्मचारिदातृब्रह्मविदांतथा २८
दानेविवाहेयज्ञेचसंग्रामेदेशविप्लवे आपद्यपिहिकष्टायांसद्यःशौचंविधीयते २९

ति शातातपीयेप्युक्तं मूल्यकर्मकराःशूद्रादासीदासस्तथैवच स्नानेशरीरसंस्कारेगृहकर्मण्यदूषिताइति इयंचदासादिशुद्धिरपरिहरणीयतया
प्राप्तस्पर्शविषयेइत्यनुसंधेयम् अतएवस्मृत्यंतरं सद्यःस्पृश्योगर्भदासोभक्तदासस्त्र्यहाच्छुचिः तथा चिकित्सकोयत्कुरुतेतदन्येननशक्यते
तस्माच्चिकित्सकःस्पर्शेशुद्धोभवतिनित्यशइति २७ किंच ऋत्विजोवरणसंभृताःकर्तृविशेषाः दीक्षयासंस्कृतादीक्षितास्तेषांयज्ञियंयज्ञेभवंक-
र्मकुर्वतांसद्यःशौचंविधीयतइतिसर्वत्रानुषंगः दीक्षितस्यवैतानोपासनाःकार्याइत्यनेनसिद्धेप्यधिकारेपुनर्वचनंयाजमानेष्वस्वयंकर्तृत्वविधानार्थं
ओ॰ ३ भक्तेनअन्नेनदासः

सद्यःस्नानविध्यर्थंच सत्रिग्रहणेनसंततानुष्ठानतुल्यतयान्नसत्रप्रवृत्तालक्ष्यंते मुख्यानांतुसत्रिणांदीक्षितग्रहणेनैवसिद्धेः व्रतिशब्देनकृच्छ्रचां-
द्रायणादिप्रवृत्ताःस्नातकव्रतप्रायश्चित्तप्रवृत्ताश्चोच्यंते तथाब्रह्मचर्यादिव्रतयोगिनःश्राद्धकर्तुर्भोक्तुश्चग्रहणम् तथास्मृत्यंतरे नित्यमन्नप्रद-
स्यापिकृच्छ्रचांद्रायणादिषु निर्वृत्तेकृच्छ्रहोमादौब्राह्मणादिषुभोजने गृहीतनियमस्यापितस्मादन्यस्यकस्यचित् निमंत्रितेषुविप्रेषुप्रारब्धेश्रा-
द्धकर्मणि निमंत्रितस्यविप्रस्यस्वाध्यायाद्विरतस्यच देहेपितृषुतिष्ठत्सुनाशौचंविद्यतेक्वचित् प्रायश्चित्तप्रवृत्तानांदातृब्रह्मविदांतथेति सत्रिणांव्र-
तिनांसत्रेचशुद्धिर्नकर्ममात्रेसंव्यवहारेवा तथाचविष्णुः नव्रतिनांव्रतेनसत्रिणांसत्रेइति ब्रह्मचार्युपकुर्वाणकोनैष्ठिकश्च यस्तुनित्यंदातैवनप्रति
गृहीतासएवस्वानसोदातृशब्देनोच्यते ब्रह्मविद्यतिः एतेषांचत्रयाणांसर्वत्रशुद्धिःविशेषेप्रमाणाभावात् दानेचपूर्वसंकल्पितद्रव्यस्यनाशौचं पूर्व-
संकल्पितंद्रव्यंदीयमानंनदुष्यतीतिक्रतुस्मरणात् स्मृत्यंतरेचात्रविशेषउक्तः विवाहोत्सवयज्ञादिष्वंतरामृतसूतके शेषमन्नंपरैर्देयंदातॄन्भो
क्तॄंश्चनस्पृशेदिति यज्ञेवृषोत्सर्गादौ विवाहेचपूर्वसंभृतसंभारे तथाचस्मृत्यंतरं यज्ञेसंभृतसंभारेविवाहेश्राद्धकर्मणीतिसद्यःशौचमत्रप्रकृतमु
विवाहग्रहणपूर्वप्रवृत्तचौलोपनयनादिसंस्कारकर्मोपलक्षणम् यज्ञग्रहणंचपूर्वप्रवृत्तदेवप्रतिष्ठारामाद्युत्सवमात्रोपलक्षण नदेवप्रतिष्ठोत्सर्गवि
वाहेषुनदेशविभ्रमेनापद्यपिचकष्टायामाशौचमितिविष्णुस्मरणात् संग्रामेयुद्धे संग्रामेसमुपोढेराजानंसंनाहयेदित्याश्वलायनाद्युक्तसंनहन-
विधौप्रास्थानिकशांतिहोमादौचसद्यःशुद्धिः देशस्यविस्फोटादिभिरुपसर्गैराजभयाद्वाविप्लवेतदुपशमनार्थेशांतिकर्मणिसद्यःशौचं विप्लवाभावेपि २१
क्वचिद्देशविशेषेणपैठीनसिनाशुद्धिरुक्ता विवाहदुर्गयज्ञेषुयात्रायांतीर्थकर्मणि नतत्रसूतकंतद्वत्कर्मयज्ञादिकारयेदिति तथाकष्टायामप्यापदिव्या

ध्याद्यभिभवेनमुमूर्षावस्थायांदुरितशमनार्थेदाने तथासंकुचितवृत्तेश्चत्यक्तपरिश्रांतमातापित्रादिबहुकुटुंबस्यतद्भरणोपयोगिनिप्रतिग्रहेसद्यःशु
द्धिः इयंचशुद्धिर्यस्यसद्यःशौचंविनार्त्युपशमोनभवति अश्वस्तनिकस्यतद्विषया यस्त्वेकाहपर्याप्तसंचितधनस्तस्यैकाहः यस्त्र्यहोपयोगिसंच-
यीतस्यत्र्यहः यस्तुचतुरहार्थमापादितद्रव्यःकुंभीधान्यस्तस्यचतुरहः कुसूलधान्यकस्यदशाहइत्येवंयस्ययावत्कालमार्त्यभावस्तस्यतावत्कालमा
शौचं आपदुपाधिकत्वात् आशौचसंकोचस्य अतएवमनुना कुसूलधान्यकोवास्यात्कुंभीधान्यकएववा त्र्यहैहिकोवापिभवेदश्वस्तनिकएववेत्यत्र
प्रतिपादितचतुर्विधगृहस्थाभिप्रायेण दशाहंशावमाशौचंसपिंडेषुविधीयते अर्वाक्संचयनादस्थ्नांत्र्यहमेकाहमेववेतिकल्पचतुष्टयंप्रतिपादितं
समानोदकविषयाश्चसंकुचिताशौचकल्पाःपक्षिण्येकाहःसद्यःशौचरूपाःस्मृत्यंतरेदृष्टाः वृत्तिसंकोचोपाधितयैरयोज्याः अयंचाशौचसंकोचोयेनै
वप्रतिग्रहादिनाविनार्तिस्तद्विषयोनसर्वत्रेत्यवगंतव्यम् ननुएकाहाद्ब्राह्मणःशुध्येद्योग्निवेदसमन्वितः त्र्यहात्केवलवेदस्तुविहीनोदशभिर्दिनैरि
त्यादिस्मृत्यंतरवचनपर्यालोचनयाध्ययनज्ञानानुष्ठानयोगिनामेकाहादिनाशुद्धिरित्येवंकस्मान्नेष्यते उच्यते दशाहंशावमाशौचंसपिंडेषुविधीयते
इतिसामान्यप्राप्तदशाहबाधपुरःसरमेकाहाद्ब्राह्मणःशुध्येदितिविधायकंभवति बाधकस्यचानुपपत्तिनिबंधनत्वात् यावत्यबाधितेनुपप
त्तिप्रशमोनभवतितावद्बाधनीयं अतःकियदनेनबाध्यमित्यपेक्षायामपेक्षितविशेषसमर्पणक्षमस्याग्निवेदसमन्वितइतिवाक्यशेषस्यदर्शनादग्निवेद-
विषयेग्निहोत्रादिकर्मणिस्वाध्यायेचव्यवतिष्ठते नपुनर्दानादावपि एवंचाग्निवेदपदयोःकार्यान्वयित्वंभवति इतरथायेनाग्निवेदवेदसाध्यंकर्मकृतं
तस्यैकाहाच्छुद्धिरितिपुरुषविशेषोपलक्षणत्वमेवस्यात् नचैतद्युक्तं एवंचसतिप्रत्यूहेन्नाग्निषुक्रियाः वैतानोपासनाःकार्याःक्रियाश्चश्रुतिनोदिताः

तथाब्राह्मणस्यस्वाध्यायादिनिवृत्त्यर्थंसद्यःशौचमित्येवमादिभिर्मन्वादिवचनैरेकवाक्यतामापद्यते ततोभयत्रदशाहानिकुलस्यान्नंनभुज्यतेइतिदशाह
पर्यंतंभोजनादिकंप्रतिषेधयद्भिर्यमादिवचनैरविरोधोपिसेत्स्यति अतःक्वाचित्कमेवेदमाशौचसंकोचविधानं नपुनःसर्वसंव्यवहारादिगोचरमित्य
लमतिप्रपंचेन इदंचस्वाध्यायविषयेसद्यःशौचविधानंबहुवेदस्यब्रह्मोज्झनकृतायामार्त्तौद्रष्टव्यम् इतरस्यतुदानंप्रतिग्रहोहोमःस्वाध्यायश्चनि
वर्त्ततेइतिप्रतिषेधएव एवंब्राह्मणादिमध्येयस्ययावत्कालमाशौचमुक्तंसतस्यानंतरंस्नात्वाशुध्येत् नतत्कालातिक्रममात्रात् यथाहमनुः वि-
प्रःशुध्यत्यपःस्पृष्ट्वाक्षत्रियोवाहनायुधम् वैश्यःप्रतोदंरश्मीन्वायष्टिंशूद्रःकृतक्रियइति अयमर्थः कृतक्रियइतिप्रत्येकमभिसंबध्यते विप्रोनु

उदक्याशुचिभिःस्नायात्संस्पृष्टस्तैरुपस्पृशेत् अब्लिंगानिजपेच्चैवगायत्रींमनसासकृत् ३०

भूताशौचकालःकृतक्रियःकृतस्नानोहस्तेनापःस्पृष्ट्वाशुध्यति स्पृष्ट्वेतिस्पर्शनक्रियैवोच्यते नस्नानमाचमनंवा वाहनादिषुतस्यैवानुषंगात् अथवा
कृतक्रियोयावदाशौचंकृतोदकादिक्रियः तदनंतरंविप्रादिरुदकादिस्पृष्ट्वाशुध्येदिति इत्याशौचकालानंतरभाविस्नानप्रतिनिधित्वेनोच्यतइति
क्षत्रियादिर्वाहनादिकंस्पृष्ट्वाशुध्येदिति २८ २९ कुलव्यापिनींशुद्धिमभिधायेदानींप्रसंगात्प्रतिपुरुषव्यापिनींशुद्धिमाह उदक्यारजस्वला अ २२
शुचयःशवचांडालपतितसूतिकाद्याःशावाशौचिनश्च एतैःसंस्पृष्टःस्नायात् तैःपुनरुदक्याशुचिसंस्पृष्टादिभिःसंस्पृष्टउपस्पृशेत् आचामेत् आ

बन्याब्लिंगानिआपोहिष्ठेत्येवमादीनित्रीणिमंत्रवाक्यानिजपेत् त्रिष्वेवबहुवचनस्यचरितार्थत्वात् तथागायत्रींचसकृन्मनसाजपेत् ननुउदक्या
संस्पृष्टःस्नायादित्येकवचननिर्दिष्टस्यकथंतैरितिबहुवचनेपरामर्शः सत्यमेवं किंत्वत्रउदक्यादिसंस्पृष्टव्यतिरिक्तस्नानार्हमात्रस्पर्शेप्याचमन-
विधानार्थंतैरितिबहुवचननिर्देशइत्यविरोधः तेचस्नानार्हाःस्मृत्यंतरेवगंतव्याः यथाहपाराशरः दुःस्वप्नेमैथुनेवांतेविरिक्तेक्षुरकर्मणि चिति
यूपश्मशानास्थ्नांस्पर्शनेस्नानमाचरेदिति तथाचमनुः वांतोविरिक्तःस्नात्वातुघृतप्राशनमाचरेत् आचामेदेवभुक्त्वान्नंस्नानंमैथुनिनःस्मृतमि
ति मैथुनिनःस्नानमृतुकालविषयम् अनृतौतुयदागच्छेच्छौचंमूत्रपुरीषवदितिबृहस्पतिस्मरणात् अनृतावपिकालविशेषेणस्मृत्यंतरेस्नान
मुक्तं अष्टम्यांचचतुर्दश्यांदिवापर्वणिमैथुनम् कृत्वासचैलंस्नात्वाचवारुणीभिश्चमार्जयेदिति तथाचयमः अजीर्णेभ्युदितेवांतेतथाप्यस्तमि
तेरवौ दुःस्वप्नेदुर्जनस्पर्शेस्नानमात्रंविधीयतेइति तथाबृहस्पतिः मैथुनेकटधूमेचसद्यःस्नानंविधीयतेइत्येतदसचैलस्पर्शविषयं सचैलेतु-
चित्यादिस्पर्शेसचैलमेवस्नानं यथाहच्यवनः श्वानंश्वपाकंप्रेतधूमंदेवद्रव्योपजीविनम् ग्रामयाजिनंसोमविक्रयिणंयूपंचितिंचितिकाष्ठम्
मद्यमद्यभांडंसस्नेहंमानुषास्थिशवस्पृष्टंरजस्वलांमहापातकिनंशवंस्पृष्ट्वासचैलमंभोवगाह्योत्तीर्याग्निमुपस्पृश्यगायत्रीमष्टवारंजपेत् घृत
प्राश्यपुनःस्नात्वात्रिराचामेदिति एतच्चबुद्धिपूर्वविषयं अन्यत्रस्नानमात्रं शवस्पृष्टंदिवाकीर्त्तिंचितिंयूपंरजस्वलाम् स्पृष्ट्वात्वकामतोविप्रः
स्नानंकृत्वाविशुध्यतीतिबृहस्पतिस्मरणात् एवमन्यत्रापिवक्ष्यमाणेषुविषयसमीकरणमूहनीयम् तथाचकश्यपः उदयास्तमयोस्कंदयित्वाअक्षिस्पंद
नेकर्णाक्रोशनेचित्यारोहणेयूपसंस्पर्शनेचसचैलंस्नानंपुनर्मामिइतिजपेत् महाव्याहृतिभिःसप्ताज्याहुतीर्जुहुयादिति तथास्मृत्यंतरे स्पृष्ट्वादेवलकं

चैवसवासाजलमाविशेत् देवार्चनपरोविप्रोवित्तार्थेवत्सरत्रयम् असौदेवलकोनामहव्यकव्येषुगर्हितः तथाब्रह्मांडपुराणे शैवान्पाशुपतान्स्पृष्ट्वालो
कायतिकनास्तिकान् विकर्मस्थान्द्विजान्शूद्रान्सवासाजलमाविशेदिति तथा अस्वर्ग्याह्याहुतिःसास्याच्छूद्रसंपर्कदूषितेति लिंगाच्चशूद्रस्पर्श-
नेनिषेधः तथांगिराः यस्तुच्छायांश्वपाकस्यब्राह्मणोह्यधिरोहति तत्रस्नानंप्रकुर्वीतघृतंप्राश्यविशुध्यतीति तथाव्याघ्रपादः चांडालंपतितंचैव-
दूरतःपरिवर्जयेत् गोबालव्यजनादर्वाक्सवासाजलमाविशेदिति एतदतिसंकटस्थलविषयं अन्यत्रतुबृहस्पतिनोक्तं युगंचद्वियुगंचैवत्रियु
गंचचतुर्युगम् चांडालसूतिकोदक्यापतितानामधःक्रमादिति तथापैठीनसिः काकोलूकस्पर्शनेसचैलंस्नानमनुदकमूत्रपुरीषकरणेसचैलस्ना
नंमहाव्याहृतिहोमश्च अनुदकमूत्रपुरीषकरणइत्येतच्चिरकालमूत्रपुरीषशौचाकरणपरम् तथांगिराः भासवायसमार्जारखरोष्ट्रंचश्वशूकरा
न् अमेध्यानिचसंस्पृश्यसचैलोजलमाविशेत् मार्जारस्पर्शनिमित्तंस्नानमुच्छिष्टसमयेनुष्ठानसमयेचवेदितव्यम् समाचारात् अन्यदातु
मार्जारश्चैवदर्वीचमारुतश्चसदाशुचिरितिस्नानाभावः श्वस्पर्शेतुस्नानंनाभेरूर्ध्ववेदितव्यं अधस्तात्तुक्षालनमेव नाभेरूर्ध्वंकरौमुक्त्वाशुनायद्यु
पहन्यते तत्रस्नानमधस्ताच्चेत्प्रक्षाल्याचम्यशुध्यतीति तेनैवोक्तत्वात् तथापक्षिस्पर्शेविशेषोजातूकर्ण्येनोक्तः ऊर्ध्वंनाभेःकरौमुक्त्वायदंगंसंस्पृशेत्
खगः स्नानंतत्रप्रकुर्वीतशेषंप्रक्षाल्यशुध्यतीति अमेध्यस्पर्शेपिविष्णुनाविशेषोदर्शितः नाभेरधस्तात्प्रबाहुषुचकायिकैर्मलैःसुराभिर्मद्यैर्वोप
हतोमृत्तोयैस्तदंगंप्रक्षाल्याचांतःशुध्येत् अन्यत्रोपहतोमृत्तोयैस्तदंगंप्रक्षाल्यस्नायात् तैरिंद्रियेषूपहतस्तूपोष्यस्नात्वापंचगव्येनदशनच्छदोपहत- २३
श्चेति एतच्चपरकीयामेध्यस्पर्शविषयम् आत्मीयमलस्पर्शेतुऊर्ध्वमपिनाभेःक्षालनमेव यथाहदेवलः मानुषास्थिवसाविष्ठामार्त्तवंमूत्ररेतसी

मज्जानंशोणितंवापिपरस्ययदिसंस्पृशेत् स्नात्वाप्रमृज्यलेपादीनाचम्यसशुचिर्भवेत् तान्येवस्वानिसंस्पृश्यपूतःस्यात्परिमार्जनादिति तथाशंखः रथ्याक
र्दमतोयेनष्ठीवनाद्येनवातथा नाभेरूर्ध्वंनरःस्पृष्टःसद्यःस्नानेनशुध्यतीति यमेनाप्यत्रविशेषउक्तः सकर्दमंतुवर्षासुप्रविश्यग्रामसंकरम् जंघयोर्मृ
त्तिकास्तिस्रःपादयोर्द्विगुणास्ततइति ग्रामसंकरंग्रामसलिलप्रवाहप्रवेशं सकर्दमंप्रविश्येत्यर्थः मारुतशोषितेतुकर्दमादौनदोषः रथ्याकर्दमतोया
निस्पृष्टान्यंत्यश्ववायसैः मारुतेनैवशुध्यंतिपक्वेष्टकचितानिचेतिप्रागुक्तत्वात् अस्थिनिमनुनाविशेषउक्तः नारंस्पृष्ट्वास्थिसस्नेहंस्नात्वाविप्रोवि
शुध्यति आचम्यैवतुनिःस्नेहंगांस्पृष्ट्वावीक्ष्यवारविमिति इदंद्वैजातास्थिविषयं अन्यत्रवसिष्ठोक्तं मानुषास्थिस्निग्धंस्पृष्ट्वात्रिरात्रमाशौचमस्नि
ग्धेत्वहोरात्रम् अमानुषेतुविष्णूक्तं भक्ष्यवर्ज्यंपंचनखशवंतदस्थिचसस्नेहंस्पृष्ट्वास्नातःपूर्ववस्त्रंप्रक्षालितंबिभृयादिति एवमन्येपिस्नानार्हाः-
स्मृत्यंतरतोवबोद्धव्याः एवंस्नानार्हाणांबहुत्वात्तदभिप्रायेणैरितिबहुवचनमविरुद्धं उदक्याशुचिभिःस्नायादित्येतच्चंडालाद्यचेतनव्यवधानस्पर्शे
वेदितव्यं चेतनव्यवधानेतुमानवंदिवाकीर्त्तिमुदक्यांचपतितंसूतिकांतथा शवंतत्स्पृष्टिनंचैवस्पृष्ट्वास्नानेनशुध्यतीति तृतीयस्यत्वाचमनमेव
तमेवतुस्पृशेद्यस्तुस्नानंतस्यविधीयते ऊर्ध्वमाचमनंप्रोक्तंद्रव्याणांप्रोक्षणंतथेतिसंवर्त्तस्मरणात् एतच्चाबुद्धिपूर्वकविषयं मतिपूर्वंतृतीयस्यापि
स्नानमेव यथाहगौतमः पतितचंडालसूतिकोदक्याशवस्पृष्टितत्स्पृष्ट्युपस्पर्शनेसचैलमुदकोपस्पर्शनाच्छुध्येदिति चतुर्थस्यत्वाचमनं उप-
स्पृश्याशुचिस्पृष्टंतृतीयंवापिमानवः हस्तौपादौचतोयेनप्रक्षाल्याचम्यशुध्यतीतिदेवलस्मरणात् अशुचिनापुनरुदक्यादिस्पर्शेदेवलेनविशेषउ
क्तः श्वपाकंपतितंव्यंगमुन्मत्तंशवहारकम् सूतिकांसाविकांनारींरजसाचपरिप्लुताम् श्वकुक्कुटवराहांश्चग्राम्यान्संस्पृश्यमानवः सचैलःसशिराः

या॰स्मृ॰मि॰ २४

स्नानात्तदानीमेव शुध्यति अशुद्धान्स्वयमप्येतानशुद्धस्तु यदि स्पृशेत् विशुध्यत्युपवासेन तथा कृच्छ्रेण वा पुनरिति सा चिकाप्रसवस्य कारयित्री कृच्छ्रः श्वपाकादिविषयः श्वादिषु तूपवास इति व्यवस्था ३० अधुना कालशुद्धौ दृष्टांतत्वेन द्रव्यशुद्धिप्रकरणोक्तांस्तथैवात्र प्रकरणे वक्ष्यमाणांश्च शुद्धिहेतूननुक्रामति यथाग्न्यादयो मासर्वे स्वविषये शुद्धिहेतवस्तथा कालोपि दशरात्रादिकः शास्त्रगम्यत्वाच्छुद्धिहेतुत्वस्य अग्निस्तावच्छुद्धिहेतुर्यथाभ्यधायि पुनःपाकान्महीमयमिति कर्म च शुद्धिनिमित्तं यथा वक्ष्यति, अश्वमेधावभृथस्नानादिति तथा मृदपि शुद्धिकारणं यथा कथितम् प्रा॰ ३

कालोग्निः कर्म मृद्वायुर्मनो ज्ञानं तपो जलम् पश्चात्तापो निराहारः सर्वेमी शुद्धिहेतवः ३१

सलिलं भस्म मृद्वापि प्रक्षेप्तव्यं विशुद्धय इति वायुरपि शुद्धिहेतुः यथोदीरितं मारुतेनैव शुध्यंतीति मनोपि वाचः शुद्धिसाधनं यथाम्नायि मनसा वा इषिता वाग्वदतीत्यादि ज्ञानं चाध्यात्मिकं बुद्धिशुद्धौ निदानं यथाभिधास्यति क्षेत्रज्ञस्येश्वरज्ञानादिति तपश्च कृच्छ्रादि यथा वदिष्यति प्राजापत्यं चरेत्कृच्छ्रं समा वा गुरुतल्पग इत्यादि तथा जलमपि शरीरादेः यथा जल्पिष्यति वर्ष्मणो जलमिति पश्चात्तापो विशुद्धिजनकः यथा गदितम् ख्यापनेनानुतापेनेति निराहारोपि शुध्युपादानम् यथा व्याहरिष्यति त्रिरात्रोपोषितो जप्त्वेत्यादि ३१ २४

किंच अकार्यकारिणां निषिद्धसेविनां दानमेव मुख्यं शुद्धिकारणं यथा व्याख्यास्यति पात्रे धनं वा पर्याप्तं दत्त्वेति नद्याः निदाघादौ अल्पतोयतया अमेध्योपहततीरायाः कूलंकषवर्षांबुप्रवाहः वेगः शुद्धिकृत् शोधनीयस्य द्रव्यस्य मृच्च तोयं च शुद्धिकृद्यथेह भणितं अमेध्याक्तस्य मृत्तोयैः शुद्धिर्गंधापकर्षणादिति संन्यासः प्रव्रज्या द्विजन्मनां मानसोपचारे शुद्धिकृत् तपो वेदाभ्यासो वेदविदां शुद्धिकारणं कृच्छ्रादि तु सर्वसाधारणं न वेदविदामेव क्षांतिरूपशमो विदुषां वेदार्थविदां वर्ष्मणो शरीरस्य जलं प्रच्छन्नपापानामविख्यातदोषाणां अघमर्षणादिसूक्तजपः शुद्धिकारणं शुद्धिसाधनं मनः सदसत्संकल्पात्मकम् तस्यासत्संक-

अकार्यकारिणां दानं वेगो नद्याश्च शुद्धिकृत् शोध्यस्य मृच्च तोयं च संन्यासो वै द्विजन्मनाम् ३२ तपो वेदविदां क्षांतिर्विदुषां वर्ष्मणो जलम् जपः प्रच्छन्नपापानां मनसः सत्यमुच्यते ३३ भूतात्मनस्तपोविद्ये बुद्धेर्ज्ञानं विशोधनम् क्षेत्रज्ञस्येश्वरज्ञानाद्विशुद्धिः परमा मता ३४

ल्पत्वाद् शुद्धस्य सत्यं साधु संकल्पः शोधकं भूतशब्देन तद्विकारभूतो देहेंद्रियसंबंधो लक्ष्यते तत्र स्थूलोहं कृशोहं काणोहं बधिरोहमिति एवं तदभिमानित्वेन योयमात्मा वर्तते स भूतात्मा तस्य तपोविद्ये शुद्धिनिमित्ते तपःशब्देनानेकजन्मस्वेकस्मिन्नपि वा जन्मनि जागरस्वप्नसुषुप्त्यवस्थासु आत्मनो योयमन्वयः शरीरादेश्च व्यतिरेकः सोभिधीयते यथा तपसा ब्रह्म विजिज्ञासस्वेति पंचकोशव्यतिरेकप्रतिपादनपरे वाक्ये विद्याशब्देन चौपनिषद अस्थूलमनण्वह्रस्वमसंगो ह्ययमात्मेत्यादि त्वंपदार्थनिरूपणविषयवाक्यजन्यज्ञानमुच्यते एताभ्यामस्य शुद्धिः

शरीरादिव्यतिरेकबुद्धेः संशयविपर्ययरूपत्वेनाशङ्कायाः प्रमाणरूपज्ञानं विशोधनं क्षेत्रस्यतपोविद्याविशुद्धस्य त्वंपदार्थभूतस्य तत्त्वमसीत्यादिवाक्यजन्या-
त्साकाररूपादीश्वरज्ञानात् परमात्मशुद्धिर्मुक्तिलक्षणा यथाताः शुद्धयः पुरुषपुरुषार्थास्तद्युक्ततराकालशुद्धिरपीत्येवं प्रशंसार्थभूतात्मादिविशुद्ध्यभिधानं
इत्याशौचप्रकरणम् ३२ ३३ ३४ आपद्यपिचकष्टायांसद्यःशौचंविधीयत इत्यापदिमुख्याशौचकल्पानामनुष्ठानासंभवेन सद्यःशौचाद्यनुक्
त्वमुक्त्वेदानींतत्प्रसंगादापदिप्रतिग्रहोधिकोविप्रेयाजनाध्यापनेतथेत्याद्युक्तयाजनादिमुख्यवृत्त्यसंभवेनवृत्त्यंतरमाह द्विजोविप्रोबहुकुटुंबतयास्ववृत्त्या-
जीवितुमसमर्थः क्षत्रसंबंधिना कर्मणाशस्त्रग्रहणादिनापदिजीवेत् तेनापिजीवितुमशक्नुवन्वैश्यसंबंधिनाकर्मणावाणिज्यादिनाजीवेत् नशूद्रवृत्त्या

**क्षात्त्रेणकर्मणाजीवेद्विशांवाप्यापदिद्विजः निस्तीर्यतामथात्मानं पावयित्वान्यसेत्पथा ३५**

तथाचमनुः उभाभ्यामप्यजीवंस्तुकथंस्यादितिचेद्भवेत् कृषिगोरक्ष्यमास्थायजीवेद्वैश्यस्यजीविकामिति तथाआपद्यपिनहीनवर्णेनब्राह्मीवृत्तिराश्रयणी
या किंतुब्राह्मणेनक्षात्री क्षत्रियेणवैश्यसंबंधिनी वैश्येनचशौद्रीत्येवंस्वानंतरहीनवृत्तिरेव अजीवंतःस्वधर्मेणानंतरांपापीयसींवृत्तिमातिष्ठेरन् ननुक
दाचिज्ज्यायसीमितिप्रसिद्धस्मरणात् ज्यायसीचब्राह्मीवृत्तिः तथाचस्मृत्यंतरं उत्कृष्टंवापकृष्टंवातयोःकर्मनविद्यते मध्यमेकर्मणीहित्वासर्वसाधारणे 
हितेइति शूद्रस्यउत्कृष्टंब्राह्मंकर्मनविद्यते तथाब्राह्मणस्यापकृष्टंशौद्रंकर्म मध्यमेक्षत्रवैश्यकर्मणीपुनरापद्गतसर्ववर्णसाधारणे शूद्रश्चापद्गतोवैश्य

वृत्त्याशिल्पैर्वाजीवेत् शूद्रस्यद्विजशुश्रूषातयाजीवन्वणिग्भवेत् शिल्पैर्वाविविधैर्जीवेद्द्विजातिहितमाचरन्निति प्रागुक्तत्वात् मनुनाचात्रविशेषोदर्शितः
येश्च कर्मप्रचरितैः शुश्रूष्यंते द्विजातयः तानिकारुककर्माणिशिल्पानिविविधानिचेति अनेनैवन्यायेनानुलोमोत्पन्नानामपिस्वानंतरावृत्तिरूहनीया एवं
स्वानंतरहीनवर्णवृत्त्या आपदंनिस्तीर्यप्रायश्चित्ताचरणेनात्मानंपावयित्वापथिन्यसेत् स्ववृत्त्यावात्मानंस्थापयेदित्यर्थः यद्वायमर्थः गर्हितवृत्त्यार्जितंधनं
पथिन्यसेदुत्सृजेदिति तथाचमनुः जपहोमैरपैत्येनोयाजनाध्यापनैःकृतम् प्रतिग्रहनिमित्तंतुत्यागेनतपसैवत्विति ३५ वैश्यवृत्त्याजीवतोब्राह्मणस्य

**फलोपलक्षौमसोममनुष्यापूपवीरुधः तिलौदनरसक्षारान्दधिक्षीरंघृतंजलम् ३६ शस्त्रासवमधूच्छिष्टमधुलाक्षाश्च**
**बर्हिषः मृच्चर्मपुष्पकुतुपकेशतक्रविषक्षितीः ३७ कौशेयनीललवणमांसैकशफसीसकान् शाकार्द्रौषधिपिण्याक**
**पशुगंधांस्तथैवच ३८**

यदपणनीयंतदाह नोविक्रीणीतेतिप्रत्येकमपिसंबध्यते फलानिकदलीफलादीनिबदरेंगुदव्यतिरिक्तानि यथाह
नारदः स्वयंशीर्णानिपर्णानिफलानांबदरेंगुदे रज्जुःकार्पासिकंसूत्रंतच्चेदविकृतंभवेदिति उपलंमाणिक्याद्यश्ममात्रं क्षौमंमतसीसूत्रमयंवस्त्रं क्षौम
ग्रहणंतांतवादेरुपलक्षणम् यथाहमनुः सर्वंचतांतवंरक्तंशाणक्षौमाविकानिच अपिचेत्स्युररक्तानिफलमूलेतथौषधीरिति सोमोलताविशेषः
मानुष्यपदेनाविशेषात् स्त्रीपुंनपुंसकानांग्रहणं अपूपमंडकादिभक्ष्यमात्रम् वीरुधोवेत्रामृतादिलताः तिलाःप्रसिद्धाः ओदनग्रहणंभोज्यमात्रोप

लक्षणम् रसागुडेक्षुरसशर्करादयः तथाचमनुः क्षीरंक्षौमंदधिघृतंतैलंमधुगुडौकुशानिति क्षारायवक्षारादयः दधिक्षीरयोर्ग्रहणंमस्तुपिंडकिला प्रा॰
टकूर्चिकादीनांतद्विकाराणामुपलक्षणम् क्षीरंसविकारमितिगौतमस्मरणात्. घृतग्रहणंतैलादिस्नेहमात्रोपलक्षणम् जलंप्रसिद्धं शस्त्रंखड्गादि ३
आसवग्रहणंमद्यमात्रोपलक्षणम् मधूच्छिष्टंसिक्थकं मधुक्षौद्रं लाक्षाजतु बर्हिषःकुशाः मृत्प्रसिद्धा चर्माजिनं पुष्पंप्रसिद्धम् ऊर्णालोमकृतःकंब
लःकुतपः केशाश्चमर्यादिसंबद्धाः तक्रमुदस्वित् विषंमृग्यादि क्षितिर्भूमिःनित्यंभूमिव्रीहियवाजाश्वर्षक्षधेन्वनडुहश्चैकइतिस्मृतंतुस्मरणात्
कौशेयंकोशप्रभवंवसनम् नीलंनीलीरसम् लवणग्रहणेनैवबिडसौवर्चलसैंधवसामुद्रसोमककृत्रिमाण्यविशेषेणगृह्यंते मांसंप्रसिद्धं एकशफा

## वैश्यवृत्त्यापिजीवन्नोविक्रीणीतकदाचन

हयादयः सीसग्रहणंलोहमात्रोपलक्षणम् शाकंसर्वमविशेषात् औषधयःफलपाकांताः आर्द्रौषधयइतिविशेषोपादानात् शुष्केषुनदोषः पिण्या-
कःप्रसिद्धः पशवआरण्याः आरण्यांश्चपशून्सर्वान्दंष्ट्रिणश्चवयांसिचेतिमनुस्मरणात् गंधाश्चंदनागुरुप्रभृतयः ३६ ३७ ३८ सर्वानेतान्वैश्यवृत्त्याजी- २६
वन्ब्राह्मणःकदाचिदपिनविक्रीणीत क्षत्रियादेस्तुनदोषः अतएवनारदेनवैश्यवृत्तावविक्रेयंब्राह्मणस्यपयोदधीतिब्राह्मणग्रहणंकृतम् ७ ७

प्रतिप्रसवमाह यद्यावश्यकाःपाकयज्ञादिधर्माः स्वसाधनव्रीह्यादिधान्याभावेननिष्पद्यंते तर्हिधान्येनतिलाविक्रयंनेयाः तत्समाद्रोणपरिमिताद्रोणपरि
मितेनेत्येवंतेनधान्येनसमाः तथामनुः काममुत्पाद्यकृष्यांतुस्वयमेवकृषीवलः विक्रीणीततिलान्शूद्रान्धर्मार्थमचिरस्थितानिति धर्मग्रहणमावश्यक
भैषजाद्युपलक्षणम् अतएवनारदः अशक्तौभेषजस्यार्थेयज्ञहेतोस्तथैवच यद्यवश्यंतुविक्रेयास्तिलाधान्येनतत्समाइति यद्यन्यथाविक्री
णीतेतर्हिदोषः भोजनाभ्यंजनाद्दानाद्यदन्यत्कुरुतेतिलैः कृमिर्भूत्वाश्वविष्ठायांपितृभिःसहमज्जतीतिमनुस्मरणात् सजातीयैःपुनर्विनिमयोभवत्ये
व रसारसैर्निमातव्यानत्वेवलवणंरसैः कृतान्नंचकृतान्नेनतिलाधान्येनतत्समाइति कृतान्नंसिद्धान्नं तच्चकृतान्नेनपरिवर्त्तनीयमितियावत् कृ

## धर्मार्थंविक्रयंनेयास्तिलाधान्येनतत्समाः३९ लाक्षालवणमांसानिपतनीयानिविक्रये पयोदधिचमद्यंचहीनवर्णकराणितु ४०

तान्नंचाकृतान्नेनेतिपाठेसिद्धमन्नमकृतान्नेनतंदुलादिनापरिवर्त्तनीयमितियावत् ३९ पूर्वोक्तनिषिद्धातिक्रमेदोषमाह लाक्षालवणमांसानिविक्री
यमाणानिसद्यःपतनीयानिद्विजातिकर्महानिकराणि पयःप्रभृतीनितुहीनवर्णकराणिशूद्रतुल्यत्वापादकानि एतद्व्यतिरिक्तापण्यविक्रयेवैश्यतु-
ल्यता यथाहमनुः सद्यःपततिमांसेनलाक्षयालवणेनच त्र्यहेणशूद्रोभवतिब्राह्मणःक्षीरविक्रयात् इतरेषामपण्यानांविक्रयादिहकामतः ब्रा-
ह्मणःसप्तरात्रेणवैश्यभावंनिगच्छति ४० ७ ७ ७ ७ ७ ७ ७

किंच यस्त्वधनः अवसन्नकुटुंबतया आपद्गतोपिक्षत्रवृत्तिं वैश्यवृत्तिंवानप्रविविक्ष्यति स यतस्ततो हीनतरहीनतमेभ्यः प्रतिगृण्हंस्तदन्नंभुंजानोपि वानैवै
नसापापेनलिप्यते यतस्तस्यामापदवस्थायामसत्प्रतिग्रहादावधिकारित्वेनज्वलनार्कसमः यथाज्वलनोर्कश्चहीनसंस्कारेपिनदुष्यति तथायमापद्गतोपि
नदुष्यतीत्येतावतातत्साम्यं एवंचवदताआपद्गतस्यपरधर्माश्रयणाद्विगुणमपिस्वधर्मानुष्ठानमेवमुख्यमितिदर्शितंभवति तथाचमनुः वरंस्वधर्मोवि
गुणोनपारक्यःस्वनुष्ठितः परधर्माश्रयाद्विप्रःसद्यःपततिजातितइति ४१ किंच आपत्तौजीवनानीतिविशेषणात्कृष्यादीनांमध्येअनापदवस्थायांयस्य

आपद्गतःसंप्रगृण्हन्भुंजानोवायतस्ततः नलिप्येतैनसाविप्रोज्वलनार्कसमोहिसः ४१
कृषिःशिल्पंभृतिर्विद्याकुसीदंशकटंगिरिः सेवानूपंनृपोभैक्ष्यमापत्तौजीवनानितु ४२

यावृत्तिःप्रतिषिद्धा तस्यसावृत्तिरनेनाभ्यनुज्ञायते यथापदिवैश्यवृत्तिःस्वयंकृताकृषिर्विप्रक्षत्रिययोरभ्यनुज्ञायते एवंशिल्पादीन्यस्याभ्यनुज्ञायंते शि
ल्पंसूपकरणादि भृतिःप्रेष्यत्वं विद्याभृतकाध्यापकत्वाद्या कुसीदंवृध्यर्थंद्रव्यप्रयोगः तत्स्वयंकृतमभ्यनुज्ञायते शकटभाटकेनधान्यादिवहनद्वारेणजीव
नहेतुः गिरिस्तद्गततृणेंधनद्वारेणजीवनम् सेवापरचित्तानुवर्त्तनम् अनूपंप्रचुरतृणवृक्षजलप्रायःप्रदेशः तथानृपयाचनंभैक्ष्यंस्नातकस्यापि एता २७
न्यापत्तौजीवनानि तथाचमनुः विद्याशिल्पंभृतिःसेवागोरक्षाविपणिःकृषिः गिरिर्भैक्ष्यंकुसीदंचदशजीवनहेतवः ४२ ७ ७

यदाकृष्यादीनामपिजीवनहेतूनामसंभवस्तदाकथंजीवनमित्यतआह धान्याभावेनत्रिरात्रंबुभुक्षितोनश्नन्स्थित्वाअब्राह्मणाच्छूद्रात्तदभावेवैश्या
त्तदभावेक्षत्रियाद्वाहीनकर्मणएकाहपर्याप्तंधान्यमाहरेत् यथाहमनुः तथैवसप्तमेभक्तेभक्तानिषडनश्नता अश्वस्तनविधानेनहर्त्तव्यंहीनक
र्मणइति तथा प्रतिग्रहोत्तरकालंचयदपहृतंतद्धर्मतोयथावृत्तमाख्येयं यदिनाष्टिकेनस्वामिनात्वयेदंकिमपहृतमित्यभियुज्यते यथाहमनुः

बुभुक्षितस्त्र्यहंस्थित्वाधान्यमब्राह्मणाद्धरेत् प्रतिगृह्यतदाख्येयमभियुक्तेनधर्मतः ४३
तस्यवृत्तंकुलंशीलंश्रुतमध्ययनंतपः ज्ञात्वाराजाकुटुंबंचधर्म्यांवृत्तिंप्रकल्पयेत् ४४

खलात्क्षेत्रादगाराद्वायतोवाप्युपलभ्यते आख्यातव्यंतुतत्तस्मैपृच्छतेयदिपृच्छतीति ४३ इदमपरमापत्प्रसंगाद्राज्ञोविधीयते योशनायापरितोऽवसीदति
तस्यवृत्तमाचारं कुलमाभिजात्यं शीलमात्मगुणंश्रुतंशास्त्रश्रवणं अध्ययनंवेदाध्ययनं तपःकृच्छ्रादिचपरीक्ष्यराजाधर्मादनपेतांवृत्तिंप्रकल्पयेत् अन्यथा
तस्यदोषः तथाचमनुः यस्यराज्ञस्तुविषयेश्रोत्रियःसीदतिक्षुधा तस्यसीदतितद्राष्ट्रंदुर्भिक्षव्याधिपीडितमिति इत्यापद्धर्मप्रकरणम् ४४ ७

चतुर्णामाश्रमिणांमध्येब्रह्मचारिगृहस्थयोर्धर्माः प्रतिपादिताः सांप्रतमवरप्राप्तान्वानप्रस्थ धर्मान्प्रतिपादयितुमाह वनेप्रकर्षेणनियमेनचतिष्ठतिचरतीतिव नप्रस्थः वनप्रस्थएववानप्रस्थः संज्ञायांदैर्घ्यं भाविनीवृत्तिमाश्रित्यवनंप्रतिष्ठासुरितियावत् असौकृतविन्यस्तपत्नीकस्त्वयेयंभरणीयेत्येवंकृतेविन्यस्तानिक्षिप्तापत्नीयेनसतथोक्तः यदिसापतिपरिचर्याभिलाषेणस्वयमपिवनंजिगमिषतितदातयानुगतोवासहितः तथाब्रह्मचारीऊर्ध्वरेताःसाग्निर्वैतानाग्निसहितः तथासोपासनोगृह्याग्निसहितश्चवनंव्रजेत् कृतविन्यस्तपत्नीकइतिवदताकृतगार्हस्थ्योवानप्रस्थोवनवासेधिक्रियतइतिदर्शितम् एतच्चाश्रमसमुच्चयपक्षमंगीकृत्योक्तं इतरथाअविप्लुतब्रह्मचर्योयंयमिच्छेत्तमावसेदित्यकृतगार्हस्थ्योपिवनवासेधि-

कृतविन्यस्तपत्नीकस्तयावानुगतोवनम् वानप्रस्थोब्रह्मचारीसाग्निःसोपासनोव्रजेत् ४५

क्रियतएव अयंचवनप्रवेशोजराजर्जरकलेवरस्यजातपौत्रस्यवा यथाहमनुः गृहस्थस्तुयदापश्येद्वलीपलितमात्मनः अपत्यस्यैववापत्यंतदारण्यंसमाश्रयेदिति अयंचपुत्रेषुपत्नीनिक्षेपोविद्यमानभार्यस्य मृतभार्यस्याप्यापस्तंबादिभिः वनवासस्मरणात् अतोयत्दाहयित्वाग्निहोत्रेणेतिपुनराधानविधानंतदपरिपक्वकषायविषयम् साग्निःसोपासन इत्यत्रापियदार्धाधानंकृतंतदाश्रौताग्निभिर्गृह्येणचसहितोवनंव्रजेत् सर्वाधानेतु २८
श्रौतैरेवकेवलम् यदिकथंचिज्ज्येष्ठभ्रातुरनाहिताग्नित्वादिनाश्रौताग्नयोनाहितास्तर्हिकेवलंसोपासनोव्रजेदित्येवंविवेचनीयं अग्निनयनंचतान्निवर्त्याग्निहोत्रादिकर्मसिद्ध्यर्थं अतएवमनुः वैतानिकंचजुहुयादग्निहोत्रंयथाविधि दर्शमस्कंदयन्पर्वपौर्णमासंचशक्तितइति ननुचपुत्रनिक्षिप्तपत्नीकस्यतर्हिरहिणःकथमग्निहोत्रादिकर्मानुष्ठानंघटते पत्न्यासहयष्टव्यमितिसहाधिकारनियमात् सत्यमेवंकिंत्वत्रपत्नीनिक्षेपविधिबलादेवतन्नैरपेक्ष्येणाधिकारःकल्प्यते यथाहिरजस्वलायांयस्यव्रत्येहनिपत्न्यनालंभुकास्यात्तामरुध्ययजेतेत्यपरोधविधिबलात्तन्निरपेक्षता यद्वावनंप्रतिष्ठमानमेवपतिंपत्न्यनुमन्यतइतिनविरोधः नचयथाब्रह्मचारिणोविधुरस्यवावनंप्रस्थितस्याग्निहोत्रादिपरिलोपः तथानिक्षिप्तपत्नीकस्यापिअग्निहोत्राद्यभावइतिशंकनीयम् अपाक्षिकत्वेनश्रवणात् नचब्रह्मचारिविधुरयोरपिअग्निसाध्यकर्मसुअनधिकारः

अफालकृष्टेनाग्नींश्चपितॄन्देवातिथीनपि भृत्यांश्चतर्पयेत्श्मश्रुजटालोमभृदात्मवान् ४६

पंचममासादूर्ध्वमाहितश्रावणिकाग्नेस्तदधिकारदर्शनात् वानप्रस्थोजटिलश्चीराजिनवासानफालकृष्टमधितिष्ठेत् अकृष्टंमूलफलंसंचिन्वीतऊर्ध्वरेताःक्ष्माशयोदद्यादेवनप्रतिगृण्हीयादूर्ध्वंपंचभ्योमासेभ्यः श्रावणिकेनाग्निमाधायाहिताग्निर्वृक्षमूलिकोदद्यादेवपितृमनुष्येभ्यःसगच्छेत्स्वर्गमानंत्यमितिवसिष्ठस्मरणात् चीरंवस्त्रखंडोवल्कलंवा नफालकृष्टमधितिष्ठेत्कृष्टक्षेत्रस्योपरिननिवसेत् श्रावणिकेनवैदिकेनमार्गेणनलौकिकेनेत्यर्थः ४५ साग्निःसोपासनोव्रजेदित्येतदग्निसाध्यश्रौतस्मार्तकर्मानुष्ठानार्थमित्युक्तंतत्रगुणविधिमाह फालग्रहणंकर्षणसाधनोपलक्षणं

अकृष्टक्षेत्रोद्भवेननीवारवेणुश्यामाकादिनाअग्नींस्तर्पयेत् अग्निसाध्यानिकर्माण्यनुतिष्ठेत् चशब्दाद्भिक्षादानमपितेनैवकुर्यात् तथापितॄन् देवानतिथीन् अपिशब्दाद्भूतान्यपितेनैवतर्पयेत् तथाभृत्यान् चशब्दादाश्रमप्राप्तानपि तथाचमनुः यद्भक्ष्यःस्यात्ततोदद्याद्बलिंभिक्षांचशक्तितः अम्मूलफलभिक्षाभिरर्चयेदाश्रमागतानिति एवंपंचमहायज्ञान्कृत्वास्वयमपितच्छेषमेवभुंजीत देवताभ्यश्चतन्दुलावन्यंमेध्यतरहविः शेषमात्मनियुंजीतलवणंचस्वयंकृतमितिमनुस्मरणात् स्वयंकृतमूखरलवणमेवभोजनार्थेयागाद्यर्थेचमुन्यन्ननियमात् ग्राम्याहारपरित्यागोर्थसिद्धः अतएवमनुः संत्यज्यग्राम्यमाहारंसर्वंचैवपरिच्छदमिति ननुचदर्शपूर्णमासादेर्व्रीह्यादिग्राम्यद्रव्यसाध्यत्वात्कथंतत्परित्या

अन्होमासस्यषण्णांवातथासंवत्सरस्यवा अर्थस्यसंचयंकुर्यात्कृतमाश्वयुजेत्यजेत् ४७

गः नचवक्तव्यमफालकृष्टेनाग्नींश्चेतिविशेषवचनसामर्थ्याद्व्रीह्यादिबाधइति विशेषविषयिण्यापिस्मृत्याश्रुतिबाधस्यान्याय्यत्वात् अफालकृष्टविधेश्चस्मार्त्ताग्निसाध्यकर्मविषयत्वेनाप्युपपत्तेः सत्यमेवंकिंतुतत्रव्रीह्यादेरप्यफालकृष्टत्वसंभवान्नविरोधः अतएवमनुना वासंतशारदैर्मेध्यैर्मुन्यन्नैः स्वयमाहृतैः पुरोडाशांश्चरूंश्चैवविधिवन्निर्वपेत्पृथगिति नीवारादीनांमुन्यन्नानांस्वयमुत्पन्नानांस्वतोमेध्यत्वेसिद्धेपिपुनर्मेध्यग्रहणंयज्ञार्हव्रीह्यादिप्राप्त्यर्थंकृतं मेधोयज्ञस्तदर्हंमेध्यमिति तथाश्मश्रूणिमुखजानिरोमाणिजटारूपांश्चशिरोरुहान्कक्षादीनिचरोमाणिबिभृयात् रोमग्रहणंनखानामप्युपलक्षणं तथाचमनुः जटाश्चबिभृयान्नित्यंश्मश्रुलोमनखांस्तथेति तथात्मवानात्मोपासनाभिरतःस्यात् ४६ पूर्वोक्तद्रव्यसंचयनियममाह एकस्यान्हः

संबंधिभोजनयजनादिदृष्टादृष्टकर्मणःपर्याप्तस्यार्थस्यसंचयंकुर्यात् मासस्यवाषण्णांमासानांवासंवत्सरस्यवासंबंधिकर्मपर्याप्तंसंचयंकुर्यात् नाधिकं यद्येवंक्रियमाणेपिकथंचिदतिरिच्यतेतर्हितदतिरिक्तमाश्वयुजेमासित्यजेत् ४७ किंच दांतोदर्परहितः त्रिषुसवनेषुप्रातर्मध्यंदिनापराण्हेषुस्नानशीलः तथाप्रतिग्रहेपराङ्मुखः चशब्दाद्याजनादिनिवृत्तश्च स्वाध्यायवान् वेदाभ्यासरतः तथाफलमूलभिक्षादिदानशीलः सर्वप्राणिहिताचरणनिरतश्चभवेत् ४८ किंच दंताएवोलूखलंनिस्तुषीकरणसाधनंदंतोलूखलंतद्यस्यास्तिसदंतोलूखलिकः काले

दांतस्त्रिषवणस्नायीनिवृत्तश्चप्रतिग्रहात् स्वाध्यायवान्दानशीलःसर्वसत्वहितेरतः ४८
दंतोलूखलिकःकालपक्वाशीवाश्मकुट्टकः श्रौतंस्मार्त्तंफलस्नेहैःकर्मकुर्यात्तथाक्रियाः ४९

नैवपक्वंकालपक्वंनीवारवेणुश्यामाकादिबदरेंगुदादिफलंचतदशनशीलःकालपक्वाशी वाशब्दोग्निपक्वाशनोवास्यात् कालपक्वभुगेववेति मनूक्ताग्निपक्वाशित्वाभिप्रायः अश्मकुट्टकोवाभवेत् अश्मनाकुट्टनमवहननंयस्यसतथोक्तः तथाश्रौतंस्मार्त्तंचकर्मदृष्टार्थाश्चभोजनाभ्यंजनादिक्रियाःलकुचमधूकादिमेध्यतरुफलोद्भवैःस्नेहद्रव्यैःकुर्यान्नतुघृतादिकैः तथाचमनुः मेध्यवृक्षोद्भवानद्यात्स्नेहांश्चफलसंभवानिति ४९ 

पुरुषार्थतयाविहितद्विर्भोजननिवृत्त्यर्थमाह चांद्रायणैर्वक्ष्यमाणलक्षणैःकालंनयेत् कृच्छ्रैर्वाप्राजापत्यादिभिःकालंवर्त्तयेत् यद्वापक्षेपं
चदशादिनात्मकेतीतेश्नीयात् मासेवाहनिगतेवानक्तमश्नीयात् अपिशब्दाच्चतुर्थकालिकत्वादिनापि यथाहमनुः नक्तंवान्नंसमश्नीयाद्दिवावा
हृत्यशक्तितः चतुर्थकालिकोवास्याद्यद्वाप्यष्टमकालिक इति एतेषांकालनियमानांशक्त्यपेक्षयाविकल्पः ५० किंच आहारविहारावसर
वर्ज्यंरात्रौशुचिःप्रयतःस्वप्यात् नोपविशेन्नापितिष्ठेत् दिवास्वप्नस्यपुरुषमात्रार्थतयाप्रतिषिद्धत्वान्नतन्निवृत्तिपरम् तथाभूमावेवस्वप्यात्

चांद्रायणैर्नयेत्कालंकृच्छ्रैर्वावर्त्तयेत्सदा पक्षेगतेवाप्यश्नीयान्मासेवाहनिवागते ५० स्व
प्याद्भूमौशुचीरात्रौदिवासंप्रपदैर्नयेत् स्थानासनविहारैर्वायोगाभ्यासेनवातथा ५१

तच्चभूमावेव नशय्यांतरितायांमंचकादौवा दिनंतुसंप्रपदैरटनैर्नयेत् स्थानासनरूपैर्वाविहारैःसंचारैःकंचित्कालंस्थानंकंचिच्चोपवेशनमि
त्येवंवादिनंनयेत् योगाभ्यासेनवा तथाचमनुः विविधाश्चोपनिषदीरात्मसंसिद्धयेश्रुतीरिति आत्मनःसंसिद्धयेब्रह्मत्वप्राप्तये तथाशब्दा
त्क्षितिपरिलोडनाद्वानयेत् भूमौविपरिवर्त्तेततिष्ठेद्वाप्रपदैर्दिनमितिमनुस्मरणात् प्रपदैःपादाग्रैः ५१ ६८ ६८



किंच त्रिऋतुःसंवत्सरोग्रीष्मोवर्षाहेमंतइतिदर्शनात् ग्रीष्मेचैत्रादिमासचतुष्टयेचतसृषुदिक्षुचत्वारउपरिष्टादादित्यइत्येवंपंचानामग्नीनां
मध्येतिष्ठेत् तथावर्षासुश्रावणादिमासचतुष्टयेस्थंडिलेशयः वर्षधाराविनिवारणविरहिणिभूतलेनिवसेत् हेमंतेमार्गशीर्षादिमासचतु
ष्टयेक्लिन्नवासोवसीत एवंविधतपश्चरणेअसमर्थःस्वशक्त्यनुरूपंवातपश्चरेत् यथाशरीरशोषस्तथायतेत तपश्चरंश्चोग्रतरंशोषयेद्देह
मात्मनइतिमनुस्मरणात् ५२ किंच यःकश्चित्कंटकादिभिर्विविधमंगानितुदतिव्यथयतिनतस्मैनकुध्येत् यश्चंदनादिभिरुपलिंपतितस्मै-

ग्रीष्मेपंचाग्निमध्यस्थोवर्षासुस्थंडिलेशयः आर्द्रवासास्तुहेमंतेशक्त्यावापितपश्चरेत् ५२
यःकंटकैर्वितुदतिचंदनैर्यश्चलिंपति अक्रुद्धोपरितुष्टश्चसमस्तस्यचतस्यच ५३ अ
ग्नीन्वाप्यात्मसात्कृत्वावृक्षावासोमिताशनः वानप्रस्थगृहेष्वेवयात्रार्थंभैक्ष्यमाचरेत् ५४

स्ययतितस्यतुनपरितुष्येत् किंतुतयोरुभयोरपिसमःस्यादुदासीनोभवेत् ५३ अग्निपरिचर्याक्षमंप्रत्याह अग्नीनात्मनिसमारोप्यवृक्षा-
वासोवृक्षएवआवासःकुटीयस्यसुतथोक्तः मिताशनःस्वल्पाहारः अपिशब्दात्फलमूलाशनश्चभवेत् यथाहमनुः अग्नीन्स्वात्मनिवैतानान्समा
रोप्ययथाविधि अनग्निरनिकेतःस्यान्मुनिर्मूलफलाशन इति मुनिर्मौनव्रतयुक्तः फलमूलासंभवेचयावत्प्राणधारणंभवतितावन्मात्रंभैक्ष्यंवानप्र
स्थगृहेष्वाचरेत् ५४

यदातु तदसंभवोव्याध्यभिभवोवा तदा किंकार्यमित्यत आह ग्रामाद्वाभैक्ष्यमाहृत्यवाग्यतोमौनीभूत्वाअष्टौग्रासान्भुंजीत ग्राम्यभैक्ष्यविधा-
नान्मुन्यन्ननियमोऽर्थलुप्तः यदापुनरष्टभिर्ग्रासैःप्राणधारणंनसंभवतितदाष्टौग्रासामुनेर्भैक्ष्यंवानप्रस्थस्यषोडशेतिस्मृत्यंतरोक्तंद्रष्टव्यम्
सकलानुष्ठानसमर्थंप्रत्याह अथवावायुरेवभक्षोयस्यासौवायुभक्षः प्रागुदीचीमैशानींदिशंगच्छेत् आवर्ष्मसंक्षयात् वर्ष्मवपुस्तस्यनिपातपर्यं-
तमकुटिलगतिर्गच्छेत् यथाहमनुः अपराजितांवास्थायगच्छेद्दिशमजिह्मगइति महाप्रस्थानेप्यशक्तोभृगुपतनादिकंवाकुर्यात् वानप्रस्थोवी-
राध्वानंज्वलनांबुप्रवेशनंभृगुपतनंवानुतिष्ठेदितिस्मरणात् स्नानाचमनादिधर्माब्रह्मचारिप्रकरणाद्यभिहिताश्चाविरोधिनोस्यापिभवंति

ग्रामादाहृत्यवाग्रासानष्टौभुंजीतवाग्यतः वायुभक्षःप्रागुदीचींगच्छेद्वावर्ष्मसंक्षयात् ५५

उत्तरेषांचैतदविरोधीतिगौतमस्मरणात् एवंप्रागुदितेदेवादिदीक्षामहाप्रस्थानपर्यंतास्तनुत्यागांतमनुतिष्ठन्ब्रह्मलोकेपूज्यतांप्राप्नोति यथा-
हमनुः आसांमहर्षिचर्याणांत्यक्त्वान्यतमयातनुम् वीतशोकभयोविप्रोब्रह्मलोकेमहीयतेइति ब्रह्मलोकःस्थानविशेषोनतुनित्यंब्रह्म तत्रलो-
कशब्दस्याप्रयोगात् तत्रतुरीयाश्रममंतरेणमुक्त्यनंगीकाराच्च नचयोगाभ्यासेनवापुनरितिब्रह्मोपासनविध्यनुपपत्त्यातद्भावापत्तिःपरि- 
शंकनीया सालोक्यादिप्राप्त्यर्थत्वेनापितदुपपत्तेः अतएवश्रुतौत्रयोधर्मस्कंधाइत्युपक्रम्य यज्ञोध्ययनंदानमितिप्रथमः तपएवेतिद्वितीयः

ब्रह्मचार्याचार्यकुलवासीतृतीयः अत्यंतमाचार्यकुलएवमात्मानमवसादयन्निति गार्हस्थ्यवानप्रस्थ्यनैष्ठिकत्वस्वरूपमभिधायसर्वएतेपु-
ण्यलोकाभवंतीतित्रयाणामाश्रमिणांपुण्यलोकप्राप्तिमभिधायब्रह्मसंस्थोमृतत्वमेतीतिपारिशेष्यात्परिव्राजकस्यैवब्रह्मसंस्थस्यमुक्तिल-
क्षणामृतत्वप्राप्तिरभिहिता यदापिश्राद्धकृत्सत्यवादीचगृहस्थोपिविमुच्यतइतिगृहस्थस्यापिमोक्षप्रतिपादनंतद्भवांतरानुभूतपारिव्रज्य-
स्यैत्यवगंतव्यम् इतिवानप्रस्थप्रकरणम् ५५ वैखानसधर्माननुक्रम्यक्रमप्राप्तान्परिव्राजकधर्मान्साम्प्रतंप्रस्तौति यावताकालेनतीव्र-

वनाद्गृहाद्वाकृत्वेष्टिंसार्ववेदसदक्षिणाम् प्राजापत्यांतदंतेतानग्नीनारोप्यचात्मनि ५६
अधीतवेदोजपकृत्पुत्रवानन्नदोग्निमान् शक्त्याचयज्ञकृन्मोक्षेमनःकुर्यात्तुनान्यथा ५७

तपःशोषितवपुषोविषयकषायपरिपाकोभवति पुनश्चप्रमदोद्भवाशंकानोद्भाव्यतेतावत्कालंवनवासंकृत्वातत्समनंतरंमोक्षेमनःकुर्यात् वन-
गृहशब्दाभ्यांतत्संबंध्याश्रमोलक्ष्यते मोक्षशब्देनचमोक्षैकफलकश्चतुर्थाश्रमः अथवागृहाद्गार्हस्थ्यादनंतरंमोक्षेमनःकुर्यात् अनेनचपूर्वो-
क्तश्चतुराश्रमसमुच्चयपक्षःपाक्षिकइतिद्योतयति तथाचविकल्पोजाबालश्रुतौश्रूयते ब्रह्मचर्यंपरिसमाप्यगृहीभवेत् गृहीभूत्वावनीभवेत्
वनीभूत्वाप्रव्रजेत् यदिवेतरथाब्रह्मचर्यादेवप्रव्रजेत् गृहाद्वावनाद्वेति तथागार्हस्थ्येतराश्रमबाधश्चगौतमेनदर्शितः एकाश्रम्यंत्वाचार्याः

प्रत्यक्षविधानाद्गार्हस्थ्यस्येति एषांचसमुच्चयविकल्पबाधपक्षाणांसर्वेषांश्रुतिमूलत्वादिच्छयाविकल्पः अतोयत्कैश्चित्पंडितमान्यैरुक्तम्
स्मार्त्तत्वान्नैष्ठिकादीनांगार्हस्थ्येनश्रौतबाधः गार्हस्थ्यानधिकृतांधक्लीबादिविषयत्वावेतितत्स्वाध्यायाध्ययनवैधुर्यनिबंधनमित्युपेक्षणी
यम् किंचयथाविष्णुक्रमणाज्यावेक्षणाद्यक्षमतयापंग्वादीनांश्रौतेष्वनधिकारस्तथास्मार्त्तेष्वप्युदकुंभाहरणभिक्षाचर्यादिष्वक्षमत्वात्क-
थंपंग्वादिविषयतयानैष्ठिकत्वाद्याश्रमनिर्वाहः अस्मिंश्चाश्रमेब्राह्मणस्यैवाधिकारः आत्मन्यग्नीन्समारोप्यब्राह्मणःप्रव्रजेद्गृहात् तथा
एषवोभिहितोधर्मोब्राह्मणस्यचतुर्विधइत्युपक्रमोपसंहाराभ्यांमनुनाब्राह्मणस्याधिकारप्रतिपादनात् ब्राह्मणाःप्रव्रजंतीतिश्रुतेश्चाग्रज
न्मनएवाधिकारोनद्विजातिमात्रस्य अन्येतुत्रैवर्णिकानांप्रकृतत्वात्त्रयाणांवर्णानांवेदमधीत्यचत्वारआश्रमाइतिसूत्रकारवचनाच्चद्विजाति
मात्रस्याधिकारमाहुः यदाचवनाद्गृहाद्वाप्रव्रजतितदासार्ववेदसदक्षिणांसार्ववेदसीसर्ववेदसंबंधिनीदक्षिणायस्याःसातथोक्तातांप्रजापति
देवताकामिष्टिंकृत्वातदंतेतान्वैतानानग्नीनात्मनिश्रुत्युक्तविधानेनसमारोप्यचशब्दादुदगयनेपौर्णमास्यापुरश्चरणमादौकृत्वाष्टकेनकाये
नाष्टौश्राद्धानिनिर्वपेत् द्वादशवेतिबोधायनाद्युक्तंपुरश्चरणादिकंचकृत्वा तथाधीतवेदोजपपरायणोजातपुत्रोदीनांधकृपणार्पितार्थेयथा
शक्त्यन्नदश्चभूत्वाऽनाहिताग्निर्ज्येष्ठत्वादिनाप्रतिबंधाभावेकृताधानोनित्यनैमित्तिकान्यज्ञान्कृत्वामोक्षेमनःकुर्यात् चतुर्थाश्रमंप्रविशेन्ना
न्यथा अनेनानपाकृतर्णत्रयस्यप्रव्रज्यायामनधिकारंदर्शयति यथाहमनुः ऋणानित्रीण्यपाकृत्यमनोमोक्षेनिवेशयेत् अनपाकृत्यमोक्षं ३२
तुसेवमानोव्रजत्यधइति यदातुब्रह्मचर्यात्प्रव्रजतितदानप्रजोत्पादनादिनियमः अकृतदारपरिग्रहस्यतत्रानधिकारात् रागप्रयुक्तत्वाच्चवि

वाहस्य नचऋणत्रयापाकरणविधिरेवदारानाक्षिपतीतिशंकनीयम् विद्याधनार्जननियमवदन्यप्रयुक्तदारसंभवेतस्यानाक्षेपकत्वात् ननु
जायमानोब्राह्मणस्त्रिभिर्ऋणवान् जायतेब्रह्मचर्येणऋषिभ्योयज्ञेनदेवेभ्यःप्रजयापितृभ्यइति जातमात्रस्यैवप्रजोत्पादनादीन्यावश्यकानी
तिदर्शयति मैवं नहिजातमात्रःअकृतदाराग्निपरिग्रहोयज्ञादिष्वधिक्रियते तस्मादधिकारीजायमानोब्राह्मणादिर्यज्ञादीननुतिष्ठेदितितस्या
र्थः अतश्चोपनीतस्यवेदाध्ययनमेवावश्यकम् कृतदाराग्निपरिग्रहस्यप्रजोत्पादनमपीतिनिरवद्यम् ५६ ५७ एवमधिकारिणंनिरूप्य-
तद्धर्मानाह सर्वभूतेभ्यःप्रियाप्रियकारिभ्योहितउदासीनोनपुनर्हिताचरणः हिंसानुग्रहयोरनारंभीतिगौतमस्मरणात् शांतोबाह्यांतःकर

सर्वभूतहितःशांतस्त्रिदंडीसकमंडलुः एकारामःपरिव्रज्यभिक्षार्थीग्राममाश्रयेत् ५८

णोपरतःत्रिदंडाअस्यसंतीतित्रिदंडी तेचदंडावैणवाग्राह्याः प्राजापत्येष्ट्यनंतरंत्रीन्वैणवान्दंडान्मूर्धप्रमाणान्दक्षिणेनपाणिनाधारयेत्सव्येनसो
दकंकमंडलुमितिस्मृत्यंतरदर्शनात् एकंवादंडंधारयेत् एकदंडीत्रिदंडीवेतिबोधायनस्मरणात् चतुर्थमाश्रमंगच्छेद्ब्रह्मविद्यापरायणः ए-
कदंडीत्रिदंडीवासर्वसंगविवर्जितइतिचतुर्विंशतिमतेदर्शनाच्च तथाशिखाधारणमपिवैकल्पिकं मुंडःशिखीवेतिगौतमस्मरणात् मुंडोऽम
मोपरिग्रहइतिवसिष्ठस्मरणात् यज्ञोपवीतधारणमपिवैकल्पिकमेव सशिखान्केशान्निकृत्यविसृज्ययज्ञोपवीतमितिकाठकश्रुतिदर्शना

त् कुटुंबंपुत्रदारांश्चवेदांगानिचसर्वशः केशानूयज्ञोपवीतंचत्यक्त्वागूढश्चरेन्मुनिरितिबाष्कलश्रवणाच्च अथयज्ञोपवीतमप्सुजुहोतिभूः स्वाहेति अथदंडमादत्तेसखेमांगोपायेतिपरिशिष्टदर्शनाच्च यद्यशक्तिस्तदाकंथापियाद्या काषायीमुंडस्त्रिदंडीकमंडलुपवित्रपादुकासनकंथामात्र इतिदेवलस्मरणात् शौचाद्यर्थकमंडलुसहितश्चभवेत् एकारामःप्रव्रजितांतरेणासहायःसंन्यासिनीभिःस्त्रीभिश्च स्त्रीणांचैक इति बौधायनेनस्त्रीणामपिप्रव्रज्यास्मरणात् तथाचदक्षः एकोभिक्षुर्यथोक्तश्च द्वावेवमिथुनंस्मृतं त्रयोग्रामःसमाख्यातऊर्ध्वंतुनगरायते राजवार्त्तादितेषांतुभिक्षावार्त्तापरस्परम् अपिपैशुन्यमात्सर्यंसन्निकर्षान्नसंशयइति परिव्रज्यपरिपूर्वोव्रजतिस्त्यागेवर्त्तते अतश्चाह



अप्रमत्तश्चरेद्भैक्ष्यंसायान्हेनभिलक्षितः रहितेभिक्षुकैर्ग्रामेयात्रामात्रमलोलुपः ५९

ममाभिमानंतत्कृतंचलौकिकंकर्मनिचयंवैदिकंचनित्यकाम्यात्मकंसंत्यजेत् तदुक्तंमनुना सुखाभ्युदयिकंचैववैने श्रेयसिकमेवच प्रवृत्तंचनिवृत्तंच द्विविधंकर्मवैदिकं इहवामुत्रवाकाम्यंप्रवृत्तंकर्मकीर्त्त्यते निष्कामंज्ञानपूर्वंतुनिवृत्तमुपदिश्यते यथोक्तान्यपिकर्माणिपरिहायद्विजोत्तमः आत्मज्ञानेशमेचस्याद्वेदाभ्यासेचयत्नवानिति अत्रवेदाभ्यासःप्रणवाभ्यासस्तत्रयत्नवान् भिक्षाप्रयोजनार्थंग्राममाश्रयेत्प्रविशेत् नपुनःसुखनिवासार्थं वर्षाकालेतुनदोषःऊर्ध्वंवार्षिकाभ्यांमासाभ्यांनैकस्थानवासीतिशंखस्मरणात् अशक्तौपुनर्मासचतुष्टयपर्यंतमपिस्थातव्यं नचिरमेकत्रवसेदन्यत्रवर्षाकालात् श्रावणादयश्चत्वारोमासावर्षाकालइतिदेवलस्मरणात् एकरात्रंवसेद्ग्रामेनगरेरात्रिपंचकं वर्षाभ्योन्यत्रवर्षासुमासांस्तुचतुरोवसेदितिकाण्व ३३

स्मरणात् ५८ कथंभिक्षाटनंकार्यमित्यतआह अप्रमत्तोवाक्चक्षुरादिचापलरहितोभैक्ष्यंचरेत् वसिष्ठेनात्रविशेषोदर्शितः सप्तागाराण्यसंकल्पितानिचरेद्भैक्षमिति सायान्हेअन्हःपंचमेभागे तथाचमनुः विधूमेसन्नमुसलेव्यंगारेभुक्तवज्जने वृत्तेशरावसंपातेनित्यंभिक्षांयतिश्चरेदिति तथा एककालंचरेद्भिक्षांप्रसज्येन्नतुविस्तरे भैक्ष्यप्रसक्तोहियतिर्विषयेष्वपिसज्जतीति अनभिलक्षितः ज्योतिर्विज्ञानोपदेशादिनाअचिन्हितः नचोत्पातनिमित्ताभ्यांननक्षत्रांगविद्यया नानुशासनवादाभ्यांभिक्षांलिप्सेतकर्हिचिदितितेनोक्तत्वादिति यत्पुनर्वसिष्ठवचनं ब्राह्मणकुलेवायल्लभेततद्भुंजीतसायंप्रातर्मांसवर्ज्यमिति तदशक्तविषयं भिक्षुकैर्भिक्षणशीलैः पाखंड्यादिभिर्वर्जितेग्रामे मनुनाचविशेषउ

यतिपात्राणिमृद्वेणुदार्वलाबुमयानिच सलिलंशुद्धिरेतेषांगोवालैश्चावघर्षणम् ६०

क्तः नतापसैर्ब्राह्मणैर्वावयोभिरपिवाश्वभिः आकीर्णंभिक्षुकैरन्यैरगारमुपसंव्रजेदिति यावताप्राणयात्रावर्त्तनंतावन्मात्रंभैक्ष्यंचरेत् तथाचसंवर्त्तः अष्टौभिक्षाःसमादायमुनिःसप्तचपंचवा अद्भिःप्रक्षालिताःसर्वास्ततोश्नीयाच्चवाग्यतइति अलोलुपोमिष्टान्नव्यंजनादिष्वप्रसक्तः ५९ भिक्षाचरणार्थंपात्रमाह मृदादिप्रकृतिकानियतीनांपात्राणिभवेयुः तेषांसलिलंगोवालावघर्षणंचशुद्धिसाधनं इयंचशुद्धिर्भिक्षाचरणप्रयोगांगभूतानामेध्याद्युपहतविषया तदुपघातेद्रव्यशुद्धिप्रकरणोक्ताद्रष्टव्या अतएवमनुना अतैजसानिपात्राणित

स्यस्युर्निर्वर्णानिच तेषामद्भिःस्मृतंशौचंचमसानामिवाध्वरइति चमसदृष्टांतोपादानेनप्रयोगिकीशुद्धिर्दर्शिता पात्रांतराभावेभोजनम
पितत्रैवकार्यम् तद्देस्यंगृहीत्वैकांतेतेनपात्रेणान्येनवातूष्णीमात्रयाभुंजीतेतिदेवलस्मरणात् ६० एवंभूतस्ययतेरात्मोपासनांगंनियम
विषयमाह चक्षुरादींद्रियसमूहंरूपादिविषयेभ्यःसम्यङ्निरुद्ध्यविनिवर्त्त्यरागद्वेषौप्रियाप्रियविषयौप्रहायत्यक्त्वाचशब्दादीर्ष्यादीनपि
तथाभूतानामपकारेणभयमकुर्वन्शुद्धांतःकरणःसन्नद्वैतसाक्षात्कारेणामृतीभवतिमुक्तोभवति ६१ किंच विषयाभिलाषद्वेषजनितदो
षकलुषितस्याशयस्यांतःकरणस्यशुद्धिःकल्मषक्षयःप्राणायामैःकर्त्तव्यः तस्याःशुद्धेरात्माद्वैतसाक्षात्काररूपज्ञानोत्पत्तिनिमित्तत्वात् एवं

संनिरुद्ध्येंद्रियग्रामंरागद्वेषौप्रहायच भयंहित्वाचभूतानाममृतीभवतिद्विजः ६१ कर्त्त
व्याशयशुद्धिस्तुभिक्षुकेणविशेषतः ज्ञानोत्पत्तिनिमित्तत्वात्स्वातंत्र्यकरणायच ६२

चसतिविषयासक्तितज्जनि
तदोषात्मकप्रतिबंधक्षयेसत्यात्मध्यानधारणादौस्वतंत्रोभवति तस्माद्भिक्षुकेणतेषामशुद्धिर्विशेषतोनुष्ठेया तस्यमोक्षप्रसाधनत्वात् मोक्षस्यच- ३४
शुद्धांतःकरणतामंतरेणदुर्लभत्वात् यथाहमनुः दह्यंतेध्मायमानानांधातूनांहियथामलाः तथेंद्रियाणांदह्यंतेदोषाःप्राणस्यनिग्रहादिति ६२

इंद्रियनिरोधोपायतयासंसारस्वरूपनिरूपणमाह वैराग्यसिद्ध्यर्थंमूत्रपुरीषादिपूर्णनानाविधगर्भवासाअवेक्षणीयाः पर्यालोचनीयाः च
शब्दाज्जननोपरमावपि तथानिषिद्धाचरणादिक्रियाजन्यामहारौरवादिनिरयपतनरूपागतयः तथाधयोमनःपीडाः व्याधयश्चज्वराति
साराद्याःशारीराःक्लेशाः अविद्यास्मितरागद्वेषाभिनिवेशाःपंच जरावलितपलिताद्यभिभवः रूपविपर्ययः पंगुकुब्जत्वादिनाप्राक्तनस्य
रूपस्यान्यथाभावः तथाश्वसूकरखरोरगाद्यनेकजातिषुभवउत्पत्तिः तथाइष्टस्याप्राप्तिः अनिष्टस्यप्राप्तिरित्यादिबहुतरक्लेशावहंसंसार

अवेक्ष्यागर्भवासाश्चकर्मजागतयस्तथा आधयोव्याधयःक्लेशाजरारूपविपर्ययः ६३
भवोजातिसहस्रेषुप्रियाप्रियविपर्ययः ध्यानयोगेनसंपश्येत्सूक्ष्मआत्मात्मनिस्थितः ६४

स्वरूपंपर्यालोच्यतत्परिहारार्थमात्मज्ञानोपायभूतेंद्रियजयेप्रवर्त्तेत एवमवेक्ष्यानंतरंकिंकार्यमित्यतआह योगश्चित्तवृत्तिनिरोधः आ-
त्मैकाग्रताध्यानम् तस्याएवबाह्यविषयस्योपरमः ध्यानयोगेननिदिध्यासनापरपर्यायेण सूक्ष्मशरीरप्राणादिव्यतिरिक्तःक्षेत्रज्ञःआत्म
निब्रह्मण्यवस्थितः इत्येवंतत्त्वंपदार्थयोरभेदंसम्यक्पश्येत् अपरोक्षीकुर्यात् अतएवश्रुतौआत्माद्रष्टव्यइतिसाक्षात्काररूपंदर्शनम-
नूद्यतत्साधनत्वेनश्रोतव्योमंतव्योनिदिध्यासितव्यइतिश्रवणमनननिदिध्यासनानिविहितानि ६३ ६४ [illegible] [illegible]

किंच प्राक्तनश्लोकोक्तात्मोपासनाख्येधर्मेनाश्रमोदंडकमंडल्वादिधारणंकारणं यस्मादसौक्रियमाणोभवेद्देवनातिदुष्करः तस्माद्यदा-
त्मनोपथ्यमुद्वेगकरंपरुषभाषणादितत्परेषांनसमाचरेत् अनेनज्ञानोत्पत्तिहेतुभूतांतःकरणशुध्व्यापादनत्वेनांतरंगत्वात् रागद्वेषप्रहाण-
स्यप्रधानत्वेनप्रशंसार्थमाश्रमनिराकरणम् नपुनस्तत्परित्यागाय तस्यापिविहितत्वात् तदुक्तंमनुना भूषितोपिचरेद्धर्मंयत्रतत्राश्रमेव
सन् मनःसर्वेषुभूतेषुनलिंगंधर्मकारणमिति ६५ किंच सत्यंयथार्थप्रियवचनम् अस्तेयंपरद्रव्यानपहारः अक्रोधोपकारिण्यपिक्रोध

नाश्रमःकारणंधर्मेक्रियमाणोभवेद्धिसः अतोयदात्मनोपथ्यंपरेषांनतदाचरेत् ६५
सत्यमस्तेयमक्रोधोन्हीःशौचंधीर्धृतिर्दमः संयतेंद्रियताविद्याधर्मःसर्वउदाहृतः ६६

स्यानुत्पादनम् न्हीर्लज्जा शौचमाहारादिशुद्धिः धीर्हिताहितविवेकः धृतिरिष्टवियोगानिष्टप्राप्तौप्रचलितचित्तस्ययथापूर्वमवस्थापनम्
दमोमदत्यागः संयतेंद्रियताअप्रतिषिद्धेष्वपिविषयेषुअनतिप्रसंगः विद्याआत्मज्ञानम् एतैःसत्यादिभिरनुष्ठितैःसर्वोधर्मोनुष्ठितोभव- ३५
ति अनेनदंडकमंडल्वादिधारणस्यबाह्यलक्षणात्सत्यादीनामात्मगुणानामंतरंगतांद्योतयति ६६ ७ ७ ७

ननुध्यानयोगेनात्मनिस्थितमात्मानंपश्येदित्युक्तंजीवपरमात्मनोर्भेदाभावादित्यतआह यद्यपिजीवपरमात्मनोःपारमार्थिकोभेदोनास्ति
तथाप्यात्मनःसकाशादविद्योपाधिभेदभिन्नतयाजीवात्मानःप्रभवंतिहियस्मात् तस्माद्युज्यतएवजीवपरमात्मनोर्भेदव्यपदेशः तथाहित
प्ताल्लोहपिंडादयोगोलकाद्विस्फुलिंगकास्तेजोवयवानिःसरंति निःसृताश्चस्फुलिंगव्यपदेशंलभंतेतद्वत् अतउपपन्नमात्मनिस्थितोद्रष्टव्य
इति यद्वायमर्थः ननुसुषुप्तिसमयेप्रलयेचसकलक्षेत्रज्ञानांब्रह्मणिप्रलीनत्वात्कस्यायमात्मोपासनाविधिरित्यतआह निःसरंतीत्यादि

निःसरंतियथालोहपिंडात्तप्तात्स्फुलिंगकाः सकाशादात्मनस्तद्वदात्मानःप्रभवंतिहि ६७
तत्रात्माहिस्वयंकिंचित्कर्मकिंचित्स्वभावतः करोतिकिंचिदभ्यासाद्धर्माधर्मोभयात्मकं ६८

यद्यपिसूक्ष्मरूपेणप्रलयवेलायांप्रलीनास्तथाप्यात्मनःसकाशादविद्योपाधिभेदभिन्नतयाजीवात्मानःप्रभवंति पुनःकर्मवशात्स्थूलश
रीराभिमानिनोजायंते तस्मान्नोपासनाविधिविरोधः तैजसस्यपृथग्भावसाम्याल्लोहपिंडदृष्टांतः ६७ ननुचानुपात्तवपुषांक्षेत्रज्ञानांनिष्प
रिस्पंदतयाकर्माभावात्कथंतन्निबंधनोजरायुजांडजादिचतुर्विधदेहपरिग्रहइत्यतआह यद्यपितस्यामवस्थायांपरिस्पंदात्मकक्रियाभाव
स्तथापिधर्माधर्माध्यवसायात्मकंकर्ममानसंभवत्येव तस्यचविशिष्टशरीरग्रहणहेतुत्वमस्त्येव वाचिकैःपक्षिमृगतामानसैरंत्यजाति

तामितिमनुस्मरणात् एवंगृहीतवपुःस्वयमेवान्वयव्यतिरेकनिरपेक्षःस्तन्यपानादिकेकृतेतृप्तिर्भवत्यकृतेनभवतीत्येवंरूपोयावन्वय
व्यतिरेकौतत्रनिरपेक्षा प्राग्भवीयानुभवभावितभावनानुभावोद्भूतकार्यावबोधः किंचिस्तन्यपानादिकंकरोतिकिंचित्स्वभावतोयदृ-
च्छयाप्रयोजनाभिसंधिनिरपेक्षःपिपीलिकादिभक्षणंकरोति किंचिद्भवांतराभ्यासवशाद्धर्माधर्मोभयरूपंकरोति तथाचस्मृत्यंतरम्
प्रतिजन्मयदभ्यस्तंदानमध्ययनंतपः तेनैवाभ्यासयोगेनतदेवाभ्यसतेपुनरिति एवंजीवानांकर्मवैचित्र्यात्कृतंजरायुजादिदेहवैचित्र्यं
युज्यतएव ६८ नन्वेवंसतिब्रह्मणएवकथंचिज्जीवव्यपदेश्यत्वात्तस्यचनित्यत्वादिधर्मत्वात्कथंविष्णुमित्रोजातइतिव्यवहारइत्याशंक्या

निमित्तमक्षरःकर्ताबोद्धाब्रह्मगुणीवशी अजःशरीरग्रहणात्सजातइतिकीर्त्यते ६९

ह सत्यमात्मासकलजगत्प्रपंचाविर्भावेऽविद्यासमावेशवशात्समवाय्यसमवायिनिमित्तमित्येवंस्वयमेवत्रिविधमपिकारणंनपुनःका
र्यकोटिनिविष्टः यस्मादक्षरोऽविनश्वरः ननुसत्वादिगुणविकारस्यसुखदुःखमोहात्मकस्यकार्यभूतेजगत्प्रपंचेदर्शनात्तद्गुणवत्याःप्रकृ
तेरेवजगत्कर्तृतोचितानपुनर्निर्गुणस्यब्रह्मणः मैवंमंस्थाः आत्मैवकर्तायस्मादसौजीवोपभोग्यसुखदुःखहेतुभूतादृष्टादेर्बोद्धा नत्व ३६
चेतनायाःप्रकृतेर्नामरूपव्याकृतविचित्रभोक्तृवर्गभोगानुकूलभोग्यभोगायतनादियोगिजगत्प्रपंचरचनाघटते तस्मादात्मैवकर्ता

तथासएवब्रह्मबृंहकोविस्तारकः नचासौनिर्गुणः यतस्तस्यत्रिगुणशक्तिरविद्याप्रकृतिप्रधानाद्यपरपर्यायाविद्यते अतःस्वतोनिर्गुणत्वेपिश-
क्तिमुखेनसत्वादिगुणयोगीकथ्यते नचैतावताप्रकृतेःकारणता यस्मादात्मैववशीस्वतंत्रोनप्रकृतिर्नर्मस्वतंत्रारंभकत्वांतरंनाद्यविधत्ते प्रमा
णाभावात् नचवच्चनीयशक्तिरूपापिसैवकर्तृभूतेति यतःशक्तिमत्कारकंनशक्तिस्तस्मादात्मैवजगतस्त्रिविधमपिकारणं तथाअजउत्पत्ति
रहितः अतस्तस्ययद्यपिसाक्षाज्जननंनोपपद्यतेतथापिशरीरग्रहणमात्रेणजातइत्युच्यते अवस्थांतरयोगितयोत्पत्तेः गृहस्थोजातइतिवत्

सर्गादौसयथाकाशंवायुंज्योतिर्जलंमहीम् सृजत्येकोत्तरगुणांस्तथादत्तेभवन्नपि ७०
आहुत्याप्यायतेसूर्यःसूर्याद्वृष्टिरथौषधिः तदन्नरसरूपेणशुक्रत्वमधिगच्छति ७१

६९ शरीरग्रहणप्रकार
माह सृष्टिसमयेसपरमात्मायथाकाशादीन् शब्दैकगुणंगगनम् शब्दस्पर्शगुणःपवनः शब्दस्पर्शरूपगुणंतेजः शब्दस्पर्शरूपरसवदुद
कम् शब्दस्पर्शरूपरसगंधगुणाजगतीत्येवमेकोत्तरगुणान्सृजति तथात्माजीवभावमापन्नोभवन्नुत्पद्यमानोपिस्वशरीरस्यारंभकत्वेना
पितानुपादत्तेगृह्णाति ७० कथंशरीरारंभकत्वंपृथिव्यादीनामित्यतआह यजमानैःप्रक्षिप्तयाहुत्यापुरोडाशादिरसेनाप्यायतेसूर्यः सूर्या-
च्चकालवशेनपरिपक्वाज्यादिहवीरसाद्वृष्टिर्भवति ततोव्रीह्याद्यौषधिरूपमन्नम् तच्चान्नंसेवितंसत्रसरुधिरादिक्रमेणशुक्रशोणितभावमा
पद्यते ७१ ७

ततःकिमित्यतआह ऋतुवेलायांस्त्रीपुंसयोर्योगेशुक्रंचशोणितंचशुक्रशोणितेतस्मिन्परस्परसंयुक्तेविशुद्धेवातपित्तश्लेष्मदुष्टग्रंथिपूयक्षीणमूत्र-
पुरीषगंधरेतांस्यबीजानीतिस्मृत्यंतरोक्तदोषरहितेस्थितापंचधातून्पृथिव्यादिपंचमहाभूतानिशरीरारंभकतयास्वयंषष्ठश्चिद्धातुरात्माप्रभुःश
रीरारंभकरणेऽदृष्टकर्मयोगितयासमर्थोयुगपदादत्ते भोगायतनत्वेनस्वीकरोति तथाचशारीरके स्त्रीपुंसयोगेयोनौरजसाभिसंसृष्टशुक्रंतत्क्ष
णमेवसहभूतात्मनागुणैश्चसत्वरजस्तमोभिःसहवायुनाप्रेर्यमाणंगर्भाशयेनिष्ठतीति ७२ किंच इंद्रियाणिज्ञानकर्मेंद्रियाणिवक्ष्यमाणानि

**स्त्रीपुंसयोस्तुसंयोगेविशुद्धेशुक्रशोणिते पंचधातून्स्वयंषष्ठआदत्तेयुगपत्प्रभुः ७२ इंद्रियाणिमनःप्राणोज्ञानमायुःसुखंधृतिः**
**धारणाप्रेरणंदुःखमिच्छाहंकारएवच ७३ प्रयत्नआकृतिर्वर्णःस्वरद्वेषौभवाभवौ तस्यैतदात्मजंसर्वमनादेरादिमिच्छतः ७४**

मनश्चोभयसाधारणम् प्राणोपानोव्यानउदानःसमानइत्येवंपंचवृत्तिभेदभिन्नःशारीरोवायुःप्राणः ज्ञानमवगमः आयुःकालविशेषावच्छि
न्नंजीवनम् सुखंनिर्वृतिः धृतिश्चित्तस्थैर्यम् धारणाप्रज्ञामेधाच प्रेरणंज्ञानकर्मेंद्रियाणामधिनिष्ठातृत्वम् दुःखमुद्वेगः इच्छास्पृहा अहं
कारोहंकृतिः प्रयत्नःकृतिः आकृतिराकारः वर्णोगौरिमादिः स्वरःषड्जगांधारादिः द्वेषोवैरम् भवःपुत्रपश्वादिविभवः अभवस्तद्विपर्ययः त ३७
स्यानादेरात्मनोनित्यस्यादिमिच्छतःशरीरंजिघृक्षमाणस्यसर्वमेतदिंद्रियादिकमात्मजनितंप्राग्भवीयकर्मबीजजन्यमित्यर्थः ७३ ७४

संयुक्तशुक्रशोणितस्यकायरूपपरिणतौक्रममाह असौचेतनःषष्ठोधातुःधातुविमूर्च्छितःधातुषुपृथिव्यादिषुविमूर्च्छितोलोलीभूतःक्षीर
नीरवदेकीभूतइतियावत् प्रथमेगर्भमासेसंक्लेदभूतोद्रवरूपतांप्राप्तएवावतिष्ठते नकठिनतयापरिणमते द्वितीयेतुमास्यर्बुदमीषत्कठिनमां
सपिंडरूपंभवति अयमभिप्रायः कौष्ठ्यपवनजठरदहनाभ्यांप्रतिदिनमीषदीषच्छोष्यमाणंशुक्रसंपर्कात्द्रवीभूतभूतजातंत्रिंशद्भिर्दिनैः-
काठिन्यमापद्यतइति तथाचसुश्रुते द्वितीयेशीतोष्णानिलैरभिपच्यमानोभूतसंघातोघनोजायतइति तृतीयेतुमास्यंगैरिंद्रियैश्चसंयुक्तो

**प्रथमेमासिसंक्लेदभूतोधातुविमूर्च्छितः मास्यर्बुदंद्वितीयेतुतृतीयेंगेंद्रियैर्युतः ७५ आकाशाल्लाघवंसौक्ष्म्यंश-**
**ब्दंश्रोत्रंबलादिकम् वायोश्चस्पर्शनंचेष्टांव्यूहनंरौक्ष्यमेवच ७६ पित्तात्तुदर्शनंपक्तिमौष्ण्यंरूपंप्रकाशिताम् रसा**
**त्तुरसनंशैत्यंस्नेहंक्लेदंसमार्दवम् ७७ भूमेर्गंधंतथाघ्राणंगौरवंमूर्तिमेवच आत्मागृण्हात्यजःसर्वंतृतीयेस्पंद**
**तेनतः ७८**

भवति ७५ किंच आत्मागृण्हातीतिसर्वत्रसंबध्यते गगनाल्लघिमानंलंघनक्रियोपयोगिनम् सौक्ष्म्यंसूक्ष्मेक्षि
त्वं शब्दंविषयं श्रोत्रंश्रवणेंद्रियम् बलंदार्ढ्यं आदिग्रहणात्सुषिरत्वंविविक्ततांचआकाशाच्छब्दश्रोत्रविविक्ततासर्वच्छिद्रसमूहा-
श्चेतिगर्भोपनिषद्दर्शनात् पवनात्स्पर्शनेंद्रियम् चेष्टांगमनागमनादिकाम् व्यूहनमंगानांविविधंप्रसारणम् रौक्ष्यंकर्कशत्वं चशब्दा-

त्स्पर्शंच पित्तात्तेजसोदर्शनंचक्षुरिंद्रियम् पक्तिंभुक्तस्यान्नस्यपचनम् औष्ण्यमुष्णस्पर्शत्वमंगानां रूपंश्यामिकादि प्रकाशितांभ्रा जिष्णुताम् तथासंतापामर्षादिंच शौर्यामर्षरौक्ष्यापक्तयौष्ण्यभ्राजिष्णुतासंतापवर्णरूपेंद्रियाणितैजसानीतिगर्भोपनिषद्दर्शनात् एवं रसादुदकाद्रसनेंद्रियम् शैत्यमगानांस्निग्धतां मृदुत्वंस्नेहिनंक्लेदमार्द्रताम् तथाभूमेर्गंधंघ्राणेंद्रियं गरिमाणंमूर्त्तिंच सर्वमेतत्समस्तं तोजन्मरहितोप्यात्मातृतीयेमासिगृण्हाति ततश्चतुर्थेमासिस्पंदते चलति तथाशारीरके तस्माच्चतुर्थेमासिचलनादावभिप्रायंकरोति ७६ ७७ ७८ किंच गर्भस्यैकंहृदयंगर्भिण्याश्चापरमित्येवंद्विहृदया तस्याःस्त्रियायदभिलषितंतत् दौर्हृदं तस्याप्रदानेनग-

दौर्हृदस्याप्रदानेनगर्भोदोषमवाप्नुयात् वैरूप्यंमरणंवापितस्मात्कार्यंप्रियंस्त्रियाः ७९

र्भोविरूपतांमरणरूपंवादोषंप्राप्नोति तस्मात्तद्दोषपरिहारार्थंचगर्भिण्याःस्त्रियाःयत्प्रियमभिलषितंतत्संपादनीयम् तथाचसुश्रुते द्विहृदयांनारींदौर्हृदिनीमाचक्षते तदभिलषितंदद्यात् वीर्यवंतंचिरायुषंपुत्रंजनयतीति तथाचव्यायामादिकमपिगर्भग्रहणप्रभृतितयापरिहरणीयं ततःप्रभृतिव्यायामव्यवायातितर्पणदिवास्वप्नरात्रिजागरणशोकभययानारोहणवेगधारणीकुक्कुटासनशोणितमोक्षणानिपरिहरेदितितत्रैवाभिधानात् गर्भग्रहणंचश्रमादिभिर्लिंगैरवगंतव्यम् सद्योगृहीतगर्भायाःश्रमोग्लानिःपिपासासक्थिसदनंशुक्रशोणितयोरवबंधःस्फुरणंचयोनेरित्यादितत्रैवोक्तं ७९ ३८

---

किंच तृतीयेमासिप्रादुर्भूतस्यांगसंघस्यचतुर्थेमासिस्थैर्यंस्थेमाभवति पंचमेलोहितस्योद्भवउत्पत्तिः तथाषष्ठेबलस्यवर्णस्यकररुहरोम्णांचसंभवः ८० किंच असौपूर्वोक्तोगर्भःसप्तमेमासिमनसाचेतसाचेतनयाचयुक्तोनाडीभिर्वायुवाहिनीभिःस्नायुभिरस्थिबंधनैःशिराभिर्वातपित्तश्लेष्मवाहिनीभिश्चसंयुतः तथाष्टमेमासित्वचामांसेनस्मृत्याचयुक्तोभवति ८१ किंच तस्याष्टममासिकस्यगर्भस्यौजःकश्चनगुणविशेषोधात्रींगर्भंचप्रतिपुनःपुनरतितरांचंचलतयाशीघ्रंगच्छति अतोष्टमेमासिजातोगर्भःप्राणैर्वियुज्यते अने

स्थैर्यंचतुर्थेत्वंगानांपंचमेशोणितोद्भवः षष्ठेबलस्यवर्णस्यनखरोम्णांचसंभवः ८० मनश्चैतन्ययुक्तोसौनाडी
स्नायुशिरायुतः सप्तमेचाष्टमेचैवत्वङ्मांसस्मृतिमानपि ८१ पुनर्धात्रींपुनर्गर्भमोजस्तस्यप्रधावति अष्टमेमा
स्यतोगर्भोजातःप्राणैर्वियुज्यते ८२ नवमेदशमेवापिप्रबलैःसूतिमारुतैः निःसार्यतेबाणइवयंत्रच्छिद्रेणस-
ज्वरः ८३

नौजःस्थितिरेवजीवनहेतुरितिदर्शयति ओजःस्वरूपंचस्मृत्यंतरेदर्शितम् हृदितिष्ठतियच्छुद्धमीषदुष्णंसपीतकम् ओजःशरीरेसंख्यातंतन्नाशान्नाशमृच्छतीति ८२ किंच एवंकरचरणचक्षुरादिपरिपूर्णांगेंद्रियोनवमेदशमेवापिमासे अपिशब्दात्प्राक्सप्तमेष्टमेवा अत्यायासादिदोषवत्प्रबलसूतिहेतुप्रभंजनप्रेरितःस्नाय्वस्थिचर्मादिनिर्मितवपुर्यंत्रस्यछिद्रेणसूक्ष्मसुषिरेणस-

ज्वरोदुःसहदुःखाभिभूयमानोनिःसार्यते धनुर्यन्त्रेण सुधन्वप्रेरितो बाणइवातिवेगेन निर्गमसमनंतरंच बाह्यपवनस्पृष्टोनष्टप्राचीन-
स्मृतिर्भवति जातःसवायुनास्पृष्टोनस्मरति पूर्वजन्ममरणकर्मचशुभाशुभमितिनिरुक्तस्याष्टादशोभिधानात् ८३ कायस्वरूपंविवृण्व
न्नाह तस्यात्मनोयानिजरायुजांडजशरीराणितानिप्रत्येकंषट्प्रकाराणिरक्तादिषड्धातुपरिपाकहेतुभूतषडग्निस्थानयोगित्वेन तथा
ह्यन्नरसोजाठराग्निनापच्यमानोरक्ततांप्रतिपद्यते रक्तंचस्वकोशस्थेनाग्निनापच्यमानंमांसत्वम् मांसंचस्वकोशानलपरिपक्वंमेदस्त्वं
मेदोपिस्वकोशवन्हिनापक्वमस्थितां अस्थ्यपिस्वकोशशिखिपरिपक्वंमज्जात्वं मज्जापिस्वकोशपावकपरिपच्यमानश्चरमधातुतया-

तस्यषोढाशरीराणिषट्त्वचोधारयंतिच षडंगानितथास्थ्नांचसहषष्ट्याशतत्रयम् ८४

परिणमते चरमधातोस्तुपरिणतिर्नास्तीति सएवात्मनःप्रथमःकोशइत्येवंषट्कोशाग्नियोगित्वात्षट्प्रकारत्वंशरीराणाम् अन्नरसरूपस्य
तुप्रथमधातोरनियतत्वान्नतेनप्रकारांतरत्वम् तानिचशरीराणिषट्त्वचोधारयंति रक्तमांसमेदोस्थिमज्जाशुक्राख्याःषड्धातवएवरंभास्त-
म्भत्वगिवबाह्याभ्यंतररूपेणस्थिताः त्वगिवाच्छादकत्वात्त्वचस्ताःषट्त्वचोधारयंति तदिदमायुर्वेदप्रसिद्धं तथांगानिचषडेव करयुग्मंच
रणयुगुलमुत्तमांगंगात्रमिति अस्थ्नांतुषष्टिसहितंशतत्रयमुपरितनषट्श्लोक्यावक्ष्यमाणमवगंतव्यम् ८४ ॥ ॥ ३९

किंच स्थालानिदंतमूलप्रदेशस्थान्यस्थीनिद्वात्रिंशत्तैःसहद्वात्रिंशद्दंताश्चतुःषष्टिर्भवंति नखाःकरचरणरुहाविंशतिः हस्तपादस्थानिश
लाकाकाराण्यस्थीनिमणिबंधस्योपरिवर्त्तीनिअंगुलिमूलस्थानिविंशतिरेव तेषांनखानांशलाकास्थ्नांचस्थानचतुष्टयंद्वौचरणौकरौचेत्ये
वमस्थ्नांचतुरुत्तरशतम् ८५ किंच विंशतिरंगुलयस्तासांएकैकस्यास्त्रीणित्रीणीत्येवमंगुलिसंबंधीन्यस्थीनिषष्टिर्भवंति पादयोःपश्चिमौ

स्थालैःसहचतुःषष्टिर्दंतावैविंशतिर्नखाः पाणिपादशलाकाश्चतेषांस्थानचतुष्टयम् ८५ ष
ष्ट्यंगुलीनांद्वेपार्ष्ण्योर्गुल्फेषुचचतुष्टयम् चत्वार्यरत्निकास्थीनिजंघयोस्तावदेवतु ८६ द्वे
द्वेजानुकपोलोरुफलकांससमुद्भवे अक्षतालूषकश्रोणीफलकेचविनिर्दिशेत् ८७

भागौपार्ष्णी तयोरस्थिनीद्वे

एकैकस्मिन्पादेगुल्फौद्वावित्येवंचतुर्षुगुल्फेषुचत्वार्यस्थीनि बाह्वोररत्निप्रमाणानिचत्वार्यस्थीनि जंघयोस्तावदेवचत्वार्येवेत्येवंचतुःसप्ततिः
८६ किंच जंघोरुसंधिर्जानुः कपोलौगल्लौ ऊरूःसक्थि तत्फलकं अंसोभुजशिरः अक्षःकर्णनेत्रयोर्मध्येशंखादधोभागः तालूषकंका
कुदं श्रोणीककुद्मतीतत्फलकं तेषामेकैकत्रास्थीनिद्वेद्वेविनिर्दिशेदित्येवंचतुर्दशास्थीनिभवंति ८७ ॥ ॥ ॥

किंच गुल्यास्थ्येकं पृष्ठे पश्चिमभागे पंचचत्वारिंशदस्थीनि भवंति ग्रीवा कंधरा सा पंचदशास्थी स्यात् वक्षोंसयोः संधिर्जत्रुः प्रतिजत्रुं एकैकं
हनुश्चिबुकं तत्राप्येकमस्थीत्येवं चतुःषष्टिः ८८ किंच तस्य हनोर्मूले स्थिनी द्वे ललाटं भालं अक्षि चक्षुः गंडः कपोलाक्षयोर्मध्यप्रदेशः तेषां
समाहारो ललाटाक्षिगंडं तत्र प्रत्येकमस्थियुगुलं नासा घनसंज्ञास्थिमती पार्श्वकाः कक्षाधः प्रदेशसंबंधान्यस्थीनि तदाधारभूतानि स्था
लकानि तैः स्थालकैः अर्बुदैश्चास्थिविशेषैः सह पार्श्वका द्विसप्ततिः पूर्वोक्तैश्च नवभिः सार्धमेकाशीतिर्भवंति ९० किंच भ्रूकर्णयोर्मध्य-

भगास्थ्येकं तथा पृष्ठे चत्वारिंशच्च पंच च ग्रीवा पंचदशास्थी स्याज्जत्र्वेकैकं तथा हनुः ८८ तन्मूले द्वे ललाटाक्षिगंडे नासा घ
नास्थिका पार्श्वकाः स्थालकैः सार्द्धमर्बुदैश्च द्विसप्ततिः ८९ द्वौ शंखकौ कपालानि चत्वारि शिरसस्तथा उरः सप्तदशा-
स्थीनि पुरुषस्यास्थिसंग्रहः ९० गंधरूपरसस्पर्शशब्दाश्च विषयाः स्मृताः नासिका लोचने जिह्वा त्वक् श्रोत्रं चेंद्रियाणि च ९१

प्रदेशावस्थिविशेषौ शंखकौ शिरसः संबंधीनि चत्वारि कपालानि उरो वक्षस्तत्सप्तदशास्थिकं इत्येवं त्रयोविंशतिः पूर्वोक्तैश्च सह षष्ट्यधिकं
शतत्रयमित्येवं पुरुषस्यास्थिसंग्रहः कथितः ९० सविषयाणि ज्ञानेंद्रियाण्याह एते गंधादयो विषयाः पुरुषस्य बंधनहेतवः विषयशब्दस्य-
षिञ् बंधने इत्यस्य धातोर्व्युत्पन्नत्वात् एतैश्च गंधादिभिर्बोध्यत्वेन व्यवस्थितैः स्वस्वगोचरसंवित्साधनतयानुमेयानि घ्राणादि पंचेंद्रियाणि भवंति ९१ ४०

कर्मेंद्रियाणि दर्शयितुमाह हस्तौ प्रसिद्धौ पायुर्गुदं उपस्थं रतिसंपाद्यसुखसाधनं जिह्वा प्रसिद्धा पादौ च एतानि हस्तादीनि पंच कर्मेंद्रियाणि
आदाननिर्हारानंदव्याहारविहारादिकर्मसाधनानि जानीयात् मनोंतःकरणं युगपज्ज्ञानानुत्पत्तिगम्यं तच्च बुद्धिकर्मेंद्रियसहकारितयो
भयात्मकं ९२ प्राणायतनानि दर्शयितुमाह नाभिप्रभृतीनि दश प्राणस्य स्थानानि समाननाम्नः पवनस्य सकलांगचारित्वेपि नाभ्यादिस्थानवि
शेषवाचोयुक्तिः प्राचुर्याभिप्राया ९३ प्राणायतनानि प्रपंचयितुमाह वपा प्रसिद्धा वसा मांसस्नेहः नाभिः प्रसिद्धा अवहननं फुप्फुसः प्लीहा

हस्तौ पायुरुपस्थं च जिह्वा पादौ च पंच वै कर्मेंद्रियाणि जानीयान्मनश्चैवोभयात्मकम् ९२ नाभिरोजो गुदं शुक्रं शोणितं शंख
कौ तथा मूर्धांसकंठहृदयं प्राणस्यायतनानि च ९३ वपा वसावहननं नाभिः क्लोम यकृत्प्लीहा क्षुद्रांत्रं वृक्ककौ बस्तिः पुरीषा
धानमेव च ९४ आमाशयोथ हृदयं स्थूलांत्रं गुद एव च उदरं च गुदौ कोष्ठ्यौ विस्तारोयमुदाहृतः ९५

आयुर्वेदप्रसिद्धा तौ च मांसपिंडा-
कारौ स्तः सव्यकुक्षिगतौ यकृत्कालिका क्लोम मांसपिंडस्तौ च दक्षिणकुक्षिगतौ क्षुद्रांत्रं ह्रस्वांत्रं वृक्ककौ हृदयसमीपस्थौ मांसपिंडौ बस्तिर्मूत्रा-
शयः पुरीषाधानं पुरीषाशयः आमाशयो पक्वान्नस्थानं हृदयं हृत्पुंडरीकं स्थूलांत्रगुदोदराणि प्रसिद्धानि बाह्याद्गुदवलयादंतर्गुदवलये द्वे ते च
गुदौ कोष्ठ्यौ कोष्ठे नाभेरधःप्रदेशे भवौ अयं च प्राणायतनस्य विस्तार उक्तः पूर्वश्लोके तु संक्षेपः अत एव पूर्वश्लोकोक्तानां केषांचिदिह पाठः ९४ ९५

पुनः प्राणायतनप्रपंचार्थमाह कनीनिकेअक्षितारे अक्षिनासिकयोःसंधीअक्षिकूटे शष्कुलीकर्णशष्कुली कर्णपत्रकौकर्णपाल्यौ कर्णौप्रसिद्धौ दंतवेष्टौ दंतपाल्यौ ओष्ठौप्रसिद्धौ ककुंदरेजघनकूपकौ वंक्षणौजघनोरुसंधी वृक्कौपूर्वोक्तौ स्तनौचश्लेष्मसंघातौ उपजिह्वाघंटिका स्फिजौ कटिप्रोथौ बाहूप्रसिद्धौ जंघोरुषुचपिंडिका जंघयोरूर्वोश्चपिंडिकामांसलप्रदेशः गलशुंडिके हनुमूलगल्लयोःसंधी शीर्षंशिरः अवटः

कनीनकेचाक्षिकूटेशष्कुलीकर्णपत्रकौ कर्णौशंखौभ्रुवौदंतवेष्टावोष्ठौककुंदरे ९६ वंक्षणौवृषणौवृक्कौश्लेष्मसंघा-
तजौस्तनौ उपजिह्वास्फिजौबाहूजंघोरुषुचपिंडिका ९७ तालूदरंबस्तिशीर्षंचिबुकेगलशुंडिके अवटश्चैवमेता-
निस्थानान्यत्रशरीरके ९८ अक्षिवर्णचतुष्कंचपद्धस्तहृदयानिच नवच्छिद्राणितान्येवप्राणस्यायतनानितु ९९

शरीरेयःकश्चननिम्नोदेशः कंठमूलकक्षादिः अवटुरितिपाठेकृकाटिका तथाक्ष्णोःकनीनिकयोःप्रत्येकंश्वेतंपार्श्वद्वयमितिवर्णचतुष्टयम् यद्वाअक्षिपुटचतुष्टयम् शेषप्रसिद्धम् एवमेतानिकुत्सितेशरीरेस्थानानि तथाक्षियुगलम् कर्णयुग्मम् नासाविवरद्वयमास्यंपायुरु- पस्थमेतानिपूर्वोक्तानिनवच्छिद्राणिचप्राणस्यायतनान्येव ९६ ९७ ९८ ९९ ७ ७ ७ ७ ४१

किंच शिरानाभिसंबंधाश्चत्वारिंशत्संख्याःवातपित्तश्लेष्मवाहिन्यःसकलकलेवरव्यापिन्योनानाशाखिन्यःसत्यःसप्तशतसंख्याभवंति तथांगप्रत्यंगसंबंधिबंधनाःस्नायवोनवशतानि धमन्योनामनाभेरुद्भूताश्चतुर्विंशतिसंख्याःप्राणादिवायुवाहिन्यःशाखाभेदेनद्विशतंभव- ति पेश्यःपुनःमांसलाकाराऊरुपिंडिकाद्यंगप्रत्यंगसंधिसंबंधिन्यःपंचशतानिभवंति १०० पुनश्चासामेवशरीरादीनांशाखाप्राचुर्येणसं-

शिराःशतानिसप्तैवनवस्नायुशतानिच धमनीनांशतेद्वेतुपंचपेशीशतानिच १०० एको-
नत्रिंशल्लक्षाणितथानवशतानिच षट्पंचाशच्चजानीतशिराधमनिसंज्ञिताः १०१ त्र-
योलक्षास्तुविज्ञेयाःश्मश्रुकेशाःशरीरिणाम् सप्तोत्तरंमर्मशतंद्वेचसंधिशतेतथा १०२

ख्यांतरमाह शिराधमन्योमिलिताःशाखोपशाखाभेदेनएकोनत्रिंशल्लक्षाणि तथाचनवशतानिच षट्पंचाशच्चभवंतीत्येवंहेसामश्रवः प्रभृतयोमुनयोजानीत १०१ किंच शरीरिणांश्मश्रूणिकेशाश्चमिलिताःसंतस्त्रयोलक्षाविज्ञेयाः मर्माणिमरणकराणिचस्थानानितेषांस- प्तोत्तरंशतंज्ञेयम् अस्थ्नांतुद्वेसंधिशते स्नायुशिरादिसंधयःपुनरनंताः १०२ ७ ७ ७ ७ ७

सकलशरीरस्थशिरादिसंख्यामाह पूर्वोदितशिराकेशादिसहितानांरोम्णांपरमाणवःसूक्ष्मसूक्ष्मतररूपाभागाःस्वेदस्रवणरुधिरैःसहच
तुःपंचाशत्कोट्यः तथासप्तोत्तरषष्टिर्लक्षाःसार्धाःपंचाशत्सहस्रसहिताःवायवीयैर्विभक्ताःपवनपरमाणुभिःपृथक्कृताविगण्यंते एतच्चशा
स्त्रदृष्ट्याभिहितं चक्षुरादिकरणपथगोचरत्वाभावात् अस्यार्थस्य इमम्प्रतिगहनमर्थशिरादिभावसंस्थानरूपंहेमुनयोभवतामध्येयःकश्चि
दनुवेत्तिसोपिमहान् अथवोबुद्धिमतां अतोयत्नतोबुद्धिमताबोद्धव्याभावसंस्थितिः १०३ १०४ शारीररसादिपरिमाणमाह सम्यक्परिण

रोम्णांकोटयस्तुपंचाशच्चतस्रःकोट्यएवच सप्तषष्टिस्तथालक्षाःसार्धाःस्वेदायनैःसह १०३ वायवीयैर्विगण्यंतेविभक्ताः
परमाणवः यद्यप्येकोनुवेत्त्येषांभावानांचैवसंस्थितिम् १०४ रसस्यनवविज्ञेयाजलस्यांजलयोदश सप्तैवतुपुरीष-
स्यरक्तस्याष्टौप्रकीर्तिताः १०५ षट्श्लेष्मापंचपित्तंचचत्वारोमूत्रमेवच वसात्रयोद्वौतुमेदोमज्जैकोर्धंतुमस्तके १०६
श्लेष्मौजसस्तावदेवरेतसस्तावदेवतु इत्येतदस्थिरंवर्ष्मयस्यमोक्षायकृत्यसौ १०७

ताहाररसारोरसस्तस्यपरिमाणंनवांजल
यःपार्थिवपरमाणुसंश्लेषनिमित्तस्यजलस्यांजलयोदशविज्ञेयाः पुरीषस्यवर्चस्कस्यसप्तैव रक्तस्यजाठरानलपरिपाकापादितलोहितस्यान्न ४२
रसस्याष्टावंजलयःप्रकीर्तिताः श्लेष्मणःकफस्यषडंजलयः पित्तस्यतेजसःपंच मूत्रस्योच्चारणस्यचत्वारः वसायामांसस्नेहस्यत्रयः मेदसो

मांसरसस्यद्वावंजली मज्जास्थिगतसुषिरगतस्तस्यैकोंजलिः मस्तकेपुनरर्धांजलिःश्लेष्मौजसःश्लेष्मसारस्य तथारेतसश्चरमधातोस्ता
वदेवार्धांजलिरेव एतच्चसमधातुपुरुषाभिप्रायेणोक्तं विषमधातोस्तुननियमः वैलक्षण्याच्छरीराणामस्थायित्वात्तथैवच दोषधातुमलानां
चपरिमाणंनविद्यते इत्यायुर्वेदस्मरणात् इतीदृशमस्थिस्नाय्वाद्यारब्धमेतदशुचिनिधानंवर्ष्मास्थिरमितियस्यबुद्धिरसौकृतीपंडितोमोक्षा
यसमर्थोभवति वैराग्यनित्यानित्यविवेकयोर्मोक्षोपायत्वात् अस्थिमूत्रपुरीषादिप्राचुर्यज्ञानस्यवैराग्यहेतुत्वात् अतएवव्यासः सर्वाशु
चिनिधानस्यकृतघ्नस्यविनाशिनः शरीरकस्यापिकृतेमूढाःपापानिकुर्वते यदिनामास्यकायस्ययदंतस्तद्बहिर्भवेत् दंडमादायलोकोयंशु

द्वासप्ततिसहस्राणिहृदयादभिनिःसृताः हिताहितानामनाड्यस्तासांमध्येशशिप्रभम् १०८
मंडलंतस्यमध्यस्थआत्मादीपइवाचलः सज्ञेयस्तंविदित्वेहपुनराजायतेनतु १०९

नःकाकांश्चवारयेदिति तस्मादीदृशकुत्सितशरीरस्यात्यंतिकविनिवृत्त्यर्थमात्मोपासनेप्रयतितव्यम् १०५ १०६ १०७ उपासनीयस्वरूपमा
ह हृदयप्रदेशादभिनिःसृताः कदंबकुसुमकेसरवत्सर्वतोनिर्गताहिताहितकरत्वेनहिताहितसंज्ञाद्वासप्ततिसहस्राणिनाड्योभवंति अपरा
स्तिस्रोनाड्यस्तासामिडापिंगलाख्येद्वेनाड्यौसव्यदक्षिणपार्श्वगतेतदविपर्ययेनासाविवरसंबद्धेप्राणापानायतने सुषुम्नाख्यापुनस्तृतीया

दंडवन्मध्येब्रह्मरंध्रंविनिर्गतातासांनाडीनांमध्येमंडलंचंद्रप्रभंतस्मिन्नात्मानिर्वातस्थदीपइवाचलःप्रकाशमानआस्ते सएवंभूतोज्ञातव्यः तत्साक्षात्करणादिहसंसारेनपुनःसंसरति अमृतत्वंप्राप्नोति १०८ १०९ किंच चित्तवृत्तेर्विषया तरतिरस्कारेणात्मनिस्थैर्ययोगस्तत्प्रास्यर्थंबृहदारण्यकाख्यमादित्याद्यन्मयाप्राप्तंतच्चज्ञातव्यम् तथायन्मयोक्तंयोगशास्त्रंतदपिज्ञातव्यम् ११० कथंपुनरसावात्माध्यातव्यइत्यतआह आ-

ज्ञेयंचारण्यकमहंयदादित्यादवाप्तवान् योगशास्त्रंचमत्प्रोक्तंज्ञेयंयोगमभीप्सता ११० अन
न्यविषयंकृत्वामनोबुद्धिस्मृतींद्रियम् ध्येयआत्मास्थितोयोसौहृदयेदीपवत्प्रभुः १११

त्मव्यतिरिक्तविषयेभ्योमनोबुद्धिस्मृतींद्रियाणिप्रत्याहृत्यआत्मैकविषयाणिकृत्वाआत्माध्येयः योसौप्रभुर्निवातस्थप्रदीपवद्दीप्यमानोनिष्प्रकंपोहृदितिष्ठति एतदेवतस्यध्येयत्वम् यच्चित्तवृत्तिनिवृत्तेर्विविधविषयावभासतिरस्कारेणात्मप्रवणतानामशरावसंपुटनिरुद्धप्रभाप्रतानप्रसरस्येवप्रदीपस्यैकनिश्चलत्वम् १११ ७ ७ ७ ७ ७ ७ ४३

यस्यपुनश्चित्तवृत्तिर्निराकारालंबनतयासमाधौनाभिरमतेतेनशब्दब्रह्मोपासनंकार्यमित्याह स्वाध्यायावगतमार्गानतिक्रमेणसामगायंसामगानम् साम्नोगानात्मकत्वेपिगायमितिविशेषणमगीतमंत्रव्युदासार्थं अविच्युतमस्खलितंसावधानःसामाध्वन्यनुस्यूतात्मैकाग्रचित्तवृत्तिःपठंस्तदभ्यासवशात्तत्रनिष्णातःशब्दाकारशून्योपासनेनपरब्रह्माधिगच्छति तदुक्तं शब्दब्रह्मणिनिष्णातःपरंब्रह्माधिगच्छतीति ११२ यस्यपुनर्वैदिक्यांगीतौचित्तंनाभिरमतेतेनलौकिकगीत्यनुस्यूतात्मोपासनंकार्यमित्याह अपरांतकोल्लोप्यमद्रकमकर्योवेण

यथाविधानेनपठन्सामगायमविच्युतम् सावधानस्तदभ्यासात्परंब्रह्माधिगच्छति ११२
अपरांतकमुल्लोप्यमद्रकंप्रकरीतथा औवेणकंसरोबिंदुमुत्तरंगीतकानिच ११३ ऋग्गा
थापाणिकादक्षविहिताब्रह्मगीतिका गेयमेतत्तदभ्यासकरणान्मोक्षसंज्ञितम् ११४

कानिसरोबिंदुसहितं
चोत्तरमित्येतानिप्रकरणाख्यानिसप्तगीतानि चशब्दादासारितवर्धमानकादिमहागीतानिगृह्यंते ऋग्गाथापाणिकादक्षविहितब्रह्मगीतिकाइत्येतदपरांतकादिगीतजातमध्यारोपितात्मभावंमोक्षसाधनत्वान्मोक्षसंज्ञितंमंतव्यम् तदभ्यासस्यैकाग्र्यतापादनद्वारेणात्मैकतापत्तिकारणत्वात्
११३ ११४

किंच भरतादिमुनिप्रतिपादितवीणावादनतत्त्ववेदी श्रूयतेइतिश्रुतिः द्वाविंशतिविधासप्तस्वरेषु तथाहि षड्जमध्यमपंचमाः प्रत्येकंचतुः श्रुतयः ऋषभधैवतौप्रत्येकंत्रिश्रुती गांधारनिषादौप्रत्येकंद्विश्रुतीइति जातयस्तुषड्जादयःसप्तशुद्धाः संकरजातयस्त्वेकादशेत्येवमष्टादशविधास्तासुविशारदःप्रवीणः तालइतिगीतपरिमाणंकल्प्यते तत्स्वरूपज्ञश्चतदनुविद्धब्रह्मोपासनतयातालादिभंगभयाच्चित्तवृत्तेरात्मैकाग्रतायाःसुकरत्वादल्पायासेनैवमुक्तिपथंनियच्छतिप्राप्नोति ११५ चित्तविक्षेपाद्यंतरायहतस्यगीतज्ञस्यफलांतरमाह गीतज्ञोय-

वीणावादनतत्त्वज्ञःश्रुतिजातिविशारदः तालज्ञश्चाप्रयासेनमोक्षमार्गंनियच्छति ११५ गी
तज्ञोयदियोगेननाप्नोतिपरमंपदम् रुद्रस्यानुचरोभूत्वातेनैवसहमोदते ११६ अनादि-
रात्माकथितस्तस्यादिस्तुशरीरकम् आत्मनस्तुजगत्सर्वंजगतश्चात्मसंभवः ११७

यःकथंचिद्योगेन परमंपदंनाप्नोति तर्हिरुद्रस्यसचिवोभूत्वातेनैवसहमोदतेक्रीडति ११६ पूर्वोक्तमुपसंहरति प्रागुक्तरीत्याअनादिरात्माक्षेत्रज्ञस्तस्यचशरीरग्रहणमेवादिरुद्भवःकथितः अजःशरीरग्रहणादित्यत्रपरमात्मनश्चसकाशात्पृथिव्यादिसकलभुवनोद्भवः तदुद्भूताच्चपृथिव्यादिभूतसंघाताज्जीवनांतस्थूलशरीरतयासंभवश्चकथितः सर्गादौसयथाकाशमित्यादिना ११७ ७ ० ७ ७

एतदेवप्रश्नपूर्वकंविवृणोति यदेतत्सकलसुरासुरमनुजादिसहितंजगत्तदात्मनःसंकाशात्कथमुत्पन्नं आत्माचतस्मिन्जगतिकथंतिर्यङ्नरसरीसृपादिशरीरभाग्भवतीत्येतस्मिन्नर्थेविमुह्यामः अतोमोहापनुत्त्यर्थमस्माकंविस्तरशोवदस्व ११८ एवंमुनिभिःपृष्टःप्रत्युत्तरमाह इहजगतियदिदंस्थूलंकलेवरादावनात्मनिआत्माभिमानरूपंमोहजालंतदपास्यतद्व्यतिरिक्तोयःपुरुषोनेककरचरणलोचनःसूर्यवर्चाअनंतरश्मिः

कथमेतद्विमुह्यामःसदेवासुरमानवम् जगदुद्भूतमात्माचकथंतस्मिन्वदस्वनः ११८ मो
हजालमपास्येहपुरुषोदृश्यतेहियः सहस्रकरपन्नेत्रःसूर्यवर्चाःसहस्रकः ११९ सआ
त्माचैवयज्ञश्चविश्वरूपःप्रजापतिः विराजःसोन्नरूपेणयज्ञत्वमुपगच्छति १२०

सहस्रकःबहुशिरादृश्यते एतच्चनज्ञोचरशक्त्याधारतयोच्यते तस्यसाक्षात्कारादिसंबंधाभावात् सएवात्मायज्ञःप्रजापतिश्चयतोसौविश्वरूपःसर्वात्मकः वैश्वरूप्यमेवकथमितिचेत् यस्मादसौविराजःपुरोडाशाद्यन्नरूपेणयज्ञत्वमुपगच्छति यज्ञाच्चवृष्ट्यादिद्वारेणप्रजासृष्टिरित्येवंवैश्वरूप्यं ११९ १२०

एतदेव प्रपंचयति द्रव्यस्यच पुरोडाशादेर्देवतोद्देशेन त्यागाद्योरसः अदृष्टरूपमात्मनः परिणत्यंतरमुत्तमः सकलजगज्जन्मबीजतयोत्कृष्ट
तमः संभूतः सदेवान्संप्रदानकारकभूतान्सम्यक् प्रीणयित्वा यजमानंचाभिलषितफलेन संयोज्य पवनेन प्रेर्यमाणश्चंद्रमंडलं प्रतिनीयते
ततः शशिमंडलाद्रश्मिभिर्भानुमंडलम् सैषात्रय्येवविद्यातपतीत्यश्रेदाभिधानात् ऋग्यजुःसाममयं प्रत्युपनीयते ततः स्वमंडलादसौसू

योद्रव्यदेवतात्यागसंभूतोरसउत्तमः देवान्संतर्प्यसरसोयजमानंफलेनच १२१ संयोज्यवायुनासोमंनीयतेरश्मिभिस्त
तः ऋग्यजुःसामविहितंसौरंधामोपनीयते १२२ स्वमंडलादसौसूर्यःसृजत्यमृतमुत्तमम् यज्जन्मसर्वभूतानाम-
शनानशनात्मनाम् १२३ तस्मादन्नात्पुनर्यज्ञःपुनरन्नंपुनःक्रतुः एवमेतदनाद्यंतंचक्रंसंपरिवर्त्तते १२४

र्योमृतरसंवृष्टि
रूपमुत्तमंयत्सकलभूतानामशनानशनात्मनांचराचराणांजननिमित्तंतत्सृजति तस्माद्वृष्टिसंपादितौषधिमयादन्नजोत्पत्तिहेतोरन्नात्पुनर्यज्ञः य
ज्ञाच्च पूर्वाभिहितभंग्यापुनरन्नं अन्नाच्च पुनः क्रतुरित्येवमेतदखिलंसंसारचक्रंप्रवाहरूपेणोत्पत्तिविनाशविरहितंसम्यक्परिवर्त्तत इत्यनेनक्रमे ४५
णात्मनःसकाशादखिलजगदुत्पत्तिः तत्रचात्मनःस्वकर्मानुरूपविग्रहपरिग्रहः १२१ १२२ १२३ १२४ ७ ७ ७

---

ननुयद्यात्मनः संसरणमनाद्यंतंतर्हिअनिर्मुक्तिप्रसंगइत्यतआह यद्यप्यात्मनोनादित्वात्संभूतिर्नविद्यते अंतरात्मनःशरीरव्यापिनः तथापिपु
रुषःशरीरेणसमवायीभवति भोगायतनेसुखदुःखात्मकंभोग्यजातमुपभुंक्तेइत्येवंभूतेनसंबंधेनसंबंधीभवत्येव सचसमवायःसंबंधो
मोहेच्छाद्वेषजनितकर्मनिर्मितोनतुनिसर्गजातः तस्यकार्यत्वेनविनाशोपपत्तेर्नानिर्मुक्तिः १२५ आत्मनोजगज्जन्मेत्युक्तंतत्प्रपंचयितुमाह
योसौसकलजीवात्मकतयाप्रपंचकात्मकतयाचसहस्रात्मा बहुरूपस्तथासकलजगद्धेतुतया आदिदेवोमयायुष्माकमुदाहृतः तस्यवदनभुज-

अनादिरात्मासंभूतिर्विद्यतेनांतरात्मनः समवायीतुपुरुषोमोहेच्छाद्वेषकर्मजः १२५ सहस्रात्मामयायोवआदिदेवउदाहृतः
मुखबाहूरुपज्जाःस्युस्तस्यवर्णायथाक्रमम् १२६ पृथिवीपादतस्तस्यशिरसोद्यौरजायत नस्तःप्राणादिशःश्रोत्रात्स्पर्शाद्वायु
र्मुखाच्छिखी १२७ मनसश्चंद्रमाजातश्चक्षुषश्चदिवाकरः जघनादंतरिक्षंचजगच्चसचराचरम् १२८ यद्येवंसकथं
ब्रह्मन्पापयोनिषुजायते ईश्वरःसकथंभावैरनिष्टैःसंप्रयुज्यते १२९

सक्थिचरणजातायथाक्रमंब्रह्मजन्मादयश्चत्वारोवर्णास्तथातस्य
पादाद्भूमिर्मस्तकात्स्वःसद्म घ्राणात्प्राणाः कर्णात्ककुभः स्पर्शात्पवनो वदनाद्धुतवहः मनसःशशांकः नेत्रात्भानुः जघनाद्गगनंजंगमाजंगमात्म
कंजगच्च १२६ १२७ १२८ अत्रचोदयंति हेब्रह्मन्योगीश्वर यद्यात्मैकजीवादिभावंभजतेतर्हिकथमसौपापयोनिषुमृगपक्ष्यादिषुजाय

ते अथमोहरागद्वेषादिदोषदुष्टत्वात्तत्तज्जन्मेत्युच्यते तच्चन यस्मादीश्वरः स्वतंत्रः कथमनिष्टैर्मोहरागादिभावैः संयुज्यते १२९ किंच न थेदमप्यत्रदूषणम् मनःप्रभृतिज्ञानोपायैः सहितस्यापितस्यात्मनः पूर्वज्ञानंजन्मांतरानुभूतविषयं कस्मान्नोत्पद्यते तथासर्वप्राणिगतांवे दनांसुखादिरूपांस्वयंसर्वज्ञोपिसर्वदेहगतोपिकस्मान्नवेत्ति तस्मादात्मैवेश्वरोजीवादिभावभजन इत्युक्तम् १३० तत्रपूर्वचोद्यस्योत्तरमाह यद्यपीश्वरः स्वरूपेणसत्यज्ञानानंदलक्षणः तथाप्यविद्यासमावेशवशान्मोहरागादिभावैरभिभूयमानोनानाहीनयोनिजननसाधनंमानसा

करणेनान्वितस्यापिपूर्वज्ञानंकथंचन वेत्तिसर्वगतांकस्मात्सर्वगोपिनवेदनाम् १३० अंत्यपक्षिस्था
वरतांमनोवाक्कायकर्मजैः दोषैःप्रयातिजीवोयंभवयोनिशतेषुच १३१ अनंताश्चयथाभावाः श
रीरेषुशरीरिणाम् रूपाण्यपितथैवेहसर्वयोनिषुदेहिनाम् १३२

दित्रिविधंकर्मनिचयमाचरति तेनचांत्यादि-
हीनयोनितामापद्यते अंत्याश्चंडालादयः पक्षिणः काकादयः स्थावरावृक्षादयः तेषांभावोंत्यपक्षिस्थावरतातांयथाक्रमेणमनोवाक्कायार
ब्धकर्मदोषैः जन्मसहस्रेषयंजीवः प्राप्नोति १३१ किंच शरीरिणांजीवानांशरीरेषुभावाअभिप्रायविशेषाः सत्वाद्युद्रेकतारतम्याद्यथान- ४६
तास्तथातत्कार्याण्यपिरूपाणिकुब्जवामनत्वादीनिदेहिनांसर्वयोनिषुभवंति १३२

ननुप्रदिकर्मजन्यानिकुब्जत्वादीनितर्हिकर्मानंतरमेवतैर्भवितव्यमित्याशंक्याह केषांचिज्ज्योतिष्टोमादिकर्मणांविपाकः फलंप्रेत्यदेहांतरेभव ति केषांचित्कारीर्यादिकर्मणांवृष्ट्यादिफलमिहैवभवति केषांचिच्चित्रादीनांफलंपश्वादिकमिहदेहांतरेवेत्यनियतम् नत्वनंतरमेवकर्मफ लेनभवितव्यमितिशास्त्रार्थः अत्रचकर्मणांशुभाशुभफलजनकत्वेसत्वादिभावएवप्रयोजकभूतस्तदायत्तत्वात्फलतारतम्यस्य १३३ मनोवाक्कायकर्मजैरंत्यादियोनिनांप्राप्नोतीत्युक्तंतत्प्रपंचयितुमाह परधनानिकथमपहरेयमितिआभिमुख्येनध्यायंस्तथानिष्टानिब्रह्म

विपाकःकर्मणांप्रेत्यकेषांचिदिहजायते इहवामुत्रवैकेषांभावस्तत्रप्रयोजनम् १३३ प
रद्रव्याण्यभिध्यायंस्तथानिष्टानिचिंतयन् वितथाभिनिवेशीचजायतेंत्यासुयोनिषु १३४
पुरुषोनृतवादीचपिशुनःपुरुषस्तथा अनिबद्धप्रलापीचमृगपक्षिषुजायते १३५

हत्यादीनिहिंसात्मकानिकरिष्यामीतिचिंतयन् वितथेअसत्यभूतेवस्तुनिअभिनिवेशः पुनःपुनः संकल्पः तद्वांश्चचंडालाद्यंत्ययोनिषुजाय ते १३४ किंच यस्त्वनृतवदनशीलः पुरुषः पिशुनः कर्णेजपः पुरुषः परोद्वेगकरभाषी अनिबद्धप्रलापीप्रकृतासंगतार्थवादीच बुद्धि- पूर्वाबुद्धिपूर्वत्वादितारतम्याद्धीनोत्कृष्टेषुमृगपक्षिषुजायते १३५

किंच अदत्तादाननिरतःपरधनापहारप्रसक्तः परदारप्रसक्तश्चाविहितमार्गेण प्राणिनांघातकश्च दोषगुरुलघुभावतारतम्यात्तरुलतागुल्मादिस्थावरेषुजायते १३६ सत्वादिगुणपरिपाकमाह आत्मज्ञोविद्याधनाभिमानरहितः शौचवान्बाह्याभ्यंतरशौचयुक्तः दांतउपशमान्वितः तपस्वीकृच्छ्रादितपोयुक्तः तथेंद्रियार्थेष्वप्रसक्तः नित्यनैमित्तिकधर्मानुष्ठाननिरतः वेदार्थवेदीचयःससात्विकः सचसत्वोद्रेकतारतम्यवशादुत्कृष्टोत्कृष्टतरकृष्टयोनितांप्राप्नोति १३७ किंच असत्कार्येषुतूर्यवादित्रनृत्यादिषभिरतोयस्तथाअधीरोव्यग्रचित्तःआरंभीसदाकार्याकुलोविषयेषुनि

अदत्तादाननिरतःपरदारोपसेवकः हिंसकश्चाविधानेनस्थावरेष्वभिजायते १३६ आत्मज्ञःशौचवान्दांतस्तपस्वीविजितेंद्रियः धर्मकृद्वेदविद्यावित्सात्विकोदेवयोनिताम् १३७ असत्कार्यरतोधीरआरंभीविषयीचयः सराजसोमनुष्येषुमृतोजन्माधिगच्छति १३८ निद्रालुःक्रूरकृल्लुब्धोनास्तिकोयाचकस्तथा प्रमादवान्भिन्नवृत्तोभवेत्तिर्यक्षुतामसः १३९

प्रसक्तश्चसरजोगुणयुक्तः तद्गुणतारतम्याद्धीनोत्कृष्टमनुष्यजातिषुमरणानंतरमुत्पत्तिंप्राप्नोति १३८ तथा यःपुनर्निद्राशीलःप्राणिपीडाकरोलोभयुक्तश्च तथानास्तिकोधर्मादिनिंदकः याचनशीलःप्रमादवान्कार्याकार्यविवेकशून्यःविरुद्धाचारश्च असौतमोगुणयुक्तस्तत्तारतम्याद्धीनतरपश्वादियोनिषुजायते १३९ ॐ ॐ ॐ ॐ ॐ ४७

पूर्वोक्तमुपसंहरति एवमविद्याविद्धोयमात्मारजस्तमोभ्यांसम्यगाविष्टइहसंसारेपर्यटन्नानाविधदुःखप्रदैर्भावैरभिभूतःपुनःपुनःसंसारंदेहग्रहणंप्राप्नोति इतीश्वरःसकथंभावैरनिष्टैःसंप्रयुज्यतइतिअस्यचोद्यस्यनावकाशः १४० यदपिकरणैरन्वितस्यापीतिद्वितीयंचोद्यंतस्योत्तरमाह यद्यप्यात्माअंतःकरणादिज्ञानसाधनसंपन्नस्तथापिजन्मांतरानुभूतार्थावबोधेनसमर्थः अविपक्वकरणोरागादिमलाक्रां

रजसातमसाचैवंसमाविष्टोभ्रमन्निह भावैरनिष्टैःसंयुक्तःसंसारंप्रतिपद्यते १४० मलिनोहियथादर्शोरूपालोकस्यनक्षमः तथाऽविपक्वकरणआत्मज्ञानस्यनक्षमः १४१ कट्वेर्वारौयथापक्वेमधुरःसन्रसोपिन प्राप्यतेह्यात्मनितथानापक्वकरणेज्ञता १४२

तचित्तोयस्मात् यथादर्पणोमलच्छन्नोरूपज्ञानोत्पादनसमर्थोनभवति १४१ ननुप्रागभावीयज्ञानस्यापिआत्मप्रकाशत्वात्तस्यचस्वतःसिद्धत्वान्नानुपलंभोयुक्तइत्याशंक्याह अपक्वेकट्वेर्वारौतिक्तकर्कटिकायांविद्यमानोपिमधुरोरसःयथानोपलभ्यतेतथात्मन्यपक्वकरणे-विद्यमानापिज्ञताज्ञातृताप्रागभावीयवस्तुगोचरतानप्राप्यते १४२ ॐ ॐ ॐ ॐ ॐ

वेत्तिसर्वगतांकस्मात्सर्वगोपिनवेदनामितियदुक्तंतत्रोत्तरमाह यःपुनर्देहाभिमानयुक्तःससर्वाश्रयामाध्यात्मिकादिस्वरूपवेदनांस्वकर्मोपार्जि
त.एवदेहेप्राप्नोति नदेहांतरगतांभोगायतनारंभादृष्टवैलक्षण्यादेव यस्तुयोगीमुक्तोमुक्ताहंकारादिभिःसकलक्षेत्रगतानांसुखदुःखादिसं
विदांवेदिताभवति परिपक्ककरणत्वात् १४३ नन्वेकस्मिन्नात्मनिसुरनरादिदेहेषुभेदप्रत्ययोनघटतइत्याशंक्याह यथैकमेवगगनंकूप
कुंभाद्युपाधिभेदभिन्नंनानेवानुभूयते यथावाभानुरेकोपिभिन्नेषुजलभाजनेषुकरकमणिकमल्लिकादिषुनानेवानुभूयते तथैकोप्या-

सर्वाश्रयांनिजेदेहेदेहीविंदतिवेदनाम् योगीमुक्तश्चसर्वासांयोगमाप्नोतिवेदनाम् १४३
आकाशमेकंहियथाघटादिषुपृथग्भवेत् तथात्मैकोप्यनेकश्चजलाधारेष्विवांशुमान् १४४
ब्रह्मखानिलतेजांसिजलभूश्चेतिधातवः इमेलोकाएषचात्मातस्माच्चसचराचरम् १४५

त्माअंतःकरणोपाधि
भेदेननानात्ववीयते द्वितीयदृष्टांतोंपादानमात्मभेदस्यापारमार्थिकद्योतनार्थं १४४ पंचधातून्स्वयंषष्ठआदत्तेयुगपत्प्रभुरित्याद्युक्तमर्थमु- ४५
पसंहरत्याह ब्रह्मआत्मा खंगगनं अनिलोवायुः तेजोग्निः जलंप्रसिद्धं भूश्चेत्येतेवातादिधातवःशरीरंव्याप्यधारयंतीतिधातवोभिधीयंते तत्र
खादयःपंचधातवोलोक्यंतेदृश्यंतइतिलोकाजडायावत् एषचिद्धातुरात्माएतस्माज्जडाजडसमुदायात्स्थावरजंगमात्मकंजगदुत्पद्यते १४५

कथमसावात्माजगत्सृजतीत्याह यथाहिकुलालोमृच्चक्रचीवरजातंकरणजातमुपादायकरकशरावादिकंनानाविधकार्यजातंरचयति यथावा
वर्धकिस्तृणमृत्काष्ठैःपरस्परसापेक्षैःएकंगृहाख्यंकार्यंकरोति यथावाहेमकारःकेवलंहेमोपादायहेमानुगतमेवकटकमुकुटकुंडलादिकार्य-
मुत्पादयति यथावाकोशकारकःकीटविशेषोनिजलालयारब्धमात्मबंधनंकोशाख्यमारभते तथात्मापिपृथिव्यादीनिसाधनानिपरस्पर-
सापेक्षाणि तथाकरणान्यपिश्रोत्रादीन्युपादायअस्मिन्संसारेनानानासुरादियोनिषुस्वयमेवात्मानंनिजकर्मबंधबद्धःशरीरित्वयासृजति

मृद्दंडचक्रसंयोगात्कुंभकारोयथाघटम् करोतितृणमृत्काष्ठैर्गृहंवागृहकारकः १४६ हेममात्रमुपादायरूपंवाहेमकारकः
निजलालासमायोगात्कोशंवाकोशकारकः १४७ कारणान्येवमादायतासुतास्विहयोनिषु सृजत्यात्मानमात्माचसंभूयकरणा.
निच १४८ महाभूतानिसत्यानियथात्मापितथैवहि कोन्यथैकेननेत्रेणदृष्टमन्येनपश्यति १४९ वाचंवाकोविजानातिपुनःसं-
श्रुत्यसंश्रुताम्

१४६ १४७ १४८ किंपुनर्वैषयिकज्ञानेंद्रियव्यतिरिक्तात्मसद्भावेप्रमाणमित्याशंक्याह यथाहिपृथिव्यादिमहाभूतानिसत्यानिप्रमाणगम्यत्वात् तथा
त्मापिसत्यःअन्यथायदिबुद्धींद्रियव्यतिरिक्तोज्ञाताध्रुवोनस्यात्तर्हिएकेनचक्षुरिंद्रियेणदृष्टंवस्तुअन्येनस्पर्शनेंद्रियेणकोविजानाति यथायमद्राक्षंत-
महंस्पृशामीतिश्चतथाकस्यचित्पुरुषस्यवाचंपूर्वंश्रुत्वापुनःश्रूयमाणांवाचंतस्यवागियमितिकःप्रत्यभिजानाति तस्मात्ज्ञानेंद्रियातिरिक्तोज्ञाताध्रुवइतिसि
द्धम्

किंच यद्यात्माधुवोनस्यात् तर्ह्यनुभूतार्थगोचरास्मृतिः पूर्वानुभवभावितसंस्कारोद्बोधनिबंधनाकस्यभवेत् नह्यनेनदृष्टेवस्तुनि अन्यस्यस्मृतिरुपपद्यते तथाकःस्वप्नज्ञानस्यकारकः नहींद्रियाणामुपरतव्यापाराणांतत्कारकत्वं तथाहमेवाभिजनत्वादिसंपन्न इत्येवंविधोनुसंधानप्रत्ययः कस्यभवति स्थिरात्मव्यतिरिक्तस्यतथाशब्दस्पर्शादिविषयोपभोगसिद्ध्यर्थमुद्योगंमनोवाक्कायैः कःकुर्यात् तस्मादपिबुद्धींद्रियव्यतिरिक्त

अतीतार्थस्मृतिःकस्य कोवास्वप्नस्यकारकः १५० जातिरूपवयोवृत्तविद्यादिभिरहंकृतः शब्दादिविषयोद्योगंकर्मणाम
नसागिरा १५१ ससंदिग्धमतिःकर्मफलमस्तिनवेतिवा विप्लुतःसिद्धमात्मानमसिद्धोपिहिमन्यते १५२ ममदाराःसु
तामात्याअहमेषामितिस्थितिः हिताहितेषुभावेषुविपरीतमतिःसदा १५३

आत्मास्थितः १५० १५१ उपासनाविशेषविध्यर्थंसंसारस्वरूपंविवृण्वन्नाह योसौपूर्वोक्तआत्माविप्लुतोहंकारदूषितः ससकलकर्मसुफलमस्तिनवेतिसंदिग्धमतिर्भवति तथासिद्धोप्यकृतार्थोपिसिद्धमेवकृतार्थमात्मानंमन्यते १५२ किंच तस्यविप्लुतमतेर्ममपुत्रकलत्रभृत्यपुत्रादयोअहमेषामित्यतीवममताकुलस्थितिर्भवति तथाहिताहितकरेकार्यप्रकरेसविप्लुतमतिर्विपरीतमतिःसदाभवेत् १५३ छ छ छ छ ४९

किंच ज्ञेयंजानातीतिज्ञेयज्ञः तस्मिन्नात्मनिप्रकृतौचात्मनोगुणसाम्यावस्थायांविकारेहंकारादावविशेषवान् विवेकानभिज्ञोभवति तथानशनहुताशनांबुप्रवेशविशेषाशनादिषुविप्लववशात्कृतप्रयत्नोभवेत् एवंनानाप्रकाराकार्यप्रवृत्तोअविनीतात्माअसंयतात्माअसत्कार्याभिनिवेशयुक्तःसन् तत्कृतकर्मजातेनरागद्वेषाभ्यांमोहेनचबध्यते १५४ १५५ शरीरग्रहणद्वारेणकथंपुनस्तस्यविस्रंभोभवतीत्यतआह वि

ज्ञेयज्ञे प्रकृतौचैवविकारेचाविशेषवान् अनाशकानलापातजलप्रपतनोद्यमी १५४ एवंवृत्तोविनीतात्माचितथाभिनि
वेशवान् कर्मणाद्वेषमोहाभ्यामिच्छयाचैवबध्यते १५५ आचार्योपासनंवेदशास्त्रार्थेषुविवेकिता तत्कर्मणामनुष्ठा
नंसंगःसद्भिर्गिरःशुभाः १५६ स्त्र्यालोकालंभविगमःसर्वभूतात्मदर्शनम् त्यागःपरिग्रहाणांचजीर्णकाषायधारणम्
१५७ विषयेंद्रियसंरोधस्तंद्रालस्यविवर्जनम् शरीरपरिसंख्यानंप्रवृत्तिष्वघदर्शनम् १५८ नीरजस्तमतासत्वशु-
द्धिर्निःस्पृहताशमः एतैरुपायैःसंशुद्धः सत्वयोग्यमृतीभवेत् १५९

द्यार्थमाचार्यसेवा वेदांतार्थेषुपातंजलादियोगशास्त्रार्थेषु चविवेकित्वम् तत्प्रतिपादितध्यानकर्मणामनुष्ठानम् सत्पुरुषसंगः प्रियहितवचनत्वम् ललनालोकनालंभयोःपरित्यागः सर्वभूतेष्वात्मवद्दर्शनंसमत्वदर्शनम् परिग्रहाणांचपुत्रक्षेत्रकलत्रादीनांचत्यागः जीर्णकाषायधारणम् तथाशब्दस्पर्शादिविषयेषुश्रोत्रादींद्रियाणां

प्रवृत्तिनिरोधस्तंद्रानिद्रानुसारिणी आलस्यमनुत्साहः तयोर्विशेषेणत्यागः शरीरकस्यपरिसंख्यानमस्थिराशुचित्वादिदोषानुसंधानम् तथासकलगमनादिषुप्रवृत्तिषुसूक्ष्मप्राणिवधादिदोषपरामर्शः तथारजस्तमोविधुरताप्राणायामादिभिर्भावशुद्धिः निःस्पृहताविषयेष्वनभिलाषः शमोबाह्यांतःकरणसंयमः एतैराचार्योपासनादिभिरुपायैःसम्यक्शुद्धः केवलसत्वयुक्तोब्रह्मोपासनेनामृतीभवेत्मुक्तोभवति १५६ १५७ १५८ १५९ कथममृतत्वप्राप्तिरित्यतआह आत्माख्यतत्वस्मृतेरात्मनिनिश्चलतयोपस्थानात्सत्वशुद्धियोगात्केवलसत्वगुणयोगात्कर्मबी

तत्वस्मृतेरुपस्थानात्सत्वयोगात्परिक्षयात् कर्मणांसन्निकर्षाच्चसतांयोगःप्रवर्त्तते १६०
शरीरसंक्षयेयस्यमनःसत्वस्थमीश्वरम् अविप्लुतमतिःसम्यग्जातिसंस्मरतामियात् १६१

जानांपरिक्षयात्सत्पुरुषाणांचसंबंधात्आत्मयोगःप्रवर्त्तते १६० किंच यस्यपुनर्योगिनोविप्लुतमतेःशरीरसंक्षयसमयेमनःसत्वयुक्तंसम्यगेकाग्रतयेश्वरंप्रतिव्याध्रियते सयद्युपासनाप्रयोगाप्रवीणतयात्मानंनाधिगच्छति तर्हिविशिष्टसंस्कारपाटववशेनजात्यंतरानुभूतकृमिकीटादिनानागर्भवासादिसमुद्भूतदुःखस्मर्तृत्वंप्राप्नुयात् तत्स्मरणेनचजातोद्वेगस्तद्विच्छेदकारिणिमोक्षेप्रवर्त्तते १६१ ७ ७



यस्त्वपटुसंस्कारतयापूर्वजातिंनस्मरतितस्यकागतिरित्यत्राह भरतोनटःसयथारावणादिनानारूपाणिकुर्वाणःसितासितपीतादिभिर्वर्णैरात्मनस्तनुंवर्णयतिरचयतितथैवात्मातत्तत्कर्मफलोपभोगार्थंकुब्जवामनादिनानारूपाणिकर्मनिमित्तानिकलेवराण्यादत्ते १६२ किंच नकेवलंकर्मैवकुब्जवामनत्वादिनिमित्तंकिंतुकालकर्मणी स्वपितृकारणबीजदोषोमातृदोषश्चेतिसर्वमेतत्सहकारिकारणम् एतेनदृष्टादृष्टस्वरूपेणकारण

यथाहिभरतोवर्णैर्वर्णयत्यात्मनस्तनुम् नानारूपाणिकुर्वाणस्तथात्माकर्मजास्तनूः १६२ का
लकर्मात्मबीजानांदोषैर्मातुस्तथैवच गर्भस्यवैकृतंदृष्टमंगहीनादिजन्मतः १६३ अहंका-
रेणमनसागत्याकर्मफलेनच शरीरेणचनात्मायंमुक्तपूर्वःकथंचन १६४

कलापेनगर्भस्यांगहीनत्वादिविकारोजन्मनआरभ्यानियतकालोदृष्टः १६३ ननुप्राकृतिकप्रलयावसरेमहदाद्यखिलविकारविनाशेकर्मणोनाशात्कथंतन्निबंधनःप्रथमपिंडपरिग्रहइत्याशंक्याह मनोहंकारौप्रसिद्धौ गतिःसंसरणहेतुभूतोदोषराशिः कर्मफलंधर्माधर्मरूपम् शरीरंलिंगात्मकम् एतैरहंकारादिभिरयमात्माकदाचिदपिनमुच्यते यावन्मोक्षः १६४ ७ ७ ७

ननुप्रतिनियतकर्मणांजीवानांप्रतिनियतकालमेवोपरतिर्युक्तानपुनःसंग्रामादौयुगपदकालेप्राणसंक्षय इत्याशंक्याह यथाहिखलुतैलाक्ति
न्नानेकवर्त्तिजीविनांनानाज्वालानांयुगपत्संस्थितिः तासांचस्थितीनांपटुतरंपोपूयमानपवनाहतिरूपविपत्तिहेतूपनिपातयोगपद्यायुग
पदुपरतिर्यथाभवति तथैवरथिसारथिवाजिकुंजरादिजीवानांयुद्धाख्योपरतिहेतुयोगपद्यादकालेपिप्राणपरिक्षयोनानुपपन्नः एतदु
क्तंभवति प्रतिनियतकालविपत्तिहेतुभूतादृष्टस्यतद्विरुद्धकार्याकरदृष्टहेतूपनिपातेनप्रतिबंधइति १६५ मोक्षमार्गमाह योसौहृदिप्रदीपवत्-

वर्त्याधारस्नेहयोगाद्यथादीपस्यसंस्थितिः विक्रियापिचदृष्टैवमकालेप्राणसंक्षयः १६५ अनं
तारश्मयस्तस्यदीपवद्यःस्थितोहृदि सितासिताःकद्रुनीलाःकपिलानीललोहिताः १६६ ऊर्ध्व
मेकःस्थितस्तेषांयोभित्वासूर्यमंडलम् ब्रह्मलोकमतिक्रम्यतेनयातिपरांगतिम् १६७

स्थितोजीवस्तस्यानंतारश्मयोनाड्यःसुखदुःखहेतुभूताद्वासप्ततिसहस्राणीत्यादिनोक्ताःसितासितकर्बुरादिरूपाःसर्वतःस्थितास्तेषामेकोरश्मि
रूर्ध्वव्यवस्थितः योसौमार्त्तंडमंडलंनिर्भिद्यहिरण्यगर्भनिलयंचातिक्रम्यवर्त्ततेतेनजीवःपरांगतिमपुनरावृत्तिलक्षणांप्राप्नोति १६६ ८१
१६७ स्वर्गिमार्गमाह यदस्यात्मनोमुक्तिमार्गभूताद्रश्मेरन्यद्रश्मिशतमूर्ध्वाकारमेवस्थितम् तेनसुरशरीराणितैजसानिसुखैकभोगाधि-

करणानिसुधामानिकनकरजतरत्नरचितामरपुरसहितानिप्रपद्यते १६८ संसरणमार्गमाह येपुनस्तस्याधस्ताद्रश्मयोमृदुप्रभास्तैरिहफलो
पभोगार्थंसंसारेसंसरति अवशःस्वकृतकर्मपरतंत्रः १६९ भूतचैतन्यवादिपक्षंपरिजिहीर्षुराह वेदैःसएषनेतिनेतीत्यात्मेतिअस्थूलमन
णवन्हस्वमपाणिपादमित्यादिभिः शास्त्रैश्चमीमांसान्वीक्षिक्यादिभिः विज्ञानैश्चममेदंशरीरमित्यादिदेहव्यतिरिक्तात्मानुभवैः तथाजन्ममरणा

यदस्यान्यद्रश्मिशतमूर्ध्वमेवव्यवस्थितम् तेनदेवशरीराणितैजसानिप्रपद्यते १६८ येनैकरूपाश्चाधस्ताद्रश्मयोस्यमृ
दुप्रभाः इहकर्मोपभोगायतैःसंसरतिसोवशः १६९ वेदैःशास्त्रैःसविज्ञानैर्जन्मनामरणेनच आर्त्यागत्यातथागत्यास
त्येनह्यनृतेनच १७० श्रेयसासुखदुःखाभ्यांकर्मभिश्चशुभाशुभैः निमित्तशाकुनज्ञानग्रहसंयोगजैःफलैः १७१ तारा
नक्षत्रसंचारैर्जागरैःस्वप्नजैरपि आकाशपवनज्योतिर्जलभूतिमिरैस्तथा १७२ मन्वंतरैर्युगप्राप्त्यामंत्रौषधिफलैर-
पि वित्तात्मानंवेद्यमानंकारणंजगतस्तथा १७३

भ्यांजन्मांतरानुष्ठितधर्माधर्मनियताभ्यांदेहातिरिक्तात्मानुमानंआर्त्याजन्मांतर
गतकर्मानुष्ठातृनियतया तथागमनागमनाभ्यांज्ञानेच्छाप्रयत्नाधारनियनाभ्यामपिभौतिकदेहातिरिक्तात्मानुमानम् नहिदेहस्यचैतन्यादि
संभवति यतःकारणगुणप्रक्रमेणकार्यद्रव्येवैशेषिकगुणारंभोदृष्टः नचतत्कारणभूतपार्थिवपरमाण्वादिषुचैतन्यादिसमवायःसंभव

ति तदारब्धस्तंभकुंभादिभौतिकेष्वनुपलंभात् नचमदशक्तिवदुदकादिद्रव्यांतरसंयोगजइतिवाच्यम् शक्तेःसाधारणगुणत्वात् अतोभौति प्रा॰ ३
कदेहातिरिक्तचैतन्यादिसमवाय्यंगीकर्तव्यः सत्यानृतेप्रसिद्धे श्रेयोहितप्राप्तिः सुखदुःखेआमुष्मिके तथाशुभकर्मानुष्ठानमशुभकर्मप
रित्यागः एतैश्चज्ञाननियतैःदेहातिरिक्तात्मानुमानम् निमित्तंभूकंपादि शाकुनंज्ञानंपिंगलादिपतत्रिचेष्टालिंगकज्ञानम् ग्रहाःसूर्यादयः त
त्संयोगजैःफलैः ताराअश्विन्यादिव्यतिरिक्तानिज्योतींषि नक्षत्राण्याश्वयुजप्रभृतीनि एतेषांसंचारैःशुभाशुभफलद्योतनैर्जागरैर्जागरा
वस्थाजन्यैश्चसच्छिद्रादित्यादिदर्शनैः तथास्वप्नजैःखरवाराहयुक्तरथारोहणादिज्ञानैःतथाआकाशाद्यैश्चजीवोपभोगार्थतयासृष्टैस्तथामन्वं

अहंकारःस्मृतिर्मेधाद्वेषोबुद्धिःसुखंधृतिः इंद्रियांतरसंचारइच्छाधारणजीविते १७४ स्वर्गःस्वप्नश्चभावानांप्रेरणंमनसोग
तिः निमेषश्चेतनायत्नआदानंपांचभौतिकम् १७५ यतएतानिदृश्यंतेलिंगानिपरमात्मनः तस्मादस्तिपरोदेहादात्मासर्वगई
श्वरः १७६

तरप्राप्त्यायुगांतरप्राप्त्यादेहेनुपपद्यमानतया तथामंत्रौषधिफलैःप्रेक्षापूर्वकैःक्षुद्रकर्माद्यैःसाक्षात्परंपरयावादेहेनुपपद्य
मानैर्वेद्यमानंहेमुनयोवित्तजानीत १७० १७१ १७२ १७३ किंच अहंकृतिरहंकारः स्मृतिःप्राग्भवीयानुभवभावितसंस्कारोद्बोधनिबंधना ५२
स्तन्यपानादिगोचरा सुखमैहिकम् धृतिर्धैर्यम् इंद्रियांतरेणाहिदृष्टेर्थेइंद्रियांतरस्यसंचारोयमहमद्राक्षंतमहंस्पृशामीत्येवमनुसंधानरूपइं-

द्रियांतरसंचारः अत्रेच्छाप्रयत्नचैतन्यानांस्वरूपेणलिंगत्वम् पूर्वश्लोकेतुगमनसत्यवचनादिहेतुतयाआर्थिकंलिंगत्वमित्यपौनरुक्त्यम् तथाधारणं
शरीरस्यजीवितंप्राणधारणम् स्वर्गोनियतदेहांतरोपभोग्यःसुखविशेषः स्वप्नःप्रसिद्धः पूर्वश्लोकेतुस्वप्नस्यशुभफलद्योतनायलिंगत्वम् अत्र
स्वरूपेणेत्यपौनरुक्त्यम् भावानामिंद्रियादीनांप्रेरणम् मनसोगतिश्चेतनाधिष्ठानव्याप्ता निमेषःप्रसिद्धः तथापंचभूतानामुपादानम् यस्मा
देतानिलिंगानिभूतेष्वनुपपन्नानिसाक्षात्परंपरयावापरमात्मनोद्योतकानिदृश्यंते तस्माद्स्तिदेहातिरिक्तआत्मासर्वगईश्वरइतिप्रसिद्धम्

बुद्धींद्रियाणिसार्थानिमनःकर्मेंद्रियाणिच अहंकारश्चबुद्धिश्चपृथिव्यादीनिचैवहि १७७
अव्यक्तमात्माक्षेत्रज्ञःक्षेत्रस्यास्यनिगद्यते ईश्वरःसर्वभूतस्थःसन्नसन्सदसच्चयः १७८

१७४ १७५ १७६ क्षेत्रज्ञस्वरूपमाह बुद्धींद्रियाणिश्रोत्रादीनि सार्थानिशब्दादिविषयसहितानि मनःकर्मेंद्रियाणिवागादीनि तथाहंकारोबुद्धि
श्चनिश्चयात्मिका पृथिव्यादीनिपंचभूतानि अव्यक्तंप्रकृतिरित्येतत्क्षेत्रमस्ययोसावीश्वरःसर्वगतःअतएवसन्रूपःप्रमाणानराग्राह्यत्वात्
असन्अस्पष्टप्रतीतिकत्वात् सदसद्रूपोसावात्माक्षेत्रज्ञइतिनिगद्यते १७७ १७८ ५२ ५२ ५२ ५२

बुद्ध्यादेरुत्पत्तिमाह सत्वादिगुणसाम्यमव्यक्तं ततस्त्रिः प्रकारायाः सत्वरजस्तमोमय्या बुद्धेरुत्पत्तिः तस्याश्च वैकारिकतैजसो भूतादिरिति त्रिविधो हंकारउत्पद्यते तत्र तामसाद्भूतादिसंज्ञकादहंकारात्तन्मात्राणि आदिग्रहणाद्गगनादीनि तानि चैकोत्तरगुणान्युत्पद्यंते चशब्दाद्वैकारिकतैजसाभ्यां बुद्धिकर्मेंद्रियाणामुत्पत्तिः १७९ गुणस्वरूपमाह तेषांगगनादिपंचभूतानां एकोत्तरवृद्ध्या पंचशब्दादयो गुणा वेदितव्याः एषांच बुद्ध्या-

बुद्धेरुत्पत्तिरव्यक्तात्ततोहंकारसंभवः तन्मात्रादीन्यहंकारादेकोत्तरगुणानिच १७९ शब्दःस्पर्शश्चरूपंचरसोगंधश्चतद्गुणाः योयस्मान्निःसृतश्चैषांसतस्मिन्नेवलीयते १८० यथात्मानंसृजत्यात्मातथावःकथितोमया विपाकात्त्रिःप्रकाराणांकर्मणामीश्वरोपिसन् १८१ सत्वंरजस्तमश्चैवगुणास्तस्यैवकीर्त्तिताः रजस्तमोभ्यामाविष्टश्चक्रवद्भ्राम्यतेह्यसौ १८२ अनादिरादिमांश्चैवसएवपुरुषःपरः लिंगेंद्रियग्राह्यरूपःसविकारउदाहृतः १८३

दिविकाराणांमध्येयो यस्मात्प्रकृत्यादेरुत्पन्नःसतस्मिन्नेवसूक्ष्मरूपेणप्रलयसमयेप्रलीयते १८० प्रकरणार्थमुपसंहरन्नाह मानसादित्रिप्रकारकर्मणांविपाकादीश्वरोपिसन्नात्मायथात्मानंसृजतितथायुष्माकंकथितः सत्वादयश्चगुणास्तस्यैवाविद्याविशिष्टस्यकीर्त्तिताः तथासएवरजस्तमोभ्यामाविष्टश्चक्रवदिहसंसारेभ्राम्यतीत्यपिकथितम् सएवानादिःपरमपुरुषःशरीरग्रहणेनादिमान्कुब्जवामनादिविकारसहितः यथास्थूलाकारतयापरिणतोलिंगैरिंद्रियैश्चग्राह्यस्वरूपउदाहृतः १८१ १८२ १८३ स्वर्गमार्गमाह अजवीथ्यमरमार्गःतस्यागस्त्यस्यचयदंतरमसौपितृयानस्तेनाग्निहोत्रिणःस्वर्गकामाःस्वर्गंप्राप्नुवंति १८४ किंच येदानादिस्मार्त्तकर्मपराःसम्यक्दंभरहिताः तथाष्टाभिरात्मगुणैर्दयाक्षांतिरनसूयाशौचमनायासोमंगलमकार्पण्यमस्पृहेतिगौतमादिप्रतिपादितैर्युक्ताः तथाचयेचसत्यवचननिरतास्तेपितेनैवपितृयानेनैवसुरसदनमाप्नुवं-

पितृयानोजवीथ्याश्चयदगस्त्यस्यचांतरम् तेनाग्निहोत्रिणोयांतिस्वर्गकामादिवंप्रति १८४ येचदानपराःसम्यगष्टाभिश्चगुणैर्युताः तेपितेनैवमार्गेणसत्यव्रतपरायणाः १८५ तत्राष्टाशीतिसाहस्रामुनयोगृहमेधिनः पुनरावर्त्तिनोबीजभूताधर्मप्रवर्त्तकाः १८६

ति १८५ ननुनैमित्तिकादिप्रतिसंचरेखिलअध्यापकप्रलयादविदितवेदास्तस्योपरितनाजनाःकथमग्निहोत्रादिकंकर्मकरिष्यंति कथंतरांचाकृतकर्माणःस्वर्गमार्गमधिरोक्ष्यंतीत्यतआह तत्रपितृयानेष्टाशीतिसहस्रसंख्यामुनयोगृहस्थाश्रमिणःपुनरावृत्तिधर्माणः सर्गादौवेदस्योपदेशकतयाधर्मतरुप्रादुर्भावेबीजभूताःसंतोग्निहोत्रादिधर्मप्रवर्त्तकाः अतोनप्रागुदितदोषसमासंगः १८६ ५ ५ ५

किंच सप्तर्षयःप्रसिद्धाः नागवीथीऐरावतपथः तदंतरालेतावंतएवअष्टाशीतिसहस्रसंख्यामुनयः सर्वारंभविवर्जिताः केवलज्ञाननिष्ठाः तपोब्रह्मचर्ययुक्ताः तथासंगत्यागिनोदेवलोकंसमाश्रिताः आभूतसंप्लवंप्राकृतप्रलयपर्यंतमवतिष्ठंते तत्रचस्थिताःसृष्ट्यादावाध्यात्मिकधर्माणांप्रवर्त्तकाः १८७ १८८ कथंभूतास्तेमुनयइत्यतआह यतोह्विविधादपिमुनिसमूहाच्चत्वारोवेदाःपुराणांगविद्योपनिषदश्चनित्यभूताएवाध्येतृपरंपरायाताःप्रवृत्तास्तथाश्लोकाइतिहासात्मकाः सूत्राणिचशब्दानुशासनमीमांसागोचराणि भाष्याणिचसूत्रव्याख्या 

सप्तर्षिनागवीथ्यंतर्देवलोकंसमाश्रिताः तावंतएवमुनयःसर्वारंभविवर्जिताः १८७ तपसाब्रह्मचर्येणसंगत्यागे नमेधया तत्रगत्वावतिष्ठंतेयावदाभूतसंप्लवम् १८८ यतोवेदाःपुराणानिविद्योपनिषदस्तथा श्लोकाःसूत्राणि भाष्याणियच्चकिंचनवाङ्मयम् १८९ वेदानुवचनंयज्ञोब्रह्मचर्यंतपोदमः श्रद्धोपवासःस्वातंत्र्यमात्मनोज्ञानहेतवः १९०

नुरूपाणियदन्यदायुर्विद्यादिकंवाङ्मयंतदपियत्सकाशात्प्रवृत्तंतथाविधास्तेमुनयोधर्मप्रवर्त्तकाः १८९ एवंसतिवेदस्यनानित्यतादोषप्रसंगः ततःकिमित्यतआह वेदस्यनित्यत्वेसतितत्प्रामाण्यबलाद्वेदानुवचनादयःसत्वशुद्ध्यापादनद्वारेणात्मज्ञानस्यहेतवइत्युपपन्नंभवति १९० ७२ ७२ 

किंच यस्मान्नित्यतयाप्रमाणभूतोवेदस्तस्मादसावुक्तमार्गेणसकलाश्रमिभिर्नानाप्रकारंजिज्ञासितव्यः तमेवप्रकारंदर्शयति द्विजातिभिर्द्रष्टव्यः अपरोक्षीकर्त्तव्यः तत्रोपायंदर्शयति श्रोतव्योथमंतव्यइति प्रथमतोवेदांतश्रवणेननिर्णेतव्यः तदनंतरंमंतव्यः युक्तिभिर्विचारयितव्यः ततोसौध्यानेनापरोक्षीभवति येद्विजातयोतिशयश्रद्धायुक्ताःसंतोनिर्जनप्रदेशमाश्रिताः एवमुक्तेनमार्गेणएनमात्मानंसत्यंपरमार्थभूतमुपासते तेआत्मानंविंदंति लभंतेप्राप्नुवंति १९१ १९२ प्राप्तिमार्गंदेवयानमाह तेविदितात्मानःक्रमादर्च्याद्यभिमानीदेवतास्थानेषुमुक्तिमार्गभूतेषुविश्रम्यतैः

सत्वाश्रमैर्विजिज्ञास्यःसमस्तैरेवमेवतु द्रष्टव्यस्त्वथमंतव्यःश्रोतव्यश्चद्विजातिभिः १९१ यएनमेवंविंदंतियेचारण्यकमाश्रिताः उपासतेद्विजाःसत्यंश्रद्धयापरयायुताः १९२ क्रमात्तेसंभवंत्यर्चिरहःशुक्लंतथोत्तरम् अयनंदेवलोकंचसवितारंसवैद्युतम् १९३ ततस्तान्पुरुषोभ्येत्यमानसोब्रह्मलौकिकान् करोतिपुनरावृत्तिस्तेषामिहनविद्यते १९४

प्रस्थापिताःपरमपदंप्राप्नुवंति अर्चिर्वन्हिः अहर्दिनं शुक्लपक्षः तथोत्तरायणं सूर्यसद्म सवितासूर्यः वैद्युतंचतेजः तान्एवंक्रमादर्चिरादिस्थानगतान्मानसःपुरुषोब्रह्मलोकभाजःकरोति तेषामिहसंसारेपुनरावृत्तिर्नविद्यते किंतुप्राकृतप्रतिसंचरावसरेत्यक्तलिंगशरीराःपरमात्मन्येकीभवंति १९३।१९४

पूर्वोक्तपितृयानमाह येपुनर्विहितैर्यज्ञदानतपोभिःस्वर्गफलभोक्तारस्तेक्रमाद्धूमादिचंद्रपर्यंतपदार्थाभिमानिनीर्देवताःप्राप्यपुनरेववायुवृष्टिजल 
भूमीःप्राप्यव्रीह्याद्यन्नरूपेणशुक्रत्वमवाप्यसंसारिणोयोनिंव्रजंति एतन्मार्गद्वयमप्रमत्तोयोनविजानातिमार्गद्वयोपायभूतधर्मानुष्ठानंनकरोति· 

यज्ञेनतपसादानैर्येहिस्वर्गजितोनराः धूमंनिशांकृष्णपक्षंदक्षिणायनमेवच १९५ पितृलोकंचंद्रमसंवायुंवृष्टिंजलंम
हीम् क्रमात्तेसंभवंतीहपुनरेवव्रजंतिच १९६ एतद्योनविजानातिमार्गद्वितयमात्मवान् दंदशूकःपतंगोवाभवेत्
कीटोथवाकृमिः १९७ ऊरुस्थोत्तानचरणःसव्येन्यस्योत्तरकरम् उत्तानंकिंचिदुन्नाम्यमुखंविष्टभ्यचोरसा १९८
निमीलिताक्षःसत्वस्थोदंतैर्दंतानसंस्पृशन् तालुस्थाचलजिह्वश्चसंवृतास्यःसुनिश्चलः १९९ संनिरुध्येंद्रियग्रामंना-
तिनीचोच्छ्रितासनः द्विगुणंत्रिगुणंवापिप्राणायाममुपक्रमेत् २०० ततोध्येयःस्थितोयोसौहृदयेदीपवत्प्रभुः धार
येत्तत्रचात्मानंधारणांधारयन्बुधः २०१

असौदंदशूकोभुजंगः पतंगःशलभः कृमिःकीटोवाभवेत् १९५ १९६ १९७ उपासनप्रका
रमाह ऊरुस्थावुत्तानौचरणौयस्यसतथोक्तःबद्धपद्मासनः तथोत्तानेसव्यकरेदक्षिणमुत्तानंन्यस्यमुखंचकिंचिदुन्नाम्योरसाचविष्टभ्यस्तंभयित्वा ५५
तथानिमीलिताक्षःसत्वस्थःकामक्रोधादिरहितोदंतैर्दंतानसंस्पर्शयन् तथातालुनिस्थिताअचलाजिह्वायस्यसतथोक्तः तथासंवृतास्यःपिहितान

नःसुनिश्चलोनिष्प्रकंपः तथासम्यगिंद्रियसमूहंविषयेभ्यःप्रत्याहृत्यनातिनीचासनोनात्युच्छ्रितासनोयथाचित्तविक्षेपोनभवतितथोपविष्टःस
न्द्विगुणंत्रिगुणंवाप्राणायामाभ्यासमुपक्रमेत् ततोवशीकृतपवनेनयोगिनायोसौहृदयदीपवदप्रकंपःप्रभुःस्थितोसौध्यातव्यः तत्रचहृदिआत्मा
नंमनोगोचरतयाधारयेत् तथाधारणांचधारयेत् धारणास्वरूपंचजान्वग्रभ्रमणेनच्छोटिकादानकालोमात्राताभिःपंचदशमात्राभिरधमःप्राणा
यामः त्रिंशद्भिर्मध्यमः पंचचत्वारिंशद्भिरुत्तमः एवंप्राणायामत्रयात्मिकैकाधारणातास्तिस्रोयोगशब्दवाच्यास्ताश्चधारयेत् यथोक्तमन्यत्र सं-

अंतर्धानंस्मृतिःकांतिर्दृष्टिःश्रोत्रज्ञतातथा निजंशरीरमुत्सृज्यपरकायप्रवेशनम् २०२ अर्थानांछंदतःसृष्टिर्योगसिद्धे
र्हिलक्षणम् सिद्धेयोगेत्यजन्देहममृतत्वायकल्पते २०३

भ्रम्यच्छोटिकांदद्यात्कराग्रंजानुमंडले मात्राभिःपंचदशभिःप्राणायामो
धमःस्मृतः मध्यमोद्विगुणःश्रेष्ठस्त्रिगुणोधारणातथा त्रिभिस्त्रिभिःस्मृतैकैकाताभिर्योगस्तथैवचेति १९८ १९९ २०० २०१ धारणात्मकयोगा
भ्यासेप्रयोजनमाह अणिमप्राप्त्यापरैरदृश्यत्वमंतर्धानं स्मृतिरतींद्रियेष्वर्थेषुमन्वादेरिवस्मरणम् कांतिःकमनीयता दृष्टिरतीतानागतेष्वप्य
र्थेषु तथाश्रोत्रज्ञताअतिदवीयसिदेशेभिव्यज्यमानतयाश्रोत्रपथमनासेदुषामपिशब्दानांज्ञातृता निजशरीरत्यागेनपरशरीरप्रवेशनम् स्व
वांच्छावशेनार्थानांकारणनिरपेक्षतयासृष्टिरित्येतद्योगस्यसिद्धेर्लक्षणंलिंगं नचैतावदेवप्रयोजनंकिंतुसिद्धेयोगेत्यजन्देहममृतत्वायकल्प
तेब्रह्मत्वंप्राप्तयेचभवति२०२२०३

यज्ञदानाद्यसंभवेसत्वशुद्ध्युपायांतरमाह अथवात्यक्तकामीअनिषिद्धकर्माअन्यतमंवेदमभ्यसन्एकांतशीलो ऽयाचितमिताशनापादितेसत्व
शुद्धिरात्मोपासनेनपरांमुक्तिलक्षणांसिद्धिंप्राप्नोति २०४ किंच सत्प्रतिग्रहादिन्यायेनोपार्जितधनः अतिथिपूजातत्परः नित्यनैमित्तिकश्रा
द्धानुष्ठाननिरतः सत्यवादनशीलःसन्नात्मतत्वध्याननिरतःगृहस्थोपिहियस्मान्मुक्तिमवाप्नोति तस्मान्नकेवलमैहिकपारिव्रज्यपरिग्रहएव-
मुक्तिसाधनम् इत्यध्यात्मप्रकरणम् २०५ वर्णाश्रमेतराणांनोब्रूहिधर्मानशेषतइत्यत्रप्रतिपाद्यतयाप्रतिज्ञातषड्विधधर्ममध्येप्रपंचप्रकारं

अथवाप्यभ्यसन्वेदंन्यस्तकर्मावनेवसन् अयाचिताशीमितभुक्परांसिद्धिमवाप्नुयात् २०४ न्यायागतधनस्तत्वज्ञा
ननिष्ठोतिथिप्रियः श्राद्धकृत्सत्यवादीचगृहस्थोपिहिमुच्यते २०५ महापातकजान्घोरान्नरकान्प्राप्यदारुणान् क-
र्मक्षयात्प्रजायंतेमहापातकिनस्त्विह २०६

धर्ममभिधायाधुनावशिष्टंनैमित्तिकंधर्मजातंप्रायश्चित्तंपदाभिलप्यंप्रारिप्सुःप्रथमतस्त
त्प्ररोचनार्थमधिकारिविशेषणप्रदर्शनार्थंचार्थवादरूपंकर्मविपाकंतावदाह ब्रह्महत्यादिपंचकस्यमहापातकसंज्ञा ब्रह्महामद्यपइत्यत्रवक्ष्य
ते तद्योगिनोमहापातकिनस्तैर्महापातकजनितांस्तामिस्रादिनरकान्स्वजनितदुष्कृतानुरूपान्घोराननतितीव्रवेदनापादकत्वेनातिभयंकरान्दारुणा
न्दुःखैकभोगनिलयान्प्राप्यकर्मक्षयात् कर्मजन्यनरकदुःखोपभोगक्षयादनंतरंकर्मशेषात्पुनरिहसंसारेदुःखबहुलश्वसृगालादितिर्यग्यो

निषुप्रकर्षेणभूयोभूयोजायंते महापातकिग्रहणमितरेषामप्युपपातकादीनामुपलक्षणम् तेषांचतिर्यगादियोनिप्राप्तेर्वक्ष्यमाणत्वात् २०६
महापातकिनांसंसारप्राप्तिमुक्त्वातद्विशेषकथनायाह मृगाहरिणादयः श्वसूकरोष्ट्राःप्रसिद्धाः तेषांयोनिंब्रह्महास्वकर्मशेषेणप्राप्नोति ख-
रोरासभः पुल्कसःप्रतिलोमनिषादेनशूद्र्यांजातः वैदेहकेनांबष्ठ्यांजातोवेनस्तेषांयोनीःसुरापःप्राप्नोति कृमयःसजातीयसंभोगनिरपेक्षा
मांसविष्ठागोमयादिजन्याः ततःकिंचित्स्थूलतराःपक्षास्थिरहिताःपिपीलिकादयःकीटाः पतंगःशलभः तेषांयोनिंब्राह्मणस्वर्णहारीप्रा-

मृगश्वसूकरोष्ट्राणांब्रह्महायोनिमृच्छति खरपुल्कसवेनानांसुरापोनात्रसंशयः २०७
कृमिकीटपतंगत्वंस्वर्णहारीसमाप्नुयात् तृणगुल्मलतात्वंचक्रमशोगुरुतल्पगः २०८

प्नुयात् तृणंकाशादिः गुल्मलतेप्रसिद्धे तज्जातीयतांक्रमेणगुरुतल्पगःप्राप्नोति एतच्चाकामकृतविषयम् कामकारेत्वन्यास्वपिदुःखबहुलयोनि
षुसंसरंति यथाहमनुः श्वसूकरखरोष्ट्राणांगोजाविमृगपक्षिणाम् चंडालपुल्कसानांचब्रह्महायोनिमृच्छति कृमिकीटपतंगानांविड्भुजां
चैवपक्षिणाम् हिंस्राणांचैवसत्वानांसुरापोब्राह्मणोव्रजेत् लूताहिसरटानांचतिरश्चांचांबुचारिणाम् हिंस्राणांचपिशाचानांस्तेनोविप्रःस
हस्रशः लूतोर्णनाभः सरटःकृकलासः तृणगुल्मलतानांचक्रव्यादांदंष्ट्रिणामपि क्रूरकर्मकृतांचैवशतशोगुरुतल्पगइति २०७ २०८ ६ ७
ओ·२ बलाका

एवंतिर्यक्त्वादुत्तीर्णानांमानुष्येलक्षणानिभवंतीत्याह एवंरौरवादिनरकेषुश्वसूकरखरादियोनिषुचदारुणंदुःखमनुभूयानंतरंदुरितशेषेणजननमरणवानतरं दुरितशेषेणजननम
मयएवक्षयरोगादिलक्षणयुक्ताःप्रचुरेषुमानुषशरीरेषुसंसरंति ब्रह्महाक्षयरोगीराजयक्ष्मीभवेत् निषिद्धसुरापानःस्वभावतःकृष्णदशनः
ब्राह्मणहेम्नांहर्ताकुत्सितनखित्वं गुरुदारगामीदुश्चर्मत्वंकुष्ठिता एतेषांब्रह्महादीनांमध्येयेनपतितेनयःपुरुषःसंवसतिसतल्लिंगोभिजाय
ते किंच अन्नस्यापहर्त्ताआमयावीअजीर्णान्निः वागपहारकोननुज्ञातोध्यायीपुस्तकापहारीचमूकोवागिंद्रियविकलोभवेत् धान्यमिश्रोति 

ब्रह्महाक्षयरोगीस्यात्सुरापःश्यावदंतकः हेमहारीतुकुनखीदुश्चर्मागुरुतल्पगः २०९
योयेनसंवसत्येषांसतल्लिंगोभिजायते अन्नहर्त्तामयावीस्यान्मूकोवागपहारकः २१०
धान्यमिश्रोतिरिक्तांगःपिशुनःपूतिनासिकः तैलहृत्तैलपायीस्यात्पूतिवक्त्रस्तुसूचकः २११

रिक्तांगःषडंगुल्यादिः पिशुनोविद्यमानपरदोषप्रख्यापनशीलोदुर्गंधनासिकः तैलस्यहर्त्तातैलपायीकीटविशेषोभवति सूचकस्तद्दोषसंकीर्त्तनो
दुर्गंधिवदनोजायते एतच्चतिर्यक्त्वप्राप्त्युत्तरकालंमानुषशरीरप्राप्तौद्रष्टव्यम् यद्वातद्वापरद्रव्यमपहृत्यबलान्नरः अवश्यंयातितिर्यक्त्वंजग्ध्वा ५७
चैवाहुतंहविरितिमनुस्मरणात् २०९ २१० २११ ५७ ५७ ५७ ५७ ५७ ५७

किंच यःपरदारानपहरतिब्रह्मस्वंचसुवर्णव्यतिरिक्तमपहरतिअसावरण्येनिर्जलेदेशेब्रह्मराक्षसोभूतविशेषोजायते २१२ किंच हीनजा-
तौहेमकाराख्यायांपक्षिजातौपररत्नाद्यपहारकोजायते तथाचमनुः मणिमुक्ताप्रवालानिहृत्वालोभेनमानवः विविधानिचरत्नानिजायतेहे-
मकर्त्तृष्विति पत्रात्मकंशाकंहृत्वामयूरः शुभान्गंधानपहृत्यछुच्छुंदरीराजदुहिताख्यामूषिकाजायते २१३ किंच धान्यहारीआखुः या

परस्ययोषितंहृत्वाब्रह्मस्वमपहृत्यच अरण्येनिर्जलेदेशेभवतिब्रह्मराक्षसः २१२ हीनजातौप्रजायेतपररत्नापहा
रकः पत्रशाकंशिखीहृत्वागंधान्छुच्छुंदरीशुभान् २१३ मूषकोधान्यहारीस्याद्यानमुष्ट्रःकपिःफलम् जलंप्लवः
पयःकाकोगृहकारीह्युपस्करम् २१४ मधुदंशःफलंगृध्रोगांगोधाग्निंबकस्तथा श्वित्रीवस्त्रंश्वारसंतुचिरीलवणहा
रकः २१५

नंहृत्वोष्ट्रः फलंवानरः जलंप्लवःशकटविलाख्यःपक्षी क्षीरंध्वांक्षःगृहोपस्करंमुसलादिहृत्वागृहकारीचटकाख्यः
कीटविशेषः मधुहृत्वादंशाख्यःकीटः पलंमांसंतत्हृत्वागृध्राख्यःपक्षी गांहृत्वागोधाख्यःप्राणिविशेषः अग्निंहृत्वाबलाकाख्यःपक्षी
वस्त्रंहृत्वाश्वित्री इक्ष्वादिरसंहृत्वासारमेयः लवणहारीचिरीत्याख्यःउच्चैःस्वरःकीटः २१४ २१५ ५७ ५७ ५७

एवंप्रदर्शनार्थंकिंचिदुक्त्वाप्रतिद्रव्यंपृथक्कोटेनवक्तुमशक्तेरेकोपाधिनाकर्मविपाकंदर्शयितुमाह द्रव्यस्यापह्रियमाणस्ययादृशाःप्रकारास्ता
दृशाएवप्राणिजातयःस्तेयकर्मण्यपहर्त्तारोभवंति यथाकांस्यहारीहंसइति अथवायत्फलसाधनंद्रव्यमपहरतितत्साधनविकलोयथापंगु
तामश्वहारकइति शंखेनक्वचिद्विशेषोदर्शितः ब्रह्महाकुष्ठी तैजसापहारीमंडली देवब्राह्मणाक्रोशकःखलतिः गरदाग्निदावुन्मत्तौ गुरु
प्रतिहंतापस्मारी गोघ्नश्चांधः धर्मपत्नींमुक्त्वान्यत्रप्रवृत्तःशब्दवेधीप्राणिविशेषः कुंडाशीभगभक्षोदेवब्राह्मस्वहरःपांडुरोगी न्यासापहारी
चकाणः स्त्रीपण्योपजीवीषंढः कौमारदारत्यागीदुर्भगः मृष्टैकाशीवातगुल्मी अभक्ष्यभक्षकोगंडमाली ब्राह्मणीगामीनिर्बीजी क्रूरक्र

प्रदर्शनार्थमेतत्तुमयोक्तंस्तेयकर्मणि द्रव्यप्रकाराहियथातथैवप्राणिजातयः २१६

र्मावामनः वस्त्रापहारीपतंगः शय्यापहारीक्षपणकः शंखशुक्त्यपहारीकपाली दीपापहारीकौशिकः मित्रध्रुक्क्षयी मातापित्रोराक्रोशःखं
डकारइति गौतमोपिकंचिद्विशेषमाह अनृतवागुल्वलःमुहुर्मुहुःसंलग्नवाक् जलोदरोदारत्यागी कूटसाक्षीश्लीपदी उच्छिन्नजंघाच
रणः विवाहविघ्नकर्त्ताच्छिन्नोष्ठः अवगूरणीच्छिन्नहस्तः मातृघ्नोंधः स्नुषागामीवातवृषणः चतुःपथेविण्मूत्रविसर्जनेमूत्रकृच्छ्री क ५८
न्यादूषकःषंढः ईर्ष्यालुर्मशकः पित्रोर्विवदमानोपस्मारी न्यासापहारीअनपत्यः रत्नापहारीअत्यंतदरिद्रः विद्याविक्रयीपुरुषमृगः वेदवि

क्रयीद्वीपी बहुयाजकोजलप्लवः अयाज्ययाजकोवराहः अनिमंत्रितभोजीवायसः मृष्टैकभोजीवानरः यतस्ततोभक्षीमार्जारः कक्षवनदहना
त्खद्योतः दारकाचार्योमुखविगंधिः पर्युषितभोजीकृमिः अदत्तादायीबलीवर्दः मत्सरीभ्रमरः अग्न्युत्सादीमंडलकुष्ठी शूद्राचार्यःश्वपा-
कः गोहर्त्तासर्पः स्नेहापहारीक्षयी अन्नापहारीअजीर्णी ज्ञानापहारीमूकः चंडालीपुल्कसीगमनेअजगरः प्रव्रजितागमनेमरुपिशाचः
शूद्रीगमनेदीर्घकीटः सवर्णाभिगामीदरिद्रः जलहारीमत्स्यः क्षीरहारीबलाकः वार्धुषिकोंगहीनः अविक्रेयविक्रयीगृध्रः राजमहिषीगा
मीनपुंसकः राजाक्रोशकोगर्दभः गोगामीमंडूकः अनाध्यायाध्ययनेसृगालः परद्रव्यापहारीपरप्रेष्यः मत्स्यवधेगर्भवासी इत्येतेनूर्ध्व
गमनाइति स्त्रियोप्येतेषुनिमित्तेषुपूर्वोक्तास्वस्वजातिषुस्त्रीत्वमनुभवंति यथाहमनुः स्त्रियोप्येतेनकल्पेनहृत्वादोषमवाप्नुयुः एतेषामे
वजंतूनांभार्यात्वमुपयांतिताइति एतच्चक्षत्रियत्वादिलक्षणकथनंप्रायश्चित्तोन्मुखीभूतब्रह्महाद्युद्वेगजननार्थं नपुनःक्षयित्वादिलक्ष
णयुक्तानांद्वादशवार्षिकादिव्रतप्राप्त्यर्थंसंसर्गनिवृत्त्यर्थंच तथाहि पापक्षयार्थंप्रायश्चित्तम् नचप्रारब्धफलपापापूर्वविनाशेकिंचन
प्रयोजनमस्ति नहिकार्मुकनिर्मुक्तोबाणोलक्ष्यवेधेवेद्धुस्तद्व्यापारस्यवासत्तांपुनरपेक्षते नचतदारब्धफलनाशार्थोपूर्वनाशोन्वेषणी
यः नहिनिमित्तकारणीभूतचक्रचीवरादिविनाशेनतदारब्धंकरकादिविनाशः नचनैसर्गिकंकौनख्यादिकंप्रत्याख्यातुंशक्यते किंच नरकतिर्य
ग्योन्यादिजन्यदुःखपरंपरामनुभूयतस्यहिकौनख्यादिकोविकारश्चरमंफलम् तेनचोत्पन्नमात्रेणस्वकारणापूर्वनाशोजन्यते मंथनजनिताशुशु
शुक्षणिनेवारणिक्षयस्तस्मान्नपापविनाशार्थंव्रतपरिचर्या नापिसंव्यवहारार्थं नहिशिष्टाःकुनख्यादिभिःसहसंबंधंपरिहरंति प्राचीननया

त्वापनाशेनसंव्यवहारार्थत्वस्यापिसिद्धेर्नार्थोव्रतचर्यया यत्तुवसिष्ठेनोक्तं कुनखीश्यावदंतश्चकृच्छ्रं द्वादशरात्रंचरेदिति तत्साम्वत्यादिवन्नैमित्ति
कमात्रंनपुनःपापक्षयार्थंसंव्यवहार्यसिध्यर्थंचेतिमंतव्यम् २१६ किंच यथाकर्मस्वकृतदुष्कृतानतिक्रमेणनदत्तुरूपंनरकादिफलंतिर्यक्त्वं
चप्राप्यकालक्रमेणक्षीणेकर्मणिदुष्टलक्षणादरिद्राश्चपुरुषेषुनिकृष्टाजायंते २१७ किंच ततोदुर्लक्षणमनुष्यजन्मानंतरंनिष्कल्मषीभू-
तानरकाद्युपभोगद्वारेणक्षीणपापाःप्राग्भवीयसुकृतशेषेणमहाकुलेभोगसंपन्नाःविद्याधनधान्यसंपन्नाजायंते २१८ एवंप्रायश्चित्तेषुप्ररो-

यथाकर्मफलंप्राप्यःतिर्यक्त्वंकालपर्ययात् जायंतेलक्षणभ्रष्टादरिद्राःपुरुषाधमाः २१७ ततोनिष्कल्मषीभूताःकुले
महतिभोगिनः जायंतेविद्ययोपेताधनधान्यसमन्विताः २१८ विहितस्याननुष्ठानान्निंदितस्यचसेवनात् अनिग्रहा
च्चेंद्रियाणांनरःपतनमृच्छति २१९ तस्मात्तेनेहकर्त्तव्यंप्रायश्चित्तविशुद्धये एवमस्यांतरात्माचलोकश्चैवप्रसीदति २२०

चनार्थंकर्मविपाकमभिधायाधुनातथैवाधिकारिणंनिरूपयितुमाह विहितमितियदावश्यकंसंध्योपासनाग्निहोत्रादिकंनित्यं अशुचिस्पर्शादौनै
मित्तिकत्वेनचोदितंस्नानादिकंचतदुभयमुच्यतेतस्याकरणात् निंदितस्यनिषिद्धस्यसुरापानादेःकरणात् इंद्रियाणामनिग्रहाच्चनरःपतनमृ ५९
च्छतिप्राप्नोतिप्रत्यवायीभवतीतियावत् नन्विंद्रियार्थेषुसर्वेषुनप्रसज्येतकामतइतींद्रियप्रसक्तेरपिनिषिद्धत्वान्निंदितग्रहणेनैवगतार्थत्वा-

त्किमर्थमनिग्रहाच्चेंद्रियाणामितिपृथगुपादानम् अत्रोच्यते इंद्रियप्रसक्तिनिषेधस्यैनेकांततःप्रतिषेधस्यनेकरूपतास्नातकव्रतमध्येपाठात्तत्रच
व्रतानीमानिधारयेदितिव्रतशब्दाधिकारान्नञ्श्रवणाच्चेंद्रियप्रसक्तिप्रतिषेधकः संकल्पोविधीयतेसचोभयरूपइतिपृथगुपादानम् ननुवि
हिताकरणात्प्रत्यवैतिकुतोवसितम् नतावदग्निहोत्रादिचोदनापुरुषप्रवर्त्तनात्मिकानुष्ठानस्यप्रत्यवायहेतुतामाक्षिपति विषयानुष्ठानस्य
पुरुषार्थत्वावगतिमात्रपर्यवसायिनीहिसातत्त्वंमात्रेणप्रवृत्त्युपपत्तेर्नपुनरकरणस्यप्रत्यवायहेतुत्वमपिवक्तिक्षीणशक्तित्वादनुपपत्तेः किं
चयद्यप्यनुपपत्त्युपशमेपिप्रवृत्तिसिध्यर्थमर्थांतरंकल्प्यते तर्हिनिषिध्यमानप्रत्यवायपरिहारार्थतयैवतद्वर्जनस्यपुरुषार्थत्वसिद्धावपि
फलांतरंकल्प्येत नचैतत्कस्यचिदपिसंमतम् ननुयथानिषिद्धेष्वर्थवादावगतप्रत्यवायपरिहारार्थतयैवपुरुषार्थत्वम् तथाविहितेष्वर्थ
वादागताकरणजन्यप्रत्यवायपरिहारार्थताकस्मान्नेयात् मैवं नहिसर्वत्राग्निहोत्रादिषुतादृग्विधार्थवादाःसंति नचविहितस्याननुष्ठानान्न
रःपतनमृच्छतीतीयंस्मृतिरेववाक्यशेषस्थानीयेतिचतुरस्रम् नहिवाक्यांतरप्रमितेकार्येवाक्यांतरेणार्थवादःसंभवति भवतुवाक-
थंचिदेकवाक्यतयार्थवादस्तथापिनाभावरूपंविहिताकरणंकार्यंनिरंजनयितुंक्षमते नचुज्वरेचैवातिसारेचलंघनंपरमौषधमित्या-
युर्वेदवचनाद्भोजनाभावरूपंलंघनंज्वरशांतिंजनयतीतियथावगम्यतेतथात्रापिभवतु मैवं यतोनात्रापिलंघनाज्ज्वरशांतिः किंतर्हि
ज्वरनाशप्रतिबंधकभोजनाभावेसतिजठरानलपरिपाकजनिताद्धातुसाम्यादिमंतव्यम् तस्माद्विहितस्याननुष्ठानान्नरःपतनमृच्छती-
तिकथमस्याःस्मृतेर्गतिरितिवाच्यम् उच्यते अग्निहोत्रादिविषयाधिकारासिद्धिरूपप्रत्यवायाभिप्रायेणेतिनदोषः ननुवांताश्युल्कामु

खः प्रेतोविप्रोभवतिविच्युतः अमेध्यकुणपाशीतुक्षत्रियःकटपूतनः मैत्राक्षज्योतिकःप्रेतोवैश्योभवतिपूयभुक् चैलाशकस्तुभवतिशूद्रोध
र्मात्स्वकाच्च्युतइत्येतानिविहिताकरणप्रत्यवायपराणिमनुवचनानिकथंघटंते उच्यते यथावांतमश्नतउल्कयावादह्यमानमुखस्यदुःखंत-
थास्यापिविहितमकुर्वतःपुरुषस्यपुरुषार्थासिद्धेरित्यकरणनिंदनमनुष्ठानप्ररोचनार्थमित्यविरोधः यद्वाप्राग्भवीयनिषिद्धाचरणाक्षिप्तावि
हितानुष्ठानविरोधिरागालस्यादिजन्यवांताश्युल्कामुखप्रेतत्वादिरूपमितिनकश्चिदभावस्यकारणनेतिमंतव्यम् ननुपुंश्चलीवानरखरद
ष्टमिथ्याभिशस्तादौविहिताकरणादिनिमित्तानामन्यतमस्याप्यभावात्कथंप्रत्यवायिता कथंचतदभावेप्रायश्चित्तविधानम् उच्यते अस्मा
देवपापक्षयार्थप्रायश्चित्तविधानाज्जन्मांतराचरितनिषिद्धसेवादिजन्यपापापूर्वमाक्षिप्तंमिथ्याभिशापादिकंतन्निमित्तप्रायश्चित्तापनोद्य
मनोनानुष्ठितमितिकल्प्यते पुरुषप्रयत्ननिरपेक्षणेकार्यरूपपापोत्पत्त्यनुपपत्तेः नचपुंश्चल्यादिगतप्रयत्नेनपुरुषांतरेणपापोत्पत्तिः कर्त्तृ
समवायित्वनियमाद्धर्माधर्मयोस्तस्माद्युक्तैवप्रायश्चित्तेनिमित्तत्रयपरिगणना तथाचमनुः अकुर्वन्विहितंकर्मनिंदितंचसमाचरन्
प्रसक्तश्चेंद्रियार्थेषुप्रायश्चित्तीयतेनरइतिनरग्रहणंप्रतिलोमजातानामपिप्रायश्चित्ताधिकारप्राप्त्यर्थं तेषामप्यहिंसादिसाधारणधर्म-
व्यतिक्रमसंभवात् यस्मादेवंनिषिद्धाचरणादिनाप्रत्यवैति तस्मात्तेनकृतनिषिद्धसेवादिनापुरुषेणप्रायश्चित्तंकर्त्तव्यमिहलोकेपरत्रच-
विशुद्ध्यर्थं प्रायश्चित्तशब्दश्चायंपापक्षयार्थेनैमित्तिकेकर्मविशेषेरूढः एवंप्रायश्चित्तेकृतेअस्यांतरात्माशुद्धतयाप्रसीदति लोकश्चायं ६०
संव्यवहर्त्तुंप्रसीदति एवंचवदतानेनतद्दर्शितम् नैमित्तिकोयंप्रायश्चित्ताधिकारः तत्रचार्थवादगतदुरितक्षयेपिजातेष्टिन्यायेनसाध्यत

यास्वीक्रियते नचदुरितपरिजिहासुनानुष्ठीयतइत्येतावताकामाधिकाराशंकाकार्या यस्माच्चरितव्यमतोनित्यंप्रायश्चित्तंविशुद्धये निंद्यैर्हि
लक्षणैर्युक्ताजायंतेनिष्कृतैर्नराइत्यकरणेदोषश्रवणेनावश्यकत्वावगमात् २१९ २२० प्रायश्चित्ताकरणेदोषमाह पापेषुशास्त्रार्थव्य-
तिक्रमजनितेषुप्रसक्ताःपुरुषाअपश्चात्तापिनोमयादुष्कृतंकृतमित्येवमुद्वेगरहिताःप्रायश्चित्तमकुर्वाणाःदुःसहान्नरकानाप्नुवंति २२१

प्रायश्चित्तमकुर्वाणाःपापेषुनिरतानराः अपश्चात्तापिनःकष्टान्नरकान्यांतिदारुणान् २२१ तामिस्रंलोहशंकुंचम
हानिरयशाल्मली रौरवंकुड्मलंपूतिमृत्तिककालसूत्रकम् २२२ संघातंलोहितोदंचसविषंसप्रपातनम् महानरक
काकोलंसंजीवनमहापथम् २२३ अवीचिमंधतामिस्रंकुंभीपाकंतथैवच असिपत्रवनंचैवतापनंचैकविंशकम् २२४
महापातकजैर्घोरैरुपपातकजैस्तथा अन्वितायांत्यचरितप्रायश्चित्तानराधमाः २२५

नरकस्वरूपंविवृण्वन्नाह तामिस्रप्रभृतींस्तापनपर्यंतानेकविंशतिनरकानन्वर्थसंज्ञान्द्योतितावांतरभेदान्महापातकोपपातकजनितभयंक
रदुरितैरन्विताअनाचरितप्रायश्चित्ताःपुरुषाधमाःप्राप्नुवंति उपात्तदुरितनाशार्थंप्रायश्चित्तमित्युक्तम् २२२ २२३ २२४ २२५ ७

तत्रविशेषमाह प्रायश्चित्तैर्वक्ष्यमाणैरज्ञानाद्यदेनःपापंकृतंतदपैतिगच्छति नकामतःकृतम् किंतुतत्रप्रायश्चित्तविधायकवचनबलादिह-
लोकेव्यवहार्योजायते अत्रचप्रायश्चित्तैरपैत्येनोयदज्ञानकृतमित्युपक्रमात्तत्प्रतियोगितयाज्ञानतइतिवक्तव्येयत्कामतइत्युक्तंतत्ज्ञान
कामयोस्तुल्यत्वप्रदर्शनार्थम् तथाहि विहितंयदकामानांकामात्तद्द्विगुणंभवेत् तथाअबुद्धिपूर्वक्रियायामर्धंप्रायश्चित्तम् तथाम्लेच्छे
नाधिगताशूद्रात्त्वज्ञानात्तुकथंचन कृच्छ्रत्रयंप्रकुर्वीतज्ञानात्तुद्विगुणंभवेदित्यादिभिर्वचनैर्ज्ञानकामयोस्तुल्यप्रायश्चित्तदर्शनात्तुल्यफ-
लतैव किंच स्वतंत्रप्रवृत्तिविषयज्ञानकामनाभ्यांनियता तयोरन्यतरापायेपितस्याअसंभवादतःकामतइत्युक्तेज्ञानाज्ञानतइत्युक्तेका

प्रायश्चित्तैरपैत्येनोयदज्ञानकृतंभवेत् कामतोव्यवहार्यस्तुवचनादिहजायते २२६

मःप्राप्नोत्यविनाभावात् नचचौरादिभिर्बलात्प्रवर्तमानस्यसत्यपिविषयज्ञानेकामनाभावान्नविनाभावइतिवाच्यम् यतोत्रविद्यमानस्या
पिज्ञानस्यप्रवृत्तिहेतुत्वाभावेनसत्त्वमन्वम् यत्तु शुष्केपिपतितोभ्रांत्याकर्दमपतनंतत्रापिवास्तव ज्ञानाभावात्तद्विषयकामनायाश्चाभाव
एव एवमज्ञानकामनयोरप्यव्यभिचारएव ननुप्रायश्चित्तैरपैत्येनइतिनयुक्तम् फलविनाश्यत्वात्कर्मणाम् मैवम् यथापापोत्पत्तिःशास्त्र ६१
गम्यात्तथातत्परिक्षयोपीतिनात्रप्रमाणांतरंक्रमते अतएवगौतमेन पूर्वोत्तरपक्षभंग्याअयमर्थोदर्शितः तत्रप्रायश्चित्तंकुर्यान्नकुर्यादिति

मीमांसते नकुर्यादित्येके नहिकर्मक्षीयतेइति कुर्यादित्यपरे पुनःस्तोमेनेष्ट्वापुनःसवनमायांतीतिविज्ञायते व्रात्यःस्तोमेनेष्ट्वाब्रह्मचर्यंचरे
दुपनयनतइतिसर्वपाप्मानंतरतिभ्रूणहत्यायोश्वमेधेनयजतइतिपुनःसवनमायांतीतिसवनसंपाद्यज्योतिष्टोमादिद्विजातिकर्मणियोग्यो
भवतीत्यर्थः नचेदमर्थवादमात्रमधिकारविशेषणाकांक्षायांरात्रिसत्रन्यायेनार्थवादिकफलस्यैवकल्पनायान्याय्यत्वादतोयुक्तंप्रायश्चि
त्तैरपैत्येनइति ननुकामकृतेप्रायश्चित्ताभावात्कथंव्यवहार्यत्वंतदभावश्चानभिसंधिकृतेपराधेप्रायश्चित्तमितिवसिष्ठवचनादियंविशु
द्धिरुदिताप्रमाप्यकामतोद्विजं कामतोब्राह्मणवधेनिष्कृतिर्नविधीयतेइतिमनुवचनाच्चावगम्यते नैतत् यःकामतोमहापापंनरःकुर्यात्क
थंचन नतस्यनिष्कृतिर्दृष्टाभृग्वग्निपतनादृतेइति तथा विहितंयदकामानांकामात्तद्द्विगुणंभवेदितिचकामकृतेपिप्रायश्चित्तदर्श-
नात् यत्तुवसिष्ठवचनम् तस्याप्यकामंकृतेपराधेप्रायश्चित्तंशुद्धिकरमित्यभिप्रायोनपुनःकामकृतेपिप्रायश्चित्ताभावइति यत्तुम-
नुवचनमियम् विशुद्धिरुदितेत्यादितदपीयमितिसर्वनामपरामृष्टद्वादशवार्षिकव्रतचर्यायाएवकामतोब्राह्मणवधेनिष्कृतिर्नविधीयतेइ
ति अनेनप्रतिषेधोनपुनःप्रायश्चित्तमात्रस्य मरणांतिकादेःप्रायश्चित्तस्यदर्शितत्वात् ननुयदिकामकृतेपिप्रायश्चित्तमस्तितर्हिपापक्ष
योपिकस्मान्नस्यादविशेषाद्यदिपापक्षयोपिनास्तितर्हिव्यवहार्यतापिकथंभवति उच्यते उभयप्रायश्चित्ताविशेषेपिफलविशेषःशास्त्र
तोवगम्यते अज्ञानकृतेतुसर्वत्रपापक्षयः यत्रतुब्रह्महासुरापोगुरुतल्पगोमातृपितृयोनिसंबंधागस्तेननास्तिकनिंदितकर्माभ्यासीपति-
तात्याग्यपतितत्यागिनःपतिताःपातकसंयोजकाश्चेतिगौतमोक्तमहापातकादौव्यवहार्यत्वंनिषिद्धम् तस्मिन्पतनीयेकर्मणिकामतः

 

कृतेव्यवहार्यत्वमात्रंनपापक्षयइति नचपापक्षयाभावेव्यवहार्यत्वमनुपपन्नम् द्वेहिपापस्यशक्तीनरकोत्पादिकाव्यवहारनिरोधिकाचेति
तत्रेतरशक्त्यविनाशेपिव्यवहारनिरोधिकायाःशक्तेर्विनाशोनानुपपन्नस्तस्मात्पापानपगमेपिव्यवहार्यत्वंनानुपपन्नम् यत्तुमनुवचनम्
अकामतःकृतेपापेप्रायश्चित्तंविदुर्बुधाः कामकारकृतेप्याहुरेकेश्रुतिनिदर्शनादितितदपिकामकृतेपिप्रायश्चित्तशास्त्रस्यर्थनपुनःपापक्षय
प्रतिपादनपरम् अपतनीयेपुनःकामकृतेपिप्रायश्चित्तेनपापक्षयोभवत्येव अकामतःकृतंपापंवेदाभ्यासेनशुध्यति कामतस्तुकृतं
मोहात्प्रायश्चित्तैःपृथग्विधैरितिमनुस्मरणात् पतनीयेपिकर्मणिकामकृतेमरणांतिकप्रायश्चित्तेषुकल्मषक्षयोभवत्येवफलांतराभा-

ब्रह्महामद्यपस्तेनस्तथैवगुरुतल्पगः एतेमहापातकिनोयश्चतैःसहसंवसेत् २२७

वात् नान्यस्मिन्लोकेप्रत्यापत्तिर्विद्यतेकल्मषंतुनिर्हण्यतइतिआपस्तंबस्मरणात् २२६ निषिद्धाचरणादेकेप्रायश्चित्तेनिमित्तमित्यु-
क्तंतत्प्रपंचयितुमाह हंतिरयंप्राणवियोगकरणव्यापारेरूढः यद्व्यापारसमनंतरंकालांतरेवाकारणांतरनिरपेक्षःप्राणवियोगोभवतिस
ब्राह्मणंहतवानितिब्रह्महा मद्यपोनिषिद्धसुरायाःपायी स्तेनोब्राह्मणस्यसुवर्णहर्त्ता ब्राह्मणसुवर्णापहरणंमहापातकमित्यापस्तंबस्म
रणात् गुरुतल्पगोगुरुभार्यागामी तल्पशब्देनशयनवाचिनासाहचर्याद्भार्यालक्ष्यते एतेब्रह्महादयोमहापातकिनः पातयंतीतिपातका



निब्रह्महत्यादीनि महच्छब्देनतेषांगुरुत्वंख्याप्यते तद्योगिनोमहापातकिनइतिलाघवार्थंसंज्ञाकरणम् यश्चतैर्ब्रह्महादिभिःप्रत्येकंसह-
संवसति एभिस्तुसंवसेद्योवैवत्सरंसोपितत्समइति वक्ष्यमाणन्यायेनसोपिमहापातकी तथाशब्दःप्रकारवचनः अनुग्राहकप्रयोजका
दिकर्तृसंग्रहार्थः अनुग्राहकश्चयःपलायमानममित्रंउपरुंधन्परेभ्यश्चहंतारंपरिरक्ष्यहंतुर्द्रढिमानमुपजनयन्नुपकरोतिसउच्यते अतए
वमनुनाग्राहकस्यहिंसाफलसंबंधोदर्शितः बहूनामेककार्याणांसर्वेषांशस्त्रधारिणाम् यद्येकोघातयेत्तत्रसर्वेतेघातकाःस्मृताइति तथा
प्रयोजकादीनामप्यापस्तंबेनफलसंबंधउक्तः प्रयोजितानुमंताकर्त्ताचेतिस्वर्गनरकफलेषुकर्मसुभागिनोयोभूयआरभतेतस्मिन्फलविशे
षइति तत्राप्रवृत्तस्यप्रवर्त्तकःप्रयोजकः सचत्रिःप्रकारः आज्ञापयिताभ्यर्थयमानउपदेष्टेति तत्राज्ञापयितानामस्वयमुच्चःसन्नीचंभृत्या
दिकंयःप्रेषयतिमदीयममित्रंजहीतिसउच्यते अभ्यर्थयमानस्तुयःस्वयमसमर्थःसन्प्रार्थनादिनामच्छत्रुंव्यापादयेत्युच्चंप्रवर्त्तयतिसो
भिधीयते अनयोश्चस्वार्थसिध्यर्थमेवप्रयोक्तृत्वम् उपदेष्टापुनस्त्वंशत्रुमित्थंव्यापादयेति मर्मोद्घाटनाद्युपदेशपुरःसरंप्रेरयन्कथ्यते त-
त्रचप्रयोज्यगतमेवफलमितितेषांभेदः अनुमंतातुप्रवृत्तस्यप्रवर्त्तकः सचद्विप्रकारः कश्चित्स्वार्थसिध्यर्थमनुजानातिकश्चित्परार्थमि
ति नन्वनुमननस्यकथंहिंसाहेतुत्वम् नतावत्प्राणवियोगोत्पादनेनतस्यसाक्षात्कर्तृव्यापारजन्यत्वान्नापिप्रयोजकस्येवसाक्षात्कर्तृप्रवृत्युत्पा
दनद्वारेणप्रवृत्तस्यप्रवर्त्तकत्वात् नचसाधुत्वयाध्यवसितमितिप्रवृत्तमेवानुमन्यतइतिशंकनीयम् तादृशमननस्यहिंसाप्रत्यहेतुत्वाद्व्यर्थत्वा
च्च उच्यते यत्रहिराजादिपारतंत्र्यात्स्वयंमनसाप्रवृत्तोपिप्रवृत्तिविच्छेदभयादागामिदंडभयाद्वाशिथिलप्रयत्नोराजाद्यनुमतिमपेक्षते

नत्वानुमतिर्हेतुः प्रवृत्तिमुपोद्बलयतीति हिंसाफलं प्रति हेतुत्वं प्रतिपद्यते तथान्योपि भर्त्सनताडनधनापहारादिना परान्कोपयति सोपि मरणहे-
तुभूतमन्यूत्पादनद्वारेण हिंसाहेतुर्भवत्यत एव विष्णुनोक्तं आक्रुष्टस्ताडितो वापि धनैर्वा विप्रयोजितः यमुद्दिश्य त्यजेत्प्राणांस्तमाहुर्ब्रह्मघात-
कमिति तथा ज्ञातिमित्रकलत्रार्थं सुहृत्क्षेत्रार्थमेव च यमुद्दिश्य त्यजेत्प्राणांस्तमाहुर्ब्रह्मघातकमिति नच कृतेष्वाक्रोशनादिषु कस्यचि-
न्मन्यूत्पत्त्यदर्शनादकारणतेति शंकनीयम् पुरुषस्वभाववैचित्र्यात् अल्पतरेणापि निमित्तेन जातमन्यवो भवंति तेष्वव्यभिचार इति नाकार-
णता एतेषां चानुग्राहकप्रयोजकादीनां प्रत्यासत्तिव्यवधानापेक्षया पारंगतगुरुलाघवापेक्षया च फलगुरुलाघवात् प्रायश्चित्तगुरुलाघवं
बोद्धव्यम् योभूय आरभते तस्मिन् फलविशेष इति वचनात् तथाल्पमनुग्राहकस्य तावत्स्वयमेव हिंसायां प्रवृत्तेन स्वतंत्रकर्तृकत्वे सत्यपि सा-
क्षात्प्राणवियोगफलकखड्गप्रहारादिव्यापारयोगित्वाभावेन साक्षात्कर्तृवद्भूयो हिंसारंभकत्वाभावादल्पफलत्वमल्पप्रायश्चित्तं च प्रयोज-
कस्य तु स्वतंत्रकर्तृप्रवृत्तिजनकत्वेन व्यवहितत्वात्ततोल्पफलत्वम् प्रयोजकानामध्ये परार्थप्रवृत्तत्वेनोपदेष्टुरल्पफलत्वम् ननु प्रयोजक-
हस्तस्थानीयत्वात्प्रयोजकस्य न फलसंबंधो युक्तः यदि परप्रयुक्त्या प्रवर्तमानस्यापि फलसंबंधः तर्हि स्थपतितडागखनितृप्रभृतीनामपि मू-
ल्येन प्रवर्त्तमानानां स्वर्गादिफलप्रसंगः उच्यते शास्त्रफलं प्रयोक्तरीति न्यायेनाधिकारिकर्तृगतफलजननादेव कूपतडागदेवनिर्माणादयः
नच स्थपतितडागकर्त्रादयो देवकूपतडागकरणादिष्वधिकारिणो स्वर्गकामित्वात् अत्र पुनः परप्रयुक्त्या प्रवर्त्तमानानामप्यहिंसायामधिका- ६३
रित्वाद्भवत्येव तद्व्यतिक्रमनिबंधनो दोषः अनुमन्तुस्तु प्रयोजकादल्पत्वं प्रयोजकव्यापाराद्बहिरंगत्वाल्लघुत्वाच्चानुमननस्य निमित्तकर्तुः पु-

नराक्रोशकादेः प्रवृत्तिहेतुभूतमन्युजनकत्वेन व्यवहितत्वान्मारणानुसंधानं विना प्रवृत्तत्वाच्चानुमंतुः सकाशादप्यल्पफलत्वम् ननु यदि व्यव-
हितस्यापि कारणत्वं तर्हि मातापित्रोरपि हंतृपुरुषोत्पादनद्वारेण हननकर्तृत्वप्रसंगः उच्यते नहि पूर्वभावित्वमात्रेण कारणत्वम् कारणकार-
णतयापि तथाभावित्वोपपत्तेः यत्खलु स्वरूपातिरिक्तकार्योत्पत्त्यनुगुणव्यापारयोगि भवति तद्धि कारणम् यदि रथंतरसामयस्य मंत्रप-
ठनात्सोमरसप्रवृत्तितदेषस्यैव प्रथमाहुतित्वं सोमः स्यादैंद्रवायवाग्रहान्गृह्णीयादिति रथंतरसामतेव कृतौरैंद्रवायवाग्रतायां न हि तत्र सो-
मयागः स्वरूपेण कारणं व्यभिचारान्नच पित्रोस्तादृग्विधकारणलक्षणयोगित्वमिति नातिप्रसंगः अनेनैव न्यायेन धर्माभिसंधिना निर्मि-
तकूपवाप्यादौ प्रमादपतितब्राह्मणादिमरणे खानयितुर्दोषाभावः नहि कूपोनेन खानितः अतोहमात्मानं व्यापादयामीत्येवं कूपखनननि-
मित्तव्यापादनम् अतः कूपकर्तुरपि कारणकारणत्वमेव न पुनर्हिंसाहेतुत्वमिति मातापितृतुल्यतैव यथा क्वचित्सत्यपि हिंसानिमित्तयो-
गित्वे परोपकारार्थप्रवृत्तौ वचनाद्दोषाभावः यथाह संवर्तः बंधने गोश्चिकित्सार्थे गूढगर्भविमोचने यत्ने कृते विपत्तिश्चेत्प्रायश्चित्तं न विद्यते
औषधं स्नेहमाहारं ददद्गोब्राह्मणादिषु दीयमाने विपत्तिः स्यान्न स पापेन लिप्यते दाहच्छेदशिराभेदप्रयत्नैरुपकुर्वताम् प्राणसंत्राणसि-
द्ध्यर्थं प्रायश्चित्तं न विद्यत इति एतच्चादाननिदाननिपुणाभिषग्विषयम् इतरस्य तु भिषङ्मिथ्याचरन्दाप्य इत्यत्र दोषो दर्शितः यत्तु मन्युनिमि-
त्ताक्रोशनादिकमकुर्वतोपि नाम गृहीत्वोन्मादादिनात्मानं व्यापादयति तत्रापि न दोषः अकारणं तु यः कश्चिद्द्विजः प्राणान्परित्यजेत् तस्यैव तत्र
दोषः स्यान्न तु यं परिकीर्तयेदिति स्मरणात् यथा यत्राप्याक्रोशकादिजनितमन्युनात्मानं खड्गादिना प्रहृत्य मरणादर्वागाक्रोशनादिकर्त्रा धन-

दानादिनासंतोषितोयदिजनसमक्षमुच्चैःश्रावयतिनात्राक्रोशकस्यापराधइतितत्रापिवचनान्नदोषः यथाहविष्णुः उद्दिश्यकुपितोहत्वातो-
षितःश्रावयेत्पुनः तस्मिन्मृतेनदोषोस्तिद्वयोरुच्छ्रावणेकृतेइति एतेषांचप्रयोजकादीनांदोषगुरुलघुभावपर्यालोचनयाप्रायश्चित्तविशे-
षंवक्ष्यामः २२७ ब्रह्महत्यासमान्याह गुरूणामाधिक्येनाधिक्षेपःअनृताभिशंसनम् गुरोरनृताभिशंसनमितिमहापातकसमानीतिगौ

गुरूणामध्यधिक्षेपोवेदनिंदासुहृद्वधः ब्रह्महत्यासमंज्ञेयमधीतस्यचनाशनम् २२८

तमस्मरणात् एतच्चलोकाविदितदोषाभिशंसनविषयम् दोषंबुध्वानपूर्वंपरेषांसमाख्याता स्यात्संव्यवहारेच्चैनंपरिहरेदित्यापस्तंबस्म
रणात् नास्तिक्याभिनिवेशेनवेदकुत्सनम् सुहृन्मित्रंतस्याब्राह्मणस्यापिवधः अधीतस्यवेदस्यसच्छास्त्रविनोदेनालस्यादिनावा
नाशनंविस्मरणम् एतानिप्रत्येकंब्रह्महत्यासमानि यत्पुनःस्वाध्यायाग्निसुतत्यागइति अधीतत्यागस्योपपातकमध्येपरिगणनंत
त्कथंचित्कुटुंबभरणाकुलतयासच्छास्त्रश्रवणाव्यग्रतयावाविस्मरणेद्रष्टव्यम् २२८ ७ ७ ७ ७



सुरापानसमान्याह निषिद्धंलशुनादिकंतस्यमतिपूर्वंभक्षणम् अतएवमनुः छत्राकंविड्वराहंचलशुनंग्रामकुक्कुटम् पलांडुंगृंजनंचैवमत्या-
जग्ध्वापतेन्नरइति अमतिपूर्वंतुप्रायश्चित्तांतरम् अमत्यैतानिषड्जग्ध्वाकृच्छ्रंसांतपनंचरेत् यतिचांद्रायणंवापिशेषेषूपवसेदहरितितेनैवो
क्तत्वात् जैह्म्यंकौटिल्यं अन्याभिसंधानेनान्यवादित्वमन्यकर्तृत्वंच अत्रचजैह्म्यमितियद्यपिसामान्येनोक्तंतथापिप्रायश्चित्तस्यगुरुत्वान्निमि
त्तस्यापिगुरुविषयम् जैह्म्यमितिगौरवमवगम्यते अस्तिचनैमित्तिकपर्यालोचनयानिमित्तस्यविशेषावगतिः यथायस्योभावग्नीअनुगतौ

निषिद्धभक्षणंजैह्म्यमुत्कर्षेचवचोनृतम् रजस्वलामुखास्वादःसुरापानसमानितु २२९
अश्वरत्नमनुष्यस्त्रीभूधेनुहरणंतथा निक्षेपस्यचसर्वंहिसुवर्णस्तेयसंमितम् २३०

स्यातामभिनिम्लोचेद्वापुनराधेयंतत्रप्रायश्चित्तिरित्यत्रोभावित्यस्यनिमित्तविशेषणत्वेनहविरुभयत्ववदविवक्षितत्वेप्यग्निद्वयनिष्पादकपु
नराधेयरूपेनैमित्तिकविधिबलादग्निद्वयानुगतिरेवनिमित्तमितिकल्प्यते तथात्रापीतियुक्तंनिमित्तगौरवकल्पनम् तथासमुत्कर्षनिमित्तंरा
जकुलादावचतुर्वेदएवचतुर्वेदोहमित्यनृतभाषणं रजस्वलायामकामवशेनवक्त्रासवसेवनमेतानिसुरापानसमानि २२९ सुवर्णस्तेयसमा-
न्याह अश्वादीनांब्राह्मणसंबंधिनांनिक्षेपस्यचसुवर्णव्यतिरिक्तस्यापहरणमेतत्सर्वंसुवर्णस्तेयसमंवेदितव्यम् २३० ७ ७

गुरुतल्पसमान्याह सखामित्रंतस्यभार्या कुमार्युत्तमजातीयाकन्यका तासुसकामास्वनुलोमासुनदोषस्तत्त्वन्यथाधर्मः दूषणेतुकरच्छेदउ
त्तमायांवधस्तथेतितत्रैवदंडविशेषप्रतिपादनात् प्रायश्चित्तगुरुत्वंयुक्तं स्वयोनिर्भगिनी अंत्यजाचांडाली सगोत्रासमानगोत्रा सुतस्त्रीस्नु
षा एतासांगमनंप्रत्येकंगुरुतल्पसमम् एतच्चरेतःसेकादूर्ध्वंवेदितव्यम् अर्वाङ्निवृत्तौतुनगुरुतल्पेनसमत्वम् किंत्वल्पमेवप्रायश्चित्तम्
रेतःसेकःस्वयोनिषुकुमारीष्वंत्यजासुच सख्युःपुत्रस्यचस्त्रीषुगुरुतल्पसमंविदुरित्यादिमानवेरेतःसेकइतिविशेषणोपादानात् सगोत्रा

सखिभार्याकुमारीषुस्वयोनिष्वंत्यजासुच सगोत्रासुसुतस्त्रीषुगुरुतल्पसमंस्मृतं २३१

ग्रहणेनैवसिद्धेपुनःसुतस्त्रीग्रहणंप्रायश्चित्तगौरवप्रतिपादनार्थम् ब्रह्महत्यादिसमत्ववचनंगुर्वधिक्षेपादेस्तन्निमित्तप्रायश्चित्तोपदेशार्थ
म् ननुवेदनिंदादोदोषस्यलघुत्वाद्गुरुतरंब्रह्महत्यादिप्रायश्चित्तंनयुज्यते नैवम् गुरुप्रायश्चित्तोपदेशबलादेवदोषगुरुत्वमवगम्यते नच
ब्रह्महत्यादिप्रायश्चित्तातिदेशार्थमेवेदंवचनंभवति किंतुदोषगौरवमात्रप्रतिपादनपरमित्याशंकनीयम् यतस्तावन्मात्रप्रतिपादनपरत्वे ६५
ब्रह्महत्यासममिदंगुरुतल्पसममित्यादिभेदेनसमत्वाभिधानंनोपपद्यते नचप्रायश्चित्तंसमशब्देनोपदिश्यमानंब्रह्महत्यादिप्रायश्चित्तेभ्यः

किंचिन्न्यूनमेवोपदिश्यते लोकराजसमोमंत्रीत्यादिवाक्येषुसमशब्दस्यकिंचिद्धीनेप्रयोगदर्शनात् महतःपातकस्येतरस्यचतुल्यत्वस्यायुक्त
त्वात् एवंचसतियाज्ञवल्क्येनब्रह्महत्यासमत्वेनोक्तानामपिब्रह्मजिह्मवेदनिंदासुहृद्वधानांमनुनायत्सुरापानसाम्यम् ब्रह्मोज्झतावेदनिं-
दाकौटसाक्ष्यंसुहृद्वधः गर्हितान्नाद्ययोर्जग्धिःसुरापानसमानिषडित्युक्तंतत्प्रायश्चित्तविकल्पार्थं एवमन्येष्वपिवचनेषुविरोधःपरिहर्त्तव्यः
यत्तुवसिष्ठेन गुरोरलीकनिर्बंधेकृच्छ्रंद्वादशरात्रंचरित्वासचैलस्नातोगुरुप्रसादात् पूतोभवतीतिलघुप्रायश्चित्तमित्युक्तम् तदमतिपूर्वेस
कृदनुष्ठानेवेदितव्यम् २३१ गुरुतल्पातिदेशमाह पितृष्वस्रादयःप्रसिद्धास्ताःगच्छन्गुरुतल्पगस्तस्यलिंगंछित्वाराज्ञावधःकर्त्तव्योदंडा

पितुःस्वसारंमातुश्चमातुलानींस्नुषामपि मातुःसपत्नींभगिनीमाचार्यतनयांतथा २३२
आचार्यपत्नींस्वसुतांगच्छंस्तुगुरुतल्पगः लिंगंछित्वावधस्तत्रसकामायाःस्त्रियाअपि २३३

र्थः प्रायश्चित्तंतदेव चशब्दाद्राज्ञीप्रव्रजितादीनांग्रहणम् यथाहनारदः मातापितृष्वसाश्वश्रूमातुलानीपितृष्वसा पितृव्यसखिशिष्य-
स्त्रीभगिनीतत्सखीस्नुषा दुहिताचार्यभार्याचसगोत्राशरणागता राज्ञीप्रव्रजिताधात्रीसाध्वीवर्णोत्तमाचया आसामन्यतमांगच्छन्
गुरुतल्पगउच्यते शिश्नस्योत्कर्त्तनात्तत्रनान्योदंडोविधीयतेइति राज्ञीराज्यस्यकर्त्तुर्भार्यानक्षत्रियैव तद्गमनेप्रायश्चित्तांतरोपदेशात्

धात्रीमातृव्यतिरिक्तास्तन्यदानादिनापोषयित्री साध्वीव्रतचारिणी वर्णोत्तमाब्राह्मणी अत्रचमातृग्रहणंदृष्टांतार्थं अयंचलिंगच्छेदवधात्मको
दंडोब्राह्मणव्यतिरिक्तस्य नजातुब्राह्मणंहन्यात्सर्वपापेष्ववस्थितमितितस्यवधनिषेधात् वधस्यैवप्रायश्चित्तरूपत्वात् अस्यचविषयंगुरु
तल्पप्रायश्चित्तप्रकरणेप्रपंचयिष्यामः अत्रस्नुषाभगिन्योः पूर्वश्लोकेनगुरुतल्पसमीकृतयोःपुनर्ग्रहणंप्रायश्चित्तविकल्पार्थं यदापुनरेताःस्त्रि
यःसकामाःसत्यएतानेवपुरुषान्वशीकृत्योपभुंजंतेनदातासामपिपुरुषवद्वधएवदंडःप्रायश्चित्तंच एतानिगुर्वधिक्षेपादितनयागमनपर्यंता
निमहापातकातिदेशविषयाणिसद्यःपतनहेतुत्वात्पातकान्युच्यंते यथाहयमः मातृष्वसामातृसखीदुहिताचपितृष्वसा मातुलानीस्व

**गोवधोव्रात्यतास्तेयमृणानांचानपाक्रिया अनाहिताग्निताण्यविक्रयःपरिवेदनम् २३४**

साश्वश्रूर्गत्वासद्यःपतेन्नरइति गौतमेनपुनरन्येषामपिपातकत्वमुक्तम् मातृपितृयोनिसंबंधागस्तेननास्तिकनिंदितकर्माभ्यासिपतितात्या
गिनःपतिताःपातकसंयोजकाश्चेतितेषांचमहापातकोपपातकस्यमध्येपाठान्महापातकान्न्यूनत्वमुपपातकाच्चगुरुत्वमवगम्यते तदुक्तं मह
पातकतुल्यानिपापान्युक्तानियानितु तानिपातकसंज्ञानितन्न्यूनमुपपातकमिति तथाचांगिराः पातकेषुसहस्रस्यान्महत्सुद्विगुणंतथा उ
पपापेतुरीयंस्यान्नरकंवर्षसंख्यया २३२ २३३ एवंमहापातकानिसत्समानिचपातकानिपरिगणय्योपपातकानिपरिगणयितुमाह गोवधोगो

पिंडव्यापादनम् कालेनुपनीतत्वंव्रात्यता ब्राह्मणसुवर्णतत्समव्यतिरिक्तपरद्रव्यापहरणंस्तेयम् गृहीतस्यसुवर्णादेरप्रदानंऋणानामपाकर
णं तथादेवर्षिपितृणांसंबंधिऋणस्यानपाकरणंच सत्यधिकारेनाहिताग्नित्वम् ननुज्योतिष्टोमादिकामश्रुतयःस्वांगभूताग्निनिष्पत्त्यर्थ-
माधानंप्रयुंजतइतिमीमांसकप्रसिद्धिरतश्चयस्याग्निभिःप्रयोजनंतस्यतदुपायभूताधानेप्रवृत्तिर्व्रीह्यर्थिनइववधनार्जनेयस्यपुनरग्नि
भिःप्रयोजनंनास्तितस्याप्रवृत्तिरितिकथमनाहिताग्नितादोषः उच्यते अस्मादेवाधानस्यावश्यकत्ववचनान्नित्यश्रुतयोपिसाधिकारश्चा

**भृतादध्ययनादानंभृतकाध्यापनंतथा पारदार्यंपारिवित्त्यंवार्धुष्यंलवणक्रिया २३५ स्त्री**
**शूद्रविट्क्षत्रवधोनिंदितार्थोपजीवनम् नास्तिक्यंव्रतलोपश्चसुतानांचैवविक्रयः २३६**

विशेषादाधानस्यप्रयोजकाइतिस्मृ
तिकाराणामभिप्रायोलक्ष्यतइत्यदोषः तथाअपण्यस्यलवणादेर्विक्रयः सहोदरस्यज्येष्ठस्यतिष्ठतःकनीयसोभ्रातुर्दाराग्निसंयोगःपरिवेदनं
२३४ पणपूर्वाध्यापकादध्ययनग्रहणंपणपूर्वाध्यापनं परदारसेवनंगुरुतल्पसमव्यतिरेकेण पारिवित्त्यंकनीयसिकृतविवाहेज्येष्ठस्यविवाह-
राहित्यं वार्धुष्यंप्रतिषिद्धवृद्ध्युपजीवनम् लवणस्योत्पादनं २३५ स्त्रियोवधः ब्राह्मण्याअप्यात्रेयीव्यतिरेकेण शूद्रवधःअदीक्षितविट्क्षत्रि
यवधः निंदितार्थोपजीवनमराजस्थापितार्थोपजीवनं नास्तिक्यंनास्तिपरलोकइत्याद्यभिनिवेशः व्रतलोपोब्रह्मचारिणःस्त्रीप्रसंगःसुतानामपत्याना
विक्रयः २३६

धान्यंव्रीह्यादि कुप्यमसारंत्रपुसीसादि पशवोगवादयः तेषामपहरणम् गोवधोब्राह्मणतास्तेयमित्यनेनस्तेयग्रहणेनैवसिद्धे पुनर्धान्यकु
प्यादिस्तेयग्रहणं नित्यार्थमतोधान्यादिव्यतिरिक्तद्रव्यस्तेयेनावश्यमेतदेवप्रायश्चित्तमपितुततोन्यूनमपिभवत्येवमेतेनबांधवत्यागग्रह
णेनैवसिद्धेपुनःपित्रादित्यागग्रहणंव्याख्यातम् अयाज्यानांजातिकर्मदुष्टानांशूद्रव्रात्यादीनांयाजनम् पितृमातृसुतानामपतितानांत्या
गोगृहान्निष्काशनम् तडागारामस्यचोद्यानोपवनादेर्विक्रयः २३७ कन्यायादूषणमंगुल्यादिनायोनिविदारणंनतुभोगः तस्यसखिभार्या

धान्यकुप्यपशुस्तेयमयाज्यानांचयाजनम् पितृमातृसुतत्यागस्तडागारामविक्रयः २३७
कन्यासंदूषणंचैवपरिविंदकयाजनम् कन्याप्रदानंतस्यैवकौटिल्यंव्रतलोपनम् २३८

कुमारीष्वितिगुरुतल्पसमत्वस्योक्तत्वात् परिविंदकयाजनंतस्यचकन्याप्रदानम् कौटिल्यंगुरोरन्यत्र गुरुविषयस्यतुकौटिल्यस्यसुरा-
पानसमत्वमुक्तम् पुनर्व्रतलोपग्रहणमशिष्टप्रतिषिद्धेष्वपिश्रीहरिचरणकमलप्रेक्षणात्प्राकृतांबूलादिकंनभक्षयामीत्येवंरूपेषुप्राप्त्य ६७
र्थंनतुस्नातकव्रतप्राप्त्यर्थम् तत्रस्नातकव्रतलोपेप्रायश्चित्तंचाभोजनमितिमनुनालघुप्रायश्चित्तस्यप्रतिपादितत्वात् २३८ ६७

तथात्मार्थंचपाकलक्षणक्रियारंभः अघंसकेवलंभुंक्तेयःपचत्यात्मकारणादितितस्यैवप्रतिषिद्धत्वात् क्रियामात्रविषयेतुप्रतिषेधक
ल्पनयागौरवंस्यात् मद्यपायाःस्त्रियाःजायायानिषेवणमुपभोगः स्वाध्यायत्यागोव्याख्यातः अग्नीनांश्रौतस्मार्त्तानांत्यागः सुतत्यागः
संस्काराद्यकरणम् बांधवानांपितृव्यमातुलादीनांत्यागःसतिविभवेअपरिरक्षणम् २३९ पाककादिदृष्टप्रयोजनसिद्ध्यर्थमार्द्रद्रुमच्छे
दोनतुआहवनीयपरिरक्षणार्थमपि स्त्रियोहिंसयाऔषधेनचपरिवर्त्तनंस्त्रीहिंसौषधजीवनम् तत्रस्त्रीजीवनंनामभार्यापण्यभावेनप्र

आत्मनोर्थेक्रियारंभोमद्यपस्त्रीनिषेवणम् स्वाध्यायाग्निसुतत्यागोबांधवत्यागएवच २३९ इंधनार्थंद्रुमच्छेदःस्त्री
हिंसौषधजीवनम् हिंस्रयंत्रविधानंचव्यसनान्यात्मविक्रयः २४० शूद्रप्रेष्यंहीनसख्यंहीनयोनिनिषेवणम् तथैवा-
नाश्रमेवासःपरान्नपरिपुष्टता २४१

योज्यतल्लब्धोपजीवनम् स्त्रीधनेनोपजीवनंवा हिंसयाजीवनंप्राणिवधेनजीवनम् औषधजीवनंवशीकर
णादिना हिंस्रयंत्रस्यतिलेक्षुपीडाकरस्यप्रवर्त्तनं व्यसनानिमृगयादीन्यष्टादश आत्मविक्रयोद्रव्यग्रहणेनपरदास्यकरणं २४० शूद्रसेवनं हीने
षुमैत्रीकरणं अनूढसवर्णदारस्यकेवलंहीनवर्णदारोपसेवनं साधारणस्त्रीसंभोगश्च अगृहीताश्रमस्यसत्यधिकारे परपाकरतित्वम् २४१

असच्छास्त्रस्यचार्वाकादिग्रंथस्यावगमः सर्वाकरेषुसुवर्णाद्युत्पत्तिस्थानेषुराजाज्ञयाधिकारित्वम् भार्यायाविक्रयः चशब्दान्मन्त्राद्युक्ताभिचारामतिपूर्वलशुनादिभक्षणादेर्ग्रहणम् एषांगोवधादीनांप्रत्येकमुपपातकसंज्ञावेदितव्या मनुनापुनरन्यान्यपिनिमित्तानि-जातिभ्रंशकरसंकरीकरणापात्रीकरणमलिनीकरणसंज्ञानिपरिगणितानि ब्राह्मणस्यरुजःकृत्वाघ्रातिरघ्रेयमद्ययोः जैह्म्यंपुंसिच मैथुन्यंजातिभ्रंशकरंस्मृतम् खराश्वोष्ट्रमृगेभानामजाविकवधस्तथा संकरीकरणंज्ञेयंमीनाहिमहिषस्यच निंदितेभ्योधनादानंवाणिज्यंशूद्रसेवनम् अपात्रीकरणंज्ञेयमसत्यस्यैवभाषणम् कृमिकीटवयोहत्यामद्यानुगतभोजनम् फलैधकुसुमस्तेयमधैर्यंच

असच्छास्त्राधिगमनमाकरेष्वधिकारिता भार्यायाविक्रयश्चैषामेकैकमुपपातकं २४२

मलावहमिति अनोन्यनिमित्तजातंप्रकीर्णकंकथ्यते बृहद्विष्णुनाचसमस्तानिप्रायश्चित्तनिमित्तान्युत्तरोत्तरंलघीयांसिपृथक्संज्ञाभेदभिन्ना-निदर्शितानि ब्रह्महत्यासुरापानंब्राह्मणसुवर्णापहरणंगुरुदारगमनमितिमहापातकानितत्संयोगश्च मातृगमनंदुहितृगमनंस्नुषागमनमित्य तिपातकानि यागस्थक्षत्रियवधोवैश्यस्यचरजस्वलायाश्चांतर्वत्न्याश्चात्रिगोत्रायाश्चाविज्ञातस्यगर्भस्यशरणागतस्यचघातनंब्रह्महत्यास मानि कौटसाक्ष्यंसुहृद्वधइत्येतौसुरापानसमौ ब्राह्मणस्यभूमिहरणंसुवर्णस्तेयसमम् पितृव्यमातामहमातुलनृपपत्न्यभिगमनंगुरु-

दारगमनसमानम् पितृष्वसृमातृष्वसृगमनंश्रोत्रियर्त्विग्गुरूपाध्यायमित्रपत्न्यभिगमनंचस्वसुःसख्याःसगोत्रायाउत्तमवर्णायारजस्वलायाः शरणागतायाःप्रव्रजितायानिक्षिप्तायाश्चगमनमित्येतान्यनुपातकानि अनृतवचनंसमुत्कर्षेराजगामि च पैशुन्यंगुरोश्चालीकनिर्बंधोवेदनिं-दाअधीतस्यत्यागोग्निपितृमातृसुतदाराणांच अभोज्यानांभक्षणंपरस्वापहरणंपरदारानुगमनमयाज्यानांचयाजनं व्रात्यताभृतकाध्यापनंभृत-काध्ययनादानंसर्वाकरेष्वधिकारोमहायंत्रप्रवर्त्तनंद्रुमगुल्मवल्लीलतौषधीनांहिंसयाजीवनमभिचारमूलकर्मसुचप्रवृत्तिरात्मार्थक्रियारं-भोअनाहिताग्नितादेवर्षिपितृणामृणस्यानपाक्रियाअसच्छास्त्राधिगमनंनास्तिकताकुशीलवतामद्यपस्त्रीनिषेवणमित्युपपातकानि ब्राह्मणस्यरुजःकरणमघ्रेयमद्ययोर्घ्रातिर्जैह्म्यंपशुषुपुंसिचमैथुनाचरणमित्येतानिजातिभ्रंशकराणि ग्राम्यारण्यपशूनांहिंसनंसंक रीकरणं निंदितेभ्योधनादानंवाणिज्यंकुसीदजीवनमसत्यभाषणंशूद्रसेवनमित्यपात्रीकरणानि पक्षिणांजलचराणांचघातनंकृमि कीटघातनंमद्यानुगतभोजनंमलावहानि यदनुक्तंतत्प्रकीर्णकमिति कात्यायनेनतुमहापातकसमानांविष्णुनानुपपातकत्वेनोक्तानांपा तकसंज्ञादर्शिता महापापंचातिपापंतथापातकमेवच प्रासंगिकंचोपपापमित्येषांपंचकोगणइति ननुपातकादीनांकथंपातकत्वंपतनहे तुत्वाभावात् यदितेषामपिपतनहेतुत्वंतर्हिमातृपितृयोनिसंबंधागइत्यादिपरिगणनमनर्थकम् तत्रैवमुच्यते यद्यपिमहापातकतत्समेष्वि वसद्यःपातित्यहेतुत्वंनास्तितथाप्यभ्यासापेक्षयापातित्यहेतुत्वमविरुद्धम् निंदितकर्माभ्यासीतिगौतमवचनादिति नैवं अभ्यासस्यानिरू प्यमाणत्वात् द्विःशतकृत्वोवेतितच्चाविशेषेणगोक्रियमाणेयोपिद्विर्द्विर्वास्वपितियःशतकृत्वोवागोवधंकरोतितयोरविशेषेणपातित्यंस्यात्

अत्रोच्यते अत्रार्थवादे प्रत्यवायविशेषः श्रूयते प्रायश्चित्तबहुत्वं वा तस्मिन्निंदितकर्मणि यावत्सभ्यस्यमाने महापातकतुल्यत्वं भवति तावान भ्यासः पातित्यहेतुः दिवास्वप्नादौतु सहस्रकृत्वोभ्यस्यमानेन महापातकतुल्यत्वं भवतीति न तत्र पातित्यमतोयुक्तमुपपातकादेरभ्यासापेक्षया पतनहेतुत्वम् २४२ एवंसंव्यवहारार्थं संज्ञाभेदसहितं प्रायश्चित्तनिमित्तपरिगणनं कृत्वा नैमित्तिकानि प्रदर्शयितुमाह शिरसः कपालमस्यास्तीति शिरःकपाली तथाध्वजवान् कृत्वाशवशिरोध्वजमिति मनुस्मरणात् अन्यच्छिरःकपालं दंडाग्रसमारोपितध्वजशब्दवाच्यं गृण्हीयात्

**शिरःकपालीध्वजवान्भिक्षाशीकर्मवेदयन् ब्रह्महाद्वादशाब्दानिमितभुक्शुद्धिमाप्नुयात् २४३**

तच्च कपालं स्वव्यापादितब्राह्मणशिरःसंबंधिग्राह्यं ब्राह्मणोब्राह्मणं घातयित्वा तस्यैव शिरः कपालमादाय तीर्थान्यनुसंचरेदिति शातातपस्मरणात् तदलाभेन्यस्य ब्राह्मणस्यैव ग्राह्यं एतदुभयं पाणिनैव ग्राह्यं खट्वांगकपालपाणिरिति गौतमस्मरणात् खट्वांगशब्देन दंडरोपितशिरःकपालात्मकोध्वजोगृह्यते न पुनःखट्वैकदेशः तेन महोक्षः खट्वांगं परशुरित्यादिव्यवहारेषु तत्रैव प्रसिद्धेः एतच्च कपालधारणं चिन्हार्थं न पुनर्भोजनार्थं भिक्षार्थं वा मृन्मयकपालपाणिर्भिक्षायै ग्रामं प्रविशेदिति गौतमस्मरणात् तथा च वनवासिना तेन भवितव्यम् ब्रह्महाद्वादशाब्दानि कुटिं कृत्वा वने वसेदिति मनुस्मरणात् ग्रामसमीपादौ वा कृतवापनो वा निवसेद्ग्रामांते गोव्रजेपि वा आश्रमे वृक्षमूले वा सर्वभूतहितेरत इति तेनैवोक्तत्वात् कृतवापनो वेति विकल्पाभिधानाज्जटी वेति लक्ष्यते अत एव संवर्त्तः ब्रह्महाद्वादशाब्दानि बालवासाजटीध्वजीति तथाभिक्षाशनशीलश्च भवेत् भिक्षा च लोहितकेन मृन्मयखंडशरावकेण ग्राह्या लोहितकेन खंडशरावेण ग्रामं भिक्षायै प्रविशेदिति आपस्तंबस्मरणात् सप्तागाराण्येवात्र भूष्टलभ्यते अत्र नेत्येव समंकल्पितानि भिक्षार्थं प्रविशेत्सप्तागाराण्यसंकल्पितानि चरेद्भैक्ष्यमिति वसिष्ठस्मरणात् तथा सायंकाल एव सा ग्राह्या एककालाहार इति तेनैवोक्तत्वात् तच्च भैक्ष्यं ब्राह्मणादिवर्णेष्वेव कार्यम् चातुर्वर्ण्ये चरेद्भैक्ष्यं खट्वांगी संयतात्मवानिति संवर्तस्मरणात् तथा ब्रह्महास्मीति स्वकर्माख्यापयन्द्वारि स्थितो भिक्षां चरेत् वेश्मनोद्वारि तिष्ठामि भिक्षार्थी ब्रह्मघातक इति पराशरस्मरणात् अयं च भैक्षाशित्वनियमो वन्यैर्जीवनाशक्तौ द्रष्टव्यः भिक्षायै प्रविशेद्ग्रामं वन्यैर्यदि न जीवतीति संवर्त्तस्मरणात् तथा ब्रह्मचर्यादियुक्तेन च तेन भवितव्यम् खट्वांगपाणिर्द्वादशवत्सरान् ब्रह्मचारी भिक्षायै ग्रामं प्रविशेत्कर्माचक्षाणः पथोपक्रमेत्संदर्शनादार्यस्य स्थानासनाभ्यां विहरन्सवनेषूदकोपस्पर्शी शुद्ध्येदिति गौतमस्मरणात् ब्रह्मचारिग्रहणं च वर्जयेन्मधुमांसं गंधमाल्यदिवास्वप्नांजनाभ्यंजनोपानत्छत्रकामक्रोधलोभमोहहर्षनृत्यगीतपरिवादनभूयानिति ब्रह्मचारिप्रकरणोक्ताविरुद्धधर्मप्राप्त्यर्थं अत एव शंखः स्थानवीरासनीमौनीमौंजीदंडकमंडलुः भिक्षाचर्याग्निकार्यं च कूश्मांडीभिः सदाजप इति तस्य भवेदिति शेषः अत्र च सवनेषूदकस्पर्शीति स्नानविधानात् तदंगभूतमंत्रादिप्राप्तिरवगम्यते तथाशुचिना कर्म कर्त्तव्यमित्यस्य सर्वकर्मसाधारणत्वात् व्रतचर्यांगभूतशौचसंपत्त्य

र्थंस्नानवत्संध्योपासनमपिकार्यं तस्यापिशौचापादनद्वारेणसर्वकर्मशेषत्वात् तथाचदक्षः संध्याहीनोशुचिर्नित्यमनर्हःसर्वकर्मसु यत्किंचि
त्कुरुतेकर्मनतस्यफलभाग्भवेदिति नचद्विजातिकर्मभ्योहानिःपतनमितिवचनात्संध्योपासनायाश्चद्विजातिकर्मत्वादप्राप्तिरितिशंकनीयम्
यस्मात्पतितस्यैवव्रतचर्योपदेशात्तदंगस्यतथैवसंध्योपासनादिप्राप्तिरतोद्विजातीनामध्ययनमीज्यादानंब्राह्मणस्याधिकारप्रवचनयाजन
प्रतिग्रहाइत्यादीनामेवद्विजातिकर्मणांव्रतचर्यानंगभूतानांहानिर्नसर्वेषांतावन्मात्रबाधेनहानिवचनस्यचरितार्थत्वात् इयंचमनुयाज्ञवल्क्य
गौतमादिप्रतिपादिताद्वादशवर्षव्रतचर्याएकैवनपुनर्भिन्ना परस्परसापेक्षत्वादविरोधाच्च तथाहि भिक्षाशीकर्मवेदयन्नित्युक्तेकिंभिक्षा-
पात्रंकेषांवागृहेषुकतिषुवेत्याकांक्षाजायतेतेव तत्रलोहितकेनखंडशरावेणेत्यापस्तंबवचनैःपरिपूरणमविरुद्धम् अतःसर्वैरेककल्पोप
देशात्कैश्चिदुक्तम् मनुगौतमाद्युक्तेतिकर्तव्यतायाःपरस्परसापेक्षत्वेपिविकल्पइतितदनिरूप्यैवोक्तमितिमंतव्यम् एवंद्वादशवर्षाणिव्रतच
र्यामावर्त्यब्रह्महाशुद्धिमाप्नुयात् इयंचकामकृतब्रह्मवधविषया इयंविशुद्धिरुदिताप्रमाप्याकामतोद्विजम् कामतोब्राह्मणवधेनिष्कृति
र्नविधीयतेइतिमनुस्मरणात् अत्रेदंचिंतनीयम् किंतत्र द्वित्रिब्राह्मणवधेप्रायश्चित्तस्यतंत्रत्वमुत्तावृत्तिरिति तत्रकेचिन्मन्यंते ब्रह्महाद्वा
दशाब्दानीत्यत्रब्रह्मशब्दस्यैकस्मिन्द्वयोर्बहुषुसाधारणत्वादेकस्मिन्ब्राह्मणवधेयत्प्रायश्चित्तंतदेवद्वितीयेतृतीयेपि तत्रैकब्राह्मणवधनि
मित्तैकप्रायश्चित्तानुष्ठानेसतीदंकृतमिदंनेतिनशक्यतेवक्तुंदेशकालकर्तॄणांप्रयोगानुबंधभूतानामभेदेनागृह्यमाणविशेषत्वात्तत्रानुष्ठानेनै
वपापक्षयलक्षणकार्यनिष्पत्तिर्युक्ता तथातंत्रानुष्ठितैःप्रयाजादिभिराग्नेयादिषुतंत्रेणैवानेकोपकारलक्षणकार्याणांनिष्पत्तिः नचैवंवा 

च्यम् द्वित्रिब्राह्मणवधेपापस्यगुरुत्वादेनांसिगुरूणिगुरूणिलघूनिलघूनीतिगौतमवचनादावृत्तिमेवप्रायश्चित्तानुष्ठानंयुक्तं विलक्षणका
र्ययोस्तंत्रेणनिष्पत्तेरनुपपत्तेरिति यतोनैवंवचनमावृत्तिविधायकंकिंतूपविष्टानांगुरुलघुपापानांव्यवस्थितिप्रतिपादनपरम् नचद्विती
यब्राह्मणवधेपापस्यगुरुत्वंप्रमाणाभावात् यच्चमनुदेवलाभ्यामुक्तं विधेःप्राथमिकादस्माद्द्वितीयेद्विगुणंभवेत् तृतीयेत्रिगुणंप्रोक्तंच
तुर्थेनास्तिनिष्कृतिरिति तदपिप्रतिनिमित्तंनैमित्तिकमावर्तत इतिन्यायेनद्वित्रिब्राह्मणवधगोचरनैमित्तिकशास्त्रावृत्त्यनुवादेनचतुर्थे
तदभावविधिपरम् नपुनर्द्वितीयब्रह्मवधेप्रायश्चित्तानुष्ठानद्वैगुण्यविधिपरमिति वाक्यभेदप्रसंगात् तस्माद्द्वित्रिब्राह्मणवधेपिसकृ
देवद्वादशवर्षाद्यनुष्ठानंयुक्तं यथाग्नयेक्षामवतेपुरोडाशमष्टाकपालंनिर्वपेदित्यादिगृहदाहादिनिमित्तेषुचोदितानांक्षामवत्यादीनांयुग
पदनेकेष्वपिगृहदाहादिनिमित्तेषुसकृदेवानुष्ठानम् अत्रोच्यते नहिवचनविरोधेन्यायःप्रभवति वचनंचविधेःप्राथमिकादित्यादिकं
द्वित्रिब्राह्मणवधेप्रायश्चित्तानुष्ठानावृत्तिविधिपरम् एवंसतिन्यायलभ्यतंत्रानुष्ठानबाधितावृत्तिविशेषकरंस्यात् इतरथाशास्त्रतःप्राप्त्य
नुवादकत्वेनानर्थकंस्यात् नचवाक्यभेदः चतुर्थादिब्रह्मवधपर्युदासेनेतरत्रावृत्तप्रायश्चित्तविधानेनैकार्थत्वात् किंचचतुर्थेनास्तिनि-
ष्कृतिरितिलिंगदर्शनाद्धन्यमानब्राह्मणसंख्योत्कर्षेदोषगौरवंगम्यते तथाचदेवलादिवचनाच्च यत्स्यादनभिसंधायपापकर्मसकृत्कृत
म् तस्येयंनिष्कृतिर्दृष्टाधर्मवद्भिर्मनीषिभिरिति नचविलक्षणयोर्गुरुलघुदोषयोःक्षयस्तंत्रेणनिष्पाद्यते अतएवंविधेषुदोषगुरुत्वेनका-
र्यवैलक्षण्यादपिप्रतिनिमित्तंनैमित्तिकस्यावृत्तिर्युक्ता क्षामवत्यादिषुपुनःकार्यस्यावैलक्षण्याद्युक्तस्तंत्रभावइत्यलंप्रपंचेन यच्चेदंच

तुर्येनास्तिनिष्कृतिरितितदपिमहापातकविषयम् पापस्यातिगुरुत्वेन प्रायश्चित्ताभावप्रतिपादनपरत्वात् अतः शूद्रान्नसेवनादौ बहुशोऽप्य
भ्यस्तेतदनुगुणं प्रायश्चित्तावृत्तिः कल्पनीयानपुनः प्रायश्चित्ताभावः अतएवोक्तंमनुना पूर्ववानस्यनस्त्वातुशूद्रहत्याव्रतंचरेदिति इदंच
द्वादशवार्षिकंव्रतंसाक्षात्कर्तुरेवब्रह्महेतितस्यैवाभिधानात् अनुग्राहकप्रयोजकादेस्तु तत्र दोषानुसारेण प्रायश्चित्ततारतम्यंकल्पनीयम्
तत्रानुग्राहको यत्प्रायश्चित्तभाजंपुरुषमनुगृण्हातिसतत्प्रायश्चित्तंपादोनंकुर्यात् अतस्तस्य द्वादशवार्षिकेनववार्षिकम् प्रयोजकस्त्व-
र्द्धंनिषड्वार्षिकंकुर्यात् अनुमंतापुनः सार्धपादंसार्द्धचतुर्वार्षिकं निमित्तीत्वेकपादंत्रिवार्षिकम् अतएवसुमंतुः तिरस्कृतोयदाविप्रो-
हत्वात्मानंमृतोयदि निर्गुणः साहसात्क्रोधाद्गृहक्षेत्रादिकारणात् त्रैवार्षिकंव्रतंकुर्यात्प्रतिलोमांसरस्वतीम्. गच्छेद्वापिविशुद्ध्यर्थंत
त्पापस्येतिनिश्चितम् अत्यर्थंनिर्गुणोविप्रोत्यत्यर्थनिर्गुणोपरि क्रोधाद्विम्रियतेयस्तुनिर्निमित्ततुभर्त्सितः वत्सरंत्रितयंकुर्यान्नरः
कृच्छ्रंविशुद्धयेइति यदापुनर्निमित्तात्यंतगुणवदुपरिआत्मघातीचात्यंतनिर्गुणस्तदैकवर्षमेवब्रह्महत्याव्रतंकुर्यात् केशश्मश्रुनखादीनांकृत्वा
तुवपनंवने ब्रह्मचर्यंचरन्विप्रोवर्षेणैकेनशुद्ध्यतीतितेनैवोक्तत्वात् अनयैवदिशानुग्राहकप्रयोजकादीनांयेनुग्राहकप्रयोजकादयस्तेषामपिप्रा
यश्चित्तकरणंकल्पनीयम् प्रयोजयितानुमंताकर्त्ताचेतिस्वर्गनरकफलेषुकर्मसुभागिनोयोभूयआरभतेतस्मिन्फलविशेषइत्यापस्तंबीयं
वचनंमूलम् तथाप्रोत्साहकादीनामपिदंडप्रायश्चित्तेकल्प्ये यथाहपैठीनसिः हंतामंत्रोपदेशचतथासंप्रतिपादकः प्रोत्साहकःसहा ७१
यश्चतत्रमार्गानुदेशकः आश्रयःशस्त्रदाताचभक्तदाताविकर्मिणाम् उपेक्षकःशक्तिमांश्चदोषवक्तानुमोदकः अकार्यकारिणस्तेषांप्रा

यश्चित्तंप्रकल्पयेत् यथाशक्त्यनुरूपंचदंडंचैषांप्रकल्पयेदिति तथाबालवृद्धादीनांसाक्षात्कर्तृत्वेप्यर्धमेव अशीतिर्यस्यवर्षाणिबालोवा
प्यूनषोडशः प्रायश्चित्तार्धमर्हंतिस्त्रियोरोगिणएवचेत्यंगिरःस्मरणात् तथार्वाग्द्वादशवर्षाद्शीतेरूर्ध्वमेववा अर्धमेवभवेत्पुंसांतुरीयं
तत्रयोषितामिति तथानुपनीतस्यापिबालकस्यपादमात्रमेवप्रायश्चित्तं स्त्रीणामर्धंप्रदातव्यंवृद्धानांरोगिणांतथा पादोबालेषुदात-
व्यःसर्वपापेष्वयंविधिरितिविष्णुस्मरणात् अतश्चयच्छरवेन ऊनैकादशवर्षस्यपंचवर्षात्परस्यच प्रायश्चित्तंचरेद्भ्रातापितावान्यःसु
हृज्जनइतिप्रतिपाद्योक्तम् अतोबालतरस्यास्यनापराधोनपातकम् राजदंडोनतस्यास्तिप्रायश्चित्तंनविद्यतेइतितदपिसंपूर्णप्रायश्चि
त्ताभावप्रतिपादनपरंनपुनःसर्वात्मनातद्भावप्रतिपादनपरम् आश्रमविशेषनिरपेक्षेणश्रूयमाणेषुब्राह्मणोनहंतव्यस्तस्माद्ब्राह्मणरा
जन्यौवैश्यश्चनसुरांपिबेदित्येवमादिष्वनपेक्षितवयोविशेषस्यैवचाधिकारादतस्तदीयमपिप्रायश्चित्तंपित्रादिभिरेवाचरणीयम् पुत्रानु
त्पाद्यसंस्कृत्यवेदमध्याप्यवृत्तिंविदध्यादितितस्यैवपुत्रहिताचरणेअधिकृतत्वात् यत्रपुनःकस्मिंश्चित्ब्रह्मवधेप्रयोजकभावमापन्नस्या
न्यस्मिन्साक्षात्कर्तृत्वेगुरुलघुप्रायश्चित्तसन्निपातस्तत्रद्वादशवार्षिकादिगुरुप्रायश्चित्तांतःपातिनःप्रयोजकसंबंधिलघुप्रायश्चित्तस्यप्र
संगात्कार्यसिद्धिः नचैवंसत्यविशेषाल्लघुकल्पेनमहतोपिसिद्धिःस्यादित्याशंकनीयम् अतोत्र्यंतःपातितयानुष्ठानेविशेषानवगमात्प्र
संगात्कार्यसिद्धिरवगम्यते नचलघ्वंतःपातीमहाकल्पइतिकुतःप्रसंगाशंका नचचैत्रवधजनितकल्मषक्षयार्थमनुष्ठितेनकथंविष्णु
मित्रवधोत्पाद्यपापनिवृत्तिरितिवाच्यम् चैत्राद्युद्देशस्यातंत्रत्वात् अतोयथाकाम्यनियोगनिष्पत्त्यर्थंस्वर्गार्थंचानुष्ठितेराग्नेयादिभिर्नित्य

नियोगनिष्पत्तिस्तद्वल्लघुप्रायश्चित्तस्यापिकार्यसिद्धिः यत्पुनर्मध्यमांगिरोवचनं गवांसहस्रंविधिवत्पात्रेभ्यःप्रतिपादयेत् ब्रह्महाविप्र-
मुच्येतसर्वपापेभ्यएवचेति तत्सवनस्थगुणवद्ब्राह्मणविषयम् एतच्चद्विगुणंसवनस्थेतुब्राह्मणेव्रतमादिशेदितिएतद्वाक्यविहितंतत्द्वि
गुणद्वादशवार्षिकव्रतचर्याशक्तस्यवेदितव्यम् प्रायश्चित्तस्यातिगुरुत्वात् नत्वनावृत्तद्वादशवार्षिकविषयम् तत्रहिद्वादशादिनान्येके
कप्राजापत्यमितिगणनायांप्राजापत्यानांषष्ट्यधिकशतत्रयंभवति यद्यपिप्राजापत्यस्यानेत्र्यहमुपवासोधिकस्तथाप्यत्रवनवासज-
दाधारणवन्याहारत्वादिरूपतपोविशेषयुक्तत्वादुपवासाभावेप्येकैकस्यद्वादशाहस्यप्राजापत्यतुल्यत्वम् ततश्चप्राजापत्यक्रियाशक्तोधे-
नुंदद्याद्विचक्षणः गवामभावेदातव्यंतन्मूल्यंवानसंशयइत्यनेनन्यायेनप्रतिप्राजापत्यमेकैकस्यांधेन्वांदीयमानायांधेनूनामपिषष्ट्यधिकं
शतत्रयंभवति नपुनःसहस्रमतोयथोक्तएवविषयोयुक्तः यदपिशंखवचनम् पूर्ववदमतिपूर्वंचतुर्षुवर्णेषुविप्रंप्रमाप्यद्वादशवत्सरान्षट्
त्रीन्सार्धसंवत्सरंचव्रतान्यादिशेत्तेषामंतेगोसहस्रंतदर्धंतस्यार्द्धंतदर्द्धंदद्यात्सर्वेषांवर्णानामानुपूर्व्येणेतिद्वादशवार्षिकगोसहस्रयोःसमु
च्चयपरम् तदाचार्यादिहननविषयंद्रष्टव्यम् तस्यातिगुरुत्वात् तथाचदक्षः सममब्राह्मणेदानंद्विगुणंब्राह्मणब्रुवे आचार्येशतसाहस्र-
सोदर्येदत्तमक्षयमितिप्रतिपाद्योक्तत्वात् समंद्विगुणसाहस्रमानंत्यंचयथाक्रमम् दानेफलविशेषःस्याद्धिंसायांतद्वदेवहीति तथापस्तं
बेनद्वादशवार्षिकमुक्त्वोक्तमस्मिन्नेवविषये गुरुंहत्वाश्रोत्रियंवाएतदेवव्रतमुत्तमादुच्छ्वासाच्चरेदिति तत्रयावज्जीवमावर्त्यमानेव्रतेयदा 
त्रैगुण्यंचातुर्गुण्यंवासंभाव्यते तदातत्रासमर्थस्यबहुधनस्यायंदानतपसोःसमुच्चयोद्रष्टव्यः द्वादशवार्षिकव्यतिरिक्तानांतुसुमंतुपराश

राद्युक्तानांप्रायश्चित्तानामुत्तरत्रव्यवस्थांवक्ष्यामः ननुचद्वादशवार्षिकादिकल्पानांव्यवस्थाकुतोवसिता नतावत्द्वादशवार्षिकादिविधाय
कवाक्यैरितियुक्तं तत्राप्रतीतेः नचवाच्यंप्रमाणावगतगुरुलघुकल्पानांबाधोमाप्रसांक्षीदितिव्यवस्थाकल्प्यतइतिविकल्पसमुच्चयांगां-
गीभावानामन्यतमाश्रयणेनापिबाधस्यसुपरिहरत्वात् अत्रोच्यते नतावत्द्वादशवार्षिकसुमंतुदर्शितानांविषमकल्पानांविकल्पोवक-
ल्प्यते विकल्पाश्रयणेगुरुकल्पानामनुष्ठानासंभवेनानर्थक्यप्रसंगात् नचषोडशिग्रहणवद्विषमयोरपिविकल्पोपपत्तिरितिवाच्यम् यत
स्तत्रापिस्मृतिसंभवेग्रहणमेवेतियुक्तंकल्पयितुम् यद्वाषोडशिग्रहणानुगृहीतेनातिरात्रेणाक्षिप्रंस्वर्गादिसिद्धिरतिशायितस्यवास्वर्गस्येतिक

ब्राह्मणस्यपरित्राणंगवांद्वादशकस्यच तथाश्वमेधावभृथस्नानाद्वाशुद्धिमाप्नुयात् २४४

ल्पनीयम् इतरथाग्रहणविधेरानर्थक्यप्रसंगात् नापिसमुच्चयः उपदेशातिदेशप्राप्तिमंतरेणसमुच्चयोनसंभवति उपदेशावगतनैरपेक्ष्य-
स्यबाधप्रसंगात् नचांगांगीभावश्रुत्यादिभावविनियोक्तृणामभावात् अतःपरस्परोपमर्दपरिहारार्थंविषयव्यवस्थाकल्पनैवोचिता साच
जातिशक्तिगुणाद्यपेक्षयाकल्पनीया जातिशक्तिगुणापेक्षंसकृद्बुद्धिकृतंतथा अनुबंधादिविज्ञायप्रायश्चित्तंप्रकल्पयेदितिदेवलस्मरणा-
त् २४३ पूर्वोक्तस्यब्रह्महत्यादिप्रायश्चित्तस्यनैमित्तिकंसमाप्त्यवधिमाह यश्चौरव्याघ्रादिभिर्व्यापाद्यमानस्यब्राह्मणस्यैकस्याप्यात्मप्रा

पानंतरेकृत्वाप्राणत्राणंकरोति गवांद्वादशकस्यासावसंपूर्णेद्वादशवार्षिकेशुद्ध्येत् यद्यपिप्राणत्राणेप्रवृत्तस्तदकृत्वैवम्रियतेतथापिशुद्ध्यते
व अतएवमनुना ब्राह्मणार्थेगवार्थेवासद्यःप्राणान्परित्यजेत् मुच्यतेब्रह्महत्यायागोप्तागोर्ब्राह्मणस्यवेति ब्राह्मणरक्षणंतदर्थमरणंचपृ
थगुपात्तं तथापरकीयाश्वमेधस्यावभृथाख्यकर्मांगभूतस्नानसमयेस्वयमपिस्नात्वाब्रह्महत्यायाःशुद्धिमाप्नुयात् स्नानंचस्वकल्मषवि
ख्याप्यकुर्यात् तथाचमनुः शिष्ट्वावाभूमिदेवानांनरदेवसमागमे स्वमेनोवभृथेस्नात्वाहयमेधीविमुच्यतइति भूमिदेवाब्राह्मणाऋत्वि
जस्तेषांनरदेवेनराज्ञायजमानेनसमवायेस्वीयमेनःशिष्ट्वाविख्याप्याश्वमेधावभृथेस्नात्वाशुद्ध्येत् यदितैरनुज्ञातोभवति अश्वमेधाव
भृथगत्वातत्रानुज्ञातःस्नातःसद्यःपूतोभवतीतिशंखस्मरणात् अश्वमेधावभृथग्रहणमग्निष्टुन्मध्यानापंचदशरात्रादिक्रत्वंतराणामग्नि
ष्टुत्समाप्तिकानांवासर्वमेधादीनामुपलक्षणम् अश्वमेधावभृथेवान्ययज्ञेप्यग्निष्टुदंतश्चेदितिगौतमस्मरणात् अयंचप्रक्रांतद्वादश
वार्षिकस्यकथंचित्ब्राह्मणत्राणादिकंकुर्वतोव्रतसमाप्त्यवधिरुच्यते यथासारस्वतेसत्रे प्लाक्षप्रस्रवणं प्राणोत्थानमृषभैकशतानां
वागवासहस्रस्याभावेसर्वस्वजान्यांगृहपतिमरणेवेति नपुनःस्वतंत्रंप्रायश्चित्तांतरं तथाचशंखः द्वादशेवर्षेशुद्धिप्राप्नोत्यंतरावा
ब्राह्मणंमोचयित्वागवांवाद्वादशानांपरित्राणात्सद्यएवाश्वमेधावभृथस्नानाद्वापूतोभवति अतएवमनुना कृतवापोवनेनिवसेदिति
द्वादशवार्षिकस्यगुणविधिंप्रक्रम्यब्राह्मणार्थेगवार्थेवासद्यःप्राणान्परित्यजेत् मुच्यतेब्रह्महत्यायागोप्तागोर्ब्राह्मणस्यचेत्यादिनामध्येब्राह्म ७३
णत्राणादिकमभिधाय एवंदृढव्रतोनित्यंब्रह्मचारीसमाहितः समाप्तेद्वादशेवर्षेब्रह्महत्यांव्यपोहतीतिद्वादशवार्षिकमेवोपसंहृतम् ननुब्र

ह्महत्यायाःशुद्धिमाप्नुयादितिब्राह्मणत्राणादीनांद्वादशवार्षिकेणसहैकफलत्वावगम्यत्वात्स्वातंत्र्यमेवयुक्तं नपुनरंगत्वम् किंच प्रधानवि
रोधित्वादपिनांगत्वम् प्रधानांतु [illegible] गंभवति नचप्रारब्धद्वादशवार्षिकस्येदंविधानम् येनतत्कार्यविधानंगम्यते यथासत्रायावगूर्य
विश्वजितायजेतेतिसत्रप्रयोगप्रवृत्तस्यतत्परिसमापनाक्षमस्यविश्वजिद्विधानमतोपिस्वातंत्र्यमेवयुक्तम् यथाग्निप्रवेशत्वस्यभावादी
नां नचतेषामपिद्वादशवार्षिकोपक्रमोपसंहारमध्येपठितत्वेनतदंगत्वमितिशंकनीयम् यतःसत्यपिमध्यपाठेनिर्ज्ञातप्रयोजकत्वेप्रयोज
नाकांक्षाविरहान्नपरस्परमंगांगित्वंयुक्तं यथासामिधेनीप्रकरणमध्यवर्त्तिनामग्निविदानामग्निसमिंधनप्रकाशनत्वेनसामिधेनीभिःसहै
ककार्याणांनसामिधेन्यंगत्वं नचैकांततोग्निप्रवेशनादीनांद्वादशवार्षिकमध्येपाठः वसिष्ठगौतमादिभिरेषांद्वादशवार्षिकप्रक्रमात्प्रागे
वपठितत्वात् इदमेवस्वातंत्र्यंप्रकटयितुंमनुना लक्ष्यंशस्त्रभृतांवास्यात्प्रास्येदात्मानमग्नौवेति प्रतिवाक्यंवाशब्दःपठितः तथाप्रतिप्राय
श्चित्तमेवमेवोपसंहृतम् अतोन्यतममास्थायविधिंविप्रःसमाहितः ब्रह्महत्याकृतंपापंव्यपोहत्यात्मवित्तयेति अतोग्निप्रवेशादीनांस्वा
तंत्र्यमेवयुक्तम् अतश्चब्राह्मणत्राणादेरप्येकफलत्वान्नांगत्वमिति उच्यते परिहृतमेतदंतराब्राह्मणंमोचयित्वेत्यादिनाशंखवचने-
नांगत्वावगमात् अतस्यैवसतःप्रधानद्वारेणफलसंबंधः नचप्रधानविरोधः यतोब्राह्मणत्राणावधिकस्यैवव्रतानुष्ठानस्यफलसाधन
त्वंविधीयतेइतिनविरोधः २४४ किंच दीर्घेणबहुकालव्यापिनातीव्रेणदुःसहेनामयेनकुष्ठादिव्याधिनाग्रस्तपीडितम् ब्राह्मणंगांवा
तथाविधाम् पथिदृष्ट्वानिरातंकंनीरुजंकृत्वाब्रह्महाशुचिर्भवति ननुब्राह्मणस्यपरित्राणादित्यत्रयदुक्तंब्राह्मणरक्षणंतदेवंकिमर्थं

पुनरुच्यते ब्राह्मणंगामथापिवेति सत्यमेवं किंत्वात्मप्राणपरित्यागेनाधस्तनवाक्येब्राह्मणरक्षणमुक्तमधुनापुनरौषधदानादिनेतिवि-
शेषः अमुनैवाभिप्रायेणोक्तंमनुना विप्रस्यतन्निमित्तेवाप्राणलाभेविमुच्यतेइति २४५ किंच विप्रस्यापहृतसर्वस्वतयावसीदतःसं-
बंधिद्रव्यंभूहिरण्यादिकंचौरैर्हृतंसाकल्येनानीयरक्षणंयःकरोतिसविशुध्यति आनयनेप्रवृत्तःस्वयंचौरैर्घातितोवातन्निमित्तंब्राह्मण

दीर्घतीव्रामयग्रस्तंब्राह्मणंगामथापिवा दृष्ट्वापथिनिरातंकंकृत्वावाब्रह्महाशुचिः २४५
आनीयविप्रसर्वस्वंहृतंघातितएववा तन्निमित्तंक्षतःशस्त्रैर्जीवन्नपिविशुध्यति २४६

सर्वस्वानयनार्थंतत्रयुध्यमानःशस्त्रैःक्षतोमृतकल्पोजीवन्नपिविशुध्यति शस्त्रैरितिबहुवचनंक्षतबहुलप्राप्त्यर्थं अतएवमनुना त्र्य- 
वरंप्रतिरोद्धावासर्वस्वमवजित्यवेतित्र्यवरग्रहणंकृतम् एतस्यश्लोकद्वयोक्तकल्पपंचकस्यब्राह्मणरक्षणरूपकत्वेनांतरावाब्राह्मणं
मोचयित्वेत्यनेनशंखवचनेनक्रोडीकृतत्वात्द्वादशवार्षिकसमाप्त्यवधित्वेनाविनियोगान्नस्वातंत्र्यम् २४६ ७ ७

प्रायश्चित्तांतरमाह लोमभ्यःस्वाहेत्येवमादिभिर्मंत्रैर्लोमप्रभृतिमज्जांतांतनुंजुहुयादितिशब्दःकरणत्वनिर्देशार्थः एवंशब्दःप्रकारसूचनार्थः हिशब्दःस्मृ
त्यंतरप्रसिद्धत्वगादीनांप्रभृतिशब्देनाक्षिप्यमाणानांद्योतनार्थः ततोलोमादीनिहोमद्रव्याणिचतुर्थ्यानिर्दिश्यंते स्वाहाकारांतापठितानैर्मंत्रैर्जुहुया
त् तेचहूयमानद्रव्याणांलोमत्वग्लोहितमांसमेदःस्नाय्वस्थिमज्जानामष्टसंख्यत्वादष्टौमंत्राभवंति तथाचवसिष्ठः ब्रह्महाग्निमुपसमाधा
यजुहुयाल्लोमानिमृत्योर्जुहोमि लोमभिर्मृत्युंवाशयइतिप्रथमां १ त्वचंमृत्योर्जुहोमित्वचामृत्युंवाशयइतिद्वितीयाम् २ लोहितंमृत्योर्जुहोमि

लोमभ्यःस्वाहेत्येवंहिलोमप्रभृतिवैतनुम् मज्जांतांजुहुयाद्वापिमंत्रैरेभिर्यथाक्रमम् २४७

लोहितेनमृत्युंवाशयइति तृतीयाम् ३ मांसानिमृत्योर्जुहोमिमांसैर्मृत्युंवाशयइतिचतुर्थीम् ४ मेदोमृत्योर्जुहोमिमेदसामृत्युंवाशयइतिपंच
मीम् ५ स्नायूनिमृत्योर्जुहोमिस्नायुभिर्मृत्युंवाशयइतिषष्ठीम् ६ अस्थीनिमृत्योर्जुहोमिअस्थिभिर्मृत्युंवाशयइतिसप्तमीम् ७ मज्जांमृत्यो
र्जुहोमिमज्जाभिर्मृत्युंवाशयइत्यष्टमीम् ८ अत्रचलोमप्रभृतितनुंजुहुयादितिलोमादीनांहोमद्रव्यत्वावगमाल्लोमभ्यःस्वाहेतिसत्यपिचतु-
र्थीनिर्देशेलोमादीनांनदेवतात्वंकल्प्यतेद्रव्यप्रकाशकत्वेनैवमंत्राणांहोमसाधनत्वोपपत्तेः किंतुलोमभिर्मृत्युंवाशयइत्यादिवसिष्ठमंत्रपर्यालो
ओळ ३ मूर्णं

चनयामृत्योरेवहविःसंबंधावगमाद्देवतात्वंकल्प्यते अनश्चलोमादीनिरामर्थ्यात्स्वधितिनावदायमृत्यूद्देशेनाष्टौहोमान्कृत्वानेतनुंप्रक्षिपेत् अतो
यत्कैश्चिदुक्तमनादिष्टद्रव्यत्वादाज्यहविष्कोहोमइतितदनिरूप्यैवोक्तमित्युपेक्षणीयम् जुहुयादित्यनेनाग्नोसिद्धेष्वभूणहाग्निमुपसमाधायेतिपुन
रग्निग्रहणंलौकिकाग्निप्राप्त्यर्थम् युक्तंचैतत् पतिताग्नीनांप्रतिपत्तिविधानात् आहिताग्निस्तुयोविप्रोमहापातकभाग्भवेत् प्रायश्चित्तेनैर्नशुल्ये
ततदग्नीनांतुकागतिः वैतानंप्रक्षिपेत्तोयेशालाग्निंशमयेद्बुध इत्युशनसःस्मरणात् तथामहापातकसंयुक्तोदैवात्स्यादग्निमान्यदि पुत्रादिः
पालयेदग्नीन्युक्तश्चादोषसंक्षयात् प्रायश्चित्तंनकुर्याद्यःकुर्वन्वाम्रियतेयदि गृह्यंनिर्वापयेत्श्रौतमप्स्वस्येत्सपरिच्छदमितिकात्यायनस्मर
णात् तनुप्रक्षेपश्चोत्थायोत्थायत्रिरधोमुखेनकर्तव्यः यथाहमनुः प्रास्येदात्मानमग्नौवासमिद्धेत्रिरवाक्शिराइति गौतमेनाप्यत्रविशेषोद
र्शितः प्रायश्चित्तमग्नौसक्तिर्ब्रह्मघ्नस्त्रिरवस्यातस्येति अवस्यातस्यअनशनकर्शितकलेवरस्येत्यर्थः तथाचकाठकश्रुतिः अनशनेनकर्शि
तोग्निमारोहेदिति इदंचमरणांतकप्रायश्चित्तंकामकारविषयम् यथाहमध्यमांगिराः प्राणांतिकंचयत्प्रोक्तंप्रायश्चित्तंमनीषिभिः तत्काम
कारविषयंविज्ञेयंनात्रसंशयः तथा यःकामतोमहापापंनरःकुर्यात्कथंचन नतस्यशुद्धिर्निर्दिष्टाभृग्वग्निपतनादृतेइति एतच्चप्रायश्चित्तंस्व
तंत्रमेव नब्राह्मणत्राणादिवत् द्वादशवार्षिकांतर्भूतमित्युक्तंप्राक् २४७ किंच अथवासंग्रामेयुद्धभूमावुभयदलप्रेरितशरसंपातस्थाने
लक्ष्यभूतोमृतःशुद्धिंप्राप्नुयात् गाढमर्मप्रहारजनिततीव्रवेदनोमृतकल्पोमूर्च्छितोजीवन्नपिविशुध्यति लक्ष्यभावश्चप्रायश्चित्तस्यहमित्ये- ७५
वंविदुषाधनुर्विद्याविदांसंग्रामेस्वेच्छयाकर्तव्योनतुराज्ञाबलात्कारयितव्यः यथाहमनुः लक्ष्यंशस्त्रभृतांवास्याद्विदुषामिच्छयात्मन इति

इदंचमरणांतिकत्वात् साक्षात्कर्तुःक्षत्रियस्यकामकारविषयम् अपिशब्दादश्वमेधादिनापिशुध्यति यथाहमनुः यजेतवाश्वमेधेनस्वर्जिता
गोसवेनच अभिजिद्विश्वजिद्भ्यांवात्रिवृताग्निष्टुतापिवेति अश्वमेधानुष्ठानंसार्वभौमक्षत्रियस्यैव यजेतवाश्वमेधेनक्षत्रियस्तुमहीपतिरिति
पराशरस्मरणात् नासार्वभौमोयजेतेत्यसार्वभौमस्यप्रतिषेधदर्शनाच्च इदंचाश्वमेधानुष्ठानंसार्वभौमस्यकामकारकृतेमरणांतिकस्थाने
द्रष्टव्यम् महापातककर्तारश्चत्वारोमतिपूर्वकम् अग्निंप्रविश्यशुध्यंतिस्थितावामहतिक्रताविति यमेनमरणफलाग्निप्रवेशतुल्यतयामहा

संग्रामेवाहतोलक्ष्यभूतःशुद्धिमवाप्नुयात् मृतकल्पःप्रहारार्त्तोजीवन्नपिविशुद्ध्यति २४८

क्रतोरश्वमेधस्यनिर्दिष्टत्वात्स्वर्जितादयश्चत्रैवर्णिकस्याहिताग्नेरिष्टप्रथमयज्ञस्यद्वादशवार्षिकेणसहविकल्प्यंते नचस्वर्जिताद्यर्थमाधानंप्र-
थमयज्ञानुष्ठानंवाकार्यम् पतितस्यद्विजातिकर्मस्वनधिकारात् नचसंध्योपासनवदविरोधइतियुक्तम् आधानादेरुत्तरक्रतुशेषत्वाभावात् ते
चदक्षिणान्यूनाधिक्याश्रयणेनद्वादशवार्षिकषड्वार्षिकाद्यर्हेषुसाक्षाद्ब्रह्मवधादिषुव्यवस्थापनीयाः २४८ ७ ७ ७ ७

किंच अरण्येनिर्जनप्रदेशेनियतोनियताहारोजपेद्वानियताहारइतिमनुस्मरणात् त्रिवारंमंत्रब्राह्मणात्मकंवेदंजपित्वाशुध्यति संहिता
ग्रहणंपदक्रमव्युदासार्थं यद्वामिताशनोभूत्वाप्लक्षात्प्रस्रवणादारभ्यपश्चिमोदधेःप्रतिस्रोतःस्रोतःस्रोतःप्रतिसरस्वतीमित्वागत्वाविशुध्यति अ
शनंचहविष्येणकार्यं हविष्यभुग्वानुचरेत्प्रतिस्रोतःसरस्वतीमितिमनुस्मरणात् अयंचवेदजपोविदुषोहंतुर्निर्धनस्यात्यंतगुणवतोनिर्गुणव्यापादने
प्रमादकृतेद्रष्टव्यः सरस्वतीगमनंतुनादृशएवविषयेविद्याविरहिणोद्रष्टव्यं निमित्तस्य तिरस्कृतोयदाविशेनिर्गुणोम्रियतेयदीत्यादिसुमंतुवचनस्य-

अरण्येनियतोजप्त्वात्रिर्वैवेदस्यसंहिताम् शुध्येतवामिताशीत्वाप्रतिस्रोतःसरस्वतीम् २४९

दर्शितत्वात् यत्पुनर्मनुवचनम् जपित्वान्यतमंवेदंयोजनानांशतंव्रजेदिति तदप्यरण्येनियतोजप्त्वेत्येतस्यैवविषयेअध्वानंशक्तस्यैवद्रष्टव्यम् २४९
किंच नविद्ययाकेवलयेत्याद्युक्तलक्षणेपात्रेगोभूहिरण्यादिकंजीवनायपर्याप्तंसमर्थंधनंदत्वाशुद्धिमवाप्नुयात् तद्धनंयःप्रतिगृण्हातितस्य
वैश्वानरदैवत्येष्टिःशुद्ध्यर्थंकर्तव्या एतच्चाहिताग्निविषयम् अनाहिताग्नेस्तुतद्दैवत्यश्चरुर्भवति यएवाहिताग्नेर्धर्मःसएवौपासनिकस्येतिगृह्य
कारवचनात् वाशब्दात्सर्वस्वंसपरिच्छदंवागृहंदद्यात् यथाहमनुः सर्वस्वंवावेदविदेब्राह्मणायोपपादयेत् धनंवाजीवनायालं-

गृहंवासपरिच्छदमिति इदंचपात्रेधनदानंनिर्गुणस्यधनवतोहंतुर्निर्गुणव्यापादनेद्रष्टव्यम् तत्रैवविषयेअविद्यमानान्वयस्यसर्वस्वदानंसा
न्वयस्यतस्यसोपस्करगृहदानमितिव्यवस्था यदपिपराशरेणोक्तं चातुर्विद्योपपन्नस्तुविधिवद्ब्रह्मघातके समुद्रसेतुगमनंप्रायश्चित्तंवि-
निर्दिशेत् सेतुबंधपथेभिक्षांचातुर्वर्ण्यात्समाहरेत् वर्जयित्वाविकर्मस्थान् छत्रोपानद्विवर्जितः अहंदुष्कृतकर्मावैमहापातककारकः गृहद्वा
रेषुतिष्ठामिभिक्षार्थीब्रह्मघातकः गोकुलेषुचगोष्ठेषुग्रामेषुनगरेषुच तपोवनेषुतीर्थेषुनदीप्रस्रवणेषुच एतेषुख्यापयन्नेनःपुण्यंगत्वा
तुसागरम् ब्रह्महाविप्रमुच्येतस्नात्वातस्मिन्महोदधौ ततःपूतोगृहंप्राप्यकृत्वाब्राह्मणभोजनम् दत्वावस्त्रंपवित्राणिपूतात्माप्रविशेद्गृहं

पात्रेधनंवापर्याप्तंदत्वाशुद्धिमवाप्नुयात् अदातुश्चविशुध्यर्थमिष्टिर्वैश्वानरीतथा २५०

गवांवापिशतंदत्वाचातुर्विद्यायदक्षिणाम् एवंशुद्धिमवाप्नोतिचातुर्विद्यानुमोदितइति तदपिपात्रेधनंवापर्याप्तमित्यनेनसमानविषयम् य-
च्चसुमंतुवचनम् ब्रह्महासंवत्सरंकृच्छ्रंचरेदधःशायीत्रिषवणीकर्मवेदकोभैक्षाहारोदिव्यनदीपुलिनसंगमाश्रमगोष्ठपर्वतप्रस्रवणतपोव
नविहारीस्यात्स्थानवीरासनीसंवत्सरेपूर्णेहिरण्यमणिगोधान्यतिलभूमिसर्पींषिब्राह्मणेभ्योददत्पूतोभवति तदपिहंतुर्मूर्खस्यधनवतोजा
तिमात्रव्यापादनेद्रष्टव्यम् यत्पुनर्वसिष्ठवचनम् द्वादशरात्रमब्भक्षोद्वादशरात्रमुपवसेदिति तन्मनसाध्यवसितब्रह्मघ्नस्यस्वतएवोपरतजि

घासस्य वादतव्यम् यत्तु नः पदं तु ब्राह्मणं हत्वा शूद्रहत्याव्रतं चरेत् चांद्रायणं वा कुर्वीत पराकद्वयमेव चेति षट्त्रिंशन्मतवचनम् तदप्रत्यानेयपुरस्त्स्य सप्रत्ययवधे द्रष्टव्यम् अत्रैव विषये अप्रत्ययवधे बृहस्पतिराह अरुणायाः सरस्वत्याः संगमे लोकविश्रुते शुद्ध्येत्त्रिषवणस्नायी त्रिरात्रोपोषितो द्विज इति· एवमन्यान्यपि स्मृतिवचनान्यन्विष्य विषमाणां व्यवस्था विज्ञेया समानां तु विकल्पः एतानि च द्वादशवार्षिकादिधनदानपर्यंतानि ब्राह्मणस्यैव क्षत्रियादेस्तु द्विगुणादिकं यथाहांगिराः पर्षद्या ब्राह्मणानां तु सा राज्ञां द्विगुणा मता वैश्यानां त्रिगुणा प्रोक्ता पर्षद्वच्च व्रतं स्मृतमिति एवं च ब्राह्मणानां येन हंतृहन्यमानगतगुणविशेषेण यः प्रायश्चित्तविशेषो व्यवस्थितः स एव तद्गुणविशिष्टे क्षत्रियादौ हंतरि द्विगुणस्त्रिगुणो वेदितव्यः अनयैव दिशा क्षत्रियवैश्यादावपि हीनेनोत्कृष्टवधे दोषगौरवात्प्रायश्चित्तस्यापि द्वैगुण्यादिकल्पनीयम् दोषगौरवं च दंडगौरवादवगम्यते यथोक्तं प्रतिलोमापवादेषु द्विगुणस्त्रिगुणो दमः वर्णानामानुलोम्ये च तस्मादर्धार्धहानित इति यत्तु चतुर्विंशतिमतवचनम् प्रायश्चित्तं यदाम्नातं ब्राह्मणस्य महर्षिभिः पादोनं क्षत्रियः कुर्यादर्धं वैश्यः समाचरेत् शूद्रः समाचरेत्पादमशेषेष्वपि पापमस्विति तत्प्रतिलोमानुष्ठितचतुर्विधसाहसव्यतिरिक्तविषयम् तथा मूर्द्धावसिक्तादीनामप्यनुलोमोत्पन्नानां दंडवत्प्रायश्चित्तमूहनीयम् दर्शितं दंडतारतम्यम् दंडप्रणयनं कार्यं वर्णजात्युत्तराधरैरिति ततश्च मूर्द्धावसिक्तस्य ब्राह्मणवधे ब्राह्मणादतिरिक्तं क्षत्रियात्न्यूनमध्यर्द्धं द्वादशवार्षिकं भवति अनयैव दिशा प्रतिलोमोत्पन्नानामपि प्रायश्चित्तगौरवमूहनीयम् तथाश्रमिणामप्यंगिरसा विशेषो दर्शितः गृहस्थोक्तानि पापानि कुर्वत्याश्रमिणो यदि शौचवच्छोधनं कुर्युरर्वाग् ब्रह्मनिदर्शनादिति शौचवदित्येतच्छौचं गृहस्थानां द्विगुणं ब्रह्मचारिणां त्रिगुणं तु वनस्थानां यतीनां तु चतुर्गुणमिति वचनाद्यथा ब्रह्मचा- 

र्यादीनां शौचं द्विगुणादिक्रमेण वर्धते तथा शोधनं प्रायश्चित्तमपि भवतीत्यर्थः ब्रह्मचारिणस्तु प्रायश्चित्तद्वैगुण्यं षोडशवर्षादूर्ध्वमेव अर्वाक्तु पुनर्बालो वाप्यूनषोडशः प्रायश्चित्तार्धमर्हतीति इति षोडशवर्षादर्वाचीनस्यार्द्धप्रायश्चित्ताभिधानात् नच द्वादशवार्षिके चतुर्गुणे क्रियमाणे मध्ये विपत्तिशंकया समाप्त्यनुपपत्तेः प्रवृत्तिरेव नोपपद्यत इति शंकनीयम् यतः प्रक्रांतप्रायश्चित्तस्य मध्ये विपत्तावपि पापक्षयो भवत्येव यथाह हारीतः प्रायश्चित्ते व्यवसितो कर्त्ता यदि विपद्यते पूतस्तदहरेवासाविह लोके परत्र चेति व्यासोप्याह धर्मार्थं यतमानस्तु न चेच्छक्नोति मानवः प्राप्तो भव

यागस्थक्षत्रविड्घातीचरेद्ब्रह्महणिव्रतम् गर्भहा च यथावर्णं तथात्रेयीनिषूदकः २५१

ति न तत्पुण्यमत्र नैवास्ति संशय इति २५० अधुना निमित्तांतरेषु ब्रह्महत्याप्रायश्चित्तस्यातिदेशमाह दीक्षणीयाद्युदवसानीयापर्यंते सोमयागप्रयोगे वर्त्तमानो क्षत्रियवैश्यो यो व्यापादयति असौ ब्रह्महणि पुरुषे यद्व्रतमुपदिष्टं द्वादशवार्षिकादि तच्चरेत् यद्यपि यागशब्दः सामान्यवचनस्तथाप्यत्र सोमयागमभिधत्ते सवनगतौ च राजन्यवैश्याविति वासिष्ठे सवनत्रयसंपाद्यस्य सोमयागस्यैव निर्दिष्टत्वात् अत्र च गुरुलघुभूतानां द्वादशवार्षिकादिब्रह्महत्याव्रतानां जातिशक्तिगुणाद्यपेक्षया प्राग्वद्व्यवस्था वेदितव्या एवं गर्भवधादिष्वपि मरणांतिकं तु नातिदिश्यते व्रत

ग्रहणात् अतः कामतो यागस्थक्षत्रियादिवधे व्रतस्यैव द्वैगुण्यं तच्च व्रतं संपूर्णमेव कर्तव्यम् पूर्वयोर्वर्णयोर्वेदाध्यायिनं हत्वेति प्रक्रम्यापस्तंबेन द्वादशवार्षिकाभिधानात् गर्भं च विज्ञातस्वरूपं हत्वा यथावर्णं यद्वर्णपुरुषवधे यत्प्रायश्चित्तमुक्तं तद्वर्णगर्भवधे तच्चरेत् एतच्चानुपजातस्त्रीपुंनपुंसकव्यंजनगर्भविषयम् हत्वा गर्भमविज्ञातमितिमानवे विशेषदर्शनात् अत्र च यद्यपि ब्राह्मणगर्भस्य ब्राह्मणत्वादेव तद्वधनिमित्तव्रतप्राप्तिस्तथापि स्त्रीत्वस्यापि संभवात्स्त्रीशूद्रविट्क्षत्रवध इत्युपपातकत्वेन तत्प्रायश्चित्तप्राप्तिरपि स्यादतः स्त्रीपुंनपुंसकत्वेनाविज्ञातेपि ब्राह्मणगर्भत्वमात्रप्रयुक्तं ब्रह्महत्याव्रतं कुर्यादित्यर्थवदतिदेशवचनम् उपजाते तु स्त्रीपुंसादिविशेषव्यंजने यथायथमेव प्रायश्चित्तम् यश्चात्रेय्या निषूदको व्यापादकः सोपि तथा व्रतं चरेत् हन्यमानात्रेयीवर्णानुरूपं व्रतं चरेदित्यर्थः आत्रेयीशब्देन ऋतुमत्युच्यते रजस्वलामृतुस्नातामात्रेयीमाहुरत्र ह्येष्यदपत्यं भवतीति वसिष्ठस्मरणात् अत्रिगोत्रजां च अत्रिगोत्रजां वा नारीमिति विष्णुस्मरणात् एतदुक्तं भवति ब्राह्मणगर्भवधे ब्राह्मण्यात्रेयीवधे च ब्रह्महत्याव्रतम् अत्र क्षत्रियगर्भवधे क्षत्रियात्रेयीवधे च क्षत्रहत्याव्रतमेवमन्यत्रापीति चशब्दात्साक्ष्ये अनृतवचनादिष्वपि यथाह मनुः उक्त्वा चैवानृतं साक्ष्ये प्रतिरभ्य गुरुं तथा अपहृत्य च निक्षेपं कृत्वा च स्त्रीसुहृद्वधमिति यत्र व्यवहारे असत्यवचनेन प्राणिनां वधप्राप्तिस्तद्विषयमेतत् प्रायश्चित्तस्यातिगुरुत्वात् प्रतिरंभः क्रोधावेशः निक्षेपश्च ब्राह्मणसंबंधी स्त्री चाहिताग्निभार्या पतिव्रतात्वादिगुणयुक्तोच्यते सवनस्था च यथाहांगिराः आहिताग्नेर्द्विजाग्र्यस्य हत्वा पत्नीमनिंदिताम् ब्रह्महत्याव्रतं कुर्यादात्रेयीघ्नस्तथैव चेति सवनस्थां स्त्रियं हत्वा ब्रह्महत्याव्रतं चरेदिति पराशरस्मरणात् एवं च सवनस्थाग्निहोत्रिण्यात्रेयीवधे ब्रह्महत्याप्रायश्चित्तातिदेशात्तद्व्यतिरिक्तस्त्रीवधस्य- ७८

ओळ १ वर्गी

स्त्रीशूद्रविट्क्षत्रवध इत्युपपातकमध्यपाठादुपपातकत्वमेव ननु ब्राह्मणो न हंतव्य इत्यत्र निषेधे नुपादेयगतत्वेन लिंगवचनयोरविवक्षितत्वाद्ब्राह्मणजातेश्च स्त्रीपुंसयोरविशेषात्तदतिक्रमनिमित्तप्रायश्चित्तविधेर्ब्रह्महा द्वादशाब्दानीत्यस्योभयत्र प्राप्तत्वात् किमर्थं तथात्रेयीनिषूदक इत्यतिदेशवचनम् उच्यते सत्यपि ब्राह्मणत्वे अनात्रेय्या वधस्य महापातकप्रायश्चित्तनिराकरणार्थमतस्तस्योपपातकमध्यपाठादुपपातकप्रायश्चित्तमेव आतिदेशिकेषु च प्रायश्चित्तस्यैवातिदेशो न पातित्यस्यातः पतितत्यागादिकार्यमत्र न भवति २५१ किंच यथावर्णमित्यनुव

चरेद्व्रतमहत्वापि घातार्थं चेत्समागतः

र्तते ब्राह्मणादिहनने कृतनिश्चयस्तद्व्यापादनार्थं सम्यगागत्य शस्त्रादिप्रहारे कृते कथंचिदतिघातादिप्रतिबंधवशादसौ न मृतस्तदा अहत्वापि यथावर्णं ब्रह्महत्यादिव्रतं चरेत् तथा च गौतमः सृष्टश्चेद्ब्राह्मणवधे अहत्वापीति ननु हननेन तदभावे चैकप्रायश्चित्ततानयुक्ता सत्यमेतत् अत एवौपदेशिकेभ्योन्यूनत्वादातिदेशिकानां पादोनान्येव ब्रह्महत्यादिव्रतानि द्वादशवार्षिकादीनि भवंति एतच्च प्रपंचितं प्राक् ७७

किंच यत्तुसवनसंपाद्यंसोमयागमनुतिष्ठं तंब्राह्मणंव्यापादयतितस्मिन् द्वादशवार्षिकादिव्रतंद्विगुणंसमादिशेत् तेषांचव्रतानांगुरुलघूनां जातिशक्तिगुणाद्यपेक्षयासत्यपिसवनस्थत्वस्याविशेषेपूर्ववदेवव्यवस्थावगंतव्या ब्रह्महत्यासमानांतुगुर्वधिक्षेपादीनामातिदेशिकेभ्योपि- न्यूनत्वादर्धेनंद्वादशवार्षिकादिप्रायश्चित्तमित्युक्तं इतिब्रह्महत्याप्रायश्चित्तप्रकरणम् २५२ अथक्रमप्राप्तंसुरापानप्रायश्चित्तंप्रक्रमते सुरादीनांमध्येन्यतममग्निसंनिभंक्काथापादिताग्निस्पर्शदाहशक्तिकंकृत्वापीत्वासुरापोमरणाच्छुद्धिंप्राप्नोति गोमूत्रसाहचर्याद्गव्यमेवघृत

द्विगुणंसवनस्थेतुब्राह्मणेव्रतमादिशेत् २५२ सुरांबुघृतगोमूत्रपयसामग्निसंनिभम् सुरापोन्यतमंपीत्वाम रणाच्छुद्धिमृच्छति २५३

पयसीग्राह्ये घृतपयःसाहचर्याच्चस्त्रैणमेवगोमूत्रं एतच्चार्द्रवाससाकार्यम् सुरापआर्द्रवासाश्चअ ग्निवर्णांसुरांपिबेदितिपैठीनसिस्मरणात् तथालौहेनपात्रेणसुरापोग्निवर्णांसुरामायसेनपात्रेणवापिबेदितिप्रचेतःस्मरणात् एतच्चसकृत्पानमात्रे सुरापानंसकृत्कृत्वाग्निवर्णांसुरांपिबेदित्यंगिरःस्मरणात् यत्तुवसिष्ठवचनम् अभ्यासेतुसुरायाश्चत्वग्निवर्णांसुरांपिबेत्द्विजइति तत्सुरा व्यतिरिक्तमद्यपानविषयम् एतच्चकामकारविषयम् सुरापानेकामकृतेज्वलतींतांविनिक्षिपेत् मुखेतयाविनिर्दग्धेमृतःशुद्धिमवाप्नुयादिति 

बृहस्पतिस्मरणात् यत्तुसुरांपीत्वाद्विजोमोहादग्निवर्णांसुरांपिबेदितिमनुनामोहग्रहणंकृतंतच्छास्त्रार्थापरिज्ञानाभिप्रायेण अत्रेदंचिंत नीयम् किंसुराशब्दोमद्यमात्रेरूढउततिसृष्वेवगौडीमाध्वीपैष्टीष्वाहोस्विदेकस्यामेवेति तत्रकेचिन्मद्यमात्रेरूढइतिवर्णयंति अभ्यासेतुसु रायाइतिवासिष्ठेपैष्ट्यादित्रयव्यतिरिक्तेपिमद्यमात्रेसुराशब्दप्रयोगदर्शनात् नचासौगौणःप्रयोगइतिशंकनीयम् मदजननशक्तिमत्त्वोपा धिकतयासर्वत्रमुख्यत्वोपपत्तौगौणत्वकल्पनायाअन्याय्यत्वादिति तदयुक्तम् पानसंज्ञाक्ष्माधूकखार्जूरतालमैक्षवम् माधुकंसैरिमारिष्टं मैरेयंनालिकेरजम् समानानिविजानीयान्मद्यान्येकादशैवतु द्वादशंतुसुरामद्यंसर्वेषामधमंस्मृतमितिपुलस्त्येनमद्यविशेषत्वेनसुरायानि- र्दिष्टत्वात् अतश्चमद्यमात्रेसुराशब्दप्रयोगोगौणः अन्येपुनःपैष्ट्यादिषुतिसृषुसुराशब्दस्यनिरूढिंमन्यंते तथाहि यद्यप्यनेकत्रसुराशब्दप्र योगोदृश्यतेतथापिकुत्रानादित्वमितिसंदेहे गौडीमाध्वीचपैष्टीचविज्ञेयात्रिविधासुरेतिमनुवचनाद्गुडपिष्टमधुविकारेष्वनादित्वनिर्धारणात्तत्रैव मुख्यत्वंयुक्तम् नचानेकत्रशक्तिकल्पनंदोषः मदशक्तेरुपाधित्वाश्रवणेनतस्यसुपरिहरत्वात् नचतालादिरसेष्वप्युपाधेर्विद्यमानत्वादतिप्र संगः पंकजादिशब्दवद्योगरूढत्वाश्रयणात् अतश्च यथैवैकातथासर्वानपातव्याद्विजोत्तमैरितितिसृणांसुराणांसमानदोषत्वप्रतिपादनप रम् नपुनरनयोर्गौडीमाध्व्योःपैष्टीसुरासमत्वप्रतिपादनपरम् द्विजोत्तमग्रहणंद्विजात्युपलक्षणम् एतदप्ययुक्तम् द्वादशंतुसुरामद्यंसर्वेषा मधमंस्मृतमितिपुलस्त्यवचनेगौडीमाध्वीभ्यामपिसुरामद्यस्यव्यतिरेकदर्शनात् तथा सुरावैमलमन्नानांपाप्माचमलमुच्यतइतिअन्नवि कारस्यैवसुरात्वनिर्देशादन्नशब्दस्यचान्नेनव्यंजनमित्यादिषुव्रीह्यादिविकारएवप्रयोगदर्शनाद्गुडमधुनोश्चरसरूपत्वात्तथासौत्रामणीग्रहे

सुचान्नविकारएवसुराशब्दस्यश्रुतत्वात् पैष्ट्येवसुरामुख्योच्यते इतरयोस्तुसुराशब्दोगौणः यत्तूक्तं गौडीमाध्वीतिमनुवचनात्तिसृष्वप्युत्पत्ति
कृतत्वनिर्धारणेति तदप्ययुक्तम् यतोनेदंशब्दानुशासनवच्छब्दोर्थसंबंधानादित्वप्रतिपादनपरम् किंतुकार्यप्रतिपादनपरम् अतोगुरुप्राय
श्चित्तनिमित्ततयागौडीमाध्व्योर्गौणःसुराशब्दप्रयोगः एवंचनानेकशक्तिकल्पनादोषोनाप्युपाध्याश्रयणंकृतम् नचात्रद्विजोत्तमग्रहणस्यो-
पलक्षणत्वम् अतश्चसुरावैमलमन्नानांपाप्माचमलमुच्यते तस्माद्ब्राह्मणराजन्यौवैश्यश्चनसुरांपिबेदितिपैष्ट्याएववर्णत्रयसंबंधित्वेननिषे
धः गौड्यादीनांतुमद्यानांब्राह्मणसंबंधित्वेनैवनिषेधोनक्षत्रियवैश्ययोः यक्षरक्षःपिशाचान्नंमद्यंमांसंसुरासवम् तद्ब्राह्मणेननात्तव्यंदेवाना
मश्नताहविरितिमानवेब्राह्मणेनेतिविशेषोपादानात् बृहद्विष्णुनापिब्राह्मणस्यैवमद्यप्रतिषेधोदर्शितः मधूकमैक्षवंसैरंतालंखार्जूरपानसं
मधूत्थंचैवमाध्वीकंमैरेयंनालिकेरजम् अमेध्यानिदशैतानिमद्यानिब्राह्मणस्यत्विति बृहद्याज्ञवल्क्येनापिक्षत्रियवैश्ययोर्दोषाभावोदर्शितः
कामादपिहिराजन्योवैश्योवापिकथंचन मद्यमेवसुरांपीत्वानदोषंप्रतिपद्यते व्यासेनापितयोर्माध्वीपानमनुज्ञातम् उभौमध्वासवक्षीबौउ-
भौचंदनचर्चितौ एकपर्यंकरथिनौदृष्टौमेकेशवार्जुनाविति एवंब्राह्मणसंबंधित्वेनमद्यमात्रनिषेधेसत्यपि गौडीमाध्वीचपैष्टीचविज्ञेया-
त्रिविधासुरा यथैवैकातथासर्वानपातव्याद्विजोत्तमैरिति गौडीमाध्व्योःपृथङ्निषेधवचनंदोषगुरुत्वेनसुरासमत्वप्रतिपादनपरम् अयंच
सुरानिषेधोनुपनीतस्यानूढायाश्चकन्यायाश्चभवत्येव तस्माद्ब्राह्मणराजन्यौवैश्यश्चनसुरांपिबेदितिजातिमात्रावच्छेदेननिषेधात् अतश्च 
सुरापीत्वाद्विजोमोहादितिप्रायश्चित्तविधिवाक्येमनुनायत्द्विजग्रहणंकृतंतद्वर्णत्रयोपलक्षणार्थम् निमित्तभूतनिषेधसापेक्षत्वान्नैमित्तिक

विधेर्निषेधेचवर्णमात्रस्यावच्छेदकत्वात् यथायस्यहविर्निरुप्तंपुरस्ताच्चंद्रमाअभ्युदेतीतिनिमित्तवाक्येहविर्मात्राभ्युदयस्यनिमित्तत्वावगतौ
तत्सापेक्षनैमित्तिकवाक्येश्रूयमाणमपित्रेधातंदुलान्विभजेदितितंदुलग्रहणंतंदुलादिस्वरूपहविर्मात्रोपलक्षणम् इयांस्तुविशेषः पादोबा
लेषुदातव्यःसर्वपापेष्वयंविधिरितिवचनात्कामकारेपिनमरणांतिकं किंतुपादमेवद्विगुणीकृत्यषड्वार्षिकंदेयम् विहितंयदकामानांकामात्तुद्वि
गुणंचरेदित्यंगिरःस्मरणात् एवंवृद्धातुरादिष्वपियोज्यम् तथा तद्ब्राह्मणेननात्तव्यंदेवानामश्नताहविरितिमद्यस्यापिजातिमात्रावच्छेदेननि
षिद्धत्वादनुपनीतेनापिनपेयम् ननुकथमनुपनीतस्यदोषः प्रागुपनयनात्कामचारवादभक्षा इतिगौतमवचनात् तथामद्यमूत्रपुरीषाणां
भक्षणेनास्तिकश्चन दोषस्त्वापंचमाद्वर्षादूर्ध्वंपित्रोःसुहृद्गुरोरितिकुमारवचनाच्चदोषाभावावगतेः उच्यते सुरामद्ययोर्निषेधवाक्येजातिमात्र-
स्यावच्छेदकत्वश्रवणादप्रतिहतैवनिषेधप्रवृत्तिः अतएवस्मृत्यंतरेनिषेधवचनम् सुरापाननिषेधस्तुजात्याश्रयइतिस्थितिरिति अतःपादोबा
लेषुदातव्यःसर्वपापेष्वयंविधिरितिसर्वपापेषुसुरापानादिष्वितिवचनात्पादएवसुरापानेप्रायश्चित्तम् तथाजातूकर्ण्येनमद्यपानेपिप्रायश्चि-
त्तमुक्तम् अनुपेतस्तुयोबालोमद्यंमोहात्पिबेद्यदि तस्यकृच्छ्रत्रयंकुर्यान्माताभ्राताथापितेति अतोगौतमवचनंसुरादिव्यतिरिक्तशुष्कप-
र्युषितादिविषयम् कुमारवचनंतुस्वल्पदोषख्यापनपरम् अतएवप्रागुपनयनात्कृतदोषस्योपनयनमेवप्रायश्चित्तमित्युक्तंमनुना गर्भैर्होमै
र्जातकर्मचूडामौंजीनिबंधनैः बैजिकंगार्भिकंचैनोद्विजानामपमृज्यतइति अयमत्रार्थः त्रैवर्णिकानामुत्पत्तिप्रभृतिपैष्टीप्रतिषेधः ब्राह्मणस्य
तुमद्यमात्रनिषेधोप्युत्पत्तिप्रभृत्येव राजन्यवैश्ययोस्तुनकदाचिदपिगौड्यादिमद्यप्रतिषेधः शूद्रस्यतुनसुराप्रतिषेधोनापिमद्यमात्रप्रतिषेधः २५३

प्रायश्चित्तांतरमाह गोच्छगादिलोमनिर्मितवस्त्रप्रावृतोवालवासाः वालवासोग्रहणंचीरवल्कलयोरुपलक्षणार्थं सुरापगुरुतल्पगोचीरवल्कल
वाससोब्रह्महत्याव्रतंचरेयातामितिप्रचेतःस्मरणात् जटीग्रहणंमुंडलनिराकरणार्थम् ब्रह्महत्याव्रतंचरेदित्यनेनैवसिद्धेपद्वालवसनादिग्रहणं
तदन्यत्रसंभवेस्वयंमारितशिरःकपालादिनिवृत्त्यर्थं इदमकामनोजलबुद्ध्यायःसुरांपिबतितद्विषयम् इयंविशुद्धिरुदितात्प्रमाप्या कामतोद्विज
मित्यकामत्वोपाधित्वेनविहितस्यैवद्वादशवार्षिकस्यातिदेशात् अत्रचसुरापानस्यमहापातकत्वात्तत्यातिदेशिकत्वेसंपूर्णमेवद्वादशवार्षिकं

वालवासाजटीवापिब्रह्महत्याव्रतंचरेत् पिण्याकंवाकणान्वापिभक्षयेत्त्रिसमानिशि २५४

कुर्यात् नपादोनम् अतएववृद्धहारीतः द्वादशभिर्वर्षैर्महापातकिनःपूयंतेइति अथवापिण्याकपिंडान्त्रिसमाःवर्षत्रयपर्यंतंरात्रौभक्षयेत्
कणास्तंदुलवास्तान्वापूर्ववद्भक्षयेत् एतच्चसकृदेवकार्यम् कणान्वाभक्षयेदब्दंपिण्याकंवासकृन्निशीतिमनुस्मरणात् अस्यचपिण्याकादि
भक्षणस्यभोजनकार्येविहितत्वादशनांतरपरित्यागः एतच्चोदकबुद्ध्यासुरापानेच्छर्दनोत्तरकालेवेदितव्यम् एतदेवव्रतंकुर्यान्मद्यपश्छर्दने ८१
कृते पंचगव्यंतुतस्योक्तंप्रत्यहंकायशोधनमितिव्यासवचनात् नचसुरासंसृष्टेयदुपलभ्यमानतद्गंधरसोदकपानविषयमिदमितिसुंदरम्

संसर्गेपिसुरात्वस्यानपायात् यथाज्यत्वस्यपृषदाज्ये अतएवाज्यपाइतिनिगमाःकार्याःनपृषदाज्यपाइत्येवमुक्तंन्यायविद्भिः यत्पुनरापस्तंब
वचनम् स्तेयंकृत्वासुरांपीत्वागुरुदारान्गत्वाब्राह्मणहत्यांचकृत्वाचतुर्थकालंमितभोजनोयोभ्युपेयात्सवनानुकल्पंस्थानासनाभ्यांविहरंस्त्रिभि
र्वर्षैःपापंव्यपनुदतीति यत्त्वंगिरोवचनम् महापातकसंयुक्ताववर्षैःशुद्ध्यंतितेत्रिभिरिति तदुभयमपिपिण्याकंवाकणान्वेत्यनेनैकविषयम्
यदपियमेनप्रायश्चित्तद्वयमुक्तम् बृहस्पतिसवनेनेष्ट्वासुरापोब्राह्मणःपुनः समत्वंब्राह्मणैर्गच्छेदित्येषावैदिकीश्रुतिः भूमिप्रदानंयःकुर्या
त्सुरांपीत्वाद्विजोत्तमः पुनर्नचपिबेत्तांतुसंस्कृतःसविशुध्यतीति तदुभयंपूर्वेणसहैकविषयम् यद्वाअतिरिक्तदक्षिणाकल्पाश्रयेणद्वादश
वार्षिकेणसहविकल्प्यते अत्रापिबालवृद्धादीनासार्द्धैकवर्षीयमनुपनीतानांतुनवमासिकमित्येवंकल्पनाकार्या यत्तुमनुवचनं कणान्वा-
भक्षयेदब्दंपिण्याकंवासकृन्निशि सुरापानापनुत्यर्थंवालवासाजटीध्वजीति तत्तुतालुमात्रसंयोगेसुरायाअबुद्धिपूर्वेद्रष्टव्यम् ननुचद्रव
द्रव्यस्याभ्यवहरणंपानमित्युच्यते अभ्यवहरणंचकंठस्याधोनयनं नतात्वादिसंयोगमात्रमतःकथंतत्रपाननिमित्तंप्रायश्चित्तमुच्यते
येनतात्वादिसंयोगेनविनापानक्रियाननिर्वर्त्तते सोपिपानक्रियाप्रतिषेधेनप्रतिषिद्धः अतोयद्यपिमुख्यपानाभावान्नमहापातकत्वंतथापित
त्प्रतिषेधेनतदंगभूताव्यभिचारितात्वादिसंयोगस्यापिप्रतिषिद्धत्वेनदोषस्यविद्यमानत्वाद्भवत्येवप्रायश्चित्तम् चरेद्व्रतमहत्वापिघातार्थंचि
त्समागतइति यथाहननप्रतिषेधेनतदंगभूताध्यवसायादेरपिप्रतिषिद्धत्वात्प्रायश्चित्तविधानम् यत्तुबौधायनीयम् त्रैमासिकममत्या-
सुरापानेकृच्छ्राब्दपादंचरित्वापुनरुपनयनमिति यच्चयाम्यं सुरांपीत्वाद्विजंहत्वारुक्मंहृत्वाद्विजन्मनः संयोगंपतितैर्गत्वाद्विजश्चांद्रायणं

चरेदिति यदपिबार्हस्पत्यं गौडीमाध्वीसुरांपैष्टींपीत्वाविप्रःसमाचरेत् तप्तकृच्छ्रंपराकंचचांद्रायणमनुक्रमादिति तत्त्रितयमप्यनन्यौषध
साध्यव्याध्युपशमार्थेपानेवेदितव्यम् प्रायश्चित्तस्याल्पत्वात् यदातुसुरासंसृष्टंशुष्करसमेवान्नंभक्षयतितदापुनरुपनयनम् यथाहमनुः
अज्ञानात्प्राश्यविण्मूत्रंसुरासंसृष्टमेवच पुनःसंस्कारमर्हंतित्रयोवर्णाद्विजातयइति यदाशुष्कसुराभांडस्थोदकंपिबतितदाशातातपेनोक्तं
कुर्यात् सुराभांडोदकपानेच्छर्दनंघृतप्राशनमहोरात्रोपवासश्चेति यत्तुबोधायनीयम् सुरापानस्ययोभांडेष्वपःपर्युषिताःपिबेत् शंखपु
ष्पीविपक्वंतुक्षीरंसतुपिबेत्त्र्यहमितितत्पर्युषितत्वादधिकम् अकामतोभ्यासेपुनर्मनुनोक्तं अपःसुराभाजनस्थामद्यभांडस्थितास्तथा पं
चरात्रंपिबेत्पीत्वाशंखपुष्पीशृतंपयइति यत्तुविष्णूक्तम् अपःसुराभाजनस्थाःपीत्वासप्तरात्रंशंखपुष्पीशृतंपयःपिबेदिति तन्मतिपूर्वक
पाने ज्ञानतोभ्यासेतु बृहद्यमआह सुराभांडस्थितंतोयंयदिकश्चित्पिबेद्द्विजः सद्वादशाहंक्षीरेणपिबेद्ब्राह्मींसुवर्चलामिति सुरापस्यमु
खगंधघ्राणेतुमानवम् ब्राह्मणस्यसुरापस्यगंधमाघ्रायसोमपः प्राणानप्सुत्रिराचम्यघृतंप्राश्यविशुध्यतीति तत्सोमयाजिनएवामतिपूर्वे
मतिपूर्वेतुद्विगुणम् अपीतसोमस्यतुकल्प्यम् साक्षात्सुरागंधघ्राणस्यतुघ्रातिरघ्रेयमद्ययोरितिजातिभ्रंशकरत्वात् जातिभ्रंशकरंकर्म
कृत्वान्यतममिच्छया चरेत्सांतपनंकृच्छ्रंप्राजापत्यमनिच्छयेतिमनूक्तंद्रष्टव्यम् २५४ एवमुख्यसुरापानेप्रायश्चित्तमुक्त्वामद्यपानेप्रा
यश्चित्तमाह यःपुनरज्ञानादुदकबुध्यासुरांमद्यंब्राह्मणःपिबति येचब्राह्मणादयोरेतोविण्मूत्राणिप्राश्नंतितेत्रयोपिद्विजातयोवर्णास्तप्तकृ 
च्छ्रपूर्वकंपुनरुपनयनंप्रायश्चित्तमर्हंति अत्रमद्यपानेयोयंपुनःसंस्कारःसब्राह्मणस्यैव क्षत्रियविशोस्तदप्यनुज्ञानस्यदर्शितत्वात् सुराश

ब्दश्चात्रमद्यपरः प्रायश्चित्तस्यातिलघुत्वात् अज्ञानतोमुख्यसुरापानेद्वादशवार्षिकस्यविहितत्वाच्च अतएवगौतमेनात्रमद्यशब्दःप्रयुक्तः
अमत्यामद्यपानेपयोघृतमुदकंवायंप्रतित्र्यहंतप्तानिपिबेत्सतप्तकृच्छ्रस्ततोस्यसंस्कारोमूत्रपुरीषकुणपरेतसांप्राशनेचेति यदप्यस्मिन्नेव
विषयेमनुनोक्तं अज्ञानाद्वारुणींपीत्वासंस्कारेणविशुध्यतीति तदपितप्तकृच्छ्रपूर्वकमेव गौतमवाक्यानुरोधात् पुनःसंस्कारश्चपुनरुपनय
नम् तच्चाश्वलायनाद्युक्तक्रमेणकर्तव्यम् यथोक्तं अथोपेतपूर्वस्यकृताकृतंकेशवपनंमेधाजननंचानिरुक्तंपरिदानंकालश्चतत्सावित्रींतूर्णी

अज्ञानात्तुसुरांपीत्वारेतोविण्मूत्रमेवच पुनःसंस्कारमर्हंतित्रयोवर्णाद्विजातयः २५५

महइतिसावित्रीमिति मतिपूर्वमद्यपानेवसिष्ठोक्तंद्रष्टव्यम् मत्यामद्यपानेत्वसुरायाःसुरायाश्चाज्ञानेकृच्छ्रातिकृच्छ्रौघृतप्राशनंपुनःसंस्का
रश्चेति चांद्रायणंवाशंखोक्तम् असुरामद्यपायीचांद्रायणंचरेदिति मुखमात्रप्रवेशेतुमद्यस्यापस्तंबीयंषड्रात्रम् अभक्ष्याणामपेयानाम-
लेह्यानांचभक्षणे रेतोमूत्रपुरीषाणांप्रायश्चित्तंकथंभवेत् पद्मोदुंबरबिल्वानांपलाशस्यकुशस्यच एतेषामुदकंपीत्वाषड्रात्रेणविशुध्य
तीति एतच्चतालादिमद्यविषयम् गौडीमाध्व्योःपुनरज्ञानपानेअसुरायाःसुरायाश्चाज्ञानतइतिवसिष्ठोक्तःकृच्छ्रातिकृच्छ्रसहितःपुनःसं

स्कारो घृतप्राशश्च द्रष्टव्यः तयोर्मतिपूर्वपानेतु पिण्याकंवाकणान्वेतित्रैवर्णिकम् कामतस्तुतत्पानाभ्यासे अभ्यासेतुसुरायाअग्निवर्णांसुरांपिबेन्मर
णात्पूतोभवतीतिवासिष्ठेमरणांतिकंद्रष्टव्यम् नात्रसुराशब्दःपैष्ट्यभिप्रायः तस्याःसकृत्पानेपिमरणांतिकस्यदर्शितत्वात् मद्यवासितशुष्कभां-
डोदकस्याज्ञानतःपाने त्र्यहव्रतमोक्तं मद्यभांडस्थितंतोयंयदिकश्चित्पिबेत्द्विजः कुशमूलविपक्वेनत्र्यहंक्षीरेणवर्त्तयेदिति अज्ञानतोभ्यासेतुवसि
ष्ठेनोक्तम् मद्यभांडस्थितंतोयंयदिकश्चित्पिबेत्द्विजः पद्मोदुंबरबिल्वानांपलाशस्यकुशस्यच एतेषामुदकंपीत्वात्रिरात्रेणविशुध्यतीति ज्ञा

पतिलोकंनसायातिब्राह्मणीयासुरांपिबेत् इहैवसाशुनीगृध्रीसूकरीचोपजायते २५६

नतःपानेतुविष्णूक्तं मद्यभांडस्थितंतोयंपीत्वापंचरात्रंशंखपुष्पीशृतंपयःपिबेदिति ज्ञानतोभ्यासेतुशंखेनोक्तं मद्यभांडस्थितंतोयंपीत्वासप्तरा
त्रंगोमूत्रंयावकंपिबेदिति अत्यंताभ्यासेतुहारीतोक्तम् मद्यभांडस्थितंतोयंयदिकश्चित्पिबेत्द्विजः द्वादशाहंतुपयसापिबेद्ब्राह्मीसुवर्चलामि
ति एषुचवाक्येषुद्विजग्रहणंब्राह्मणाभिप्रायं क्षत्रियवैश्ययोरप्रतिषेधादितिदर्शितंप्राक् इदंचगौडीमाध्वीभांडस्थजलपानविषयंगुरुत्वा 
त्प्रायश्चित्तस्य तालादिमद्यभांडोदकपानेतुकल्प्यम् २५५ द्विजातिभार्यांप्रत्याह याद्विजातिभार्यासुरांपिबतिसाकृतपुण्यापिसतीपतिलोकं

नयातिकिंत्विहैवलोकेश्वगृध्रसूकरलक्षितांतिर्यग्योनिंक्रमेणप्राप्नोति ब्राह्मणीग्रहणंचात्रतिस्रोवर्णानुपूर्व्येणेतिन्यायेनयस्यद्विजातेर्यावन्
त्योभार्यास्तासामुपलक्षणम् अतएवमनुः पतत्यर्धंशरीरस्ययस्यभार्यासुरांपिबेत् पतितार्धशरीरस्यनिष्कृतिर्नविधीयतेइति धर्मार्थकामे
षुसहाधिकाराद्दंपत्योरेकशरीरत्वमेवातोयस्यद्विजातेर्भार्यासुरांपिबतितस्यभार्यारूपमर्धंशरीरंपततिपतितस्यचभार्यारूपस्यार्धशरीरस्यनि
ष्कृतिर्नविधीयते तस्माद्विजातिभार्ययाब्राह्मण्याद्ययासुरानपातव्या तस्माद्ब्राह्मणराजन्यौवैश्यश्चनसुरांपिबेदितिनिषेधविधौलिंगस्या

ब्राह्मणस्वर्णहारीतुराज्ञेमुशलमर्पयेत् स्वकर्मख्यापयंस्तेनहतोमुक्तोपिवाशुचिः २५७

विवक्षितत्वेनवर्णत्रयभार्याणामपिप्रतिषेधेसिद्धेपुनर्वचनंद्विजातिभार्यायाःशूद्रायाअपिसुराप्रतिषेधप्राप्त्यर्थं अतोद्विजातिभार्याभिःसु
रापानप्रायश्चित्तस्यार्धंकार्यम् शूद्रभार्यायास्तुशूद्रायाःशूद्रवदेव नप्रतिषेधः सुरापानसमेषुतुनिषिद्धभक्षणादिषुसुरापानप्रायश्चित्ता
र्धमित्युक्तंप्राक् इतिसुरापानप्रायश्चित्तप्रकरणम् २५७ क्रमप्राप्तंसुवर्णस्तेयप्रायश्चित्तमाह ब्राह्मणस्वामिकंसुवर्णंयोपहरत्यसौसुव
र्णस्तेयंमयाकृतमित्येवंस्वकर्मख्यापयन्राज्ञेमुशलंसमर्पयेत् मुशलसमर्पणस्यदृष्टार्थत्वात्तेनमुशलेनराजातंहन्यात् तेनराज्ञाहतोमुक्तो

वाशुद्धोभवति अपहरणशब्देनचसमक्षंपरोक्षंवाबलाच्चौर्येणवाक्रयादिस्वत्वहेतुंविनाग्रहणमुच्यते मुशलंसमर्पयेदितियद्यपिसामान्ये
नोक्तंतथापितस्यहननार्थत्वात्तत्समर्थस्यायोमयादेर्ग्रहणम् अतएवमनुनोक्तम् स्कंधेनादायमुशलंलकुटंवापिखादिरम् असिंचोभयतस्ती
क्ष्णमायसंदंडमेववेति शंखेनाप्यत्रविशेषउक्तः सुवर्णस्तेनःप्रकीर्णकेशआर्द्रवासाआयसंमुसलमादायराजानमुपतिष्ठेदिदंमयापापंकृतम
नेनमुशलेनमांघातयस्वेतिसराज्ञाशिष्टःसन्पूतोभवतीति हननंचावृत्तिविधानाभावात्सकृदेवकार्यम् अतएवमनुनोक्तम् ततोमुशलमादा
यसकृद्धन्यात्तुतंस्वयमिति एवंसकृत्ताडनेनहतोमृतःशुद्ध्येत् मुक्तोवामरणाज्जीवन्नपिशुद्ध्येदितियावत् तथाचसंवर्तेनोक्तम् ततोमुशल
मादायसकृद्धन्यात्तुतंस्वयम् यदिजीवतिसस्तेनस्ततस्तेयाद्विमुच्यतेइति यथोक्तंब्रह्मवधे मृतकल्पःप्रहारार्त्तोजीवन्नपिविशुद्ध्यतीति
नन्वताडितएवराज्ञामुक्तःस्तेनःशुध्येदित्ययमर्थःकस्मान्नेष्यते उच्यते अघ्नन्नेनस्वीराजेतिगौतमीयेताडनमकुर्वतोराज्ञोदोषाभिधानात्
भवतुराज्ञोदोषः तथाप्यतिक्रांतनिषेधेनराज्ञास्नेहादिनामुक्तःस्तेनःकथंनशुद्ध्येदितिचेत् उच्यते एवंचसत्यकारणिकाशुद्धिरापतेत् उच्यते
मोक्षोत्तरकालंद्वादशवार्षिकाद्यनुष्ठानेनशुद्ध्यंगीकरणान्नाकारणिकेति तदप्यसुंदरं मुक्तःशुचिरितिमोक्षस्यैवशुद्धिहेतुत्वाभिधानात् अ
तःप्राच्येवव्याख्याज्यायसी मुक्तोवामरणाज्जीवन्नपिविशुद्ध्येदितियावत् इदंचमरणांतिकंसार्ववर्णिकस्यापहर्त्तुर्नतुब्राह्मणस्यैव ब्राह्म-
णःस्वर्णहारीतिनैमित्तिकवाक्येविशेषानुपादानात् क्षत्रियादीनांचमहापातकित्वाविशेषात्प्रायश्चित्तांतरस्यानाम्नानाच्च यत्पुनर्मनिवेसुव ८४
र्णस्तेयकृद्विप्रइतिविप्रग्रहणंतन्नरमात्रोपलक्षणं प्रायश्चित्तीयतेनरइतितस्यैवप्रकृतत्वात् ब्रह्महत्यासुरापानंस्तेयंगुर्वंगनागमइतिनि

मित्तवाक्येविशेषानुपादानाच्च तत्सापेक्ष्यनैमित्तिकवाक्येसुवर्णस्तेयकृद्विप्रइत्यत्रश्रूयमाणमप्युपलक्षणमेवयुक्तम् यथाभ्युदितेष्ट्यांयस्य
हविरितिवाक्येतंदुलग्रहणंहविर्मात्रस्य इदंचराज्ञाहननंब्राह्मणव्यतिरिक्तस्य नजातुब्राह्मणंहन्यात्सर्वपापेष्वपिस्थितमितिमानवेब्राह्म
णवधस्यनिषिद्धत्वात् यदिकथंचिदतिक्रांतनिषेधेनराज्ञाहन्यतेतथापिशुद्धोभवति वधेनशुद्ध्यतिस्तेनोब्राह्मणस्तपसैववेतिब्राह्मण-
स्यापिवधेनशुद्ध्यभिधानात् नचतपसैववेत्येवकारेणवधनिषेधः तस्यकेवलतपसापिशुद्ध्यभिधानपरत्वात् यदिवधोनिषिद्धस्त
र्हितपसैववेतिविकल्पाभिधानमनुपपन्नं नचदंडाभिप्रायंविकल्पाभिधानम् तस्यानिर्दिष्टत्वात् किंचएकार्थास्तुविकल्पेरन्नितिन्यायेनैकार्था
नामेवविकल्पोव्रीहियवयोरिव नचदंडतपसोरेकार्थत्वं दंडस्यदमनार्थत्वात्तपसश्चपापक्षयहेतुत्वात् नचवधेनशुद्ध्यतिस्तेनइतिसामान्यवि
षयेणवधेनब्राह्मणस्तपसैववेतिविशिष्टविषयस्यतपसोविकल्पोपपत्तिः नहिभवतिब्राह्मणेभ्योदधिदीयतांतक्रंकौंडिन्यायवेतिविकल्प
स्तस्माद्वयोरपिसामान्यविषयत्वमेव यद्वाक्षत्रियस्यापिननिषेधः मनुनासुवर्णस्तेयकृद्विप्रइत्यभिधाय गृहीत्वामुशलंराज्ञासकृद्धन्यात्तुतं
स्वयमितिसर्वनाम्नाप्रकृतब्राह्मणपरामर्शेनैवहननविधानात् नजातुब्राह्मणंहन्यादित्यस्यप्रायश्चित्तव्यतिरिक्तदंडरूपहननविषयत्वेना-
प्युपपत्तेः एतच्चमरणांतिकंमतिपूर्वसुवर्णस्तेयविषयम् मरणांतिकंहियत्प्रोक्तंप्रायश्चित्तंमनीषिभिः तत्तुकामकृतेपापेविज्ञेयंनात्रसंश
यइतिमध्यमांगिरसःस्मरणात् अत्रचसुवर्णशब्दःपरिमाणविशिष्टहेमद्रव्यवचनोनजातिमात्रवचनः जालसूर्यमरीचिस्थंत्रसरेणूर
जःस्मृतं तेष्टौलिक्षातुतास्तिस्रोराजसर्षपउच्यते गौरस्तुतेत्रयःषड्विर्यवोमध्यस्तुतेत्रयः कृष्णलःपंचतेमाषस्तेसुवर्णस्तुषोडशेतिषो

डशमाषपरिमिते हेमनि सुवर्णशब्दस्य परिभाषितत्वात् अतो ब्राह्मणसुवर्णापहरणं महापातकमित्यादिप्रयोगेषु कृतपरिमाणस्यैव सुवर्णस्य-
ग्रहणं युक्तम् परिमाणकरणस्य दृष्टार्थत्वात् न त्वदृष्टार्थं परिमाणस्मरणम् नापि लोकव्यवहारार्थम् अतत्परत्वात्स्मृतिकारप्रवृत्तेः अत
एवोक्तं न्यायविद्भिः कार्यकाले संज्ञापरिभाषयोरुपस्थानमिति तथा नामापि गुणफलोपबंधेनार्थवदित्युक्तं पंचदशान्याज्यानीत्यत्र तु न च दंडमा
त्रोपयोगि परिमाणस्मरणमिति युक्तम् तावन्मात्रार्थत्वे प्रमाणाभावात् अतो विशेषात्सर्वशेषत्वमेव युक्तम् किंच दंडस्य दमनार्थत्वाद्दमन-
स्य च परिमाणविशेषमंतरेणासिद्धेर्नातीव परिमाणस्मरणमुपयुज्यते शब्दैकसमधिगम्ये तु महापातकित्वादावेकांततः स्मरणमुपयुज्यते अ
तः षोडशमाषात्मकसुवर्णपरिमितहेमहरण एव महापातकित्वं तन्निमित्तमरणांतिकादिप्रायश्चित्तविधानं च द्वित्र्यादिमाषात्मकहेमहरणं
तु क्षत्रियादिहेमहरणवदुपपातकमेवेति युक्तम् किंच सुवर्णान्न्यूनपरिमाणहेमहरणे प्रायश्चित्तांतरोपदेशात्तत्परिमाणस्य हेम्नो हरणे मर
णांतिकादिप्रायश्चित्तमिति युक्तम् तथा चोक्तं षट्त्रिंशन्मते वालाग्रमात्रे पहृते प्राणायामं समाचरेत् लिक्षामात्रे पि च तथा प्राणायामत्रयं
बुधः राजसर्षपमात्रे तु प्राणायामचतुष्टयम् गायत्र्यष्टसहस्रं च जपेत्पापविशुद्धये गौरसर्षपमात्रे च सावित्रीं वै दिनं जपेत् यवमात्रे सु
वर्णस्य प्रायश्चित्तं दिनद्वयम् सुवर्णकृष्णलस्यैकमपहृत्य द्विजोत्तमः कुर्यात्सांतपनं कृच्छ्रं तत्पापस्यापनुत्तये अपहृत्य सुवर्णस्य माष
मात्रं द्विजोत्तमः गोमूत्रयावकाहारस्त्रिभिर्मासैर्विशुध्यति सुवर्णस्यापहरणे वत्सरं यावकी भवेत् ऊर्ध्वं प्राणांतिकं ज्ञेयमथवा ब्रह्महव्रत
म् इदं च वत्सरं यावकाशनं किंचिन्न्यूनसुवर्णापहारविषयम् सुवर्णापहारे मन्वादिमहास्मृतिषु द्वादशवार्षिकविधानात् बलाद्ये कामकारे



णगृह्णंति स्वं नराधमाः तेषां तु बलहर्तॄणां प्राणांतिकमिहोच्यते सुवर्णपरिमाणादर्वागपीत्यभिप्रेतम् इदं च स्तेयप्रायश्चित्तमपहृतं धनं
तत्स्वामिने दत्त्वैव कार्यं स्तेये ब्रह्मस्वभूतस्य सुवर्णादेः कृते पुनः स्वामिने पहृतं देयं हर्त्रा त्वेकादशाधिकमिति स्मरणात् तथा चरेत्सांतपनं कृ
च्छ्रं तन्निर्दाप्यात्मशुद्धये इति मनुस्मरणाच्च दंडप्रकरणे प्युक्तं शेषेष्वेकादशगुणं दाप्यस्तस्य च तद्धनमिति यदा त्वशक्त्या राजा हंतुमसमर्थ
स्तदा वसिष्ठोक्तं द्रष्टव्यम् स्तेनः प्रकीर्णकेशो राजानमभियाचेत ततस्तस्मै राजौदुंबरं शस्त्रं दद्यात्तेनात्मानं प्रमापयेत् मरणात्पूतो भवतीति-

अनिवेद्य नृपे शुध्येत्सुरापव्रतमाचरन् आत्मतुल्यं सुवर्णं वा दद्याद्वा विप्रतुष्टिकृत् २५८

विज्ञायत इति औदुंबरं ताम्रमयम् यदपि द्वितीयं प्रायश्चित्तं तेनोक्तम् निःकालको गोघृताक्तो गोमयाग्निना पादप्रभृत्यात्मानं प्रमापयेन्मर
णात्पूतो भवतीति विज्ञायत इति तदपि गुरुश्रोत्रिययागस्थादिविप्रद्रव्यापहारविषयम् क्षत्रियाद्यपहर्तृविषयं वा तत्र निःकालक इति नि
र्गतकेशश्मश्रुलोमाभिधीयते तथाश्वमेधाद्यनुष्ठानेन वा यथा प्रचेतसा मरणांतिकमभिधायोक्तम् इष्ट्वा वाश्वमेधेन गोसवेन वा विशुध्ये
दिति एतच्च विट्क्षत्रियाद्यपहर्तृविषयम् २५७ प्रायश्चित्तांतरमाह स्वीयं स्तेयं राजन्यनिवेद्य सुरापव्रतं द्वादशवार्षिकमाचरन् शुध्येत्

शवशिरोध्वजतत्कपालधारणनिराकरणार्थंसुरापव्रतमित्युक्तम् एतच्चाकामकारविषयम् इयंविशुद्धिरुदिता प्रमाप्याकामतोद्विजमित्य-
कामतोविहितस्यैवद्वादशवार्षिकस्यातिदेशात् नन्वकामतोपहारएवनसंभवतीतिकथंतद्विषयत्वमुच्यते यदावस्त्रप्रांतग्रथितंसुवर्णादिक
मज्ञानादपहरतिरजतादिद्रव्यांतरबुद्ध्यावाद्दत्वानंतरमेवान्यस्मैदत्तंनाशितंवानपुनःस्वामिनेप्रत्यर्पितंतदासंभवत्येवाकामतोपहारः यस्तु
ताम्रादिकरसवेधाद्यापादितसुवर्णरूपस्यापहारोनतत्रेदंप्रायश्चित्तम् मुख्यजातिसमवायाभावात् नचमुख्यसादृश्यमात्रेणगौणेमुख्यध-
र्मभवंति यद्यपीदृशमेवासुवर्णंसुवर्णभ्रांत्यापहरतितथापिनेदंप्रायश्चित्तम् असुवर्णापहारित्वादेव नचसृष्टश्चेद्ब्राह्मणवधेअहत्वापीति
वदत्रापिदोषइतिवाच्यम् असुवर्णेप्रवृत्तत्वादेव नत्वब्राह्मणःसृष्टश्चेदित्यस्यविषयः यच्चेदंमनसापापंध्यात्वाप्रणवपूर्वव्याहृतीर्मनसा-
जपेत् व्याहृत्याप्राणायामंत्रिराचरेत् प्रवृत्तौकृच्छ्रंद्वादशरात्रंचरेदिति तदपिसम्यगर्थप्रवृत्तिविषयम् अतोनेदृशमज्ञानतःस्वर्णापहारःप्रा
यश्चित्तस्यनिमित्तम् किंतुरजतादिबुद्ध्यापूर्वोक्तएवस्वर्णापहारः अस्मिन्नेवविषयेयदापहर्तात्यंतमहाधनःतदात्मतुलितंसुवर्णंदद्यात्
अथतावद्धनंनास्तितपश्चर्यायांचाशक्तस्तदाविप्रतुष्टिकृद्विप्रस्ययावज्जीवंकुटुंबभरणपर्याप्ततयातुष्टिकरंधनंदद्यात् यदानिर्गुणस्वामिकं
द्रव्यमपहरतितदा एतदेवव्रतंस्तेनःपादन्यूनंसमाचरेदितिव्यासेनोक्तंनववार्षिकंद्रष्टव्यम् यदापुनरीदृशमेवक्षुत्क्षामकुटुंबपरिरक्षणार्थमपह
रतितदाअत्रिप्रतिपादितषड्वार्षिकंस्वर्जिदादिवाक्रतुंकुर्यात्तीर्थयात्रांवा षडब्दंवाचरेत् कृच्छ्रंयजेद्वाक्रतुनाद्विजः तीर्थानिवाक्रमन्विद्वांस्ततः
स्तेयाद्विमुच्यतइति यदात्वपहारसमनंतरमेवमहाकष्टमयाकृतमितिजातानुतापःप्रत्यर्पयतित्यजतिवातदापस्तंबीयंचतुर्थकालमिताश 

नेनत्रिवर्षमवस्थानमांगिरसंवावज्रारव्यंत्रैवार्षिकंद्रष्टव्यम् ननुप्रत्यर्पणेत्यागेवापहारधात्वर्थस्यनिष्पन्नत्वात्कथंप्रायश्चित्ताल्पत्वम् अ
थानिष्पन्नस्तदाप्रायश्चित्ताभावएवस्यान्नतुप्रायश्चित्ताल्पत्वम् मैवं अपहारस्योपभोगादिफलपर्यंतत्वादुपभोगात्प्राङ्निवृत्तौचपुष्कल-
स्यापहारार्थस्याभावाद्युक्तमेवप्रायश्चित्ताल्पत्वंपीतवांतइवापेयेद्रव्ये नन्वेवंसतिचौरहस्ताद्बलादाकृष्यग्रहणेपितस्योपभोगलक्षणफला
भावात्प्रायश्चित्ताल्पत्वप्रसंगः मैवं तस्यत्यागेस्वतःप्रवृत्त्यभावात् फलपर्यंतेपहारेस्वतःप्रवृत्तत्वाच्च यस्तुरजतताम्रादिसंसृष्टसुवर्णा
पहारोनतत्रेदंलघुप्रायश्चित्तम् यतःसंसर्गेपिसुवर्णत्वंनापैति आज्यत्वमिवपृषदाज्ये अतस्तत्रद्वादशवार्षिकमेवेतियुक्तम् अथस्वर्णसदृशं
द्रव्यांतरमेवेतिलघुप्रायश्चित्तम् उच्यते नतर्हितत्रत्रैवार्षिकादिलघुप्रायश्चित्तादिविषयता असुवर्णत्वादेव किंतूपपातकप्रायश्चित्तमेव यद
प्यपरमापस्तंबोक्तम् स्तेयंकृत्वासुरांपीत्वाकृच्छ्रंसांवत्सरंचरेदिति तत्सुवर्णपरिमाणादर्वाङ्माषाच्चाधिकपरिमाणद्रव्यविषयम् यत्तूक्तंसुमं
तुना सुवर्णस्तेयीमासंसावित्र्याष्टसहस्रमाज्याहुतीर्जुहुयात् प्रत्यहंत्रिरात्रमुपवासंतप्तकृच्छ्रेणचपूतोभवतीति तत्पूर्वोक्तमाषपरिमाणसुव
र्णापहारप्रायश्चित्तेनसहविकल्पते यदप्यपरंतेनैवोक्तं सुवर्णस्तेयीद्वादशरात्रंवायुभक्षःपूतोभवतीतितन्मनसापहारेप्रवृत्तस्यस्वतएवोपरतापं-
जिहीर्षस्यवेदितव्यम् अत्रापिस्त्रीबालवृद्धादिष्वर्धमेवप्रायश्चित्तंवेदितव्यम् यानिचाश्वरत्नमनुष्यस्त्रीभूधेनुहरणतथैत्यादिनासुवर्णस्तेय
समत्वेनप्रतिपादितानितेष्वर्धमेवकार्यम् यत्पुनश्चतुर्विंशतिमतवचनम् रूप्यंहृत्वाद्विजोमोहाच्चरेच्चांद्रायणव्रतम् गद्याणदशकादूर्ध्वमाश
तात्द्विगुणंचरेत् आसहस्रात्तुत्रिगुणमूर्ध्वंहेमविधिःस्मृतः सर्वेषांधातुलोहानांपराकंतुसमाचरेत् धान्यानांहरणेकृच्छ्रंतिलानामैंदवंस्मृ

तम् रत्नानां हरणे विप्रश्चरेच्चांद्रायणव्रतमिति तदपिगद्याणसहस्राधिकरजतहरणे सुवर्णस्तेयसमप्रायश्चित्तप्रतिपादनार्थं नपुनस्तन्निवृत्त्यर्थम्
यदपिरत्नापहारेचांद्रायणमुक्तम् तदपिगद्याणसहस्राद्धीनमूल्यरत्नापहारे द्रष्टव्यम् ऊर्ध्वंपुनःसुवर्णस्तेयसमम् इतिसुवर्णस्तेयप्रायश्चित्त
प्रकरणम् २५८ उद्देशक्रमप्राप्तंगुरुतल्पगमनप्रायश्चित्तमाह समावागुरुतल्पगइतिवक्ष्यमाणश्लोकगतंगुरुतल्पगपदमात्रंसंबध्यते
तप्तेयःशयनेयथामरणक्षमंभवतितथातप्तेअग्निवर्णीकृतेकार्ष्णायसेशयनेअयोमय्यास्त्रीप्रतिकृत्यातप्तयासहगुरुतल्पगःस्वप्यात् एवंक्र

तप्तेयःशयनेसार्धमायस्यायोषितास्वपेत् गृहीत्वोत्कृत्यवृषणौनैर्ऋत्यांचोत्सृजेत्तनुम् २५९

प्तांतनुंदेहं उत्सृजेन्म्रियेदितियावत् शयनंचगुर्वंगनागमनंमयाकृतमित्येवंस्वकर्मविख्याप्यंकुर्यात् गुरुतल्पोभिभाष्यैनइतिमनुस्मरणात्
तथास्त्रियमालिंग्यकार्यं गुरुतल्पगोमृन्मयीमायसींवास्त्रियाःप्रतिकृतिमग्निवर्णांकृत्वेकार्ष्णायसशयनेअयोमय्यास्त्रीप्रतिकृत्याकृत्वातामालिं
ग्यपूतोभवतीतिवृद्धहारीतस्मरणात् तथामुंडितलोमकेशेनघृताभ्यक्तेनकर्त्तव्यम् निःकालकोघृताभ्यक्तस्तप्तांस्त्रींमृन्मयींपरिष्वज्यमरणा ८७
त्पूतोभवतीतिविज्ञायतइतिवसिष्ठस्मरणात् नचगुरुतल्पोभिभाष्यैनस्तप्तेस्वप्यादयोमये सूर्मींज्वलंतीं वाश्लिष्यमृत्युनासविशुध्यती

तिमनुवाक्याविरोधेनतप्तलोहशयनम् तप्तलोहयोषिदालिंगनंचनिरपेक्ष्यप्रायश्चित्तद्वयमित्याशंकनीयम् आयस्यायोषितास्वपेत् कुत्रेत्या
कांक्षायांतप्तेयःशयनइतिपरस्परसापेक्षतयैकत्वावगमादेककल्पत्वमेवयुक्तम् अथवावृषणौसलिंगौस्वयमुत्कृत्यछित्वांजलिनागृहीत्वा
नैर्ऋत्यांदक्षिणप्रतीच्यांदिशिदेहपातांतमकुटिलगतिर्गत्वातनुमुत्सृजेत् यथाहमनुः स्वयंवाशिश्नवृषणावुत्कृत्याधायचांजलौ नैर्ऋतींदि
शमातिष्ठेदानिपातादजिह्मगइति गमनंपृष्ठतोवाक्षमाणेनकर्त्तव्यम् क्षुरेणशिश्नवृषणावुत्कृत्यानवेक्षमाणोव्रजेदितिशंखलिखितस्म
रणात् एवंगच्छन्यत्रकुड्यादिनाप्रतिबध्यते तत्रैवमरणांततिष्ठेत् सवृषणंशिश्नमुत्कृत्यांजलावाधायदक्षिणाभिमुखोगच्छेद्यत्रैवप्रति
हतस्तत्रैवतिष्ठेदाप्रलयादितिवसिष्ठस्मरणात् यथाहनारदः आसामन्यतमांगच्छन्गुरुतल्पगउच्यते शिश्नस्योत्कर्त्तनात्तत्रनान्योदंडोवि
धीयतेइति एवंदंडार्थमपिलिंगाद्युत्कर्त्तनंपापक्षयार्थमपिभवति इदमेवमरणांतिकदंडमभिप्रेत्योक्तंमनुना राजभिर्धृतदंडास्तुकृत्वापापा
निमानवाः निर्मलाःस्वर्गमायांतिसंतःसुकृतिनोयथेति धनदंडेनपुनःप्रायश्चित्तंभवत्येव प्रायश्चित्तंतुकुर्वाणाःसर्ववर्णायथोदितम् नांक्या
राज्ञाललाटेस्युर्दाप्यास्तूत्तमसाहसमितितेनैवोक्तत्वात् अनयोश्चमरणांतिकयोरन्यतरानुष्ठानेनगुरुतल्पगःशुध्येत् गुरुशब्दश्चात्रमुख्य
यावृत्त्यापितरिवर्त्तते निषेकादीनिकर्माणियःकरोतियथाविधि संभावयतिचान्नेनसविप्रोगुरुरुच्यतेइतिमनुनागुरुत्वप्रतिपादनपरेवा
क्येनिषेकादिकर्तुर्जनकस्यैवगुरुत्वाभिधानात् योगीश्वरेणचनिषेकादिकर्माभिप्रायेणोक्तम् सगुरुर्यःक्रियाकृत्वावेदमस्मैप्रयच्छतीति न
नुगुरुशब्दस्यान्यत्रप्रयोगोपिदृश्यते उपनीयगुरुःशिष्यमित्यादिनाचार्ये. स्वल्पंवाबहुवायस्यश्रुतस्योपकरोतियः तमपीहगुरुंविद्यादिशु

पाऽध्याये व्यासेनाप्यन्यत्र प्रयोगो दर्शितः गुरवो मातृपितृपत्न्याचार्यविद्यादातृज्येष्ठभ्रातरऋत्विजोभयत्रातान्नदातारश्चेति नचानेकार्थक
ल्पनादोषः गुरुशब्दस्य प्रवृत्तिनिमित्तभूतायाः पूजार्हतायाः सर्वत्रानुस्यूतेः दर्शितंचतस्याः प्रवृत्तिनिमित्तत्वंयोगीश्वरेण एतेमान्यायथा
पूर्वमेभ्योमातागरीयसीतिमान्याइत्युपक्रम्यगरीयसीत्युपसंहारंकुर्वता नचोपाध्यायाद्दशाचार्यआचार्याणांशतंपितेत्युपाध्यायादधिका
चार्यात्पितुरतिशयितत्ववचनात्सएवमुख्यइतिवाच्यं आचार्येप्यतिशयितत्वस्याविशिष्टत्वात् उत्पादकब्रह्मदात्रोर्गरीयान्ब्रह्मदःपि
तेति गौतमेनाप्युक्तम् आचार्यःश्रेष्ठोगुरूणामिति किंचयद्यतिशयितत्वमात्रेणमुख्यत्वमुच्यते तर्हिसहस्रमितिवचनान्मातुरेवगुरुत्वंस्यात् तस्मा
त्सर्वेगुरवस्तत्पत्नीगमनंगुर्वंगनागमनमितियुक्तम् उच्यते निषेकादीनीतिमनुवचनंनिषेकादिकर्तुर्जनकस्यगुरुत्वप्रतिपादनपरम् अनन्यपरत्वा
त् यत्पुनर्व्यासगौतमवचनम् तत्परिचर्यापूजादिविधिशेषतयास्तुत्यर्थत्वेनान्यपरम् अतोगुरुत्वप्रतिपादनपरान्निषेकादिमनुवचनात्पितुरेवमुख्यं
गुरुत्वमितिस्थितम् अतएववसिष्ठेनाचार्यपुत्रशिष्यभार्यास्वप्येवमित्याचार्यदारेष्वातिदेशिकंगुरुतल्पप्रायश्चित्तमुक्तम् तथाजातूकर्ण्यादिभिर-
प्युक्तम् आचार्यादेस्तुभार्यासुगुरुतल्पव्रतंचरेदित्यादि आचार्यादिर्मुख्यगुरुत्वेगुरूपदेशतएवव्रतप्राप्तेरतिदेशोनर्थकएवस्यात् किंचसंवर्त्तेन
स्पष्टमेवपितृदारग्रहणंकृतम् पितृदारान्समारुह्यमातृवर्ज्यंनराधमइति षट्त्रिंशन्मतेपि पितृभार्यांतुविज्ञायसवर्णांयोधिगच्छतीति अतो
पिनिषेकादिकर्तापितैवमुख्योगुरुः तच्चगुरुत्वंवर्णचतुष्टयेप्यविशिष्टंनिषेकादिकर्तृत्वाविशेषात् अतःसविप्रोगुरुरुच्यतेइतिविप्रग्रहण ८८
मुपलक्षणम् अतःपितृपत्नीगमनमेवमहापातकम् गमनंचचरमधातुविसर्गपर्यंतंकथ्यते अतस्ततोर्वाङ्निवृत्तौनमहापातकित्वम् तत्र

चेदंतप्तेयःशयनेसार्धमायस्येत्याद्युक्तंमरणांतिकंप्रायश्चित्तद्वयम् तच्चजनन्यामकामकृते तत्सपत्न्यांतुसवर्णायामुत्तमवर्णायांचकृतेद्रष्टव्यम्
पितृभार्यांतुविज्ञायसवर्णांयोधिगच्छति जननींचाप्यविज्ञायनामृतःशुद्धिमाप्नुयादिति षट्त्रिंशन्मतेभिधानात् जनन्यांतुकामकृतेवासिष्ठम्
निःकालकोघृताभ्यक्तोगोमयाग्निनापादप्रभृत्यात्मानमवदाहयेदिति द्रष्टव्यम् अकामतोभ्यासेप्येतदेव ननुचमातुःसपत्नीभगिनीमाचार्य
तनयांतथा आचार्यपत्नींस्वसुतांगच्छंस्तुगुरुतल्पगइति अतिदेशाभिधानान्मातृसपत्नीगमनेत्वौपदेशिकंप्रायश्चित्तमयुक्तम् उच्यते पितृ-
भार्यांसवर्णामित्यस्मादेवसवर्णग्रहणाद्धीनवर्णसपत्नीविषयमिदमातिदेशिकमितिनविरोधः इदंचमुख्यस्यैवपुत्रस्य इतरेषांपुनःपुत्रकार्यकर
त्वमेवनपुत्रत्वम् यथाहमनुः क्षेत्रजादीन्सुतानेतानेकादशयथोदितान् पुत्रप्रतिनिधीनाहुःक्रियालोपान्मनीषिणइति तत्रोभयेच्छातःप्रवृत्तौत
प्तेयःशयनइतिप्रथमंप्रायश्चित्तम् स्वेनप्रोत्साहनेतुगृहीत्वोत्कृत्यवृषणावितिद्वितीयम् अनुबंधातिशयेनप्रायश्चित्तगुरुत्वस्योक्तत्वात् तया
प्रोत्साहितस्यतुमानवम् तप्तलोहशयनज्वलत्सूर्मीलिंगनयोरंतरंद्रष्टव्यम् यत्तुशंखेनद्वादशवार्षिकमुक्तम् अधःशायीजटाधारीपर्णमू
लफलाशनः एककालंसमश्नीतवर्षेतुद्वादशेगते रुक्मस्तेयीसुरापश्चब्रह्महागुरुतल्पगः व्रतेनैतेनशुद्ध्यंतिमहापातकिनस्त्विमेइति तत्स
मवर्णोत्तमवर्णपितृदारगमनेअकामकृते द्रष्टव्यम् तत्रैवकामतःप्रवृत्तस्यरेतःसेकात्प्राङ्निवृत्तौषड्वार्षिकमकामतस्तुत्रिवार्षिकम् जनन्यां
तुकामतःप्रवृत्तस्यरेतःसेकात्प्राङ्निवृत्तौद्वादशवार्षिकमकामतस्तुषड्वार्षिकमितिकल्प्यम् यस्तुसंवर्त्तेन पितृदारान्समारुह्यमातृवर्ज्यं-
नराधमइत्यादिनासमारोहणमात्रेतप्तकृच्छ्रउक्तः सहीनवर्णगुरुदारेषुरेतःसेकादर्वाग्द्रष्टव्यः २५९ ७ ७ ७

प्रायश्चित्तांतरमाह अथवा प्राजापत्यं कृच्छ्रं वक्ष्यमाणलक्षणं समाः वर्षत्रयं चरेत् एतच्च ब्राह्मणीपुत्रस्य शूद्रजातीयगुरुभार्यागमने मतिपूर्वे द्रष्टव्यम् यदा तु गुरुपत्नीं सवर्णां व्यभिचारिणीमबुद्धिपूर्वं गच्छति तदा वेदजपसहितं चांद्रायणत्रयं कुर्यात् तत्रैव कामतः प्रवृत्तावौशनसम् गुरुतल्पाभिगामी संवत्सरं ब्रह्महत्याव्रतं षण्मासान्वा तप्तकृच्छ्रं चरेदिति क्षत्रियागमने तु मतिपूर्वे याज्ञवल्कीयम् मातुः सपत्नीं भगिनीमाचार्यतनयां तथेति गुरुतल्पव्रतातिदेशान्नववार्षिकम् इदं चातिदेशिकं सवर्णगुरुभार्यागमनविषयं न भवति तत्र कामतो मरणांतिकस्याकामतो द्वादशवार्षि-

प्राजापत्यं चरेत्कृच्छ्रं समा वा गुरुतल्पगः चांद्रायणं वा त्रीन्मासानभ्यसेद्वेदसंहिताम् २६०

कस्य विहितत्वात् अतः क्षत्रियादिविषयमेवेति युक्तम् तत्रैव कामतोऽभ्यासे मरणांतिकम् मत्या गत्वा गुरोर्भार्यां गुरोः क्षत्रसुतां द्विजः अंडा-भ्यां रहितं लिंगमुत्कृत्य समृतः शुचिरिति कण्वस्मरणात् अत्रैव विषये प्रायश्चित्तं यदा न चिकीर्षति तदा छिन्नलिंगवधस्तस्य सकामायाः स्त्रिया स्तथेति याज्ञवल्कीयो वधदंडः प्रायश्चित्तस्थाने द्रष्टव्यः वैश्यायां तु गुरुभार्यायां कामतो गमने षड्वार्षिकम् अत एव स्मृत्यंतरं ब्राह्मणीपुत्रस्य- ८९
क्षत्रियायां मातरि गमने पादहान्या द्वादशवार्षिकमेवमन्यवर्णास्विति अयमर्थः ब्राह्मणीपुत्रस्य क्षत्रियायां मातुः सपत्न्यां गमने पादन्यूनं

द्वादशवार्षिकं नववार्षिकमिति यावत् तस्यैव तथाभूतायां वैश्यायां षड्वार्षिकं शूद्रायां तु त्रिवार्षिकं प्रायश्चित्तमिति एवं क्षत्रियापुत्रस्य वैश्यायां मातरि नववार्षिकम् शूद्रायां तु षड्वार्षिकम् एवमेव वैश्यापुत्रस्यापीति वैश्यायां तु कामतोऽभ्यासे मरणांतिकमेव गुरोर्भार्यां तु यो वैश्यां मत्या गच्छेत्पुनः पुनः लिंगाग्रं छेदयित्वा तु ततः शुध्येत्स किल्बिषादिति लौगाक्षिस्मरणात् शूद्रायां तु कामतोऽभ्यासे द्वादशवार्षिकं पुनः शूद्रां गुरोर्गत्वा बुध्या विप्रः समाहितः ब्रह्मचर्यमदुष्टात्मा सञ्चरेद्द्वादशाब्दिकमित्युपमन्युस्मरणात् क्षत्रियायां गुरुभार्यायामबुद्धिपूर्वगमने यमोक्तं त्रिवार्षिकमष्टमकालाशनं द्रष्टव्यम् कालेऽष्टमे वा भुंजानो ब्रह्मचारी सदाव्रती स्थानासनाभ्यां विहरंस्त्रिरह्नोऽभ्युपयन्नपः अधःशायी त्रिभिर्वर्षैस्तदपोहेत पातकमिति अत्रैवाभ्यासे जातूकर्ण्योक्तं गुरोः क्षत्रसुतां भार्यां पुनर्गत्वा त्वकामतः अंडमात्रं समुत्कृत्य शुध्येज्जीवन्मृतोऽपि वेति वैश्यायां त्वकामतो गमने प्राजापत्यं चरेत्कृच्छ्रमित्येतदेव याज्ञवल्कीयम् तथा च वृद्धमनुः गमने गुरुभार्यायाः-पितृभार्यागमे तथा अब्दत्रयमकामात्तु कृच्छ्रं नित्यं समाचरेदिति तत्रैवाभ्यासे हारीतोक्तम् मरणांतिकं ब्रह्मचर्यं अभ्यस्य विप्रो वैश्यायां गुरोरज्ञानमोहितः षडंगं ब्रह्मचर्यं च सञ्चरेद्यावदायुषमिति गुरुभार्यायां शूद्रायां त्वमतिपूर्वे मानवम् खट्वांगी चीरवासा वा श्मश्रुलो विजने वने प्राजापत्यं चरेत्कृच्छ्रमब्दमेकं समाहितमिति अथवा गुरुदाराभिगामी संवत्सरं कंटकिनीं शाखां परिष्वज्याधःशायी त्रिषवणी भैक्ष्याहारः पूतो भवतीति सुमंतूक्तं कुर्यात् तत्रैवाभ्यासे मानवम् चांद्रायणं वा त्रीन्मासानभ्यस्य नियतेंद्रिय इति क्षत्रियायां कामतः प्रवृत्तस्य रेतःसेकादर्वाङ्निवृत्तौ व्याघ्रोक्तं कृच्छ्रं चैवातिकृच्छ्रं च तथा कृच्छ्रातिकृच्छ्रकम् चरेन्मासत्रयं विप्रः क्षत्रियागमने गुरोरिति अत्रेयं व्यव

या·स्मृ·मि· स्या तयाप्रोत्साहितस्यत्रैमासिकंप्राजापत्याचरणम् उभयेच्छातःप्रवृत्तस्यातिकृच्छ्राचरणम् तावदेवस्वेनप्रोत्साहितायांपुनःकृच्छ्राति प्रा·
९० कृच्छ्रानुष्ठानंचतावदेवेति तत्रैवकामतःप्रवृत्तस्यरेतःसेकात्पूर्वंकण्वोक्तंद्रष्टव्यम् चांद्रायणंतप्तकृच्छ्रमतिकृच्छ्रंतथैवच सकृद्गत्वागुरो ३
र्भार्यामज्ञानात्क्षत्रियांद्विजइति तयाप्रोत्साहितस्यातिकृच्छ्रः उभयेच्छातःप्रवृत्तस्यतप्तकृच्छ्रः स्वेनप्रोत्साहितायांतुचांद्रायणम् वै-
श्यायां कामतःप्रवृत्तस्यरेतःसेकात्पूर्वंनिवृत्तौकण्वोक्तं तप्तकृच्छ्रंपराकंचतथासांतपनंगुरोः भार्यांवैश्यांसकृद्गत्वाबुद्ध्यामासंचरेद्द्वि
जइति अत्रोभयोरिच्छातः प्रवृत्तौतप्तकृच्छ्रः स्वेनप्रोत्साहितायांपराकः तयाप्रोत्साहितस्यसांतपनम् अत्रैवाकामतःप्रवृत्तस्यप्रजापतिरा
ह पंचरात्रंतुनाश्नीयात्सप्ताष्टौवातथैवच वैश्यांभार्यांगुरोर्गत्वासकृदज्ञानतोद्विजइति तयाप्रोत्साहितस्यतुपंचरात्रम् उभयेच्छातःप्र
वृत्तौसप्तरात्रम् स्वेनप्रोत्साहितायामष्टरात्रम् शूद्रायांतुकामतःप्रवृत्तस्यरेतःसेकात्पूर्वंनिवृत्तौजाबालिराह अतिकृच्छ्रंतप्तकृच्छ्रंपराकं
चतथैवच गुरोःशूद्रांसकृद्गत्वाबुद्ध्याविप्रःसमाचरेदिति तयाप्रोत्साहितस्यातिकृच्छ्रः उभयेच्छातःप्रवृत्तौतप्तकृच्छ्रः स्वेनप्रोत्साहिता
यांपराकः तत्रैवाकामतःप्रवृत्तस्यदैर्घ्यतमसम् प्राजापत्यंसांतपनंसप्तरात्रोपवासकम् गुरोःशूद्रांसकृद्गत्वाचरेद्विप्रःसमाहितइति
तयाप्रोत्साहितस्यप्राजापत्यं उभयेच्छातःप्रवृत्तौसांतपनम् स्वेनप्रोत्साहितायांसप्तरात्रोपवासइति अनयैवदिशान्येषामपिस्मृतिवचसांविषय
व्यवस्थोहनीया पुरुषवच्चस्त्रीणामप्यत्रमहापातकित्वमविशिष्टम् तथाहिकात्यायनः एषदोषश्चशुद्धिश्चपतितानामुदाहृता स्त्रीणामपिप्र ९०
सक्तानामेषएवविधिःस्मृतइति अतस्तस्याअपिकामतःप्रवृत्तौमरणांतिकमविशिष्टम् अतएवपुरुषस्यमरणांतिकमुक्त्वास्त्रियाअपियोगी-

श्वरेणमरणांतिकंदर्शितम् छित्वालिंगंवधस्तस्यसकामायाःस्त्रियास्तथेति अकामतस्तुमनुनोक्तम् एतदेवव्रतंकार्यंयोषित्सुपतितास्वपीति द्वा
दशवार्षिकमेवार्द्धकल्पनयाकार्यम् यानिपुनर्गुरुतल्पसमानि सखिभार्याकुमारीषुस्वयोनिष्वंत्यजासुच सगोत्रासुसुतस्त्रीषुगुरुतल्पसमंस्मृ
तमिति प्रतिपादितानियानियानिचातिदेशविषयभूतानि पितुःस्वसारंमातुश्चमातुलानींस्नुषामपि मातुःसपत्नींभगिनीमाचार्यतनयांतथा आ
चार्यपत्नींस्वसुतांगच्छंस्तुगुरुतल्पगइतिप्रतिपादितानि तथैकरात्रादूर्ध्वंकामतोभ्यस्तेषुयथाक्रमेणषड्वार्षिकम् नववार्षिकंचप्रायश्चित्तंवि-
ज्ञेयम् अस्मिन्नेवविषयेकामतोत्यंताभ्यासेमरणांतिकं तथाचबृहद्यमः रेतःसिक्त्वाकुमारीषुस्वयोनिष्वंत्यजासुच सपिंडापत्यदारेषुप्राणत्या
गोविधीयतेइति अंत्यजाश्चात्र चांडालःश्वपचःक्षत्तासूतोवैदेहिकस्तथा मागधायोगवौचैवसप्तैतेत्यावसायिनइतिमध्यमांगिरोदर्शिताज्ञा
तव्याःनतुरजकश्चर्मकश्चेत्यादिप्रतिपादिताः तेषुलघुप्रायश्चित्तस्योक्तत्वात् तथाचांडालांत्यस्त्रियंगत्वाभुक्त्वाचप्रतिगृह्यच पतत्यज्ञानतोवि
प्रोज्ञानात्साम्यंतुगच्छतीति चांडालादिसाम्यंप्रतिपादयतामनुनापिकामतोत्यंताभ्यासेमरणांतिकंदर्शितम् तथात्वज्ञानतश्चांडालीगमनाभ्या
सेपतत्यतःपतितप्रायश्चित्तंद्वादशवार्षिकंकुर्यात् कामतोत्यंताभ्यासेचांडालैःसाम्यंगच्छत्यतोद्वादशवार्षिकाधिकंमरणांतिकंकुर्यात् एत-
च्चबहुकालाभ्यासविषयम् एकरात्राभ्यासेतुवर्षत्रयम् यथाहमनुः यत्करोत्येकरात्रेणवृषलीसेवनाद्द्विजः तद्भैक्ष्यभुग्जपन्नित्यंत्रिभिर्व-
र्षैर्व्यपोहतीति अत्रवृषलीशब्देनचांडाल्यभिधीयते चंडालीबंधकीवेश्यारजस्थायाचकन्यका ऊढायाचसगोत्रास्याद्वृषल्यःपंचकीर्त्ति
ताइतिस्मृत्यंतरेवृषलीशब्दप्रयोगदर्शनात् बंधकीस्वैरिणी कथंपुनरत्राभ्यासावगमः उच्यते यत्करोत्येकरात्रेणेत्यत्यंतसंयोगापवर्गवा

भिन्यास्तृतीयायादर्शनात् एकरात्रेणचात्यंतसंयोगोगमनस्याभ्यासंविनानुपपन्न इतिगमनाभ्यासोवगम्यते अतएवैकरात्राद्बहुकालाभ्यासवि
षयंप्रागुक्तंद्वादशवर्षादिगुरुतल्पव्रतातिदेशिकंमरणांतिकंच यदापुनर्ज्ञानतोज्ञानतोवाचांडाल्याद्याःसकृद्गच्छंतितदाचांडालपुल्कसानांतुभुक्त्वा
गत्वान्ययोषितं कृच्छ्राब्दमाचरेत्ज्ञानादज्ञानादैंदवद्वयमिति यमाद्युक्तंसंवत्सरंकृच्छ्रानुष्ठानम् अमत्याचांद्रायणद्वयंयथाक्रमेणद्रष्टव्यम् स्व
योनिषंत्यजासुचेत्येकवाक्यसमभिव्याहाराद्भगिन्यादिष्वपीयमेवव्यवस्थावेदितव्या मरणांतिकंचात्राग्निप्रवेशनम् जनन्यांचभगिन्यांचस्वसु
तायांतथैवच स्नुषायांगमनंचैवविज्ञेयमतिपातकम् अतिपातकिनस्त्वेते प्रविशेयुर्हुताशनमिति कात्यायनस्मरणात् जनन्यांसकृद्गमनेभगि
न्यादिषुचासकृद्गमनेअग्निप्रवेशइतिद्रष्टव्यं महापातकस्यजननीगमनस्यतदतिदेशविषयभूतातिपातकस्यभगिन्यादिगमनस्यतुल्यत्वायो
गात् यत्तुवृद्धहारीतेनोक्तं चांडालींपुल्कसींम्लेच्छींस्नुषांचभगिनींसखीम् मातापित्रोःस्वसारंचनिक्षिप्तांशरणागताम् मातुलानींप्रव्रजितांस्व
गोत्रांनृपयोषितम् शिष्यभार्यांगुरोर्भार्यांगत्वाचांद्रायणंचरेदिति यत्त्वंगिरोवचनम् पतितांत्यस्त्रियोगत्वाभुक्त्वाचप्रतिगृह्यच मासोपवासंकु
र्वीतचांद्रायणमथापिवेति तदुभयमपिगुरुतल्पातिदेशविषयेषुकामतःप्रवृत्तस्यरेतःसेकादर्वाङ्निवृत्तौद्रष्टव्यम् यदपिसंवर्तवचनम् भ
गिनींमातुराप्तांचस्वसारंचान्यमातृजाम् एतागत्वास्त्रियोमोहात्तप्तकृच्छ्रंसमाचरेदिति तदनंतरोक्तएवविषयेअकामतःप्रवृत्तस्यरेतःसेका
दर्वाङ्निवृत्तौद्रष्टव्यम् यदापुनरेताएवअत्यंतव्यभिचारिणीर्गच्छतितदापीदमेवप्रायश्चित्तयुगुलंचांद्रायणतप्तकृच्छ्रात्मकंक्रमेणकामतो ९१
कामतश्चप्रवृत्तौद्रष्टव्यम् साधारणस्त्रीषुगुरुणोपभुक्तास्वपिगमनेगुरुतल्पदोषोनास्ति जात्युक्तंपारदार्यंचकन्यादूषणमेवच साधारण-

स्त्रियोनास्तिगुरुतल्पत्वमेवचेतिव्याघ्रस्मरणात् एवमन्यान्यपिस्मृतिवचनान्युच्चावचप्रायश्चित्तप्रतिपत्तिपराण्यन्विष्यविषयव्यवस्थोह्नी-
यायंथगौरवभयान्नलिख्यंते इतिगुरुतल्पप्रायश्चित्तप्रकरणम् २६० एवंब्रह्महादिमहापातकिप्रायश्चित्तमभिधायावसरप्राप्तंतत्संसर्गि
प्रायश्चित्तमाह एभिःपूर्वोक्तैर्ब्रह्महादिभिरेकंसंवत्सरंयोत्यंतंसंवसतिसहाचरतिसोपितत्समः योयेनसहाचरतिसतदीयमेवप्रायश्चित्तंकु
र्यादितितदीयप्रायश्चित्तातिदेशार्थंतत्समग्रहणम् नपुनःपातकत्वातिदेशार्थं तस्ययश्चैतैःसहसंवसेदित्युपदेशतएवसिद्धत्वात् अत्रच

एभिस्तुसंवसेद्योवैवत्सरंसोपितत्समः

सत्यप्यतिदेशत्वे कृत्स्नमेवद्वादशवार्षिकंकार्यम् साक्षान्महापातकित्वात्संसर्गिणः अपिशब्दान्नकेवलंमहापातकिसंयोगीतत्समःकिंत्व
तिपातकिपातक्युपपातक्यादीनांमध्येयोयेनसहसंसर्गंकरोतिसोपितत्समइतितदीयमेवप्रायश्चित्तंकुर्यादितिदर्शयति अतएवमनुना-
सकलप्रायश्चित्तजातमभिधायाभिहितम् योयेनपतितेनैषांसंसर्गंयातिमानवः सतस्यैवव्रतंकुर्यात्तत्संसर्गविशुद्धयेइति विष्णुनापिसा
मान्येनोपपातक्याद्येनस्तिमात्रसंसर्गेतत्प्रायश्चित्तमात्रकंदर्शितम् पापात्मनायेनसहयःसंसृज्येतसतस्यैवव्रतंकुर्यादिति अतएवमनुना

सामान्येनैनस्विमात्रप्रतिषेधः कृतः एनस्विभिरनिर्णिक्तैर्नार्थं किंचित्समाचरेदिति तथा नसंसर्गं भजेत्सद्भिः प्रायश्चित्ते ऽकृते सतीति एतच्च द्वादशवा-
र्षिकादिपतितप्रायश्चित्तबुद्धिपूर्वसंसर्गविषयम् पतितेन सहोषित्वा जानन्संवत्सरं नरः मिश्रितस्तेन सोब्दांते स्वयंच पतितो भवेदिति देवलस्मर-
णात् अज्ञानतः संसर्गे पुनर्वसिष्ठेनोक्तम् पतितसंप्रयोगे तु ब्राह्मणेन वेदाध्यापनेन यौनेन वा स्रौवेण वा यास्तेभ्यः सकाशान्मात्रा उपलब्धास्ता-
सां परित्यागस्तैश्च न संवसेदुदीचीं दिशं गत्वा नश्नन्संहिताध्ययनमधीयानः पूतो भवतीति विज्ञायत इति तथा ब्रह्महा मद्यपस्तेनस्तथैव गुरुतल्प-
गः एते महापातकिनो यश्च तैः सह संवसेदिति सर्वमनवद्यम् परामृष्टप्रकृतब्रह्महादिचतुष्टयसंसर्गिण एव महापातकित्ववचनात्तत्संसर्गिणो-
न महापातकित्वम् ननु महापातकिसंसर्ग एव महापातकित्वहेतुना ब्रह्महादिसर्वज्ञानपरामृष्टप्रकृतब्रह्महादिविशेषसंसर्गः तस्य व्यभिचा-
रात् अतोपि ब्रह्महादिसंसर्गिणोपि महापातकिसंसर्गो विद्यत इति तस्यापि महापातकित्वं स्यान्न च प्रतिषेध उच्यते स्यादेवं यदि प्रमाणांतर-
गम्यं यदि महापातकित्वं स्यात् शब्दैकसमधिगम्ये तु तस्मिन्नेव भवितुमर्हतीति तैरिति प्रकृतविशेषपरामर्शिना सर्वनाम्ना ब्रह्महादिविशेषसंसर्ग-
स्यैव महापातकित्वहेतुत्वस्यावगमितत्वात् एवं च प्रतिषेधाभावोप्यहेतुः प्राप्त्यभावादेव अतः संसर्गिसंसर्गिणां द्विजातिकर्मभ्यो हानिर्न भव-
ति प्रायश्चित्तं तु भवत्येव नच संसर्गिसंसर्गिणः पातित्याभावे कथं प्रायश्चित्तमिति वाच्यम् एनस्विभिरनिर्णिक्तैर्नार्थं किंचित्समाचरेदिति सा-
मान्येनैनस्विमात्रप्रतिषेधेन महापातकिसंसर्गस्यापि प्रतिषिद्धत्वात् पातित्याभावेपि युक्तमेव प्रायश्चित्तं तच्च पादहीनम् यो येन संवसेद्वर्षं ९२
सोपि तत्समतामियात् पादहीनं चरेत्सोपि तस्य तस्य व्रतं द्विज इति व्यासोक्तं द्रष्टव्यम् एवं चतुर्थपंचमयोरपि कामतः संसर्गिणोरर्द्धहीनं त्रि-

पादोनं च द्रष्टव्यम् अतः साक्षाद्ब्रह्महादिसंसर्गिण एव तदीयप्रायश्चित्ताधिकारो न तत्संसर्गिण इति सिद्धम् अत्र च ब्रह्महादिषु यद्यपि कामतो
मरणांतिकमुपादिष्टम् तथापि संसर्गिणस्तन्नातिदिश्यते स तस्यैव व्रतं कुर्यादिति व्रतस्यैवातिदेशात् मरणस्य च व्रतशब्दवाच्यत्वाभावात्
अतोत्र कामकृतेपि संसर्गे द्वादशवार्षिकमकामतस्तु तदर्द्धम् संसर्गश्च स्वनिबंधनकर्मभेदादनेकधाभिद्यते तथाह वृद्धबृहस्पतिः एक-
शय्यासनं पंक्तिर्भांडपक्त्यन्नमिश्रणम् याजनाध्यापने योनिस्तथा च सहभोजनम् नवधा संकरः प्रोक्तो न कर्तव्यो धमैः सहेति देवलोपि सं-
लापस्पर्शनिश्वाससहयानासनाशनात् याजनाध्यापनाद्यौनात्पापं संक्रमते नृणामिति एकशय्यासनमेकखट्वासनमेकपंक्तिभोजनमे-
कभांडपचनमन्नेन मिश्रणं संसर्गस्तदीयान्नभोजनमिति यावत् याजनं पतितस्य स्वस्य वा तेन अध्यापनं वा तस्य स्वस्य वा तेन यौनं तस्मै क-
न्यादानं तत्सकाशाद्वा कन्यायाः प्रतिग्रहः सहभोजनमेकामत्रभोजनम् संलापः संभाषणम् स्पर्शो गात्रसंमर्दः निश्वासः पतितमुखवायु-
संपर्कः सहयानमेकतुरगाद्यारोहणम् एतेषां मध्ये केन कर्मणा कियता कालेन पातित्यमित्यपेक्षायां बृहद्विष्णुनोक्तम् संवत्सरेण पतति
पतितेन सहाचरन् एकयानभोजनासनशयनैर्यौनस्रौवमुख्यैस्तु संबंधैः सद्य एवेति अत्रैकभोजनमेकपंक्तिभोजनम् एकामत्रभोजने तु सद्यः पाति-
त्यम् याजनं योनिसंबंधः स्वाध्यायः सहभोजनम् कृत्वा सद्यः पतत्येव पतितेन न संशय इति देवलस्मरणात् स्रौवशब्देन याजनमभिधी-
यते मुखशब्देन मुखभवत्वेनाध्यापनम् यौनस्रौवमुख्यैरिति सत्यपि द्वंद्वनिर्देशे प्रत्येकमेव तेषां पतनहेतुत्वम् यः पतितैः सह यौनमु-
खस्रौवानां संबंधानामन्यतमं संबंधं कुर्यात्तस्याप्येतदेव प्रायश्चित्तमिति सुमंतुस्मरणात् एकयानादिचतुष्टयस्य तु समुदितस्यैव पतनहे-

तुल्वम् एकयानभोजनासनशयनैरिति इतरेतरयुक्तानां निर्देशात् प्रत्येकानुष्ठानस्य पतनहेतुत्वाभावेपि दोषहेतुत्वमस्त्येव आसनाच्छयना
द्यानात्संभाषात्सहभोजनात् संक्रमंतिहि पापानि तैलबिंदुरिवांभसीति पराशरवचनेन निरपेक्षाणामपि पापहेतुत्वावगमात् संलापस्पर्श
निःश्वासानां तु यानादिचतुष्टयेनानुषंगिकतया समुच्चितानामेव पतनहेतुत्वं न पृथग्भूतानामल्पत्वात् पापहेतुत्वं पुनरस्त्येव संलापस्पर्शनि
श्वासेति देवलवचनस्य दर्शितत्वात् अतः संलापादिरहिते सह यानादिचतुष्टये कृते पंचमभागोनं द्वादशवार्षिकं प्रायश्चित्तं कुर्यात् तत्सहिते तु
पूर्णमेवं च सति एभिस्तु संवसेद्यो वै वत्सरं सोपि तत्सम इति योगीश्वरवचनमपि सह यानादिचतुष्टयपरमेव युक्तम् अतः संलापादीनां पृथक्पा
तित्यहेतुत्वं नास्त्यत एव मनुना संवत्सरेण पतति पतितेन सहाचरन् याजनाध्यापनाद्यौनान्न तु यानासनाशनादिति यानादिचतुष्टयस्यैव संव
त्सरेण पातित्यहेतुत्वमुक्तम् अत्रासनग्रहणं शयनस्याप्युपलक्षणम् अत्र च संवत्सरेण पतति पतितेन सहाचरन्, यानाशनासनादिति व्य
वहितेन संबंधः प्राग्दर्शितविष्णुवचनानुरोधात् तथा संवत्सरेण पतति पतितेन सहाचरन् भोजनासनशय्यादि कुर्वाणः सार्वकालिकमि
ति वचनाच्च न चान्वयदोषः यानासनाशनादिहेतोराचरन्नाचारं कुर्वन्निति भेदविवक्षया संबंधोपपत्तेः यथा एतया पुनराधेयसमितये ष्टेति
यद्वा आचरन्निति शतुर्हेत्वर्थस्य गमितत्वाद्यानासनानीति द्वितीयार्थे पंचमी याजनाध्यापनाद्यौनान्न तु संवत्सरेण पतति किंतु सद्य एव प्राची
नवचननिचयानुरोधादेव अतो यौनादिचतुष्टये सद्यः पतति यानादिचतुष्टयेन संवत्सरं निरंतराभ्यस्तेनेति युक्तम् संवत्सरं सोपि तत्सम इ ९३
ति अत्यंतसंयोगवाचिन्या द्वितीयाया दर्शनादंतरितदिवसगणना कार्या यथा षष्ट्यधिकशतत्रयदिवसव्यापित्वं संसर्गस्य भवति ततो न्यूने

तु न पतितप्रायश्चित्तं किं त्वन्यदेव यथाह पराशरः संसर्गमाचरन्विप्रः पतितादिष्वकामतः पंचाहं वा दशाहं वा द्वादशाहमथापि वा मासार्धं
मासमेकं वा मासत्रयमथापि वा अब्दार्धमेकमब्दं वा भवेदूर्ध्वं तु तत्समः त्रिरात्रं प्रथमे पक्षे द्वितीये कृच्छ्रमाचरन् चरेत्सांतपनं कृच्छ्रं तृतीये
पक्ष एव तु चतुर्थे दशरात्रं स्यात्पराकः पंचमे ततः षष्ठे चांद्रायणं कुर्यात्सप्तमे त्वैंदवद्वयम् अष्टमे च तथा पक्षे षण्मासान्कृच्छ्रमाचरेदिति
कामतः संसर्गे पुनर्विशेषं सुमंतुः पंचाहे तु चरेत्कृच्छ्रं दशाहे तप्तकृच्छ्रकम् पराकस्त्वर्धमासे स्यान्मासे चांद्रायणं चरेदिति मासत्रये प्रकु
र्वीत कृच्छ्रं चांद्रायणोत्तरम् षाण्मासिके तु संसर्गे कृच्छ्रं त्वब्दार्धमाचरेत् संसर्गे त्वाब्दिके कुर्यादब्दं चांद्रायणं नर इति अत्र चाब्दिके सं
सर्ग इति किंचिन्न्यून इति द्रष्टव्यम् पूर्णे तु वत्सरे मन्वादिभिर्द्वादशवार्षिकस्मरणात् यत्तु बार्हस्पत्यं वचनम् षाण्मासिके तु संसर्गे याजनाध्यापनादिना
एकत्रासनशय्याभिः प्रायश्चित्तार्धमाचरेदिति याजनाध्यापनाद्यौनैकपात्रभोजनानां षण्मासात्पातित्यवचनमेतदकामतो त्यंतापदि पंचमहायज्ञादि
प्राये याजने गाध्यापने दुहितृभगिनीव्यतिरिक्ते च यौनिसंबंधे द्रष्टव्यम् प्रकृष्टयाजनादिभिः सद्यः पातित्यस्योक्तत्वात् एतद्दिगवलंबनेनैव दुहि
तृभगिनीस्नुषागाम्यतिपातकिसंसर्गिणां कामतो नववार्षिकम् अकामतः सार्धचतुर्वार्षिकं कल्पनीयम् सखिपितृव्यदारादिगामिपातकिसंस
र्गिणां कामतः षड्वार्षिकमकामतस्त्रैवार्षिकम् अथोपपातक्यादिसंसर्गिणामपि कामतस्तदीयमेव त्रैमासिकमकामतो ऽर्धमित्यूहनीयम् पुरुष
वत्स्त्रीणामपि महापातक्यादिसंसर्गात्पातित्यमविशिष्टम् यथाह शौनकः पुरुषस्य यानि पतननिमित्तानि स्त्रीणामपि तान्येव ब्राह्मणी हीनव
र्णसेवायामधिकं पततीति अतस्तासामपि महापातकिप्रभृतीनां मध्ये येन सह संसर्गस्तदीयमेव प्रायश्चित्तमर्धं कृत्वा योजनीयम् एवं बालवृ

द्धातुराणामपिकामतोधर्मकामतःपादः तथानुपनीतस्यापिबालस्यकामतःपादोकामतस्तदर्धमित्येषादिक् पतितसंसर्गप्रतिषेधेनप्रतिषि द्धस्ययौनसंबंधस्यक्वचित्प्रतिप्रसवमाह एषांपतितानांकन्यापतितावस्थायामुत्पन्नांसोपवासांकृततत्संसर्गकालोचितप्रायश्चित्तामकिंच नामगृहीतवस्त्रालंकारादिपितृधनामुद्वहेत् कन्यांसमुद्वहेदितिवदन्स्वयमेवकन्यात्यक्तपतितसंसर्गासमुद्वहेन्नपुनःपतितहस्तात्प्रतिगृ ण्हीयादितिदर्शयति एवंचसतिपतितयौनसंसर्गप्रतिषेधविरोधोपिपरिहृतोभवति अयंचार्थोवृद्धहारीतेनस्पष्टीकृतः पतितस्यतुकुमारीं

कन्यांसमुद्वहेदेषांसोपवासामकिंचनाम् २६१

विवस्त्रामहोरात्रमुपोषितांप्रातःशुक्लेनाहतेनवाससाच्छादितांनाहमेतेषांनममैतइतित्रिरुच्चैरभिदधानांतीर्थेस्वगृहेवोद्वहेदिति तथाएषां कन्यांसमुद्वहेदितिवचनात्स्त्रीव्यतिरिक्ततदीयापत्यस्यसंसर्गानर्हतांदर्शयति अतएववसिष्ठः पतितेनोत्पन्नःपतितोभवति अन्यत्रस्त्रियाः ९४
साहिपरगामिनीतामरिक्थामुपेयादिति इतिसंसर्गप्रायश्चित्तप्रकरणम् २६१ ७ ७ ७ ७ ७

निषिद्धसंसर्गप्रसंगान्निषिद्धसंसर्गेतिन्नप्रतिलोमवधेप्रायश्चित्तमाह अवकृष्टाःसूतमागधादयः प्रतिलोमोत्पन्नास्तेषांप्रत्येकंहननेचांद्रायण म् तथाचशंखः सर्वेषामवकृष्टानांवधेप्रत्येकंचांद्रायणमिति यच्चांगिरसोवचनम् सर्वांत्यजानांगमनेभोजनेसंप्रमापणे पराकेणविशुद्धिः स्यादित्यांगिरसभाषितमितिपराकंकुर्यात् तत्रकामतःसूतादिवधेचांद्रायणम् अकामतस्तुसूतवधेपराकः वैदेहकवधेपादोनः चांडालवधेद्वि पादः मागधवधेपादोनःपराकः क्षत्तरिद्विपादः आयोगवेचपादद्वयम् अनयैवदिशाचांद्रायणस्यापितारतम्यंकल्प्यम् यत्तुब्रह्मगर्भवच-

चांद्रायणंचरेत्सर्वानवकृष्टान्निहत्यतु

नम् प्रतिलोमप्रसूतानांस्त्रीणांमासावधिःस्मृतः अंतरप्रभवानांचसूतादीनांचतुर्द्विषडिति तदावृत्तिविषयम् तत्रसूतवधेषण्मासाः वैदे हकवधेचत्वारः चांडालवधेद्वाविति योग्यतयान्वयः तथामागधवधेचत्वारः क्षत्तरिद्वैमासिकं आयोगवेचद्वैमासिकमितिव्यवस्था नै मित्तिकव्रतानांजपादिसाध्यत्वाद्विद्याविरहिणांचशूद्रादीनांतदनुपपत्तेराज्यावेक्षणादिसाध्येष्विवांधानामनधिकारमाशंक्याह

शतपलेप्रताप्यमाने पलद्वयंक्षीयेत अष्टौत्रपुणि सीसेचशत इत्यनुवर्तते त्रपुणिसीसेचशतपलेप्रताप्यमानेष्टौपलानिक्षीयंते ता-
म्रेपंचदशायसि ताम्रेशतपलेपंचपलानि अयसिदशपलानिक्षीयंते अत्रापिशतइत्येव कांस्यस्यतुत्रपुताम्रयोनिलात्तदनुसारेण
क्षयःकल्प्यः इतोधिकक्षयकारिणःशिल्पिनोदंड्याः १८३ कंबलादौवृद्धिमाह स्थूलेनौर्णसूत्रेण यत्कंबलादिकंक्रियते तस्मिन्श
तपलेदशपलावृद्धिर्वेदितव्या एवंकार्पाससूत्रपटादौवेदितव्यम् मध्येअनतिसूक्ष्मनिर्मितेपटादौपंचपलावृद्धिः सूक्ष्मसूत्ररचितेश

शतेदशपलावृद्धिरौर्णकार्पाससौत्रिके मध्येपंचपलावृद्धिःसूक्ष्मेतुत्रिपलामता १८४
कार्मिकेरोमबंधेचत्रिंशद्भागःक्षयोमतः नक्षयोनचवृद्धिश्चकौशेयेवल्कलेषुच १८५

तेत्रिपलावृद्धिर्वेदितव्या एतच्चाप्रक्षालितवासोविषयम् १८४ द्रव्यांतरेविशेषमाह कार्मिकंकर्मणाचित्रेणनिर्मितं यत्रानिष्पन्नेपटे
रुचकस्वस्तिकादिकंचसूत्रैःक्रियते तत्कार्मिकमित्युच्यते यत्रमार्जारादेरोमाणिबध्यंतेसरोमबंधः तत्रत्रिंशत्तमोभागःक्षयोवेदितव्यः
कौशेयेकोशप्रभवे वल्कलेषुवृक्षत्वग्भिर्निर्मितेषुवसनेषु वृद्धिह्रासौनस्तः किंतुयावद्वसनार्थंकुविंदादिभ्योदत्तंतावदेवप्रत्यादेय- ९५
म् १८५ ५ ५ ५ ५ ५ ५ ५ ५

---

द्रव्यानंत्यात्प्रतिद्रव्यंक्षयवृद्धिप्रतिपादनाशक्तेःसामान्येनह्रासवृद्धिज्ञानोपायमाह शाणक्षौमादौद्रव्येनष्टेह्रासमुपगतेद्रव्याणां
कुशलाःद्रव्यवृद्धिक्षयाभिज्ञाः देशंकालमुपभोगंतथानष्टद्रव्यस्यबलाबलंसारासारतांचपरीक्ष्य यत्कल्पयंतितदसंशयंशिल्पिनो
दाप्याः इतिक्रीतानुशयप्रकरणम् १८६ सांप्रतमभ्युपेत्याशुश्रूषाख्यमपरंविवादपदमभिधातुमुपक्रमते तत्स्वरूपंचनारदे-
नोक्तं अभ्युपेत्यतुशुश्रूषांयस्तांनप्रतिपद्यते अशुश्रूषाभ्युपेत्यैतद्विवादपदमुच्यतइति आज्ञाकरणंशुश्रूषा तामंगीकृत्यप
श्चाद्योनसंपादयति तद्विवादपदमभ्युपेत्याशुश्रूषाख्यं शुश्रूषकश्चपंचविधः शिष्योंतेवासीभृतकोऽधिकर्मकृद्दासइति तेषामा

देशंकालंचभोगंचज्ञात्वानष्टेबलाबलम् द्रव्याणांकुशलाब्रूयुर्यत्तद्दाप्यमसंशयम् १८६

द्यश्चत्वारःकर्मकराइत्युच्यंते तेचशुभकर्मकारिणः दासाःपुनर्गृहजातादयःपंचदशप्रकाराः गृहद्वाराशुचिस्थानरथ्यावस्करशो
धनाद्यशुभकर्मकारिणः तदिदंनारदेनस्पष्टीकृतम् शुश्रूषकःपंचविधःशास्त्रेदृष्टोमनीषिभिः चतुर्विधःकर्मकरस्तेषांदासास्त्रि
पंचकाः शिष्यांतेवासिभृतकाश्चतुर्थस्त्वधिकर्मकृत् एतेकर्मकराज्ञेयादासास्तुगृहजादयः सामान्यमस्वतंत्रत्वमेषामाहुर्मनीषिणः जा
तिकर्मकृतस्तूक्तोविशेषोवृत्तिरेवच कर्मापिद्विविधंज्ञेयमशुभंशुभमेवच अशुभंदासकर्मोक्तंशुभंकर्मकृतांस्मृतम् गृहद्वाराशुचि
स्थानरथ्यावस्करशोधनम् गुह्यांगस्पर्शनोच्छिष्टविण्मूत्रग्रहणोज्झनम् इच्छतःस्वामिनश्चांगैरुपस्थानमथांततः अशुभंकर्मविज्ञे

विधानादेव अतश्च मासं निरंतरं कृच्छ्रं समाहितश्चरेदित्यपरम् अतएव जाबालेन मासं प्राजापत्यस्य पृथक् प्रायश्चित्तत्वमुक्तम् प्राजापत्यं
चरेन्मासं गोहंता वेदकामतः गोहितो गोनुगामी स्याद्गोप्रदानेन शुद्ध्यतीति अतिकृच्छ्रं व्रतं तथैव समाचरेदित्यन्यत् कृच्छ्रातिकृच्छ्रयोर्लक्षण-
मुत्तरत्र वक्ष्यते अथवा त्रिरात्रमुपवासं कृत्वा वृषभ एकादशी याः सा गवा ता वद्द्यादिति व्रतचतुष्टयम् तत्राकामकृते जातिमात्रब्राह्मणस्वामि-
कगोमात्रवधे उपवासं कृत्वा वृषभैकादशगोदानसहितस्त्रिरात्रोपवासो द्रष्टव्यः विशिष्टस्वामिकाया विशिष्टगुणवत्याश्च वधे गुरुप्राय-
श्चित्तस्य वक्ष्यमाणत्वात् क्षत्रियसंबंधिन्यास्तु तादृग्विधे व्यापादने मासं पंचगव्याशित्वं प्रथमं प्रायश्चित्तम् अत्र मासं पंचगव्याशनस्य स्वल्प-
त्वात् मासोपवासतुल्यत्वं ततश्च षड्भिः षड्भिरुपवासैरेकैकप्राजापत्यकल्पनया पंचकृच्छ्राणां प्रत्याम्नायेन पंचधेनवो मासांते च दीयमाना गौरे-
केति षट् धेनवो भवंतीति वृषभैकादशगोदानसहितत्रिरात्रव्रताल्लघीयस्त्वम् कथं पुनर्ब्राह्मणगवीनां गुरुत्वम् देवब्राह्मणराज्ञां तु विज्ञेयं द्र-
व्यमुत्तममिति नारदेन तत्तद्द्रव्यस्योत्तमत्वाभिधानात् गोषु ब्राह्मणसंस्थास्विति दंडभूयस्त्वदर्शनाच्च वैश्यसंबंधिन्यास्तु तादृग्विधे व्यापाद-
ने मासमतिकृच्छ्रं कुर्यात् अतिकृच्छ्रे त्वाद्ये त्रिरात्रत्रयेणापि पूरान्नभोजनमुक्तम् अतो त्रिरात्रेऽनशनम् अतोतिकृच्छ्रधर्मेण मासं व्रते क्रि-
यमाणे षड्रात्रमुपवासो भवति चतुर्विंशत्यहे च मते पाणिपूरान्नभोजनम् ततश्च कृच्छ्रप्रत्याम्नायकल्पनया किंचिन्न्यूनं धेनुपंचकं भव-
तीति पूर्वस्माद्व्रतद्वयाल्लघिष्ठत्वेन वैश्यस्वामिकगोवधविषयतायुक्ता तादृश एव विषये शूद्रस्वामिकगोहत्यायां मासं प्राजापत्यव्रतं द्वितीयं ९६
तत्र च सार्द्धप्राजापत्यद्वयात्मकेन प्रत्याम्नायेन किंचिदधिकं धेनुद्वयं भवतीति पूर्वेभ्यो लघुतमत्वाच्छूद्रविषयतोचिता अथ चैतत्प्रायश्चित्तचतुष्टयं साक्षा-

त्कर्त्रनुग्राहकप्रयोजकानुमंतृषु गुरुलघुभावतारतम्यापेक्षया पूर्वोक्त एव विषये योजनीयम् यत्तु वैष्णवं व्रतत्रयम् गोघ्नस्य पंचगव्येन मासमेकं प-
लत्रयम् प्रत्यहं स्यात्सरको वा चांद्रायणमथापि वेति यच्च काश्यपीयम् गां हत्वा तच्चर्मणा प्रावृतो मासं गोष्ठेशयस्त्रिषवणस्नायी नित्यं पंचगव्या-
हार इति यच्च शातातपीयम् मासं पंचगव्याहार इति तत्पंचकमपि याज्ञवल्कीयपंचगव्याहारविषयं यच्च शंखप्रचेतोभ्यामुक्तं गोघ्नः पंचग-
व्याहारः पंचविंशतिरात्रमुपवसेत्सशिखं वपनं कृत्वा गोचर्मणा प्रावृतो गाश्चानुगच्छन् गोष्ठेशयो गां च दद्यादिति एतच्च याज्ञवल्कीयमासाति-
कृच्छ्रव्रतसमानविषयम् दद्यात्त्रिरात्रं चोपोष्येत्येतद्विषये चात्यंतगुणिनो हंतुर्वेदितव्यं अत्रैव विषये पंचगव्याशनस्य तु द्वितीयम् काश्य-
पीयं मासं पंचगव्येनेति प्रतिपाद्य षष्ठे काले पयोभक्षो वा गच्छंतीस्त्वनुगच्छेत्तासु सुखोपविष्टासु चोपविशेन्नातिपुवं गच्छेत्ता निविषमेणाव-
तारयेन्नाल्पोदके पाययेदंते ब्राह्मणान्भोजयित्वा तिलधेनुं दद्यादिति द्रष्टव्यम् अत्राप्यशक्तस्य गोघ्नो मासं यवागुं प्रसृततंदुलं भृतां भुंजानो
गोभ्यः प्रियं कुर्वन्नुद्ध्यतीति पैठीनसिनोक्तं वेदितव्यम् यत्तु सौमंतवम् गोघ्नस्य गोप्रदानं गोष्ठे शयनं द्वादशरात्रं पंचगव्यप्राशनं गवानुगमनं
चेति यच्च संवर्तेनोक्तम् सक्तुयावकभैक्षाशी पयो दधि घृतं सकृत् एतानि क्रमशोश्नीयान्मासार्द्धं तु समाहितः ब्राह्मणान्भोजयित्वा तु गां द-
द्याद्रात्मशुद्धये इति यच्च बार्हस्पत्यं द्वादशरात्रं पंचगव्याहार इति तत्त्रितयमपि याज्ञवल्कीयमासप्राजापत्येन समानविषयम् मृतकल्पगो-
हत्याविषयं वा विषमप्रदेशत्रासेन जनितव्याधितो मरणविषयं वा वेदितव्यम् तदिदं सर्वं प्रागुक्तकामविषयम् यदा पुनरीदृग्विधामविशिष्ट-
विप्रस्वामिकविशिष्टां गां कामतः प्रमापयति तदा मनुना मासं यवागूपानं मासद्वयं हविष्येण चतुर्थकालभोजनं मासत्रयं वृषभैकादशगोदा-

नयुक्तं शाकटादिनावर्त्तनामभिः व्रतत्रितयमाम्नातं यथाह उपपातकसंयुक्तोगोघ्नोमासंयवान्पिबेत् कृतवापोवसेद्गोष्ठेचर्मणार्द्रेणसंवृतः
चतुर्थकालमश्नीयादक्षारलवणमितम् गोमूत्रेणचरेत्स्नानं द्वौमासौनियतेंद्रियः दिवानुगच्छेत्तागास्तुतिष्ठन्नूर्ध्वंरजःपिबेत् शुश्रूषित्वानम
स्कृत्वारात्रौवीरासनंव्रजेत् तिष्ठंतीष्वनुतिष्ठेत्तुव्रजंतीष्वप्यनुव्रजेत् आसीनासुतथासीतनियतोवीतमत्सरः आतुरामभिषिक्तांवाचोरव्या-
घ्रादिभिर्भयैः पतितांपंकलग्नांवासर्वप्राणैर्विमोक्षयेत् उष्णेवर्षतिशीतेवामारुतेवातिवाभृशम् नकुर्वीतात्मनस्त्राणं गोरकृत्वातुशक्ति
तः आत्मनोयदिवान्येषांगृहेक्षेत्रेथवाखले भक्षयंतींनकथयेत्पिबंतंचैववत्सकम् अनेनविधिनायस्तुगोघ्नोगाअनुगच्छति सगोहत्या
कृतंपापंत्रिभिर्मासैर्व्यपोहति वृषभैकादशागाश्चदद्यात्सुचरितव्रतः अविद्यमानेसर्वस्वंवेदविद्भ्योनिवेदयेत् एतत्त्रितययाज्ञवल्कीय
मासप्राजापत्यमासपंचगव्याशनवृषभैकादशगोदानयुक्तत्रिरात्रोपवासरूपव्रतत्रितयविषययथाक्रमेणद्रष्टव्यम् यत्त्वंगिरसामानवे-
तिकर्त्तव्यतायुक्तंत्रैमासिकमभिधायाधिकमभिहितम् अक्षारलवणंरुक्षंषष्ठेकालेस्यभोजनम् गोमतींवाजपेद्विद्यामोंकारंवेदमेवच व्र
तवद्धारयेद्दंडंसमंत्रांचैवमेखलामिति तन्मानवविषयएव पुष्टितरुण्यादिकिंचिद्गुणातिशययोगिन्यांद्रष्टव्यम् अतिबालामतिकृशा
मतिवृद्धांचरोगिणीम् हत्वापूर्वविधानेनचरेदर्द्धव्रतंद्विजइतिपुष्टितारुण्यादिरहितायांगव्यर्द्धप्रायश्चित्तदर्शनात् यदातुयाज्ञवल्कीय-
मासातिकृच्छ्रव्रतनिमित्तभूतांगामविशिष्टस्वामिकांजातिमात्रयोगिनींकामतोव्यापादयतितदाविहितंयदकामानांकामात्तुद्विगुणंचरेदि १७
तिन्यायेनपूर्वोक्तमेवाकामविहितंमासातिकृच्छ्रव्रतंद्विगुणंकुर्यात् यत्तुहारीतेन गोघ्नस्तच्चर्मोर्ध्ववालंपरिधायेत्यादिनामानवीमितिक

र्त्तव्यतामभिधायोक्तम् वृषभैकादशाश्चगादत्वात्रयोदशेमासेपूतोभवतीति तत्सवनस्थश्रोत्रियगोवधेअकामकृतेद्रष्टव्यम् यत्तुवसि
ष्ठेनगांचेद्धन्यात्तस्याश्चर्मणार्द्रेणपरिवेष्टितःषण्मासान्कृच्छ्रतप्तकृच्छ्रावातिष्ठेदृषभवेहतोदद्यात्तामितिषण्मासिकंकृच्छ्रतप्तकृच्छ्रा
नुष्ठानमुक्तम् यदपिदेवलेन गोघ्नःषण्मासांस्तच्चर्मपरिवृतोगोग्रासाहारोगोव्रजनिवासीगोभिरेवसहचरन्प्रमुच्यतइति तत्तद्द्वय-
मपिहारीतीयेनसमानविषयम् तत्रैवकामकारकृतेकात्यायनीयंत्रैवार्षिकं गोघ्नस्तच्चर्मसंवीतोवसेद्गोष्ठेथवापुनः गाश्चानुगच्छेत्स
ततंमौनीवीरासनादिभिः वर्षशीतातपक्लेशवन्हिपंकभयार्दितः मोक्षयेत्सर्वयत्नेनपूयतेवत्सरैस्त्रिभिरितिद्रष्टव्यम् यच्चशारवंत्रैवा
र्षिकं पादंतुशूद्रहत्यायामुदक्यागमनेतथा गोवधेचतथाकुर्यात्परस्त्रीगमनेतथेति तदपिकात्यायनीयव्रतसमानविषयम् यत्तुयमे
नांगिरसीमितिकर्त्तव्यतामभिधाय गोसहस्रंशतंवापिदद्यात्सुचरितव्रतः अविद्यमानेसर्वस्वंवेदविद्भ्योनिवेदयेदिति गोसहस्रयुक्तं
गोशतयुक्तंद्वैमासिकंव्रतद्वयमभिहितम् तत्रयदासवनस्थश्रोत्रियातिदुर्गतबहुकुटुंबब्राह्मणसंबंधिनींकपिलांकर्मांगभूतांगर्भि-
णींबहुक्षीरांतरुणिमादिगुणशालिनींनिर्गुणोधनवान्सप्रयत्नंखड्गादिनाव्यापादयतितदागोसहस्रयुक्तंद्वैमासिकंकुर्यात् गर्भिणींक-
पिलांदोग्ध्रींहोमधेनुंचसुव्रताम् खड्गादिनाघातयित्वाद्विगुणंव्रतमाचरेदिति विशिष्टायांगविबाहुल्येप्रायश्चित्तस्यदर्शनात् अत
एवप्रचेतसा स्त्रीगर्भिणीगोगर्भिणीबालवृद्धवधेषुभ्रूणहाभवतीति ईदृग्विधमेवगोवधमभिसंधायब्रह्महत्याव्रतमतिदिष्टम् द्वि
तीयंतुधान्यंगोशतदानयुक्तंद्वैमासिकंव्रतंकात्यायनीयव्रतविषयेधनवतोद्रष्टव्यम् यत्तुगौतमेनवृषभैकगोशतदानसमुच्चितंत्रैवा

र्षिकंप्राकृतंब्रह्मचर्यंवैश्यवधेभिधायगोवधेतिर्दिष्टम् गांचहत्वावैश्यवदिति एतच्चत्रैवार्षिकव्रतप्रत्याम्नायभूतनवतिधेनुभिःसार्धमृष
भैकशतंगावोनवन्यूनद्विशतंभवतीतिगोसहस्रयुक्तद्वैमासिकव्रतान्न्यूनत्वात्पूर्वोक्तविषयेएवकामतोवधे यद्वात्रैवविषयेगर्भरहितायाः
कामतोवधेद्रष्टव्यम् तादृग्विधायाएवगर्भरहितायास्त्वकामतोहननेपिकात्यायनीयमेवत्रैवार्षिकंकल्प्यम् यत्तुयमेनोक्तं काष्ठलोष्ठा
श्माभिर्गावःशस्त्रैर्वानिहतायदि प्रायश्चित्तंकथंतत्रशस्त्रेशस्त्रेविधीयते काष्ठेसांतपनंकुर्यात्प्राजापत्यंतुलोष्ठके तप्तकृच्छ्रंतुपाषा
णेशस्त्रेचाप्यतिकृच्छ्रकम् प्रायश्चित्तेततश्चीर्णेकुर्याद्ब्राह्मणभोजनम् त्रिंशद्गावृषभंचैकंदद्यात्तेभ्यश्चदक्षिणामिति तत्पूर्वोक्तगोस
हस्रशतादिदानत्रैवार्षिकादिव्रतविषयेष्वेवकाष्ठादिसाधनविशेषजनितवधनिमित्तसांतपनादिपूर्वकत्वप्रतिपादनपरंनतुनिरपेक्षस्यलघु
त्वाद्व्रतस्य तथावयोविशेषादपिप्रायश्चित्तविशेषउक्तः अतिवृद्धामतिकृशामतिबालांचरोहिणीम् हत्वापूर्वविधानेनचरेदर्धव्रतंद्विजः
ब्राह्मणान्भोजयेच्छक्त्यादद्याद्धेमतिलांस्तथेति निरोगादिवधेयद्विहितंतस्यार्धम् वृहत्प्रचेतसाप्यत्रविशेषउक्तः एकवर्षेहतेवत्से
कृच्छ्रपादोविधीयते अबुद्धिपूर्वेपुंसःस्याद्द्विपादस्तुद्विहायने त्रिहायनेत्रिपादःस्यात्प्राजापत्यमतःपरमिति तथागर्भिण्यावधेयदाग-
र्भोपिनिहतोभवतितदाप्रतिनिमित्तंनैमित्तिकमावर्ततइतिन्यायेनाविशेषेणद्विगुणव्रतप्राप्तौषट्त्रिंशन्मतेविशेषउक्तः पादउत्पन्नमा
त्रेतुद्वौपादौदृढतांगते पादोनंव्रतमुद्दिष्टंहत्वागर्भमचेतनम् अंगप्रत्यंगसंपूर्णेगर्भेचेतःसमन्विते द्विगुणंगोव्रतंकुर्यादेषागोघ्नस्यनिष्कृति १९
रिति बहुकर्तृकेतुहननेसंवर्तापस्तंबाभ्यांविशेषउक्तः एकांचेद्बहुभिःकाचिद्दैवाद्व्यापादिताक्वचित् पादंपादंतुहत्यायाश्चरेयुस्तेपृथक्पृ

थगिति यादृग्विधगोहत्यायांयद्व्रतमुपदिष्टंतत्पादंप्रत्येकंकुर्युर्वचनात् एकांचेदित्युपलक्षणम् अतोबहुभिर्द्वयोर्बहूनांचव्यापादनेप्रतिपुरु
षंपादद्वयंपादोनंवाकल्पनीयम् तच्चाकामतोवधेद्रष्टव्यम् दैवादितिविशेषणोपादानात् कामकारेतुबहूनामपिप्रत्येकंकृत्स्नदोषसंबंधात्कृ
त्स्नव्रतसंबंधोयुक्तः सत्रिणामिवप्रतिपुरुषंकृत्स्नव्यापारसमवायात् एकंघ्नतांबहूनांतुयथोक्ताद्द्विगुणोदमइतिप्रत्येकंदंडद्वैगुण्यदर्श
नाच्च यदात्वेकेनैवबंधनादिव्यापारेणबहवोगावोव्यापादितास्तत्रसंवर्तापस्तंबाभ्यांविशेषउक्तः व्यापन्नानांबहूनांतुरोधनेबंध
नेतथा भिषङ्मिथ्योपचारेचद्विगुणंगोव्रतंचरेदिति बहुष्वपिव्यापन्नेषुनप्रतिनिमित्तंनैमित्तिकानुष्ठानम् नापितंत्रेण किंतुवच
नबलाद्द्विगुणमेव तथाभिषगपिविरुद्धौषधदानेनैकस्याप्यकामतोव्यापादनेद्विगुणंगोव्रतंकुर्यात् भिषग्व्यतिरिक्तस्यकेवलं
उपकारार्थंप्रवृत्तस्यत्वकामतःप्रतिकूलौषधदानेव्यासआह औषधंलवणंचैवपुण्यार्थमपिभोजनम् अतिरिक्तंनदातव्यंकाल्पेस्व
ल्पंतुदापयेत् अतिरिक्तेविपत्तिश्चेत्कृच्छ्रपादोविधीयतइति यत्त्वापस्तंबेनोक्तं पादमेकंचरेद्रोधेद्वौपादौबंधनेचरेत् योजनेपा
दहीनंस्याच्चरेत्सर्वंनिपातनेइति तद्व्यवहितव्यापारिणोनिमित्तकर्तुर्विज्ञेयम् नसाक्षात्कर्तुः साक्षात्कर्तृनिमित्तिनोश्चभेदस्तेनैव-
दर्शितः पाषाणैर्लगुडैर्वापिशस्त्रेणान्येनवाबलात् निपातयंतियेगास्तुकृत्स्नंकुर्युर्व्रतंहिते तथैवबाहुजंघोरुपार्श्वयोर्वाग्रिमो
टनैरिति एतदुक्तंभवति पाषाणखड्गादिभिर्ग्रीवामोटनादिनावायेगांनिपातयंतितेसाक्षात्कर्तारस्तेष्वेवकृत्स्नंप्रायश्चित्तम् येतु-
व्यवहितरोधबंधादिव्यापारयोगिनस्तेनिमित्तिनस्तेषांनकृत्स्नव्रतसंबंधः किंतुतदवयवैरेवपादद्विपादादिभिरिति तत्ररोधा

दीनांव्यवहितव्यापारत्वाविशेषेपिवचनात्क्वचित्पादः क्वचिद्द्विपादंपादोनंक्वचिदितियुक्तम् अत्राहपाराशरः गवांबंधनयोक्त्रेस्तु
भवेन्मृत्युरकामतः अकामकृतपापस्यप्राजापत्यंविनिर्दिशेत् प्रायश्चित्तेततश्चीर्णेकुर्याद्ब्राह्मणभोजनम् अनडुत्सहितांगांचद
द्याद्विप्रायदक्षिणामिति अयंचप्राजापत्योयदिरोधादिकंकृत्वा तज्जन्यप्रमादपरिजिहीर्षयाप्रत्यवेक्षमाणआस्तेतदाद्रष्टव्यः
अकामकृतपापस्येतिविशेषणोपादानात् यदानप्रमादसंरक्षणंकरोतितदापादमेकंचरेद्रोधेद्वौपादौबंधनेचरेत् योजनेपादहीनंस्याच्चरेत्सर्वंनिपातनइत्यंगिरोक्तंद्रष्टव्यम् त्रैमासिकंपादंकिंचिदधिकंवाविंशत्यहर्गोवधव्रतंकुर्यात् आपस्तंबेनापिविशेषउ
क्तः अतिदाहातिवाहाभ्यांनासिकाच्छेदनेतथा नदीपर्वतसंरोधेमृतेपादोनमाचरेदिति लक्षणमात्रोपयोगिनितुदाहेनदोषः अ-
न्यत्रांकनलक्षाभ्यांवाहनेमोचनेतथा सायंसंगोपनार्थंचनदुष्येद्रोधबंधनेइतिपराशरस्मरणात् अंकनंस्थिरचिन्हकरणम् ल
क्षणंसांप्रतोपलक्षणम् वाहनेशास्त्रोक्तमार्गेण रक्षणार्थमपिनालिकेरादिभिर्बंधनेभवत्येवदोषः ननालिकेरेणनशाणवालैर्न
चापिमौंजेननबध्नशृंखलैः एतैस्तुगावोननिबंधनीयाबध्वातुतिष्ठेत्परशुंगृहीत्वा कुशैःकाशैश्चबध्नीयात्स्थानेदोषविवर्जितेइति
व्याससमरणात् तथान्योपिविशेषस्तेनैवोक्तः घंटाभरणदोषेणविपत्तिर्यदिगोर्भवेत् कृच्छ्रार्द्धंतुभवेत्तत्रभूषणार्थंहितत्स्मृतम्
अतिदोहातिदमनेसंघातेचैवयोजने बध्नाशृंखलपाशैश्चमृतेपादोनमाचरेदिति पालनकरणादिनोपेक्षायांक्वचित्प्रायश्चित्तविशे ९९
षस्तेनैवोक्तः जलौघपल्वलेमग्नामेघविद्युद्धतापिवा गर्त्तायांपतिताकस्माच्छ्वापदेनापिभक्षिता प्राजापत्यंचरेत्कृच्छ्रंगोस्वामीव्रत-

मुत्तमम् शीतवाताहतावास्यादुद्बंधनहतापिवा शून्यागारउपेक्षायांप्राजापत्यंविनिर्दिशेदिति इदंतुकार्यांतरविरहेप्युपेक्षायां
वेदितव्यम् कार्यांतरव्यग्रतयोपेक्षयात्वर्धं पल्वलौघमृगव्याघ्रश्वापदादिनिपातने श्वभ्रप्रपातसर्पाद्यैर्मृतेकृच्छ्रार्धमाचरेत्
अपालत्वात्तुकृच्छ्रःस्याच्छून्यागारउपप्लवेइतिविष्णुस्मरणात् तथासत्यपिव्यापादनेक्वचिदुपकारार्थप्रवृत्तौवचनाद्दोषाभावः
यथाहसंवर्त्तः यंत्रणेगोश्चिकित्सार्थेमूढगर्भविमोचने यत्नेकृतेविपत्तिःस्यान्नसपापेनलिप्यतेइति यंत्रणंव्याध्यादिनिर्यातनार्थंसं
दंशांकुशादिप्रवेशनम् तथा औषधंस्नेहमाहारंददद्गोब्राह्मणेद्विजः दीयमानेविपत्तिश्चेन्नसपापेनलिप्यते ग्रामघातेशरोघेणवे-
श्मभंगान्निपातने तथा दाहच्छेदशिराभेदप्रयोगैरुपकुर्वताम् द्विजानांगोहितार्थंचप्रायश्चित्तंनविद्यते अत्रपराशरोप्याह अ
तिवृष्टिहतानांचप्रायश्चित्तंनविद्यते कूपखातेचधर्मार्थेगृहदाहेचयेमृताः ग्रामदाहेतथाघोरेप्रायश्चित्तंनविद्यतेइति इदंतुबंध
नरहितस्यैवपशोःकथंचित्गृहादिदानेनमृतविषयम् इतरथापस्तंबोक्तम् कांतारेष्वथदुर्गेषुगृहदाहेखलेषुच यदितत्रविपत्तिः
स्यात्पादएकोविधीयतेइति तथास्थ्यादिभंगेमरणाभावेक्वचित्प्रायश्चित्तमुक्तम् अस्थिभंगंगवांकृत्वालांगूलच्छेदनंतथा पाट
नंदंतशृंगाणांमासार्द्धंचयवान्पिबेदिति यत्त्वांगिरसम् शृंगदंतास्थिभंगेवाचर्मनिर्मोचनेपिवा दशरात्रंपिबेद्व्रजंसुस्थापिय-
दिगौर्भवेदिति वज्रशब्दवाच्यक्षीरादिवर्त्तनमुक्तंतदशक्तविषयम् इदंचप्रायश्चित्तंगोस्वामिनेव्यापन्नगोसदृशींगांदत्वैवका-
र्यम् यथाहपराशरः प्रमापणेप्राणभृतांदद्यात्तत्प्रतिरूपकम् तस्यानुरूपंमूल्यंवादद्यादित्यब्रवीन्मनुरिति मनुरपि योयस्य-

हिंस्यात् द्रव्याणि ज्ञानतो ज्ञानतोपिवा सतस्योत्पादयेत्तुष्टिं राज्ञे दद्याच्च तत्समिति एतच्च पूर्वोक्तं प्रायश्चित्त जातं ब्राह्मणस्यैव हं-
तुर्वेदितव्यं क्षत्रियादेस्तु हंतुर्बृहद्विष्णुनाविशेषोभिहितः विप्रेतु सकलंदेयं पादोनं क्षत्रियेस्मृतम् वैश्येर्धंपादएकस्तु शूद्रजा-
तिषु शस्यतइति यत्त्वंगिरोवचनम् पर्षद्वा ब्राह्मणानां तु साराज्ञा द्विगुणामता वैश्यानां त्रिगुणा प्रोक्ता पर्षद्वच्च व्रतं स्मृतमिति त
त्प्रातिलोम्येन वाग्दंडपारुष्यादिविषयम् तथास्त्रीवृद्धबालादीनात्वर्धं अनुपनीतस्यबालस्यपादइतिच प्रागुक्तमनुसंधेयम् स्त्री
णां पराशरेण विशेषोभिहितः वपनं नैव नारीणां नानुव्रज्या जपादिकम् न गोष्ठे शयनं तासां न वसीरन् गवाजिनम् सर्वान्केशान्समु-
द्धृत्यच्छेदयेदंगुलद्वयम् सर्वत्रैव हि नारीणां शिरसो मुंडनं स्मृतमिति पुरुषेषु च विशेषः संवर्तेन दर्शितः पादेंगरोमवपनं द्विपादे
श्मश्रुणोपिच त्रिपादेतु शिखावर्जं सशिखं तु निपातने इति पादप्रायश्चित्तार्हस्य कंठादधस्तनांगरोम्णामेव वपनम् अर्धप्रायश्चि
त्तार्हस्य तु श्मश्रूणामपि पादोनप्रायश्चित्तार्हस्य पुनः शिरोगतानामपि शिखावर्जितानां पादचतुष्टयार्हस्य तु सशिखस्य सकलके
शजातस्येति एवमेतद्दिगवलंबनेनान्येषामपि स्मृतिवचसां विषयो निरूपणीयः इति गोवधप्रायश्चित्तप्रकरणम् २६३ २६४
अधुनान्येषामुपपातकानां प्रायश्चित्तमाह एवमुक्तेन गोवधव्रतेन मासं पंचगव्याशनादिनान्येषां व्रात्यतादीनामुपपातकानां शुद्धि
र्भवेत् चांद्रायणेन वा वक्ष्यमाणलक्षणेन मासं पयोव्रतेन वा पराकेण वा शुद्धिर्भवेत् अत्रातिदेशसामर्थ्यात् गोचर्मवसनगोपरिचर्यादि १००
भिर्गोवधासाधारणैः कतिपयैर्न्यूनत्वमवगम्यते एतच्च व्रतचतुष्टयमकामकारे शक्त्यपेक्षया विकल्पितं द्रष्टव्यम् कामकारेतु एत

देव व्रतं कुर्युरुपपातकिनो द्विजाः अवकीर्णिवर्जं शुद्ध्यर्थं चांद्रायणमथापि वेति मनूक्तं त्रैमासिकं द्रष्टव्यम् अतएव वचनादयं प्रायश्चित्तात्ति
देशः सर्वेषामुपपातकगणपठितानामुक्तप्रायश्चित्तानामनुक्तप्रायश्चित्तानां चावकीर्णिवर्जितानामविशेषेण वेदितव्यः अवकीर्णिन-
स्तु प्रतिपदोक्तमेव नन्वनुक्तप्रायश्चित्तविषयतयैवातिदेशतायुक्ता इतरथा प्रतिपदोक्तप्रायश्चित्तवधे सापेक्ष्यत्वप्रसंगात् मैवं तथा
सत्यकृतनिष्कृतीनामुपपातकगणपाठोनर्थकः स्यात् यदि परमुपपातकमध्ये सामान्यतः पठितस्यान्यत्र विशेषतः प्रायश्चित्तांतरमु

उपपातकशुद्धिःस्यादेवं चांद्रायणेन वा पयसा वापि मासेन पराकेणाथवा पुनः २६५

च्यते तथा अयाज्यानां च याजनं त्रीन्कृच्छ्रानाचरेत् व्रात्ययाजकोभिचरन्नपीति सएवविषयः केवलं परिन्हीयेत नपुनर्विशेषतः प
ठितस्यान्यत्रापि विशेषत एव प्रायश्चित्तमुच्यते सोपि यथा इंधनार्थं द्रुमच्छेदः वृक्षगुल्मलतावीरुधच्छेदने जप्यमृक्शतमिति अ
तो व्रात्यतादिषु अस्मिन्शास्त्रे शास्त्रांतरे वा दृष्टैः प्रायश्चित्तैः सह्योपपातकशुद्धिःस्यादेवमित्यादिना प्रतिपादितव्रतचतुष्टयस्य समविष
मताकल्पनेन विकल्पो विषयविभागो वाश्रयणीयः तानि स्मृत्यंतरदृष्टप्रायश्चित्तानि पाठक्रमेण व्रात्यतादिषु योजयिष्यामः तत्र व्रात्य

नायांमनुनेदमुक्तम् येषांद्विजानांसावित्रीनानूच्येतयथाविधि तांश्चारयित्वात्रीन्कृच्छ्रान्यथाविध्युपनाययेदिति एतच्चयमेनोक्तं
सावित्रीपतितायस्य दशवर्षाणिपंचच सशिरस्कंवपनंकृत्वाव्रतंकुर्यात्समाहितः एकविंशतिरात्रंचपिबेत्प्रसृतयावकम् हविष्यंभो
जयित्वैवंब्राह्मणान्सप्तपंचच ततोयावकशुद्धस्य तस्योपनयनंस्मृतमिति तदुभयमपियाज्ञवल्कीयमासपयोव्रतविषयम् यत्तुवसि
ष्ठेनोक्तम् पतितसावित्रीकउद्दालकव्रतंचरेत् द्वौमासौयावकेनवर्तयेन्मासंपयसापक्षमामिक्षयाष्टरात्रं घृतेनषड्रात्रमयाचितेनत्रिरा-
त्रमब्भक्षोहोरात्रमुपवसेदश्वमेधावभृथंगच्छेद्व्रात्यस्तोमेनवायजेतेति अत्रेयंव्यवस्था यस्योपनेत्राद्यभावेनतत्कालातिक्रमस्तस्यया
ज्ञवल्कीयव्रतानामन्यतमशक्त्यपेक्षयाभवति अनापद्यतिक्रमेतुमानवंत्रैमासिकम् तत्रैवपंचदशवर्षादूर्ध्वमपिक्रियत्कालातिक्र
मेतूद्दालकव्रतम् व्रात्यस्तोमोवेति येषांतुपित्रादयोनुपनीतास्तेषामापस्तंबोक्तम् यस्यपितापितामहावनुपनीतौस्यातांतस्यसंवत्स
रंत्रैविद्यकंब्रह्मचर्यम् यस्यप्रपितामहादेर्नानुस्मर्यतउपनयनंतस्यद्वादशवर्षाणित्रैविद्यकंब्रह्मचर्यमिति तथास्तेयेप्युपपातकसा
धारणप्राप्तव्रतचतुष्टयापवादकंप्रायश्चित्तंमनुनोक्तम् धान्यान्नधनचौर्याणिकृत्वाकामाद्द्विजोत्तमः सजातीयगृहादेवकृच्छ्राब्देन
विशुद्ध्यतीति द्विजोत्तमस्यसजातीयोब्राह्मणएवातोविप्रपरिग्रहेब्राह्मणस्यहर्तुरिदंक्षत्रियादेस्त्वल्पंकल्प्यं अथाष्टापाद्यंस्तेय
किल्बिषंशूद्रस्यद्विगुणोत्तराणीतरेषांप्रतिवर्णंविदुषोतिक्रमेदंडभूयस्त्वमिति क्षत्रियादेरपहर्तुर्दंडाल्पत्वस्यदर्शनात् तथा वि
प्रेतुसकलंदेयंपादोनंक्षत्रियेस्मृतमिति पादपादहान्याप्रायश्चित्तदर्शनात् तथा क्षत्रियादिपरिग्रहेणापिदंडानुसारेणप्रायश्चि



त्तात्यत्वंकल्प्यं अतः क्षत्रियपरिग्रहेचौर्येषाण्मासिकम् वैश्यपरिग्रहेत्रैमासिकंगोवधव्रतम् शूद्रपरिग्रहेचांद्रायणंकल्प्यम् एव
मुत्तरत्राप्यूहनीयम् इदंचदशकुंभधान्यापहारविषयम् अनधिकेतु धान्यंदशभ्यःकुंभेभ्योहरतोदमउत्तमः पलसहस्राद्दधिके-
वधइतिदर्शनात् कुंभश्चपंचसहस्रपलपरिमाणः धान्यसाहचर्यादन्नधनेचैतावद्धान्यपरिमितेवेदितव्यम् अन्नशब्देनतंदुला
दिकमभिधीयते धनशब्देनताम्ररजतादिकं इदंतुप्रायश्चित्तंकामकारविषयम् अकामतस्तुत्रैमासिकंगोवधव्रतम् तथा मनुष्या
णांचहरणेस्त्रीणांक्षेत्रगृहस्यच कूपवापीजलानांचशुद्धिश्चांद्रायणेनत्विति सार्द्धशतद्वयपणलभ्यजलापहारेइदंचांद्राय-
णंप्राप्तमपीतरगोवधव्रतनिवृत्त्यर्थंविधीयते तावन्मूल्यजलापहारे पानीयस्यतृणस्यच तन्मूल्याद्द्विगुणोदंडइतिपंचशतम् तथेति
चांद्रायणविषयेपंचशतदंडविधानात्तावत्परिमाणदंडचांद्रायणयोर्गोवधादौसहचरितत्वात्तथाकृच्छ्रातिकृच्छ्रेंद्वयोःपणपंच
शतंतथेतिचांद्रायणविषयेपंचशतपणदंडविधानाच्च एतच्चक्षत्रियादिद्रव्यापहारेद्रष्टव्यम् ब्राह्मणसंबंधिद्रव्यापहारेतु निक्षे
पस्यापहरणेनराश्वरजतस्यच भूमिवज्रमणीनांचरुक्मस्तेयसमंस्मृतमितिद्रष्टव्यम् तथाद्रव्याणामल्पसाराणांस्तेयंकृत्वान्यवे-
श्मनः चरेत्सांतपनंकृच्छ्रंतन्निर्यात्यात्मशुद्धय इत्यनेनाल्पप्रयोजनत्रपुसीसादिद्रव्यापहारविशेषेण स्तेयसामान्योपपातकप्रा
यश्चित्तापवादइदंचचांद्रायणनिमित्तभूतार्द्धतृतीयशतमूल्यस्यपंचदशांशार्द्धत्रपुसीसाद्यपहारेप्रायश्चित्तम् चांद्रायणपंचद-
शांशत्वात्तस्य तथाद्रव्यविशेषेणाप्युपपातकसामान्यप्राप्तव्रतापवादः भक्ष्यभोज्यापहरणेयानशय्यासनस्यच पुष्पमूलफलानां

चपंचगव्यंविशोधनमिति एकवारभोजनपर्याप्तभक्ष्यभोज्यापहारइदं द्विवारभोजनपर्याप्तापहारेत्रिरात्रं यथाहपैठीनसिः भक्ष्य
भोज्यान्नस्योदरपूरणमात्रहरणेत्रिरात्रमेकरात्रंवापंचगव्याहारतेति यानादीनामप्येतत्साहचर्यादेतावन्मूल्यानामेवापहरणेएतत्प्रा
यश्चित्तम् सर्वत्रापिह्रीयमाणद्रव्यन्यूनाधिकभावेनप्रायश्चित्तस्यापिगुरुलघुभावःकल्पनीयः तथा॰ तृणकाष्ठद्रुमाणांचशुष्का-
न्नस्यगुडस्यच तैलचर्मामिषाणांचत्रिरात्रंस्यादभोजनमिति एषांचतृणादीनांभक्ष्यादित्रिगुणत्रिरात्रप्रायश्चित्तस्यदर्शनात् न
त्रिगुणमूल्यार्घाणामेतत्प्रायश्चित्तं तथा मणिमुक्ताप्रवालानांताम्रस्यरजतस्यच अयस्कांस्योपलानांचद्वादशाहंकणान्विते
ति अत्रापिभक्ष्यादिद्वादशगुणप्रायश्चित्तदर्शनात् तन्मूल्यद्वादशगुणमूल्यमणिमुक्ताद्यपहारेएतत्प्रायश्चित्तमिदंद्रष्टव्यम् तथा
कार्पासकीर्णजीर्णानांद्विखुरैकखुरस्यच पक्षिगंधौषधीनांचरज्वाश्चैवत्र्यहंपयइति अत्रापिभक्ष्यादित्रिगुणप्रायश्चित्तदर्शनात्त-
त्रिगुणमूल्यानामपहारएवैतत्प्रायश्चित्तम् ह्रीयमाणद्रव्यन्यूनाधिकभावेनप्रायश्चित्ताल्पत्वमहत्त्वंकल्प्यमेव इदंचस्तेयप्राय-
श्चित्तमपहृतद्रव्यदानोत्तरकालमेवद्रष्टव्यम् यथाहविष्णुः दत्वैवापहृतंद्रव्यंस्वामिनेव्रतमाचरेदिति ऋणापाकरणंचपुत्रपौ-
त्रैर्ऋणंदेयमितिविहितंतस्यानपाकरणेतथावैदिकस्यचजायमानोवैब्राह्मणइत्येतद्वाक्येनर्णसंस्तुतयज्ञाद्यकरणेच उपपातक
शुद्धिःस्यादेवमित्यादिनोपपातकसामान्यविहितव्रतचतुष्टयंशक्त्यपेक्षयायोज्यम् प्रायश्चित्तांतरमप्यत्रमनुनोक्तम् इष्टिंवैश्वा १०२
नरींचैवनिर्वपेदब्दपर्यये लुप्तानांपशुसोमानांनिष्कृत्यर्थमसंभवइति अब्दपर्ययेसंवत्सरांते तथाधिकृतस्यानाहिताग्नित्वेप्येत

देवव्रतचतुष्टयम् वत्सरादूर्ध्वमापदिशक्त्यपेक्षयायोज्यम् अनापदितुमानवंत्रैमासिकं अर्वाक्पुनर्वत्सरात्कार्ष्णाजिनिर्विशेषमाह का
लेत्वाधायकर्माणिकुर्याद्विप्रोविधानतः तदकुर्वन्त्रिरात्रेणमासिमासिविशुद्ध्यति अनाहिताग्नोपित्रादोयक्ष्यमाणःसुतोयदि सहिभ्रात्ये
नपशुनायजेत्तन्निष्क्रयायत्विति एकाग्नेरपिविशेषस्तेनैवोक्तः कृतदारोगृहेज्येष्ठोयोनादध्यादुपासनम् चांद्रायणंचरेद्वर्षंप्रतिमासम
होपिवेति यथापण्यानांविक्रयेचस्मृत्यंतरेप्रायश्चित्तविशेषउक्तः यथाहहारीतः गुडतिलपुष्पमूलफलपक्वान्नविक्रयेसोमपानम् सो
मकृच्छ्रः लाक्षालवणमधुमांसतैलक्षीरदधिघृतगंधतक्रचर्मवाससामन्यतमविक्रयेचांद्रायणं तथा ऊर्णाकेशकेशरभूधेनुवेश्मा
श्मशस्त्रविक्रयेचभक्ष्यमांसस्नाय्वस्थिशृंगनखशुक्तिविक्रयेतप्तकृच्छ्रः हिंगुगुग्गुलुहरितालमनःशिलांजनगैरिकलाक्षालवणम
णिमुक्ताप्रवालवैणववेणुमृन्मयेषुचतप्तकृच्छ्रः आरामतडागोदपानपुष्करिणीसुकृतविक्रयेत्रिषवणस्नाय्यधःशायीचतुर्थकाला
हारोदशसहस्रंजपन्संवत्सरेणपूतोभवति हीनमानोन्मानसंकरसंकीर्णविक्रयेचेति एवमन्यैरपिशंखविष्ण्वाद्युक्तवचनैर्युक्तप्रायश्चि
त्तविशेषेणोक्तंतत्रानापदिमानवमुपपातकसाधारणतःप्राप्तंत्रैमासिकम् आपदितुयाज्ञवल्कीयंव्रतचतुष्टयंशक्त्यपेक्षयायोज्य त-
था परिवेत्तरिचवसिष्ठेनप्रायश्चित्तविशेषउक्तः परिविविदानःकृच्छ्रातिकृच्छ्रौचरित्वातस्मैदत्वापुनर्निविशेत् तांचैवोपयच्छेते
ति परिविविदानःपरिवित्तिरुच्यते तत्स्वरूपंचप्राग्व्याख्यातम् असौकृच्छ्रातिकृच्छ्रौचरित्वातस्मैज्येष्ठायतांस्त्रींदत्वाब्रह्मचर्या-
दृतभैक्ष्यंगुरुपरिभवपरिहारार्थंनिवेद्यपुनरुद्वहेत् कामित्यपेक्षयामुक्तम् तामेवोपयच्छेतेतितामेवस्त्रींज्येष्ठायनिवेदितांतेन

चानुज्ञातामुद्वहेत् यत्तुहारीतेनोक्तम् ज्येष्ठेनिविष्टेकनीयान्विशमानःपरिवेत्ताभवतिपरिवित्तिर्ज्येष्ठः परिवेदनीकन्या परिदायीदाता
परियष्टायाजकः तेसर्वेपतिताःसंवत्सरंप्राजापत्येनकृच्छ्रेणपावयेयुरिति यदपिशंखेनोक्तम् परिवित्तिःपरिवेत्ताचसंवत्सरंब्राह्मण
गृहेषुभैक्ष्यंचरेयातामिति तदुभयमपिकामकारेणकन्यापित्राद्यनुज्ञातोद्वाहविषयम् प्रायश्चित्तस्यगुरुत्वात् यदापुनःकामतोक
न्यांपित्रादिदत्तामेवपरिणयतितदामानवंत्रैमासिकम् पूर्वोक्तौकृच्छ्रातिकृच्छ्रौयाज्ञवल्कीयव्रतचतुष्टयमज्ञातविषयम् यमेनाप्य
त्रविशेषउक्तः कृच्छ्रोद्वयोःपारिवेद्येकन्यायाःकृच्छ्रएवच अतिकृच्छ्रंचरेद्दाताहोताचान्द्रायणंचरेदिति एतच्चपर्याहिताग्न्यादीना
मपिसमानम् एकयोगनिर्देशात् यथाहगौतमः परिवित्तिपरिवेतृपर्याहितपर्याधात्रग्रेदिधिषूदिधिषूपतीनांसंवत्सरंप्राकृत-
ब्रह्मचर्यमिति अतएववसिष्ठेनाग्रेदिधिषूपत्यादाविदमेवप्रायश्चित्तमुक्तम् अग्रेदिधिषूपतिःकृच्छ्रंद्वादशरात्रंचरित्वानिर्विशेत् तांचैवोपय
च्छेत दिधिषूपतिःकृच्छ्रातिकृच्छ्रौचरित्वातस्मैदत्त्वापुनर्निर्विशेतेति अग्रेदिधिष्वादेर्लक्षणंस्मृत्यन्तरेभिहितम् ज्येष्ठायांयद्यनूढायांक-
न्यायामूढ्यतेनुजा यासाग्रेदिधिषूर्ज्ञेयापूर्वातुदिधिषूःस्मृतेति तत्राग्रेदिधिषूपतिःप्राजापत्यंकृत्वातामेवज्येष्ठांपश्चादन्येनोढामुद्वहेत्
दिधिषूपतिस्तुकृच्छ्रातिकृच्छ्रौकृत्वास्वोढांज्येष्ठांकनीयस्याःपूर्वविप्रेद्दत्वान्यामुद्वहेदितिपरिवेदनम् तथा भृतकाध्यापकभृतकाध्या
पितयोश्चपयसाब्रह्मसुवर्चलांपिबेदित्यधिकृत्यविष्णुनोक्तम् भृतकाध्यापनंकृत्वाभृतकाध्यापितस्तथा अनुयोगप्रदानेनत्रीन्पक्षा १०३
न्नियतःपिबेदिति उत्कर्षहेतोरध्यायानस्यनाशितत्वयेत्येवंपर्यनुयोगोनुयोगप्रदानम् अतएवस्मृत्यन्तरे दत्त्वानुयोगानध्येतुःपतिता

---

न्मनुरब्रवीदित्युक्तं अत्रापिपूर्वोक्तिव्रतैःसहास्यशक्त्याद्यपेक्षयाविकल्पः इतिभृतकाध्यापकाध्यापितप्रकरणम् तथापारदार्येप्युप-
पातकसामान्येप्राप्तमानवत्रैमासिकस्ययाज्ञवल्कीयव्रतचतुष्टयस्यापिगुरुदारादावपवादउक्तः तथान्यत्रापिगौतमादिभिःपारदार्य-
विशेषेणापवादउक्तः यथाहगौतमः द्वेपरदारे त्रीणिश्रोत्रियस्येति तथावार्षिकंप्राकृतंब्रह्मचर्यं प्रस्तुत्यतेनैवेदमभिहितम् उपपात
केषुचैवमिति तत्रेयंव्यवस्था ऋतुकालेकामतोजातिमात्रब्राह्मणीगमनेवार्षिकंप्राकृतंब्रह्मचर्यं तस्मिन्नेवकालेकर्मसाधनत्वादि-
गुणशालिन्याब्राह्मण्यागमनेद्वैवर्षंप्राकृतंब्रह्मचर्यं तादृश्याएवश्रोत्रियभार्यायागमनेत्रीणिवर्षाणिप्राकृतंब्रह्मचर्यं यदाश्रोत्रि
यपत्न्यांगुणवत्यांब्राह्मण्यांत्रैवार्षिकम् तादृग्विधायामेवक्षत्रियायांद्वैवार्षिकम् तादृश्यामेववैश्यायांवार्षिकमितिव्यवस्था एत
त्समानदृष्ट्याशूद्रायांषाण्मासिकंप्राकृतंब्रह्मचर्यंकल्पनीयम् अतएवशंखेनवैश्यायामवकीर्णःसंवत्सरंब्रह्मचर्यंत्रिषवणंचानुति
ष्ठेत् क्षत्रियायांद्वैवर्षेत्रीणिब्राह्मण्यांवैश्यायांशूद्रायांब्राह्मणपरिणीतायामितिवर्णक्रमेणह्रासोदर्शितः एवंक्षत्रियस्यापिक्षत्रिया-
दिषुस्त्रीषुक्रमेणद्वैवार्षिकवार्षिकषाण्मासिकानिपूर्वोक्तएवविषयेयोजनीयानि वैश्यस्यवैश्याशूद्र्योर्वार्षिकषाण्मासिके शूद्र-
स्यशूद्रांपरभार्यायांषाण्मासिकमेव यत्त्वापस्तंबीयम् सवर्णायामनन्यपूर्वायांसकृत्संनिपातेपादःपतत्येवमभ्यासेपादःपादश्च
तुर्थेसर्वमिति तद्गौतमीयत्रिवार्षिकेणसमानविषयम् अनन्यपूर्विकायांचतुरभ्यासेद्वादशवार्षिकप्रायश्चित्तविधानादेकस्यामेव
गमनाभ्यासेनेदंप्रायश्चित्तंकिंतुप्रतिगमनंपादपादन्यूनंकल्प्यम् एतत्सर्वंकामकारविषयम् अकामतःपुनरेतदेवार्द्धकृत्स्याःपूर्वो

क्षविषयेयोजनीयम् अनृतुकालेतुजातिमात्रब्राह्मण्यांकामतोगमनेमानवंत्रैमासिकम् जातिमात्रक्षत्रियादिषुस्त्रीषुपुनरस्मि
न्नेवविषयेतदीयान्येवद्वैमासिकचांद्रायणमासिकानियोजनीयानि क्षत्रियादीनांक्षत्रियादिषुस्त्रीषुद्वैमासिकादीन्येव अकाम-
तःपुनरेतासुत्रैवार्षिकानांयाज्ञवल्कीयमृषभैकादशगोदानम् मासंपंचगव्याशनंमासंप्राजापत्यचरणंचक्रमेणद्रष्टव्यम् शूद्रा
गमनेतुकामतोविहितंमासव्रतमेवार्द्धकृत्यायोजनीयम् अतएवसंवर्त्तः शूद्रांतुब्राह्मणोगत्वामासंमासार्द्धमेववा गोमूत्र
यावकाहारस्तिष्ठेत्तत्पापमुक्तय इत्यकामतोर्द्धमासिकमित्यभिप्रेतम् ब्राह्मणश्चेदप्रेक्षापूर्वकंब्राह्मणदारानभिगच्छेन्निवृत्त-
धर्मकर्मणःकृच्छ्रोनिवृत्तधर्मकर्मणोतिकृच्छ्रइति तद्ब्राह्मणभार्यायांशूद्रायांद्रष्टव्यम् द्विजातिस्त्रीषुचविप्रोढासुद्विस्त्रिर्व्य
भिचारितासुअबुद्धिपूर्वगमनेवा तथाचसंवर्त्तः विप्रास्वजानतागत्वाप्राजापत्यंसमाचरेदिति कामतस्तु राज्ञीप्रव्रजिता-
धात्रींसाध्वींवर्णोत्तमामिति कृच्छ्रद्वयंप्रकुर्वीतसगोत्रामभिगम्यचेतियमोक्तंकृच्छ्रद्वयंद्रष्टव्यम् चतुराद्यभ्यासेतुव्यभिचार
स्यस्वैरिण्यांवृषल्यामवकीर्णःसचैलस्नात्वोदकुंभंदद्याद्ब्राह्मणाय वैश्यायांचचतुर्थकालाहारोब्राह्मणान्भोजयेद्यवसभारं-
चगोभ्योदद्यात् क्षत्रियायांत्रिरात्रोपोषितोघृतपात्रंदद्यात् ब्राह्मण्यांषड्रात्रोपोषितोगादद्याद्गोष्ववकीर्णःप्राजापत्यंचरेत् अनू
ढायामवकीर्णःपलालभारंसीसमाषकंचदद्यात् इतिशंखोक्तंवेदितव्यम् चतुराद्यभ्यासविषयत्वंचास्य चतुर्थेस्वैरिणीप्रोक्ता १०४
पंचमेबंधकीमतेतिस्मृत्यंतरादवगम्यते अत्रैवविषयेषट्त्रिंशन्मतेप्युक्तम् ब्राह्मणोबंधकींगत्वाकिंचिद्दद्यात्द्विजातये रज

न्यांचेद्धनुर्दद्याद्वैश्यांगत्वातुचैलकम् शूद्रांगत्वातुवैविप्रउदकुंभंद्विजातये दिवसोपोषितोवास्याद्दद्याद्विप्रायभोजनमिति अनुलोमव्यवा
येगर्भेद्विगुणं यदिस्त्रीअतिदूषितान प्रतिलोमगानभवतितदैव अन्यजातिगमनेद्वैगुण्यं प्रतिलोमदूषितासुअंत्यावसायिस्त्रीषुचचांडा
लीगर्भेयथागुरुतल्पव्रतंतथाकिंचिन्न्यूनंतारतम्यंकल्प्यम् चांडालीगमनेवार्षिकम् गर्भेगुरुतल्पत्वंतथैवज्ञेयं इदंप्रायश्चित्तजातंग
र्भानुत्पत्तिविषयम् तदुत्पत्तौतुयद्विशेषेणप्रायश्चित्तमुक्तंतदेवतत्रद्विगुणंकुर्यात् गमनेतुव्रतंयत्स्याद्गर्भेतद्विगुणंचरेदित्युशनसः
स्मरणात् शूद्र्यांगर्भमादधतश्चतुर्विंशतिमतेविशेषउक्तः वृषल्यामभिजातस्तुत्रीणिवर्षाणिचतुर्थकालसमयेनक्तंभुंजीतेति यत्तुम
नुवचनम् शूद्रांशयनमारोप्यब्राह्मणोयात्यधोगतिम् जनयित्वासुतंतस्यांब्राह्मण्यादेवहीयतइति तत्पापगौरवख्यापनपरम् प्रा
तिलोम्यव्यवायेतुसर्वत्रपुरुषस्यवधएव प्रातिलोम्येवधःपुंसोनार्याःकर्णादिकर्त्तनमितिवचनात् यत्तुवृद्धप्रचेतसोवचनं शूद्रस्यब्रा
ह्मणींमोहाद्गच्छतःशुद्धिमिच्छतः पूर्णमेतद्व्रतंदेयंमातायस्याद्धितस्यसा पादहान्यान्यवर्णासुगच्छतःसार्ववर्णिकमिति द्वादश
वर्षातिदेशकंतत्स्वभार्याभ्रांत्यागच्छतोवेदितव्यम् मोहादितिविशेषणोपादानात् यत्तुसंवर्त्तवचनम् कथंचिद्ब्राह्मणींगच्छेत्क्ष
त्रियोवैश्यएववा कृच्छ्रसांतपनंवास्यात्प्रायश्चित्तंविशुद्धये शूद्रस्तुब्राह्मणींगच्छेत्कथंचित्काममोहितः गोमूत्रयावकाहारो-
मासेनैकेनशुद्ध्यतीति तदत्यंतव्यभिचरितब्राह्मणीविषयं अंत्यजागमनेपिप्रायश्चित्तंबृहत्संवर्त्तेनोक्तम् रजकव्याधशैलूष
वेणुचर्मोपजीविनाम् एतास्तुब्राह्मणोगत्वाचरेच्चांद्रायणद्वयमिति इदंब्राह्मणस्यकामतःसकृद्गमनविषयम् क्षत्रियादीनांतु-

पादहीनंकल्प्यम् अत्रैवापस्तंबेनोक्तम् म्लेच्छींनटींचर्मकारींरजकींबुरुडींतथा एतासुगमनंकृत्वाचरेच्चांद्रायणद्वयमिति अंत्यजाश्च
तेनैवदर्शिताः रजकश्चर्मकारश्चनटोबुरुडएवच कैवर्त्तमेदभिल्लाश्चसप्तैतेंत्यावसायिनः अंत्यजास्मृताइति येतुचांडादयोंत्या-
वसायिनस्तत्स्त्रीगमनेनगुरुतरंप्रायश्चित्तंगुरुतल्पप्रकरणे दर्शितम् एतासांचांत्यजस्त्रीणांमध्येयदेकस्याव्यवायेप्राय
श्चित्तमभिहितंतत्सर्वासुभवति सर्वासांसदृशत्वात् तथाह्योशनाः बहूनामेकधर्मीणामेकस्यापियदुच्यते सर्वेषांतद्भवेत्कार्यमेकरू
पाहितेस्मृताइति अकामतस्तुगमने चंडालमेदश्वपचकपालव्रतचारिणाम् अकामतःस्त्रियोगत्वापराकव्रतमाचरेदित्यापस्तं
बोक्तंद्रष्टव्यम् यच्चसंवर्त्तवचनम् रजकव्याधशैलूषवेणुचर्मोपजीविनाम् स्त्रियोविप्रोयदागच्छेत्कृच्छ्रंचांद्रायणंचरेदिति तद
प्यकामविषयम् यत्तुशातातपेनोक्तम् कैवर्तीरजकींचैववेणुचर्मोपजीविनीम् प्राजापत्यविधानेनकृच्छ्रेणैकेनशुध्यतीति तद्रेत
सेकात्प्राङ्निवृत्तिविषयम् यत्तूशनसोक्तम् कापालिकान्नभोक्तॄणांतन्नारीगामिनांतथा ज्ञानात्कृच्छ्राब्दमुद्दिष्टमज्ञानादैंदवंस्मृ
तमिति तदभ्यासविषयम् यदातुचांडाल्यादिषुगच्छतोगर्भोभवतितदा चांडाल्यांगर्भमारोप्यगुरुतल्पव्रतंचरेदित्युशनसोक्तंद्वा
दशवार्षिकंद्रष्टव्यंय त्वंत्यजायांप्रसूतस्यनिष्कृतिर्नविधीयते निर्वासनंकृतांकस्यतस्यकार्यमसंशयमित्यापस्तंबवचनम् तत्काम-
कारविषयम् स्त्रीणामपिसवर्णानुलोमव्यवायेपुरुषस्योक्तंत्रिवार्षिकादितदेवभवति यत्पुंसःपरदारेषुतच्चेनांचारयेद्व्रतमितिमनुस्मर १०५
णात् प्रातिलोम्येनव्यवायेएवपरस्त्रीपुंसयोःप्रायश्चित्तभेदः तथाहवसिष्ठः शूद्रश्चेद्ब्राह्मणीमभिगच्छेद्वीरणैर्वेष्टयित्वाशूद्रमग्नौ

प्रास्येत् ब्राह्मण्याःशिरसिवपनंकारयित्वासर्पिषाभ्यज्यनग्नांगोरखरमारोप्यमहापथमनुसंव्राजयेत्पूताभवतीति वैश्यश्चेद्ब्राह्मणी
मभिगच्छेल्लोहितदर्भैर्वेष्टयित्वावैश्यमग्नौप्रास्य ब्राह्मण्याःशिरसिवपनंकारयित्वासर्पिषाभ्यज्यनग्नांगोरखरमारोप्यमहापथमनु
संव्राजयेत्पूताभवतीति राजन्यश्चेद्ब्राह्मणीमभिगच्छेच्छरपत्रैर्वेष्टयित्वाराजन्यमग्नौप्रास्येत् ब्राह्मण्याःशिरसिवपनंकारयित्वा-
सर्पिषाभ्यज्यनग्नांगोरखरमारोप्यमहापथमनुसंव्राजयेत्पूताभवतीतिविज्ञायतइति एवंवैश्योराजन्यांशूद्रश्चराजन्यावैश्य
योरिति पूताभवतीतिवचनाद्राजवीथिपरिव्राजनमेवदंडरूपंप्रायश्चित्तांतरनिरपेक्षंशुद्धिसाधनमितिदर्शयति ब्राह्मण्याःप्रा-
तिलोम्येनाद्विजातिव्यवायेप्रायश्चित्तांतरमप्युक्तंसंवर्त्तेन ब्राह्मण्यकामागच्छेच्चेत्क्षत्रियंवैश्यमेववा गोमूत्रयावकैर्मासात्तद
र्धाद्विशुध्यतीति कामतस्तुद्विगुणंकर्त्तव्यम् कामात्तुद्विगुणंभवेदितिवचनात् षट्त्रिंशन्मतेपिब्राह्मणीक्षत्रियवैश्यसेवाया
मतिकृच्छ्रं कृच्छ्रातिकृच्छ्रौचरेत्क्षत्रिययोषितां ब्राह्मणराजन्यवैश्यसेवायांकृच्छ्रार्द्धंप्राजापत्यमतिकृच्छ्रंवैश्ययोषितांब्राह्मण
राजन्यवैश्यसेवायांकृच्छ्रपादकृच्छ्रार्द्धंप्राजापत्यंशूद्रायाःशूद्रसेवनेप्राजापत्यम् ब्राह्मणराजन्यवैश्यसेवायांत्वहोरात्रत्रिरात्रं
कृच्छ्रार्द्धमिति शूद्रसेवायांतुविशेषोबृहत्प्रचेतसोक्तः विप्राशूद्रेणसंपृक्तानचेत्तस्मात्प्रसूयते प्रायश्चित्तंस्मृतंतस्याःकृच्छ्रं-
चांद्रायणत्रयम् एतदनिच्छंत्यांस्वपतिभ्रात्रावावेदितव्यम् चांद्रायणेद्वेकृच्छ्रश्चविप्रायावैश्यसेवने कृच्छ्रचांद्रायणेस्याता
तस्याःक्षत्रियसंगमे क्षत्रियाशूद्रसंपर्केकृच्छ्रंचांद्रायणद्वयम् चांद्रायणसकृच्छ्रंतुचरेद्वैश्येनसंगता शूद्रंगत्वाचरेद्वैश्याकृ-

च्छ्रं चांद्रायणोत्तरम् आनुलोम्ये प्रकुर्वीत कृच्छ्रं पादांतरोपितामिति प्रजातायास्तु चतुर्विंशतिमते विशेष उक्तः विप्रगर्भे पराकः स्या
त्क्षत्रियस्य तथैंदवम् ऐंदवश्च पराकश्च वैश्यस्याकामकारतः शूद्रगर्भे भवेत्याग श्चांडालो जायते यतः गर्भस्रवे धातुदोषे श्चरेच्चां
द्रायणत्रयमिति अकामकारत इति विशेषणोपादानात् कामकारे पुनः पराकादिकं द्विगुणं कुर्यात् यदात्वनिःसृतगर्भे च दशममास
स्थित्वा प्रजायते तदा प्रायश्चित्ताभावः ब्राह्मणक्षत्रियविशां भार्याः शूद्रेण संगताः अप्रजाता विशुध्यंति प्रायश्चित्तेन नेतरा इति वसि
ष्ठस्मरणात् यदात्वाहितगर्भैव पश्चाच्छूद्रादिभिर्व्यभिचरति तदा गर्भपातशंकया प्रसवोत्तरकालमेव प्रायश्चित्तं कुर्यात् अंतर्व-
त्नीतु या नारी समेताक्रम्य कामिना प्रायश्चित्तं न कुर्यात्सा यावद्गर्भो न निःसृतः जाते गर्भे व्रतं पश्चात्कुर्यान्मासं तु यावकम् न गर्भदोषस्त
स्यास्ति संस्कार्यः स यथाविधीति स्मृत्यंतरदर्शनात् यदा त्वोढ्वा प्रायश्चित्तं न कुर्वीत तदा नार्याः कर्णादिकर्तनमिति द्रष्टव्यम् अंत्य
जगमनेपि स्त्रीणां स्मृत्यंतरे प्रायश्चित्तं दर्शितम् रजकव्याधशैलूषवेणुचर्मोपजीविनः ब्राह्मण्येतान्यदा गच्छेदकामादैंदवत्रयमि
ति तथा चांडाल्याद्यंत्यजागमनेपि चांडालपुल्कसंम्लेच्छश्वपाकपतितं तथा ब्राह्मण्यकामतो गत्वा चांद्रायणचतुष्टयमिति अ
कामत इति वचनात्कामतो द्विगुणं कल्प्यम् तथा चांडालेन तु संपर्कं यदि गच्छेत्कथंचन सशिखं वपनं कुर्याद्भुंजीयाद्यावकौदनम्
त्रिरात्रमुपवासः स्यादेकरात्रं जले वसेत् आत्मना संमिते कूपे गोमयोदककर्दमे तत्र स्थित्वा निराहारा सा त्रिरात्रं ततः क्षिपेत् शंख १०६
पुष्पीलतामूलपत्रं वा कुसुमं फलम् क्षीरे सुवर्णसंमिश्रं क्वाथयित्वा ततः पिबेत् एकभुक्तं चरेत्सा च यावत्सुष्पदती भवेत् बहिस्ताव-

त्स निवसेद्यावच्चरति तद्व्रतम् प्रायश्चित्ते ततश्चीर्णे कुर्याद्ब्राह्मणभोजनम् गोद्वयं दक्षिणां दद्याच्छुद्ध्येत्स्वायंभुवोऽब्रवीदिति एतदप्य
कामविषयमेव यदि गच्छेत्कथंचनेति वचनात् ऋष्यशृंगेणाप्यंत्यजाव्यवाये प्रायश्चित्तांतरमुक्तम् संपृक्तास्याद्यदांत्यैर्यासा कृच्छ्रा-
ब्दं समाचरेदिति कामतः सकृद्गमन इदं यदा त्वाहितगर्भाया एव पश्चाच्चांडालादिव्यवायस्तदा तेनैव विशेष उक्तः अंतर्वत्नी तु युवतिः सं
पृक्ता चांत्ययोनिना प्रायश्चित्तं न सा कुर्याद्यावद्गर्भो न निःसृतः न भचारं गृहे कुर्यान्नित्रांगेषु प्रसाधनम् न शयीत समं भर्त्रा न वा भुंजीत
बांधवैः प्रायश्चित्तं गते गर्भे विधिं कृच्छ्राब्दिकं चरेत् हिरण्यमथवा धेनुं दद्याद्विप्राय दक्षिणामिति यदा तु कामतोत्यंतसंपर्कं करोति त
दा अंत्यजेन तु संपर्के भोजने मैथुने कृते प्रविशेत्सुप्रदीप्तेग्नौ मृत्युना सा विशुध्यतीति त्युशनसोक्तं द्रष्टव्यम् यदा तूक्तं प्रायश्चित्तं न करो
ति तदा पुल्लिंगेनां कनीयाव ध्यावा भवेत् हीनवर्णोपभुक्ता या सा त्याज्या वध्याथवा भवेदिति पाराशर्यस्मरणात् इति पारदार्यप्रायश्चित्तप्र
करणम् तथा परिवित्तिप्रायश्चित्तानामपि परिवेत्तृप्रायश्चित्तवद्व्यवस्था विज्ञेया इयांस्तु विशेषः परिवेत्तुर्यस्मिन्विषये कृच्छ्राति-
कृच्छ्रौ तत्र परिवित्तेः प्राजापत्य इति परिवित्तिः कृच्छ्रं द्वादशरात्रं चरित्वा पुनर्निर्विशेत्तां चैवोपयच्छेदिति वसिष्ठस्मरणात् इति प
रिवित्तिप्रकरणम् २६५ वार्धुष्यलवणक्रय योस्तु मनुयोगीश्वरोक्तसामान्योपपातकप्रायश्चित्तानि जातिशक्तिगुणाद्यपेक्षया यो-
ज्यानि लवणक्रयानंतरं स्त्रीशूद्रविट्क्षत्रवध इत्युपपातकमध्ये पठितं तत्र प्रायश्चित्तांतरमप्याह एकमधिकं यस्मिन्सहस्रे तन्दे
कसहस्रं तस्य पूरण एकसहस्रः ऋषभ एकसहस्रो यासां गवां ताः ऋषभैकसहस्रास्ताः क्षत्रवधे दद्यात् अथवा त्वहत्याप्रायश्चित्तं ब्रह्मह

त्याव्रतं वर्षत्रयं कुर्यात् वैश्याघाती पुनरेतत् ब्रह्महत्याव्रतमेकवर्षं चरेत् गवामृषभैकशतं वा दद्यात् शूद्रघाती तु ब्रह्महत्याव्रतं षण्मासं च-
रेत् यद्वा दशधेनूरचिरप्रसूताः सवत्सा दद्यात् इदमकामतो जातिमात्रक्षत्रियादिवधविषयम् अकामतस्तु राजन्यं विनिपात्येति प्रक्रम्यैते
षामेव प्रायश्चित्तानां मानवेऽभिधानात् दानतपसोश्च शक्त्यपेक्षया व्यवस्था ईषद्वृत्तस्थयोस्तु विट्शूद्रयोस्तुरीयो ब्रह्महत्यायाः क्षत्रिय-
स्य वधे स्मृतः वैश्येऽष्टमांशो वृत्तस्थे शूद्रे ज्ञेयस्तु षोडश इति मनूक्तं द्रष्टव्यम् वृत्तस्थे क्षत्रिये तु सार्द्धं चतुर्वार्षिकं कल्प्यम् वृत्तशब्देन चा

ऋषभैकसहस्रा गा दद्यात्क्षत्रवधे पुमान् ब्रह्महत्याव्रतं वापि वत्सरत्रितयं चरेत् २६६
वैश्यहाब्दं चरेदेतद्दद्याद्वैकशतं गवाम् षण्मासाच्छूद्रहाप्येतद्धेनूर्दद्याद्दशाथवा २६७

त्मगुणादिकमुच्यते गुरुपूजा घृणा शौचं सत्यमिन्द्रियनिग्रहः प्रवर्त्तनं हितानां च तत्सर्वं वृत्तमुच्यत इति मनुस्मरणात् यत्तु वृद्धहारीत
वचनम् ब्राह्मणः क्षत्रियं हत्वा षड्वर्षाणि व्रतं चरेत् वैश्यं हत्वा चरेदेवं व्रतं त्रैवार्षिकं द्विजः शूद्रं हत्वा चरेद्वर्षं वृषभैकादशाश्च गाः द- १०७
ति तत्कामकारविषयम् श्रोत्रियक्षत्रियादिवधे तु तुरीयो न क्षत्रियस्य वधे ब्रह्महणि व्रतम् अर्द्धं वैश्यवधे कुर्यात्तुरीयं वृषलस्य

त्विति वृद्धहारीतोक्तं द्रष्टव्यम् यत्तु वसिष्ठवचनम् ब्राह्मणो राजन्यं हत्वाऽष्टौ वर्षाणि व्रतं चरेत् षड्वैश्यं त्रीणि शूद्रमिति तदपि हा
रीतीयेन समानविषयम् क्षत्रिये लिङ्गिति षड्गुणन्यूना इत्येतावान् विशेषः यदा तु श्रोत्रियो वृत्तस्थश्च भवति तदा पूर्वयोर्वर्णयोर्वेदाध्या
यिनं हत्वेत्यापस्तम्बोक्तं द्वादशवार्षिकं द्रष्टव्यम् प्रारब्धयागे च श्रोत्रिये क्षत्रियादौ व्यापादिते यागस्थक्षत्रविड्घाती चरेद्ब्रह्म
हणि व्रतमिति द्रष्टव्यम् श्रोत्रिये पुनर्यागस्थक्षत्रियादौ ब्राह्मणस्य राजन्यवधे प्राकृतं ब्रह्मचर्यमृषभैकसहस्राश्च गा दद्याद्वैश्य
वधे त्रिवार्षिकमृषभैकशताश्च गा दद्यात् शूद्रवधे सांवत्सरिकमृषभैकादशाश्च गा दद्यादिति गौतमोक्तो दानतपसोः समुच्चयो द्र-
ष्टव्यः एतच्चाज्ञानतिपूर्वविषयं पूर्ववदमतिपूर्वं चतुर्षु वर्णेषु प्रमाप्य द्वादश षट् त्रीन् वत्सरं च व्रतान्यादिशेत् तेषामन्ते गोसहस्रं च ततो
ऽर्द्धं तस्यार्द्धमर्धं दद्यात् सर्वेषामानुपूर्व्येणेति शङ्खस्मरणात् इदं च द्वादशवार्षिकं गौतमीयविषयमेव किंचिन्न्यूनगुणे क्षत्रिये-
गुणाधिकयोर्वैश्यशूद्रयोश्च द्रष्टव्यम् स्त्रीशूद्रविट्क्षत्रवध इत्युपपातकमध्ये विशेषत एव पठितत्वेनोत्सर्गापवादन्यायगोच
रत्वाभावादुपपातकसामान्यप्राप्तान्यपि प्रायश्चित्तान्यत्र योजनीयानि तत्र दुर्वृत्तक्षत्रियादौ कामतो व्यापादिते मानवं त्रैमासि
कं त्रैवार्षिकं द्वैमासिकं चान्द्रायणं च वर्णक्रमेण योज्यम् अकामतस्तु योगीश्वरेणोक्तं त्रिरात्रोपवाससहितमृषभैकादशगोदानं
मासं पञ्चगव्याशनं मासिकं च पयोव्रतं यथाक्रमेण योज्यम् एतच्च प्रागुक्तं व्रतजातं ब्राह्मणकर्तृके क्षत्रियादिवधे द्रष्टव्यम् अ
कामतस्तु राजन्यं विनिपात्य द्विजोत्तमः तथा ब्राह्मणराजन्यवधे षड्वार्षिकं तथा ब्राह्मणः क्षत्रियं हत्वेत्यादिषु मनुगौतमहारीत

या॰स्मृ॰मि॰ १०८ वाक्येषुब्राह्मणग्रहणात्क्षत्रियादिकर्तृकेतुक्षत्रियादिवधेपादन्यूनंद्रष्टव्यम् विप्रेतुसकलंदेयंपादोनंक्षत्रियेस्मृतम् वैश्येर्धर्मे प्रा॰
कपादस्तुशूद्रजातिषुशस्यतइतिवृद्धविष्णुस्मरणात् यत्तुपर्षद्योब्राह्मणानांतुसाराज्ञांद्विगुणामता वैश्यानांत्रिगुणाप्रोक्ता ३
पर्षद्वच्चव्रतंस्मृतमित्यंगिरोवचनम् तत्सातिलोम्येनवाग्दंडपारुष्यविषयमित्युक्तंगोवधप्रकरणे मूर्धावसिक्तादीनांएवंव
धेएतत्प्रायश्चित्तंजातनभवतितेषांक्षत्रियादित्वाभावात् अतोदंडानुसारेणैतद्वधेपूर्वोक्तव्रतकदंबस्यवृद्धिह्रासौदर्शितौ

दुर्वृत्तब्रह्मविट्क्षत्रशूद्रयोषाःप्रमाप्यतु दृतिंधनुर्बस्तमविंक्रमाद्दद्याद्विशुद्धये २६८

दंडप्रणयनंकार्यंवर्णजात्युत्तराधरेइत्यत्र इतिक्षत्रियादिवधप्रकरणम् २६७ स्त्रीवधेप्रायश्चित्तमाह ब्राह्मणादिभार्या
दुर्वृत्ताःस्वैरिणीःप्रमाप्यक्रमेण दृतिंजलाधारचर्मकोशंधनुःकार्मुकंबस्तंछागमविंमेषंचविशुद्धयेदद्यात् इदंचप्रातिलोम्येनां
त्यजातिप्रसूतानांब्राह्मण्यादीनामकामतोवधविषयम् कामतस्तुब्रह्मगर्भआह प्रतिलोमप्रसूतानांस्त्रीणांमासावधःस्मृतः अ १०८
नरप्रभवानांचसूतादीनांचतुर्द्विषडिति ब्राह्मण्यादिवधेषण्मासाःक्षत्रियायाश्चत्वारोवैश्यायाद्वावित्येवंयथाईतयान्वयः यदातुवैश्य

कर्मणाजीवंतींव्यापादयतितदाकिंचिद्देयं वैशिकेनकिंचिदितिगौतमस्मरणात् वैशिकेनवैश्यकर्मणाजीवंत्यांव्यापादितायांकिंचिद्देयंत
च्च जलकोशंचकूपेचब्राह्मण्याःप्रतिपादयेत् वधेधेनुःक्षत्रियायाबस्तोवैश्यावधेस्मृतः शूद्रायामाविकंवैश्यांहत्वादद्याज्जलंनरइत्यंगि
रःस्मरणात् यदापुनःक्षत्रियादिभिःप्रातिलोम्येनव्यभिचारिताब्राह्मण्याद्याव्यापादयतितदागोवधप्रायश्चित्तानियथार्हयोज्यानि २६८
ईषद्व्यभिचारितब्राह्मण्यादिवधेविशेषमाह यदाल्पप्रकर्षेणदुष्टामीषद्व्यभिचारिणींब्राह्मण्यादिकांव्यापादयतितदाशूद्रहत्याव्रतंषा
ण्मासिकंकुर्यात् यद्वादशधेनूर्दद्यात् इदंचषाण्मासिकमकामतोब्राह्मण्याव्यापादने क्षत्रियावधेतुकामकृतेद्रष्टव्यम् कामतोवै

अप्रदुष्टांस्त्रियंहत्वाशूद्रहत्याव्रतंचरेत्

श्यावधेदशधेनूर्दद्यात् कामतःशूद्रावधेतुउपपातकसाधारणप्राप्तंमासंपंचगव्याशनम् यदाकामतोब्राह्मणींव्यापादयतितदाद्वादश
मासिकं क्षत्रियादीनांत्वकामतोव्यापादनेत्रैमासिकंसार्द्धमासंसार्द्धद्वाविंशत्यहानि यथाहप्रचेताः अनृतुमतींब्राह्मणींहत्वाकृ-
च्छ्राब्दंषण्मासान्वेति क्षत्रियांहत्वाषण्मासान्मासत्रयंवेति वैश्यांहत्वामासत्रयंसार्द्धमासंवेति शूद्रांहत्वासार्द्धमासंसार्द्धद्वाविंश
त्यहानिवेति यत्तुहारीतेनषड्वर्षाणिराजन्येप्राकृतंब्रह्मचर्यंत्रीणिवैश्येसार्द्धंशूद्रइतिप्रतिपाद्योक्तम् क्षत्रियवत्ब्राह्मणीषुवै

श्यवत् क्षत्रियायां शूद्रवद्वैश्यायां शूद्रां हत्वा नवमासानित्युक्तम् तदपि कर्मसाधनत्वादिगुणयोगिनीनां कामतो व्यापादने द्रष्टव्यम् अका
मतस्तु सर्वत्रार्धं कल्प्यम् आत्रेय्यां तु प्रागुक्तम् इति स्त्रीवधप्रकरणम् हिंसाप्रायश्चित्तप्रसंगात्प्रकीर्णकपदाभिधेयानुपपातकप्रा
णिवधेपि प्रायश्चित्तमाह अस्थिमतां प्राणिनां कृकलासप्रभृतीनामनूक्तनिष्कृतीनां सहस्रं हत्वा अनस्थिमतां च यूकामत्कुणदंशमश
कप्रभृतीनामनःशकटं तत्परिपूर्णमात्रं हत्वा शूद्रहत्याव्रतं षाण्मासिकं प्राकृतं ब्रह्मचर्यं चरेद्दशधेनूर्वा दद्यात् सहस्रमिति परिमाणनि

अस्थिमतां सहस्रं तु तथानस्थिमतामनः २६९

यमात्ततोधिकवधे त्वतिरिक्तं कल्प्यम् अर्वाक्पुनः प्रत्येकवधे तु यत्किंचित्सास्थिवधे तु देयम् प्राणायामस्त्वनस्थिक इति वक्ष्यति त
थानस्थिमतामन इति एतच्च क्षुद्रोद्दिष्टजंतुविषयम् स्थविष्ठानस्थिगुणादिजंतुवधे तु कृमिकीटवयोहत्येत्यादिना मलिनीकरणी 
यान्यभिधाय मलिनीकरणीयेषु तप्तः स्याद्यावकस्त्र्यहमिति मनूक्तं द्रष्टव्यम् २६९ ॐ ॐ ॐ ॐ

किंच मार्जारादयः प्रसिद्धाः पतत्रिणश्चाषकाकोलूकास्तान् हत्वा त्रिरात्रं पयः पिबेत् पादकृच्छ्रं वाचरेत् वाशब्दाद्योजनगमनादि
कं वा कुर्यात् यथाह मनुः पयः पिबेत्त्रिरात्रं वा योजनं वाध्वनो व्रजेत् अपः स्पृशेच्छ्रवंत्यां वा सूक्तं वाब्दैवतं जपेदिति इदं च प्रत्येकव
धविषयम् समुदितवधे तु मार्जारनकुलौ हत्वा चाषं मंडूकमेव च श्वगोधोलूककाकांश्च शूद्रहत्याव्रतं चरेदिति मनूक्तं षाण्मासि
कं द्रष्टव्यम् यत्पुनर्वसिष्ठेनोक्तम् श्वमार्जारनकुलमंडूकसर्पदहरमूषकान् हत्वा कृच्छ्रं द्वादशरात्रं चरेत् किंचिद्दद्यादिति एत-

मार्जारगोधानकुलमंडूकांश्च पतत्रिणः हत्वा त्र्यहं पिबेत्क्षीरं कृच्छ्रं वा पादिकं चरेत् २७०
गजे नीलवृषाः पंच शुके वत्सो द्विहायनः खराजमेषेषु वृषो देयः क्रौंचे त्रिहायनः २७१

त्कामतोभ्यासविषयं वेदितव्यम् दहरोल्पमूषकः कृच्छ्रं दरिर्वा २७१ किंच दंतिनि व्यापादिते पंच नीलवृषा देयाः शुके पक्षिणि द्वि
वर्षो वत्सः रासभच्छागैडकेषु व्यापादितेषु प्रत्येकमेको वृषः क्रौंचे पक्षिणि त्रिहायनो वत्सो देय इति सर्वत्रानुषंगः मनुनाप्यत्र विशे
ष उक्तः वासो दद्याद्धयं हत्वा पंच नीलान् वृषान् गजम् अजमेषावनड्वाहं खरं हत्वैकहायनमिति २७१ ॐ ॐ

किंच क्रव्यंमांसंनदत्तीतिक्रव्यादः व्याघ्रसृगालादिमृगविशेषः वानरसाहचर्यात् तथाहंसश्येनसमभिव्याहारात्कंकगृध्रादिपक्षिविशेषश्चगृह्यते जलशब्देनजलचराबकादयोगृह्यंते स्थलशब्देनस्थलचराबकादयः शिखंडीमयूरः भासःपक्षिविशेषः शेषाःप्रसिद्धाः एषांप्रत्येकवधेगामेकांदद्यात् अक्रव्यादस्तुहरिणादिमृगान् खंजरादिपक्षिविशेषान्हत्वावत्सतरींदद्यात् तथाचमनुः हत्वाहंसंबलाकांचबकंबर्हिणमेवच वानरंश्येनभासौचस्पर्शयेद्ब्राह्मणायगाम् क्रव्यादस्तुमृगान्हत्वाधेनुंदद्यात्पयस्विनीम्

हंसश्येनकपिक्रव्याज्जलस्थलशिखंडिनः भासंहत्वाचदद्याद्गामक्रव्यादस्तुवत्सिकां २७२
उरगेष्वायसोदंडोपंडकेत्रपुसीसकम् कोलेघृतघटोदेयउष्ट्रेगुंजाहयेंशुकम् २७३

अक्रव्यादेवत्सतरीमुष्ट्रंहत्वातुकृष्णालमिति २७२ किंच सरीसृपेषुव्यापादितेषुअयोमयोदंडस्तीक्ष्णप्रांतोदेयः पंडकेनपुंसकेव्यापादितेत्रपुसीसकंचमाषपरिमितंदद्यात् पलालभारंवा पंडकंहत्वापलालभारंत्रपुसीसकंवादद्यादितिस्मृत्यंतरदर्शनात् यद्यपिपंडकोलिंगहीनःस्यात्संस्कारार्हश्चनैवसइतिदेवलवचनेनसामान्येनैवस्त्रीपुंलिंगरहितोनिर्दिष्टस्तथापिनगोब्राह्मणस्येहविवक्षा गोब्राह्मणनिषेधस्यजात्यवच्छेदेनप्रवृत्तेः लिंगविरहिणिचपिंडेजातिसमवायविशेषात्तन्निमित्तमेवलघुप्रायश्चित्तमुक्तं



तस्मान्मृगपक्षिणएवविवक्षिताः मृगपक्षिसमभिव्याहाराच्च कोलेसूकरेव्यापादितेघृतकुंभोदेयः उष्ट्रेगुंजादेया वाजिनिविनिपातितेंशुकंदेयम् तथाचमनुः अभ्रिंकार्ष्णायसींदद्यात्सर्पंहत्वाद्विजोत्तमः पलालभारकंषंढेसीसकंचैवमाषकमिति २७३ किंचाह तित्तिरौपतत्रिणिव्यापादितेतिलद्रोणंदद्यात् द्रोणश्चपरिमाणविशेषवचनः अष्टमुष्टिर्भवेत्किंचित्किंचिदष्टौतुपुष्कलम् पुष्कलानितुचत्वारिआढकःपरिकीर्त्तितः चतुराढकोभवेद्द्रोणइत्येतन्मानलक्षणमितिस्मरणात् पूर्वोक्तानांगजादीनांव्यापादनेनिर्धनत्वेननीलवृषपंचकादिदानंकर्तुं-

तित्तिरौतुतिलद्रोणंगजादीनामशक्नुवन् दानंदातुंचरेत्कृच्छ्रमेकैकस्यविशुद्धये २७४

मशक्नुवन्प्रत्येकंकृच्छ्रंचरेद्वि-
शुद्ध्यर्थं कृच्छ्रशब्दश्चात्रलक्षणयाक्लेशसाध्येतपोमात्रेद्रष्टव्यः तपांसिगौतमेनदर्शितानि संवत्सरःषण्मासाश्चत्वारस्त्रयोद्वावेकश्चतुर्विंशत्यहोद्वादशाहःषडहस्त्र्यहोहोरात्रइतिकलना एतान्येवातिदेशेविकल्पेनक्रियेरन्नेनःसुगुरुणिगुरूणिलघुनिलघूनीति यदिकृच्छ्रशब्देनमुख्योर्थोगृह्यतेतर्हिगजेशुकेवाविशेषेणप्राजापत्यएवस्यात् नचतद्युक्तं तपोमात्रपरत्वेतुदानगुरुलघुभावकलनयातपसोपिगुरुलघुभावोयुज्यते ततश्चगजेद्विमासिकंयावकाशनंशुकेनूपवासइति एवमन्यत्रापिदानानुसारेणप्रायश्चित्तंकल्प्यम् २७४

किंचाह औदुंबरादौफलेमधुकादौचकुसुमेचिरस्थितभक्तसक्त्वादौतेचरसेचगुडादौयानिसत्वानिप्राणिनोजायंतेतेषांघाते घृतप्राशनं शुद्धिसाधनं इदंचघृतप्राशनंभोजनकार्यएवविधीयते प्रायश्चित्तानांतपोरूपत्वात् प्रायश्चित्तानांतपोरूपत्वमांगिरसेनोक्तम् प्रायोनामतपःप्रोक्तंचित्तंनिश्चयउच्यते तपोनिश्चयसंयुक्तंप्रायश्चित्तंतदुच्यतेइति प्रतिप्राणिप्रायश्चित्तस्यानंत्यात्पृष्ठाकोटेनापिवक्तुमशक्यत्वात्सामान्येनप्रायश्चित्तमाह अस्थिमतांकृकलासादिप्राणिनांन्यूनसहस्रसंख्यानांप्रत्येकवधेकिंचित्स्वल्पंधान्याहिरण्यादिदेयम् अनस्थिकेत्वेकःप्राणायामः तत्रकिंचिदितियदाहिरण्यंदीयतेतदापणमात्रम् अस्थिमतांवधेपणोदेयइतिसुमंतुस्म

फलपुष्पान्नरसजसत्वघातेघृताशनम् किंचित्सास्थिमतांदेयंप्राणायामस्त्वनस्थिके २७५

रणात् यदातुधान्यंदेयंतदाष्टमुष्टिदेयं अष्टमुष्टिभवेत्किंचिदितिस्मरणात् एतच्चानुक्तनिष्कृतिप्राणिवधविषयम् यत्रतुप्रायश्चित्तविशेषःश्रूयतेतत्रसएवभवति यथाहपराशरःहंससारसचक्राह्वक्रौंचकुक्कुटघातकः मयूरमेषौहत्वाचएकभक्तेनशुद्ध्यति मुद्गुंचटिट्टिभंचैवशुकंपारावतंतथा आडिकांचबकंहत्वाशुद्ध्येद्वैनक्तभोजनात् चाषकाककपोतानांसारिति्तिरघातकः अंतर्जलेउभेसंध्येप्राणायामेनशुद्ध्यति गृध्रश्येनविहंगानामुलूकस्यचघातकः अपक्वाशीदिनंतिष्ठेत्त्रिकालंमारुताशनः हत्वामुरवक 

मार्जारसर्पाजगरडुंडुभान् प्रत्येकंभोजयेद्विप्रान्लोहदंडश्चदक्षिणा मेधाकच्छपगोधानांशशशल्यकघातकः वृंताकफलगुंजाशीअहोरात्रेणशुद्ध्यति मृगरोहिवराहाणामविकाबस्तघातने वृकजंबूकऋक्षाणांतरक्षूणांचघातकः तिलप्रस्थंत्वसौदद्याद्वायुभक्षोदिनत्रयम् गजमेषतुरंगोष्ट्रगवयानांनिपातने प्रायश्चित्तमहोरात्रंत्रिसंध्यंचावगाहनम् खरवानरसिंहानांचित्रकव्याघ्रघातकः शुद्धिमेतित्रिरात्रेणब्राह्मणानांचभोजनैरिति एवमन्येषामपिस्मृतिवचसांदेशकालाद्यपेक्षयाविषयव्यवस्थाकल्पनीया इतिहिंसाप्रायश्चित्तप्रकरणम् २७५ इंधनार्थंद्रुमच्छेदइत्युपपातकोद्देशेपठितंहिंसाप्रसंगलाभेनतद्युक्तमपठितमपिअपकृष्यतत्रप्रायश्चित्तमा

वृक्षगुल्मलतावीरुच्छेदनेजप्यमृक्शतम् स्यादोषधिवृथाच्छेदेक्षीराशीगोनुगोदिनं २७६

ह फलदानामाम्रपनसादीनांचवृक्षाणांगुल्मादीनांचयज्ञादिप्रयोजनार्थंविनाछेदनेऋचांगायत्र्यादीनांशतंजप्तव्यम् ओषधीनांतुग्राम्यारण्यानांवृथैवच्छेदनेदिनंकृत्स्नमहर्गवांपरिचर्यार्थमनुगम्यानेक्षीरंपिबेत् आहारांतरपरित्यागेन पंचयज्ञार्थत्वेतुनदोषः एतच्चफलादिद्वारेणोपयोगिषुद्रष्टव्यम् फलदानांतुवृक्षाणांच्छेदनेजप्यमृक्शतम् गुल्मवल्लीलतानांतुपुष्पितानांचवीरुधामितिस्मरणात् दृष्टार्थत्वेपिकर्षणांगभूतहलाद्यर्थत्वेननदोषः तद्दोषस्यखलयज्ञेनपरिहार्यत्वात् फलपुष्पोपभोग्यान्पादपान्नहिंस्यात्कर्षणा

करणार्थंचोपहन्यादितिवसिष्ठस्मरणात् यत्रतुस्थानविशेषाद्दंडाधिक्यंतत्रप्रायश्चित्ताधिक्यमपिकल्पनीयम् तदुक्तम् चैत्य-
श्मशानसीमासुपुण्यस्थानेसुरालये जातद्रुमाणांद्विगुणोदमोवृक्षेतुविश्रुतेइति अयंचचरुकृशतजपोद्विजातिविषयोनपुनःशू-
द्रादिविषयः तेषांजपेऽनधिकारात् अतस्तेषांदंडानुसारेणद्विरात्रादिककल्पनीयम् उपपातकमध्येविशेषतःपाठस्यानर्थक्यप-
रिहारार्थमुपपातकसाधारणप्रायश्चित्तमप्यत्रभवति एतच्चगुरुत्वादभ्यासविषयंकल्प्यम् इतिद्रुमच्छेदः २७६ पुंश्चलीवा-

पुंश्चलीवानरखरैर्दष्टश्वोष्ट्रादिवायसैः प्राणायामंजलेकृत्वा घृतंप्राश्यविशुध्यति २७७

नरादिवधप्रायश्चित्तप्रसंगात्तद्दंशनिमित्तंप्रायश्चित्तमाह पुंश्चल्यादयःप्रसिद्धाः एतैर्दष्टःपुमान्जलेप्राणायामंकृत्वाघृतंप्राश्यवि-
शुध्यति आदिग्रहणाच्छृगालादीनांग्रहणम् यथाहमनुः श्वसृगालखरैर्दष्टोग्राम्यैःक्रव्याद्भिरेवच नराश्वोष्ट्रवराहैश्चप्राणायामेनशुध्य-
तीति अयंचघृतप्राशोभोजनप्रत्याम्नायोद्रष्टव्यः प्रायश्चित्तानांतपोरूपत्वेनशरीरसंतापनार्थत्वात् एतदशक्तविषयम् श्वसृगालमृगम- ११२
हिषाजाविकखरसूकरप्लवनकुलमार्जारमूषिकाप्लवककाकपुरुषदष्टानामापोहिष्ठायादिस्नानंप्राणायामत्रयंचेतिसुमंतुवचनम् तन्नाभेरधः-

प्रदेशईषद्दष्टविषयम् यत्त्वंगिरोवचनम् ब्रह्मचारीशुनादष्टस्त्र्यहंसायंपिबेत्पयः गृहस्थश्चेद्द्विरात्रंतुएकाहंयोग्निहोत्रवान् नाभेरूर्ध्वं
तुदष्टस्यतदेवद्विगुणंभवेत् स्यादेतद्द्विगुणंवक्त्रेमस्तकेचचतुर्गुणमिति तत्सम्यग्दष्टविषयम् क्षत्रियवैश्ययोस्तुपादपादन्यूनंकल्प-
नीयम् शूद्रस्यतु शूद्राणांचोपवासेनशुद्धिर्दानेनवापुनः गावादद्याद्वृषंचैकंब्राह्मणायविशुद्धयेइतिबृहदंगिरसोक्तंद्रष्टव्यम् य-
त्तुवसिष्ठवचनम् ब्राह्मणस्तुशुनादष्टोनदींगत्वासमुद्रगाम् प्राणायामशतंकृत्वाघृतंप्राश्यविशुध्यतीति तदुत्तमांगदंशविषयम्
ब्राह्मणीतुशुनादष्टाजंबूकेनवृकेणवा उदितंग्रहनक्षत्रंदृष्ट्वासद्यःशुचिर्भवेदितिपराशरोक्तंद्रष्टव्यम् कृच्छ्रादिव्रतस्थायाःपुनस्ते-
नैवविशेषोदर्शितः त्रिरात्रमेवोपवसेच्छुनादष्टातुसव्रता सघृतंयावकंभुक्त्वाव्रतशेषंसमापयेदिति रजस्वलायामपिविशेषःपुल-
स्त्येनदर्शितः रजस्वलायदादष्टाशुनाजंबूकरासभैः पंचरात्रंनिराहारापंचगव्येनशुध्यति ऊर्ध्वंतुद्विगुणंनाभेर्वक्त्रेतुत्रिगुणंतथा
चतुर्गुणंस्मृतंमूर्ध्निदष्टेन्यत्राप्लुतिर्भवेदिति अन्यत्ररजस्वलावस्थायाः यस्तुश्वादिभिर्घ्राणादिनोपहन्यतेतस्यशातातपेनविशेषउ-
क्तः शुनाघ्रातावलीढस्यनखैर्विलिखितस्यच अद्भिःप्रक्षालनंशौचमग्निनाचोपचूलनमिति उपचूलनंतापनमिति यदाश्वादिदं-
शशस्त्रघातादिजनितव्रणेकृमयउत्पद्यंतेतदामनुनाविशेषउक्तः ब्राह्मणस्यव्रणद्वारेपूयशोणितसंभवे कृमिरुत्पद्यतेयस्यप्रायश्चि-
त्तंकथंभवेत् गवांमूत्रपुरीषेणत्रिसंध्यंस्नानमाचरेत् त्रिरात्रंपंचगव्याशीत्वधोनाभ्याविशुध्यति नाभिकंठांतरोद्भूतेव्रणेचोत्पद्यते
कृमिः षड्रात्रंतुत्र्यहंपंचगव्याशनमितिस्मृतम् तत्रश्वादिदंशव्रणेतद्दंशप्रायश्चित्तानंतरमिदंकर्तव्यम् शस्त्रादिजनितव्रणेएतदेव

त्र्यहं पंचगव्याशनादिकमिति विशेषः क्षत्रियादिषु तु प्रतिवर्णं पादपादह्रासः कल्पनीयः २७७ शरीरस्य धातुच्छेदकं दंशप्रायश्चित्तप्रसंगा प्रा॰
च्छरीरस्य चरमधातुविच्छेदकस्कंदने प्रायश्चित्तमाह यदि कथंचित्स्त्रीसंभोगगमनमंतरेणापि हठाच्चरमधातुर्विसृष्टस्तदा तत्स्कन्नं रेतस्त- ३
न्मेद्यरेतः पृथिवीं॰ अस्कान्पुनर्मामैत्विंद्रियमित्याभ्यां मंत्राभ्यामभिमंत्रयेत् तेन चाभिमंत्रितेन रेतसा स्तनयोर्भ्रुवोश्च मध्यमुपकनिष्ठिकया स्पृ-
शेत् अन्ये तु स्कन्नरेतसोऽशुचित्वेन स्पर्शकर्मण्ययोग्यत्वात्तेन त्वनामिकासाहचर्याद्बुद्धिस्थांगुष्ठपरत्वेन व्याचक्षते तेनांगुष्ठेनानामिकया
चेति अंगुष्ठपदग्रहणे वृत्तभंगप्रसंगात्तेनेति निर्दिष्टमिति तदसत् अंगुष्ठस्याबुद्धिस्थत्वात् नच शब्दसंनिहितपरित्यागेनार्थबुद्धिस्थ

यन्मेद्यरेत इत्याभ्यां स्कन्नं रेतोऽभिमंत्रयेत् स्तनांतरं भ्रुवोर्मध्यं तेनानामिकया स्पृशेत् २७८

स्यान्वयो युक्तः तदुक्तं गम्यमानस्य चार्थस्य नैव दृष्टं विशेषणम् शब्दांतरैर्विभक्त्या वा धूमोयं ज्वलतीति वदिति नच रेतसोऽशुचित्वेन स्प
र्शायोग्यत्वम् विधानादेव प्रायश्चित्तार्थरूपस्पर्शयोग्यत्वमवगम्यताम् प्रायश्चित्तरूपपान इव सुरायाः इदं प्रायश्चित्तं गृहस्थस्यैवाका
मतः स्कन्नविषयम् ब्रह्मचारिणः स्वप्ने जागरणावस्थायां च गुरुप्रायश्चित्तस्य दर्शनात् यत्तु मनुवचनम् गृहस्थः कामतः कुर्याद्रेतसः ११३
स्कंदनं भुवि सहस्रं तु जपेद्देव्याः प्राणायामैस्त्रिभिः सहेति तत्कामकारविषयम् २७८

किंच स्वीयं प्रतिबिंबमंबुगतं चेत् दृष्टं तदा मयि तेज इंद्रियमिति मंत्रं जपेत् अशुचिद्रव्यदर्शने पुनः सावित्रीं सवितृदेवतां तत्सवितुरि-
त्यादिकामृचं जपेत् तथा वाक्पाणिपादादिचापल्यकरणे तामेव जपेत् अनृतवचने च एतत्कामकारे द्रष्टव्यम् अकामकृते तु सुप्त्वा
भुक्त्वा च क्षुत्वा च निष्ठीव्याप्यनृतानि च पीत्वापोऽध्येष्यमाणस्य आचमेत्प्रयतोऽपि सन्निति मनूक्तमाचमनं द्रष्टव्यम् यत्तु संवर्त्तवचनम्
क्षुते निष्ठीवने चैव दंतश्लिष्टे तथानृते पतितानां च संवादे दक्षिणं श्रवणं स्पृशेत् तदल्पप्रयोजने जलाभावे वा द्रष्टव्यम् स्त्रीशूद्रविट्

मयि तेज इति च्छायां स्वां दृष्ट्वांबुगतां जपेत् सावित्रीमशुचौ दृष्टे चापल्ये चानृतेऽपि च २७९

क्षत्रवधानंतरं निंदितार्थोपजीवनं पठितम् तत्र च मनुयोगीश्वरप्रोक्तान्युपपातकप्रायश्चित्तानि जातिशक्तिगुणाद्यपेक्षया वेदितव्यानि
नास्तिक्येऽपि तानि प्रायश्चित्तानि तथैव प्रयोज्यानि नास्तिकशब्देन च वेदनिंदा तेन जीवनमुच्यते अत्रोभयत्रापि वसिष्ठेन प्रायश्चित्ता
तरमप्युक्तम् नास्तिकः कृच्छ्रं द्वादशरात्रं चरित्वा विरमेन्नास्तिक्यान्नास्तिकवृत्तिस्त्वतिकृच्छ्रमिति एतच्च सकृत्करणविषयं उपपा-
तकप्रायश्चित्तान्यभ्यासविषयाणि यच्च शंखेनोक्तं नास्तिको नास्तिकवृत्तिः कृतघ्नः कूटव्यवहारी मिथ्याभिशंसी इत्येते पंचसंवत्स

रंब्राह्मणगृहेभैक्ष्यंचरेयुरिति यच्चहारीतेननास्तिकोनास्तिकवृत्तिरिति प्रक्रम्य पंचतापोभ्रावकाशजलशयनान्यनुतिष्ठेयुरितिग्री
ष्मवर्षाहेमंतेष्विति तदुभयमप्यत्यंताभिनिवेशेन बहुकालाभ्यासविषयम् २७९ नास्तिक्यानंतरंव्रतलोपश्चेत्युक्तं नचावकीर्णित्व
स्याप्रसिद्धत्वात्तल्लक्षणकथनपूर्वकंप्रायश्चित्तमाह ब्रह्मचार्युपकुर्वाणकः नैष्ठिकश्चासौयोषितंगत्वावकीर्णीभवति चरमधा
तोर्विसर्गोविकीर्णंतद्यस्यास्तीतिसोवकीर्णीसनिर्ऋतिदैवत्येनगर्दभपशुनायागंकृत्वाविशुध्यति गर्दभस्यपशुत्वेसिद्धेपिपुनःपशुग्र-

अवकीर्णीभवेद्गत्वाब्रह्मचारीतुयोषितम् गर्दभंपशुमालभ्यनैर्ऋतंसविशुध्यति २८०

हणमथपशुकल्पइत्याश्वलायनादिगृह्योक्तपशुधर्मप्राप्त्यर्थं एतच्चारण्येचतुष्पथेलौकिकाग्नौकार्यम् ब्रह्मचारीचेत्स्त्रियमुपेयादर
ण्येचतुष्पथेलौकिकेग्नौरक्षोदैवतंगर्दभपशुमालभेतेतिवसिष्ठस्मरणात् तथारात्रावेकाक्षिविकलेनयष्टव्यम् तथाचमनुः अव-
कीर्णीतुकालेनरासभेनचतुष्पथे पाकयज्ञविधानेनयजेतनिर्ऋतिंनिशीति पशोरभावेचरुणायष्टव्यम् निर्ऋतिंवाचरुंनिर्वपेत् ११४
तस्यजुहुयात् कामायस्वाहा कामकामायस्वाहा निर्ऋत्यैस्वाहा रक्षोदेवताभ्यःस्वाहेतिवसिष्ठस्मरणात् एतच्चाशक्तविषयम्

शक्तस्यपुनर्गर्दभेनावकीर्णीनिर्ऋतिंचतुष्पथेयजेत् तस्याजिनमूर्ध्ववालंपरिधायलोहितपात्रेसप्तगृहान्भैक्ष्यंचरेत्कर्माचक्षाणःसंव-
त्सरेणशुध्यतीति गौतमोक्तोवार्षिकतपःसमुचितःपशुयागश्चरुर्वाद्रष्टव्यः तथात्रिषवणस्नानमेककालभोजनंचद्रष्टव्यम् एतस्मिन्ने
नसिप्राप्तेवसित्वागर्दभाजिनम् सप्तागारान्चरन्भैक्ष्यंस्वकर्मपरिकीर्त्तयन् तेभ्योलब्धेनभैक्ष्येणवर्त्तयन्नेककालिकम् उपस्पृशंस्त्रिष
वणमब्देनसविशुध्यतीतिमनुस्मरणात् इदंचवार्षिकमश्रोत्रियब्राह्मणपत्न्यांवैश्यायांचश्रोत्रियपत्न्यांद्रष्टव्यम् यदातुगुणवत्यो-
र्ब्राह्मणीक्षत्रिययोःश्रोत्रियभार्ययोरेवकरोतितदात्रिवार्षिकंद्विवार्षिकंचक्रमेणद्रष्टव्यम् यथाहतुःशंखलिखितौ गुप्तायांवैश्याया
मवकीर्णःसंवत्सरंत्रिषवणमनुतिष्ठेत् क्षत्रियायांद्वेवर्षे ब्राह्मण्यांत्रीणिवर्षाणीति यत्त्वंगिरोवचनम् अवकीर्णनिमित्तंतुब्रह्म
हत्याव्रतंचरेत् चीरवासास्तुषण्मासांस्तथामुच्येतकिल्बिषादिति तदकामतोमानवादिविषयमीषद्व्याभिचारिणीविषयंवा अत्यं
तव्यभिचारासुपुनःस्वैरिण्यांवृषल्यामवकीर्णःसचैलस्नानमुदकुंभंदद्याद्ब्राह्मणाय वैश्यायांचतुर्थकालआहारोब्राह्मणान्भोजये
त् यवसभारंचगोभ्योदद्यात् क्षत्रियायांत्रिरात्रमुपोषितोघृतपात्रंदद्यात् ब्राह्मण्यांषड्रात्रमुपोषितोगांचदद्यात् गोष्ववकीर्णःप्रा
जापत्यंचरेत् षंढायामवकीर्णःपलालभारंसीसमाषकंचदद्यादितिशंखलिखितोदितंवेदितव्यम् एतच्चावकीर्णिप्रायश्चित्तंनैष्ठिक
स्यापिब्रह्मचारिणःसमानम् अवकीर्णीद्विजोराजावैश्यश्चापिखरेणतु इष्ट्वाभैक्ष्याशिनोनित्यंशुध्यंत्यब्दात्समाहिताइतिशांडिल्य
स्मरणात् यदास्त्रीसंभोगमंतरेणकामतश्चरमधातुंविसृजतिदिवाचस्वप्नेवाविसृजतिनदानैर्ऋतयागमात्रंद्रष्टव्यम् एतदेवरेतस

प्रयत्नोत्सर्गेदिवास्वप्नेचेतिवसिष्ठेनयागमात्रस्यातिदिष्टत्वात् व्रतांतरेषुचकृच्छ्रचांद्रायणादिष्वितिअतिदिष्टब्रह्मचर्येषुचस्कंदनेसत्येत-
देवयागमात्रं व्रतांतरेषुचेवमितितेनेवातिदिष्टत्वात् स्वप्नस्कंदनेतुमनूक्तंद्रष्टव्यम् स्वप्नेसिक्त्वाब्रह्मचारीद्विजःशुक्रमकामतः स्नात्वा-
र्कमर्चयित्वात्रिःपुनर्मामित्यृचंजपेदिति वानप्रस्थादीनांचेदमेवब्रह्मचर्यखंडनेअवकीर्णिव्रतंकृच्छ्रत्रयाधिकंभवति वानप्रस्थोयतिश्चै-
वस्कंदनेसतिकामतः पराकत्रयसंयुक्तमवकीर्णिव्रतंचरेदितिशांडिल्यस्मरणात् यदागार्हस्थ्यपरिग्रहेणसंन्यासात्प्रच्युतोभवतितदा
संवर्त्तोक्तंद्रष्टव्यम् संन्यस्यदुर्मतिःकश्चित्प्रत्यापत्तिंचरेद्यदि सकुर्यात्कृच्छ्रमश्रांतःषण्मासात्प्रत्यनंतरमिति प्रत्यापत्तिर्गार्हस्थ्यपरि-
ग्रहः अतएववसिष्ठः यस्तुप्रव्रजितोभूत्वापुनःसेवेतमैथुनम् षष्टिवर्षसहस्राणिविष्ठायांजायतेकृमिरिति तथाचपराशरः यःप्रत्य-
वसितोविप्रोप्रव्रज्यातोविनिर्गतः अनाशकोनिवृत्तश्चगार्हस्थ्यंचेच्चिकीर्षति सचरेत्त्रीणिकृच्छ्राणित्रीणिचांद्रायणानिच जातकर्मादि-
भिःसर्वैःसंस्कृतःशुद्धिमाप्नुयात् तत्रब्राह्मणस्यषाण्मासिकःकृच्छ्रःपुनःसंन्यासः क्षत्रियस्यचांद्रायणत्रयम् वैश्यस्यकृच्छ्रत्रयमिति
व्यवस्था अथवाब्राह्मणस्यैवशक्तिसकृदभ्यासाद्यपेक्षयाव्यवस्थितंप्रायश्चित्तत्रयंद्रष्टव्यम् तथामरणसंन्यासिनामपियमेनापिप्रा-
यश्चित्तमुक्तम् जलाग्न्युद्बंधनभ्रष्टाःप्रव्रज्यानाशकच्युताः विषप्रपतनप्रायःशस्त्रघातच्युताश्चये नैवैतेप्रत्यवसिताःसर्वलोकब-
हिष्कृताः चांद्रायणेनशुद्ध्यंतितप्तकृच्छ्रद्वयेनचेति इदंचचांद्रायणतप्तकृच्छ्रद्वयात्मकंप्रायश्चित्तद्वयंशक्त्याद्यपेक्षयाव्यवस्थितंवि- ११५
ज्ञेयं यदातुशस्त्रघातहताश्चेतिपाठः तदात्मत्यागाद्यशास्त्रीयमरणनिमित्तस्वसुतादेरुपदेशोद्रष्टव्यः यस्तुनवसिष्ठेनोक्तं जीवन्ना-

त्मत्यागीकृच्छ्रंद्वादशरात्रंचरेत्त्रिरात्रंचोपवसेदिति तदप्यध्यवसिताशास्त्रीयमरणस्यैवकथंचिज्जीवनशक्त्यपेक्षयाद्रष्टव्यं अथ-
वाध्यवसायमात्रेत्रिरात्रं शस्त्रादिक्षतस्यद्वादशरात्रमितिव्यवस्था इदंचावकीर्णिप्रायश्चित्तंगुरुदारतत्समव्यतिरिक्तागम्यागमनवि-
षयम् तत्रगुरुतरप्रायश्चित्तस्यदर्शितत्वात् नचलघुनावकीर्णिव्रतेनद्वादशवार्षिकाद्युपनोद्यमहापातकदोषनिर्हरणमुचितम् न-
चब्रह्मचारित्वोपाधिकंलघुप्रायश्चित्तविधानमुक्तम् आश्रमांतराणांद्वैगुण्यादिवृद्धेर्ब्रह्महत्याप्रकरणेदर्शितत्वात् नचागम्याग-
मनप्रायश्चित्तपृथक्कर्तव्यम् ब्रह्मचारिणोयोषितिब्रह्मचर्यस्खलनस्यागम्यागमनेनांतरीयकत्वात् अतोन्यत्रापियस्मिन्नि-
मित्तेयन्निमित्तांतरंसमन्यूनंवावश्यंभावितन्नपृथक् नैमित्तिकंप्रयुक्तं यथा अवगूर्यचरेत्कृच्छ्रमतिकृच्छ्रंनिपातने कृच्छ्रातिकृ-
च्छ्रोसृक्पातेकृच्छ्रोभ्यंतरशोणितेइत्यत्रशोणितोत्पादननिमित्तेवगूरणनिमित्तपातलक्षणनिमित्तद्वयमवश्यंभावित्वनेमित्ति-
कंकृच्छ्रमतिकृच्छ्रंचनप्रयुक्तम् अतएवमन्यत्राप्यूहनीयम् यत्रपुनर्निमित्तानामंतर्भावनियमोनास्तितत्रपुनर्नैमित्तिकानिपृथक्
प्रयुज्यंतेनिमित्तानि यदापर्वणिपरभार्यांरजस्वलांतैलाभ्यक्तोदिवाजलेगच्छतीति ननुब्रह्मचारिणोयोषितिब्रह्मचर्यस्खलन-
स्यागम्यागमनांतरीयकत्वंनास्त्येव पुत्रिकागमनेऽगम्यागमनदोषाभावात् तथाहि नतावत्पुत्रिकाकन्याक्षतयोनित्वात् नापि
परभार्याप्रदानाभावात् नापिवेश्या अतद्वृत्तित्वात् नापिविधवा भर्तृमरणाभावात् अतःपुत्रिकायाःक्वाप्यनंतर्भावादप्रतिषि-
द्धत्वेनितत्रैवविप्लुतस्यकेवलमवकीर्णिव्रतम् अन्यविप्लुतस्यतुनिमित्तांतरसंनिपातादवकीर्णिव्रतेनेमित्तिकांतरमपिप्रयोक्तव्य-

मिति तदसत् पुत्रिकायाअपिपरभार्यात्वेऽसंभवात् प्रदानाभावेपिविवाहसंस्कारेण संस्कृतत्वात् गांधर्वादिपरिणीतावत् न- 
चयस्यास्तुनभवेद्भ्राताविज्ञायेतवापिता नोपयच्छेततांप्राज्ञः पुत्रिकाधर्मशंकयेति प्रतिषेधात्सगोत्रास्विवभार्यात्वेनोपप 
द्यतइतिवाच्यम् दृष्टार्थत्वात्प्रतिषेधस्यव्यंग्यांग्यादिप्रतिषेधवत् दृष्टार्थत्वंचपुत्रिकाधर्मशंकयेतिहेतूपादानात् नचपुत्रार्थमेवपरिणय
नम् अपितुधर्मार्थमपि अतश्चोत्पादितपुत्रस्यमृतभार्यस्यधर्मार्थपुत्रिकापरिणयनेकोविरोधः प्रपंचितंचैतत्पुरस्तादित्यलमतिप्रसंगेन

भैक्ष्याग्निकार्येत्यक्त्वातुसप्तरात्रमनातुरः कामावकीर्णइत्याभ्यांजुहुयादाहुतिद्वयम् २८१

नस्माद्ब्रह्मचारिणोयोषितिब्रह्मचर्यस्खलनस्यागम्यागमनानंतरीकत्वान्नपृथङ्नैमित्तिकंप्रयोक्तव्यमितिसुष्ठूक्तम् २८० ब्रह्मचा
रिप्रायश्चित्तप्रसंगादन्यदप्यनुपपातकप्रायश्चित्तमाह यस्त्वनातुरएवब्रह्मचारीनिरंतरंसप्तरात्रंभैक्ष्यमग्निकार्यंवात्यजति असौ
कामावकीर्णोस्म्यवकीर्णोस्मिकामकामायस्वाहा कामावपन्नोस्म्यवपन्नोस्मिकामकामायस्वाहा इत्येताभ्यांमंत्राभ्यामाहुतीर्हुत्वा स 
मासिंचतुमरुतःसमिंद्रःसंबृहस्पतिः समायमग्निःसिंचतांयशसाब्रह्मवर्चसेनेत्यनेनमंत्रेणाग्निमुपतिष्ठेत् एवंचगुरुपरिचर्यादि

गुरुतरकार्यव्यग्रतयांअकरणेद्रष्टव्यम् यदात्वव्यग्रएवभैक्ष्याग्निकार्येत्यजतितदाअकृत्वाभैक्ष्यचरणमसमिध्यचपावकं अनातुरः
सप्तरात्रमवकीर्णिव्रतंचरेदितिमानवंद्रष्टव्यम् यज्ञोपवीतादिनाशेतुहारीतेनप्रायश्चित्तमुक्तम् मनोव्रतपतीभिश्चतस्रआज्याहुती-
र्हुत्वापुनर्यथार्थंप्रतीयादसकृत् असद्भैक्ष्यभोजनेभ्युदितेभिनिर्मुक्तेवातेदिवास्वप्नेनग्नस्त्रीदर्शनेनग्नस्वापेश्मशानमाक्रम्यहयादी-
नारुह्यपूज्यातिक्रमेचैताभिरेवजुहुयादग्निसमिंधनेस्थावरसरीसृपादीनांवधेयद्देवादेवहेडनमितिकूष्मांडीभिस्त्रिरात्रमाज्यंजुहुया

उपस्थानंततःकुर्यात्समासिंचत्वनेनतु मधुमांसाशनेकार्यःकृच्छ्रःशेषव्रतानिच २८२
प्रतिकूलंगुरोःकृत्वाप्रसाद्यैवविशुद्ध्यति कृच्छ्रत्रयंगुरुःकार्यान्म्रियतेप्रहितोयदि २८३

त् मणिवासोगवादीनांप्रतिग्रहेसावित्र्यष्टसहस्रंजपेदिति मनोव्रतपतीभिरितिमनोज्योतिरित्यादि मनोलिंगाभिस्त्वमग्नेव्रतपाअसी-
त्यादिव्रतलिंगाभिरित्यर्थः यथार्थंप्रतीयादितिउपनयनोक्तमार्गेणसमंत्रकंगृह्णीयादित्यर्थः यज्ञोपवीतंविनाभोजनादिकरणेतु ब्रह्म
सूत्रंविनाभुंक्तेविण्मूत्रंकुरुतेथवा गायत्र्यष्टसहस्रेणप्राणायामेनशुद्ध्यतीतिमरीच्युक्तंद्रष्टव्यम् किंच ब्रह्मचारिणाअमत्यामधुमांस
भक्षणेःकृच्छ्रःकार्यः तदनंतरमवशिष्टानिव्रतानिसमापयेत् एतच्चाशिष्टभोजनार्हशशादिमांसभक्षणविषयम् ब्रह्मचारीचेन्मांसम

श्नीयाच्छिष्टभोजनीयं कृच्छ्रं द्वादशरात्रं चरित्वा व्रतशेषं समापयेदिति वसिष्ठस्मरणात् द्वादशरात्रग्रहणं तु मतिपूर्वाभ्यासापेक्षया इति कृच्छ्रप
राकादेरपि प्राप्त्यर्थं यदा तु मांसैकायनौषध्याद्यभिभूतस्तदा मांसं गुरोरुच्छिष्टं कृत्वा भक्षणीयम् स चेद्व्याधीयीत कामं गुरोरुच्छिष्टं भेष
जार्थं सर्वं प्राश्नीयादिति तेनैवोक्तत्वात् सर्वग्रहणं मांसलशुनाद्यभक्ष्यमात्रसंग्रहणार्थम् तद्भक्षणेन चापगतव्याधिरादित्यमुपतिष्ठेत
तथा च बोधायनः येनेच्छेच्चिकित्सितुं स यदागदो भवति तदोत्थायादित्यमुपतिष्ठेत हंसः शुचिषदिति मधुनोप्यज्ञानतः प्राशनोपपत्तौ
न दोषः अकामोपनतं मधु वाजसनेयके न दुष्यतीति वसिष्ठस्मरणात् अन्यत्र सूतकान्नादिभक्षणप्रायश्चित्तमभक्ष्यप्रायश्चित्तप्रकर
णे वक्ष्यामः आज्ञाप्रतिघातादिना गुरोः प्रतिकूलमाचरन् पादप्रणिपातादिना गुरुं प्रसाद्य विशुध्यति । ब्रह्मचारिप्रायश्चित्तप्रसंगाद्गुरो
रपि प्रायश्चित्तमाह यस्तु गुरुश्चोरोरगव्याघ्रादिभयाकुलप्रदेशे सांद्रतरांधकाराकुलितनिशीथावसरे कार्यार्थं शिष्यं प्रेरयति स च तथा प्रे
रितो दैवान्मृतस्तदा स गुरुः कृच्छ्रादीनां प्राजापत्यादीनां त्रयं कुर्यात् न पुनस्त्रयः प्राजापत्याः तथा सति पृथङ्निवेशिनो संख्यानुपपन्ना–
स्यात् न चैकादश प्रयाजान्यजतीतिवदावृत्त्यपेक्षा संख्येति चतुरस्रम् स्वरूपपृथक्त्वे संभवत्यावृत्त्यपेक्षाया अन्याय्यत्वात् यदीयमु
त्पन्नगता संख्या स्यात्तदा स्यादपि कथंचिदावृत्त्यपेक्षा किंतूत्पत्तिगतेयम् अतस्तिस्र आहुतीर्जुहोतीतिवत्स्वरूपपृथक्त्वापेक्षयैव त्रित्व
संख्याघटना युक्ता २८१ २८२ २८३ सकलहिंसाप्रायश्चित्तापवादमाह आयुर्वेदोपदेशानुसारेणौषधपथ्यान्नप्रदानादिभि ११७
श्चिकित्सकादिना क्रियमाण उपकारो यस्य ब्राह्मणादेस्तस्मिन् कथंचिन्मृतेपि पातकं नैव भवति विप्रग्रहणं प्राणिमात्रोपलक्षणार्थम्

अत एव यंत्रणे गोश्चिकित्सार्थे मूढगर्भविमोचने यत्ने कृते विपत्तिः स्यान्न स पापेन लिप्यत इत्यादि संवर्ताद्यैरुक्तम् एतच्च प्रपंचितं प्राक्
मिथ्याभिसर्गप्रायश्चित्तप्रसंगाद्विवक्षया यावदुपयोगार्थवादं तावदाह यस्तु परोत्कर्षेर्ष्याजनितरोषकलुषितांतःकरणो जनसमक्ष
मिथ्याभिशापं ब्रह्महत्यादिकमनेन कृतमिति आरोपयति तस्य तदेव द्विगुणं भवति यस्तु विद्यमानमेव दोषमलोकविदितं जनसमक्षं प्रका

क्रियमाणोपकारे तु मृते विप्रे न पातकम् मिथ्याभिशंसिनो द्वेषो द्विःस
मा भूतवादिनः २८४ मिथ्याभिशस्तदोषं च समादत्ते मृषा वदन्

शयति तस्य न त्वात् किं समदोषभाक्त्वम् तथापस्तंबः दोषं बुध्वा न पूर्वः परेभ्यः पतितस्य समाख्याता स्यात् परिहरेच्चैनं धर्मेष्विति न के
वलं मिथ्याभिशंसी द्विगुणदोषभाक् अपि तु मिथ्याभिशस्तस्य यदन्यद्दुष्कृतजातं तदपि समादत्त इति वक्ष्यमाणप्रायश्चित्ते येऽर्थवादाः
न पुनः पापद्वैगुण्यादिप्रतिपादनमात्रं विवक्षितं निमित्तस्य लघुप्रायश्चित्तस्योपलक्ष्यमाणत्वात् कृतनाशाकृताभ्यागमप्रसंगाच्च ७

तत्र प्रायश्चित्तमाह यस्तु महापापेन ब्रह्महत्यादिना गोवधाद्युपपापेन वा मृषैव परमभिशंसति स मासं यावज्जलाशनो जपशीलो जितेंद्रियश्च भवेत् जपश्च सुरुद्रीवतीभिः कार्यः ब्राह्मणमनृतेनाभिशंस्य पतनीयेनोपपातकेन वा मासमबुभक्षः शुद्धवतीभिरावर्त्तयेदश्वमेधावभृथं वा गच्छेदिति वसिष्ठस्मरणात् महापापोपग्रहणमन्येषामप्यतिपातकादीनामुपलक्षणम् एतच्च ब्राह्मणस्यैव ब्राह्मणेनाभिशंसने कृते द्रष्टव्यम् यदा तु ब्राह्मणः क्षत्रियादेरभिशंसनं करोति क्षत्रियादिर्वा ब्राह्मणस्य तदा प्रतिलोमापवादेषु द्विगुणस्त्रिगुणो दमः

महापापोपपापाभ्यां योभिशंसेन्मृषा परम् अब्भक्षो मासमासीत सजापी नियतेंद्रियः २८५

वर्णानामानुलोम्येन तस्मादर्धार्धहानित इति दंडानुसारेण वृद्धिह्रासौ कल्पनीयौ भूताभिशंसिनस्तु पूर्वोक्तार्थवादानुसारेण च तदर्धं कल्पनीयं तथातिपातकशंसिन एवैतदेव व्रतं पादोनम् पातकाभिशंसिनस्त्वर्धम् उपपातकाभिशंसिनस्तु पादः तुरीयो ब्रह्महत्यायाः क्षत्रियस्य वधे स्मृत इत्युपपातकभूतक्षत्रियादिवधे महापातकप्रायश्चित्ततुरीयांशस्य दर्शनात् एवं प्रकीर्णाभिशंसिनोपि ततोन्यूनं कल्पनीयम् शक्तिं चावेक्ष्य पापं च प्रायश्चित्तं प्रकल्पयेदिति स्मरणात् यत्तु शंखलिखिताभ्यां नास्तिकः कृतघ्नः कूटव्यवहारी ब्राह्मणवृत्तिघ्नो ११८

मिथ्याभिशंसी चेत्येते षड्वर्षाणि ब्राह्मणगृहेषु भैक्ष्यं चरेयुः संवत्सरं धौतभैक्ष्यमश्नीयुः षण्मासान्वा गा अनुगच्छेयुरिति गुरुप्रायश्चित्तमुक्तं तदभ्यासतारतम्यापेक्ष[...]योजनीयम् २८४ २८५ अभिशंसिप्रायश्चित्तप्रसंगादभिशस्तप्रायश्चित्तमाह यः पुनर्मिथ्याभिशस्तः स कृच्छ्रं प्राजापत्यं चरेत् अग्निदैवत्येन वा पुरोडाशेन यजेत् वायुदैवत्येन वा पशुना एषां च पक्षाणां शक्तिसंभवाद्यपेक्षया व्यवस्था यत्तु वसिष्ठेन मासमब्भक्षणमुक्तमेतेनैवाभिशस्तो व्याख्यात इति तदभिशस्तस्यैव किंचित्कालमकृतप्रायश्चित्तस्य सतो द्रष्टव्यम् संवत्सराभिशस्तस्य दु

अभिशस्तो मृषा कृच्छ्रं चरेदाग्नेयमेव च निर्वपेत्तु पुरोडाशं वायव्यं पशुमेव वा २८६

ष्टस्य द्विगुणो दम इति दंडातिरेकदर्शनात् यत्तु पैठीनसिनोक्तं अनृतेनाभिशस्यमानः कृच्छ्रं चरेन्मासं पातकेषु महापातकेषु द्विमासमिति तदपि वासिष्ठेन समानविषयं वाशक्तिविषयं वा एवमन्येषामप्युच्चावचप्रायश्चित्तानामभिशस्तविषयाणां कालशक्त्याद्यपेक्षया व्यवस्था विज्ञेया यथाह मनुः षष्ठान्नकालता मासं संहिताजप एव वा होमाश्च शाकला नित्यमपंक्त्यानां विशोधनमिति अपंक्त्यानां मध्ये अभिशस्तादयः पठिताः यद्यप्यत्राभिशस्तस्य निषिद्धाचरणं नोपलभ्यते तथापि मिथ्याभिशस्तत्वलिंगानुमित प्राग्भवीयनिषिद्धाचरणपूर्वनिबंधनमिदं प्रायश्चित्तं कृमिदुष्टानामिवेति न विरोधः २८६

किंच यस्तुनियोगंविनाभ्रातुर्ज्येष्ठस्यकनिष्ठस्यवाभार्यांगच्छतिसचांद्रायणंचरेत् एतच्चसकृदमतिपूर्वविषयंद्रष्टव्यम् यत्तुशंखवच-
नम् परिवित्तिःपरिवेत्ताचसंवत्सरंब्राह्मणगृहेषुभैक्ष्यंचरेयातांज्येष्ठभार्यामनियुक्तोगच्छंस्तदेवकनिष्ठभार्यांचेति तत्कामकारविषयम्
२८७ किंचाह यःपुनरुदक्यांरजस्वलांस्वभार्यामपिगच्छतिसत्रिरात्रमुपोष्यांतेघृतंप्राश्यविशुद्ध्यति इदमकामतःसकृद्गमनविषयं
तत्रैवाभ्यासेरजस्वलागमनेसप्तरात्रमितिशातातपेनोक्तंद्रष्टव्यम् कामतःसकृद्गमनेप्येतदेव यत्तुबृहत्संवर्तेनोक्तम् रजस्वलांतुयोग-

अनियुक्तोभ्रातृजायांगच्छंश्चांद्रायणंचरेत् २८७ त्रिरात्रांतेघृतंप्राश्यगत्वोदक्यांविशुद्ध्यति २८८

च्छेद्गर्भिणींपतितांतथा तस्यपापविशुद्ध्यर्थमतिकृच्छ्रंविशोधनमिति तत्कामतोभ्यासविषयम् यत्तुनःशंखेनत्रिवार्षिकमुक्तम्
पादस्तुशूद्रहत्यायामुदक्यागमनेतथेति तत्कामतोत्यंतानवच्छिन्नाभ्यासविषयम् रजस्वलयातुरजस्वलादिस्पर्शेप्रायश्चित्तंस्मृत्यं
तरोक्तंद्रष्टव्यम् तथाचबृहद्वसिष्ठः स्पृष्टेरजस्वलेन्योन्यंसगोत्रेत्वेकभर्तृके कामादकामतोवापिसद्यःस्नानेनशुद्ध्यतीति असपत्न्यो ११९
स्तुसवर्णयोरकामतःस्नानमात्रम् उदक्यातुसवर्णयास्पृष्टाचेत्स्यादुदक्यया तस्मिन्नेवाहनिस्नात्वाशुद्धिमाप्नोत्यसंशयमितिमा

र्कंडेयस्मरणात् यत्तुकश्यपवचनम् रजस्वलातुसंस्पृष्टाब्राह्मण्याब्राह्मणीयदि एकरात्रंनिराहारापंचगव्येनशुद्ध्यतीतित
त्कामकारविषयम् असवर्णस्पर्शेतुबृहद्वसिष्ठेनविशेषोदर्शितः स्पृष्टारजस्वलान्योन्यंब्राह्मणीशूद्रजाअपि कृच्छ्रेणशुद्ध्यते
पूर्वाशूद्रीदानेनशुद्ध्यति दानेनेतिपादकृच्छ्रप्रत्याम्नायभूतनिष्कचतुर्थांशदानेनशुद्ध्यतीति स्पृष्टारजस्वलान्योन्यंब्राह्मणीवैश्य
जापिच पादहीनंचरेत्पूर्वापादकृच्छ्रंतथोत्तरा स्पृष्टारजस्वलान्योन्यंब्राह्मणीक्षत्रियातथा कृच्छ्रार्धाच्छुध्यतेपूर्वातूत्तराचतद
र्धतः स्पृष्टारजस्वलान्योन्यंक्षत्रियाशूद्रजाअपि उपवासैस्त्रिभिःपूर्वात्वहोरात्रेणचोत्तरा स्पृष्टारजस्वलान्योन्यंक्षत्रियावैश्य-
जापिच त्रिरात्राच्छुध्यतेपूर्वात्वहोरात्रेणचोत्तरा स्पृष्टारजस्वलान्योन्यंवैश्यशूद्रीतथैवच त्रिरात्राच्छुध्यतेपूर्वातूत्तराचदिनद्वया
त् वर्णानांकामतःस्पर्शेच्छुद्धिरेषापुरातनीति अकामतस्तुबृहद्विष्णुनोक्तंस्नानमात्रं रजस्वलातुहीनवर्णांरजस्वलांस्पृष्ट्वा नता
वदश्नीयाद्यावन्नशुद्धास्यात् सवर्णामधिकवर्णांवास्पृष्ट्वासद्यःस्नात्वाशुद्ध्यतीति चांडालादिस्पर्शेतुबृहद्वसिष्ठेनविशेषउक्तः
पतितांत्यश्वपाकेनसंस्पृष्टाचेद्रजस्वला तान्यहानिव्यतिक्रम्यप्रायश्चित्तंसमाचरेत् प्रथमेह्नित्रिरात्रंस्यात्द्वितीयेद्व्यहमेवतु अ-
होरात्रंतृतीयेह्निपरतोनक्तमाचरेत् शूद्रयोच्छिष्टयास्पृष्टाशुनाचेत्द्व्यहमाचरेदिति तान्यहानिव्यतिक्रम्यअनाशकेननीत्वेति
यावत् एतत्कामतःस्पर्शविषयम् अकामतस्तुरजस्वलातुसंस्पृष्टाचांडालांत्यश्ववायसैः तावत्तिष्ठेन्निराहारायावत्कालेनशुद्ध्यती
तिबौधायनोक्तंद्रष्टव्यम् यत्तुनस्तेनैवोक्तम् रजस्वलातुसंस्पृष्टाग्रामकुक्कुटसूकरैः श्वभिःस्नात्वाक्षिपेत्तावद्यावच्चंद्रस्यदर्शन

मिति तदशक्तविषयम् यदा तु भुंजानायाः श्वादिस्पर्शनं भवति तदा स्मृत्यंतरे विशेष उक्तः रजस्वला तु भुंजाना श्वांत्यजादीन्स्पृशेद्यदि
गोमूत्रयावकाहारा षड्रात्रेणैव शुध्यति अशक्तौ कांचनं दद्याद्विप्रेभ्यो वापि भोजनमिति यदा तूच्छिष्टयोः परस्परं स्पर्शनं भवति त-
दा उच्छिष्टोच्छिष्टया स्पृष्टा कदाचित्स्त्री रजस्वला कृच्छ्रेण शुध्यते पूर्वा शूद्रा दानैरुपोषितेत्यत्रिणोक्तं द्रष्टव्यम् यदा तूच्छिष्टा
न् द्विजान् रजस्वला स्पृशति तदा द्विजान् कथंचिदुच्छिष्टान् रजःस्त्री यदि संस्पृशेत् अधोच्छिष्टे त्वहोरात्रमूर्ध्वोच्छिष्टे त्र्यहं क्षिपेदि
ति मार्कंडेयोक्तं द्रष्टव्यम् एवमवकीर्णिप्रायश्चित्तप्रसंगात्कानिचिदुपपातकभूतप्रायश्चित्तान्यपि व्याख्याय प्रकृतमनुसरामः
तत्रावकीर्ण्यनंतरं सुतानां चैव विक्रय इत्युक्तम् तत्र मनुयोगीश्वरोक्तानि त्रैमासिकादीनि कामाकामजातिशक्त्याद्यपेक्षया पूर्वव-
द्व्यवस्थापनीयानि यत्तु शंखवचनम् देवगृहप्रतिश्रयोद्यानारामसभाप्रपातडागपुण्यसेतुसुतविक्रये कृत्वा तप्तकृच्छ्रं चरेदिति
यच्च पराशरेणोक्तम् विक्रीय कन्यकां गां च कृच्छ्रं सांतपनं चरेदिति तदुभयमप्यापद्यकामतो द्रष्टव्यम् कामतस्तु नारीणां विक्रयं कृ
त्वा चरेच्चांद्रायणव्रतम् द्विगुणं पुरुषस्यैव व्रतमाहुर्मनीषिण इति चतुर्विंशतिमतोक्तं द्रष्टव्यम् यत्तु पैठीनसिनोक्तम् आरामतडा
गोदपानपुष्करिणीसुकृतस्कृतविक्रये त्रिषवणस्नाय्यधःशायी चतुर्थकालाहारः संवत्सरेण पूतो भवति तदेकपुत्रविषयम् तद
नंतरं धान्यकुप्यपशुस्तेयमित्युक्तं तत्प्रायश्चित्तानि च स्तेयप्रकरणे प्रपंचितानि २८८ अनंतरमयाज्यानां याजनमित्युक्तं तत्र प्राय १२०
श्चित्तमाह यस्तु सावित्रीपतितानां याजनं करोति स प्राजापत्यप्रभृतीन् त्रीन् कृच्छ्रानाचरेत् तेषां च गुरुलघुभूतानां कृच्छ्रानाचरेत् तेषां च-

गुरुलघुभूतानां कृच्छ्राणां त्रित्वं निमित्तगुरुलघुभावेन कल्पनीयम् तथा अभिचरन्नपीदमेव प्रायश्चित्तं कुर्यात् एतच्चाग्निदाद्याततायिव्य
तिरेकेण षट्स्वभिचरन्पततीति वसिष्ठस्मरणात् अपिशब्दो हीनयाजकात्येष्टियाजकयोः संग्रहणार्थः अत एवोक्तं मनुना व्रात्यानां या
जनं कृत्वा परेषामंत्यकर्म च अभिचारमहीनं च त्रिभिः कृच्छ्रैर्व्यपोहतीति परेषामंत्यकर्मेत्यत्यंताभ्यासविषयम् शूद्रांत्यकर्मविषयं वा
प्रायश्चित्तस्य गुरुत्वात् अहीनो द्विरात्रादिर्द्वादशाहपर्यंतोऽहर्गणयागः यत्तु शातातपेनोक्तम् पतितसावित्रीकान्नोपनयेत् नाध्यापयेत्

त्रीन्कृच्छ्रानाचरेद्व्रात्ययाजकोऽभिचरन्नपि वेदप्लावी यवान्यब्दं त्यक्त्वा च शरणागतम् २८९

य एतानुपनाययेदध्यापयेद्याजयेद्वा स उद्दालकव्रतं चरेदिति कामकारविषयम् उद्दालकव्रतं च प्राक्प्रदर्शितम् एतच्च कृच्छ्रत्रय
साधारणोपपातकप्रायश्चित्तस्यापवादकम् अत उपपातकसाधारणप्रायश्चित्तं शूद्राद्ययाज्ययाजने व्यवतिष्ठते तत्र कामतस्त्रैमा
सिकम् अकामतस्तु योगीश्वरोक्तं मासव्रतादि यत्तु प्रचेतसा शूद्रयाजकादीन् पठित्वोक्तम् एते पंच तपोऽभ्रावकाशजलशयनान्यनु-
तिष्ठेयुः क्रमेण ग्रीष्मवर्षाहेमंतेषु मासं गोमूत्रयावकमश्नीयुरिति तत्कामतोऽभ्यासविषयम् यच्च यमेनोक्तम् पुरोधाः शूद्रवर्णस्य ब्रा-

ह्मणोयः प्रवर्तते स्नेहादथप्रसंगाद्वातस्यकृच्छ्रोविशोधनमिति तदशक्तविषयम् यच्चपैठीनसिनोक्तं शूद्रयाजकः सर्वद्रव्यपरित्यागा
त्पूतोभवति प्राणायामसहस्रेषु दशकृत्वोऽभ्यासे वेदितव्यम् तदप्यकामतोऽभ्यासविषयम् यत्तुगौतमेनोक्तं निषिद्धमंत्रप्रयोगे सहस्रवा
क्चेदितिनिषिद्धानांपतितादीनांयाजनाध्यापनात्मकेमंत्रप्रयोगेबहुशोऽभ्यस्ते प्राकृतंब्रह्मचर्यमुपदिष्टम् तत्कामतोऽभ्यासविषयम्
यस्तुवेदंविप्लावयति यश्चरक्षणक्षमोऽपितस्करव्यतिरिक्तंशरणागतमुपेक्षते सोऽपिसंवत्सरंयवौदनंभुंजानः शुध्यति तत्रविप्लवोनामप
तितचांडालश्रोत्रावकाशाद्यनध्यायेष्वध्ययनम् उत्कर्षहेतोरधीयानस्यकिंपठसिनाशितंत्वयेत्येवंपर्यनुयोगोदानंवाविप्लावनमुच्यते अत
एवोक्तंस्मृत्यंतरे दत्त्वानुयोगान्ध्येतुःपतितान्मनुरब्रवीदिति यत्तुवसिष्ठेनोक्तम् पतितचांडालशावश्रवणेत्रिरात्रंवाग्यताअनश्नंतआ
सीरन् सहस्रपरमंवातदभ्यस्यतः पूतोभवतीतिविज्ञायतइति एतेनैवगर्हिताध्यापकयाजकाव्याख्याता दक्षिणात्यागाच्चपूतोभवतीति
विज्ञायतइतितद्बुद्धिपूर्वविषयम् यत्तुषट्त्रिंशन्मते अभिहितम् चांडालश्रोत्रावकाशेश्रुतिस्मृतिपाठेएकरात्रमभोजनमितितदबुद्धिपू
र्वविषयम् यदासर्पाद्यंतरागमनमात्रंभवतिनपुनस्तत्राधीतेतदापिप्रायश्चित्तंयमेनोक्तम् सर्पस्यनकुलस्याथअजमार्जारयोस्तथा मू
षकस्यतथोष्ट्रस्यमंडूकस्यचयोषितः पुरुषस्यैकुकस्यापिशुनोऽश्वस्यखरस्यच अंतरागमनेसद्यःप्रायश्चित्तमिदंशृणु त्रिरात्रमुपवा
सश्चत्रिरन्हश्चाभिषेचनम् ग्रामांतरंवागंतव्यंजानुभ्यांनात्रसंशयइति पितृमातृसुतत्यागतडागारामविक्रयेषुमनुयोगीश्वरोक्तोप १२१
पातकसाधारणप्रायश्चित्तानिपूर्ववज्जातिशक्तिगुणाद्यपेक्षयायोज्यानि तत्रपितृमात्रादित्यागस्य अकारणेपरित्यक्तामातापित्रोर्गुरो

स्तथेत्यपांक्तेयमध्यपाठात्तन्निमित्तमपिप्रायश्चित्तंभवति यथाहमनुः षष्ठान्नकालतामासंसंहिताजपएववा होमाश्चशाकलानि
त्यमपांक्तानांविशोधनमिति अपांक्ताश्चश्राद्धकांडेयेस्तेनपतितक्लीबाइत्यादिवाक्यैर्दर्शिताः तडागारामविक्रयेषुचकतिचिद्विशेषप्रा
यश्चित्तानिसविषयाणिसुतविक्रयप्रायश्चित्तकथनावसरेकथितानि अनंतरंकन्यायादूषणमित्युक्तम् तत्रचत्रैमासिकद्वैमासि-
कचांद्रायणादीनिसवर्णविषयेयोज्यानि आनुलोम्येपुनर्मासिकंपयोशनंप्राजापत्यंवा सकामास्वनुलोमासुनदोषस्त्वन्यथादमइति
दंडाल्पत्वदर्शनात् यत्तुशंखेनोक्तम् कन्यादोषीसोमविक्रयीचकृच्छ्रमब्दंचरेयातामिति यच्चहारीतवचनम् कन्याविक्रयीसोमवि
क्रयीवृषलीपतिकौमारदारत्यागः सुरामद्यपःशूद्रयाजकोगुरोःप्रतिहंतानास्तिकवृत्तिःकृतघ्नःकूटव्यवहारीमित्रध्रुक्शरणागतघाती
प्रतिरूपकवृत्तिरित्येतेपंचतपोऽभ्रावकाशजलशयनान्यनुतिष्ठेयुर्ग्रीष्मवर्षाहेमंतेषुमासंगोमूत्रयावकमश्नीयुरितितदुभयमपिक्षत्रि
यवैश्ययोःप्रातिलोम्येनदूषणेयोज्यंशूद्रस्यतुवधएव दूषणेतुकरच्छेदउत्तमायांवधस्तथेतिवधदर्शनात् परविंदकस्ययाजनक
न्याप्रदानयोःकौटिल्येअशिष्टप्रतिषिद्धव्रतलोपेआत्मार्थपाकक्रियारंभेमद्यपस्त्रीनिषेवणेचसाधारणोपपातकप्रायश्चित्तंप्रा
ग्व्यवस्थापनीयम् आद्ययोस्तुविशेषप्रायश्चित्तानिपरिवेदनायाज्ययाजनप्रायश्चित्तकथनप्रस्तावेदर्शितानि अनंतरंस्वा-
ध्यायत्यागइत्युक्तंतत्रव्यसनासक्त्यात्यागेअधीतस्यचनाशनमितिब्रह्महत्यासमंप्रायश्चित्तमुक्तम् शास्त्रश्रवणव्याकुलतयात्यागेतुत्रैमा
सिकाद्युपपातकप्रायश्चित्तानिशक्त्याद्यपेक्षयायोज्यानि यत्तुवसिष्ठेनोक्तं ब्रह्मोज्झताकृच्छ्रंद्वादशरात्रंचरित्वापुनरुपयुंजीतवेदमाचा

यदितितदत्यंतापद्विषयम् अग्नित्यागेपितेनैवविशेषोदर्शितः योग्नीनपविध्येत्सकृच्छ्रंद्वादशरात्रंचरित्वापुनराधेयंकारयेदितिद्वाद-
शरात्रग्रहणमुत्तमकालापेक्षयाप्राजापत्यादिगुरुलघुकृच्छ्राणांप्राप्त्यर्थं तत्रमासद्वयेप्राजापत्यंमासचतुष्टयेतिकृच्छ्रः षण्मासोच्छिन्नेपरा
कः षण्मासादूर्ध्वंयोगीश्वरोक्तान्युपपातकसामान्यप्रायश्चित्तानिकालाद्यपेक्षयायोज्यानि संवत्सरादूर्ध्वंतुमानवंत्रैमासिकमितिव्यवस्था
एतच्चनास्तिक्येनत्यागविषयं तथाव्याघ्रः योग्निंत्यजतिनास्तिक्यात्प्राजापत्यंचरेत्द्विजइति यदातुप्रमादात्त्यजतितदामारद्वाजगृह्येवि
शेषउक्तः प्राणायामशतमात्रिरात्रादुपवासःस्यादाविंशतिरात्रांत् अतऊर्ध्वमाषष्टिरात्रात्तिस्रोरात्रीरुपवसेदतऊर्ध्वमासंवत्सरात्
प्राजापत्यंचरेत् अतऊर्ध्वंकालबहुत्वेदोषगुरुत्वमिति यदात्वालस्यादिनात्यजतितदापितेनैवविशेषउक्तः द्वादशाहाति
क्रमेत्र्यहमुपवासोमासातिक्रमेद्वादशाहमुपवासःसंवत्सरातिक्रमेमासोपवासःपयोभक्षणंचेति संवत्सरादूर्ध्वंतुहारीतेनविशे
षउक्तः संवत्सरोत्सन्नेग्निहोत्रेचांद्रायणंकृत्वापुनरादध्यात् द्विवर्षोच्छिन्नेचांद्रायणसोमायनंचकुर्यात् त्रिवर्षोच्छिन्नेसंव
त्सरंकृच्छ्रमभ्यस्यपुनरादध्यादिति सोमायनंचकृच्छ्रकांडेवक्ष्यते शंखेनापिविशेषउक्तः अग्न्युत्सादीसंवत्सरंप्राजापत्यं-
चरेद्गांचदद्यादिति सुतत्यागेबंधुत्यागेचत्रैमासिकंगोवधव्रतंकामतोकामतस्तुयोगीश्वरोक्तंव्रतचतुष्टयंशक्त्याद्यपेक्षयायोज्य
म् द्रुमच्छेदेप्रायश्चित्तंप्रागुक्तम् स्त्रीप्राणिवधवशीकरणादिभिर्जीवनेतिलेक्षुयंत्रप्रवर्तनेचतान्येवप्रायश्चित्तानितथैवयो
ज्यानि व्यसनेषुचद्यूतमृगयादिष्वेतान्येवप्रायश्चित्तानितथैवयोज्यानि यत्तुबौधायनेन अथाशुचिकराणिद्यूतमभिचारोना 

हिताग्नेरुंछवृत्तिःसमावृत्तस्यभैक्ष्यचर्यातस्यचगुरुकुलेवासऊर्ध्वंचतुर्भ्योमासेभ्योयश्चतमध्यापयतिनक्षत्रनिर्देशनंचेति
द्वादशमासान्द्वादशार्द्धमासान्द्वादशद्वादशाहान्द्वादशषडहान्द्वादशत्र्यहान्त्र्यहमेकाहमित्यशुचिकरनिर्देशइतिद्यूतेवार्षि-
कव्रतमुक्तंतदभ्यासविषयम् यत्तुप्रचेतसोक्तम् अनृतवाक्तस्करोराजभृत्योवृक्षारोपकवृत्तिर्गरदोग्निदोश्वरथेगजारो
हणवृत्तिःरंगोपजीवीश्वगणिकःशूद्रोपाध्यायोवृषलीपतिर्भांडिकोनक्षत्रोपजीवीश्ववृत्तिर्ब्रह्मजीवीचिकित्सकोदेवलकःपुरो
हितःकितवोमद्यपःकूटकारकोपत्यविक्रयीमनुष्यपशुविक्रेताचेति नानुदूरेत्समेत्यन्यायतोब्राह्मणव्यवस्थयासर्वद्रव्यत्यागेच
तुर्थकालाहारःसंवत्सरंत्रिषवणमुपस्पृशेयुः तस्यांतेदेवपितृतर्पणंगवान्हिकंचेत्येवंव्यवहार्याइतितदपिबौधायनेनसमानवि-
षयम् श्वगणिकादयःश्वगणेनजीवतिभांडिकोबंदिव्यतिरिक्तोराज्ञातूर्यादिस्वनैःप्रतिबोधयिताबंदिनःपृथगुपादानात् श्ववृत्तिः
सेवकःब्रह्मजीवीब्राह्मणकार्येषुमूल्येनपरिचारकः मनूक्तेष्वपांक्तेप्रायश्चित्तानिषष्ठान्नकालतामासमित्यादीनिजात्याद्यपेक्ष
यायोज्यानि तदुक्तापांक्त्यमध्येकितवादिव्यसनिनांपठितत्वात् आत्मविक्रयेशूद्रसेवायांचसामान्यप्रायश्चित्तानिप्राग्वदेवयो-
ज्यानि यत्तुबौधायनेनोक्तम् समुद्रयानंब्राह्मणस्यन्यासापहरणंसर्वपण्यैर्व्यवहरणंभूम्यनृतंशूद्रसेवायश्चशूद्रायामभिजाय-
तेतदपत्यंचभवतितेषांतुनिर्देशः चतुर्थकालंमितभोजनाःस्युरपोभ्युपेयुःसवनानुकल्पम् स्थानासनाभ्यांविहरंतएतेत्रिभि
र्वर्षैस्तदपघ्नंतिपापमितितद्दीर्घकालसेवाविषयम् हीनजातिभिःसख्येतुउपपातकसामान्यप्रायश्चित्तान्येव यत्तुप्रचेतसोक्तम्

मित्रभेदकरणादहोरात्रमनश्नन् अहुत्वापयःपिबेदिति तदहीनसख्यभेदविषयम् हीनयोनिनिषेवणेष्वुपपातकसामान्यप्राय 
श्चित्तानियोज्यानि यत्तुशातातपेनोक्तम् ब्राह्मणोराजन्यापूर्वंकृच्छ्रद्वादशरात्रंचरित्वानिविशेत्ताचोपयच्छेद्वैश्यापूर्वांतप्तकृच्छ्रं 
शूद्रापूर्वांतुकृच्छ्रातिकृच्छ्रं राजन्यश्चेद्वैश्यापूर्वंकृच्छ्रद्वादशरात्रंचरित्वानिविशेत्ताचोपयच्छेदितिशूद्रापूर्वांत्वतिकृच्छ्रं वैश्यश्चे-
च्छूद्रापूर्वंकृच्छ्रद्वादशरात्रंचरित्वातांचोपयच्छेदितितत्रनिविशेत्ताचोपयच्छेदितिकृच्छ्रात्तुशनोत्तरकालंसवर्णपरिणयनादूर्ध्वंता
न्राजन्यादिकामुपयच्छेदित्यर्थः इदंचाज्ञानविषयम् ज्ञानतस्तूपपातकसामान्यप्रायश्चित्तंव्यवस्थितमेवद्रष्टव्यम् साधारणस्त्री
संभोगेचहीनयोनिनिषेवणंइत्युक्तम् तत्रापिपशुवेश्याभिगमनेप्राजापत्यंविधीयतइतिसंवर्तोक्तिमकामतोद्रष्टव्यम् वेश्यागमनजं
पापंव्यपोहंतिद्विजातयः पीत्वासकृत्सुतप्तंसप्तरात्रंकुशोदकमिति उपपातकसामान्यप्रायश्चित्तानिकामाकामतोभ्यासापेक्षया
योज्यानि तत्रमत्यभ्यासेतुप्रतिनिमित्तंनैमित्तिकमावर्ततइतिन्यायात् प्रतिनिमित्तंनैमित्तिकावृत्तौप्रसक्तायांलौगाक्षिणाविशेष
उक्तः अभ्यासेहृर्गुणावृद्धिर्मासादर्वाक्विधीयते ततोमासगुणावृद्धिर्यावत्संवत्सरंभवेत् ततःसंवत्सरगुणायावत्पापंसमाचरेदि-
ति इदंमतिपूर्वविषयम् अमतिपूर्वावृत्तौचतुर्विंशतिमतेविशेषउक्तः सकृत्कृतेतुयत्प्रोक्तंत्रिगुणंतत्त्रिभिर्दिनैः मासात्पंचगुणंप्रोक्तं
षण्मासाद्दशधाभवेत् संवत्सरात्पंचदशंत्र्यब्दाद्विंशद्गुणंभवेत् ततोप्येवंप्रकल्प्यंस्यात् शातातपवचोयथेति यत्तुपुनर्विधेःप्राथमिका १२३
दस्मात्द्वितीयेद्विगुणंचरेदितिप्रतिनिमित्तमावृत्तिविधायकंतन्महापातकविषयमित्युक्तंप्राक् यत्तुयमेनसाधारणस्त्रीगमनमधिकृ

त्यगुरुतल्पव्रतमितिनिर्दिष्टम् गुरुतल्पव्रतंकेचित्केचित्चांद्रायणव्रतम् गोघ्नस्येच्छंतिकेचिच्चकेचिदेवावकीर्णिनइति एतच्चज
न्मप्रभृतिसानुबंधानवच्छिन्नाभ्यासविषयम् अनंतरंतथैवानाश्रमेवासइत्युक्तंतत्रहारीतेनविशेषउक्तः अनाश्रमीसंवत्सरंप्राजा-
पत्यकृच्छ्रंचरित्वाश्रममुपेयात् द्वितीयेतिकृच्छ्रंतृतीयेकृच्छ्रातिअतऊर्ध्वंचांद्रायणमिति एतदसंभवविषयम् संभवेतुसामान्यो-
पपातकप्रायश्चित्तानिकामाकामतोव्यवस्थापनीयानिपरपाकरुचित्वासच्छास्त्राधिगमनाकराधिकारभार्याविक्रयेषुचमनुयोगीश्वर
प्रतिपादितोपपातकसामान्यप्रायश्चित्तानिजातिशक्तिगुणाद्यपेक्षयाव्यवस्थापनीयानि २८९ भार्यायाविक्रयश्चैषामित्यत्रचशब्दि

गोष्ठेवसन्ब्रह्मचारीमासमेकंपयोव्रतः गायत्रीजाप्यनिरतःशुध्यतेसत्प्रतिग्रहात् २९०

मन्वाद्युक्तासत्प्रतिग्रहनिंदितान्नादीनामुपलक्षणार्थमित्युक्तम् तत्रासत्प्रतिग्रहेप्रायश्चित्तविशेषमाह यस्त्वसत्प्रतिग्रहंकरोतिब्र
ह्मचर्ययुक्तोगोष्ठेवसन् गायत्रीजपशीलोमासंपयोव्रतेनशुध्यतीतिप्रतिग्रहस्यचासत्त्वंदातुर्जातिकर्मनिबंधनंयथाचांडालादेःपतित
देश्चतथादेशकालनिबंधनंच यथाकुरुक्षेत्रोपरागादौतथाप्रतिग्राह्यद्रव्यनिबंधनंच यथासुरामेषीमृतशय्योभयतोमुख्यादेः य

दातुःपतितादेर्भूम्यादिकंगृण्हातितदेदंगुरुप्रायश्चित्तंद्रष्टव्यम् व्यतिक्रमेद्रव्यदर्शनेननिमित्तस्यगुरुत्वात् तत्रजपेमनुः नासंख्या
विशेषउक्तः जपित्वात्रीणिसावित्र्याःसहस्राणिसमाहितः मासंगोष्ठेपयःपीत्वामुच्यतेसत्प्रतिग्रहादिति प्रत्यहंत्रिसहस्रंजपोद्रष्ट
व्यः मासमितिद्वितीययात्रिसहस्रसंख्याकस्यजपस्यप्रतिदिवसव्यापित्वावगमात् यदातुन्यायवर्तिब्राह्मणादेःसकाशान्निषिद्धं
मेषादिकंगृण्हातिपतितादेर्वाभूम्यादिकमनिषिद्धंतदाषट्त्रिंशन्मतोक्तंद्रष्टव्यम् पवित्रेष्ट्याविशुध्यंतिसर्वेघोराःप्रतिग्रहाः ऐंद्रवेन
मृगारेष्ट्याकदाचिन्मित्रविंदया देव्यालक्षजपेनैवशुध्यंतेदुःप्रतिग्रहात् यत्तुबृहद्धारीतवचनम् राज्ञःप्रतिग्रहंकृत्वामासमप्सुस
दावसेत् षष्ठेकालेपयोभक्षःपूर्णेमासेविशुध्यति तर्पयित्वाद्विजान्कामैःसततंनियतव्रतइति तत्पूर्वोक्तविषयाभ्यासेद्रष्टव्यम् अ
थवापतितादेःकुरुक्षेत्रोपरागादौकृष्णाजिनादिप्रतिग्रहविषयम् तथाप्रतिग्राह्यद्रव्याल्पतयाप्रायश्चित्ताल्पत्वम् यथाहहारीतः म
णिवासोगवादीनांप्रतिग्रहणेसावित्र्यष्टसहस्रंजपेदिति तथाषट्त्रिंशन्मतेपि भिक्षामात्रेगृहीतेतिपुण्यमंत्रमुदीरयेत् प्रतिग्रहेषुस-
र्वेषुषष्ठमंशंप्रकल्पयेत् इतीदंप्रायश्चित्तजातंद्रव्यत्यागोत्तरकालंद्रष्टव्यम् यद्गर्हितेनार्जयंतिब्राह्मणाकर्मणाधनं तस्योत्सर्गेणशुध्य
तिजपेनतपसैवचेतिमनुस्मरणात् एवमन्यान्यपिस्मृतिवाक्यानिद्रव्यसारात्यल्पमहत्त्वाभ्यांविषयेषुव्यवस्थापनीयानि इत्युपपा
तकानि जात्याश्रयादिदोषेणनिंद्यानादेनशब्दतः योगीश्वरोक्तव्रतमात्रसांप्रतंतुप्रतन्यते तत्रजातिदुष्टपलांड्वादिभक्षणेकामतः १२४
सकृत्कृतेपलांडुंविड्वराहंचेत्यादिनाचांद्रायणमुक्तम् कामतोभ्यासेतुनिषिद्धभक्षणेजेह्म्यादिनोक्तंसुरापानसमंप्रायश्चित्तम् अ-

कामतःसकृद्भक्षणेसांतपनम् तत्रैवाभ्यासेयतिचांद्रायणम् अमत्यैतानिषड्जग्ध्वाकृच्छ्रंसांतपनंचरेत् यतिचांद्रायणंवापिशे
षेषूपवसेदहरितिमनुस्मरणात् यत्तुबृहद्यमेनोक्तम् खट्वावार्ताककुंभीकव्रश्चनप्रभवाणिच भूतृणंशिग्रुकंचैवसुखंडंकवचा
निच एतेषांभक्षणंकृत्वाप्राजापत्यंचरेद्द्विजः इतितत्कामतोपूर्वाभ्यासविषयम् मत्स्यांश्चकामतोजग्ध्वासोपवासस्त्र्यहंक्षिपेदि
तियोगीश्वरेणकामतःसकृद्भक्षणेत्र्यहस्योक्तत्वात् खट्वाख्यःपक्षी कुसुंभमित्यन्ये कवचंकृष्णसर्षपाख्यंशाकम् सुखंडंनाडिवि
शेषोगोबलीवर्दन्यायेननिर्दिष्टः यत्तुयमेनोक्तं तंदुलीयकुंभीकव्रश्चनप्रभवास्तथा नालिकानालिकेरींचश्लेष्मातकफलानि
च भूतृणंशिग्रुकंचैवखट्वाख्यंकवचंतथा एतेषांभक्षणंकृत्वाप्राजापत्यंव्रतंचरेदिति तदपिमतिपूर्वाभ्यासविषयम् नालि
कानालिकेरांचशाकविशेषौ खट्वाख्यश्च अकामतःसकृद्भक्षणेतुशेषेषूपवसेदहरितिमनूक्तंद्रष्टव्यम् तत्रैवाभ्यासेत्वावृत्तिः
कल्प्या अनंताभ्यासेतु संसर्गदुष्टंयच्चान्नंक्रियादुष्टमकामतः भुक्त्वास्वभावदुष्टंचतप्तकृच्छ्रंसमाचरेदितिप्रचेतोभिहितं-
द्रष्टव्यम् नील्यास्त्वकामतःसकृद्भक्षणेचांद्रायणं भक्षयेद्यदिनीलींतुप्रमादाद्ब्राह्मणःक्वचित् चांद्रायणेनशुद्धिःस्यादापस्तंबोब्रवीन्मु-
निरित्यापस्तंबस्मरणात् कामतोभ्यासेत्वावृत्तिःकल्प्या यदपिषट्त्रिंशन्मतेभिहितम् शणपुष्पशाल्मलंचकरनिर्मथितंदधि बहिर्वे
दिपुरोडाशंजग्ध्वानाद्यादहर्निशमितितदप्यकामविषयम् यत्तुसुमंतुनोक्तम् लशुनपलांडुगृंजनकवकभक्षणेसावित्र्यष्टसहस्रेण
मूर्ध्निसंपातान्नयेदितितद्बलात्कारेणानिच्छतोभक्षणविषयम् तदेकसाध्यव्याध्युपशमार्थंवाभक्षणेद्रष्टव्यम् अतएवानंतरंतेनै

वोक्तम् एतान्येव व्याधितस्य भिषक्क्रियायाम प्रतिषिद्धानि भवंति यानि चैवं प्रकाराणि तेष्वपि न दोष इति संपातान्नयेदुदकबिंदून् पात
येन् अथ जातिदुष्टसंधिन्यादि क्षीरपाने प्रायश्चित्तम् तत्र चाकामतः सकृत्पाने अनिर्दशाया गोः क्षीरमौष्ट्रमैकशफं तथा आविकं सं
धिनीक्षीरं विवत्सायाश्च गोः पयः आरण्यानां च सर्वेषां मृगाणां महिषीं विना स्त्रीक्षीरं चैव वर्ज्यानि सर्वशुक्तानि चैव हीति दधि भक्ष्यं च शु
क्तेषु सर्वं च दधिसंभवमित्युक्त्वा शेषेषूपवसेदहरिति मनूक्त उपवासो द्रष्टव्यः कामतस्तु योगीश्वरोक्तस्त्रिरात्रोपवासो द्रष्टव्यः यत्तु पैठी
नसिनोक्तम् अविखरोष्ट्रमानुषीक्षीरप्राशने तप्तकृच्छ्रः पुनरुपनयनं च अनिर्दशाहगोमहिषीक्षीरप्राशने षड्रात्रमभोजनम् सर्वा-
सां द्विस्तनीनां क्षीरपानेप्यजावर्जमेतदेवेति यच्च शंखेन क्षीराणि यान्यभक्ष्याणि तद्विकाराशने बुधः सप्तरात्रं व्रतं कुर्यात्प्रयत्नेन समाहि
त इति यावकव्रतमुक्तं तदुभयमपि कामतोभ्यासविषयम् यत्तु शंखेन संधिन्यमेध्यभक्षणे क्षीरप्राशने पक्षव्रतमुक्तम् संधिन्यमेध्यभ
क्षाया भुक्त्वा पक्षव्रतं चरेदिति तदभ्यासविषयम् सकृत्पाने गोअजमहिषीवर्जं सर्वाणि पयांसि प्राश्य उपवसेत् अनिर्दशाहं तान्यपि संधि
नीयमसूस्यन्दिनीविवत्साक्षीरं चामेध्यभुजश्चेति विष्णुनोपवासस्योक्तत्वात् तथा वर्णनिबंधनश्च प्रतिषेधः क्षत्रियश्चापि वृत्तस्थो वै-
श्यः शूद्रोथवा पुनः यः पिबेत्कपिलाक्षीरं न ततोन्योस्त्यपुण्यकृदिति एवमादौ च यत्र प्रतिपदोक्तं प्रायश्चित्तं न दृश्यते तत्र शेषेषूपवसेदह
रिति साधारणप्रायश्चित्तं मनूक्तं द्रष्टव्यम् अथ स्वभावदुष्टमांसादिभक्षणे प्रायश्चित्तमुक्तम् तत्र कामतः सकृद्भक्षणे शेषेषूपवसे
दहरिति मनूक्तं साधारणं प्रायश्चित्तं द्रष्टव्यम् कामतस्तु चाषांश्च रक्तपादांश्च सौनं वल्लूरमेव च मत्स्यांश्च कामतो जग्ध्वा सोपवास-



स्त्र्यहं वसेदिति योगीश्वरोक्तं द्रष्टव्यम् कामतोभ्यासे तु जग्ध्वा मांसमभक्ष्यं तु सप्तरात्रं पयः पिबेदिति मनूक्तं द्रष्टव्यम् इदं विड्सूक
रादिमांसव्यतिरिक्तविषयम् क्रव्यादिड्सूकरोष्ट्राणां कुक्कुटानां च भक्षणे नरकाकखरोष्ट्राणां तप्तकृच्छ्रं विशोधनमिति मनुना जाति
विशेषेण प्रायश्चित्तविशेषस्योक्तत्वात् एतन्मूत्रपुरीषप्राशनेप्येतदेव वराहैकशफानां तु काककुक्कुटयोस्तथा क्रव्यादानां च सर्वेषा
मभक्षा ये च कीर्त्तिताः मांसमूत्रपुरीषाणि प्राश्य गोमांसमेव च श्वगोमायुकपीनां च तप्तकृच्छ्रं विधीयते उपोष्य वा द्वादशाहं कूष्मां
डैर्जुहुयाद्घृतमिति वृद्धयमस्मरणात् तत्र कामतस्तप्तकृच्छ्रः अभ्यासे तु कूष्मांडसहितः पराक इति व्यवस्था तथा प्रचेतसाप्युक्तम्
श्वसृगालकाककुक्कुटपार्षतवानरचित्रकचाषक्रव्यादखरोष्ट्रगजवाजिविड्वराहगोमानुषमांसभक्षणे तप्तकृच्छ्रमादिशेदेषां मूत्रपुरी
षभक्षणे त्वतिकृच्छ्रमिति इदं च कामकारविषयम् यत्तूशनसो वचनम् नरमांसं श्वमांसं च गोमांसं चाश्वमेव च भुक्त्वा पंचन-
खानां च महासांतपनं चरेदिति तदकामविषयम् यत्त्वंगिरोवचनं बलाकाभासगृध्राखुखरवानरसूकराः दृष्ट्वा चैषाममेध्यानि स्पृ
ष्ट्वा चैव विशुध्यति इच्छयैषाममेध्यानि भक्षयित्वा द्विजातयः कुर्युः सांतपनं कृच्छ्रं प्राजापत्यमनिच्छये ति तद्भक्षितोद्गारितवि
षयम् सांतपनशब्देन चात्र महासांतपनमुच्यते अकामतः प्राजापत्यविधानात् यत्तु नरंगिरोवचनम् नरकाकखराश्वानां जग्ध्वा
मांसं गजस्य च एषां मूत्रं पुरीषाणि द्विजश्चांद्रायणं चरेदिति यच्च वृद्धयमेनोक्तं शुष्कमांसाशने विप्रो व्रतं चांद्रायणं चरेदिति तदुभ
यमपि कामतोभ्यासविषयम् यत्तु पुनः शंखेनोक्तम् भुक्त्वा चोभयतो दंतांस्तथा चैकशफानपि औष्ट्रं गव्यं तथा जग्ध्वा षण्मासान्व्रत

माचरेदिति तत्कामतोत्यंताभ्यासविषयम् यत्तुस्मृत्यंतरोक्तम् जग्ध्वामांसंनराणांचविड्वराहंखरंतथा गवाश्वकुंजरोष्ट्राणांसर्वं-
पंचनखंतथा क्रव्यादंकुक्कुटंग्राम्यंकुर्यात्संवत्सरंव्रतमितितदत्यंतानवच्छिन्नाभ्यासविषयम् अत्रप्रकरणेमूत्रपुरीषग्रहणंवसाशु
क्रासृङ्मज्जानामुपलक्षणम् कर्णविट्प्रभृतिमलषट्केत्वर्धंकल्पनीयम् केशादिषुपुनःषट्त्रिंशन्मतेविशेषउक्तः अजाविमहिष
मृगाणांआममांसभक्षणेकेशनखरुधिरप्राशनेबुद्धिपूर्वेत्रिरात्रमज्ञानादुपवासइति यत्तुप्रचेतसोक्तम् नखकेशमृद्लोष्टभक्षणेऽहो
रात्रमभोजनाच्छुद्धिरितितदप्यकामतःसकृत्प्राशनविषयम् यत्तुस्मृत्यंतरवचनम् केशकीटनखंप्राश्यमत्स्यकंटकमेवच हेमतप्तंघृ
तंपीत्वातत्क्षणादेवशुध्यति तत्तुखमात्रप्रवेशविषयम् यदातुभाजनस्थमन्नंकेशादिदूषितंभवतितदा अन्नंभोजनकालेतुमक्षि
काकेशदूषितम् अनंतरंस्पृशेदापस्तच्चान्नंभस्मनास्पृशेदितिप्रचेतसाभिहितंवेदितव्यम् प्रासंगिकोयंश्लोकः सूक्ष्मतरकृमिकीटा
स्थिभक्षणेपुनर्हारीतेनविशेषउक्तः कृमिकीटपिपीलिकाजलौकःपतंगास्थिप्राशनेगोमूत्रगोमयाहारस्त्रिरात्रेणविशुध्यतीति जलौ
कोमत्स्यादिः एवंचपशुपक्षिजलचरमांसादिप्राशनेसंक्षेपतःप्रायश्चित्तानिदर्शितानि ग्रंथगौरवभयात्सातिव्यक्तिर्नलिख्यते
अथाशुचिसंस्पृष्टभक्षणेप्रायश्चित्तं तत्रतावदुच्छिष्टाभक्ष्यभक्षणेवक्ष्यतेमनुः विडालकाकाखूच्छिष्टंजग्ध्वाश्वनकुलस्यच केश
कीटावपन्नंचपिबेद्ब्राह्मीसुवर्चलामिति कालविशेषानुपादानादेकरात्रम् इदमकामतोद्रष्टव्यम् यत्तुविष्णुनोक्तम् पक्षिश्वापदज
ग्धस्यरसस्यान्नस्यभूयसः संस्काररहितस्यापिभोजनेकृच्छ्रपादकमितितत्कामकारविषयम् संस्कारश्चदेवद्रोण्यामित्यादिनाद्र १२६

व्यशुद्धिप्रकरणोक्तोद्रष्टव्यः यत्तुशातातपेनोक्तम् श्वकाकाद्यवलीढशूद्रोच्छेषणभोजनेत्वतिकृच्छ्रमितितदकामतोभ्यासविषयम् य
त्तुशंखेन शुनामुच्छिष्टकंभुक्त्वामासमेकंव्रतीभवेत् काकोच्छिष्टंगवाघ्रातंभुक्त्वापक्षंव्रतीभवेदितियावकव्रतमुक्तंतत्कामतोभ्यास
विषयम् ब्राह्मणोच्छिष्टभोजनेतुबृहद्विष्णुनोक्तम् ब्राह्मणःशूद्रोच्छिष्टाशनेसप्तरात्रंपंचगव्यंपिबेत् वैश्योच्छिष्टाशनेपंचरात्रंरा
जन्योच्छिष्टाशनेत्रिरात्रंब्राह्मणोच्छिष्टाशनेत्वेकाहमितितत्कामकारविषयम् यत्तुयमवचनम् भुक्त्वासहब्राह्मणेनप्राजापत्येनशु
ध्यति भूभुजासहभुक्त्वान्नंतप्तकृच्छ्रेणशुध्यति वैश्येनसहभुक्त्वान्नमतिकृच्छ्रेणशुध्यति शूद्रेणसहभुक्त्वान्नंचांद्रायणमथाचरे
त् तत्कामतोभ्यासविषयम् यत्पुनःशंखवचनम् ब्राह्मणोच्छिष्टाशनेमहाव्याहृतिभिरभिमंत्र्यापःपिबेत्क्षत्रियोच्छिष्टाशनेब्राह्मी
रसविपक्केनत्र्यहंक्षीरेणवर्तयेत् विशोच्छिष्टाशनेत्रिरात्रोपोषितोब्राह्मीसुवर्चलांपिबेत् शूद्रोच्छिष्टभोजनेषड्रात्रमभोजनमितित
दकामविषयम् तत्राभ्यासेद्वैगुण्यादिकंकर्तव्यम् एतच्चपित्रादिव्यतिरेकेण पितुर्ज्येष्ठस्यचभ्रातुरुच्छिष्टंभोज्यमित्यापस्तंबस्मरणा
त् यत्तुबृहद्व्यासवचनम् मातावाभगिनीवापिभार्यावान्याश्चयोषितः नताभिःसहभोक्तव्यंभुक्त्वाचांद्रायणंचरेत् तत्सहभोजन
विषयम् उच्छिष्टमात्रभोजनेषुशूद्रोच्छिष्टभोजनेसप्तरात्रमभोजनंस्त्रीणांचेत्यापस्तंबोक्तंद्रष्टव्यम् यत्त्वंगिरोवचनम् ब्राह्मण्या
सहयोश्नीयादुच्छिष्टंवाकदाचन तत्रदोषंनमन्यंतेसर्वएवमनीषिणइति तद्विवाहविषयमापद्विषयंवा अंत्योच्छिष्टभोजनेतु अं
त्यानांभुक्तशेषंतुभक्षयित्वाद्विजातयः चांद्रंकृच्छ्रंतदर्धंचब्रह्मक्षत्रविशांविधिरितिआपस्तंबोक्तंद्रष्टव्यम् अत्रचांद्रंचांद्रायणम्

अंत्यावसाय्युच्छिष्टभोजनेतु चांडालपतितादीनामुच्छिष्टान्नस्यभोजने चांद्रायणंचरेद्विप्रः क्षत्रःसांतपनंचरेत् षड्रात्रंचत्रिरात्रंचवर्ण
योरनुपूर्वशः इत्यंगिरोभिहितसांतपनमत्रमहासांतपनंद्रष्टव्यम् आपदितु आपत्कालेतुविप्रस्यभुक्तंशूद्रगृहेयदि मनस्तापेनशुध्ये
तद्रुपदांचशतंजपेदितिपाराशरोक्तंवेदितव्यम् यत्तुवृद्धहच्छातातपेनोक्तम् पीतशेषंचयत्किंचिद्भाजनेमुखनिःसृतम् अभोज्यंतद्वि-
जानीयाद्भुक्त्वाचांद्रायणंचरेदितितदभ्यासविषयंज्ञेयम् निमित्तस्यातिलघुत्वात् पीतोच्छिष्टंतुपानीयंपीत्वातुब्राह्मणःक्वचित् त्रि-
रात्रंतुव्रतंकुर्याद्वामहस्तेनवापुनरिति एतद्बुद्धिपूर्वविषयम् अकामतस्त्वर्द्धकल्प्यमिति दीपोच्छिष्टेतु दीपोच्छिष्टंतुयत्तैलंरात्रौरथ्याद्द
तंतुयत् अभ्यंगाच्चैवयच्छिष्टंभुक्त्वानक्तेनशुध्यतीतिषट्त्रिंशन्मतोक्तंद्रष्टव्यम् अथाशुचिद्रव्यसंस्पृष्टभक्षणेप्रायश्चित्तम् त
त्राहसंवर्त्तः केशकीटोपपन्नंतुनीलीलाक्षोपघातनम् स्नाय्वस्थिचर्मसंस्पृष्टंभुक्त्वातूपवसेदहरिति तथाहशातातपः केशकीटाव
पन्नरुधिरमांसास्पृश्यस्पृष्टभ्रूणहावेक्षितपतत्र्यवलीढश्वसूकरगवाघ्रातशुक्तपर्युषितवृथापक्वदेवान्नहविषांभोजनेतूपवासःपं
चगव्याशनंचेति एतच्चोभयमपिअकामविषयम् कामतस्तु मृद्वारिकुसुमादींश्चफलकंदेक्षुमूलकान् विण्मूत्रदूषितान्प्राश्यकृच्छ्र
पादंसमाचरेत् संनिकृष्टेर्धमेवस्यात्कृच्छ्रःस्याच्छुचिभोजनमितिविष्णूक्तंवेदितव्यम् अल्पसंसर्गेपादोमहासंसर्गेर्धेकृच्छ्रइतिव्यव
स्था यत्तुव्यासेनोक्तम् संसर्गदुष्टंयच्चान्नंक्रियादुष्टंचकामतः भुक्त्वास्वभावदुष्टंचतप्तकृच्छ्रंसमाचरेदिति एतच्चासंस्पृष्टामेध्यादिर १२७
सोपलब्धौवेदितव्यम् रजस्वलादिस्पर्शेतुशंखोक्तम् अमेध्यपतितचांडालपुल्कसरजस्वलावधूतकुणिकुष्ठिकुनखिसंस्पृष्टानि

भुक्त्वाकृच्छ्रंचरेदिति कुणिर्हस्तविकलः एतत्कामकारविषयम् अकामतोर्धम् भुक्त्वास्पृश्यैस्तथाशौचिकेशकीटैश्चदूषितम् कुशो
दुंबरबिल्वाद्यैःपनसांबुजपत्रकैः शंखपुष्पीसुवर्चादिक्वाथंपीत्वाविशुध्यतीतियद्विष्णुनोक्तंतदशक्तविषयंरजकादिस्पर्शविषयंवा
मूत्राद्युपहतेतुहारीतोक्तंविज्ञेयम् शूद्रेणोपहतंभोज्यंकीटैर्वामेध्यसेविभिः भुंजानेषुतुवायत्रद्याच्छूद्रउपस्पृशेत् अनर्हत्वात्स
पंक्तौतुभुंजानेषुवायत्रोत्थायोच्छिष्टंप्रयच्छेदाचामेद्वाकुत्सितावायत्रान्नंदद्युस्तत्रप्रायश्चित्तमहोरात्रमिति उच्छिष्टपंक्तिभोजने-
प्येतदेव यस्तुभुंक्तेद्विजःपंक्त्यामुच्छिष्टायांकदाचन अहोरात्रोषितोभूत्वापंचगव्येनशुध्यतीतिक्रतुस्मरणात् वामकरनिर्मुक्ताम
त्रभोजनेतु समुत्थितस्तुयोभुंक्तेयोभुंक्तेमुक्तभाजने एवंवैवस्वतःप्राहभुक्त्वासांतपनंचरेदितिषट्त्रिंशन्मतोक्तंवेदितव्यम् तथाप-
राशरेणाप्युक्तम् एकपंक्त्युपविष्टानांविप्राणांसहभोजने यद्येकोपित्यजेत्पात्रंशेषमन्नंनभोजयेत् मोहाद्भुंजीतयस्तत्रपंक्त्यामु
च्छिष्टभोजनः प्रायश्चित्तंचरेद्विप्रःकृच्छ्रंसांतपनंचरेदिति शवादिसंपृक्तकूपाद्युदकपानेतुविष्णुराह मृतपंचनखात्कूपादत्यंतोप
हताद्वोदकंपीत्वाब्राह्मणस्त्र्यहमुपवसेत् द्व्यहंराजन्यएकाहंवैश्यःशूद्रोनक्तंसर्वेचांतेपंचगव्यंपिबेयुरिति अत्यंतोपहताद्वेतिमूत्रपुरी
षादिभिर्वेत्यभिप्रेतं यदातुतत्रैवशवमुच्छूनतयाभिन्नंभवतितदाहारीतोक्तोविशेषः क्लिन्नेभिन्नेशवेतोयेतत्रस्थंयदितत्पिबेत् शु
ध्यैचांद्रायणंकुर्यात्तप्तकृच्छ्रमथापिवा यदिकश्चित्ततःस्नायात्प्रमादेनद्विजोत्तमः जपंस्त्रिषवणस्नायीअहोरात्रेणशुध्यतीति इ
दंचांद्रायणंकामतोमानुषशवोपहतकूपजलपानविषयम् अकामतस्तुषड्रात्रं क्लिन्नंभिन्नंशवंचैवकूपस्थंयदिजायते पयःपिबे

त्रिरात्रेण मानुषे द्विगुणं स्मृतमिति देवलस्मरणात् यदा चंडालकूपादिगतं जलं पिबति तदापस्तंबोक्तं द्रष्टव्यम् चांडालकूपभांड-
स्थं नरः कामाज्जलं पिबेत् प्रायश्चित्तं कथं तत्र वर्णे वर्णे विनिर्दिशेत् चरेत्सांतपनं विप्रः प्राजापत्यं च भूमिपः तदर्धं च चरेद्वैश्यः शूद्रे
पादं विनिर्दिशेदिति इदं च कामकारविषयम् अकामतस्तु चांडालकूपभांडस्थमज्ञानादुदकं पिबेत् स तु त्र्यहेण शुद्ध्येत शूद्रस्त्वेकेन
शुध्यतीति देवलोक्तं द्रष्टव्यम् चांडालादिसंबद्धाल्पजलाशयेष्वपि कूपवच्छुद्धिः शिलाशयेषथाल्पेषु स्थावरेषु महीतले कूपवत्क
थिता शुद्धिर्महत्सु तु न दूषणमिति विष्णुस्मरणात् पुष्करिण्यादिषु पुनः म्लेच्छादीनां जलं पीत्वा पुष्करिण्यां ह्रदे पि वा जानुदघ्नं शुचि
ज्ञेयमधस्तादशुचि स्मृतम् तत्तोयं यः पिबेद्विप्रः कामतोऽकामतोऽपि वा अकामान्नक्तभुंजी स्यादहोरात्रं तु कामतः इत्यापस्तंबोक्तं द्रष्टव्य
म् रजकादिभांडस्थतोयेषु भांडस्थमंत्यजानां तु जलं दधि पयः पिबेत् ब्राह्मणः क्षत्रियो वैश्यः शूद्रश्चैव प्रमादतः ब्रह्मकूर्चोपवासेन तु
द्विजातीनां तु निष्कृतिः शूद्रस्य चोपवासेन तथा दानेन शक्तित इति पराशरोक्तं द्रष्टव्यम् कामतस्तु द्विगुणम् अंत्यजैः खानिताः कूपास्त
डागं वाप्य एव वा एषु स्नात्वा च पीत्वा च प्राजापत्येन शुध्यतीति आपस्तंबोक्तमभ्यासविषयं वेदितव्यम् यत्त्वापस्तंबेन चांडालादिकू
पादिजलपाने पंचगव्यमात्रमुक्तम् प्रपास्वरण्ये घटके च शैले द्रोण्यां जलं कोशविनिर्गतं च श्वपाकचांडालपरिग्रहेषु पीत्वा जलं पंच-
गव्येन शुध्येदिति तदशक्तविषयम् प्रपांगतो विना तोयं शरीरं यो निषिंचति एकाहं क्षपणं कृत्वा सचेलं स्नानमाचरेत् सुराघटप्रपा
तोये पीत्वा नाद्यं जलं तथा अहोरात्रोषितो भूत्वा पंचगव्यं जलं पिबेत् अथ भावदुष्टभक्षणे प्रायश्चित्तम् भावदुष्टं च यद्घृणित आकार 

तो वाति सदृशतया जुगुप्सितशारीरमलादिवासनां जनयति तदुच्यते अरिप्रयुक्तगरलादिशंका च तत्र पराशरः वाग्दुष्टं भावदुष्टं च
भाजने भावदूषितम् भुक्त्वान्नं ब्राह्मणः पश्चात्त्रिरात्रेण विशुध्यतीति एतत्कामकारविषयम् शंकायां तु शंकास्थाने समुत्पन्ने अभो
ज्याभक्ष्यसंज्ञिते आहारशुद्धिं वक्ष्यामि तन्मे निगदतः शृणु अक्षारलवणां रूक्षां पिबेद्ब्राह्मीं सुवर्चलाम् त्रिरात्रं शंखपुष्पीं वा ब्राह्मणः
पयसा सह पलाशबिल्वपत्राणि कुशान्पद्ममुदुंबरम् अपः पिबेत्क्वाथयित्वा त्रिरात्रेण विशुध्यतीति वसिष्ठोक्तं द्रष्टव्यम् मनुनाप्यभो
ज्यभोजनशंकायामुक्तम् संवत्सरस्यैकमपि चरेत्कृच्छ्रं द्विजोत्तमः अज्ञातभुक्तशुद्ध्यर्थं ज्ञातस्य च विशेषत इति कालदुष्टभक्षण
प्रायश्चित्तम् कालदुष्टं च पर्युषितानिर्दशगोक्षीरादि तत्र चाकामतः शेषेषूपवसेदहरिति मनूक्तं वेदितव्यम् कामतस्तु केवलानि च शु
क्तानि तथा पर्युषितं च यत् ऋचीषपक्वं भुक्त्वा तु त्रिरात्रं तु व्रती भवेदिति शंखोक्तं वेदितव्यम् केवलान्यस्नेहाक्तानि अनिर्दशगोक्षीरा
दिषु प्रायश्चित्तं प्रदर्शितम् नवोदकपाने तु पंचगव्यप्राशनम् शृंगास्थिदंतजैः पात्रैः शंखशुक्तिकपर्दिकैः पीत्वा नवोदकं चैव पंचगव्ये
न शुध्यतीति वृद्धयाज्ञवल्क्यस्मरणात् कामतस्तूपवासः कर्तव्यः कालेन वोदकं शुद्धं न पिबेच्च त्र्यहं हितम् अकाले तु दशाहं स्या
त्पीत्वा नाद्यादहर्निशमिति स्मृत्यंतरदर्शनात् ग्रहकालभोजने तु चांद्रायणम् नवश्राद्धे ग्रामयाजकान्ने सग्रहभोजनम् नारीणां प्र
थमे गर्भे भुक्त्वा चांद्रायणं चरेदिति शातातपस्मरणात् यदा तु सग्रहादन्यत्र निषिद्धकाले भुंक्ते यथाह मार्कंडेयः चंद्रस्य यदि वा भा
नोर्यस्मिन्नहनि भार्गव ग्रहणं तु भवेत्तस्मिन्न पूर्वं भोजनक्रियाम् नाचरेत्सग्रहे चैव तथैवास्तमुपागते यावत्स्यान्नोदयस्तस्य ना

श्नीयात्तावद्व्रतु तथा ग्रहणंतुभवेदिंदोः प्रथमादधियामतः भुंजीतावर्त्तनात्पूर्वं प्रथमेप्रथमादधः तथा अपराण्हेनमध्यान्हेसा-
यान्हेनतुसंगवे भुंजीतसंगवेचेत्स्यान्नपूर्वभोजनक्रियेति यच्चमनुनोक्तम् नाश्नीयात्संधिवेलायांनातिप्रगेनातिसायमित्येवमा-
दि यच्चवृहच्छातातपेनोक्तम् धानादधिचसक्तूंश्चश्रीकामोवर्जयेन्निशि भोजनंतिलसंबद्धंस्नानंचैवविचक्षणइति एवमादिष्व-
नादिष्टप्रायश्चित्तेषुप्राणायामशतंकार्यंसर्वपापापनुत्तये उपपातकजातानामनादिष्टस्यचैवहीतियोगीश्वरोक्तंद्रष्टव्यम् अकाम
तस्तुशेषेषूपवसेदहरितिमनूक्तोपवासोद्रष्टव्यः अथगुणदुष्टशुक्तादिभक्षणेप्रायश्चित्तम् तत्रचमनुः शुक्तानिचकषायांश्चपी-
त्वामेध्यान्यपिद्विजः तावद्भवत्यप्रयतोयावत्तन्नव्रजत्यधइति अत्राकामतःशेषेषूपवसेदहरित्युपवासोद्रष्टव्यः कामतस्तु केवलानि
चशुक्तानितथापर्युषितंचयत् ऋचीसंपक्वभुक्त्वाचत्रिरात्रंतुव्रतीभवेदितिशंखस्मरणात् एतच्चामलकादिफलयुक्तकांजिकादिव्य
तिरेकेणद्रष्टव्यम् कुंडिकासफलायेषुगृहेषुस्थापिताभवेत् तस्यास्तुकंजिकायात्वानेतरस्याःकदाचनेतिस्मरणात् उत्धृतस्नेहादि
षुतु उत्धृत्यस्नेहविलयनपिण्याकमथितप्रभृतीनांचात्रवीर्याणिनाश्नीयादित्युक्त्वाप्राक्पंचनखेभ्यश्छर्दनं घृतप्राशनंचेतिगौतमो
क्तंद्रष्टव्यम् विलयनंघृतमलम् अहुताद्यन्नभोजनेतुलिखितआह यस्यचाग्नौनक्षिपतेयस्यचान्नंनदीयते नतद्भोज्यंद्विजाती
नांभुक्त्वाचोपवसेदहः वृथाकृसरसंयावपायसापूपशष्कुलीः आहिताग्निर्द्विजोभुक्त्वाप्राजापत्यंसमाचरेदिति अनाहिताग्नेस्तुशे १२९
षेषूपवसेदहरित्युपवासोद्रष्टव्यः भिन्नभाजनादिषुभोजनेसंवर्त्तेनोक्तम् शूद्राणांभाजनेभुक्त्वाभुक्त्वावाभिन्नभाजने अहोरा

त्रोषितोभूत्वापंचगव्येनशुद्ध्यतीति तथास्मृत्यंतरेप्युक्तम् वटार्काश्वत्थपत्रेषुकुंभीतिंदुकपत्रयोः कोविदारकदंबेषुभुक्त्वाचांद्राय
णंचरेदिति तथा पलाशपद्मपत्रेषुगृहीभुक्त्वैंदवंचरेत् वानप्रस्थोयतिश्चैवलभतेचांद्रिकंफलमिति अथहस्तदानादिक्रियादु-
ष्टाभोज्यभक्षणेप्रायश्चित्तम् तत्रपराशरः माक्षिकंफाणितंशाकंगोरसंलवणंघृतम् हस्तदत्तानिभुक्त्वातुदिनमेकमभोजनमिति
कामतस्तु हस्तदत्तभोजनेअब्राह्मणसमीपेभोजनेदुष्टपंक्तिभोजनेपंक्त्यग्रतोभोजनेऽभ्यक्तमूत्रपुरीषकरणेमृतसूतकशूद्रान्नभोज
नेशूद्रैःसहस्वप्नेत्रिरात्रमभोजनमितिहारीतोक्तंविज्ञेयम् पर्यायान्नदानदुष्टेतु ब्राह्मणान्नंददच्छूद्रःशूद्रान्नंब्राह्मणोददत् द्वय
मेतदभोज्यंस्याद्भुक्त्वातूपवसेदहरितिवृद्धयाज्ञवल्क्योक्तमवगंतव्यम् शूद्रहस्तभोजनेतु शूद्रहस्तेनयोभुंक्तेपानीयंवापिबेत्क्वचि
त् अहोरात्रोषितोभूत्वापंचगव्येनशुद्ध्यतीतिमनूक्तंविज्ञेयम् धमनदुष्टेपि आसनारूढपादोवावस्त्रार्धप्रावृतोपिवा मुखेन
धमितंभुक्त्वाकृच्छ्रंसांतपनंचरेदितितेनैवोक्तम् त्रिरात्राद्युद्देशेनत्यक्तान्नभोजनेतु भुंक्तेचेत्सार्वणश्राद्धेप्राणायामान्षडाचरे
त् उपवासस्त्रिमासादिवत्सरांतप्रकीर्त्तितः प्राणायामत्रयंकृच्छ्रावहोरात्रंसपिंडने असरूपेस्मृतंनक्तंव्रतपारणकेतथा द्विगुण
क्षत्रियस्यैनस्त्रिगुणंवैश्यभोजने साक्षाच्चतुर्गुणंत्वेतत्स्मृतंशूद्रस्यभोजने अतिथौतिष्ठतिद्वारित्वापःप्राश्नंतियेद्विजाः रुधिरंतद्भवेद्वारिभुक्त्वा
चांद्रायणंचरेदितिभारद्वाजोक्तमवगंतव्यम् हारीतेनाप्युक्तम् एकादशाहेतुत्र्यहंभुक्त्वासंचयनेतथा उपोष्यविधिवत्स्नात्वाकूश्मांडैर्जुहु
याद्घृतमिति विष्णुनाप्युक्तम् प्राजापत्यंनवश्राद्धेपादोनंचाद्यमासिके त्रैपक्षिकेतदर्द्धंतु पंचगव्यंद्विमासिकेइतिचापद्विषयम् अत्रा

पदितु चांद्रायणंनवश्राद्धे प्राजापत्यंतुमिश्रके एकाहस्तुपुराणेषु प्राजापत्यंविधीयते इति हारीतोक्तं द्रष्टव्यम् प्राजापत्यंतुमिश्रकेइत्ये
तदाद्यमासिकविषयं द्रष्टव्यम् द्वितीयादिषुतु प्राजापत्यंनवश्राद्धे पादोनंचाद्यमासिके त्रैपक्षिकेतदर्धंतुपाक्षे द्वैमासिकेतथा पादो
नकृच्छ्रंनिर्दिष्टंषण्मासेचतथाब्दिके त्रिरात्रंचान्यमासेषुप्रत्यहंचेदहःस्मृतमितिषट्त्रिंशन्मतोक्तं द्रष्टव्यम् क्षत्रियादिश्राद्धभोजने
त्वनापदितत्रैवविशेषउक्तः चान्द्रायणंनवश्राद्धे पराकोमासिकेस्मृतः त्रैपक्षिकेसांतपनंकृच्छ्रोमासद्वयेस्मृतः क्षत्रियस्यनवश्रा
द्धेव्रतमेतदुदाहृतम् वैश्यस्यार्द्धाधिकंप्रोक्तंक्षत्रियात्तुमनीषिभिः शूद्रस्यतुनवश्राद्धेचरेच्चांद्रायणद्वयम् सार्द्धचांद्रायणंमासेत्रिप
क्षेत्वेदवव्रतम् मासद्वयेपराकःस्यादूर्ध्वंसांतपनंस्मृतम् यत्तुशंखवचनम् चांद्रायणंनवश्राद्धे पराकोमासिकेस्मृतः पक्षत्रयेति
कृच्छ्रःस्यात्षण्मासेकृच्छ्रएवतु आब्दिकेपादकृच्छ्रःस्यादेकाहःपुनराब्दिके अतऊर्ध्वंनदोषःस्याच्छंखस्यवचनंयथेति तत्सर्पा
दिहतविषयम् यत्तेनपतितक्लीबाइत्याद्यपांक्तेयविषयम् चांडालादुदकात्सर्पाद्ब्राह्मणाद्वैद्युतादपि दंष्ट्रिभ्यश्चपशुभ्यश्चमरण-
पापकर्मणाम् पतनानाशकेश्चैवविषोद्बंधनकेतथा भुक्त्वैषांषोडशश्राद्धेकुर्यादिंदुव्रतंद्विजइति तथा अपांक्तेयान्नमुद्दिश्यश्रा
द्धमेकादशेहनि ब्राह्मणस्तत्रभुक्त्वान्नंशिशुचांद्रायणंचरेदिति आमश्राद्धेतथाभुक्त्वातप्तकृच्छ्रेणशुध्यति संकल्पितेतथाभुक्त्वा
त्रिरात्रंक्षपणंभवेदितिभरद्वाजेनगुरुप्रायश्चित्ताभिधानात् ब्रह्मचारिषु वृद्धधर्मोविशेषमाह मासिकादिषुयोश्नीयादासमाप्तव्र-
तोद्विजः त्रिरात्रमुपवासोवैप्रायश्चित्तंविधीयते प्राणायामत्रयंकृत्वा घृतंप्राश्यविशुध्यतीति इदमज्ञानविषयम् कामतोपिसएव

---

वाह मधुमांसंचयोश्नीयाच्छ्राद्धंसूतकमेववा प्राजापत्यंचरेत्कृच्छ्रंव्रतशेषंसमापयेदिति आमश्राद्धेतुसर्वत्रार्द्धम् आमश्राद्धेत-
दर्द्धंतुप्राजापत्यंतुसर्वदेतिषट्त्रिंशन्मतेविधानात् यत्तूशनसोक्तम् दशकृत्वःपिबेच्चापोगायत्र्याश्राद्धभुग्द्विजः ततःसंध्यामु-
पासीतशुध्येत्तुतदनंतरमिति तदनुक्तप्रायश्चित्तश्राद्धविषयम् संस्कारांगभूतश्राद्धभोजनेतुव्यासेनविशेषउक्तः निवृत्तेचूडा
होमेतुप्राङ्नामकरणात्तथा चरेत्सांतपनंभुक्त्वाजातकर्मणिचैवहि अतोन्येषुतुभुक्त्वान्नंसंस्कारेषुद्विजोत्तमः नियोगादुपवासेन
शुध्यतेनिंद्यभोजनइति सीमंतोन्नयनादिषुपुनर्धौम्योविशेषमाह ब्रह्मौदनेचसोमेचसीमंतोन्नयनेतथा जातश्राद्धेनवश्राद्धेद्वि
जश्चांद्रायणंचरेदिति अत्रब्रह्मौदनाख्यंकर्मयज्ञांगभूतंसोमसाहचर्यात् अथपरिग्रहाभोज्यभोजनेप्रायश्चित्तम् यत्स्वरू
पतोऽनिषिद्धमपिविशिष्टपुरुषस्वामिकतयाऽभोज्यंभण्यतेतत्परिग्रहाशुचि तत्रयोगीश्वरेण अदत्तान्यग्निहीनस्यनान्नमद्या
दनापदीत्यारभ्यसार्द्धपंचभिःश्लोकैरभोज्यान्नाःप्रतिपादिताः मनुनापितएवकिंचिदधिकाःप्रतिपादिताः नाश्रोत्रियततेयज्ञेग्राम
याजिहुतेतथा स्त्रियाक्लीबेनचहुतेभुंजीतब्राह्मणःक्वचित् मत्तक्रुद्धातुराणांतुनभुंजीतकदाचन गणान्नंगणिकान्नंचविदुषांच-
जुगुप्सितम् स्तेनगायनयोश्चान्नंतक्ष्णोवार्धुषिकस्यच दीक्षितस्यकदर्यस्यबद्धस्यनिगडस्यच अभिशस्तस्यषंढस्यपुंश्चल्या
दांभिकस्यच चिकित्सकस्यमृगयोःक्रूरस्योच्छिष्टभोजिनः उग्रान्नंसूतिकान्नंचपर्यायान्नमनिर्दशम् अनर्चितंवृथामांसम
वीरायाश्चयोषितः द्विषदन्नंकदर्यान्नंपतितान्नमवक्षुतम् पिशुनानृतिनोश्चैवक्रतुविक्रयकस्यच शैलूषतंतुवायान्नंकृतघ्न

स्यान्नमेवच कर्मारस्यनिषादस्यरंगावतरणस्यच सुवर्णकर्तुर्वेनस्यशस्त्रविक्रयिणस्तथा श्ववतांशौण्डिकानांचचैलनिर्णेजकस्य
च रजकस्यनृशंसस्ययस्यचोपपतिर्गृहे मृष्यतियेचोपपतिंस्त्रीजितानांचसर्वशः अनिर्दशंच प्रेतान्नमतुष्टिकरमेवचेति अत्रच
पदार्थाअभक्ष्यकाण्डेश्राद्धकाण्डेचव्याख्याताः अत्रप्रायश्चित्तमाह भुक्त्वातोन्यतमस्यान्नममत्याक्षपणंत्र्यहम् मत्याभुक्त्वाच
रेत्कृच्छ्रंरेतोविण्मूत्रमेवचेतिपैठीनसिनाप्यकामतस्त्रिरात्रमेवोक्तम् कुनखीश्यावदंतःपित्राविवदमानःस्त्रीजितःकुष्ठीपिशुनःसो
मविक्रयीवाणिजकोग्रामयाजकोभिशस्तोवृषल्यामभिजातःपरिवित्तिःपरिविंदानोदिधिषूपतिःपुनर्भूपुत्रश्चौरःकाण्डपृष्ठसेवक-
श्चेत्यभोज्यान्नाअपांक्तेयाअश्राद्धार्हाः एषांभुक्त्वादत्वावाविज्ञानात्त्रिरात्रमिति शंखेनत्वेतानेवकिंचिदधिकान्पठित्वाचांद्रायणमु
क्तम् तदभ्यासविषयम् गौतमेनपुनरुच्छिष्टपुंश्चल्यभिशस्तेत्यादिनाअभोज्यान्पठित्वाप्राक्पंचनखेभ्यश्छर्दनंघृतप्राशनंचेति
प्रायश्चित्तमुक्तंतदापद्विषयम् यस्तुबलात्कारेणभुज्यतेतस्यापस्तंबेनविशेषउक्तः बलाद्दासीकृतायेतुम्लेच्छचांडालदस्युभिः अ
शुभंकारिताःकर्मगवादिप्राणिहिंसनम् उच्छिष्टमार्जनंचैवतथोच्छिष्टस्यभोजनम् खरोष्ट्रविड्वराहाणामामिषस्यचभक्षणम् तत्स्त्री
णांचतथासंगस्ताभिश्चसहभोजनम् मासोषितेद्विजातौतुप्राजापत्यंविशोधनम् चांद्रायणंत्वाहिताग्नेःपराकस्त्वथवाभवेत् चां
द्रायणंपराकंचचरेत्संवत्सरोषितः संवत्सरोषितोशूद्रोमासार्द्धंयावकंपिबेत् मासमात्रोषितःशूद्रःकृच्छ्रपादेनशुध्यति ऊर्ध्वंसंव १३१
त्सरात्कल्प्यंप्रायश्चित्तंद्विजोत्तमैः संवत्सरैस्त्रिभिश्चैवतद्भावंसनियच्छतीति आशौचपरिग्रहान्नभोजनेच्छागलआह

अज्ञानाद्भोजनेविप्राःसूतकेमृतकेपिवा प्राणायामशतंकृत्वाशुध्यंतेशूद्रसूतके वैश्येषष्टिर्भवेद्राज्ञिविंशतिर्ब्राह्मणेदश एका
हंचत्र्यहंपंचसप्तरात्रमभोजनम् तथाशुद्धिर्भवत्येषांपंचगव्यंपिबेत्ततः इतिब्राह्मणादिक्रमेणैकाहत्र्यहादयोयोज्याः इदमका-
मविषयम् कामतस्तुमार्कंडेयआह भुक्त्वातुब्राह्मणाशौचेचरेत्सांतपनंद्विजः भुक्त्वातुक्षत्रियाशौचेनयाकृच्छ्रोविधीयते वैश्या
शौचेतथाभुक्त्वामहासांतपनंचरेत् शूद्रस्यैवतथाभुक्त्वाद्विजश्चांद्रायणंचरेदिति यच्चशंखेनोक्तम् शूद्रस्यसूतकेभुक्त्वाष-
ण्मासव्रतमाचरेत् वैश्यस्यतुतथाभुक्त्वात्रिमासान्व्रतमाचरेत् क्षत्रियस्यतथाभुक्त्वाद्वौमासौव्रतमाचरेत् ब्राह्मणस्यतथाशौ
चेभुक्त्वामासव्रतंचरेदिति इदमभ्यासविषयम् एतच्चप्रायश्चित्तमाशौचादनंतरंवेदितव्यम् ब्राह्मणादीनामाशौचेयःसकृदेवा
न्नमश्नातितस्यतावदाशौचम् आशौचव्यपगमेप्रायश्चित्तंकुर्यादितिविष्णुस्मरणात् अपुत्राद्यन्नभोजनेतुलिखितआह भु
क्त्वावार्द्धुषिकस्यान्नमव्रतस्यासुतस्यच शूद्रस्यचतथाभुक्त्वात्रिरात्रंस्यादभोजनम् तथा परपाकनिवृत्तस्यपरपाकरतस्यच
अपचस्यतुभुक्त्वान्नंद्विजश्चांद्रायणंचरेत् एतच्चाभ्यासविषयम् परपाकनिवृत्तादेर्लक्षणंतेनैवोक्तम् गृहीत्वाग्निंसमारो-
प्यपंचयज्ञान्ननिर्वपेत् परपाकनिवृत्तोसौमुनिभिःपरिकीर्त्तितः पंचयज्ञान्स्वयंकृत्वापरान्नादुपजीवति सततंप्रातरुत्थाय-
परपाकरतस्तुसः गृहस्थधर्मवृत्तोयोददातिपरिवर्जितः ऋषिभिर्धर्मतत्वज्ञैरपचःसंप्रकीर्त्तितइति यत्तुब्रह्मचार्याद्यन्नभोजने
वृद्धयाज्ञवल्क्यआह यतिश्चब्रह्मचारीचपक्वान्नस्वामिनावुभौ तयोरन्नंनभोक्तव्यंभुक्त्वाचांद्रायणंचरेदिति यत्तुपार्वणश्रा

ह्वाद्यकर्त्तुरन्नभोजने भरद्वाजआह पक्षेवायदिवामासेयस्यनाश्नंतिदेवताः भुक्त्वादुरात्मनस्तस्यद्विजश्चांद्रायणंचरेदिति तदु
भयमप्यभ्यासविषयम् पूर्वपरिगणितातिरिक्तायेनिषिद्धाचरणशीलास्तदन्नभोजनेतु निराचारस्यविप्रस्यनिषिद्धाचरणस्य
च अन्नंभुक्त्वाद्विजःकुर्याद्दिनमेकमभोजनमितिषट्त्रिंशन्मतोक्तंद्रष्टव्यम् अत्रैवसंवत्सराभ्यासेषट्त्रिंशन्मतएवोक्तम् उ
पपातकयुक्तस्यअब्दमेकंनिरंतरम् अन्नंभुक्त्वाद्विजःकुर्यात्पराकंतुविशोधनमिति इदंतुभक्ष्याभक्ष्यप्रायश्चित्तकांडगतविशे
षोदितव्रतकदंबकंद्विजाग्र्यस्यैव क्षत्रियादीनांतुपादपादह्रान्याभवति विप्रेतुसकलंदेयंपादोनंक्षत्रियेस्मृतम् वैश्येर्द्धंपाद
एकस्तुशूद्रजातिषुशस्यतेइतिविष्णुस्मरणात् इत्यभक्ष्यभक्षणप्रायश्चित्तप्रकरणम् निमित्तपरिगणनवेलायामुपपातका-
नंतरंजातिभ्रंशकरादीनिपरिगणितानि तत्रप्रायश्चित्तान्युच्यंते तत्रमनुः जातिभ्रंशकरंकर्मकृत्वान्यतममिच्छया चरेत्सांतप-
नंकृच्छ्रंप्राजापत्यमनिच्छया संकरापात्रकृत्यासुमासःशोधनमैंदवः मलिनीकरणीयेषुतप्तःस्याद्यावकस्त्र्यहमिति अन्यत
ममितिसर्वत्रसंबध्यते यमेनाप्यत्रविशेषउक्तः संकरीकरणंकृत्वामासमश्नीतयावकम् कृच्छ्रातिकृच्छ्रमथवाप्रायश्चित्तंसमा
चरेत् अपात्रीकरणंकृत्वातप्तकृच्छ्रेणशुध्यति सांतकृच्छ्रेणचाशुद्धिर्महासांतपनेनवा मलिनीकरणीयेषुतप्तकृच्छ्रंविशोधनमि
ति बृहस्पतिनापिजातिभ्रंशकरेविशेषउक्तः ब्राह्मणस्यरुजंकृत्वारासभादिप्रमापणम् निंदितेभ्योधनादानंकृच्छ्रार्द्धंव्रतमाचरे १३२
दिति एतेषांजातिभ्रंशकरादिप्रायश्चित्तानांमन्वाद्युक्तानांजातिशक्त्याद्यपेक्षयाविषयोविभजनीयः एवंयोगीश्वरेणह्रतमप्र

ख्यादिप्रायश्चित्तंसंक्षेपतोदर्शितम् २९० अधुनाप्रकृतमनुसरामः महापातकमतिपातकमनुपातकमुपपातकंप्रकीर्णकमितिपंचवि
धंपापजातमुक्तम् तत्रचतुर्विधप्रायश्चित्तमभिधायक्रमप्राप्तंप्रकीर्णकप्रायश्चित्तमाह खरयुक्तंयानंखरयानम् उष्ट्रयुक्तंयानमुष्ट्र
यानम् रथगंत्र्यादि तेनाध्वगमनंकृत्वादिगंबरःस्नात्वाभ्यवहृत्यवावासरेचनिजांगनासंभोगंकृत्वाचतडागतरंगिण्यादाववगाह्यकृत

प्राणायामीजलेस्नात्वाखरयानोष्ट्रयानयः नग्नःस्नात्वाचभुक्त्वाचगत्वाचैवदिवास्त्रियम् २९१
गुरुंहुंकृत्यत्वंकृत्यविप्रंनिर्जित्यवादतः बध्वावावाससाक्षिप्रंप्रसाद्योपवसेद्दिनम् २९२

प्राणायामःशुध्यति इदंचकामकारविषयम् उष्ट्रयानंसमारुह्यखरयानंतुकामतः सवासाजलमाप्लुत्यप्राणायामेनशुध्यतीति
मनुस्मरणात् अकामतःस्नानमात्रंकल्प्यम् साक्षात्खरारोहणेतुद्विगुणावृत्तिःकल्पनीया तस्यगुरुत्वात् २९१ किंच गुरुंज
नकादिकंत्वंकृत्यत्वमेवमात्थत्वयैवकृतमित्येकवचनान्तयुष्मच्छब्दोच्चारणेननिर्भर्त्स्यविप्रंवाज्यायांसंसमंकनीयांसंवासक्रोध

हुंतूष्णीमास्स्वहुंमाबहुवादीरित्येवमाक्षिप्य जल्पवितंडाभ्यांजयफलाभ्यांविप्रंनिर्जित्य कंठेवाससामृदुस्पर्शेनापिबध्वाक्षिप्रंपादप्रणि-पातादिनाप्रसाद्यक्रोधंत्याजयित्वादिनमुपवसेत् अनश्नन्कृत्स्नंवासरंनयेत् यत्तुयमेनोक्तम् वादेनब्राह्मणंजित्वाप्रायश्चित्तविधित्सया त्रिरात्रोपोषितःस्नात्वाप्रणिपत्यप्रसादयेदितितदभ्यासविषयम् २९२ किंचाह विप्रजिघांसयादंडोद्यमेकृच्छ्रःशुद्धिहेतुः निपातनेताडनेअतिकृच्छ्रः असृक्पातेरुधिरस्रवणेपुनःकृच्छ्रातिकृच्छ्रः अभ्यंतरशोणितेपिकृच्छ्रःशुद्धिहेतुः बृहस्पतिनाप्यत्र

विप्रेदंडोद्यमेकृच्छ्रस्त्वतिकृच्छ्रोनिपातने कृच्छ्रातिकृच्छ्रोसृक्पातेकृच्छ्रोभ्यंतरशोणिते २९३

विशेषउक्तः काष्ठादिनाताडयित्वात्वग्भेदेकृच्छ्रमाचरेत् अस्थिभेदेतिकृच्छ्रःस्यात्पराकस्त्वंगकर्त्तने पादप्रहारेयमआह पादेन ब्राह्मणंस्पृष्ट्वाप्रायश्चित्तविधित्सया दिवसोपोषितःस्नात्वाप्रणिपत्यप्रसादयेदिति मनुनोक्तान्यन्यानिप्रकीर्णकप्रायश्चित्तानि दर्शितानि विनाद्भिरप्सुवाप्यार्त्तशारीरंसंनिषेव्यतु सचेलोबहिराप्लुत्यगामालभ्यविशुद्ध्यतीति विनाद्भिरित्यसंनिहितास्वप्सु १३३

इत्यर्थः शारीरंमूत्रपुरीषादि इदमकामविषयम् कामतस्तु आपद्गतोविनातोयंशारीरंयोनिषेवते एकाहंक्षपणंकृत्वासचेलो जलमाविशेदितियमोक्तंवेदितव्यम् यत्तुसुमंतुवचनम् अप्स्वग्नौवामेहतस्तप्तकृच्छ्रमिति तदनार्त्तविषयमभ्यासविषयंवा नित्यश्रौतादिकर्मलोपेतुमनुराह वेदोदितानांनित्यानांकर्मणांसमतिक्रमे स्नातकव्रतलोपेचप्रायश्चित्तमभोजनमिति श्रौतेषुदर्शपूर्णमासादिषुकर्मसुस्मार्तेषुनित्यहोमादिषुप्रतिपदोक्तेष्वादिप्रायश्चित्तैरुपवासस्यसमुच्चयः स्नातकव्रतानि नजीर्णमलवद्वासाभवेच्चविभवेसतीत्येवमादीनिप्रागुक्तानि स्नातकव्रतमधिकृत्यक्रतुनाप्युक्तम् एतेषामाचाराणामेकैकस्यव्यतिक्रमणेगायत्र्यष्टशतंजपंकृत्वापूतोभवतीति पंचमहायज्ञाकरणेबृहस्पतिराह अनिर्वर्त्त्यमहायज्ञान्योभुंक्तेप्रत्यहंगृही अनातुरःसतिधनेकृच्छ्रार्द्धेनसशुध्यति आहिताग्निरुपस्थानंनकुर्याद्यस्तुपर्वणि ऋतौनगच्छेद्भार्यांवासोपिकृच्छ्रार्द्धमाचरेदिति द्वितीयादिभार्यापरमेतुदेवलआह मृतांद्वितीयांयोभार्यांदहेद्वैतानिकाग्निभिः जीवंत्यांप्रथमायांतुसुरापानसमंहितदिति स्वभार्याभिशंसनेतुयमआह स्वभार्यांतुयदाक्रोधादगम्येतिनरोवदेत् प्राजापत्यंचरेद्विप्रःक्षत्रियोदिवसान्नव षड्रात्रंतुचरेद्वैश्यस्त्रिरात्रंशूद्रआचरेदिति अस्नानभोजनादौहारीतआह वहन्कमंडलुंरिक्तमस्नातोश्नंश्चभोजनम् अहोरात्रेणशुद्धिःस्याद्दिनजाप्येनचैवहीति एकपंक्त्युपविष्टानांस्नेहादिनावैषम्येणदानादौयमआह नपंक्त्यांविषमंदद्यान्नयाचेतनदापयेत् प्राजापत्येनकृच्छ्रेणमुच्यतेकर्मणस्ततः नदीसंक्रमहंतुश्चकन्याविघ्नकरस्यच समेविषमकर्तुश्चनिष्कृतिर्नविधीयते

त्रयाणामपिचैतेषांप्राजापत्यंतुमार्गणम् भैक्ष्यलब्धेनचान्नेनद्विजश्चांद्रायणंचरेदिति संक्रमउदकावतरणमार्गः समेविषम
कर्त्तापूजादौ इंद्रधनुर्दर्शनादावृष्यशृंगआह इंद्रचापपलाशाग्निंयद्यन्यस्यप्रदर्शयेत् प्रायश्चित्तमहोरात्रंधनुर्दंडश्चदक्षि-
णा पतितादिसंभाषणेतुगौतमआह नम्लेच्छाशुद्रैर्धार्मिकैःसहसंभाषेतसंभाष्यपुण्यकृतोमनसाध्यायेत् ब्राह्मणेनसहवासंभा
षेत भार्यान्नधनलाभवधंपृथग्वर्षाणीति भार्यान्नधनानांलाभस्यवधेविघ्नकरणेप्रत्येकंसंवत्सरंप्राकृतंब्रह्मचर्यम् तथा ब्रह्मसूत्रवि
नाविण्मूत्रोत्सर्गादौस्मृत्यंतरेप्रायश्चित्तमुक्तम् विनायज्ञोपवीतेनयद्युच्छिष्टोभवेद्द्विजः प्रायश्चित्तमहोरात्रंगायत्र्यष्टशतंतुवा तत्रऊ
र्ध्वोच्छिष्टेउपवासः अधोच्छिष्टस्योदकपानादिषुगायत्रीजपइतिव्यवस्था अकामतस्तु पिबतोमेहतश्चैवभुंजतोऽनुपवीतिनः प्रा
णायामत्रिकंषट्कंनक्तंचत्रितयंक्रमादितिस्मृत्यंतरोक्तंद्रष्टव्यम् भुक्त्वाशौचाचमनमकृत्वोत्थानेतु यद्युत्तिष्ठत्यनाचांतोभुक्त्वेवा
नाशनात्ततः सद्यःस्नानंप्रकुर्वीतसोऽन्यथापतितोभवेदितिस्मृत्यंतरोक्तंद्रष्टव्यम् चौराद्युत्सर्गादौवसिष्ठआह दंड्योत्सर्गेराजैकरात्र
मुपवासेत्त्रिरात्रंपुरोहितःकृच्छ्रमदंड्यदंडनेपुरोहितस्त्रिरात्रंराजाकुनखीश्यावदंतश्चकृच्छ्रंद्वादशरात्रंचरित्वोद्धरेयातामितिदंतान्नखां
श्चदंतनखाच्छुद्ध्यारयतांचेत्यभिप्रेतम् स्तेनपतितादिपंक्तिभोजनेतुमार्कंडेयआह अपांक्तेयस्ययःकश्चित्पंक्तौभुंक्तेद्विजोत्तमः
अहोरात्रोषितोभूत्वापंचगव्येनशुध्यतीति नीलीविषयेत्वापस्तंबआह नीलीरक्तंयदावस्त्रंब्राह्मणोंऽगेषुधारयेत् अहोरात्रोषितो 
भूत्वापंचगव्येनशुध्यति रोमकूपैर्यदागच्छेद्रसोनील्यास्तुकस्यचित् त्रिषुवर्णेषुसामान्यतप्तकृच्छ्रंविशोधनम् पालनंविक्र-

यश्चैवतद्वृत्त्यातूपजीवनम् पातनंतुभवेद्विप्रेत्रिभिःकृच्छ्रैर्व्यपोहति नीलीदारुयदाभिंद्याद्ब्राह्मणस्यशरीरतः शोणितंदृश्यतेयत्र
द्विजश्चांद्रायणंचरेत् स्त्रीणांक्रीडार्थसंभोगेशयनीयेनदुष्यतीति भृगुणाप्युक्तम् स्त्रीधृताशयनेनीलीब्राह्मणस्यनदुष्यति नृप
स्यवृद्धौवैश्यस्यपर्ववर्जंविधारणमिति तथावस्त्रविशेषकृतश्चप्रतिप्रसवः कंबलेपट्टसूत्रेचनीलीरागोनदुष्यतीतिस्मरणात्
ब्राह्मणस्यपलाशतरुनिर्मितखट्वारोहणेशंखआह अध्यस्यशयनयानमासनंपादुकेतथा द्विजःपालाशवृक्षस्यत्रिरात्रंतुव्र
तीभवेत् क्षत्रियस्यरणेपृष्ठंदत्त्वाप्राणपरायणः संवत्सरंव्रतंकुर्याच्छित्वावृक्षंफलप्रदम् होमविघ्नेब्राह्मणाग्न्योर्वादपतीगोर्द्विजोत्त
मौ अंतरेणयदागच्छेत्कृच्छ्रंसांतपनंचरेत् होमकालेतथादोहेस्वाध्यायेदारसंग्रहे अंतरेणयदागच्छेद्द्विजश्चांद्रायणंचरेदि
ति दोहेसांनाय्यांगभूते एतच्चाभ्यासविषयम् सच्छिद्रादित्याद्यरिष्टदर्शनादौशंखआह दुःस्वप्नारिष्टदर्शनादौघृतंसुवर्णंचदद्या
दिति क्वचिद्देशविशेषगमनेपिदेवलआह सिंधुसौवीरसौराष्ट्रांस्तथाप्रत्यंतवासिनः अंगवंगकलिंगांध्रान्गत्वासंस्कारमर्हति
एतच्चतीर्थयात्राव्यतिरेकेणद्रष्टव्यम् यमेनाप्युक्तम् प्रत्यादित्यंनमेहेतनपश्येदात्मनःशकृत् दृष्ट्वासूर्यंनिरीक्षेतब्राह्मणगाम-
थापिवेति शंखोप्याह पादप्रतापनंकृत्वाकृत्वावह्निमधस्तथा कुशैःप्रमृज्यपादौतुदिनमेकंव्रतीभवेदिति क्षत्रियाद्युपसंग्रहणे
हारीतआह क्षत्रियाभिवादनेहोरात्रमुपवसेत् वैश्याभिवादनेद्विरात्रम् शूद्रस्याभिवादनेत्रिरात्रमुपवासइति तथाशय्यारू
ढपादुकोपानहारोपितपादोच्छिष्टांधकारस्थश्राद्धकृज्जपदेवपूजानिरताभिवादनेत्रिरात्रमुपवासःस्यादन्यत्रनिमंत्रितेनान्यत्र

भोजनेपिनिराशनमिति समित्पुष्पादिहस्तस्याभिवादनेप्येतदेव समित्पुष्पकुशाज्यांबुमृदुन्नाक्षतपाणिकम् जपहोमंचकुर्वाणंना
भिवादयेतवैद्विजमित्यापस्तंबोयेजपादिभिःसमभिव्याहारात् अभिवादकस्यापीदमेवप्रायश्चित्तम् नोदकुंभहस्तमभिवादयेन्न
नभैक्ष्यंचरन्नपुष्पाज्यादिहस्तेनाशुचिर्नजपन्नदेवपितृकार्यंकुर्वन्नशयानइतितस्यापिशंखेनप्रतिषेधात् अन्यान्यपिवचांसिस्मृत्यं
तरतोन्वेष्याणिग्रंथगौरवभयान्नलिख्यंते इतिप्रकीर्णकप्रायश्चित्तप्रकरणम् २९३ निमित्तानामानंत्यात्प्रतिव्यक्तिप्रायश्चि

देशंकालंवयःशक्तिंपापंचावेक्ष्ययत्नतः प्रायश्चित्तंप्रकल्प्यंस्याद्यत्रचोक्तानानिष्कृतिः २९४

त्तनिमित्तस्यवक्तुमशक्यत्वात्सामान्यतउपदिष्टानुपदिष्टविषयंप्रायश्चित्तविशेषज्ञापनार्थमाह यदुक्तंप्रायश्चित्तजातंवक्ष्यमाणंवातत्
देशादिकमवेक्ष्ययथाकर्तुःप्राणविपत्तिर्नभवतितथाविषयविशेषेकल्पनीयम् इतरथाप्रधानानिवृत्तिप्रसंगात् यथावक्ष्यति वायुभ
क्ष्योदिवातिष्ठन्रात्रिंनीत्वाप्सुसूर्यदृगिति तत्रयदिहिमवद्गिरिनिकटवर्तिनामुदकवासउपदिश्यतेअतिशीताकुलितेवाशिशिरादिका १३५
लेतदाप्राणवियोगोभवेदितिनदेशकालपरिहारेणोदवासःकल्पनीयः तथावयोविशेषादपियादिनवतिवार्षिकादेरपरिपूर्णद्वाद

शवार्षिकस्यवाद्वादशाब्दिकंप्रायश्चित्तमुपदिश्यतेतदाप्राणाविपद्येरन् ततोवयोविशेषादपिअन्यवयस्केतत्प्रायश्चित्तंकल्प्यं
अतएवस्मृत्यंतरे क्वचिदर्द्धंक्वचित्पादइतिवृद्धादिषुप्रायश्चित्तस्यन्हासोदर्शितः तच्चप्राक्प्रपंचितं तथाधनदानतपश्चरणादि
शक्त्यपेक्षयाचननिर्धनस्यपात्रेधनंवापर्याप्तमित्याद्युपपद्यते तथोद्दिष्टपात्रादेर्वापराकादिकंनापिस्त्रीशूद्रादेर्जपादिकंअतए
वगजादीनामशक्नुवन्दानंदातुंचरेत्कृच्छ्रमेकैकस्यविशुद्धयेइत्युक्तम् तथाप्रायश्चित्तार्द्धमर्हतिस्त्रियोरोगिणएवचेतितपस्य-
शक्तस्यस्मृत्यंतरेप्रायश्चित्तन्हासोदर्शितः पापंचमहापातकादिरूपेणसप्रत्ययाप्रत्ययसकृदभ्यासरूपेणवावेक्ष्ययत्नतःस
कलधर्मशास्त्रपर्यालोचनयाप्रायश्चित्तंकल्पनीयम् तत्राकामतोयद्विहितंतदेवकामकृतेद्विगुणकामतोभ्यासेचतुर्गुणमित्येवं
स्मृत्यंतरानुसारेणकल्पनीयम् तथा महापापोपपापाभ्यांयोभिशंसेन्मृषापरम् अब्भक्षोमासमासीतेत्युक्तम् तत्रमहापा-
पोपपापयोस्तुल्यप्रायश्चित्तस्यायुक्तत्वात्पापापेक्षयोपपातकेमासिकव्रतस्यन्हासःकल्पनीयः तत्रचहसितजृंभितास्फोटनानि
नाकस्मात्कुर्यात्तथानोदन्वतोंभसिस्नायान्नचश्मश्र्वादिकर्तयेत् अंतर्वत्न्याःपतिःकुर्वन्नप्रजाभवतिध्रुवमित्यादौप्रायश्चित्तं-
नोपदिष्टम् तत्रापिदेशाद्यपेक्षयाप्रायश्चित्तंकल्प्यम् ननुकिंचिदपिनिमित्तजातमनुक्तनिष्कृतिकमुपलभ्यते प्राणायामश
तंकार्यंसर्वपापापनुत्तये उपपातकजातानामनादिष्टस्यचैवहीत्यनुक्तनिष्कृतिष्वपिप्रायश्चित्तस्यवक्ष्यमाणत्वात् गौतमेनाप्ये
तान्येवानादेशेविकल्पेनक्रियेरन्नित्येकाह्वादयःप्रतिपादिताः उच्यते सत्यमस्त्येवसामान्यतःप्रायश्चित्तोपदेशस्तथापिसर्वदो

शक्यत्वादीनामपेक्षितत्वादस्येवकल्पनावसरः नचहसितादिषुसर्वत्रप्राणायामशतंयुक्तंनिमित्तस्यलघुत्वात् अतःपापापेक्षया
ह्रासःकल्पनीयः प्रायश्चित्तांतरंवा ननुकथंपापस्यलघुत्वंयेनप्रायश्चित्तस्यह्रासंस्यवाकल्पनास्यात् नचप्रायश्चित्ताल्पत्वा-
दितिवाच्यम् अनुक्तनिष्कृतित्वादेव सत्यं किंचिदर्थवादसंकीर्त्तनाद्बुद्धिपूर्वबुद्धिपूर्वानुबंधाद्यपेक्षयाचसुबोधएवदोषस्य-
गुरुलघुभावः तथादंड ह्रासवृद्ध्यपेक्षयाचप्रायश्चित्तगुरुलघुभावः यथाब्राह्मणावगोरणादौसजातिविषयेप्राजापत्या

दासीकुंभंबहिर्ग्रामान्निनयेरन्स्वबांधवाः पतितस्यबहिःकुर्युःसर्वकार्येषुचैवतम् २९५

दिकमुक्तम् तत्रयदानुलोम्येनप्रातिलोम्येनवावगोरणादिक्रियतेयदातदावामूर्द्धावसिक्तादिभिस्तदादंडस्यतारतम्यदर्शनाद्दोषा
ल्पत्वमहत्त्वावगमात्प्रायश्चित्तस्यापिगुरुलघुभावःकल्पनीयः दर्शितश्चदंडस्यगुरुलघुभावःप्रातिलोम्यापवादेषुद्विगुणस्त्रि
गुणोदमइत्यादिना २९४ एवंमहापातकादिभिःपतितस्यप्रायश्चित्तमुक्तम् यस्त्वौद्धत्यादेतन्नचिकीर्षतितस्यकिंकार्यमित्य १३६
तआह जीवतएवपतितस्ययेज्ञातयोबांधवाश्चमातृपक्षास्तेसर्वेसंनिपत्यदासीप्रेष्यतयासपिंडादिप्रेषितयाआनीतमपांपूर्ण-

कुंभंग्रामाद्बहिर्निनयेयुः एतच्चचतुर्थ्यादिरिक्तातिथिष्वन्हःपंचमेभागेगुर्वादिसंनिधौकार्यम् पतितस्योदकंकार्यंसपिंडैर्बांधवैःसह निंदि
तेहनिसायान्हेज्ञात्यृत्विग्गुरुसन्निधावितिमनुस्मरणात् अथवादास्येवसपिंडादिप्रयुक्तानिनयेत् यथाहमनुः दासीघटमपांपूर्णपर्यस्ये
त्प्रेतवद्यदा अहोरात्रमुपासीरन्नाशौचंब्राह्मणैःसहेति प्रेतवदितिदक्षिणाभिमुखापसव्ययोःप्राप्त्यर्थं एतच्चनिनयनंउदकपिंडदाना
दिप्रेतक्रियोत्तरकालंद्रष्टव्यम् तस्यविद्यायोनिगुरुसंबंधाश्चसन्निपात्यसर्वाण्युदकादीनिप्रेतकर्माणिकुर्युःपात्रंचास्यविपर्यस्येयुःदासः
कर्मकरोवावकरात् पात्रमानीयदासीघटात्पूरयित्वादक्षिणाभिमुखोयदाविपर्यस्येदिदं अमुकमनुदकंकरोमीतिनामग्राहंतंसर्वे
न्वालभेरन्प्राचीनावीतिनोमुक्तशिखाविद्यागुरवोयोनिसंबंधाश्चवीक्ष्येरन्नतोपउपस्पृश्यग्रामंप्रविशेयुरितिगौतमस्मरणात् अयंच
त्यागोयदाबंधुभिःप्रेर्यमाणोपिप्रायश्चित्तंनकरोतितदाद्रष्टव्यः तस्यगुरुबांधवान्राजसमक्षंदोषानभिख्याप्यानुभाष्यपुनःपुनरा
चारंलभस्वेतिसयद्येवमप्यनवस्थितमतिःस्यात्ततोस्यपात्रंविपर्यस्येदितिशंखस्मरणात् ततस्तलब्धोदकंपतितंसर्वकार्येषुसंभा
षणसहासनादिषुबहिःकुर्युर्वर्जयेयुः तथाचमनुः निवर्तेरंस्ततस्तस्मात्संभाषणसहासने दायाद्यस्यप्रदानंचयात्रामेवचलौ
किकीमिति यदिस्नेहादिनासंभाषणंकरोतितदाप्रायश्चित्तंकार्यम् अतऊर्ध्वंतेनसंभाष्यतिष्ठेदेकरात्रंजपन्सावित्रीमज्ञानपूर्वं
ज्ञानपूर्वंचेत्त्रिरात्रमिति २९५ यदातुबंधुत्यागादन्यथावाजातवैराग्यःप्रायश्चित्तंच कृतंतदाकिंकार्यमित्यतआह कृतप्रा-
यश्चित्तेबंधुसमीपंपुनरायातेतत्सपिंडादयस्तेनसहितानवंअनुपहतघटंउदकपूर्णंनिनयेयुः एतच्चनिनयनंपुण्यन्हदादिस्ना

नोत्तरं द्रष्टव्यम् प्रायश्चित्तेतुचरितेपूर्णंकुंभमपांनवम् तेनैवसार्द्धंप्रास्येयुःस्नात्वापुण्येजलाशयइतिमनुस्मरणात् गौतमेनतुवि शेषउक्तः यस्तुप्रायश्चित्तेनशुध्येततस्मिन्कुंभेशातकुंभमयपात्रंपुण्यतमान्ह्रदात्पूरयित्वास्रवंतीभ्योवाततएनमपउपस्पृश युरथास्मैतत्पात्रंदद्युस्तत्संप्रतिगृह्यजपेत् शांताद्यौःशांतापृथिवीशांतंशिवमंतरिक्षंयोरोचनस्तमिहगृण्हामीत्येतैर्यजुर्भिःपावमा नीभिस्तरत्समंदीभिः कूष्मांडैश्चाज्यंजुहुयाद्धिरण्यंदद्याद्गांचाचार्याय यस्यप्राणांतिकंप्रायश्चित्तंसमृतःशुध्येदेतदेवशांत्युदकं

चरितव्रतआयातेनिनयेरन्नवंघटम् जुगुप्सेरन्नवाप्येनंसंविशेयुश्चसर्वशः २९६ पति
तानामेषएवविधिःस्त्रीणांप्रकीर्त्तितः वासोगृहांतिकंदेयमन्नंवासःसरक्षणम् २९७

सर्वेषूपपातकेष्विति ततएनंकृतप्रायश्चित्तंतेनैवकुत्सयेयुः तथासर्वकार्येषुक्रयविक्रयादिषुतेनसहसंव्यवहरेयुः २९६ पूर्वोक्त स्यपतितपरित्यागादिविधेरतिदेशमाह एवंपुरुषाणांपरित्यागेपिंडोदकदानविधिःकृतप्रायश्चित्तानांपरिग्रहविधिःसएवपति- तानांस्त्रीणामपिवेदितव्यः इयांस्तुविशेषः पतिताभ्योपिस्त्रीभ्यःकृतोदकादिकर्मभ्योवासस्तृणपर्णमयकुटीगृहकंप्रधानगृहसमी- 

पेदेयम् तथाप्राणधारणमात्रमन्नंमलिनंचवस्त्रंपुनःपुरुषांतरोपभोगनिवारणसहितंदेयम् २९७ ननुकाःपतितास्तायासाम यपरित्यागविधिरित्यतआह हीनवर्णगमनंगर्भपातनमब्राह्मण्याअपिभर्त्तुःअब्राह्मणस्यापिहिंसनमित्येतानिस्त्रीणामसाधार णानिपतननिमित्तानि अपिशब्दात्पुरुषस्ययानिपतननिमित्तानिमहापातकातिपातकानुपपातकान्यभ्यस्तानिचोपपातकादीनि तान्यपिस्त्रीणांध्रुवंनिश्चितंपतनकारणानिभवंति अतएवशौनकः पुरुषस्ययानिपतननिमित्तानिस्त्रीणामपितान्येवब्राह्मणीहीन वर्णसेवायामधिकंपततीति यत्तुवसिष्ठेन त्रीणिस्त्रियाःपातकानिलोकेधर्मविदोविदुः भर्त्तुर्वधोभ्रूणहत्यास्वस्यगर्भस्यपातनमिति

नीचाभिगमनंगर्भपातनंभर्तृहिंसनम् विशेषपतनीयानिस्त्रीणामेतान्यपिध्रुवम् २९८

भ्रूणहत्याग्रहणंकृतंतत्दृष्टांतार्थंनपुनरितरेषांमहापातकादीनांपतनहेतुत्वनिरासार्थं यदपितेनचतस्त्रस्तुपरित्याज्याःशिष्यगा गुरुगाश्चया पतिघ्नीचविशेषेणजुंगितोपगताचयाइतिचतसृणामेवपरित्यागइत्युक्तम् तस्यापितासांप्रायश्चित्तमचिकीर्षंती नांमध्येचतसृणामेवशिष्यगादीनांचेलान्नगृहवासादिजीवनहेतुत्वाद्युच्छेदेनत्यागंकुर्यात् नान्यासामित्यभिप्रायः अतश्चा न्यासांपतितानांप्रायश्चित्तमकुर्वतीनामपिवासोगृहांतिकेदेयमित्यादिकंकर्त्तव्यमित्यवगम्यते २९८ ७ ७ ७

या·स्मृ·मि· १३८ जुगुप्सेरन्नचाप्येनंसंविशेयुश्चसर्वशइत्यस्यापवादमाह शरणागतादिव्यापादनकारिणः कृतघ्नसहितान्प्रायश्चित्तेनक्षीणदो प्रा·
षानपिनसंव्यवहरेदितिवाचनिकोयंप्रतिषेधःकिमिदंवचनंकुर्यान्नहिवचनस्यातिभारोस्ति अतश्चयद्यपिव्यभिचारिणास्त्रीवृ ३
धेपिइदमेवप्रायश्चित्तंतथापिवाचनिकोयंव्यवहारप्रतिषेधः २९९ एवंप्रसंगेनस्त्रीषुविशेषमभिधायप्रकृतएवचरितव्रतविधौ
विशेषमाह घटेपवर्जितेन्हदादुत्धृत्यपूर्णकुंभेचनिनीतेसोन्चरितव्रतः सपिंडादिमध्यस्थोगोभ्योयवसंदद्यात् ताभिःप्रथमंस

शरणागतबालस्त्रीहिंसकान्संविशेन्नतु चीर्णव्रतानपिसतः कृतघ्नसहितानिमान् २९९
घटेपवर्जितेज्ञातिमध्यस्थोयवसंगवाम् प्रदद्यात्प्रथमंगोभिःसत्कृतस्यहिसत्क्रिया ३००

त्कृतस्यपूजितस्यपश्चाज्ज्ञात्यादिभिःसत्क्रियाकार्या गोभिश्चतस्यसत्कारस्तद्दत्तयवसभक्षणमेव यदिगावस्तद्दत्तमन्नं
यवसंनगृण्हीयुस्तर्हिपुनःप्रायश्चित्तमुपतिष्ठेत् यथाहहारीतः स्वशिरसायवसमादायगोभ्योदद्याद्यदिताःप्रतिगृण्हीयुरथै १३८
नंप्रवर्त्तयेयुरितिइतरथानेत्यभिप्रेतम् ३०० ७ ७ ७ ७ ७ ७

महापातकादिपंचविधेपिदूषणे प्रातिस्विकव्रतसंदोहमभिधायाधुनासकलव्रतसाधारणंधर्ममाह यद्दोषोयावत्कर्तृसंपाद्यस्ततोन्येर्वि
ख्यातोदोषोयस्यासौपर्षदुपदिष्टंव्रतंकुर्यात् यद्यपिस्वयंसकलशास्त्रार्थविचारचतुरस्तथापिपर्षत्समीपमुपगम्यतयासहविचार्यतद-
नुमतमेवकुर्यात् तदुपगमनेचांगिरसाविशेषउक्तः कृतेनिःसंशयंपापेनभुंजीतानुपस्थितः भुंजानोवर्द्धयेत्पापंयावन्नाख्यातिपर्षदि स
चैलंवाग्यतःस्नात्वाक्लिन्नवासाःसमाहितः पर्षदानुमतस्तत्वसर्वंविख्यापयेन्नरः व्रतमादायभूयोपितथास्नात्वाव्रतंचरेदितिविख्यापनं

विख्यातदोषःकुर्वीतपर्षदोनुमतंव्रतम्

दक्षिणादानानंतरंकार्यम् तथाहपराशरः पापंविख्यापयेत्पापीदत्वाधेनुंतथावृषमिति एतच्चोपपातकविषयम् महापातकादि-
ष्वधिककल्प्यम् यदुक्तं तस्माद्द्विजःप्राप्तपापःसकृदाप्लुत्यवारिणि विख्यायपापंपर्षद्भ्यःकिंचिद्दत्वाव्रतंचरेदितितत्प्रकीर्णकविषयं
पर्षत्स्वरूपंचमनुनादर्शितम् त्रैविद्योहेतुकस्तर्कीनैरुक्तोधर्मपाठकः त्रयश्चाश्रमिणःपूर्वेपर्षदेषादशावरा हेतुकउभयमीमांसा
र्थतत्त्वज्ञः तर्कीन्यायशास्त्रकुशलः तथान्यदपिपर्षद्द्वयंतेनैवदर्शितम् ऋग्वेदविद्यजुर्वेदसाम वेदविदेवच त्र्यवरापर्ष-

द्विज्ञेयाधर्मसंशयनिर्णयइति तथा एकोपिधर्मविद्धर्मयंव्यवस्थेत्समाहितः सज्ञेयःपरमोधर्मोनाज्ञानादुदितोयुतैरिति आसांचप-
र्षदांसंभवापेक्षयाव्यवस्थामहापातकाद्यपेक्षयावा यत्तुस्मृत्यंतरेभिहितम् .पातकेषुशतंवर्षसहस्रंमहदादिषु उपपापेषुपंचाशत्स्वल्पं
स्वल्पेतथाभवेदिति तदपिमहापातकादिदोषानुसारेणपर्षदोगुरुलघुभावप्रतिपादनपरंनपुनःसंख्यानियमार्थं मन्वादिमहास्मृ-
तिविरोधप्रसंगात् तथादेवलेनचात्रविशेषोदर्शितः स्वयंतुब्राह्मणाब्रूयुरल्पदोषेषुनिष्कृतिम् राजाचब्राह्मणाश्चैवमहत्सुसुपरि
क्षितामिति तयाचपर्षदाअवश्यंव्रतमुपदेष्टव्यम् आर्त्तानांमार्गमाणानांप्रायश्चित्तानियेद्विजाः जानंतोनप्रयच्छंतितेयांतिसमतां-
तुतैरित्यंगिरःस्मरणात् तथाचतयापर्षदाज्ञात्वैवव्रतमुपदेष्टव्यम् अज्ञात्वाधर्मशास्त्राणिप्रायश्चित्तंददातियः प्रायश्चित्तीभवेत्पू
तःकिल्बिषंपर्षदंव्रजेदितिवसिष्ठस्मरणात् क्षत्रियादीनांतुकृतेनसाधर्मोपदेशेविशेषोंगिरसादर्शितः न्यायतोब्राह्मणःक्षिप्रंक्षत्रिया
देःकृतेनसः अंतराब्राह्मणंकृत्वाव्रतंसर्वंसमादिशेत् तथाशूद्रंसमासाद्यसदाधर्मपुरःसरम् प्रायश्चित्तंप्रदातव्यंमंत्रहोमविवर्जि
तमिति तत्रयागाद्यनुष्ठानशीलानांजपादिकंवाच्यम् इतरेषांतुतपः कर्मनिष्ठास्तपोनिष्ठाःकदाचित्पापमागताः जपहोमादिकंतेभ्यो
विशेषेणप्रदीयते येनाप्रधारकाविप्रामूर्खाधनविवर्जिताः कृच्छ्रचांद्रायणादीनितेभ्योदद्याद्विशेषतइति इतिप्रकाशप्रायश्चित्तप्र
करणम् अथरहस्यप्रायश्चित्तंव्याख्यायतद्दुरितशमिनींव्रतसंततिरहःकृताघसंदोहकारिणींव्याहरन्मुनिः तत्रप्रथमंसकल १३९
रहस्यव्रतसाधारणधर्ममाह कर्तृव्यतिरिक्तैरनभिख्यातोदोषोयस्यासौरहस्यमप्रकाशंप्रायश्चित्तमनुतिष्ठेत् अतःस्त्रीसंभोगा

दौतस्यापिकारकत्वात्तदितरैरविज्ञातदोषेरहस्यमितिमंतव्यम् अत्रयदिकर्त्तास्वयंधर्मशास्त्रकुशलस्तदापरस्मिन्नविभाव्यस्व
निमित्तोचितंप्रायश्चित्तमनुतिष्ठेत् यस्तुस्वयमनभिज्ञोसौकेनचिदंहोब्रह्महत्यादिकंकृतंतत्रकिंरहस्यप्रायश्चित्तमित्यन्यव्याजेना
वगम्यअंहोव्रतमनुतिष्ठेत् अतश्चस्त्रीशूद्रयोरप्यमुनैवमार्गेणरहस्यव्रतज्ञानसिद्धेरधिकारसिद्धिः नचवाच्यंरहस्यव्रतानांजपा
दिप्रधानत्वादविद्ययोश्चस्त्रीशूद्रयोस्तदनुपपत्तेरनधिकारइति यतोनैकांततोरहस्यव्रतानांजपादिप्रधानत्वंदानादेरप्युपदेशात्

अनभिख्यातदोषस्तुरहस्यंव्रतमाचरेत् ३०१

गौतमोक्तप्राणायामादिसंभवाच्च इतरेषामपिमंत्रदैवतर्षिच्छंदःपरिज्ञानमात्रमेवाधिकारोपयोगित्वन्यविषयम् नहितद्यागनि
र्माणादौज्योतिष्टोमादिविषयिणीविप्रतिपत्तिरुपयुज्यते देवतादिपरिज्ञानंत्ववश्यमपेक्षणीयम् अविदित्वाऋषिच्छंदोदैवतंयो
गमेवच योध्यापयेज्जपेद्वापिपापीयान्जायतेतुसइतिव्याससमरणात् अत्राप्याहारविशेषानुक्तौपयःप्रभृतयः कालविशेषानुक्तौ
संवत्सरादयः देशविशेषानुक्तौशिलोच्चयादयोगौतमाद्यभिहिताःप्रकाशप्रायश्चित्तेन्वेषणीयाः ३०१ ७ ७ ७

एवंसकलरहस्यसाधारणंधर्ममभिधायप्रकाशप्रायश्चित्तवद्ब्रह्महत्यादिक्रमेणैवरहस्यप्रायश्चित्तान्याह त्रिरात्रमुपोषितोंतर्जलेघ
मर्षणेनमहर्षिणादृष्टंसूक्तंअघमर्षणंऋतंचसत्यंचेतितृचामानुष्टुभंभाववृत्तदेवताकंजप्त्वात्रिरात्रांतेपयस्विनींगांदत्वाब्रह्महाविशु
ध्यति जपश्चांतर्जलेनिमग्नेनत्रिरावर्त्तनीयः यथाहसुमंतुः देवद्विजगुरुहंताप्सुनिमग्नोघमर्षणंसूक्तंत्रिरावर्त्तयेत् मातरंभगिनीं
गत्वामातृष्वसारंपितृष्वसारंस्नुषांसखींचान्यद्वागम्यागमनंकृत्वाघमर्षणमेवांतर्जलेत्रिरावर्त्त्यतदेतस्मात्पूतोभवतीति एतच्चकामका

त्रिरात्रोपोषितोजप्त्वाब्रह्महात्वघमर्षणम् अंतर्जलेविशुध्येतदत्वागांचपयस्विनीम् ३०२

रविषयम् यत्तुमनुनोक्तम् सव्याहृतिप्रणवकाःप्राणायामास्तुषोडश अपिभ्रूणहनंमासात्पुनंत्यहरहःकृताः तदप्यस्मिन्नेवविषये
गोदानाशक्तस्यवेदितव्यम् यत्तुगौतमेनषट्त्रिंशदहोरात्रव्रतमुक्त्वोक्तम् तदंतएवब्रह्महत्यासुरापानसुवर्णस्तेयगुरुतल्पेषुप्राणाया
मैःस्नातोघमर्षणंजपेदिति तदकामतोसकृद्विषयम् यत्तुबौधायनेनोक्तम् ग्रामात्प्राचींवोदीचींवादिशमुपनिष्क्रम्यस्नातःशुचिवासाःउ
दकांतेस्थंडिलमुपलिप्यसकृत्क्लिन्नवासाःसकृत्पूतेनपाणिनादित्याभिमुखोघमर्षणंस्वाध्यायमधीयीतप्रातःशतंमध्यान्हेशतमपरा





ण्हेशतमपरिमितंचोदितेषुनक्षत्रेषुप्रसृतियावकंप्राश्नीयात् ज्ञानतोज्ञानतःकृतेभ्यश्चोपपातकेभ्यःसप्तरात्रात्प्रमुच्यतेद्वादशरात्रान्महापात
केभ्योब्रह्महत्यासुरापानसुवर्णस्तेयानिवर्जयित्वाएकविंशतिरात्रेणतान्यपितरतीतितत्कामकारविषयम् अकामतःश्रोत्रियाचार्यसवनस्थव
धविषयंवा यत्तुमनुनोक्तम् अरण्येवात्रिरभ्यस्यप्रयतोवेदसंहिताम् मुच्यतेपातकैःसर्वैःपराकैःशोधितस्त्रिभिरिति तत्कामतःश्रोत्रिया
दिवधविषयमितरत्रकामतोभ्यासविषयंवा यत्तुबृहद्विष्णुनोक्तम् ब्रह्महत्यांकृत्वाग्रामात्प्राचीमुदीचींवादिशमुपनिष्क्रम्यप्रभूतेंधनेनाग्निं
प्रज्वाल्याघमर्षणेनाष्टसहस्रमाहुतीर्जुहुयात्ततएतस्मात्पूतोभवतीति तन्निर्गुणवधविषयमनुग्राहकविषयंवा यत्तुयमेनोक्तम् त्र्यहं-

लोमभ्यःस्वाहेत्यथवादिवसंमारुताशनः जलेस्थित्वाग्निंजुहुयाच्चत्वारिंशद्घृताहुतीः ३०३

नूपवसेद्युक्तस्त्रिरह्नोभ्युपयन्नपः मुच्यतेपातकैःसर्वैस्त्रिर्जपित्वाघमर्षणम् तद्गुणवतोहंतुर्निर्गुणवधविषयम् प्रयोजकानुमंतृविषयं
वा यत्तुहारीतेनोक्तं महापातकातिपातकानुपपातकानामेकतःसंपातेवाघमर्षणमेवत्रिर्जपेदिति तन्निमित्तकर्तृविषयं एवमन्यान्य-
पिस्मृतिवाक्यानिअन्विष्यविधिविषयेषुविभजनीयानिग्रंथगौरवभयान्नलिख्यंते एतदेवव्रतंजातयागस्ययोषित्क्षत्रविट्स्वात्रेय्या
माहिताग्निपत्न्यांगर्भिण्यामविज्ञातेचगर्भेव्यापादितेतुरीयांशन्यूनमनुष्ठेयम् ३०२ प्रायश्चित्तांतरमाह अथवाहोरात्रमुपोषितोरा-

चापुदवासं कृत्वा आतर्जलादुत्तीर्य लोमभ्यः स्वाहेत्याद्यैरष्टभिर्मंत्रैरेकैकेन पंचाहुतय इत्येवं चत्वारिंशतं घृताहुतीर्जुहुयात् इदं च पूर्वोक्त- 
समानविषयं उदवासस्य तपो बाहुल्यात् ३०३ क्रमप्राप्तसुरापानप्रायश्चित्तमाह सुरापश्चत्वारिंशद्घृताहुतीरित्यनुवर्तते सुरा 
पस्त्रिरात्रमुपोषितः कूष्मांडीभिः यद्देवा देवहेडनमित्याद्याभिः कूष्मांड दृष्टाभिरनुष्टुभ मंत्रलिंगदेवताभिर्ऋग्भिश्चत्वारिंशतं घृताहुती-
र्हुत्वा शुचिर्भवेत् बौधायनेनोक्तम् अथ कूश्मांड दृष्टाभिरनुष्टुभिर्जुहुयाद्यो पूत एवात्मानं मन्येत यदर्वाचीनमेनो भ्रूणहत्यायास्तस्मा

त्रिरात्रोपोषितो हुत्वा कूष्मांडीभिर्घृतं शुचिः

न्मुच्यते अयोनौ वा रेतः सिक्त्वान्यत्र स्वप्नादिति यत्तु मनुना कौत्सं जपित्वा प इत्येतद्वासिष्ठं च तृचं प्रति माहित्र्यं शुद्धवत्यश्च सुरापोपि वि
शुध्यति इति मासं प्रत्यहं षोडशकृत्वो पनः शोशुचदघं प्रति स्तोमेभिरुषसं वसिष्ठा महित्रीणामवोस्त्वेतो न्विंद्रं स्तवामेत्येतेषामन्यतमस्य
जप उक्तः स त्रिरात्रोपवासकूष्मांड होमाशक्तस्य वेदितव्यः एतच्चाकामतः पैष्ट्याः सकृत्पाने गौडी माध्व्योस्तु पानावृत्तौ च वेदितव्यम् य 
च्च मनुना मंत्रैः शाकलहोमीयैरब्दं हुत्वा घृतं द्विजः सुगुर्वप्यपहत्येनो जप्त्वा वा नम इत्यृचमिति संवत्सरं प्रत्यहं देवकृतस्यैनस इत्यादि

भिरष्टभिर्मंत्रैर्होमो नम इद्युग्रं नम आविवास इत्यस्या वा ऋचो जप उक्तः स कामकारविषयः यत्तु महापातकसंयुक्तोनुगच्छेद्गाः समाहि
तः अभ्यस्याब्दं पावमानीर्भैक्ष्याहारो विशुध्यतीति तदभ्यासविषयम् समुच्चितमहापातकविषयं वा सुवर्णस्तेयप्रायश्चित्तमाह
ब्राह्मणस्वर्णहारी पुनस्त्रिरात्रोपोषितः जलमध्यस्थो नमस्ते रुद्र मन्यव इति शतरुद्रीयजपयुक्तः शुध्यतीति शातातपेनात्र विशेष उक्तः अघं
पीत्वा गुरुदारांश्च गत्वा स्तेयं कृत्वा ब्रह्महत्यां च कृत्वा भस्माच्छन्नो भस्मशय्यां शयानो रुद्राध्यायी मुच्यते सर्वपापैरिति जपश्चैकादश

ब्राह्मणस्वर्णहारी तु रुद्रजापी जले स्थितः ३०४

कृत्वः कार्यः एकादशगुणान्वापि रुद्राना-
वर्त्य धर्मवित् महापापैरपि स्पृष्टो मुच्यते नात्र संशय इत्यत्रिस्मरणात् यत्तु मनुना सकृज्जप्त्वास्य वामीयं शिवसंकल्पमेव च सुवर्ण
मपहृत्यापि क्षणाद्भवति निर्मल इति द्विपंचाशदृक्संख्याकस्यास्य वामस्य पलितस्य होतुरिति सूक्तस्य तथा यज्जाग्रतो दूरमुदैतु
दैवमिति शिवसंकल्प दृष्टस्य षड्ऋचस्य वा सकृज्जप उक्तः सो त्यंत निर्गुण स्वामिक स्वर्णहरणे गुणवतो वहर्तुर्द्रष्टव्यः सुवर्णान्न्यून
परिमाणविषयो नुग्राहक प्रयोजक विषयो वा आवृत्तौ तु महापातकसंयुक्तोनुगच्छेदित्यादिनोक्तं द्रष्टव्यम् ३०४ ७ ७

क्रमप्राप्तं गुरुतल्पप्रायश्चित्तमाह गुरुतल्पगस्तु सहस्रशीर्षेति षोडशर्चं सूक्तं नारायणदृष्टं पुरुषदेवत्यमानुष्टुभं त्रिष्टुबन्तं जपंस्तस्मा
त्पापान्मुच्यते सहस्रशीर्षजापीति ताच्छील्यप्रत्ययादावृत्तिर्गम्यते अतएव यमेनोक्तम् पौरुषं सूक्तमावर्त्य मुच्यते सर्वकिल्बिषा
दिति आवृत्तौ च संख्यापेक्षायामधस्तनश्लोकगता चत्वारिंशत्संख्यानुमीयते अत्रापि प्राक्तनश्लोकगतत्रिरात्रोपोषित इति सम्बध्य
ते अतएव बृहद्विष्णुः त्रिरात्रोपोषितः पुरुषसूक्तजपहोमाभ्यां गुरुतल्पगः शुध्येदिति एभिश्च सुरापीसुवर्णस्तेयगुरुतल्पगैस्त्रि

सहस्रशीर्षजापी तु मुच्यते गुरुतल्पगः गौर्देया कर्मणोस्यान्ते पृथगेभिः पयस्विनी ३०५

भिः पृथक् पृथगस्य त्रिरात्रव्रतस्यान्ते बहुक्षीरा गौर्देया इदमकामविषयम् यत्तु मनुना हविष्यान्तीयमभ्यस्य नतमंह इतीति च ज-
प्त्वा तु पौरुषं सूक्तं मुच्यते गुरुतल्पगः हविष्पान्तीयमजरं स्वर्विदि न तमंहो न दुरितं इति वा इति मे मनः सहस्रशीर्षेत्येषामन्यतमस्य
मासं प्रत्यहं षोडशषोडशर्चां चत्वारिंशत्संख्याकजप उक्तः सोप्यकामविषय एव कामतस्तु मन्त्रैः शाकलहोमीयैरिति मनूक्तं द्रष्टव्यम् य
त्तु षट्त्रिंशन्मतेभिहितम् महाव्याहृतिभिर्होमैस्तिलैः कार्यो द्विजन्मना उपपातकशुद्ध्यर्थं सहस्रपरिसंख्यया महापातकसंयुक्तोल- १४२

क्षहोमेन शुध्यतीति तदावृत्तिविषयम् यत्तु यमेनोक्तम् जपेद्वाप्यस्यवामीयं पावमानीरथापि वा कुन्तापं वालखिल्यांश्च निविन्त्सैषान्वृ
षाकपिं होतॄन्रुद्रान्सकृज्जप्त्वा मुच्यते सर्वपातकैरिति तद्व्यभिचारिणीगमनविषयम् यानि पुनः गुरुतल्पातिदेशविषयाणि तत्समा-
नि यानि पातकोपपातकपदाभिधेयानि तेषु तुरीयांशन्यूनमर्धं च क्रमेण वेदितव्यम् पातकातिपातकोपपातकमहापातकानामेकत-
मे संनिपाते वा अघमर्षणमेव त्रिर्जपेदिति हारीतोक्तं वा द्रष्टव्यम् महापातकसंसर्गिणश्च स तस्यैव व्रतं कुर्यादिति वचनाद्येन सह संसर्ग

प्राणायामशतं कार्यं सर्वपापापनुत्तये उपपातकजातानामनादिष्टस्य चैव हि ३०६

स्तदीयमेव प्रायश्चित्तम् न च वाच्यमध्यापनादिसंसर्गस्यानेककर्तृकसंपाद्यत्वाद्रहस्यत्वानुपपत्तिरिति यतः सत्यप्यनेककर्तृत्वे पर-
दारगमनवत् कर्तृव्यतिरिक्ततृतीयाद्यपरिज्ञानमात्रेणैव रहस्यत्वम् अतो भवत्येव रहस्यप्रायश्चित्तम् एवमतिपातकादिसंसर्गिणो
पि तदीयमेव प्रायश्चित्तं वेदितव्यम् इति महापातकरहस्यप्रायश्चित्तप्रकरणं चतुर्दशम् ३०५ क्रमप्राप्तमुपपातकप्रायश्चित्त
माह गोवधादिषट्पञ्चाशदुपपातकजातानामनादिष्टरहस्यव्रतानां च जातिभ्रंशकरादीनामपनुत्तये प्राणायामानां शतं कार्यम्

तथासर्वेषांमहापातकादीनांप्रकीर्णकांतानामप्यपनुत्तयेप्राणायामाःकार्याः तत्रचमहापातकेषुचतुःशतम् अतिपातकेषुत्रिशतं अनुपा
तकेषुद्विशतमितिसंख्यावृत्तिःकल्पनीया प्रकाशप्रायश्चित्तेषुमहापातकप्रायश्चित्ततुरीयांशस्योपपातकेषुविधानात् प्रकीर्णकेषुच
ह्रासःकल्प्यः अतएवोक्तंयमेन दशप्रणवसंयुक्तैःप्राणायामैश्चतुःशतैः मुच्यतेब्रह्महत्यायाःकिंपुनःशेषपातकैरिति बौधायने-
नाप्यत्रविशेषउक्तः अपिवाक्चक्षुःश्रोत्रत्वक्घ्राणमनोव्यतिक्रमेषुत्रिभिःप्राणायामैःशुध्यति शूद्रस्त्रीगमनान्नभोजनेषुपृथ-
क्पृथक्सप्ताहंसप्तप्राणायामान्धारयेत् अभक्ष्याभोज्यामेध्यप्राशनेषुतथावापण्यविक्रयेषुमधुमांसघृततैललाक्षालवणरसान्न
वर्जेषुयच्चाप्यन्यदेवंयुक्तंद्वादशाहंद्वादशद्वादशप्राणायामान्धारयेत् अथपातकोपपातकवर्जंयच्चाप्यन्यदेवंयुक्तंअर्द्धमासंद्वादशद्वा
दशप्राणायामान्धारयेत् अथ पातकोपपातकवर्जंयच्चाप्यन्यदेवंयुक्तंद्वादशार्द्धमासान्द्वादशद्वादशप्राणायामान्धारयेत् अ
थपातकपतनीयवर्जंयच्चाप्यन्यदेवंयुक्तंअर्धमासंद्वादशद्वादशप्राणायामान्धारयेत् अथपातकवर्जंयच्चान्यदप्येवमुक्तंद्वादशा
र्धमासान्द्वादशद्वादशप्राणायामान्धारयेत् अथपातकेषुसंवत्सरंद्वादशद्वादशप्राणायामान्धारयेदिति तत्रवाक्चक्षुरित्या
दिप्राणायामत्रयंप्रकीर्णकाभिप्रायम् शूद्रस्त्रीगमनान्नभोजनेत्यादिनोक्ताएकोनपञ्चाशत्प्राणायामाउपपातकविशेषाभिप्रायाः
तथाअभक्ष्याभोज्येत्यादिनोक्ताश्चतुश्चत्वारिंशदधिकशतप्राणायामाअप्युपपातकविशेषाभिप्रायाएव अथपातकोपपातकवर्ज १४३
मित्यादिनोक्ताःसाशीतिशतप्राणायामाजातिभ्रंशकराद्यभिप्रायाः अथपातकपतनीयवर्जमित्यादिनोक्ताःषष्ट्यधिकशतत्रयप्राणा

यामाःगोवधाद्युपपातकाभिप्रायाः अथपातकवर्जमित्यादिनोक्ताःषष्ट्यधिकशतसहितद्विसहस्रसंख्याकाःप्राणायामाःअतिपातका
नुपपातकाभिप्रायाः अथपातकेष्वित्यादिनोक्ताविंशत्यधिकशतत्रययुक्ताश्चतुःसहस्रप्राणायामाःमहापातकविषयाः इदंचाभक्ष्या
भोज्येत्यादिनोक्तंप्रायश्चित्तपंचकंअत्यंताभ्यासविषयम् समुच्चित्तविषयंवा यत्तुमनुना एनसांस्थूलसूक्ष्माणांचिकीर्षन्नपनोदनम्
अवेत्यृचंजपेदब्दंयत्किंचिदमितीतिच इत्यब्दंयावत्प्रत्यहमर्धानरात्रविरुद्धेषुकालेषुअवतेहेळोवरुणेत्यस्याऋचोयत्किंचेदमित्यस्या

ओंकाराभिष्टुतंसोमसलिलंपावनंपिबेत् कृत्वातुरेतोविण्मूत्रप्राशनंतुद्विजोत्तमः ३०७

इतिवाइतिमेमनसइत्यस्याश्चजपउक्तःसोप्यभ्यासविषयः ३०६ उपपातकसामान्यप्राप्तस्यप्राणायामशतस्यापवादमाह द्विजो
रेतोविण्मूत्रप्राशनंकृत्वासोमलतारसमोंकारेणाभिमंत्रितंशुद्धिसाधनंपिबेत् एतच्चाकामकारविषयम् कामतस्तुसुमंतूक्तम् रेतो
विण्मूत्रप्राशनंकृत्वालशुनपलाण्डुगृंजनकुम्भिकादीनामन्येषांचाभक्ष्यादीनांभक्षणंकृत्वा हंसग्रामकुक्कुटश्वसृगालादिमांसभक्षणं
कृत्वाततःकंठमात्रमुदकमवतीर्यस्रिद्रवन्तीभिःप्राणायामंकृत्वाब्रह्मण्याद्धनिभि रुरोगमुदकंपीत्वातदेतस्मात्पूतोभवतीति मनुना

पिसप्तविधाभक्ष्यभक्षणेप्रायश्चित्तंनारमुक्तं प्रतिगृह्याप्रतिग्राह्यंभुक्त्वाचान्नंविगर्हितम् जपंस्तरत्समंदीयंपूयतेमानवस्त्र्यहा
दिति अप्रतिग्राह्यंविषशस्त्रसुरादिपतितादिद्रव्यंच यदाल्पसुरेतोविण्मूत्रादिशारीरंमलंविसृजतितदापितेनैवोक्तम् अप्रश
स्तंतुकृत्वाप्सुमासमासीतमैक्ष्यभुगिति ३०७ अज्ञानकृतेप्रकीर्णकेमानसेचोपपातकेप्रायश्चित्तमाह रजन्यांवासरेवायत्प्र



निशायांवादिवावापियदज्ञानकृतंभवेत् त्रैकाल्यसंध्याकरणात्तत्सर्वंविप्रणश्यति ३०८

मादकृतंप्रकीर्णकंमानसंवाचिकंचोपपातकंतत्सर्वंप्रातर्मध्यान्हादिकालत्रयविहितनित्यसंध्योपासनयाप्रणश्यति तथाचय-
मः यदन्हात्कुरुतेपापकर्मणामनसागिरा आसीनःपश्चिमांसंध्यांप्राणायामैर्निहंतितदिति शातातपेनाप्युक्तम् अनृतं
मद्यगंधंचदिवामैथुनमेवच पुनातिवृषलान्नंचसंध्याबहिरुपासितेति ३०८ ७ ७ ७ ७



सकलमहापातकादिसाधारणान् पवित्रमंत्रानाह शुक्रियंनामअरण्यकविशेषः विश्वानिदेवसवितरित्यादिवाजसनेयकेपठ्यते आ
रण्यकंचऋचंवाचंप्रपद्येमनोयजुःप्रपद्येइत्यादि तत्रचपठ्यतेतयोर्जपःसकलमहापातकादिहरः तथागायत्र्याश्चमहापातकेषुलक्ष
मितिपातकानुपातकयोर्दशसहस्रंउपपातकेषुसहस्रंप्रकीर्णकेषुशतमित्येवंविशेषतोजपःसर्वपापहरः तथाचगायत्रीमधिकृत्यश्लो
कःशंखेनोक्तः शतंजप्तातुसावित्रीमहापातकनाशिनी सहस्रजप्तातुतथापातकेभ्यःप्रमोचिनी दशसाहस्रजाप्येनसर्वकिल्बिष

शुक्रियारण्यकजपोगायत्र्याश्चविशेषतः सर्वपापहरास्त्वेतेरुद्रैकादशिनीतथा ३०९

नाशिनी लक्षंजप्तातुसादेवीमहापातकनाशिनी सुवर्णस्तेयकृद्विप्रोब्रह्महागुरुतल्पगः सुरापश्चविशुध्यंतिलक्षंजप्यानसंशयइ-
ति चतुर्विंशतिमतेनोक्तं गायत्र्यास्तुजपेत्कोटिंब्रह्महत्यांव्यपोहति लक्षाशीतिंजपेद्यस्तुसुरापानाद्विमुच्यते पुनातिहेमहर्तारंगा-
यत्र्यालक्षसप्ततिः गायत्र्यालक्षषष्ट्यातुमुच्यतेगुरुतल्पगइतितद्गुरुत्वात्प्रकाशविषयम् तथारुद्रैकादशिनी एकादशानांरुद्रानु
वाकानांसमाहारोरुद्रैकादशिनी साचविशेषतोजप्तासर्वपापहरा एकादशगुणान्वापिरुद्रानावर्त्यधर्मवित् महद्भ्यःसतुपा-

पेभ्योमुच्यतेनात्रसंशयः इति महापातकेष्वेकादशगुणावृत्तिदर्शनात् अतिपातकादिषुचतुर्थचतुर्थांशन्ह्रासोयोजनीयः चशब्दोघमर्षणा
दिसमुच्चयार्थः यथाहवसिष्ठः सर्ववेदपवित्राणिवक्ष्याम्यहमतःपरम् येषांजपैश्चहोमैश्चपूयतेनात्रसंशयः अघमर्षणंदेवकृतंशुद्ध
वत्यस्तरत्समाः कूष्माण्ड्यःपावमान्यश्चदुर्गासावित्र्यथैवच अभिषंगाःपदस्तोमाःसामानिव्याहृतीस्तथा भारुण्डानिचसामानिगाय-
त्ररैवतंतथा पुरुषव्रतंचभासंचतथादेवव्रतानिच अब्लिंगाबार्हस्पत्यंवाक्सूक्तंमधुमत्तथा शतरुद्र्याथर्वशिरस्त्रिसुपर्णमहा

यत्रयत्रचसंकीर्णमात्मानंमन्यतेद्विजः तत्रतत्रतिलैर्होमोगायत्र्यावाचनंद्विजः ३१०

व्रतम् गोसूक्तंचाश्वसूक्तंचइंद्रशुद्धेवसामनी त्रीण्याज्यदोहानिरथंतरंचअग्नेर्व्रतंवामदेव्यंबृहच्च एतानिगीतानिपुनंतिजंतूञ्जा
तिस्मरत्वंलभतेयदिच्छेदिति ३०९ किंच यत्रयत्रब्रह्मवधादौतज्जनितदोषजातेनात्मानंसंकीर्णमभिभूतंद्विजोमन्यतेतत्रतत्र
गायत्र्यातिलैर्होमःकार्यः तत्रमहापातकेषुगायत्र्यालक्षहोमःकार्यः गायत्र्यालक्षहोमेतुमुच्यतेसर्वपातकैरितियमस्मरणात् १४५
अतिपातकादिषुपादन्ह्रासःकल्पनीयः तथातिलैर्वाचनंकार्यम् तथारहस्याधिकारेवसिष्ठः वैशाख्यांपौर्णमास्यांचब्राह्मणान्स

चसप्तच क्षौद्रयुक्तैस्तिलैःकृष्णैर्वाचयेदथवेतरैः प्रीयतांधर्मराजेतियद्वामनसिवर्त्तते यावज्जीवकृतंपापंतत्क्षणादेवनश्यतीति
अनियतकालमपिदानंतेनैवोक्तं कृष्णाजिनेतिलान्कृत्वाहिरण्यमधुसर्पिषी ददातियस्तुविप्रायसर्वंतरतिदुष्कृतमिति तथाव्या
सेनाप्युक्तम् तिलधेनुंचयोदद्यात्संयतात्माद्विजन्मने ब्रह्महत्यादिभिःपापैर्मुच्यतेनात्रसंशयइति एवमादिदानजातंरहस्य-
कांडोक्तमविदुषांद्विजातीनांस्त्रीशूद्रयोश्चवेदितव्यम् यत्तुयमेनोक्तम् तिलान्ददातियःप्रातस्तिलान्स्पृशतिखादति तिलस्ना

वेदाभ्यासरतंक्षांतंपंचयज्ञक्रियापरम् नस्पृशंतीहपापानिमहापातकजान्यपि ३११

यीतिलाञ्जुह्वन्सर्वंतरतिदुष्कृतम् तथा द्वेचाष्टम्यौतुमासस्यचतुर्दश्यौतथैवच अमावास्यापूर्णमासीसप्तमीद्वादशीद्वयम् संव-
त्सरमभुंजानःसततंविजितेंद्रियः मुच्यतेपातकैःसर्वैःस्वर्गलोकंचगच्छतीति यच्चात्रिणोक्तम् क्षीराब्धौशेषपर्यंकेआषाढ्यांसंवि
शेद्धरिः निद्रांत्यजतिकार्त्तिक्यांतयोःसंपूजयेद्धरिम् ब्रह्महत्यादिकंपापंक्षिप्रमेवव्यपोहतीत्यादि तत्सर्वंविद्याविरहिणांकामाकाम
सकृदभ्यासविषयतयाव्यवस्थापनीयम् ३१० किंचाह वेदस्वीकरणंपूर्वंविचारोभ्यसनंतपः तद्दानंचैवशिष्येभ्योवेदाभ्यासोहिपंच

धेति उक्तक्रमेणवेदाभ्यासनिरतंतितिक्षायुक्तंपंचमहायज्ञानुष्ठाननिरतम् महापातकजान्यपिपापानिनस्पृशंति किंपुनःप्रकीर्णकजानि वाङ्मनसजन्योपपातकानिचेत्यत्रतात्पर्यमपिशब्दाल्लक्ष्यते एतच्चाकामकारविषयम् अतएववसिष्ठेन यद्यकार्यशतंसाग्रंकृतंवेदश्चधार्यते सर्वंतत्तस्यवेदाग्निर्दहत्यग्निरिवेंधनमितिप्रकीर्णकाद्यभिप्रायेणाभिधायाभिहितम् नवेदबलमाश्रित्यपापकर्मरतिर्भवेत् अज्ञानाच्चप्रमादाच्चदह्यतेकर्मनेतरत् ३११ किंच सोपवासोवासरमुपविशन्उषित्वासलिलेवसन्निशांनीत्वादित्योदया

वायुभक्षोदिवातिष्ठन्रात्रिंनीत्वाप्सुसूर्यदृक् जप्त्वासहस्रंगायत्र्याःशुध्येद्ब्रह्मवधादृते ३१२

नंतरंसावित्र्याःसहस्रंजपित्वाब्रह्मवधव्यतिरिक्तसकलमहापातकादिपापजातान्मुच्यते अतश्चोपपातकादिष्वभ्यासेनेकदोषसमुच्चयेवावेदितव्यम् विषमविषयसमीकरणस्यान्याय्यत्वात् अतएववृद्धवसिष्ठेनमहापातकोपपातकयोःकालविशेषेणव्रतविशेषउक्तः यथाह यवानांप्रसृतिमंजलिंवाश्रप्यमाणंघृतंचाभिमंत्रयेत् यवोसिधान्यराजस्त्वंवारुणोमधुसंयुतः निर्णोदःसर्वपापानांपवित्रमृषिभिःस्मृत १४६
इत्यनेन घृतंयवामधुयवाःपवित्रममृतंयवाः सर्वंपुनंतुमेपापंवाङ्मनःकायसंभवमित्यनेनवा अग्निकार्यंनकुर्वीतनेवभूतबलिंतथा

नाग्नंनभिक्षांनातिथ्यंनचोच्छिष्टंपरित्यजेत् येदेवामनोजातामनोयज्ञसदक्षादक्षपितरःतेनःपांतुतेअवंतुतेभ्योनमस्तेभ्यःस्वाहेत्यात्मनिजुहुयात्त्रिरात्रमेधाभिवृद्धयेपापक्षयायत्रिरात्रंसप्तरात्रंब्रह्महत्यादिषुद्वादशरात्रंपतितोत्पन्नश्चेत्येतद्दिगवलंबनेनान्यान्यपिस्मृतिवचनानिविवेचनीयानि इतिरहस्यप्रायश्चित्तप्रकरणंपंचदशम् ३१२ विनियुक्तव्रतव्रातरूपभेदंबुभुत्सिते कीदृक्षमितिसंक्षेपाल्लक्षणंवक्ष्यतेधुना तत्रतावत्सकलप्रकाशरहस्यव्रतांगभूतान्धर्मानाह ब्रह्मचर्यंसकलेंद्रियसंयमः उपस्थनिग्रहोलिंगनिग्रहः

ब्रह्मचर्यंदयाक्षांतिर्दानंसत्यमकल्कता अहिंसास्तेयमाधुर्येदमश्चेतियमाःस्मृताः ३१३ स्नानं
मौनोपवासेज्यास्वाध्यायोपस्थनिग्रहाः नियमागुरुशुश्रूषाशौचाक्रोधाप्रमादता ३१४

गोबलीवर्दन्यायेननिर्दिष्टः अकल्कताअकुटिलता शेषःप्रसिद्धः यत्पुनर्मनुनोक्तम् अहिंसासत्यमक्रोधमार्जवंचसमाचरेदितितदप्येतेषामुपलक्षणंनपरिगणनाय अत्रचदयाक्षांत्यादीनांपुरुषार्थतयाप्राप्तानामपिपुनर्विधानंप्रायश्चित्तांगत्वार्थं क्वचिद्विशेषोप्यस्ति यथाविवाहादिष्वभ्यनुज्ञातस्याप्यनृतवचनस्यनिवृत्त्यर्थंसत्यत्वविधानम् पुत्रशिष्यादिकमपिताडनीयमित्येवमर्थमहिंसाविधानमित्येवमादि ३१३ ३१४

तत्रसांतपनाख्यंव्रतंतावदाह पूर्वेद्युरहारांतरपरित्यागेनगोमूत्रादीनिपंचगव्यानिपंचद्रव्याणिकुशोदकसहितानिसंयुज्यपीलाअपरे
द्युरुपवसेदितिद्विरात्रःसांतपनःकृच्छ्रः संयोजनंचोत्तरश्लोकपृथक्त्वविधानाद्वगम्यते कृच्छ्रइतिचान्वर्थसंज्ञेयम् तयोरूपत्वेनक्लेश
साध्यत्वात् गोमूत्रादीनांपरिमाणंवक्ष्यतेयदापुनःपूर्वेद्युरुपोष्यापरेद्युःसमंत्रकंसंयुज्यसमंत्रकमेवपंचगव्यंपीयतेतदाब्रह्मकूर्चइत्या
ख्यायते यथाहपाराशरः गोमूत्रंगोमयंक्षीरंदधिसर्पिःकुशोदकम् निर्दिष्टंपंचगव्यंतुप्रत्येकंकायशोधनम् गोमूत्रंताम्रवर्णायाःश्वेता

गोमूत्रंगोमयक्षीरंदधिसर्पिःकुशोदकम् जग्ध्वापरेद्युरुपवसेत्कृच्छ्रंसांतपनंपरम् ३१५

याश्चापिगोमयं पयःकांचनवर्णायानीलायाश्चतथादधि घृतंचकृष्णवर्णायाःसर्वंकापिलमेववा अलाभेसर्ववर्णानांपंचगव्येष्वयंवि
धिः गोमूत्रेमाषकास्त्वष्टौगोमयस्यतुषोडश क्षीरस्यद्वादशप्रोक्तादध्नस्तुदशकीर्त्तिताः गोमूत्रवत्घृतस्याष्टौतदर्द्धंतुकुशोदकम् पंच
गव्यमृचापूतंहोमयेदग्निसंनिधौ सप्तपत्राश्चयेदर्भाअच्छिन्नाग्राःशुचित्विषः एतैरुद्धृत्यहोतव्यंपंचगव्यंयथाविधि इरावतीइदंवि 
ष्णुर्मानस्तोकेचशंवती एताभिश्चैवहोतव्यंहुतशेषंपिबेद्द्विजः प्रणवेनसमालोड्यप्रणवेनाभिमंत्र्यच प्रणवेनसमुद्धृत्यपिबेत्तत्प्र-

णवेनतु मध्यमेनपलाशस्यपद्मपत्रेणवापिबेत् स्वर्णपात्रेणताम्रेणब्रह्मतीर्थेनवापुनः यत्त्वगस्थिगतंपापंदेहेतिष्ठतिमानवे ब्रह्मकू
र्चोपवासस्तुदहत्यग्निरिवेंधनमिति यदात्वेतदेवपंचगव्यंमिश्रितंत्रिरात्रमभ्यस्यतेतदायतिसांतपनसंज्ञांलभते एतदेवत्र्यहाभ्यस्तं
यतिसांतपनंस्मृतमितिशंखस्मरणात् जाबालेनतुसप्ताहसाध्यंसांतपनमुक्तम् गोमूत्रंगोमयंक्षीरंदधिसर्पिःकुशोदकम् एकैकंप्रत्य-
हंपीत्वात्वहोरात्रमभोजनम् कृच्छ्रंसांतपनंनामसर्वपापप्रणाशनमिति एषांचगुरुलघुकृच्छ्राणांशक्त्याद्यपेक्षयाव्यवस्थाविज्ञेया ए

पृथक्सांतपनंद्रव्यैःषडहःसोपवासकः सप्ताहेनतुकृच्छ्रोयंमहासांतपनःस्मृतः ३१६

वमुत्तरत्रापिव्यवस्थाबोद्धव्या ३१५ महासांतपनाख्यंव्रतमाह सप्ताहेनापवर्जितोमहासांतपनाख्यःकृच्छ्रोविज्ञेयः कथमित्यपे
क्षायामुक्तम् पृथग्भूतैःषड्भिर्गोमूत्रादिभिरेकैकेनैकैकमहरनिर्वाहयेत् सप्तमंचोपवासेनेति यमेनतुपंचदशाहसंपाद्योमहासांतपनो
भिहितः त्र्यहंपिबेत्तुगोमूत्रंत्र्यहंवैगोमयंपिबेत् त्र्यहंदधित्र्यहंक्षीरंत्र्यहंसर्पिस्ततःशुचिः महासांतपनंह्येतत्सर्वपापप्रणाशनमिति
जाबालेनत्वेकविंशतिरात्रनिर्वर्त्योमहासांतपनउक्तः षण्णामेकैकमेतेषांत्रिरात्रमुपयोजयेत् त्र्यहंचोपवसेदंत्यंमहासांतपनंविदुरि

ति यदातुषण्णांसांतपनद्रव्याणामेकैकस्यद्व्यहमुपयोगस्तदाअतिसांतपनम् यथाहयमः एतान्येवतथापेयादेकैकंतुद्व्यहंद्व्यहम्
अतिसांतपनंनामश्वपाकमपिशोधयेदिति श्वपाकमपिशोधयेदित्यर्थवादः ३१६ पर्णकृच्छ्राख्यव्रतमाह पलाशोदुंबरारविंद-
श्रीवृक्षपर्णानामेकैकेनक्वथितमुदकंप्रत्यहंपिबेत् कुशोदकंचैकस्मिन्निति पंचाहसाध्यःपर्णकृच्छ्रः यदातुपर्णादीनामेकीकृतानांक्वा
थस्त्रिरात्रंनेपीयतेतदापर्णकूर्चः यथाहयमः एतान्येवसमस्तानित्रिरात्रोपोषितःशुचिः क्वाथयित्वापिबेदद्भिःपर्णकूर्चोभिधीयते-

पर्णोदुंबरराजीवबिल्वपत्रकुशोदकैः प्रत्येकंप्रत्यहंपीतैःपर्णकृच्छ्रउदाहृतः ३१७ तप्तक्षी
रघृतांबूनामेकैकंप्रत्यहंपिबेत् एकरात्रोपवासश्चतप्तकृच्छ्रउदाहृतः ३१८

इति यत्तुबिल्वादिफलानिप्र
त्येकंक्वथितानिमासंपीयंतेतदाफलकृच्छ्रादिव्यपदेशंलभंते यथाहमार्कंडेयः फलैर्मासेनकथितःफलकृच्छ्रोमनीषिभिः श्रीकृच्छ्रः
श्रीफलैःप्रोक्तःपद्माक्षैरपरस्तथा मासेनामलकैरेवंश्रीकृच्छ्रमपरंस्मृतम् पत्रैर्मतःपत्रकृच्छ्रःपुष्पैस्तत्कृच्छ्रउच्यते मूलकृच्छ्रःस्मृ-
तोमूलैस्तोयकृच्छ्रोजलेनतुइति ३१७ तप्तकृच्छ्रव्रतमाह तप्तदुग्धसर्पिरुदकानांतप्तानामेकैकंप्रतिदिवसंप्राश्यापरेद्युरुपवसेत् 

एषदिवसचतुष्टयसंपाद्योमहातप्तकृच्छ्रः एभिरेवसमस्तैःसोपवासैर्द्विरात्रसंपाद्यःसांतपनवत्तप्तकृच्छ्रः मनुनातुद्वादशरात्रनिर्वर्त्यो-
भिहितः तप्तकृच्छ्रंचरन्विप्रोजलक्षीरघृतानिलान् प्रतित्र्यहंपिबेदुष्णान्सकृत्स्नायीसमाहितइति क्षीरादिपरिमाणंतुपराशरेणोक्तं
द्रष्टव्यम् अपांपिबेत्तुत्रिपलंद्विपलंतुपयःपिबेत् पलमेकंपिबेत्सर्पिस्त्रिरात्रंचोष्णमारुतमिति त्रिरात्रंचोष्णमारुतमितित्रिरात्रस्य
पूर्णउष्णोदकबाष्पंपिबेदित्यर्थः यदातुशीतंक्षीरादिपीयतेतदाशीतकृच्छ्रः त्र्यहंशीतंपिबेत्तोयंत्र्यहंशीतंपयःपिबेत् त्र्यहंशीतंघृतं

एकभक्तेननक्तेनतथैवायाचितेनच उपवासेनचैवायंपादकृच्छ्रःप्रकीर्त्तितः ३१९

पीत्वावायुभक्षःपरंत्र्यहमितिस्मरणात् ३१८ पादकृच्छ्रमाह एकभक्तेनसकृद्भोजनेनदिवैव नक्तेनेतिपृथगुपादानात् अतश्चदि
वैवैकवारमेवभोजनेनैवैकमहोरात्रमितिवाहयेदिति तत्रदिवेतिरात्रिव्युदासः एकवारमितिद्विवारादिव्युदासः भोजनेनेत्यभोजन-
व्युदासः एतच्चकृच्छ्रादीनांव्रतरूपत्वात्पुरुषार्थभोजनपर्युदासेनकृच्छ्रांगभूतंभोजनंविधीयते तथाचापस्तंबः त्र्यहमनक्ताश्यदि
वाशीतत्र्यहमयाचितव्रतइति अत्रचानक्ताशीत्यनेनव्रतविहितेनाणिनिप्रत्ययेननक्तपर्युदासेनदिवाभोजननियमंदर्शयति गौत

मेतापाद मेवस्पष्टीकृतम् हविष्यंप्रातराशीभुक्त्वानिस्त्रोरात्रीर्नाश्नीयादिति एवंनक्तभोजनविधावपि नविद्यतेयाचितंयस्मिन्भोज
नेतदयाचितमिति तेनकालविशेषानुपादानाद्दिवारात्रौवासकृदित्येव तपोरूपत्वात् कृच्छ्राणाद्वितीयभोजनेनतदनुपपत्तेः अयाचित
मितिनकेवलंपरकीयान्नयाचनप्रतिषेधोपितुस्वकीयमितिपरिचारकभार्यादिभ्योनयाचितव्यम् प्रेषणाध्येषणयोःसाधारणत्वात्या
ञ्चायाः अतःस्वगृहेपिभृत्यभार्यादयोअनाज्ञप्ताएवयदिभोजनमुपहरंतितर्हिभोक्तव्यंनान्यथा अमुनैवाभिप्रायेणोक्तंगौतमेन अ-
थापरंत्र्यहंनकंचनयाचेतेति अत्रचग्रासंख्यानियमःपराशरेणदर्शितः सायंतुद्वादशग्रासाःप्रातःपंचदशस्मृताः चतुर्विंशतिरा-
याच्याःपरंनिरशनंस्मृतमिति आपस्तंबेनत्वन्यथोक्तम् सायंद्वाविंशतिग्रासाःप्रातःषड्विंशतिस्मृताः चतुर्विंशतिरायाच्याःपरंनिरश
नास्त्रयः कुक्कुटाण्डप्रमाणस्तुयथावास्यंविशेत्सुखमिति अनयोश्चकल्पयोःशक्त्यपेक्षयाविकल्पः आपस्तंबेनतुप्राजापत्यप्रायश्चि
त्तंचतुर्धाविभज्यचतुरःपादकृच्छ्रान्कृत्वावर्णानुरूपेणव्यवस्थादर्शिता त्र्यहंनिरशनंपादःपादश्चायाचितंत्र्यहम् सायंत्र्यहंतथा
पादःपादःप्रातस्तथात्र्यहम् प्रातःपादंचरेच्छूद्रःसायंवैश्यस्यदापयेत् अयाचितंतुराजन्येत्रिरात्रंब्राह्मणेस्मृतमिति यदात्वयाचि
तोपवासात्मकत्र्यहद्वयानुष्ठानंतदार्धकृच्छ्रः सायंव्यतिरिक्तापरत्र्यहानुष्ठानंतुपादोनमितिविज्ञेयम् सायंप्रातर्विनार्द्धंस्यात्पादो
ननक्तवर्जितमितितेनैवोक्तत्वात् अर्द्धकृच्छ्रस्यप्रकारांतरमपितेनैवदर्शितम् सायंप्रातस्तथैकैकंदिनद्वयमयाचितम् दिनद्वयं 
चनाश्नीयात्कृच्छ्रार्द्धंतद्विधीयतेइति ३१९ ७ ७ ७ ७ ७ ७ ७ ७

---

प्राजापत्यंकृच्छ्रमाह अयमेवपादकृच्छ्रःयथाकथंचिद्दंडकालितवदावृत्यास्वस्थानविवृद्ध्यावातत्राप्यानुलोम्येनप्रातिलोम्ये-
नवातथावक्ष्यमाणजपादियुक्तस्तद्रहितोवात्रिरभ्यस्तःप्राजापत्यंविधीयते तत्रदंडकालितवदावृत्तिपक्षोवसिष्ठेनदर्शितः अहः
प्रातरहर्नक्तमहरेकमयाचितम् अहःपराकंतत्रैकमेवंचतुरहौपरौ अनुग्रहार्थंविप्राणांमनुर्धर्मभृतांवरः बालवृद्धातुरेष्वेवंशि
शुकृच्छ्रमुवाचहेति आनुलोम्येनस्वस्थानविवृद्धिपक्षस्तुमनुनादर्शितः त्र्यहंप्रातस्त्र्यहंसायंत्र्यहमद्यादयाचितम् परंत्र्यहंचना-

यथाकथंचित्त्रिगुणःप्राजापत्योयमुच्यते

श्नीयात्प्राजापत्यंचरेद्द्विजइति प्रातिलोम्यावृत्तिस्तुवसिष्ठेनदर्शिता प्रातिलोम्यंचरेद्विप्रःकृच्छ्रंचांद्रायणोत्तरमिति जपादिरहितपक्षस्तु
स्त्रीशूद्रादिविषयेंगिरसादर्शितः तस्माच्छूद्रंसमासाद्यसदाधर्मपथेस्थितम् प्रायश्चित्तंप्रदातव्यंजपहोमादिवर्जितमिति जपादियुक्तप-
क्षस्तुपरिशेषाद्योग्यतयाचत्रैवर्णिकविषयः सचगौतमादिभिर्दर्शितः अथातःकृच्छ्रान्व्याख्यास्यामोहविष्यान्प्रातराशान्भुक्त्वातिस्त्रोरा
त्रीर्नाश्नीयादथापरंत्र्यहंनक्तंभुंजीथापरंत्र्यहंनकंचनयाचेत्तथापरंत्र्यहमुपवसंस्तिष्ठेदहनिरात्रावासीतक्षिप्रकामःसत्यंवदेदनार्यैःस

हनभाषेनरौरवयोधाजपेन्नित्यंप्रयुंजीतानुसवनमुदकोपस्पर्शनमापोहिष्ठेतितिसृभिःपवित्रवतीभिर्मार्जयीत हिरण्यवर्णाःशुचयःपावकाइत्यष्टाभिरथोदकतर्पणम् नमोहमायमोहमायसंहमायधन्वने तापसायपुनर्वसेनमः मौंज्याय औम्याय वसुविंदायसर्वविंदायनमः पारायसुपाराय महापाराय पारदाय पारयिष्णवेनमः रुद्रायपशुपतये महतेदेवायत्र्यंबकायैकचराधिपतयेहरायशर्वायेशानाय उग्रायवज्रिणे घृणिने कपर्दिनेनमः सूर्यायादित्यायनमः नीलग्रीवायशितिकंठायनमः कृष्णायपिंगलायनमः ज्येष्ठायश्रेष्ठायवृद्धायेंद्रियाय हरिकेशायऊर्ध्वरेतसेनमः सत्यायपावकाय पावकवर्णायैकवर्णायकामायकामरूपिणेनमः दीप्तायदीप्तरूपिणेनमः तीक्ष्णायतीक्ष्णरूपिणेनमः सौम्यायपुरुषाय महापुरुषायमध्यमपुरुषायउत्तमपुरुषायब्रह्मचारिणेनमः चंद्रललाटायकृत्तिवाससेनमइति एतदेवादित्योपस्थानमेताएवाज्याहुतयोद्वादशरात्रस्यांतेचरुंश्रपयित्वाएताभ्योदेवताभ्योजुहुयादग्नयेस्वाहासोमायस्वाहाग्नीषोमाभ्यामिंद्राग्निभ्यामिंद्रायविश्वेभ्योदेवेभ्योब्रह्मणेप्रजापतयेग्नयेस्विष्टकृतेइतिअंतेब्राह्मणभोजनमिति तत्रतिष्ठेदहनिरात्रावासीतक्षिप्रकामइत्यस्यार्थः यस्तुमनसोप्येनसःक्षिप्रमेकेनैवकृच्छ्रेणक्षिप्रमुच्येयमित्येवंकामयतेअसावहनिकर्मविरुद्धेषुकालेषुतिष्ठेद्रात्रावासीतएवंरौरवयोधाख्यसामजपोनमोहमायेत्यादिभिस्तर्पणादित्योपस्थानादिकंचरुश्रपणादिकंचयोगीश्वराद्यनुक्तंक्षिप्रकामःकुर्वीत अनश्चयोगीश्वराद्युक्तप्राजापत्यकृच्छ्रस्थानेगौतमीयमनेकेतिकर्त्तव्यतासहितंद्रष्टव्यम् एवमन्यान्यपिस्मृत्यंतरोक्तानिविशेषेणान्वेषणीयानि ७ ७ ७ ७ ७ ७ ७ ७ १५०

अतिकृच्छ्रमाह एतद्धर्मकएवएकभक्तादिप्राजापत्यधर्मयुक्तोतिकृच्छ्रःस्यात् इयांस्तुविशेषः आद्येत्र्यहत्रयेपाणिपूरणमात्रमन्नंभुंजीतनपुनर्द्वाविंशत्यादिग्रासान् अत्रचप्राप्तभोजनानुवादेनपाणिपूरान्नविधानादत्रत्र्यहेतिदेशमात्रउपवासोप्रतिपक्षएव अत्रापिपादशोव्यवस्थापूर्ववदेवद्रष्टव्या यत्तुमनुनोक्तं एकैकंग्रासमश्नीयात्त्र्यहाणित्रीणिपूर्ववत् त्र्यहंचोपवसेदंत्यमतिकृच्छ्रं

अयमेवातिकृच्छ्रःस्यात्पाणिपूरान्नभोजनः ३२० कृच्छ्रातिकृच्छ्रःपयसा
दिवसानेकविंशतिम् द्वादशाहोपवासेनपराकःपरिकीर्त्तितः ३२१

चरेत्द्विजइति तत्पाणिपूरान्नपरिमितत्वादल्पत्वाच्छक्तविषयम् ३२० कृच्छ्रातिकृच्छ्रमाह एकविंशतिरात्रंपयसावर्त्तनंकृच्छ्रातिकृच्छ्राख्यंव्रतंविज्ञेयम् गौतमेनतुद्वादशरात्रमुदकेनवर्त्तनंकृच्छ्रातिकृच्छ्रइत्युक्तम् अत्रप्रक्षस्तृतीयःसकृच्छ्रातिकृच्छ्रइति अतश्चशक्त्यपेक्षयातयोर्व्यवस्था पराकमाह कृच्छ्रत्रयेयमर्द्धश्लोकः ३२१ ७ ७ ७ ७

सौम्यकृच्छमाह पिंड्योदननिस्रावोदश्विदुदकसक्तूनां पंचानां एकैकं प्रतिदिवसमुपयुज्य षष्ठेन्हिउपवसेदेषसौम्याख्यःकृच्छ्रोभिधी- यते द्रव्यपरिमाणंतु प्राणयात्रामात्रनिबंधनमधिगतव्यम् जाबालेनतुचतुरहव्यापी सौम्यकृच्छ्रउक्तः पिण्याकंसक्तवस्तक्रंचतुर्थेह न्यभोजनम् वासोवैदक्षिणांदद्यात्सौम्योयंकृच्छ्रउच्यतेइति ३२२ तुलापुरुषाख्यंकृच्छ्रमाह एषांपिण्याकादीनांपंचानांक्रमेणैके



पिण्याकाचामतक्रांबुसक्तूनां प्रतिवासरम् एकरात्रोपवासश्च कृच्छ्रःसौम्योयमुच्यते ३२२
एषांत्रिरात्रमभ्यासादेकैकस्ययथाक्रमम् तुलापुरुषइत्येषज्ञेयःपंचदशाहिकः ३२३

कस्यत्रिरात्राभ्यासेनपंचदशाहव्यापीतुलापुरुषाख्यःकृच्छ्रोवेदितव्यः अत्रचपंचदशाहिकत्वविधानादुपवासस्यनिवृत्तिः यमेनत्वे कविंशतिरात्रिकस्तुलापुरुषउक्तः आचाममथपिण्याकंतक्रंचोदकसक्तुकान् त्र्यहंत्र्यहंप्रयुंजानोवायुभक्षस्त्र्यहद्वयम् एकविंशति रात्रस्तुतुलापुरुषउच्यतइतिहारीतोक्तेतिकर्त्तव्यताग्रंथगौरवभयान्नलिख्यते ३२३ ७ ७ ७ ७ १५१

चांद्रायणमाह चांद्रायणाख्यंव्रतंकुर्यात् मयूरांडपरिमितान्पिंडान्शुक्लेआपूर्यमाणेपक्षेतिथिवृद्ध्याचरेत्भक्षयेत् यथाप्रतिपत्प्र भृतिषुचंद्रकलानामेकैकशोवृद्धिरर्द्धमासेनतद्वत्पिंडानामपिप्रतिपद्येकोद्वितीयायांद्वावित्येवमेकैकशोवर्द्धयन्भक्षयेद्यावत्पौर्णमा सीततःपंचदश्यांपंचदशग्रासान्भुक्त्वाततःकृष्णपक्षेचतुर्दशप्रतिपदिद्वितीयायांत्रयोदशेत्येवमेकैकशोग्रासान्ह्रासयन्अश्नीयात् यावच्चतुर्दशीततश्चतुर्दश्यामेकंग्रासंग्रसित्वाइंदुक्षयेअथादुपवसेत् तथाचवसिष्ठः एकैकंवर्द्धयेत्पिंडंशुक्लेकृष्णेचह्रासयेत् इंदुक्ष

तिथिवृद्ध्याचरेत्पिंडान्शुक्लेशिख्यंडसंमितान् एकैकंह्रासयेत्कृष्णेपिंडंचांद्रायणंचरन् ३२४

येनभुंजीतएषचांद्रायणेविधिरिति चंद्रस्यायनमिवायनंचरणंयस्मिन्कर्मणिह्रासवृद्धिभ्यांतच्चांद्रायणम् संज्ञायांदीर्घः इदंचय ववत्प्रांतयोरणीयःमध्येस्थवीयइतियवमध्यमितिकथ्यते एतदेवव्रतंयदाकृष्णपक्षप्रतिपादिप्रक्रम्यपूर्वोक्तक्रमेणानुष्ठीयतेतदा पिपीलिकावन्मध्यमितिकथ्यते तथाहि पूर्वोक्तक्रमेणकृष्णपक्षप्रतिपदिचतुर्दशग्रासान्भुक्त्वाएकैकग्रासापचयेनचतुर्दशीयाव- द्भुंजीततत्श्चतुर्दश्यामेकंग्रासंग्रसित्वामावास्यायामुपोष्यशुक्लप्रतिपदिएकमेवग्रासमश्नीयात् ततएकोपचयभोजनेनपक्षशेषे

निर्वर्त्यमाने पौर्णमास्यां पंचदशग्रासाः संपद्यंत इतियुक्तैव पिपीलिकामध्यता तथाच वसिष्ठः मासस्य कृष्णपक्षादौ ग्रासान्द्याच्चतु
र्दश ग्रासान्पंचचभोजी सन्पक्षशेषं समापयेत् तथैव शुक्लपक्षादौ ग्रासंभुंजीत चापरम् ग्रासोपचयभोजी सन्पक्षशेषं समापये
दिति यदात्वेकस्मिन्पक्षशेषं समापयेदिति यदात्वेकस्मिन्पक्षे तिथिवृद्धिह्रासवशात् षोडशदिनानि भवंति चतुर्दशवा तदाग्रासा-
नामपि वृद्धिह्रासौ वेदितव्यौ तिथिवृद्ध्यापिंडांश्चरेदितिनियमात् गौतमेन तत्र विशेषो दर्शितः अथातश्चांद्रायणं तस्योक्तो विधिः कृच्छ्रेव-
पनं व्रतं चरेत् श्वोभूतां पौर्णमासीमुपवसेत् आप्यायस्व संतेपयांसि नवोनव इति चैताभिस्तर्पणमाज्यहोमो हविषश्चानुमंत्रणं उपस्थानंच
चंद्रमसः यद्देवादेवहेडनमितिचतसृभिराज्यंजुहुयाद्देवकृतस्येति चांते समिद्भिः ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यंय
शः श्रीऊर्क्इट् ॐ जः तेजः पुरुषः धर्मः शिव इत्येतैर्ग्रासानुमंत्रणं प्रतिमंत्रं मनसा नमः स्वाहेति वा सर्वानेतैरेव ग्रासान्भुंजीत तद्ग्रासप्रमाणं
मास्याविकारेण चरुभैक्ष्यसक्तुकणयावकशाकपयोदधिघृतमूलफलोदकानि हवींषि उत्तरोत्तरं प्रशस्तानि पौर्णमास्यां पंचदशग्रासान्
भुक्त्वा एकैकापचयेनापरपक्षमश्नीयात् अमावास्यायामुपोष्यैकैकोपचयेन पूर्वपक्षं विपरीतमेकेषामेष चांद्रायणो मास इति अत्रग्रा
सप्रमाणमास्याविकारेणेतियदुक्तं तद्बालाभिप्रायम् शिखंडपरिमितपंचग्रासभोजनाशक्तेः क्षीरादिद्रवहविषां शिखंडपरिमित
त्वं तु पर्णपुटकादिना संपादनीयम् तथा कुक्कुटांडाद्यामलकादीनि तु ग्रासपरिमाणानि स्मृत्यंतरोक्तानि शक्तिविषयाणि शिखंडपरिमा
णाल्लघुत्वात्तेषां यत्पुनरुक्तं श्वोभूतां पौर्णमासीमुपवसेदित्यत्र चतुर्दश्यामुपवासमभिधाय पौर्णमास्यां पंचदशग्रासान्भुंक्ते त्यादि १५२

नाद्यत्रिंशदहरात्मकत्वं चांद्रायणस्योक्तम् न तत्पक्षांतरप्रदर्शनार्थं न सार्वत्रिकं योगीश्वरवचनानुरोधेन त्रिंशदहरात्मकस्य दर्शितत्वात्
यद्येतत्सार्वत्रिकं स्यात्तदानैरंतर्येण संवत्सरे चांद्रायणानुष्ठानानुपपत्तिः स्यात् चंद्रगत्यनुवर्तनानुपपत्तिश्च ३२४ चांद्रायणांतर-
माह पिंडानां चत्वारिंशदधिकं शतद्वयं मासेन भुंजीत यथाकथंचित्प्रतिदिनं मध्याह्ने ष्टौ ग्रासान् तथा नक्तं दिनयोश्चतुरश्चतुरो वा अ

यथाकथंचित्पिंडानां चत्वारिंशच्छतद्वयम् मासेनैवोपभुंजीत चांद्रायणमथापरम् ३२५

थैकस्मिंश्चतुरोपरस्मिन्द्वादशतथैकरात्रमुपोष्यापरस्मिन् षोडशवेत्यादिप्रकाराणामन्यतमेन शक्त्याद्यपेक्षया भुंजीतेत्येतत् पूर्वोक्तं चां
द्रायणद्वयादपरं चांद्रायणम् अतस्तयोर्नायं ग्राससंख्यानियमः किंतु पंचविंशत्यधिकं शतद्वयसंख्यैव मनुना चैते प्रकारा दर्शिताः
अष्टावष्टौ समश्नीयात् पिंडान्मध्यंदिने स्थिते नियतात्मा हविष्यस्य यतिचांद्रायणं चरेत् चतुरः प्रातरश्नीयात् पिंडान्विप्रः समाहितः च
तुरोस्तमिते सूर्ये शिशुचांद्रायणं चरेत् यथाकथंचित्पिंडानां तिस्रोशीतीः समाहितः मासेनाश्नन्हविष्यस्य चंद्रस्यैति सलोकतामिति

तथाचत्वारिंशच्छतद्वयन्यूनसंख्यायाससंपाद्यस्यापिसंग्रहार्थमपरग्रहणं यथाहयमः त्रींस्त्रीन्पिंडान्समश्नीयान्नियतात्माद्दढव्रतः
हविष्यान्नस्यवैमासमृषिचांद्रायणंस्मृतमिति एषुचयतिचांद्रायणप्रभृतिषुनचंद्रगत्यनुसरणमपेक्षितम् अतस्त्रिंशद्दिनात्मकसा
धारणेनमासेननैरंतर्येणचांद्रायणानुष्ठानेयदिकथंचित्तिथिवृद्धिह्रासवशात्पंचम्यादिष्वारंभोभवतितथापिनदोषः यद्यपिसो
मायनाख्यंमासव्रतंमार्कंडेयेनोक्तम् गोक्षीरंसप्तरात्रंतुपिबेत्स्तनचतुष्टयात् स्तनत्रयात्सप्तरात्रंसप्तरात्रंस्तनद्वयात् स्तनेनैके
नषड्रात्रंत्रिरात्रंवायुभुग्भवेत् एतत्सोमायनंनाममहाकल्मषनाशनमिति स्मृत्यंतरेसप्ताहंचेत्येतद्गोस्तनमखिलमथत्रीन्स्तना
न्द्वौतथैकंकुर्यात्त्रींश्चोपवासान्यदिभवतितदामासिसोमायनंतत् तदपिचांद्रायणधर्मकमेव हारीतेन अथातश्चांद्रायणमनुक्रमि
ष्यामइत्यादिनासेतिकर्तव्यताकंचांद्रायणमभिधायैवसोमायनमित्यतिदेशाभिधानात् यत्पुनस्तेनकृष्णचतुर्दशीमारभ्यशुक्लद्वा
दशीपर्यंतंसोमायनमुक्तम् चतुर्थीप्रभृतिचतुस्तनेनत्रिरात्रंत्रिस्तनेनत्रिरात्रंद्विस्तनेनत्रिरात्रंएकस्तनेनत्रिरात्रमेवमेकस्तनप्रभृ-
तिपुनश्चतुस्तनांतंयातेसोमचतुर्थीतिनूस्तयानःपाहितस्यैनमःस्वाहायातेसोमपंचमीषष्ठीत्येवंयथार्थास्तिथिहोमाएकमासंएनोभ्यःपू
तश्चंद्रमसःसमानतांसलोकतांसायुज्यंचगच्छतीतिचतुर्विंशतिदिनात्मकसोमायनमुक्तंतदशक्तविषयम् ३२५ अथकृच्छ्र-
चांद्रायणसाधारणीमितिकर्तव्यतामाह कृच्छ्रंप्राजापत्यादिकंचांद्रायणंवात्रिषवणस्नानयुक्तःकुर्यात् एतच्चतप्तकृच्छ्रव्यतिरेके १५३
ण तत्रसकृत्स्नायीसमाहितइतिमनुनाविशेषाभिधानात् यत्पुनस्तप्तकृच्छ्रेषुत्रिषवणस्नानमभिहितंत्रिरह्निस्त्रिर्निशायांतुसवासा

जलमाविशेदितितदशक्तविषयम् यत्पुनर्वैशंपायनेनद्वैकालिकंस्नानमुक्तम् स्नानंद्विकालमेवस्यात्त्रिकालंवाद्विजन्मनइतितत्त्रि
षवणस्नानाशक्तस्यवेदितव्यम् यत्पुनर्गार्ग्येण एकवासाश्चरेद्भैक्ष्यंस्नात्वावासोनपीडयेत् तदपिशक्तस्यैव एकवासाआर्द्रवा
सालब्धाशीस्थंडिलेशयइत्येकवस्त्रतायाअपिशंखेनपाक्षिकत्वाभिधानात् स्नानेचहारीतेनविशेषउक्तः त्र्यवरंशुद्धवतीभिः
स्नात्वाघमर्षणमंतर्जलेजपित्वाधौतमहतंवासःपरिधायसाम्नासौम्येनादित्यमुपतिष्ठेदिति स्नानानंतरंचपवित्राणिजपेत् पवि

कुर्यात्त्रिषवणस्नायीकृच्छ्रंचांद्रायणंतथा पवित्राणिजपेत्पिंडान्गायत्र्याचाभिमंत्रयेत् ३२६

त्राणिच अघमर्षणंदेवकृतःशुद्धवत्यस्तरत्समाइत्यादिवसिष्ठादिप्रतिपादितानामन्यतमान्यर्थाविरुद्धेषुकालेषुजपेत् सावित्रींवा
सावित्रींवाजपेन्नित्यंपवित्राणिचशक्तितइतिमनुस्मरणात् यत्तुगौतमेनोक्तम् रौरवयौधाजपेन्नित्यंप्रयुंजीतेतितदपिपवित्रत्वा
द्देवोक्तं नपुनर्नियमाय तथासतिश्रुत्यंतरमूलत्वकल्पनाप्रसंगात् अतोनधीतसामवेदेनगायत्र्यादिकमेवजप्तव्यम् यदपिन

मोहमायमोहमायइत्यादिपठित्वाएताएवाज्याहुतयइत्युक्तंतदपिननैयमिकम् किंतुमहाव्याहृतिभिर्होमस्तिलैःकार्योद्विजन्म
नेतिमनुनामहाव्याहृतिभिर्होमविधानात् तथाषड्त्रिंशन्मतेप्युक्तम् जपहोमादियत्किंचित्कृच्छ्रोक्तंसंभवेन्नचेत् सर्वव्याहृति-
भिःकुर्याद्गायत्र्याप्रणवेनचेति आदिग्रहणादुदकतर्पणादित्योपस्थानादेर्ग्रहणम् अतएववैशंपायनः स्नात्वोपतिष्ठेदादित्यं-
सौरीभिःस्तुकृतांजलिरिति एवमन्येष्वपिविरोधिपदार्थेषुविकल्पआश्रयणीयः अविरोधिषुसमुच्चयः शाखांतराधिकरणन्या
येनसर्वस्मृतिप्रत्ययत्वात्कर्मणोजपसंख्यायांचविशेषस्तेनैवदर्शितः ऋषभंविरजंचैवतथाचैवाघमर्षणम् गायत्रींवाजपेद्दे
वींपवित्रांवेदमातरम् शतमष्टशतंवापिसहस्रमथवापरम् उपांशुमनसावापितर्पयेत्पितृदेवताः मनुष्यांश्चैवभूतानिप्रणम्यशिरसाततइ-
ति तथापिंडांश्चप्रत्येकंगायत्र्याचाभिमंत्रयेत् यमेनापिविशेषउक्तः अंगुल्यग्रेस्थितंपिंडंगायत्र्याचाभिमंत्रितम् प्राश्याचम्यपुनःकुर्या
दन्यस्याप्यभिमंत्रणमिति अतश्चोंभूर्भुवःस्वरित्यादिभिर्गौतमोक्तैरभिमंत्रणमंत्रैःसहास्यविकल्पः यत्पुनराप्यायस्वसंतेपयांसीत्यादि
भिःपिंडकरणात्पूर्वंहविषोनुमंत्रणमुक्तंतद्भिन्नकार्यत्वान्नसमुच्चीयते एतानिचकृच्छ्रादिव्रतानियदाप्रायश्चित्तार्थमनुष्ठीयंतेतदाकेशा
दिवपनपूर्वकंपरिगृहीतव्यानि वपनंव्रतंचरेदितिगौतमस्मरणात् अभ्युदयार्थेतुनैववपनम् वसिष्ठेनाप्यत्रविशेषउक्तः कृच्छ्राणां
व्रतरूपाणांश्मश्रुकेशादिवापयेत् कक्षरोमशिखावर्जमिति कृच्छ्राणांव्रतरूपाणिवपनादीन्यंगानिवक्ष्यतइतिशेषः पर्षदुपदिष्टव्रत
ग्रहणंचव्रतानुष्ठानदिवसात्पूर्वेद्युःसायान्हेकार्यम् तथाहवसिष्ठः सर्वोपायेषुसर्वेषांव्रतानांविधिपूर्वकम् ग्रहणंसंप्रवक्ष्यामिप्राय



श्चित्तेचिकीर्षिते दिनांतेनखरोमादीन्प्रवाप्यस्नानमाचरेत् भस्मगोमयमृद्वारिपंचगव्यादिकल्पितैः मलापकर्षणंकार्यंबाह्यशौ
चोपसिद्धये दंतधावनपूर्वेणपंचगव्येनसंयुतम् व्रतंनिशामुखेग्राह्यंबहिस्तारकदर्शने आचम्यातःपरंमौनीध्यायन्दुष्कृतमात्मनः
मनःसंतापनंतीव्रमुद्वहेच्छोकमंततइति बहिरितियामाद्बहिर्निष्क्रम्य स्त्रियाअप्येवमेवव्रतपरिग्रहःकार्यः केशश्मश्रुलोमनखवप-
नंतुनास्ति चांद्रायणादिषु तदेवस्त्रियाःश्मश्रुकेशवपनवर्जमितिबौधायनस्मरणात् वपनादिष्वत्रहारीतेनविशेषउक्तः राजावारा
जपुत्रोवाब्राह्मणोवाबहुश्रुतः केशानांवपनंकृत्वाप्रायश्चित्तंसमाचरेत् केशानांरक्षणार्थंतुद्विगुणंव्रतमाचरेत् द्विगुणेतुव्रतेचीर्णेदक्षि
णाद्विगुणाभवेदिति एतच्चमहापातकादिदोषविशेषाभिप्रायेणद्रष्टव्यम् विद्वद्विप्रनृपस्त्रीणांनेष्यतेकेशवापनम् ऋतेमहापातकि
नोगोहंतुश्चावकीर्णिनइतिमनुस्मरणात् जाबालेनाप्यत्रविशेषउक्तः आरंभेसर्वकृच्छ्राणांसमाप्तौचविशेषतः आज्येनबहिःशा-
लाग्नौजुहुयाद्व्याहृतीःपृथक् श्राद्धंकुर्याद्व्रतांतेतुगोहिरण्यादिदक्षिणाइति यमेनाप्यत्रविशेषोभिहितः पश्चात्तापान्निवृत्तिश्चस्नान-
चांगतयोदितम् निमित्तकानांसर्वेषांतथाचैवानुकीर्त्तनमिति तथागात्राभ्यंगशिरोभ्यंगंतांबूलमनुलेपनम् व्रतस्थोवर्जयेत्सर्वंयच्चा
न्यद्बलरागकृदिति एवमादिकर्त्तव्यताजातंस्मृत्यंतरात्द्रष्टव्यम् एवमनेनविधिनाव्रतंगृहीत्वावश्यपरिसमापनीयम् अन्यथातु-
प्रत्यवायः पूर्वंव्रतंगृहीत्वातुनाचरेत्कामतोहियः जीवन्भवतिचांडालोमृतःश्वाचैवजायतइतिच्छागलेयस्मरणात् इत्यलंप्रपंचे
न ३२६ ७ ७ ७ ७ ७ ७ ७ ७ ७

इत्थमुक्तविनियोगस्यचांद्रायणादेःस्वरूपमभिधायलब्धप्रसंगकार्यांतरेपिविनियोगमाह आदिष्टइत्यादिष्टं प्रायश्चित्तंनविद्यतेआ-
दिष्टंयेषुपापेषुतेषुचांद्रायणेनशुद्धिः चशब्दात्प्राजापत्यादिभिः कृच्छ्रैरेदवसहितैस्तन्निरपेक्षैर्वाशुद्धिः तथाचषट्त्रिंशन्मतेभिहितम्
यानिकानिचपापानिगुरोर्गुरुतराणिच कृच्छ्रातिकृच्छ्रचांद्रैस्तुशोध्यंतेमनुरब्रवीदितित्रयाणांसमुच्चयःप्रतिपादितः उशनसाद्वयोःस
मुच्चयउक्तः दुरितानांदुरिष्टानांपापानांमहतामपि कृच्छ्रंचांद्रायणंचैवसर्वपापप्रणाशनमिति दुरितमुपपातकं दुरिष्टंपातकम् गौत

अनादिष्टेषुपापेषुशुद्धिश्चांद्रायणेनतु धर्मार्थंयश्चरेदेनच्चंद्रस्यैतिसलोकताम् ३२७

मेनतुकृच्छ्रातिकृच्छ्रौचांद्रायणमितिसर्वप्रायश्चित्तसमासकरणेनैवंवनिरपेक्षताकृच्छ्रातिकृच्छ्रयोःसूचिता चांद्रायणस्यचतन्निर
पेक्षता इतिशब्देनत्रयाणांसमुच्चयः केवलप्राजापत्यस्यतुनैरपेक्ष्यंचतुर्विंशतिमतेभिहितम् लघुदोषेत्वनादिष्टेप्राजापत्यंसमाचरे
दिति गौतमेनापिप्राजापत्यादेर्नैरपेक्ष्यमुक्तम् प्रथमंचरित्वाशुचिपूतःकर्मण्योभवति द्वितीयंचरित्वायदन्यन्महापातकेभ्यःपा १५५
पंकुरुतेतस्मात्प्रमुच्यते तृतीयंचरित्वासर्वस्मादेनसोमुच्यतइतिमहापातकादपीत्यभिप्रेतम् मनुनाप्युक्तम् पराकोनामकृच्छ्रोयंस

र्वपापापनोदनइति हारीतेनाप्युक्तम् चांद्रायणंयावकश्चतुलापुरुषएववा गवांचैवानुगमनंसर्वपापप्रणाशनम् तथा गोमूत्रंगोम
यंक्षीरंदधिसर्पिःकुशोदकम् एकरात्रोपवासश्चश्वपाकमपिशोधयेत् तथातप्तकृच्छ्रमधिकृत्यतेनैवोक्तम् एषकृच्छ्रोद्विरभ्यस्तः
पातकेभ्यःप्रमोचयेत् त्रिरभ्यस्तोयथान्यायभ्रूणहत्यांव्यपोहतीति उशनसोक्तम् यत्रोक्तंयत्रवानोक्तंमहापातकनाशनम् प्राजा
पत्येनकृच्छ्रेणशोधयेन्नात्रसंशयइति एतानिप्राजापत्यादीनिअनादिष्टेषूपपातकादिषुसकृदभ्यासापेक्षयाव्यस्तानिसमस्ता
निवायोजनीयानि तथाआदिष्टव्रतेष्वपिमहापातकादिषुअभ्यासापेक्षयायोजनीयानि अतएवोक्तंयमेन यत्रोक्तमित्यादि गौत
मेनाप्युक्तनिष्कृतीनांसंग्रहार्थंसर्वप्रायश्चित्तग्रहणंकृतम् तथायदपितेनैवोक्तं द्वितीयंचरित्वायदन्यन्महापातकेभ्यःपापंकुरुतेत-
स्मात्प्रमुच्यतइत्युक्त्वातृतीयंचरित्वासर्वस्मादेनसोमुच्यतइति तदपिमहापातकाभिप्रायमुक्तम् नतुकृद्रपातकाभिप्रायम् न
चमहापातकेष्वनुक्तनिष्कृतिकंसंभवति तस्मादुक्तनिष्कृतीनामपिप्राजापत्यादयोयोजनीयाः तत्रद्वादशवार्षिकव्रतेद्वादशद्वाद-
शदिनानिएकैकंप्राजापत्यंचपरिकल्प्यगण्यमानप्राजापत्यानांषष्ट्यधिकशतत्रयंद्वादशवार्षिकेवैकल्पिकमनुष्ठेयंभवति तद
शक्तौचतावत्योवाधेनवोदातव्याः तदसंभवेनिष्काणांषष्ट्यधिकशतत्रयंदातव्यम् तथास्मृत्यंतरं प्राजापत्यक्रियाशक्तौधेनुंद
द्याद्विचक्षणः धेनोरभावेदातव्यंमूल्यंतुल्यमसंशयम् मूल्यार्धमपिनिष्कंवातदर्धंवाशक्त्यपेक्षयादातव्यम् गवामभावेनिष्कं
स्यात्तदर्धंपादमेववेतिस्मरणात् मूल्यदानस्याप्यशक्तौतावंतोवोदवासाःकार्याः तत्राप्यशक्तौगायत्रीजपःषट्त्रिंशल्लक्षसंख्या

कः कार्यः कृच्छ्रोयुतं तु गायत्र्या उदवासास्तथैव च धेनुप्रदानं विप्राय सममेतच्चतुष्टयमिति पराशरस्मरणात् यत्तु चतुर्विंशति
मतेभिहितं गायत्र्यास्तु जपन्कोटिं ब्रह्महत्यां व्यपोहति लक्षाशीतिं जपेद्यस्तु सुरापानाद्विमुच्यते पुनाति हेमहर्तारं गायत्र्या ल
क्षसप्ततिः गायत्र्याः षष्टिभिर्लक्षैर्मुच्यते गुरुतल्पग इति द्वादशवार्षिकतुल्यविधानतयोक्तम् न पुनरशक्तविषयमिति न विरोधः
एवमन्येपि कृच्छ्रो देव्ययुतं चैव प्राणायामशतद्वयम् तिलहोमसहस्रं तु वेदपारायणं तथेत्यादयः प्रत्याम्नायाश्चतुर्विंशतिमन्वा
दिशास्त्राभिहिताः षष्ट्यधिकत्रिशतगुणितमहापातकेषु बोद्धव्याः अतिपातकेषु सप्तत्यधिकशतद्वयं प्राजापत्यानां कर्तव्यतावं
तो वा धेन्वादयः प्रत्याम्नायाः पातकेषु साशीतिशतं प्राजापत्याः प्रत्याम्नायाः धेन्वादयस्तावंत एव वा तथा चतुर्विंशतिमतेभिहितं
जन्मप्रभृति पापानि बहूनि विविधानि च कृत्वा नागब्रह्महत्यायाः षडब्दव्रतमाचरेत् प्रत्याम्नाये गवादेयं साशीतिधननाशनम् तथाष्टा
दशलक्षाणि गायत्र्या वा जपेद्बुध इति इदमेव च द्वादशवार्षिके व्रते द्वादश द्वादश दिनैरेकैकप्राजापत्यकल्पनायां लिंगम् एवमुपपातके-
षु त्रैवार्षिकप्रायश्चित्तविषयभूतेषु नवति प्राजापत्यास्तावंतः प्रत्याम्नायाः त्रैमासिकविषये पुनः सार्धसप्त प्राजापत्याः प्रत्याम्नायाश्च-
धेनूदवासादयस्तावंत एव मासिकव्रतविषये तु सार्द्धं प्राजापत्यद्वयम् तावानेव प्रत्याम्नायः चांद्रायणविषयभूतेषु पुनरुपपातकेषु
प्राजापत्यत्रयम् तदशक्तस्य प्रत्याम्नायस्तावानेव यत्तु पुनश्चतुर्विंशतिमतेभिहितम् अष्टौ चांद्रायणे देव्याः प्रत्याम्नायविधौ सदेति
तदपि धनिनः पिपीलिकामध्यादिचांद्रायणप्रत्याम्नायविषयम् मासातिकृच्छ्रविषयभूतेषु पुनरुपपातकेषु सार्द्धसप्त प्राजापत्याः प्र





त्याम्नायाश्च धेन्वादयस्तावंत एव प्राजापत्ये तु गामेकां दद्यात् सांतपने द्वयम् पराक तप्तकृच्छ्रातिकृच्छ्रेतिस्रस्तु गास्तथेति चतुर्विंश
तिमतेभिधानात् एतच्चैकैकं ग्रासमश्नीयादित्यामलकपरिमितैकैकग्रासपक्षे वेदितव्यम् पाणिपूरान्नभोजनपक्षे पुनर्धेनुद्वयमेव प्रा
जापत्यस्य षडुपवासतुल्यत्वात् द्विगुणत्वाच्चातिकृच्छ्रस्य यद्यपि नवसु दिवसेषु पाणिपूरान्नभोजनं तथापि नैरंतर्येण द्वादशदिवसा-
नुष्ठाने क्लेशातिशयषडहोपवाससमानप्राजापत्यद्वयतुल्यत्वमेव प्राजापत्यस्य षडुपवासतुल्यत्वं युक्तमेव तथाहि प्रथमे त्र्यहे सा
यंतनभोजनत्रयनिवृत्तावेकोपवाससंपत्तिः द्वितीये त्र्यहे प्रातःकालभोजनत्रयवर्जने परस्य तथा अयाचितत्र्यहेपि सायंतनभोजन
त्रयवर्जनेन्यस्येत्येवं नवभिर्दिनैरुपवासत्रयम् ततश्चांत्यत्र्यहोपवासत्रयमिति युक्तं षडुपवासतुल्यत्वम् ऋषभैकादशगोदानस
हितत्रिरात्रोपवासात्मकगोव्रते तु सार्द्धैकादश प्राजापत्यास्तावत्संख्याकाश्चोपवासादयः प्रत्याम्नायाः मासपयोव्रते तु सार्द्धं प्राजाप
त्यद्वयम् पराकात्मके तूपपातकव्रते प्राजापत्यत्रये पराकं न स्यादिति कृच्छ्रस्थाने कृच्छ्रत्रयं चरेत् सांतपनस्य चाप्यर्द्धमशक्तो व्रतमा
चरेदिति षट्त्रिंशन्मतेभिधानात् चांद्रायणपराककृच्छ्रातिकृच्छ्रास्तु प्राजापत्यत्रयात्मकद्वादशवार्षिकव्रतस्थाने विंशत्युत्तरशतसं-
ख्या अनुष्ठेयाः तत्प्रत्याम्नायास्तु धेन्वादयस्त्रिगुणाः अतिपातकेषु नवतिसंख्याकाश्चांद्रायणादयः तत्समेषु पुनः पातकपदाभि
धेयेषु षष्टिसंख्याः उपपातकेषु त्रैवार्षिकविषयेषु त्रिंशत्संख्याः त्रैमासिकेषु गोव्रतस्थानेषु गोमूत्रस्नानादीनि कर्तव्यतावाहुल्या-
च्चांद्रायणादित्रयम् मासिकव्रते तु योगीश्वरोक्त एकमेव चांद्रायणम् धेनूदवासादिप्रत्याम्नायस्तु सर्वत्र त्रिगुण एव प्रकीर्णकेषु पुनः

प्रतिपदोक्तप्रायश्चित्तानुसारेण प्राजापत्यं पादादिकस्य योजनीयम् आवृत्तौ पुनश्चांद्रायणादिकमिति एतद्विगवलंबनेनान्यत्रापि-
कल्पना कार्या यत्तु बृहस्पतिनोक्तम् जन्मप्रभृति यत्किंचित्पातकं चोपपातकम् तावदावर्त्तयेत्कृच्छ्रं यावत्षड्गुणमेवेदिति न-
इद्वेपरदार इति गौतमोक्तद्वैवार्षिकसमानविषयम् तथा त्रैमासिकादिविषयभूतोपपातकावृत्तिविषयं वा पातकपदाभिधेयचांडाला-
दिस्त्रीगमेद्विरभ्यासविषयं च तत्र ज्ञानात्कृच्छ्राब्दं शुद्धिष्टमज्ञानाद्दैवद्वयमिति सकृद्बुद्धिपूर्वगमने कृच्छ्राब्दविधानात् तदभ्यासेद्वि-
वर्षतुल्यषष्टिकृच्छ्रविधानं युक्तमेव यत्तु सुमंतुनोक्तम् यदन्यत्सकृदभ्यस्तं बुद्धिपूर्वमघं महत् तच्छुद्ध्यत्यब्दकृच्छ्रेण महतः पातका-
दृत इति तदप्युपपातकाद्यावृत्तिविषयं तथाऽज्ञानाद्दैवद्वयमिति यमोक्तं दैवद्वयविषयभूतपातकावृत्तिविषयं वा यस्तु तपस्यस-
मर्थो धान्यसमृद्धश्च स कृच्छ्रादिव्रतानि द्विजाग्र्येभ्यो भोजनदानेन संपादयेत् तथा हि स्मृत्यंतरं कृच्छ्रायं चातिकृच्छ्रे त्रिगुणमहरह-
स्त्रिंशदेव तृतीये चत्वारिंशच्च तप्ते त्रिगुणितगुणिता विंशतिः स्यात्पराके कृच्छ्रे सांतापनाख्ये भवति षडधिका विंशतिः सैव हीना ह्रास्यां चां-
द्रायणे स्यात्तपसि कृशबलो भोजयेद्विप्रमुख्यानिति अहरहरिति सर्वत्र संबंधनीयम् तृतीयः कृच्छ्रातिकृच्छ्रः अत्र प्राजापत्यादिव-
सकल्पनया विद्वद्विप्राणां षष्टिभोजनं भवति यत्तु चतुर्विंशतिमते भिहितम् विप्रा द्वादश वा भोज्याः पावकेष्टिस्तथैव च अन्या वा पा-
वनी काचित्समान्याहुर्मनीषिण इति प्राजापत्यस्थाने द्वादशानां विप्राणां भोजनमुक्तं तन्निर्धनविषयम् यच्चांद्रायणस्यापि तत्रैव प्रत्या-
म्नायेनोक्तम् चांद्रायणं मृगारिष्टिः पावनेष्टिस्तथैव च मित्रविंदा पशुश्चैव कृच्छ्रमासत्रयं तथा नित्यनैमित्तिकानां च काम्यानां चैव

कर्मणाम् इष्टीनां पशुबंधानामभावे चरवः स्मृता इति तदपि चांद्रायणाशक्तस्य यत्तु कृच्छ्रं मासत्रयं तथेति कृच्छ्राष्टकं प्रत्याम्ना-
तं तदपि बठरमूर्खविषयम् चांद्रायणं त्रिभिः कृच्छ्रैरिति दर्शितत्वादलमतिप्रसंगेन प्रकृतमनुसरामः यस्त्वभ्युदयकामो धर्मा-
र्थकाम्यनियोगनिष्पत्त्यर्थमेतच्चांद्रायणमनुतिष्ठति न पुनः प्रायश्चित्तार्थं स सोऽचंद्रसालोक्यं स्वर्गविशेषं प्राप्नोति एतच्च संवत्सरानु-
ष्ठानाभिप्रायेण एकमासस्तु विपापो विपाप्मा सर्वमेनो हंति द्वितीयमास्यादश पूर्वान्दशापरान् आत्मानं चैकविंशं पंक्तिं च पुनाति

कृच्छ्रकृत्धर्मकामस्तु महतीं श्रियमाप्नुयात् यथा गुरुक्रतुफलं प्राप्नोति सुसमाहितः ३२८

संवत्सरं चाप्त्वा चंद्रमसः सलोकतां व्रजतीति गौतमस्मरणात् ३२७ किंचाह यस्त्वभ्युदयकामः प्राजापत्यादिकृच्छ्राननुतिष्ठति
स महतीं राज्यादिलक्षणां श्रियमनुभवति यथा गुरुक्रतूनां राजसूयादीनां कर्त्ता तत्फलं स्वराज्यादिलक्षणं महत्फलं लभते तथाय-
मपि समाहितः सफलांगकलापमविकलमनुतिष्ठतीति फलमिह प्रकाशनार्थं क्रतुदृष्टांतकीर्त्तनम् सुसमाहित इत्यनेनाविकलशा-

स्त्रार्थानुष्ठानवत्काम्यकर्मनियोगवैकल्ये फलासिद्धिं द्योतयति अतोनान्यत्रप्रायश्चित्तेष्वेव यावत्संभवांगानुष्ठानमंगीकरणीयमि
तिदूरोत्सारितं प्रत्याम्नायोपादानम् कृच्छ्राद्यनुष्ठानावृत्तौ त्वधिकारिणः फलावृत्तिः कर्मण्यारंभभाव्यत्वादितिन्यायलभ्यास्थितैवे
तितदत्रविवक्षितम् ३२८ प्रागुदिताखिलार्थोपसंहारव्याजेनधर्मशास्त्रसाधारणादिविधीन्सार्थवादान्प्रार्थनावरदानरूपेणप्र-

श्रुत्वैतानृषयोधर्मान्याज्ञवल्क्येनभाषितान् इदमूचुर्महात्मानंयोगींद्रममितौजसम् ३२९

तिपादयितुमाह अत्रहिवर्णाश्रमादिव्यावृत्त्याधर्माःषट्प्रकाराःप्रतिपादिताः तानखिलान्योगीश्वरप्रतिपादितान्ऋषयःश्रुत्वाप्रहर्षो १५८
त्फुल्लुलोचनाःस्वमहिमगुणशालिनमचिंतनीयशक्तिविषयमिदमभिधास्यमानमूचिवांसः ३२९ ७२ ७२ ७२ ७२

इत्थमृज्वर्थैःश्लोकैःसामश्रवःप्रभृतयोनेकधाप्रार्थयंतेस्म ३३० ३३१ ३३२ ३३३ अपरामपिप्रार्थनामाह यस्त्विदंधर्मशास्त्रं
प्रतिपर्वविद्वान्द्विजान्श्रावयेत् तस्याश्वमेधफलंभवेदितिश्रावणविध्यर्थवादः तदेतदस्मत्प्रार्थितमर्थसर्वमत्रभवाननुमन्यताम्

यइदंधारयिष्यंतिधर्मशास्त्रमतंद्रिताः इहलोकेयशःप्राप्यतेयास्यंतित्रिविष्टपम् ३३० विद्यार्थीप्राप्नुयाद्विद्यां
धनकामोधनंतथा आयुःकामस्तथावायुःश्रीकामोमहतींश्रियम् ३३१ श्लोकत्रयमपित्वस्माद्यःश्राद्धेश्रावयि
ष्यति पितृणांतस्यतृप्तिःस्यादक्षय्यानात्रसंशयः ३३२ ब्राह्मणःपात्रतांयातिक्षत्रियोविजयीभवेत् वैश्यश्चधा-
न्यधनवांस्यशास्त्रस्यधारणात् ३३३ यइदंश्रावयेद्विद्वान्द्विजान्पर्वसुपर्वसु अश्वमेधफलंतस्यतद्भवाननु
मन्यताम् ३३४ श्रुत्वैतद्याज्ञवल्क्योपिप्रीतात्मामुनिभाषितम् एवमस्त्वितिहोवाचनमस्कृत्वास्वयंभुवे ३३५

३३४ वरदानमाह एतदृषिभिर्भाषितंश्रुत्वायोगींद्रोपिनिर्मितधर्मशास्त्रसाधारणादिफलप्रार्थनोन्मीलितमुखपंकजःस्वयंभुवेब्रह्मणे-
नमस्कृत्वाप्रणम्यभवत्प्रार्थितंसकलमित्थंभवत्वित्येवकिलभगवान्बभाषे ३३५ इतिश्रीभारद्वाजपद्मनाभभट्टोपाध्यायात्मजस्य

श्रीमत्परमहंसपरिव्राजकविज्ञानेश्वरभट्टारकस्य कृतौ ऋजुमिताक्षरायां याज्ञवल्क्यधर्मशास्त्रविवृत्तौ तृतीयोऽध्यायः ३ ॥ ॥ 
अथात्राध्यायानुक्रमणिकावलिरव्यते तत्राद्यसूतकप्रकरणम् १ आपद्धर्मप्रकरणं २ वानप्रस्थप्रकरण ३ अध्यात्मप्रकरणं ४ ततः
प्रायश्चित्तप्रकरणं ५ तत्रादौ कर्मविपाकः ६ महापातकादिनिमित्तपरिगणनम् ७ महापातकप्रायश्चित्तान्यातिदेशिकसहितानि
८ उपपातकप्रायश्चित्तानि ९ प्रकीर्णकप्रायश्चित्तप्रकरण १० पतितत्यागविधिः ११ व्रतग्रहणविधिः १२ रहस्यप्रायश्चित्ताधिकारः
१३ कृच्छ्रादिलक्षणम् १४ इतिप्रकरणानि उत्तमोपपदस्येयं शिष्यस्य कृतिरात्मनः धर्मशास्त्रस्य विवृतिर्विज्ञानेश्वरयोगिनः
१ इति याज्ञवल्क्यमुनिशास्त्रगता विवृत्तिर्न कस्य विहिता विदुषः प्रमिताक्षरापि विपुलार्थवती परिषिंचति श्रवणयोरमृतम् २ गंभी
राभिः प्रसन्नाभिर्वाग्भिर्न्यस्ता मिताक्षरा अनल्पार्थाभिरल्पाभिर्विवृतिर्विहिता मया ३ नासीदस्ति भविष्यति क्षितितले कल्याणक
ल्पं पुरं नो दृष्टः श्रुत एव वा क्षितिपतिः श्रीविक्रमार्कोपमः विज्ञानेश्वरपंडितो न भजते किंचान्यदन्योपमश्चाकल्पं स्थिरमस्तु कल्पलतिकाक
ल्पं तदेतत्त्रयम् ४ स्रष्टा वाचां मधुरवपुषां विद्वदाश्चर्यसीम्नां दाता तार्थानामनिशयजुषामर्थिसार्थार्थिनायाः ध्याता मूर्तेर्मुरविजयिनो
जीवतादर्कचंद्रं जेतारीणां तनुसहभुवां तत्त्वविज्ञाननाथः ५ आसेतोः कीर्त्तिराशेरघुकुलतिलकस्याच शैलाधिराजादाच प्रत्यक्पयो
धेश्चपलतिमिकुलोत्तुंगरिंगत्तरंगात् आच प्राचः समुद्रान्नतनृपतिशिरोरत्नभाभासुरांघ्रिः पायादाचंद्रतारं जगदिदमखिलं विक्रमा १५९
दित्यदेवः ६ अंतर्मुखानयदिखानितपस्ततः किं नांतर्मुखानियदिखानितपस्ततः किम् अंतर्बहिर्यदिहरिश्चतपस्ततः किं नांतर्बहि

र्यदिहरिश्चतपस्ततः किम् ७. अथ प्रायश्चित्ताध्यायानुक्रमणिका सुवर्णस्तेयप्रायश्चित्तप्रकरणम् १ गुरुतल्पगप्रायश्चि
त्तं २ संसर्गिप्रायश्चित्त ३ महापातकप्रायश्चित्तप्रकरणम् ४ गोवधप्रायश्चित्तं ५ पारदार्यप्रायश्चित्तम् ६ क्षत्रियादिवधप्रकर
णम् ७ स्त्रीवधप्रायश्चित्त ८ उपपातकप्रायश्चित्तं ९ भक्ष्याभक्ष्यप्रायश्चित्त १० प्रकीर्णकप्रायश्चित्तं ११ प्रकाशप्रायश्चित्तप्रक
रणं १२ सुवर्णस्तेयप्रायश्चित्तं १३ गुरुतल्पगमनप्रायश्चित्तं १४ महापातकरहस्यप्रायश्चित्त १५ रहस्यप्रायश्चित्त १६ महासां
तपनकृच्छ्र १७ पर्णकृच्छ्राख्यं व्रतं १८ प्राजापत्यकृच्छ्र १९ अतिकृच्छ्र २० कृच्छ्रातिकृच्छ्र २१ सौम्यकृच्छ्र २२ चांद्रायणव्रत
म् २३ इति प्रायश्चित्तसंख्या ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

पंचाष्टसप्तभूशाके रुधिरोद्गारिवत्सरे मधुमासासिते तिथ्यां हेरंब्यां पूर्णतामियात् १ इयं मिताक्षरा मुंबय्याख्यराजधान्यां हेगिष्टेत्यु
पाह्वयैर्बापूशास्त्रिभिः स्वशिलायंत्रे मुद्रिता इति समाप्तः ॥ ॥ ॥ ॥ ॥

इति मिताक्षरायां प्रायश्चित्ताख्यस्तृतीयोऽध्यायः समाप्तः